GOVERNMENT OF INDIA

ARCHÆOLOGICAL SURVEY OF INDIA

CENTRAL
ARCHÆOLOGICAL
LIBRARY

ACCESSION NO. 9046

CALL No. Sa8Kr/Val/K.V

G.G.A. 79

INDIA

SRIMAD VĀLMĪKI RĀMĀYAṆA

A CRITICAL EDITION

With the commentary of Sri Govindarāja

AND

Extracts from many other commentaries and Readings.

9046

KISHKINDHĀKĀṆDA 4.

9046

EDITED AND PUBLISHED

BY

T. R. Krishnacharya,

Proprietor, Madhva Vilâs Book Depot, Kumbakonam.

Sa8Kr
Val/K.V.

D 3210 (b

Printed by B. R. Ghanekar for the proprietor,

at the "Nirnaya-sagar" Press, 23, Kolbhat Lane,

BOMBAY.

1912.

CENTRAL ARCHAEOLOGICAL
LIBRARY, NEW DELHI.
Acc. No. 9046
Date 24-7-57
Call No. Sa.8Kr
Vel/K.V

(Registered according to the Act XXV of 1867.)

[All rights reserved by the publisher.]

॥ श्रीः ॥

श्रीमद्वाल्मीकिरामायणम् ।

श्रीमद्गोविन्दराजीयव्याख्यानसमलंकृतम् ।

तथा

तिलकप्रभृत्यनेकापूर्वव्याख्यानोद्धृतैः

गोविन्दराजीयानुक्तापूर्वविषयैश्च संवलितम् ।

किष्किंधाकाण्डम् ४.

एतत्

कुम्भघोणस्थेन श्रीमन्मध्वविलासपुस्तकालयाधिपतिना

टी. आर्. कृष्णाचार्येण

अनेकेषां विदुषां साहाय्येन नानादेशीयकोशानुसारेण

संशोध्य

मुंबापुर्यां

तुकाराम जावजी इत्येतेषां निर्णयसागरमुद्रणयन्त्रे मुद्रयित्वा प्रकाशितम् ।

शाके १८३४ परिधाविनामसंवत्सरे ।

OFFICE OF THE DIRECTOR GENERAL OF ARCHAEOLOGY
Library Reg. No.
INDIA.

इदं पुस्तकं १८६७ संख्याकराजनियमस्य २५ संख्याकविभागानुसारतो लेखारूढं
कृत्वाऽस्य सर्वेऽधिकाराः प्रसिद्धिकर्तृभिः स्वाधीना रक्षिताः ।

श्रीः

श्रीमद्वाल्मीकिरामायणम् ।

श्रीमद्गोविन्दराजीयव्याख्यासमलंकृतम् ।

किष्किन्धाकाण्डम् ४

श्रीरामचन्द्राय नमः ॥

प्रथमः सर्गः ॥ १ ॥

पंपामुपागतेनरामेण लक्ष्मणसंबोधनेन पंपायास्तत्तीरवनादेश्च रामणीयकानुवर्णनपूर्वकमुद्दीपनसामग्रीसमुद्दीपितशोकतया सीतानुशोचनेनबहुधापरिदेवनम् ॥ १ ॥ सचिवैस्साकमृश्यमूकवासिनासुग्रीवेण पंपापरिसरचारिणोरामलक्ष्मणयोर्दर्शनम् ॥ २ ॥

स तां पुष्करिणीं गत्वा पद्मोत्पलझषाकुलाम् ॥ रामः सौमित्रिसहितो विललापाकुलेन्द्रियः ॥ १ ॥

॥ श्रीरामचन्द्रायनमः ॥ क्वाहं मन्दमतिर्गभीरमधुरं रामायणं तत्क्व व्याख्यानेऽस्य परिभ्रमन्नहमहो हासास्पदं धीमताम् । को भारोऽत्र मम स्वयं कुलगुरुः कोदण्डपाणिः कृपाकूपारो रचयत्यदः सपदि मज्जिह्वाग्रसिंहासनः ॥ श्रीरामायणराजस्य समर्प्य मणिमेखलाम् । सारोद्धारमिमं हारमर्पयिष्यामि संप्रति ॥ एवं पूर्वस्मिन्काण्डे दीनजनसंरक्षणरूपो धर्मोऽनुष्ठापितः । अथ किष्किन्धाकाण्डे मित्रसंरक्षणरूपो धर्मोऽनुष्ठाप्यते । तथा पूर्वस्मिन्काण्डे मोक्षप्रदत्वरूपं परतत्त्वचिह्नमुपदर्शितं । अत्रासंख्येयकल्याणगुणाकरत्वं प्रतिपाद्यते । वस्तुतस्तु प्रथमेकाण्डे श्रीमत्त्वं श्रीमत्पदोदीरितमुक्तं । द्वितीये सर्वजनव्यामोहविषयत्वोक्त्या नारायणशब्दार्थः । तृतीये पञ्चवटीवासपर्यन्तवृत्तान्तेन मुनिजनकृतकैङ्कर्योक्त्या चतुर्थ्यर्थ उक्तः । स्वरादिवधवृत्तान्तेन नमःशब्दार्थउक्तः । अथ मारीचदर्शनवृत्तान्तमारभ्य चेतनोज्जीवनप्रकारःप्रदर्श्यते । तत्र मारीचदर्शनवृत्तान्तेन भगवन्नित्यानुभवयोग्यस्य चेतनस्याप्राप्तविषयप्रावण्यं । तेन रावणरूपमहामोहाक्रमणं । जटायुव्यापारेण रावणानिवृत्तिकथनात् केवलकर्मणा संसारस्यानिवर्त्यत्वम् । लङ्काप्रवेशेन सांसारिकशरीरप्रवेशः । एकाक्ष्येककर्णीप्रभृति व्यापारैस्तापत्रयाभिहतिः । रामान्वेषणेन भगवतश्चेतनोज्जीवनोपायचिन्तनं चोक्तमारण्यकाण्डे । अथाचार्यमुखेन चेतनस्य स्वविषयभक्त्युत्पादनकृते तदन्वेषणमुच्यते किष्किन्धाकाण्डे ॥ तत्र प्रथमे सर्गे नित्यकैङ्कर्यपरनित्यसूरिदर्शनेन एतत्तुल्यभोगस्य प्राप्ताजीववर्गः किमिति न मां प्राप्त इति भगवतः क्लेशातिशयं दर्शयति । स

तनि० पद्मेतिसीतायामुखानुस्मरणं । उत्पलेतिनेत्रानुस्मरणं । झषेतिनेत्रचाञ्चल्यानुस्मरणं । सौमित्रेइतितस्यदुःखाविष्करणपात्रत्वंचव्यज्यते ॥ **ती०** सः विराधखरत्रिशिरोदूषणकबन्धादीनामयत्नसंहारप्रसिद्धपराक्रमयुक्तःश्रीरामः । तां चिकीर्षितरावणवधोपयोगिसुग्रीवाधिष्ठितऋश्यमूकसमीपवर्तिनीं । पुष्करिणीं पंपां । आकुलेन्द्रियः पुष्करिणीदर्शनजनितसीताविरहशोकातिशयेनक्षुभितसर्वेन्द्रियस्सन् विललाप परिदेवयामास ॥ **टीका०** अस्मिन्किष्किन्धाकाण्डेतदेवसुग्रीवसख्यंवक्तुमनाःप्रसङ्गात्पुरुषधौरेयाणामपीष्टजनवियोगिनांकामोद्दीपकदर्शनेनचित्तविभ्रमोभवतीतिसूचनायपंपावर्णनमुखेनरामस्यचित्तविभ्रमंदर्शयितुमुपक्रमते—**सतामिति** ॥ **ति०** पुष्करिणीं पंपानद्यन्तरगतंपंपाख्यं मतङ्गाख्यंवा सरोविशेषः ॥ **सत्य०** यद्वा सतामेवोपभोग्यांपुष्करिणीं ॥ १ ॥

[पा०] १ क. ग. सौमित्रिणासार्धं.

तस्य दृष्ट्वैव तां हर्षादिन्द्रियाणि चकम्पिरे ॥ स कामवशमापन्नः सौमित्रिमिदमब्रवीत् ॥ २ ॥
सौमित्रे शोभते पम्पा वैडूर्यविमलोदका ॥ फुल्लपद्मोत्पलवती शोभिता विविधैर्द्रुमैः ॥ ३ ॥
सौमित्रे पश्य पम्पायाः काननं शुभदर्शनम् ॥ यत्र राजन्ति शैलाभा द्रुमाः सशिखरा इव ॥ ४ ॥
मां तु शोकाभिसंतप्तं माधवः पीडयन्निव ॥ भरतस्य च दुःखेन वैदेह्या हरणेन च ॥ ५ ॥
शोकार्तस्यापि मे पम्पा शोभते चित्रकानना ॥ व्यवकीर्णा बहुविधैः पुष्पैः शीतोदका शिवा ॥६॥
नलिनैरपि संछन्ना श्लेष्यर्थं शुभदर्शना ॥ सर्पव्यालानुचरिता मृगद्विजसमाकुला ॥ ७ ॥
अधिकं प्रतिभात्येतन्नीलपीतं तु शाद्वलम् ॥ द्रुमाणां विविधैः पुष्पैः परिस्तोमैरिवार्पितम् ॥ ८ ॥

एकाकी न रमेतेति युक्तं । सतामित्यादि । पद्मोत्पलद्वयैः कमलेन्दीवरमल्लैः आकुलां । तां पम्पाख्यां । पुष्करिणीं सरसीं । गत्वा । मुखनयनकटाक्षवत्याः कान्तायाः स्मारकत्वेन व्याकुलेन्द्रियः मोहं प्रसादं च प्राप्तः । स रामः तादृशधैर्यविशिष्टोपि । सौमित्रिसहितः आश्वासकान्तरङ्गपुरुषसहितोऽपि विललाप ॥ १ ॥ आकुलेन्द्रिय इत्येतद्विशृण्वन्नाह—तस्येति ॥ दृष्ट्वा स्थितस्य तस्य । इन्द्रियाणि हर्षाधकम्पिरे च्युतानीत्यर्थः ॥ २ ॥ प्रलापप्रकारमाह—सौमित्रे इत्यादिना ॥ अनेन भक्तिद्रुतहृदयस्तत्सूचकमुखप्रसादः सपरिकरः पुरुष उच्यते ॥ ३ ॥ यत्र कानने । सशिखरा इव उन्नताग्रशाखाभिः सन्मृङ्गा इव स्थिताः । अतएव शैलाभाः । अनेन भगवद्व्यापारसोपजीविन आचार्याः तदुपजीविनोऽन्तेवासिनश्चोच्यन्ते । " अत्र परत्र चापि " इति न्यायेन नित्यविभूतावपि शिष्यवर्ग सिद्धं ॥ ४ ॥ भरतस्य दुःखेन नगराद्बहिर्व्रतोपवासादिनियमकृतदुःखेन । वैदेह्याः हरणेन च पूर्वमेव संतप्तं मां । माधवो वसन्तः । तु विशेषेण पीडयन्निवभवतीत्यर्थः । वस्तुतः पीडाभावाविवशब्दः । अनेन संसारतो जीवस्य दुःखेन दुःखितत्वमुक्तं ॥ ५ ॥ सर्वेषुमद्भक्तेषु सुखं वसत्सु किमर्थमेते संसारिणः क्लिश्यन्तीत्यभिप्रायेणाह—शोकार्तस्येत्यादिना ॥ शोकार्तस्यापि मे मयि शोकार्तेपि । शोभते । व्यर्थमेव शोभेति भावः ॥ ६ ॥ अपिशब्देन कुमुदादिकं समुच्चीयते । व्यालोऽजगरः । सर्पव्याला एवानुचराः ते अस्य संजाता इति सर्पव्यालानुचरिता । सर्पव्यालानुचरितत्वेपि नलिनसंछन्नत्वादत्यर्थं शुभदर्शना भवतीत्यर्थः । अनेन ज्ञानिनो यःकश्चिद्दोषोऽपि नतस्यहेयतापादक इत्युक्तं । "तेषां तेजोविशेषेण प्रत्यवायो न विद्यते" इति स्मृतेः ॥७॥ एतदिति परिसरप्रदेशमङ्गुल्या निर्दिशति । नीलपीतमिति । मयूरकण्ठवर्ण इत्युच्यते । परिस्तोमैः कुथैः ।

ति० चकंपिरे उद्रिक्तविकाराणीवाभूवन् । कामवशमापन्नइव ॥ शि० हर्षात् सीतावयवसदृशपङ्कजादिदर्शनजनितप्रमोदात् । इन्द्रियाणि चकंपिरे चचलतामापुः । अतएव कामवशं सीतादर्शनविषयकातीच्छाहेतुकतदन्वेषणजनितविविधचेष्टोपलक्षितशोभाविशेषं ॥ २ ॥ ति० वैडूर्यवत् तत्प्रभावत् निर्मलोदका । पंपा तदाख्यसरोवरावच्छिन्नार्पपानदी । तच्चलसौपाधिकश्यामलप्रतिभासाद्वैडूर्यप्रभासादृश्यं । उपाधिमाह—फुल्लेति । द्रुमादिच्छायायातथाभावं ॥ ३ ॥ ति० पंपायाःकाननं तत्परिसरवर्तिकाननं । यत्र कानने । सशिखराइव उन्नताग्रशाखाभिःसन्मृङ्गाइवद्रुमाः शैलावा शैलाइव राजन्ति ॥ स० शैलानां प्रलम्बतपर्वतानां आभायैस्तेशैलाभाः महापर्वताः । सशिखराः महापर्वतवद्विद्यमानाः ॥ ४ ॥ रामानु० भरतस्यदुःखेन प्रार्थनाभङ्गजनितभरतसंबन्धिदुःखेन । माधवः पीडयन्निव वर्ततइतिशेषः । इवशब्दोवाक्यालङ्कारे । आधवः पीडयन्तिवैद्इतिपाठे वक्ष्यमाणवसन्तवर्णनसारस्यंनास्ति ॥ स० भरतस्यदुःखेन तद्वियोगजनितेन ॥ ति० शोकाभिसंतप्तं राज्यभ्रंशसीताविरयोगादिनाशोकतप्तं । आधवःपीडयन्तीत्युक्तं । तानाधीनाह—भरतस्येति । दुःखेन जटावल्कलादिदुःखस्मरणेन ॥ शि० भरतस्यदुःखेन मद्वियोगजनितभरतक्लेशस्मरणेन ॥ ५ ॥ पंपा शोकार्तस्यापिमेशोभते । एतेन सीतावयवसदृशकमलादिदर्शनेनशीतैवदृश्यत इतिस्वभावनासूचिता ॥ रामानु० शोभते अतिरमणीयतयाहृदयङ्गमाभवतीत्यर्थः ॥ ६ ॥ ति० व्यालाः श्वापदाः ॥ स० व्यालाः वनगजाः सर्पाश्च । सर्पन्तोव्यालाइतिवा । ती० सर्पाः बहुफणाः । तदन्ये व्यालाः ॥ ७ ॥ ति० द्रुमाणामुच्छ्रितैरितिपाठे उच्छ्रितयन्त्रैः । यद्वा परिस्तोमैः परिस्तोमभूतैः राशीभूतैरिवस्थितैःपुष्पैः अर्पितंयुक्तं ॥ शि० विविधैः पुष्पैः अर्पितं

[पा०] १ च. ज. तस्यदृष्टवतो. छ. झ. तत्रदृष्टैव. २ क. च. छ. झ. ट. शैलाबा. ३ घ. माहि. ४ क. ख. ग. ङ.—ट. व्याधयःपीडयन्तिवै. ५ ख. शोकेन. ६ ख. प्रविकीर्णा. ७ क. शीतोदकैः. ८ क. च. ज. ञ. संकीर्णा. ९ क. ङ. च. ज. ञ. श्लक्ष्णशुभ. झ. ट. श्लक्ष्णशुभ. ग. अत्यन्तंशुभ. १० क. ग. ङ.—ज. ञ. ट. प्रविभात्येतत्.

पुष्पभारसमृद्धानि शिखराणि समन्ततः ॥ लताभिः पुष्पिताग्राभिरुपगूढानि सर्वतः ॥ ९ ॥
सुखानिलोऽयं सौमित्रे कालः प्रचुरमन्मथः ॥ गन्धवान्सुरभिर्मासो जातपुष्पफलद्रुमः ॥ १० ॥
पश्य रूपाणि सौमित्रे वनानां पुष्पशालिनाम् ॥ सृजतां पुष्पवर्षाणि [1]तोयं तोयमुचामिव ॥ ११ ॥
प्रस्तरेषु च रम्येषु विविधाः काननद्रुमाः ॥ वायुवेगप्रचलिताः पुष्पैरवकिरन्ति गाम् ॥ १२ ॥
पतितैः पतमानैश्च पादपस्थैश्च मारुतः ॥ कुसुमैः पश्य सौमित्रे क्रीडन्निव समन्ततः ॥ १३ ॥
विक्षिपन्विविधाः शाखा नगानां [2]कुसुमोत्कचाः ॥ मारुतश्चलितस्थानैः षट्पदैरनुगीयते ॥ १४ ॥
मत्तकोकिलसन्नादैर्नर्तयन्निव पादपान् ॥ शैलकन्दरनिष्क्रान्तः [3]प्रगीत इव चानिलः ॥ १५ ॥
तेन विक्षिपताऽत्यर्थं पवनेन समन्ततः ॥ अमी संसक्तशाखाग्रा ग्रथिता इव पादपाः ॥ १६ ॥
[4]सँ एष सुखसंस्पर्शो वाति चन्दनशीतलः ॥ गन्धमाँभ्यावहन्पुण्यं श्रमापनयनोऽनिलः ॥ १७ ॥

"परिस्तोमःकुथोद्वयोः" इत्यमरः । अनेन नानागुरुमुखलब्धज्ञानतया भगवद्वासयोग्यः पुरुष उच्यते ॥ ८ ॥ शिखराणि वृक्षाग्राणि । समन्ततः सर्वत्रप्रदेशे । आमूलाग्रं उपगूढानि शोभन्तइतिशेषः । अनेन गार्हस्थ्येऽपि निरवधिकबोधा उच्यन्ते ॥ ९ ॥ सुखेति अनेन जनकादिवदैश्वर्ये सत्यपि भगवज्ज्ञानरत उच्यते ॥१०॥ तोयं सृजतां तोयमुचां रूपाणीवेति पूर्णोपमा । अनेन परोपदेशप्रवृत्ता आचार्या उच्यन्ते ॥११॥ प्रस्तरेषु पाषाणेषु । गां भूमिं प्रस्तरभूमिमित्यर्थः । अनेन कठिनहृदयेष्वपि दयावशात् ज्ञानवर्षिणउच्यन्ते ॥ १२ ॥ पतमानैः पतद्भिः । अनेन सर्वगुरुप्रेरणैकलीलःसर्वान्तर्याम्युच्यते ॥ १३ ॥ कुसुमोत्कचाः कुसुमोत्कटाः । विक्षिपन् कम्पयन् । मारुतः चलितस्थानैः स्वस्थानकुसुमोच्चालितैः । षट्पदैः अनुगीयते । अनेन "ज्ञानीत्वात्मैवमेमतं" इत्यात्मभूतज्ञानिनां भक्तिवृद्धये भगवति भुवमवतीर्णे "इमाँल्लोकान्कामान्नीकामरूप्यनुसंचरन् । एतत्साम गायन्नास्ते" इत्युक्तरीत्या तमनुगच्छन्भक्तलोक उच्यते ॥ १४ ॥ मत्तकोकिलसन्नादैः मुखवाद्यस्थानीयैः । पादपान्नर्तयन् । शैलकन्दरनिष्क्रान्ततया तन्निष्क्रमणध्वनियुक्तया । प्रगीतइव गातुमुपक्रान्त इव । "आदिकर्मणि क्तःकर्तरिच" इति कर्तरि निष्ठा । यद्वा पादपान् नर्तयन् नर्तयितुमिव । "लक्षणहेत्वोः—" इतिशतृप्रत्ययः । मत्तकोकिलसन्नादैः प्रगीतः प्रहृष्टगीतः सन् । शैलकन्दरात् नैपथ्यस्थानान्निष्क्रान्तः । अनेन वेदप्रवर्तनमुखेन लोकस्य भक्त्युत्पादनाय वैकुण्ठादवतीर्णो भगवानित्युच्यते ॥ १५ ॥ विक्षिपता विविधं प्रेरयता । पवनेन । अत्यर्थं समन्ततः संसक्तशाखाग्रा अमी पादपाः ग्रथिताः मालावन्निबद्धाइवभान्ति । अनेन भगवत्कृपया परस्परमनुरक्ताभागवताउच्यन्ते ॥ १६ ॥ मन्दमारुतं वर्णयति —स एष इति ॥ स्पार्शनप्रत्यक्षत्वादेष इत्युक्तिः ।

युक्तं । अतएवनीलपीतं एतत् शाद्वलं अधिकमेवप्रविभाति । इवएवार्थे ॥ ८ ॥ **स०** उपगूढानीत्यनेन स्वस्यसीतालिङ्गनजन्यस्वाभावंसूचयति ॥ ९ ॥ **ति०** अयंकालः वसन्तः । प्रचुरमन्मथः कामोद्दीपकः । अतएव गन्धवान् गर्ववान् । "गन्धोगन्धकआमोदेलेशेसंबन्धगर्वयोः" इति । सुरभिर्मासः मधुमासः । जातानिपुष्पफलानियत्रताद्दग्द्रुमः ॥ **स०** प्रचुरः उद्दीपितः मन्मथोयस्मिन्सः ॥ **शि०** अयंमासः चैत्रइत्यर्थः । कालः वियुक्तानांचित्तविक्षेपहेतुः अस्तीतिशेषः । क्षेपणार्थककलधातुप्रकृतिकणिजन्तप्रकृतिकोच् ॥ १० ॥ **ति०** प्रस्तरेषु समशिलातलेषु ॥ १२ ॥ **शि०** पश्य "पश्यमृगोधावति" इतिवत्प्रयोगः ॥ १३ ॥ **रामानु०** षट्पदैरिवनीयतइतिपाठः । नीयतइवपुष्परसोत्कण्ठयास्तूयतइव । अनुगीयतइतिपाठे अनुस्तूयगीयतइत्यर्थः ॥ **कतक०** कुसुमोत्कचाइतिपाठे कुसुमैरुद्भूतकचाः संजातकेशाइवेत्यर्थः । **स०** चलितस्थानैः वायुवेगेनशाखाद्विपुद्गतस्ततोगतेषुसत्सुचलितस्थानैःभ्रमरैः अनुगीयतइवदृश्यते ॥ **शि०** शाखाः विक्षिपन्चालयन्मारुतः चलितस्थानैः कुसुमेभ्यः कुसुमान्तराणिप्राप्तैः षट्पदैःअनुगीयते गानेनप्रशस्यतइवेत्यर्थः ॥ १४ ॥ **रामानु०** अत्रवायोर्नर्तकगायकसाधर्म्यमुच्यते । नर्तयितुंमुखवाद्यस्थानीयैर्मत्तकोकिलसंनादैः पादपान्नर्तयन्निव ॥ **शा०** प्रगीयते गानंकरोति ॥ **ति०** अत्रवायोर्गानकर्तृत्वेननर्तकाचार्यसाधर्म्यमुच्यते ॥ १५ ॥ **टीका०** विक्षिपता द्रुमाग्राणीतिशेषः ॥ १६ ॥ **रामानु०** पूर्वश्लोकेविक्षिपतेतिपठितं वायोस्तीव्र-

---

[**पा०**] १ क. ग. छ. झ. ट. वर्षं. २ क. ग. ङ.—ट. क्रीडतीव. ३ क. ग. द्रुमाणां. ४ ङ. छ. ट. कुसुमोत्कटाः. च. कुसुमोत्कराः. ५ ट. प्रगीयतइवानिलः. ६ झ. ञ. ट. सएव. ७ ख. ग. ङ.—ट. मभ्यवहन्पुण्यं.

अमी पवननिक्षिप्ता विनदन्तीव पादपाः ॥ षट्पदैरनुकूजन्तो वनेषु मधुगन्धिषु ॥ १८ ॥
गिरिप्रस्थेषु रम्येषु पुष्पवद्भिर्मनोरमैः ॥ संसक्तशिखराः शैला विराजन्ते महाद्रुमैः ॥ १९ ॥
पुष्पसंछन्नशिखरा मारुतोत्क्षेपचञ्चलाः ॥ अमी मधुकरोत्तंसाः प्रगीता इव पादपाः ॥ २० ॥
पुष्पिताग्रांस्तु पश्येमान्कर्णिकारान्समन्ततः ॥ हाटकप्रतिसंछन्नान्नरान्पीताम्बरानिव ॥ २१ ॥
अयं वसन्तः सौमित्रे नानाविहगनादितः ॥ सीतया विप्रहीणस्य शोकसंदीपनो मम ॥ २२ ॥
मां हि शोकसमाक्रान्तं सन्तापयति मन्मथः ॥ हृष्टः प्रवदमानश्च मामाह्वयति कोकिलः ॥ २३ ॥
एष नत्यूहको हृष्टो रम्ये मां वननिर्झरे ॥ प्रणदन्मन्मथाविष्टं शोचयिष्यति लक्ष्मण ॥ २४ ॥
श्रुत्वैतस्य पुरा शब्दमाश्रमस्था मम प्रिया ॥ मामाहूय प्रमुदिता परमं प्रत्यनन्दत ॥ २५ ॥

चन्दनशीतलः मलयगतचन्दनेनशीतलः दक्षिणमारुतइत्यर्थः । चन्दनवच्छीतलोवा । गन्धं पुष्पगन्धं । पुण्यं रम्यं । सुखसंस्पर्श इत्यनेन मान्द्यमुक्तं । एवं शैलमान्द्यसौरभ्यवान् । अतएव श्रमापनयनः। अनेन "सर्वगन्धःसर्वरसः—" इत्युक्तस्य भगवतो भक्तेषु सान्निध्यमुक्तं॥१७॥ अमीइति ॥अनेन भगवदनुभवबलात्कारेण " एतत्सामगायन्नास्ते " इत्युक्तसामगानरसिकाउच्यन्ते ॥ १८ ॥ गिरिप्रस्थेषु निजप्रस्थेष्वित्यर्थः । तदुत्पन्नैर्द्रुमैः संसक्तशिखराः परस्परसंश्लिष्टाग्राः । शैलाभान्ति महान्तः पुष्पराशयइवभान्तीत्यर्थः । अनेन सर्वेषां ज्ञानिनामेककण्ठत्वमुक्तं ॥ १९ ॥ मधुकरा एव उत्तंसाः शेखराणि येषां ते । " पुंस्युत्तंसावतंसौ द्वौ कर्णपूरेपि शेखरे " इत्यमरः । पुष्पावृतशिखोपरिनीलोष्णीषधारिणः सगीतिकंनृत्यन्तइवभान्तीत्यर्थः । अनेन भगवद्भक्त्यानर्तनपरा गम्यन्ते ॥ २० ॥ पुष्पिताग्रान् पुष्पितोपरिप्रदेशान् । अतएव हाटकसंच्छन्नान् पीताम्बरांश्च नरानिवपश्य । पुष्पिताग्राः कर्णिकाराः सुवर्णवस्त्राभरणवन्तइवभान्तीत्यर्थः । अनेन भगवत्सारूप्यं गताउच्यन्ते ॥ २१ ॥ एवं मद्भक्तेषु सर्वेषु मदनुभवतृप्तेषु बद्धा मांदुःखीकुर्वन्तीत्याह—अयमिति ॥ इदानींवसन्तवर्णनेन नगरनिर्गममारभ्य त्रयोदशवत्सरागताइतिगम्यते ॥ २२ ॥ एवं वासन्तपुष्पसमृद्धिं वर्णयित्वा तथैवोद्दीपनभूतपक्षिरवानह—मामित्यादिना ॥ पूर्वार्धं स्पष्टं । मां शोकिनंमां । हृष्टः कोकिलः प्रवदमानः प्रवदन् विजयघोषं कुर्वन्सन् । आह्वयति स्पर्धतइवेतिगम्योत्प्रेक्षा । ज्ञानैकवत्सलं मामविज्ञाय केवलं कर्मठा मांस्पर्धन्तइतिभावः ॥ २३ ॥ नत्यूहकः कुक्कुटभेदः । वननिर्झरे प्रणदन्नित्यन्वयः । अनेन केवलजपपराउच्यन्ते। ज्ञानभक्तयोरेव भगवतः सद्यःप्रीत्यावहत्वात् साधनान्तरपरो नातिप्रिय इतिरहस्यं । " ज्ञानी त्वात्मैव मे मतं" "भक्तिक्रीतो जनार्दनः" इत्यादिवचनात् ॥ २४ ॥ किमयं सर्वदेत्थं शोकावहः नेत्यह—श्रुत्वेति ॥ श्रुत्वा प्रमुदिता प्रिया

गतिलंनिवारयति—सएषइति । अचक्षुर्विषयेत्वनिले एषइतिनिर्देशस्तदानींतनानांसान्द्रपरागदर्शनात् ॥ १७ ॥ रामानु० गिरिप्रस्थेष्विति । अत्राविवक्षितसंबन्धप्रस्थेष्वित्यर्थः ॥ तत्रोत्पन्नैर्महाद्रुमैः संसक्तशिखराइतिसंबन्धः । अनेनद्रुमाणामौन्नत्यंसूचितं ॥ १९ ॥ टीका० हाटकप्रतिसंछन्ना अत्रहाटकशब्देनतन्मयान्याभरणानि ॥ वि० हाटकसंछन्नान् पीतांबरांश्चनरानिवपश्य । पुष्पिताग्राःकर्णिकाराः सुवर्णवस्त्राभरणाइवभान्तीत्यर्थः ॥ २१ ॥ ति० हृष्टंयथातथाप्रवदमानः समाह्वयति स्पर्धयेवेत्यर्थः ॥ शि० शोकसमाक्रान्तंमांमन्मथः मन्निष्ठमदापहारित्वंसंतापयति सीतापहर्तृविज्ञानमन्तराऽवस्थितिंनलभतइत्यर्थः ॥ हृष्टंयथाभवतितथाप्रवदमानःकोकिलः समाह्वयति प्रिययासंयोक्तुंप्रेरयतीवेत्यर्थः॥२३॥ ती० नत्यूहः जलकुक्कुटः ॥ ति० हृष्टः कामावेशेन ॥ शि० हृष्टएषदात्यूहकः जलकुक्कुटः । प्रणदन्सन् मन्मथाविष्टं मदापहारकत्वविशिष्टंमां शोषयिष्यति प्रियापहारिणोविशेषज्ञानाभावात्तन्मदापहरणस्याशक्यतयाशोकएवतिष्ठतीत्यर्थः ॥ २४ ॥ ति० मामाहूय प्रदर्शनार्थमितिशेषः ॥ २५ ॥

[पा०] १ क.—ट. विक्षिप्ता. २ ख. छ. ज. विचरन्तीव. ३ क. ग. छ—ट. रनुकूजद्भिः. ४ ख. संरूढैः. ५ ग.—ट. विराजन्ति. ६ क. ख. छ. झ. ट. सुपुष्पितांस्तुपश्यैतान्. घ. ङ. च. ज. ञ. सुपुष्पितांस्तु. ७ क. ग. काराननेकशः. ८ क. छ.—झ. ञ. ट. हृष्टं. ९ घ. प्रयतमानश्च. १० क. छ. ज. ञ. ट. समाह्वयति.

एवं विचित्राः[1] पतगा नानारावविराविणः ॥ वृक्षगुल्मलताः पश्य संपतन्ति ततस्ततः ॥ २६ ॥
विमिश्रा विहगाः[2] पुंभिरात्मव्यूहाभिनन्दिताः[3] ॥ भृङ्गराजप्रमुदिताः[4] सौमित्रे मधुरस्वराः[5] ॥ २७ ॥
[अस्याः[6] कूले प्रमुदिताः संघशः शकुनास्त्विह ॥] नत्यूहरुतविक्रन्दैः[7] पुंस्कोकिलरुतैरपि ॥
स्वनन्ति पादपाश्चेमे ममानङ्गप्रदीपनाः[8] ॥ २८ ॥
अशोकस्तबकाङ्गारः षट्पदस्वननिःस्वनः ॥ मां हि पल्लवताम्रार्चिर्वसन्ताग्निः प्रधक्ष्यति ॥ २९ ॥
न हि तां सूक्ष्मपक्ष्माक्षीं सुकेशीं मृदुभाषिणीम् ॥ अपश्यतो मे सौमित्रे जीवितेऽस्ति[9] प्रयोजनम् ॥ ३० ॥
अयं हि दयितस्तस्याः[10] कालो रुचिरकाननः ॥ कोकिलाकुलसीमान्तो दयिताया ममानघ ॥ ३१ ॥
मन्मथायाससंभूतो वसन्तगुणवर्धितः ॥ अयं मां धक्ष्यति क्षिप्रं शोकाग्निर्[11]नचिरादिव ॥ ३२ ॥
अपश्यतस्तां दयितां[12] पश्यतो रुचिरद्रुमान्[13] ॥ ममायमात्मप्रभवो भूयस्त्वमुपयास्यति ॥ ३३ ॥
अदृश्यमाना वैदेही शोकं वर्धयते[14] मम ॥ दृश्यमानो वसन्तश्च स्वेदसंसर्गदूषकः ॥ ३४ ॥
मां[15] ह्यद्य मृगशावाक्षी चिन्ताशोकबलात्कृतम् ॥ सन्तापयति सौमित्रे क्रूरश्चैत्रो[16] वनानिलः ॥ ३५ ॥

मामाहूय परमं प्रकामं प्रत्यनन्दत । नत्यूहरवाकर्णनोद्दीपिता मामाहूय विविधं क्रीडारसमनुभूतवतीत्यर्थः । अनन्यप्रयोजनस्य जपः प्रीत्यावहइतिभावः ॥ २५—२६ ॥ विहगाः स्त्रियः । पुंभिः पुंविहगैः । विमिश्राः आश्लिष्टाःसत्यः । आत्मव्यूहाभिनन्दिताः अनुरूपेण कान्तेन सहितासीत्येवंसजातीयैःश्लाघिताः । भृङ्गराजप्रमुदिताः भृङ्गराजझङ्कारश्रवणसन्तुष्टाः । तदुद्दीपनेन मधुरस्वराः रम्यरतिकूजिताः । वर्तन्ते एतान्पश्येति शेषः । अनेनाचार्यपरतन्त्राःसामगानपरा उच्यन्ते ॥ २७ ॥ विक्रन्दैः शब्दैः । स्वनन्ति स्वनन्तीव । अनेन नानाविधभगवन्नामकीर्तनपराः श्लाघ्यन्ते ॥ २८ ॥ षट्पदस्वननिःस्वन इति । अग्नेः निःस्वनवत्त्वं ज्वलनावस्थायां दृष्टं । अनेन स्वप्रेमजनकभक्तियुक्ता उच्यन्ते ॥ २९ ॥ नहीति । एतेष्वेवं मत्प्रेमपरतन्त्रेषु संसारिचेतनो दुःखमनुभवतीत्येतन्ममासह्यमिति भावः ॥ ३० ॥ अयं कालो मम दयितायाः रुचिरोहि प्रियतरोहीत्यर्थः । यदीहेदानींदयितास्यात्तदातीव तुष्येदितिभावः । कोकिलाकुलसीमान्तः कोकिलरवाकुलचतुःसीम इत्यर्थः ॥ ३१ ॥ मन्मथायाससंभूतः मदनपीडाजनितः । वसन्तस्य गुणेन रामणीयकेन वर्धितः । क्षिप्रं धक्ष्यति नतुचिरात् । इवशब्दोवाक्यालंकारे ॥ ३२ ॥ आत्मप्रभवः मन्मथः । भूयस्त्वं प्रवृद्धत्वं ॥ ३३ ॥ दृश्यमानः पुष्पादिद्वारा । स्वेदसंसर्गदूषकः मलयमारुतद्वारास्वेदसंबन्धनिवर्तकः । रतिश्रान्तिहरइत्यर्थः ॥ ३४ ॥ क्रूरः मन्मथोद्दीपकत्वात् । अत्र चकारोद्रष्टव्यः ॥ ३५ ॥

स० वृक्षगुल्मलताइतिद्वितीयाबहुवचनं ॥ २६ ॥ ति० यद्वा भृङ्गराजसंबन्धेनप्रमुदिताःमधुरस्वराभृङ्ग्यश्चात्रसन्तीतिशेषः ॥ २७ ॥ ति० दात्यूहानांरतिसंबन्धिनोविक्रन्दाः दात्यूहरतिविक्रन्दास्तैः । शि० दात्यूहानां रतिविक्रन्दैः प्रीत्युत्पादकशब्दविशेषैः ॥ ति० दात्यूहरुतविक्रन्दैः दात्यूहगदितविरावैः ॥ २८ ॥ ती० नचिरादिवेत्यस्योत्तरश्लोकेनसंबन्धः ॥ शि० मन्मथायाससंभूतः मन्मथेनस्वनिष्ठमदमथनसामर्थ्यनिरोधेनयआयासः तन्निरोधजनितश्रमः तस्मात्संभूतः ॥ ३२ ॥ शि० मम आत्मप्रभवःमनोजनितः । चिन्तेत्यर्थः ॥ ३३ ॥ ति० स्वेदसंसर्गः कामविकारजः तेनदूषयति मलिनीकरोतितादृशः । यद्वा तंदूषयति नाशयति । मलयानिलसंबन्धात्तादृशः ॥ ३४ ॥ ति० चिन्ताशोकाभ्यांबलात्कृतं बलात्कृतपीडं ॥ ती० चिन्ताशोकबलात्कृतं संततस्मरणाद्दुःखपरवशमित्यर्थः ॥ शि० चिन्ताशोकबलात्कृतं चिन्ताशोकबलहेतुकविविधकृतिमन्तं । अविवक्षितकर्मकत्वेनाकर्मकत्वात्कर्तरिनिष्ठा ॥ ३५ ॥

[पा०] १ क. च. छ. ज. ञ. विचित्राविहगाः. २ च. विहगैः. ३ च. नादिताः. ४ भृङ्गराजप्रमुदिताइत्यर्धात्पूर्वं. क. ग. पाठयोः. विचित्राविहगामत्ताःप्रवदन्तिमनस्सुखम्. इत्यर्धंदृश्यते. ५ च. ज. ञ. मधुरस्वनाः. ६ इदमर्धं घ.—छ. झ. ट. पाठेषुदृश्यते. ७ ङ. ज.—ट. दात्यूहरति. ८ ङ.—ट प्रदीपकाः. ९ च. ज. ञ. जीवितंनिष्प्रयोजनं. १० घ.—झ. ट. रुचिरस्तस्याः. ११ ङ. च. ज. झ. ञ. शोकाग्निरचिरादिव. १२ क. ग. च.—ट. वनितां. १३ ग. घ. ङ. छ.—ट. रुचिरान्द्रुमान्. १४ च. छ. ज. ञ. ट. वर्धयतीहमे. १५ क. ग. ङ.—ट. मांहिसा. घ. मांह्यसौ. १६ घ. ङ. छ. ञ. ट. क्षैत्रवनानिलः.

अमी मयूराः शोभन्ते प्रनृत्यन्तस्ततस्ततः ॥ स्वैः पक्षैः पवनोद्धूतैर्गवाक्षैः स्फाटिकैरिव ॥ ३६ ॥
शिखिनीभिः परिवृतास्त एते मदमूर्च्छिताः ॥ मन्मथाभिपरीतस्य मम मन्मथवर्धनाः ॥ ३७ ॥
पश्य लक्ष्मण नृत्यन्तं मयूरमुपनृत्यति ॥ शिखिनी मन्मथार्तैषा भर्तारं गिरिसानुषु ॥ ३८ ॥
तामेव मनसा रामां मयूरोप्युपधावति ॥ वितत्य रुचिरौ पक्षौ रुतैरुपहसन्निव ॥ ३९ ॥
मयूरस्य वने नूनं रक्षसा न हृता प्रिया ॥ तस्मान्नृत्यति रम्येषु वनेषु सह कान्तया ॥ ४० ॥
मम त्वयं विना वासः पुष्पमासे सुदुःसहः ॥ ४१ ॥
पश्य लक्ष्मण संरागं तिर्यग्योनिगतेष्वपि ॥ यदेषा शिखिनी कामाद्भर्तारं रमतेऽन्तिके ॥ ४२ ॥
मामप्येवं विशालाक्षी जानकी जातसंभ्रमा ॥ मदनेनाभिवर्तेत यदि नापहृता भवेत् ॥ ४३ ॥
पश्य लक्ष्मण पुष्पाणि निष्फलानि भवन्ति मे ॥ पुष्पभारसमृद्धानां वनानां शिशिरात्यये ॥ ४४ ॥
रुचिराण्यपि पुष्पाणि पादपानामतिश्रिया ॥ निष्फलानि महीं यान्ति समं मधुकरोत्करैः ॥ ४५ ॥

ततस्ततः तत्रतत्र प्रदेशे । पवनोद्धूतैः अतएव स्पष्टदृष्टशुभ्रनालजालत्वात् स्फाटिकैर्गवाक्षैरिव स्थितैः । यद्वा स्फाटिकैः स्फटिकप्रधानैः चन्द्रार्कपरम्परायास्तत्तुल्यत्वादितिभावः । अनेन भगवत्कृपाप्रवर्तितविविधकर्मपराउच्यन्ते ॥३६॥ शिखिनीभिः मयूरस्त्रीभिः । परिवृताः अतएव मदमूर्छिताः मदव्याप्ताः । त एते पूर्वश्लोकोक्ता एते शिखिनः । मन्मथाभिपरीतस्य पूर्वमेव मन्मथाभिव्याप्तस्य । मम पुनर्मन्मथवर्धनाः । अन्यरतिदर्शनस्योद्दीपनत्वादिति भावः । सशिष्यभक्तदर्शनं मे सर्वत्रभक्त्युत्पादनव्यामोहंजनयतीत्यर्थः ॥ ३७ ॥ पश्येत्यादिश्लोकद्वयमेकान्वयं । नृत्यन्तं स्वयंलीलारसप्रवृत्तं भर्तारं प्रति मन्मथार्ता रत्यर्थंतमाक्रष्टुकामा । शिखिनी उपनृत्यति । तामेव रामां कान्तां । मनसा उपधावति । समीपमागन्तुमिच्छतीत्यर्थः । उपधावनंचरत्यर्थमितिद्योतयति—वितत्येति । रुतैः रतिकूजितैः । उपलक्षितः । पक्षविस्तारणंचरत्यर्थव्यापारः । उपहसन्निव प्रसन्नमुख इत्यर्थः । यद्वा कान्ताविरहिणंमामुपहसन्निवेत्युत्प्रेक्षा । अत्र शिष्याचार्ययोरन्योन्यप्रावण्यमुच्यते ॥ ३८—३९ ॥ वने उपभोगयोग्ये देशेरावणः सीतां हृतवान् । नतु नगर इति हार्दो भावः । न हृता अस्यभाग्यवशादिति भावः । तस्मादित्यादि । एतादृशरम्यदेशकालेषु धन्याः कान्ताभिः क्रीडन्तीति भावः ॥ ४० ॥ अमुमेवाशयमुद्घाटयति—मम त्विति ॥ विना सीतयेति शेषः ॥ ४१ ॥ सम्यग्रागः संरागः तं कान्तानुरागमित्यर्थः । तिर्यग्योनिगतेषु तिर्यग्योनिजातेषु । लोके स्त्रियं पुमाननुवर्तते नतु स्त्री पुरुषं । अतोतीवास्याः कामः । अहो वसन्तवैभवइतिभावः ॥ ४२ ॥ विशालाक्षी मदवलोकनविस्फारितेक्षणा । जातसंभ्रमा जातत्वरा । यदि नापहृता भवेत् तदा मामेवाभिवर्तेत । अत्र चापलं नाम संचारीभावः ॥ ४३ ॥ शिशिरात्यये वसन्ते । पुष्पभारसमृद्धानां पुष्पाणि अमितानि पुष्पाणीत्यर्थः । संसारिदुःखं पश्यतो मे ज्ञानिलाभोऽकिंचित्करइव भातीत्यर्थः ॥ ४४ ॥ उक्तमर्थं विशिष्य दर्शयति—रुचिराण्यपीति ॥ अतिश्रिया अत्यन्तकान्त्या । रुचिराण्यपि । अस्मदनुप्रयोजनान्निष्फलानि भवन्ति । निर्भरमकरन्दभरिततया मधुकरसमूहैः समं महीं यान्ति ॥४५॥

रामानु० पक्षैःबर्हैः । बर्हाणांस्फाटिकगवाक्षसाम्यं नर्तनावस्थायां अन्तरान्तराविततोर्ध्वशुभ्रनालतया ॥ ३६ ॥ ति० अनुधावति नृत्यप्रसङ्गेनाग्रेगतां॥३९॥रामानु० ममेति अस्यश्लोकस्यममाप्येवमित्येतच्छ्लोकानन्तरावस्थानमुचितं । वनदुर्गवर्णनप्रकरणखारस्यात् ॥ ती० मयूरस्येतिश्लोकानन्तरंमामप्येवमितिश्लोकः ॥४०॥ ति० नन्वेतावान्रागस्तवानुचितस्तत्राह—पश्येति । संरागः अतिशयितोरागः ॥ ४२ ॥ ति० वन्यानिपुष्पाणि मेसीतावियोगाद्भोगसाधनत्वाभावान्निष्फलानिभवन्ति ॥ ४४ ॥

[पा०] १ क.—घ. मन्मथाग्नि. २ छ. झ. ट. सानुनि. ३ क. तरसाकामात्. ४ घ. च. छ. झ. ञ. ट. प्यनुधावति. क. ख. ग. प्यभिधावति. ५ ख. रपहसन्निव. ६ क. च. छ. ज. संयोगं. झ. ट. संरागः. ७ झ. अधुनाशिखिनी कामाद्भर्तारमभिवर्तते. ८ क. ग. घ. च. ज. ञ. ट. द्भर्तारमभिवर्तते. ९ ट. ममाप्येवं. १० च. छ. ञ. भवन्तिहि. ११ च. छ. ज. समूहानां.

वदन्ति रावं मुदिताः शकुनाः संघशः कलम् ॥ आह्वयन्त इवान्योन्यं कामोन्मादकरा मम ॥ ४६ ॥
वसन्तो यदि तत्रापि यत्र मे वसति प्रिया ॥ नूनं परवशा सीता साऽपि शोचत्यहं यथा ॥ ४७ ॥
नूनं न तु वसन्तोऽयं देशं स्पृशति यत्र सा ॥ कथं ह्यसितपक्ष्माक्षी वर्तयेत्सा मया विना ॥ ४८ ॥
अथवा वर्तते तत्र वसन्तो यत्र मे प्रिया ॥ किं करिष्यति सुश्रोणी सा तु निर्भर्त्सिता परैः ॥ ४९ ॥
श्यामा पद्मपलाशाक्षी मृदुपूर्वाभिभाषिणी ॥ नूनं वसन्तमासाद्य परित्यक्ष्यति जीवितम् ॥ ५० ॥
दृढं हि हृदये बुद्धिर्मम संप्रति वर्तते ॥ नालं वर्तयितुं सीता साध्वी मद्विरहं गता ॥ ५१ ॥
मयि भावस्तु वैदेह्यास्तत्त्वतो विनिवेशितः ॥ ममापि भावः सीतायां सर्वथा विनिवेशितः ॥ ५२ ॥
एष पुष्पवहो वायुः सुखस्पर्शो हिमावहः ॥ तां विचिन्तयतः कान्तां पावकप्रतिमो मम ॥ ५३ ॥
सदा सुखमहं मन्ये यं पुरा सह सीतया ॥ मारुतः स विना सीतां शोकं वर्धयते मम ॥ ५४ ॥
तां विना स विहङ्गो यः पक्षी प्रणदितस्तदा ॥ वायसः पादपगतः प्रहृष्टमभिनर्दति ॥ ५५ ॥
एष वै तत्र वैदेह्या विहगः प्रतिहारकः ॥ पक्षी मां तु विशालाक्ष्याः समीपमुपनेष्यति ॥ ५६ ॥

शकुनाः मम कामोन्मादकराः सन्तः अन्योन्यमाह्वयन्त इव । कलं मधुरं । रावं वदन्ति शब्दं कुर्वन्तीत्यर्थः । मम कामोन्मादकरणार्थसंपीभवितुमन्योन्यमाह्वयन्त इवेत्युत्प्रेक्षा । अनेन स्वदयोत्तम्भकज्ञानिव्यापारउक्तः ॥ ४६ ॥ शोचति शोचेत् ॥ ४७ ॥ गूढदेशप्रापणेन तद्देशे वसन्तप्रसङ्गाभावान्न तस्याः शोकप्रसक्तिरित्याशङ्क्य वसन्ताभावेपि मां विना न जीवितं धारयिष्यतीत्याह—नूनमिति ॥ ४८ ॥ वसन्तप्राप्तिमङ्गीकृत्याह—अथवेति ॥ ४९ ॥ श्यामा यौवनमध्यस्था ॥ ५० ॥ उक्तमर्थं सहेतुकं दृढयति—दृढं हीति ॥ अस्यान्ते इतिकरणंद्रष्टव्यं । वर्तयितुं जीवितुं । नालं नसमर्था ॥ ५१ ॥ अत्र हेतुमाह—मयीति ॥ भावोऽनुरागः । तत्त्वतः एकतत्त्वतया । सर्वथा " न चास्य माता न पिता न चान्यः स्नेहाद्विशिष्टोऽस्तिमया समो वा " इत्युक्तप्रकारेण । अनेन स्वस्य जीवसंबन्धः स्वाभाविक उक्तः ॥ ५२ ॥ एवं वसन्तोद्दीपनतामुक्त्वा मलयमारुतोद्दीपनतामाह—एष इत्यादिना ॥ पुष्पवहः पुष्पगन्धवहः । अनेन सौरभ्यमुक्तं । सुखस्पर्श इत्यनेन मान्द्यं । हिमावहः हिमवत्त्वावह इति शैत्यं । " तुषारः शीतलः शीतो हिमः सामान्यलिङ्गकाः" इत्यमरः । तां विचिन्तयतः विरहिण इत्यर्थः । पावकप्रतिमः संतापकरइत्यर्थः ॥ ५३ ॥ उक्तमर्थं विवृणोति—सदेति ॥ आभ्यां संसारिण्यकिंचित्करी स्वदया स्वस्याप्यसह्येत्युच्यते ॥ ५४ ॥ मध्ये यत्किंचिदाश्वसनं दृष्टमनुवदति द्वाभ्यां तदा प्रथमदर्शनकाले । सीतायाः वियोगपूर्वकाले वा । वायसः पक्षी । विहङ्गः आकाशगतः सन् । यः प्रणदितः परुषं वाशितवान् । सः इदानीं तांविना तद्विरहावस्थायां । पादपगतः सन् प्रहृष्टं यथा तथा अभिनर्दति । पूर्वमाकाशगतः सन् परुषनादेन तद्विश्लेषं सूचितवान् । इदानीं पादपगतः सन् प्रहृष्टनादेनास्याः संश्लेषंसूचयतीत्यर्थः ॥ ५५ ॥ एतदेव विवृणोति—एष इति ॥ तत्र तदानीं ।

ति० अथवावर्तते तत्रवसन्तः तथापिपरैःशत्रुभिःपीडितायतःसा । अतस्तस्यावसन्तःकिंकरिष्यति । परकृतपीडासत्त्वेकामपीडानवकाशादितिभावइतिप्राञ्चः ॥ परेतु तत्रवसन्तोनास्त्येव । तत्सत्त्वेममयाविनासाकथंतत्रतिष्ठेत् । आगतैवस्यादित्यर्थः । तदेवसूचयन्नाह—अथवेति । परनिर्भर्त्सनवशात्मायातीत्याशयइत्याहुः ॥ ४९ ॥ रामानु० साध्वीविरहंगतेतिचविशेषणद्वयंहेतुगर्भितं ॥ ति० साध्वीसीता मद्विरहंगता संप्राप्ता वसन्तस्यसत्त्वेऽसत्त्वेवासर्वथा वर्तयितुं जीवितुं । नालं नसमर्था ॥ शि० मद्विरहंगता सीता अलंवर्तयितुं शोभनतयास्थातुं । नशक्ष्यतीतिशेषः ॥ ५१ ॥ कतक० पक्षीप्रणदितस्त्वेति विहगःप्रीतिकारक-

---

[पा०] १ छ. झ. ट. नदन्ति. २ च. छ. झ. ञ. ट. कामंशकुनामुदिताः. ३ घ. सर्वेशः. ४ ज. ञ. आह्वयन्तीवचान्योन्यं. ५ ङ. ज. ञ. ननूनंतु. ६ क. ग.—ट. वसन्तस्तं. ७ घ. सापि. ङ. च. ज. ञ. साविनिमैर्त्सिता. ८ ख. पद्मविशालाक्षी. ९ च. छ. झ. ञ. ट. मृदुभाषाचमेप्रिया. क. मृदुभाषीचमेप्रिया. ङ. ज. ञ. विनाभूतामयाप्रिया. १० ङ.—ट. संपरिवर्तते. ११ क. ख. घ.—ट. भावोहि. ग. भावोपि. १२ क. सर्वेक्षापिनिवेदित-. १३ क. ग.—ट. शोकसंजननोमम. १४ क.—घ. छ.—ट. विनाथविहङ्गोसौ. १५ छ. झ. ट. मभिकूजति. १६ घ. पतिंमांतु.

पश्य लक्ष्मण सन्नादं वने मदविवर्धनम् ॥ पुष्पिताग्रेषु वृक्षेषु द्विजानामुपकूजताम् ॥ ५७ ॥
विक्षिप्तां पवनेनैतामसौ तिलकमञ्जरीम् ॥ षट्पदः सहसाऽभ्येति मदोद्धूतामिव प्रियाम् ॥ ५८ ॥
कामिनामयमत्यन्तमशोकः शोकवर्धनः ॥ स्तबकैः पवनोत्क्षिप्तैस्तर्जयन्निव मां स्थितः ॥ ५९ ॥
अमी लक्ष्मण दृश्यन्ते चूताः कुसुमशालिनः ॥ विभ्रमोत्सिक्तमनसः साङ्गरागा नरा इव ॥ ६० ॥
सौमित्रे पश्य पम्पायाश्चित्रासु वनराजिषु ॥ किन्नरा नरशार्दूल विचरन्ति ततस्ततः ॥ ६१ ॥
इमानि शुभगन्धीनि पश्य लक्ष्मण सर्वशः ॥ नलिनानि प्रकाशन्ते जले तरुणसूर्यवत् ॥ ६२ ॥
एषा प्रसन्नसलिला पद्मनीलोत्पलायुता ॥ हंसकारण्डवाकीर्णा पम्पा सौगन्धिकायुता ॥ ६३ ॥
जले तरुणसूर्याभैः षट्पदाहतकेसरैः ॥ पङ्कजैः शोभते पम्पा समन्तादभिसंवृता ॥ ६४ ॥
चक्रवाकयुता नित्यं चित्रप्रस्थवनान्तरा ॥ मातङ्गमृगयूथैश्च शोभते सलिलार्थिभिः ॥ ६५ ॥
पवनाहितवेगाभिरूर्मिभिर्विमलेऽम्भसि ॥ पङ्कजानि विराजन्ते ताड्यमानानि लक्ष्मण ॥ ६६ ॥

प्रतिहारकः वियोजकःसन्। आभ्यां यादृच्छिकप्रासङ्गिकसुकृतदर्शनमुक्तं ॥५६॥ पश्येति । अनेन परमपदे ज्ञानप्रधाने सामगायिनां नित्यमुक्तानां स्थितिरुक्ता ॥५७॥ पवनेन विक्षिप्तां कम्पितां । प्रियामिव स्थितां तिलकमञ्जरीं षट्पदः भृङ्गोऽभ्येति । अनेन भगवद्द्वाविषयभूतस्योत्तरक्षणे द्वयप्राप्तिर्भवितेत्युच्यते ॥५८॥ कामिनां विरहिणां । शोकवर्धनः दुःखवर्धनस्वभावः । स्वभावतो दुष्टप्रकृतिरित्यर्थः । अशोकः पवनोत्क्षिप्तैः वायुना पत्राणां बहिश्चालितैः । स्तबकैः मां तर्जयन्निव स्थितः । त्वत्संहारार्थमिमे तप्तबाणाः पञ्चबाणेन स्थापिता इति भीषयन्निव स्थित इत्युत्प्रेक्षा । संसारिणमनुज्जीवयन्तं मां ज्ञानिनो लज्जितं कुर्वन्तीत्यर्थः ॥ ५९ ॥ पुनरपि ज्ञानिनां समृद्धिं दर्शयन्वर्णयति—अमी इत्यादिना ॥ कुसुमशालिनः अतएव साङ्गरागाः । विभ्रमोत्सिक्तमनसः विलासगर्वितमनसः । रागिण इति यावत् । नरा इव भान्ति ॥ ६०—६१ ॥ नलिनानि रक्तोत्पलानि । जले तरुणसूर्यवत् प्रतितरङ्गं प्रतिफलितबालसूर्यवत् ॥६२॥ विरजादृष्ट्यापम्पां वर्णयति—एषेत्यादिभिश्चतुर्भिः॥ "सौगन्धिकंतुकह्लारं" इत्यमरः। शोभत इति शेषः ॥ ६३ ॥ पङ्कजैरभिसंवृतेत्यन्वयः ॥ ६४ ॥ चित्रप्रस्थवनान्तरा चित्रतीरवनपरिधाना । अन्तरं परिधानं ॥ ६५ ॥ पवनाहितवेगाभिः पवनोत्पादितवेगाभिः । ताड्यमानानि कशाभिस्ताड्यमानानीव

इतिचप्राचीनःपाठः । असौपक्षी तथा अतिसुखंयथाभवतितथा विहगःसन् आकाशगः । प्रणदितः नादंकृतवान् । अस्यपूर्वमिति शेषः । तत्संयोगकालइतिशेषः । अथेदानींतांविना तद्वियोगकाले । अन्यथेतिशेषः । दुःखनादइत्यर्थः । अथकंचिच्छकुनमाह । पादपगतोवायसः प्रहृष्टंयथाकूजति । एषविहगः एवंनादविशिष्टोविहगोवायसः यत्रसीतातिष्ठतितत्रतस्याः प्रीतिकारकः अतिपीडाभावसूचकः। मांतु मांच । तस्यास्समीपंतत्समीपगमनद्वारं । उपनेष्यति उपस्थापयिष्यतीत्यर्थः॥ स० प्रतिहारकः द्वारपालकः । द्वारपालकोयथास्वनाथंप्रतिनेष्यतितथाऽयमपिसीतायास्समीपमुपनेष्यति ॥ ५६ ॥ रामानु० संनादंपश्य शब्दंशृण्वित्यर्थः । शि० पश्य जानीहि ॥ ५७ ॥ ति० मदोद्धतां मदेनस्खलन्तीं ॥ ५८ ॥ ति० विचरन्ति किंनरीभिस्सहेतिशेषः । स्वनायिकासहितनायकान्तरदर्शनमुद्दीपनं ॥ ६१ ॥ शि० जलेतरुणसूर्यवत् उदयकालिकसूर्यइव । इमानिनलिनानि अरुणकमलानि । प्रकाशन्ते अभूतोपमैवा ॥ स० शुभगन्धीनि शुभश्चासौगन्धश्च । सएषामस्तीतिशुभगन्धीनि । यद्वा गन्धोयेषामस्तितानिगन्धीनि । शुभानिचतानिगन्धीनिच । शुभत्वंतु " दीप्तानलार्कद्युतिमप्रमेयं " इत्यत्राप्रमेयत्वंद्युताविवविशेषणेऽन्वेति । प्रथमे "नञानिर्दिष्टमनित्यं"इति द्वितीये"रसादिभ्यश्च"इतिप्रायिकंइतिचएकदेशिनेत्यादिनारूपीघटइत्यादिनाचावसेयं । एतेन उदादिपूर्वकत्वाभावात्कथमित्त्वमितिशङ्कानिरस्ता ॥ ६२ ॥ ति० पद्मनीलोत्पलैरासमन्ताद्युता ॥ ६३ ॥ ति० षट्पदाहतकेसरैः जलेभ्रमरपातितपुष्पधूलिभिः । अभिसंवृता व्याप्ता । स० तरुणसूर्याभैः तरुणसूर्यकाभैः ॥ ६४ ॥ ति० चित्रप्रस्थानि चित्रप्रदेशानि वनान्तराणियस्यास्सा ॥ ६५ ॥ शि० पवनेन आहताः वेगाःयासांताभिः ॥ ६६ ॥

[पा०] १ क.—च. ज. ञ. शृणु. २ क. ङ. च. झ. ञ. ट. भवकूजतां. ३ ग. साङ्गरागाङ्गनाइव. ४ ङ.—ट. ततस्ततः. ख. समन्ततः. ५ क. सौगन्धिकान्विता. ६ ङ. च. ज. ञ. चित्रस्थल. ७ क. ख. मातङ्गैर्मृग. ८ क. ख. ग. ङ.—ट. पवनाहत.

पद्मपत्रविशालाक्षीं सततं पङ्कजप्रियाम् ॥ अपश्यतो मे वैदेहीं जीवितं नाभिरोचते ॥ ६७ ॥
अहो कामस्य वामत्वं यो गतामपि दुर्लभाम् ॥ स्मारयिष्यति कल्याणीं कल्याणतरवादिनीम् ॥६८॥
शक्यो धारयितुं कामो भवेदद्यागतो मया ॥ यदि भूयो वसन्तो मां न हन्यात्पुष्पितद्रुमः ॥६९॥
यानि सं रमणीयानि तया सह भवन्ति मे ॥ तान्येवारमणीयानि जायन्ते मे तया विना ॥ ७० ॥
पद्मकोशपलाशानि दृष्ट्वा दृष्टिर्हि मन्यते ॥ सीताया नेत्रकोशाभ्यां सदृशानीति लक्ष्मण ॥ ७१ ॥
पद्मकेसरसंसृष्टो वृक्षान्तरविनिःसृतः ॥ निःश्वास इव सीताया वाति वायुर्मनोहरः ॥ ७२ ॥

॥६६॥ एवं पम्पादर्शनजकामोद्रेकमरत्वावस्थया दर्शयति—पद्मेति। "स एकाकी न रमेत" इतिवद्विरजास्तीरवासो मे न रोचत इति लक्ष्मणायामिव्यनक्ति ॥६७॥ वामत्वं वक्रत्वं। गतां दूरगतां। स्मारयिष्यति स्मारयति। कल्याणतरवादिनीं शुभतरवचनशीलां। सुगमाहरेति चरमश्रुतमेव वाक्यमस्य हृदये वर्तते ॥६८॥ अद्यागतः इदानीं वर्तमानः। पुष्पिताः हुमाः येन स पुष्पितद्रुमः। सर्वथा कामो दुःसह इत्युच्यते ॥ ६९ ॥ भोग्यस्य वसन्तस्य कुतो बाधकत्वं तत्राह —यानीति ॥ ७० ॥ नेत्रकोशाभ्यां नेत्रदलाभ्यां। सीतानेत्रे स्मारयित्वा सन्तापयन्तीत्यर्थः ॥ ७१ ॥ सर्वप्राणिनां प्राणहेतुर्वायुरेवास्मत्सर्वस्वापहारं करुत इत्याह—पद्मकेसरेति ॥ पद्मकेसरसंसृष्टः । धूलीकरणं वायुकार्यं। तथाच सर्वप्राणहेतुरेव सर्वधूलीकरणप्रवृत्तः। सर्वसंहारप्रवृत्त इत्यर्थः। यद्वा पद्मविरहात् पद्मकेसराणि प्रतिकूलानिसन्ति वायोःसाहाय्यंकुर्वन्ति। पादारुन्तुदमेवपङ्कजरजइति स्वजनसहजबाधकं कथंनास्मद्बाधकं। राजसप्रकृतित्वादस्मानपिबाधितुमुपक्रमते। केसरशब्देन तत्स्थरजसोऽत्रविवक्षितत्वात्। किञ्चल्कानामानयनायोगात्। एतन्मूलंकण्टकिसंसर्गः। पद्मकेसरसंसृष्टः। नायं वातः किंतु केसरी। सिंहइत्यपिध्वनिः। यद्वा पद्मकेसरैः संसृष्टः स्वयमेवसंहारक्षमः। तदुपरि ससहायः। यद्वा रूपवान्सहायशूरः रूपरहितोयंकथं न सहायमपेक्षेत। रूपवान् दृढशरीरइत्यपिध्वनिः। वायुर्बाधकश्चेत्त्वया पूर्वमेवपरिहृत्यवर्तितव्यं तत्राह। वृक्षान्तरविनिःसृतः। दूरे दृष्ट्वापरिहर्तुं शक्यते। वृक्षखण्डे पूर्वमात्मानंसङ्कोच्यस्थित्वाङ्गटितिविनिर्गतः। यद्वा यथाराजकुमारः सौकुमार्येण छायामार्गेणागच्छति तथायमपीत्यर्थः। यद्वा मन्मथतापेन विश्रमाय तरुच्छायमपिनाश्रयितुं क्षमते। यदि तेऽहं बाधकः तर्हि दूरादपसरेत्यत्राह। निःश्वास इवसीतायाः पूर्वपरिचितवद्वभासमानतया परिहर्तुमपि नशक्नोमि। यद्वा सीतानिःश्वासतुल्यतया सात्र किं वृक्षमूले निलीना समागच्छतीति चापलातिशयेनान्यत्र न चलितुं शक्नोमि। "सुरभिर्णि श्वसितेदधतस्पृशं" इति निःश्वासस्य सौरभ्यं कविभिरुक्तं। यद्वा नकेवलमनिलः सपरिकर एवबाधते। किंतु स्मारकतयापिवाति नकदाचिदायाति। सर्वदायाति। सकलमपि काननंसविलासंसंचरति। यद्वा वाति "वा गतिगन्धनयोः" स्वार्जितगन्धेन सर्वान्परवशीकरोति। एतादृशबाधकोपि नयःकश्चिदित्याह। वायुः सर्वोज्जीवनहेतुः। यद्वा "भीषास्माद्वातः पवते" इति मत्तो भीतो मां भर्त्सयति। बाधनप्रकारमाह। मनोहरः आन्तरमपि पदार्थमपहरति। पद्मकेसरसंसृष्ट इत्यनेन शैत्यमुक्तं। वृक्षान्तरविनिःसृतइत्यनेन मांद्यं। निःश्वासइवसीताया इति सौरभ्यं। यद्वा पद्मकेसरसंसृष्टइत्यनेन चोरसमाधिरुच्यते। स्वस्वरूपापरिज्ञानाय भीरुजनभीषणायच भस्मोद्धूलितवदनः समायाति। वृक्षान्तरविनिःसृतः पथिकानांस्वसमीपागमनपर्यन्तं गूढतयास्थित्वा तेषुसमीपमागतेषु सपदिसमुत्तिष्ठन्नि-

ति० अपश्यतोमे आत्मनेइतिशेषः। यद्वा कर्तुःशेषत्वविवक्षायामेइतिषष्ठी ॥६७॥ ति० दुर्लभां अवाप्यां। स्मारयिष्यति स्मारयतीत्यर्थः। चित्तैकत्यबोधनद्वाराऽन्यथाप्रयोगोविरहपरिपोषाय ॥६८॥ ति० कामः कामकृतताप ॥६९॥ रामानु० पद्मकोशपलाशानि पद्मसुकुलोपरिदलानि। नेत्रकोशाभ्यां नेत्रकोशशब्देननेत्रपिधानभूतपक्ष्मप्रदेशउच्यते ॥ ति० पद्मकोशस्यपलाशानि दलानि। कामोद्दीपकत्वापि तन्नेत्रकोशाभ्यांनेत्रपुटाभ्यांसदृशानीतिद्रष्टृदृष्टिर्मन्यतइत्यर्थः ॥ शि० पद्मकोशपलाशानीत्युभयान्वयि। एकत्रशब्दः अपरत्रार्थः ॥ ७१ ॥ ति० पद्मकेसरेत्यादिनाशैत्यसौरभ्ये। वृक्षान्तरेत्यादिनामान्द्यं ॥ ७२ ॥

[पा०] १ ख. घ. ङ. झ. ट. प्रियपङ्कजां. क. ग. प्रियदर्शनां. २ क. ग. संरमणीयानि. ३ क. ग. घ. ञ. ज.—ट. द्रष्टुंदृष्टिर्हि. ख. द्रष्टुंदृष्टिर्विमन्यते.

सौमित्रे पश्य पम्पायां दक्षिणे गिरिसानुनि ॥ पुष्पितां कर्णिकारस्य यष्टिं परमशोभनाम् ॥ ७३ ॥
अधिकं शैलराजोऽयं धातुभिः सुविभूषितः ॥ विचित्रं सृजते रेणुं वायुवेगविघट्टितम् ॥ ७४ ॥
गिरिप्रस्थास्तु सौमित्रे सर्वतः संप्रपुष्पितैः ॥ निष्पत्रैः सर्वतो रम्यैः प्रदीप्ता इव किंशुकैः ॥ ७५ ॥
पम्पातीररुहाश्चेमे संसक्ता मधुगन्धिनः ॥ मालतीमल्लिकाषण्डाः करवीराश्च पुष्पिताः ॥ ७६ ॥
केतवः सिन्धुवाराश्च वासन्त्यश्च सुपुष्पिताः ॥ माधव्यो गन्धपूर्णाश्च कुन्दगुल्माश्च सर्वशः ॥७७॥
चिरिबिल्वा मधूकाश्च वञ्जुला बकुलास्तथा ॥ चम्पकास्तिलकाश्चैव नागवृक्षाः सुपुष्पिताः ॥ ७८ ॥

वभाति । निःश्वासइवसीतायाः चिरपरिचितइवसरससँल्लापविशेषैः कस्तेग्रामः किंतेनामेतिसंभाषमाणइवस्थितः वाति । घनस्य इलगतिपर्यन्तं निःस्पृहतया ततस्ततःसंचरन्निव स्थितः । वायुः चौर्यदृष्ट्वाकेनचिद्वहीतुमुद्युक्तं चेल्लाघवेन इस्तग्रहणानर्हः। मनोहरः नापातावोपाहरत् । अपितुसुगुप्तमपि । अनेन निर्हेतुकहरिण्याप्रवाह उपवर्ण्यते । पद्मकेसरसंसृष्टः "ऊष्मापोः संज्ञाछन्दसोः" इति ह्रस्वः। पद्मायाः केसरैः तत्तुल्यानुरागैःसंसृष्टः पुरुषकारभूतलक्ष्मीप्रणयप्रवृत्त इत्यर्थः । "पितेव लक्ष्मेयाजननिपरिपूर्णागसि जने हितस्नेतोवृत्त्या भवति च कदाचित्कलुषधीः। किमेतन्निर्दोषः क इह जगतीति स्वमुचितैरुपायैर्विस्मार्य स्वजनयसि माता तदसि नः ॥" वृक्षान्तरविनिःसृतः "ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययं" इति वृक्षत्वेनोक्ते संसारमण्डले प्रवृत्तः । निःश्वास इव सीतायाःस्त्रीप्रायमितरत्सर्वमिति परतन्त्रतया स्त्रीतुल्यानां लोकानामाश्वासको धारकश्चेत्यर्थः । वाति अनवरतं प्रवहति । वायुः सार्वत्रिकः मनोहरः मानसिकसकलकल्मषहरः। द्रविडोपनिषद्व्याख्याकारैर्व्याख्यातोयंश्लोकः ॥ ७२ ॥ अथ विरजाया अर्वाक्प्रदेशवर्तिनां राजसतामससात्त्विकभेदभिन्नानां चेतनानां स्वरूपं स्वकटाक्षविषयभूतं दर्शयति—सौमित्र इत्यादिना ॥ दक्षिण इत्यनेन पम्पादक्षिणतीरं क्रमेण प्रविष्ट इत्यवगम्यते । अनेन कर्णिकारवर्णेन सत्यलोकादिषु जृम्भमाणा राजसी वृत्तिरुच्यते । यष्टिं लतां ॥७३॥ अधिकमिति । अनेन ऋश्यमूकसमीपगमनं द्योतितं । रजोवर्धक लोक उक्तः ॥ ७४ ॥ प्रदीप्ताः ज्वलिताः ॥ ७५ ॥ पम्पेत्यादिसार्धसप्तश्लोकाः । इमे उपशोभन्त इत्यन्वयः । तदुपरि दृश्यन्त इत्यन्वयः । संसक्ताः अविरलाः । मधुगन्धिन इति सर्वविशेषणं । लिङ्गवचनविपरिणामः कार्यः । एवं पुष्पितपदमपि । पम्पातीरुहा इमे मालत्यादयः पदार्था उपशोभन्ते इत्येकोन्वयः । मालती जातिः । मल्लिकाषण्डाः मल्लिकासमूहाः । करवीराः प्रसिद्धाः । सिन्धुवाराः निर्गुण्ड्यः । वासन्त्यः पीतवर्णपुष्पालताः । " अत्र पीतायां वासन्ती हेमपुष्पिका" इति वैजयन्ती । माधव्यः अतिमुक्तलताः । गन्धेन पूर्णाः गन्धपूर्णाः । कुन्दानां गुल्माः कक्षाः कुन्दगुल्माः । चिरिबिल्वाः नक्तमालाः । मधूकाः मधुद्रुमाख्यावृक्षाः । वञ्जुलाः वेतसाः । बकुलाः प्रसिद्धाः । तिलकाः द्रुरकाः । नागवृक्षाः नागकेसराः । नीपाः जलकदम्बाः । वरणाः वरणवृक्षाः । खर्जूराः प्रसिद्धाः । पद्मकाः पद्मपर्ण्याख्या वृक्षविशेषाः । लोध्राः शाबरवृक्षाः। सिंहकेसरपिञ्जराः सिंहकेसरवर्णा इत्यर्थः । अङ्कोलाः निकोचकाः । कुरण्टाः पीतवर्णपुष्पा महासहाख्यागुल्माः । पूर्णकाः शाल्मलिभेदावृक्षविशेषाः । पारिभद्रकाः निम्बाः । पाटलयः इकारान्तआर्षः । कोविदाराः युगपत्रकाख्या वृक्षाः । सुचुलिन्द्राः नारङ्गवृक्षाः । अर्जुनाः ककुभवृक्षाः । केतकानि हेमवर्णपुष्पाणि इति पूर्वस्माद्विशेषः । उद्दालकाः श्लेष्मातकवृक्षाः । शिरीषाः कपीतनाख्या वृक्षाः । शिंशुपाः भस्मगर्भाख्यावृक्षाः । धवाः मधुराख्यावृक्षविशेषाः । कुरवकाः रक्तवर्णपुष्पामहासहाख्या गुल्माः । रक्तपदं विस्पष्टार्थं । तिनिशाः नेमिद्रुमाः । नक्तमालाः चिरिबिल्वभेदाः । चन्दना प्रसिद्धाः ।

ति० संक्षिप्ताः तत्रलसैकेनवर्धिताः ॥ ७६ ॥

[पा०] १ ख. घ. सानुषु. २ क. ख. ग. ङ—ट. शोभितां. ३ ङ—ट. धातुभिश्चु. ख. धातुभिस्स. ४ घ. ग. ताश्चेमे. ५ घ. संक्षिप्ताः. ६ छ. झ. ट. पद्मकरीराश्च. ७ ज.—ट. मातुलिङ्गाश्चपूर्णाश्च. ८ क. ख. घ. ङ.—ट. वृक्षाश्चपुष्पिताः.

नीपाश्च वरणाश्चैव खर्जूराश्च सुपुष्पिताः ॥ पनसाश्चोपशोभन्ते नीलाशोकाश्च पुष्पिताः ॥ ७९ ॥
लोध्राश्च गिरिपृष्ठेषु सिंहकेसरपिञ्जराः ॥ अङ्कोलाश्च कुरण्टाश्च पूर्णकाः पारिभद्रकाः ॥ ८० ॥
चूताः पाटलयश्चैव कोविदाराश्च पुष्पिताः ॥ सुचुलिन्दार्जुनाश्चैव दृश्यन्ते गिरिसानुषु ॥ ८१ ॥
केतकोद्दालकाश्चैव शिरीषाः शिंशुपा धवाः ॥ शाल्मल्यः किंशुकाश्चैव रक्ताः कुरवकास्तथा ॥
तिनिशा नक्तमालाश्च चन्दनाः स्पन्दनास्तथा ॥ [हिन्तालास्तिलकाश्चैव नागवृक्षाश्च पुष्पिताः]॥८२॥
पुष्पितान्पुष्पिताग्राभिर्लताभिः परिवेष्टितान् ॥ द्रुमान्पश्येह सौमित्रे पम्पाया रुचिरान्बहून् ॥८३॥
वातविक्षिप्तविटपान्यथासन्नान्द्रुमानिमान् ॥ लताः समनुवर्तन्ते मत्ता इव वरस्त्रियः ॥ ८४ ॥
पादपात्पादपं गच्छञ्शैलाच्छैलं वनाद्वनम् ॥ याति नैकरसास्वादः संमोदित इवानिलः ॥ ८५ ॥
केचित्पर्याप्तकुसुमाः पादपा मधुगन्धिनः ॥ केचिन्मुकुलसंवीताः श्यामवर्णा इवाबभुः ॥ ८६ ॥
इदं मृष्टमिदं स्वादु प्रफुल्लमिदमित्यपि ॥ रागमत्तो मधुकरः कुसुमेष्वबलीयते ॥ ८७ ॥
निलीय पुनरुत्पत्य सहसाऽन्यत्र गच्छति ॥ मधुलुब्धो मधुकरः पम्पातीरद्रुमेष्वसौ ॥ ८८ ॥
इयं कुसुमसंघातैरुपस्तीर्णा सुखाकृता ॥ स्वयं निपतितैर्भूमिः शयनप्रस्तरैरिव ॥ ८९ ॥
विविधा विविधैः पुष्पैस्तैरेव नगसानुषु ॥ विकीर्णैः पीतरक्ता हि सौमित्रे प्रस्तराः कृताः ॥९०॥

स्पन्दनाः वृक्षविशेषाः ॥ ७६—८२ ॥ पम्पायाः संबन्धिनइतिशेषः ॥ ८३ ॥ वातविक्षिप्तविटपान् वायुविधूतशाखानितितात्कालिककान्तिविशेषोक्तिः । यथासन्नान् यथासंस्पर्शं शक्यते तथा आसन्नान् । समीपवर्तिनइत्यर्थः । इयताग्रन्थेन विषयान्तरप्रवणाः प्राक्तनाउक्ताः ॥ ८४ ॥ पादपात्पादपमिति । कच्छात्कच्छमित्यपिज्ञेयं । नैकरसास्वादः अनेकमधुरसकवलनेन संमोदितः संजातसंमोद इव ॥ ८५ ॥ पर्याप्तकुसुमाइत्यनेन मुकुलाल्पत्वं । मुकुलसंवीताः मुकुलैःसमन्तात्वेष्टिताइत्यनेन विकसितपुष्पस्वल्पसंचावगम्यते । श्यामवर्णाः घुन्तवर्णेनेति भावः । आबभुः आभान्ति । लडर्थेलिट् ॥ ८६ ॥ मृष्टं रम्यं । स्वादु रसवत् । रागमत्तः अभिनवपुष्पकुतूहलाकुलइत्यर्थः । अवलीयते सक्तोभवति ॥ ८७ ॥ पुनर्मधुकरस्य चापलं दर्शयति—निलीयेति ॥ निलीय कचित्पुष्पेक्षणमात्रंस्थित्वा । पुष्पान्तरेभूयसीमिवमधुसमृद्धिं दृष्ट्वा तत्क्षणादन्यत्र पुष्पे गच्छति । एवं सर्वत्रेति ज्ञापयितुं पम्पातीरद्रुमेष्वित्युक्तं ॥८८॥ इयं भूमिः । स्वयं निपतितैः अतिसुकुमारैरित्यर्थः । कुसुमसंघातैः उपस्तीर्णा व्याप्ता सती । शयनप्रस्तरैः शयनास्तरणैरिव । सुखाकृता सुखावहाकृता ॥ ८९ ॥ नगसानुषु विकीर्णैः विविधैः इतस्ततःस्वयं पतितैः पुष्पैः । विविधाः प्रस्तराः कृताहीत्युत्प्रेक्षा । विविधाइत्यस्यविवरणं—पीतरक्ताइति । इदमुपलक्षणं । नानावर्णाइत्यर्थः । कचित्पीतवर्णचम्पकादिपुष्पाणि पतितानि हेममयपर्यङ्का इव भान्ति । कचिद्रक्तवर्णकर्णिकारादिपुष्पाणिपतितानिपट्टवस्त्ररचिततल्पिमानीव । इत्येवं नानावर्ण-

रामानु० पुष्पात्पुष्पान्तरंगच्छन्तंमधुकरंविलोक्योत्प्रेक्षते—इदमिति ॥८७॥ ति० शयनप्रस्तरैः शयनार्थंतल्पप्रसरणैरिव । सुखाकृता सुखकरी । " सुखप्रियादानुलोम्ये " इतिडाच् ॥ ८९ ॥

[पा०] १ ख. पद्मकाश्चापु. क. ङ.—ट. पद्मकाश्चैव. २ ख. छ. झ. ट. चूर्णकाः. ३ क. चूताश्चपाटलाश्चैव. ४ छ. झ. ट. श्चापि. ५ क.—च. ज. तिमिशा'. ६ छ. ज. झ. स्यन्दनास्तथा. ७ इदमर्धं क. ङ.—ट. पाठेषुदृश्यते. क. ङ. ज. ञ. हिन्तालाश्चैवपनसान्नाग. ८ क. लैताभिरनुवेष्टितान्. ९ क. ख. ग. विटपान्पंपासन्नान्द्रुमाँल्लता'. १० क. ग. लताः संपरिवर्तन्ते. ख. एता समनुवेष्टन्ते. ११ क. ग. पतिंस्त्रियः. १२ ख. याति. १३ ख. केचित्कुसुम. १४ ङ. च. ज. झ. ञ. रागरक्तो. ट. रागयुक्तो. १५ छ. ज. झ. कुसुमेष्वेव. क. ग. कुसुमेषुनिलीयते. १६ घ. निपीय. १७ छ. झ. ट. विस्तीर्णाः पीतरक्ताभाः. ख. ग. ङ. ञ. विशीर्णैःपीतरक्ताभाः. च. ज. विशालैःपीतरक्ताभाः.

हिमान्ते पश्य सौमित्रे वृक्षाणां पुष्पसंभवम् ॥ ९१ ॥
पुष्पमासे हि तरवः संघर्षादिव पुष्पिताः ॥ आह्वयन्त इवान्योन्यं नगाः षट्पदनादिताः ॥
कुसुमोत्तंसविटपाः शोभन्ते बहु लक्ष्मण ॥ ९२ ॥
एष कारण्डवः पक्षी विगाह्य सलिलं शुभम् ॥ रमते कान्तया सार्धं काममुद्दीपयन्मम ॥ ९३ ॥
मन्दाकिन्यास्तु यदिदं रूपमेवं मनोहरम् ॥ स्थाने जगति विख्याता गुणास्तस्या मनोरमाः ॥९४॥
यदि दृश्येत सा साध्वी यदि चेह वसेमहि ॥ स्पृहयेयं न शक्राय नायोध्यायै रघूत्तम ॥ ९५ ॥
न ह्येवं रमणीयेषु शाद्वलेषु तया सह ॥ रमतो मे भवेच्चिन्ता न स्पृहाऽन्येषु वा भवेत् ॥ ९६ ॥
अमी हि विविधैः पुष्पैस्तरवो रुचिरच्छदाः ॥ काननेऽस्मिन्विना कान्तां चित्तमुन्मादयन्ति मे ॥९७॥
पश्य शीतजलां चेमां सौमित्रे पुष्करायुताम् ॥ चक्रवाकानुचरितां कारण्डवनिषेविताम् ॥
प्लवैः क्रौञ्चैश्च संपूर्णां वराहमृगसेविताम् ॥ ९८ ॥
अधिकं शोभते पम्पा विकूजद्भिर्विहङ्गमैः ॥ ९९ ॥
दीपयन्तीव मे कामं विविधा मुदिता द्विजाः ॥ श्यामां चन्द्रमुखीं स्मृत्वा प्रियां पद्मनिभेक्षणाम् ॥१००॥

नानाशब्या इवभान्तीतिभावः ॥ ९० ॥ हिमान्त इत्यर्थं । हिमान्ते वसन्ते । वृक्षाणां पुष्पसंभवं पुष्पसमृद्धिं । वक्ष्यमाणस्य संक्षेपेणोक्तिः ॥ ९१ ॥ पुष्पमासे वसन्ते । संघर्षात् पुष्पिता अमी तरवः षट्पदनादिताःसन्तः परस्परमाह्वयन्त इव । यूयं वयमिव न पुष्पिता इत्यन्योन्यं भृङ्गरवेण व्याजेन वदन्तीवेत्युत्प्रेक्षा । अर्थत्रयमेकान्वयं वा । आह्वयन्त इवेत्युक्त्वा कुसुमोत्तंसविटपाः पूर्वोक्तास्तरवः । बहु अधिकं । शोभन्त इति ॥ ९२ ॥ कामसुद्दीपयन् अन्यरतिदर्शनस्योद्दीपकत्वादिति भावः ॥ ९३ ॥ यदिदं पम्पायाः रूपं एवं मन्दाकिन्याश्च मनोहरं रूपं । कथमेतत्साहश्यं तस्या इत्यत्राह—स्थान इति । मनोरमाः जगति विख्याताः तस्या गुणाः स्थाने युक्ताः ॥ ९४ ॥ ननु परपुरुषेणापहृता कथं रतये प्रार्थ्यते तत्राह—साध्वीति । वसेमहि "भवांस्तु सह वैदेह्या गिरिसानुषु रंस्यते । अहं सर्वं करिष्यामि आश्रमः स्वपतश्च ते" इत्युक्तवता त्वया सह वसेमेत्याशयेन बहुवचनं । शक्राय शक्रत्वाय । ऐश्वर्येइन्द्रत्वस्य प्राथमिकत्वात्तदुक्तं । "रुच्यर्थानां प्रीयमाणः" इति चतुर्थी । उत्तमं पुरुषं प्रति नासत्यमुच्यत इत्याशयेन रघूत्तमेत्युक्तिः ॥ ९५ ॥ उक्तेर्यं हेतुमाह—नहीति ॥ रमतः रममाणस्य । हि यस्मात् । चिन्ता न भवेत् अयोध्यायाः अलाभकृताचिन्ता न स्यात् । अन्येषु शक्रत्वादिषु । रहस्यप्येवंविधमानुषलभावनानुरूपंवचनं योगिनोद्वुध्येरन्निति ॥ ९६ ॥ विना वर्तमानस्येतिशेषः ॥ ९७ ॥ पश्येत्यादिसार्धश्लोकः । पुष्करैः पद्मैः आयुतां व्याप्तां । कारण्डवाः जलकाकाः । प्लवैः जलकुक्कुटैः । वराहेति तीर इति शेषः ॥ ९८ ॥ अधिकमित्यर्थं । विहङ्गमैः उक्तमिश्रैः ॥ ९९ ॥ स्मृत्वा वर्तमानस्येति शेषः ॥ १०० ॥

रामानु० हिमान्ते शिशिरादौ । वृक्षाणांयःपुष्पसंभवोस्ति तं । अस्मिन्कालेपश्येत्यर्थः । ति० हिमान्ते शिशिरान्ते ॥९१॥ ति० मन्दाकिन्याः तत्सदृशंपंपायाः । अतिशयोक्तिरत्र ॥ ती० मन्दाकिन्याः चित्रकूटपर्वतपरिसरवर्तिन्याः ॥९४॥ रामानु० यदिचेहवसेन्मयि । मयि मत्सगीपे ॥ ९५ ॥ स० मेइत्येतच्चतुर्थ्यन्तमपि । तथाचमे मह्यंस्पृहायस्याः तयासीतयारमतः मे अन्येष्वविषयेषुचिन्ताभवेदिति नभवेदेवेत्यर्थः । यद्वा स्पृहधातुयोगेचतुर्थ्यभावआर्षः ॥ ९६ ॥ ति० स्मृत्वा सारयित्वा ।.१००॥

[पा०] १ क. ख. ङ. च. ज. ञ. पुष्पसंचयं. २ ख. षट्पदनिस्वनैः ३ ख. भुवि. ४ घ. एकः. ५ क. ङ. झ. ञ. ट. मुद्दीप्यग्निभ. ६ क. घ. ङ. च. ज. ञ. यदिदंदृश्यं. ७ ज. झ. ट. मेतन्मनोहरं. ८ ख. वसेन्मम. ९ झ. ञ. ट. विविधच्छदाः. १० छ. झ. ट. चिन्तामुन्मादयन्ति. ११ ङ. च. ज. ञ. संकीर्णा. १२ छ. झ. ट. महामृगनिषेवितां. १३ च. दीपयन्तिच. १४ घ. स्मृत्वामन्मथोवर्धतेहृमे. १५ ङ. चन्द्रनिभेक्षणां.

पश्य सानुषु चित्रेषु मृगीभिः सहितान्मृगान् ॥ मां पुनर्मृगशावाक्ष्या वैदेह्या विरहीकृतम् ॥१०१॥
व्यथयन्तीव मे चित्तं संचरन्तस्ततस्ततः ॥ अस्मिन्सानुनि रम्ये हि मत्तद्विजगणायुते ॥ १०२ ॥
पश्येयं यदि तां कान्तां ततः स्वस्ति भवेन्मम ॥ १०३ ॥
जीवेयं खलु सौमित्रे मया सह सुमध्यमा ॥ सेवते यदि वैदेही पम्पायाः पवनं सुखम् ॥ १०४ ॥
पद्मसौगन्धिकवहं शिवं शोकविनाशनम् ॥ धन्या लक्ष्मण सेवन्ते पम्पोपवनमारुतम् ॥ १०५ ॥
श्यामा पद्मपलाशाक्षी प्रिया विरहिता मया ॥ कथं धारयति प्राणान्विवशा जनकात्मजा ॥१०६॥
किंनु वक्ष्यामि राजानं धर्मज्ञं सत्यवादिनम् ॥ सीतेया जनकं पृष्टः कुशलं जनसंसदि ॥ १०७ ॥
या मामनुगता मन्दं पित्रा प्रव्राजितं वनम् ॥ सीता सत्पथमास्थाय क्व नु सा वर्तते प्रिया ॥१०८॥
तया विहीनः कृपणः कथं लक्ष्मण धारये ॥ या मामनुगता राज्याद्भ्रष्टं विगतचेतसम् ॥ १०९ ॥
तस्यास्त्वञ्चितपक्ष्माक्षं सुगन्धि शुभमव्रणम् ॥ अपश्यतो मुखं तस्याः सीदतीव मनो मम ॥ ११० ॥

पुनरित्यर्थः । विरहीकृतं विरहिणमित्यर्थः । मृगीभिः सहितान् मृगान् पश्य । वैदेह्या विरहीकृतमां पुनः पश्येत्यन्वयः । एतेषु सकलत्रेषु सुखं संचरत्सु ममैकस्याहो कष्टावस्थेति भावः ॥ १०१ ॥ संचरन्तः मृगादय इतिशेषः ॥ १०२ ॥ पश्येयमित्यर्धं ॥ ततः तदा । स्वस्ति शुभं ॥ १०३—१०४ ॥ पद्मेति ॥ पद्मकह्लारगन्धवहमितिलक्षणयार्थः । धन्याः सकान्ताः । पदप्रयोजनंत्याचार्या ऊचुः । पद्मं च सौगन्धिकं च पद्मसौगन्धिके ते वहति प्रापयतीति पद्मसौगन्धिकवहं । अत्र पद्मसौगन्धिकयोर्वहनानुपपत्तेस्तद्गन्धो लक्ष्यते । लक्षणायाश्च प्रयोजनेन भवितव्यं । यथा गङ्गायां घोष इत्यत्र पावनत्वादि तथात्र प्रयोजनं । यथा पद्मस्यैव घ्राणसमीपानयनेपित्तपरिस्थितःपरिमलः शीतलोगृह्यते । नान्तःस्थित उष्णमिश्रः । तथायं वायुरपि उपरिस्थशीतलपरिमलमादाय समागच्छतीत्यर्थः । यद्वा पद्मकेसरसंसृष्ट इत्युक्तेः पद्मसौगन्धिकोपरिवर्तिपरिमलावह इत्यर्थः । गुणगुणिनोरभेदविवक्षया पद्मसौगन्धिकेत्युक्तिः । उभयोक्त्या नानापुष्पग्रथितमालिकाधारिण इव नानापुष्पपरिमलं वहतीत्युच्यते । शिवं शुद्धं । तथा चान्यासंस्पर्शितोक्त्या प्राथमिकमलयमारुत इत्युच्यते । शोकविनाशनं । विरहिणो दक्षिणपवनः शोकवर्धनः नतु शोकविनाशनः । तथाच जीवतो हि शोकं कुर्यात् जीवितापायकरणेन शोकधर्म्यभावाच्छोकविनाशनं । धन्याः एवंविधे मलयानिले वातिसति एकान्तस्थलमन्वेष्यशयनपराः केचन सन्ति हि। सेवन्ते कदा समागमिष्यत्ययं पवन इत्यवसरप्रतीक्षा भवन्ति। सेवाद्यवसरप्रतीक्षा । पम्पोपवनमारुतं आकराद्रागताग्निमिव स्थितं । समुद्रादुत्थितवडवानलमिवेत्यर्थः । प्रत्येकश्लोकव्याख्यानेप्ययमेवाभिप्राय उक्तः ॥ १०५॥ विवशा प्राणत्यागेपि न स्वतन्त्रेत्यर्थः ॥ १०६ ॥ किंन्विति ॥ सीतया सह मम कुशलं पृष्ट इत्यर्थः ॥ १०७ ॥ मन्दं भाग्यरहितं । "मूढास्पापदुर्निर्भाग्या मन्दाः स्युः" इत्यमरः । सत्पथं पतिव्रतामार्गं आस्थाय अनुगतेत्यन्वयः ॥ १०८ ॥ धारये जीवामि । विगतचेतसं विकलहृदयं ॥ १०९ ॥ अञ्चितपक्ष्माक्षं अञ्चितानि पूजितानि क्षिप्तानीति । यावत् । पक्ष्माणि ययोस्ते । अञ्चितपक्ष्मणी अक्षिणी

रामानु० पुनरव्ययोऽन्यर्थे । मामपिपश्येतिसंबन्धः ॥ विरहीकृतं विरहः अर्शआद्यजन्तः । अविरहः विरहमिश्रः विरहस्तेनकृतस्तंमांपश्येत्यत्र च्विर्विरहस्यावास्तवत्वंद्योतयति ॥ १०१ ॥ ति० संचरन्तः मृगीभिस्सहितान्मृगान्इतिशेषः ॥ १०२ ॥ ति० पृष्टासीताकेतियेनतं । वि० सीतयासहितस्यतव कुशलमितिपृष्टः ॥ १०७ ॥

[पा०] १ क. चरन्तइतस्ततः. २ क. ङ. रम्येऽहं. ३ ङ.—ट. गणाकुले. ४ ङ. छ. झ. ट. सेवेत. ५ छ. झ. ङ. शुभं. ६ च.—झ. ट. पंपायावनमारुतं. ख. पंपाविपिनमारुतं. ७ क. च. ज. ञ. धारयते. ८ क. ग. ङ.—ट. धर्मज्ञंराजानं. ९ छ. झ. ट. जनकंपृष्टसीतंतं. ख. सीतयाजनकं. क. ग. ङ. च. ज. ञ. जनकंसीतया. १० छ. झ. ट. प्रस्थापितं. ११ छ. झ. ट. धर्मंसमास्थाय. १२ ग. संवर्तते. १३ छ. झ. ट. विहतचेतसं. क. च. ज. ञ. विगतचेतनं. १४ क. ख. ग. ङ.—ट. पक्षाक्षं. १५ छ. झ. अतिर्मम.

स्मितहास्यान्तरयुतं गुणवन्मधुरं हितम् ॥ वैदेह्या वाक्यमतुलं कदा श्रोष्यामि लक्ष्मण ॥ १११ ॥
प्राप्य दुःखं वने श्यामा सा मां मन्मथकर्शितम् ॥ नष्टदुःखेव हृष्टेव साध्वी साध्वभ्यभाषत ॥११२॥
किंनु वक्ष्यामि कौसल्यामयोध्यायां नृपात्मज ॥ क्व सा स्नुषेति पृच्छन्तीं कथं चातिमनस्विनीम्॥११३॥
गच्छ लक्ष्मण पश्य त्वं मरतं भ्रातृवत्सलम् ॥ नह्यहं जीवितुं शक्तस्तामृते जनकात्मजाम् ॥११४॥
[इति रामस्तु विलपन्हतनौरिव सागरे ॥ न ददर्श तदा पारं शोकस्य पुरुषर्षभ] ॥ ११५ ॥
इति रामं महात्मानं विलपन्तमनाथवत् ॥ उवाच लक्ष्मणो भ्राता वचनं युक्तमव्ययम् ॥ ११६ ॥
संस्तम्भ राम भद्रं ते मा शुचः पुरुषोत्तम ॥ नेदृशानां मतिर्मन्दा भवत्यकलुषात्मनाम् ॥११७॥
स्मृत्वा वियोगजं दुःखं त्यज स्नेहं प्रिये जने ॥ अतिस्नेहपरिष्वङ्गाद्वर्तिरार्द्रापि दह्यते ॥ ११८ ॥
यदि गच्छति पातालं ततो ह्यधिकमेव वा ॥ सर्वथा रावणस्तावन्नभविष्यति राघव ॥ ११९ ॥
प्रवृत्तिर्लभ्यतां तावत्तस्य पापस्य रक्षसः ॥ ततो हास्यति वा सीतां निधनं वा गमिष्यति ॥१२०॥

यस्य तत् । शुभं शोभमानं । अव्रणं । निर्दोषमित्यर्थः । व्रणकिणरहितं वा ॥ ११० ॥ स्मितहास्यान्तरयुतं "कान्तस्मिता लक्ष्मण जातहासा "इत्युक्तरीत्या स्मितेन नैसर्गिकस्मितेन हास्यान्तरेण आगन्तुकहास्येन च युक्तं । गुणवत् स्ववचनापेक्षया उत्कर्षवत् । मधुरं हितं प्रियहितं । अतुलं "प्रियवादि च भूतानां" इत्युक्तरामवचनमप्यस्य न सदृशमित्यर्थः । संसारादुत्तीर्णस्यचेतनस्य "एतत्साम गायन्नास्ते" इत्युक्तसामध्वनिं कदा श्रोष्यामीति व्यञ्जयति ॥ १११ ॥ स्वयं दुःखं प्राप्य स्थितापि स्वदुःखमप्रकाशयन्ती हर्षं भावयन्ती । साधु मन्मथार्तिनिवर्तकं वचनमभ्यभाषत । पूर्वमितिशेषः । अनादिकालं ममकैङ्कर्ययोग्योजीवइत्यर्थः ॥ ११२ ॥ सा स्नुषा क्व कथं कीदृक्प्रकारेतिपृच्छन्तींकौसल्यां किंवक्ष्यामि । अतिमनस्विनीमित्यनेन यथार्थं वक्ष्यामि चेत्तदानीमेव वात्सल्यातिशयान्नश्येदित्युच्यते ॥११३॥ किमत्रयुक्तं तत्राह—गच्छेति ॥ ऋते विना ॥११४—११५ ॥ अव्ययं युक्तिभिरविनाश्यं ॥ ११६ ॥ संस्तम्भ संस्तम्भस्व । धैर्यमवलम्बस्वेत्यर्थः । अकलुषात्मनां सधैर्यहृदयानां । ईदृशानां त्वादृशानां । मन्दा अल्पा । कलुषितेत्यर्थः ॥ ११७ ॥ वियोगजं दुःखं भवतीत्येतल्लोकवृत्तं स्मृत्वा तद्धेतुभूतं प्रियजनविषयातिस्नेहं त्यजेत्यर्थः । तत्र श्लेषगर्भमर्थान्तरं न्यस्यति—अतीति । स्नेहः प्रीतिः तैलं च । अतः वात्सल्यप्रवृत्तिं विहाय चेतनसंतरणोपायं चिन्तयेत्यर्थः ॥ ११८ ॥ नभविष्यति विनशिष्यतीत्यर्थः ॥ ११९ ॥ प्रवृत्तिः वार्ता ॥ १२० ॥

ति० धारये प्राणानितिशेषः ॥ १०९ ॥ शि० मनःसीदत्येव । इवशब्दएवार्थे ॥ ११० ॥ ति० स्मितेन ईषद्धास्येनविनोदवचनेन अन्तरे मध्येएवयुतं नत्वोष्ठप्रदेशाद्बहिरितिपतिव्रतालक्षणसूचनं ॥ ती० स्मितहास्यान्तरयुतं प्रसन्नहास्यविशेषेणयुक्तं । यद्वास्मितंमन्दहासः । हास्यं प्रकटहासः । अन्तरं अवसरः । यथावसरंतद्युक्तमित्यर्थः । गुणवत् उपचारवत् ॥ स० हास्यशब्दसमभिव्याहारात्स्मितशब्दस्यमान्द्यमात्रमर्थः । तथाच स्मितहास्योत्तरयुतं मन्दहासोपेतवचनमित्यर्थः । एतादृशं यन्महावाक्यंतत्कदाश्रोष्यामि ॥ १११ ॥ रामानु० नह्यहंजीवितुंशक्तस्तामृतेजनकात्मजामित्यस्यानन्तरं इतिरामस्तुविलपन्नित्यादयःकेचनश्लोकाःकतिपयकोशेषुदृश्यन्ते । तेबहुकोशेष्वदृष्टत्वाद्वाल्मीकिपाकाप्रतीतेश्चतैर्विनाकथासंगत्युपपत्तेश्चनव्याख्याताः ॥ ११४ ॥ स० अतिस्नेहकरणे कदाचिद्वियोगेनदुःखंभवति । अतोवियोगजंदुःखंस्मृत्वाप्रियेजनेस्नेहंत्यज । तदेवदृष्टान्तेनाह—अतीति । आर्द्रापीत्यनेनविरोधाभासस्सूच्यते । लोकेआर्द्रवस्तुनोदाहाभावात् ॥ ११८ ॥ ति० तावत् प्रथमं । प्रवृत्तिः वासवृत्तान्तः ॥ १२० ॥

[पा०] १ ख. मितहास्यान्तर. ठ. स्मितहास्योत्तरयुतं. २ ग. गतं. ३ ङ. च. ज. ञ. प्राप्तदुःखं. ४ छ. झ. ट. मांमन्मथविकर्शितं. ५ ङ. च. ज. ञ. साल्वभ्यभाषत. ६ छ. झ. ट. धक्ष्याम्ययोध्यायांकौसल्यांहि. ७ ग. भ्रातरं. ८ अयं श्लोकः ङ. च. ज. पाठेषुदृश्यते. ९ क. ख. व्यक्तमव्ययं. १० ख. पुरुषर्षभ. ११ ङ. झ.—ट. रावणस्तातनभविष्यति. ख. रावणस्तातविनशिष्यति. १२ क. ग. हास्यतिवै.

यदि [1]यात्यदितेर्गर्भं रावणः सह सीतया ॥ तत्राप्येनं [2]हनिष्यामि न चे[3]द्धास्यति [4]मैथिलीम् ॥१२१॥
स्वास्थ्यं भद्रं भजस्वार्य त्यज्यतां कृपणा मतिः ॥ अर्थो हि [5]नष्टकार्यार्थै[6]र्नायत्नेनाधिगम्यते ॥१२२॥
उत्साहो बलवानार्य नास्त्युत्साहात्परं बलम् ॥ सो[7]त्साहस्यास्ति लोकेस्मिन्न किंचिदपि दुर्लभम् ॥१२३॥
उत्साहवन्तः पुरुषा नावसीदन्ति कर्मसु ॥ उत्साहमात्रमाश्रित्य [8]सीतां प्रति लभेमहि ॥ १२४ ॥
त्यज्यतां [9]कामवृत्तत्वं शोकं [10]संन्यस्य पृष्ठतः ॥ महात्मानं कृतात्मानमात्मानं [11]नावबुध्यसे ॥ १२५ ॥
एवं [12]संबोधितस्तत्र शोकोपहतचेतनः ॥ [13]न्यस्य शोकं च मोहं च [14]ततो धैर्यमुपागमत् ॥ १२६ ॥
सोभ्यतिक्रामदव्यग्रस्तामचिन्त्यपराक्रमः ॥ रामः पम्पां सुरुचिरां रम्यपारिप्लवद्रुमाम् ॥ १२७ ॥

निरीक्षमाणः सहसा महात्मा सर्वं वनं [15]निर्झरकन्दरांश्च ॥
उद्विग्नचेताः सह लक्ष्मणेन विचार्य दुःखोपहतः प्रतस्थे ॥ १२८ ॥
तं मत्तमातङ्ग[16]विलासगामी गच्छन्तमव्यग्र[17]मना महात्मा ॥
सलक्ष्मणो [18]राघवमप्रमत्तो ररक्ष धर्मेण बलेन चैव ॥ १२९ ॥

अदितेः इन्द्रस्यमातुः ॥ १२१ ॥ स्वास्थ्यं धैर्यं । नष्टकार्यार्थैः नष्टकार्यरूपप्रयोजनैः पुरुषैः । अयत्नेन यत्नाभावेन ॥१२२॥ अतो यत्नः कर्तव्य इत्याह—द्वाभ्यामुत्साह इत्यादिभ्यां ॥ १२३—१२४ ॥ कामे वृत्तो व्यापारो यस्य स तथा तस्यभावस्तत्त्वं । पृष्ठतः संन्यस्य तिरस्कृत्येत्यर्थः । आत्मानं कृतात्मानं शिक्षितमनस्कं । महात्मानं महाधैर्यं । नावबुध्यसे । तस्मात्त्यज्यतामित्यन्वयः । किं वात्सल्येनतप्यसे । साधुकारीसाधुर्भवति पापकारी पापी भवतीति भवद्भिरेव कृतांशास्त्रमर्यादां किं नावबुध्यसइत्यर्थः ॥ १२५ ॥ एवमिति । अत्र शोकमोहशब्दाभ्यां दयावात्सल्येउच्येते । तयोस्त्यागोनाम शास्त्रमर्यादानुसारेणचेतनरक्षणोद्योगः ॥ १२६ ॥ अभ्यतिक्रामत् अनित्यत्वादडभावः । पारिप्लवद्रुमां चञ्चलद्रुमां । अनेन भगवतः संसारिमण्डलाभिमुख्यंसूचितं ॥ १२७ ॥ सर्गार्थंपुनःसंग्रहेणदर्शयति—द्वाभ्यां । विचार्य सीतामन्विष्येत्यर्थः ॥ १२८ ॥ मत्तगजवत् विलासेनगन्तुं शीलमस्यास्तीति तथा । अनेन वनदुर्गप्रदेशेपिनिर्भयसंचारित्वमुच्यते । अव्यग्रमनाः अचञ्चलचित्तः । अप्रकम्प्यरामविषयप्रेमभारइत्यर्थः । महात्मा अप्रच्युतधैर्यः । अप्रमत्तः गमनसौन्दर्यानुभवेप्यसक्तः । सः "रामे प्रमादं मा कार्षीः पुत्र भ्रातरि गच्छति" इति सुमित्रया संदिष्टः लक्ष्मणः कैङ्कर्यलक्ष्मीयुक्तः । तं सीतावियोगार्तं । गच्छन्तंमत्तमातङ्गगामिनमित्युक्तरीत्या गमनचारुतया सर्वान्वशीकुर्वन्तं राघवं । धर्मेण संस्तम्भेत्यादिराजनीतिकथनेन । बलेन तत्राप्येनंहनिष्यामीति स्वबलकथनेन च । ररक्ष निर्दुःखमफ-

ति० दितेः असुरमातुः ॥ १२१ ॥ रामानु० स्वास्थ्यं स्वभावावस्थानं धैर्यमितियावत् ॥ १२२ ॥ ति० उत्साहमात्रं शत्रुसंहारेपौरुषं ॥ १२४ ॥ ति० कामवृत्तत्वं कामपरतन्त्रत्वं । शोकंपृष्ठतस्संन्यस्य कामजशोकसेवनेकामस्यवृद्धेस्तत्सेवनंपृष्ठतः कृत्वेत्यर्थः । महात्मानं रजस्तमोमलास्पृष्टचित्तं निरतिशयशौर्यधैर्यादिस्वभावचित्तंच । कृतात्मानं श्रुतिस्मृत्यादिषुगुरुभिश्शिक्षितस्वरूपं । किंनावबुध्यसे । यद्यपीश्वरस्यलोकवद्धर्माधर्माश्रयंचित्तंनास्ति । तथापि मायिकंतदाश्रयंतदस्ति । तत्स्वीकारेबाधकाभावात् ॥ १२५ ॥ ति० मोहः कामजः । मोहजश्चशोकः ॥ १२६ ॥ ति० विचार्य लक्ष्मणोक्तेर्युक्तत्वमितिशेषः ॥ १२८ ॥ शि० इष्टचेष्टः इष्टेरघुनाथेच्छाविषयीभूतेचेष्टाव्यापारोयस्य रामेप्सितसाधकइत्यर्थः ॥ स० बलेनरक्षणंचनिद्रादावन्योपद्रवपरिहारेण ॥ १२९ ॥

[पा०] १ क.—ट. यातिदितेर्गर्भं. २ क. ख. घ. वधिष्यामि. ३ क. ख. घ. ङ. च. ज.—ट. चेद्दास्यति. ४ ग. जानकीं. ५ ख. घ. विनष्ट. ग. विनष्टधैर्यार्थैः. ६ छ. झ. ट. रयत्नेनाधिगम्यते. क. ग. र्यत्नेनापिनगम्यते. ७ क. ग.—ट. सोत्साहस्यहिलोकेपुन. ख. सोत्साहस्यच. ८ क.—घ. छ. झ. ट. प्रतिलप्स्यामजानकीं. ङ. च. ज. प्रतिलप्स्यसिजानकीं. ९ च. ज. कामवृत्तित्वं. १० ग. संत्यज्य. ११ क. ग. ङ. च. ज. ञ. किंनबुध्यसे. १२ क. ङ.—ट. संबोधितस्तेन. १३ छ. झ. ट. त्यज्य. १४ क. ग. ङ.—ट. रामो. १५ क. ग. निर्दरकन्दरंच. घ. च.—ट. निर्झरकन्दरंच. ङ. वैगिरिकन्दरंच. १६ ङ.—ज. ञ. विलासगामिनं. १७ घ. ङ. मसौमहात्मा. १८ क. ग. च.—ट. राघवमिष्टचेष्टो.

तावृश्यमूकस्य समीपचारी चरन्ददर्शाद्भुतदर्शनीयौ ॥
शाखामृगाणामधिपस्तरस्वी वितत्रसे नैव चिचेष्ट किंचित् ॥ १३० ॥
स तौ महात्मा गजमन्दगामी शाखामृगस्तत्र चिरं चरन्तौ ॥
दृष्ट्वा विषादं परमं जगाम चिन्तापरीतो भयभारमग्नः ॥ १३१ ॥
तमाश्रमं पुण्यसुखं शरण्यं सदैव शाखामृगसेवितान्तम् ॥
त्रस्ताश्च दृष्ट्वा हरयोऽभिजग्मुर्महौजसौ राघवलक्ष्मणौ तौ ॥ १३२ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे प्रथमः सर्गः ॥ १ ॥

द्वितीयः सर्गः ॥ २ ॥

रामलक्ष्मणदर्शिनासुग्रीवेण तयोर्वालिप्रेषितत्वबुद्ध्या सचिवैःसहभीत्या गूढस्थानान्तरगमनम् ॥ १ ॥ हनुमता सयुक्तिकंसुग्रीवसमाश्वासनम् ॥ २ ॥ सुग्रीवेण रामलक्ष्मणभावपरीक्षणाय तौप्रतिहनुमत्प्रेषणम् ॥ ३ ॥

तौ तु दृष्ट्वा महात्मानौ भ्रातरौ रामलक्ष्मणौ ॥ वरायुधधरौ वीरौ सुग्रीवः शङ्कितोऽभवत् ॥ १ ॥
उद्विग्नहृदयः सर्वा दिशः समवलोकयन् ॥ न व्यतिष्ठत कस्मिंश्चिद्देशे वानरपुङ्गवः ॥ २ ॥
नैव चक्रे मनः स्थाने वीक्षमाणो महाबलौ ॥ कपेः परमभीतस्य चित्तं व्यवससाद ह ॥ ३ ॥

रोत् ॥ १२९ ॥ अथ सीताप्राप्तिबीजमुपक्षिपति—ताविति ॥ ऋश्यमूकस्य ऋश्यमूकाख्यपर्वतस्य । समीपचारी समीपसंचरणशीलः । वालिभयादिति शेषः । चरन् कदाचित्पम्पोपान्तेपर्यटन् । अद्भुतं यथा भवति तथा दर्शनीयौ । शाखामृगाणां वानराणां अधिपः सुग्रीवः । तरस्वी बलवान् । वितत्रसे तत्रास । व्यत्ययेनात्मनेपदं । भीतोऽभूत् । न चिचेष्ट न चिचेष्टे । व्यत्ययेन परस्मैपदं । स्तब्धोऽभूदित्यर्थः ॥ १३० ॥ तत्र पम्पावने । विषादचिन्ताभयहेतव उत्तरसर्गे व्यक्तीभविष्यन्ति ॥ १३१ ॥ न केवलं सुग्रीव एव त्रस्तः तत्सचिवा अपीत्याह—तमिति ॥ आश्रमं मतङ्गाश्रमं । पुण्यं धर्मवर्धकं । सुखं सुखकरं । शरण्यं मुनिजनवासयोग्यं । सदैव वानरसेवितान्तं । वानरसेवितमध्यमिति दुष्प्रवेशत्वोक्तिः । तौ दृष्ट्वा । हरयः वानराः । वित्रस्ताः मुनिवेषेणवालिप्रेरितौसमागताविति शङ्कयेति भावः । हरयः तौदृष्ट्वात्रस्ताःसन्तः आश्रममभिजग्मुरित्यन्वयः ॥ १३२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने प्रथमः सर्गः ॥ १ ॥

अथ सुग्रीवेण हनुमत्प्रेषणं द्वितीये—तौ त्वित्यादि ॥ महात्मानौ महाशरीरौ । भद्राकृती इत्यर्थः । वरायुधधरौ अतएव वीरौ ॥ १ ॥ उद्विग्नहृदयः भीतमनस्कः ॥ २ ॥ स्थाने स्वस्थाने । निश्चलत्वइति यावत् । व्यवससाद दुःखितमभूत् ॥ ३ ॥

ति० वितत्रसेवितत्रास । वास्यानीतत्वशङ्कयात्रासः ॥ विभ्रान्तिमत्तस्यबभूवचित्तंइत्याधुनिकपाठे तस्यसुग्रीवस्यचित्तं तद्दर्शनेनविभ्रान्तिमत् भयवद्बभूवेत्यर्थः ॥ १३० ॥ ति० भयभारमग्न भयभारेणभग्नोत्साहः ॥ १३१ ॥ ती० तमाश्रमं मतङ्गशापाद्वालिनोदुष्प्रवेशत्वेनप्रसिद्धंमतङ्गाश्रमं । अयंश्लोकः उत्तरसर्गार्थसंग्राहकः । एवमेवान्येषुपुराणेषुपंपादर्शनेनरामस्यकामार्तत्वंप्रतिपादितं । अतएवरामोविरहभरेणभ्रमरादीञ्शशापेत्युक्तंस्कान्दे । "वैमुख्यंगन्धफल्यास्तुभ्रमरानशपत्प्रभुः । कोकान्निशीथेविश्लेषं पिकमन्यविवर्धनम् । चन्दनंसर्पनिलयंवायुंसर्पाशनंतथा । ज्योत्स्नांकलङ्कसंछन्नांशशापरघुनन्दनः ।" इति ॥ रामानु० हरयः सुग्रीवादयः । बहुवचनप्रयोगस्तुसचिवापेक्षया । एतदुपरितनसर्गेव्यक्तीभविष्यति ॥ १३२ ॥ इतिप्रथमस्सर्गः ॥ १ ॥

[पा०] १ क. ख. ग. ङ. च. ज. ञ. विभ्रान्तिमत्तस्यबभूवचित्तं. २ छ. ज. झ. ट. चेष्टं. ३ घ. ततोमहात्मा. ४ ख.—ङ. छ.—ट. चरंश्चरन्तौ. ५ छ. ज. झ. ट. हरयोविजग्मुः. ६ ग. ह्यतिष्ठत. ७ छ. झ. ट. स्थातुं.

चिन्तयित्वा स धर्मात्मा विमृश्य गुरुलाघवम् ॥ सुग्रीवः परमोद्विग्नः सर्वैरनुचरैः सह ॥ ४ ॥
ततः स सचिवेभ्यस्तु सुग्रीवः प्लवगाधिपः ॥ शशंस परमोद्विग्नः पश्यंस्तौ रामलक्ष्मणौ ॥ ५ ॥
एतौ वनमिदं दुर्गं वालिप्रणिहितौ ध्रुवम् ॥ छद्मना चीरवसनौ प्रचरन्ताविहागतौ ॥ ६ ॥
ततः सुग्रीवसचिवा दृष्ट्वा परमधन्विनौ ॥ जग्मुर्गिरितटात्तस्मादन्यच्छिखरमुत्तमम् ॥ ७ ॥
ते क्षिप्रमधिगम्याथ यूथपा यूथपर्षभम् ॥ हरयो वानरश्रेष्ठं परिवार्योपतस्थिरे ॥ ८ ॥
एकमेकायनगताः प्लवमाना गिरेर्गिरिम् ॥ प्रकम्पयन्तो वेगेन गिरीणां शिखराण्यपि ॥ ९ ॥
ततः शाखामृगाः सर्वे प्लवमाना महाबलाः ॥ बभञ्जुश्च नगांस्तत्र पुष्पितान्दुर्गसंश्रितान् ॥१०॥
आप्लवन्तो हरिवराः सर्वतस्तं महागिरिम् ॥ मृगमार्जारशार्दूलांस्त्रासयन्तो ययुस्तदा ॥ ११ ॥
ततः सुग्रीवसचिवाः पर्वतेन्द्रं समाश्रिताः ॥ संगम्य कपिमुख्येन सर्वे प्राञ्जलयः स्थिताः ॥ १२ ॥
ततस्तं भयसंविग्नं वालिकिल्बिषशङ्कितम् ॥ उवाच हनुमान्वाक्यं सुग्रीवं वाक्यकोविदः ॥ १३ ॥
संभ्रमस्त्यज्यतामेष सर्वैर्वालिकृते महान् ॥ मलयोऽयं गिरिवरो भयं नेहास्ति वालिनः ॥ १४ ॥
यस्मादुद्विग्नचेतास्त्वं प्रद्रुतो हरिपुङ्गव ॥ तं क्रूरदर्शनं क्रूरं नेह पश्यामि वालिनम् ॥ १५ ॥

धर्मे राजधर्मे आत्मा मतिर्यस्य स धर्मात्मा । अनुचरैः मन्त्रिभिः सह चिन्तयित्वा । गुरुलाघवं विमृश्य स्थाने पलायने च गुरुलाघवं विमृश्य च । परमोद्विग्नोऽभवत् ॥ ४ ॥ रामलक्ष्मणौ तत्स्वभावं शशंस ॥ ५ ॥ प्रणिहितौ चारौ । छद्मना ऋषिवेषव्याजेन ॥ ६ ॥ जग्मुः सुग्रीववचने हितत्वबुद्ध्येति शेषः ॥ ७ ॥ अधिगम्य नानादिक्षुपलायिताएकत्र समागम्य ॥ ८ ॥ पुनरपि गिरेर्गिरिं प्लवमानाः गिरीणां शिखराण्यपि प्रकम्पयन्तः । एकायनगताः क्रमेणैकस्थानगताः सन्तः । एकं एकाकिनं सुग्रीवमुपतस्थिर इत्यनुषङ्गः । एवमेकायनगता इति पाठे एवं उक्तरीत्या । एकायनगतास्ते प्रकम्पयन्तोभवन्निति योजना ॥ ९ ॥ दुर्गं गिरिः ॥१०॥ आप्लवन्तो ययुः नतु मन्दं ययुरित्यर्थः ॥ ११ ॥ पर्वतेन्द्रं ऋश्यमूकं । पर्यन्तपर्वतेषुतत्रतत्रगत्वा पुनस्तमेव ऋश्यमूकं ययुरित्यर्थः ॥ १२ ॥ वालिकिल्बिषेण वालिकपटेन शङ्कितं । वालिना प्रेषिताविमाविति शङ्कितमित्यर्थः ॥ १३ ॥ वालिकृते वालिनिमित्तं संभ्रमस्त्यज्यतां । मलय इतिपर्वतमात्रस्य नाम । अयंमलयः अयंपर्वतः । गिरिवरः ऋश्यमूक इत्यर्थः ॥ १४ ॥ वाली वेषान्तरधारी समागत इति भ्रमं वारयति—यस्मादित्यादिना ॥ यस्मात् वालिनः । क्रूरं क्रूरकर्मा-

स० गुरु गुरुकार्यं । लाघवं लघुकार्यं । स्वार्थिकोऽण् । यद्वा गुर्विति भावप्रधानः । तथाच कार्यगौरवंलाघवंचविमृश्य । अथवा अत्रावस्थानविषये गुरुलाघवं अतिलाघवंविमृश्येत्यर्थः ॥ शि० चिन्तयित्वा वालिबलंसंस्मृत्य । गुरुलाघवं तद्बलस्यगुरुत्वंस्वबलस्यलाघवंलघुत्वंच । विमृश्य निश्चित्य । वानरैस्सहपरमोद्विग्नआसेतिशेषः ॥ ४ ॥ ति० ततोविचारानन्तरंप्रस्थानेच्छयासचिवेभ्यश्शशंस । भयहेतुमितिशेषः ॥ ५ ॥ ति० जग्मुः सुग्रीवेणसहेतिशेषः । अन्यंशिखरमितिपाठे पुंस्त्वमार्षं ॥ ७ ॥ रामानु० अपिशब्दोभिन्नक्रमः । एवमेकायनगताअपि पूर्वोक्तप्रकारेणैकस्थानगताअपि । गिरीणांशिखराणिप्रकंपयन्तः गिरेर्गिरिंप्लवमानाः जग्मुरितिशेषः । अत्रगिरिशब्दोगिर्येकदेशवाची । एकमेकायनगताइतिपाठे एकं पलायनेनैकाकिनंयूथपर्षभंसुग्रीवमधिगम्य अतएवएकायनगताः एकस्थानगताः । परिवार्योपतस्थिरइतिपूर्वेणसंबन्धः ॥ ति० उक्तमेवविवृणोति—एवमिति । उक्तरीत्यास्थितिगतिभयाभयसुखदुःखादावेकायनंएकमार्गसमानत्वंगताः ॥ ९ ॥ ति० वालिकिल्बिषात् वालिप्रवर्तनयाकिल्बिषात् वधात् शङ्कितं ॥ शि० वालिकिल्बिषशङ्कितं वालिनिभासमानस्यापराधेनभीतं । अतएवभयसंत्रस्तं भयाभ्यांवालिप्रेषिताविमाविति संभावनयाभयहेतुभ्यांसंत्रासवन्तंसुग्रीवं ॥ भयसंत्रस्तं भयसाधनेनभीतं ॥ १३ ॥ शि० यतः अयंगिरिर्मलयः मस्य भवद्विघातकवालिनः लयःऋषिशापाद्विध्वंसोयस्मिन्सः । अतइहवालिनोभयंनास्ति ॥ १४ ॥ रामानु० मलयोयंऋश्यमूकावयवःपर्वतः । " पर्वतादृश्यमूकात्तुपुप्लुवेयत्रराघवौ " इतिमलयस्यैवऋश्यमूकशब्देनवक्ष्यमाणत्वात् ॥ १४ ॥ शि० वालिनं

[पा०] १ क. ग. चिन्तयित्वातु. २ छ. झ. ट. सर्वैस्तैर्वानरैस्सह. ३ ख. ग. ङ. छ. झ. ञ. ट. एवमेकायन. च. एकायनगतास्तेपिधावमानाः. ४ ङ.—ट. शिखराणिच. ५ ङ.—ट. दुर्गमाश्रितान्. ६ छ. झ. ट. पर्वतेन्द्रेसमाहिताः. ७ क. ग. ङ.—ट. ततस्तुभयसंत्रस्तं. ८ क. ञ. ञ. वाक्यकोविदं. ९ क. ग. ङ. ञ. ञ. र्वालिकृतो. १० ङ. छ.—ट. विद्रुतो.

यस्मात्तव भयं सौम्य पूर्वजात्पापकर्मणः ॥ स नेह वाली दुष्टात्मा न ते पश्याम्यहं भयम् ॥ १६ ॥
अहो शाखामृगत्वं ते व्यक्तमेव प्लवङ्गम ॥ लघुचित्ततयाऽऽत्मानं न स्थापयसि यो मतौ ॥ १७ ॥
बुद्धिविज्ञानसंपन्न इङ्गितैः सर्वमाचर ॥ न ह्यबुद्धिं गतो राजा सर्वभूतानि शास्ति हि ॥ १८ ॥
सुग्रीवस्तु शुभं वाक्यं श्रुत्वा सर्वं हनूमतः ॥ ततः शुभतरं वाक्यं हनूमन्तमुवाच ह ॥ १९ ॥
दीर्घबाहू विशालाक्षौ शरचापासिधारिणौ ॥ कस्य न स्याद्भयं दृष्ट्वा त्वेतौ सुरसुतोपमौ ॥ २० ॥
वालिप्रणिहितावेतौ शङ्केऽहं पुरुषोत्तमौ ॥ राजानो बहुमित्राश्च विश्वासो नात्र हि क्षमः ॥ २१ ॥
अरयश्च मनुष्येण विज्ञेयाश्छन्नचारिणः ॥ विश्वस्तानामविश्वस्ता रन्ध्रेषु प्रहरन्ति हि ॥ २२ ॥
कृत्येषु वाली मेधावी राजानो बहुदर्शनाः ॥ भवन्ति परहन्तारस्ते ज्ञेयाः प्राकृतैर्नरैः ॥ २३ ॥
तौ त्वया प्राकृतेनैव गत्वा ज्ञेयौ प्लवङ्गम ॥ इङ्गितानां प्रकारैश्च रूपव्याभाषणेन च ॥ २४ ॥
लक्षयस्व तयोर्भावं प्रहृष्टमनसौ यदि ॥ विश्वासयन्प्रशंसाभिरिङ्गितैश्च पुनःपुनः ॥ २५ ॥
ममैवाभिमुखं स्थित्वा पृच्छ त्वं हरिपुङ्गव ॥ प्रयोजनं प्रवेशस्य वनस्यास्य धनुर्धरौ ॥ २६ ॥
शुद्धात्मानौ यदि त्वेतौ जानीहि त्वं प्लवङ्गम ॥ व्याभाषितैर्वा विज्ञेयौ स्याद्दुष्टादुष्टता तयोः ॥२७॥

णं ॥ १५ ॥ पापकर्मणः अनुजभार्यापहारिणः । भयं भयहेतुं ॥ १६ ॥ मतौ सम्यग्विचारे ॥ १७ ॥ बुद्धिः सामान्यतो ज्ञानं । विशेषतो ज्ञानं विज्ञानं । इङ्गितं अभिप्रायसूचको व्यापारः । सर्वं कार्यं । अबुद्धिं अबुद्ध्यादिकं ॥१८॥ ततः शुभतरं तद्वाक्यात्यन्तशुभं ॥ १९ ॥ दीर्घौ बाहवो ययोस्तौ दीर्घबाहू । इत्येवं सर्वत्र समासः ॥ २० ॥ वालिप्रणिहितौ नाहं वाली समागत इतिविभेमि किंतु तत्प्रेषिताविति भलेतिभावः । एतादृशतदीयपुरुषस्य का प्रसक्तिस्तत्राह—राजान इति । अत्र राजविषये ॥ २१ ॥ छन्नचारिणोऽरयः मनुष्येण शत्रुमता ज्ञेयाः । कुत इत्यत्राह—विश्वस्तानामिति । विश्वस्तानां शत्रूणां रन्ध्रेषु प्रमादेषुसत्सु । स्वयमविश्वस्ताः सन्तः प्रहरन्ति हि ॥ २२ ॥ कृत्येषु कर्तव्यकार्येषु । वाली मेधावी दूरदर्शी । स्वभावश्चायं राज्ञामित्याह—राजान इति । राजानः बहुदर्शनाः बहूपायज्ञाः । परहन्तारो भवन्ति । ते प्राकृतैः दीनवेषधरैः । नरैः ज्ञेयाः ॥ २३ ॥ प्राकृतेन प्राकृतवेषेण । इङ्गितानां भावसूचककायिकव्यापाराणां । प्रकारैः अवान्तरभेदैः । रूपेण सौम्यासौम्यलक्षणेन । व्याभाषणेन अन्योन्यसंभाषणेन च । तौ ज्ञेयौ ॥ २४ ॥ यदि प्रहृष्टमनसौ यदि शुद्धभावौ । तदा प्रशंसाभिः सदनुकूलेङ्गितैश्च पुनः पुनः विश्वासयन् ममैवाभिमुखं अनुकूलं यथा भवति तथा । स्थित्वा स्थापयित्वा । धनुर्धरौ धनुर्धरत्वात्र वने प्रवेशस्य प्रयोजनं

इहनपश्यामि तस्येहाग्रमनंतसंभावयामीत्यर्थः ॥ १५ ॥ रामानु० मतौ सम्यग्विचारविषयबुद्धौ ॥ १७ ॥ ति० ननुततोभयाभावेपितत्प्रेरिताइत्यंतत्राह—बुद्धीति ॥ १८ ॥ टीका० सुरसुतः सुरराज तदुपमौ । "पार्थिवेतनयेसुत" इत्यमरः ॥२०॥ ति० ननुवनचारिणावानरेणबालिनाकृतोऽनयोःप्रवर्तनातत्राह—राजानइति । बहुमित्राः आत्यन्तरेष्वपिमित्रवन्तः । यथा दशरथोगृध्रराजेनमित्रवान् । एवंबालिनापिनरमैत्र्यंसंभावितमितिभावः । ति० राजानोबहुमित्राः वेषान्तरधारिभिर्मित्रैः शत्रून्घातयिष्यन्तीतिभावः ॥ २१ ॥ ती० विज्ञेयाः शोधनीयाः॥ २२ ॥ ति० प्राकृतेनेव उदासीनेनेव । व्याभाषणेन तत्तत्प्रसङ्गेदीयमानोत्तरेणच ॥ २४ ॥ ति० तयोर्मनुष्ययोः । यदित्वविसमीपस्थिते प्रहृष्टमनसौ उत्तरप्रत्युत्तरादौसंतुष्टमनसौ । तदा तयोरभिमुखंस्थित्वा ममैवप्रशंसाभिः तद्दोषकवाक्यैः । इङ्गितैः मामकाभिप्रायबोधनैः । मयितौविश्वासयन्नस्यवनस्यप्रवेशस्यप्रयोजनं पृच्छ । यद्वा ममैवाभिमुखंयथातथास्थित्वाप्रशंसाभिः तयोस्तुतिभिः । इङ्गितैः स्वीयैः । तवात्मनिमयिचविश्वासयन्पृच्छेत्यन्वयः । स्वाभिमुखस्थितिकथनमन्यादृशवचनकथनसंभावनयातन्निरासायेतिबोध्यं ॥ २५—२६ ॥ ति० प्रश्नावसरंदर्शयति—शुद्धेति ।

[पा०] १ क. नेह. २ ग. च. ज. मेमतौ. ३ छ. झ. प्रणिहितावेव. ४ घ. नास्तिहिक्षमः. ५ छ. झ. ञ. ट. छन्नचारिणः. ६ छ. झ. अविश्वस्तारिछद्रेषु. ७ क. ख. घ.—ट. बहुदर्शिनः. ८ च. झ. प्राकृतेनेव. ९ ख. घ. रूपेणाभाषणेनच. १० ञ. लक्षयेत्य. ११ ख. विज्ञेयं. १२ म. संभाषणैर्वा. क. व्याभाषणैर्वा. १३ छ. ज. झ. ट. रूपैर्वाविज्ञेयादुष्टतानयोः.

इत्येवं कपिराजेन संदिष्टो मारुतात्मजः ॥ चकार गमने बुद्धिं यत्र तौ रामलक्ष्मणौ ॥ २८ ॥
तथेति संपूज्य वचस्तु तस्य तत्कपेः सुभीमस्य दुरासदस्य च ॥
महानुभावो हनुमान्ययौ तदा स यत्र रामोतिबलश्च लक्ष्मणः ॥ २९ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे द्वितीयः सर्गः ॥ २ ॥

तृतीयः सर्गः ॥ ३ ॥

हनुमता भिक्षुवेषपरिग्रहेण श्रीरामलक्ष्मणयुपेत्य सप्रणामंसप्रशंसनंच तदीययथार्थ्यप्रश्नः ॥ १ ॥ तथा तयोःसुग्रीववृत्तान्तादिनिवेदनपूर्वकं तत्प्रत्यासन्नाकाङ्क्षानिवेदनम् ॥ २ ॥ हनुमतोव्यवहारचतुरीतुष्टेनरामेण लक्ष्मणे हनुमतःसाङ्गसकलवेदवेत्तृत्वनिवेदनपूर्वकं तच्छ्लाघनम् ॥ ३ ॥ लक्ष्मणेन रामचोदनया हनुमन्तंप्रति रामस्यापिसुग्रीवसख्यापेक्षानिवेदनम् ॥ ४ ॥

वचो विज्ञाय हनुमान्सुग्रीवस्य महात्मनः ॥ पर्वतादृश्यमूकात्तु प्लुप्लुवे यत्र राघवौ ॥ १ ॥
कपिरूपं परित्यज्य हनुमान्मारुतात्मजः ॥ भिक्षुरूपं ततो भेजे शठबुद्धितया कपिः ॥ २ ॥
ततः स हनुमान्वाचा श्लक्ष्णया सुमनोज्ञया ॥ विनीतवदुपागम्य राघवौ प्रणिपत्य च ॥
आबभाषे तदा वीरौ यथावत्प्रशशंस च ॥ ३ ॥

पृच्छ ॥ २५—२७ ॥ यद्येतौ शुद्धात्मानौ तदा पुनरपि जानीहि । किं सेनेत्यत्राह—व्याभाषितैरिति । वाकारश्चार्थः । अदुष्टतेति च्छेदः । सुग्रीववचनं समीचीनममन्यतेत्याह—इतीति ॥ २८ ॥ संपूज्य श्लाघयित्वा । सुभीमस्य दुरासदस्येत्येताभ्यांसुनीतित्वं सूचितं । महानुभावः वेषान्तरधारणसमर्थः । सः हनुमान् । यत्ररामोलक्ष्मणश्च तंदेशंययावित्यन्वयः ॥ २९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने द्वितीयः सर्गः ॥ २ ॥

प्रथमे सर्गे वैकुण्ठवासिनो भगवतः स्वीयेषु केषांचित्स्वपरत्वेवर्तमाने केषांचिद्विषयान्तरप्रावण्यमवलोक्यदूयमानमानसस्य दयावृत्तिविशेषःप्रतिपादितः । द्वितीये चेतनस्य भगवदपराधदण्डभीतस्य तस्मिन्नाभिमुख्यमुक्तं । अथ तल्लाभहेत्वाचार्यकृत्यं दर्शयति तृतीये—वच इत्यादि ॥ १ ॥ रूपान्तरपरिग्रहसामर्थ्यमुच्यते मारुतात्मजइति । शठबुद्धितया वञ्चकबुद्धितया । भिक्षुरूपं संन्यासिवेषं । " भिक्षुःपरिव्राट्कर्मन्दी पाराशर्यपि मस्करी " इत्यमरः ॥ २ ॥ तत इति सार्धः ॥ विनीतवत् सविनयं । उपागम्य प्रणिपत्य नमस्कृत्य । श्लक्ष्णया अपरुषया । सुमनोज्ञया अर्थतोतिरम्यया । वाचा । आबभाषे । यथावत्परमार्थतया प्रशशंस च । अत्रभिक्षुरूपस्यहनुमतःप्रणामादन्यत्रापि भिक्षोर्गृहस्थादिविषये प्रणामः कर्तव्यएवेतिविज्ञायते । संन्यासिनो गृहस्थादिप्रणामनिषेधवचनं यद्येतौशुद्धात्मानौ अस्मासुद्वेषरहितौजानीहि ज्ञास्यसि तर्ह्येव तदभिमतंप्रयोजनंपृच्छ । उपसंहरति—व्याभाषितैरिति । दुष्टताऽदुष्टताचेतित्रयेणपदच्छेदः ॥ २७ ॥ **रामानु०** तावित्यादि । रूपव्याभाषणेनचतयोर्भावंलक्षयन् । यदिप्रदुष्टमनसौ प्रशंसाभिरिति तैश्चपुन-पुनर्विश्वासयन् ममैवाभिमुख्ययाभवतितश्चास्थिता स्थापयित्वा । अस्यवनप्रवेशस्यप्रयोजनंपृच्छ । धनुर्धरावेतौशुद्धात्मानौयदि तदानीमपिपूर्वोक्तप्रकारेणतौमदीयौकृत्वा आगमनप्रयोजनंजानीहि ॥ २४—२७ ॥ इतिद्वितीयःसर्गः ॥ २ ॥

ति० विज्ञाय तात्पर्यतोज्ञात्वा ॥ १ ॥ **टीका०** भिक्षुरूपं नैष्ठिकब्रह्मचर्यरूपं ॥ **शि०** अशठबुद्धितया वानरत्वसूचितशठबुद्धित्वाभावेनोपलक्षितः । एतेन वानरत्वसूचितशठबुद्धिमविज्ञाय रामोनसंभाषेतेतिहनुमत्संभावनासूचिता । रूपान्तरमगृहीत्वा भिक्षुरूपंभेजदित्यनेन इमौदीनदयालुहृतिहनुमताज्ञातमितिव्यञ्जितं । सेनतद्बुद्धेः प्रभावातिशयोव्यक्तः ॥ २ ॥ **ति०** यथावत्प्रश-

[पा०] १ क. ग. म. हरिराजेन. २ छ. झ. ट. तत्कपेः. ३ क. ख. ग. ङ.—ट. सुभीतस्य. ४ घ. छ. झ. ट. बलीसलक्ष्मणः. ५ ज. दृश्यमूकात्तु. ६ च. भिक्षुवद्ब्रह्मचारीचरामदर्शनलालसः. ज. भिक्षुवद्भैक्षचारीचरामदर्शनलालसः. ७ क. ख. घ. छ. झ. ठ. आबभाषेचतौवीरौ. ङ. च. ज. ञ. आबभाषेहितौ. ग. आबभाषेयतौ.

संपूज्य विधिवद्वीरो हनुमान्मारुतात्मजः ॥ उवाच कामतो वाक्यं मृदु सत्यपराक्रमौ ॥ ४ ॥
राजर्षिदेवप्रतिमौ तापसौ संशितव्रतौ ॥ देशं कथमिमं प्राप्तौ भवन्तौ वरवर्णिनौ ॥ ५ ॥
त्रासयन्तौ मृगगणानन्यांश्च वनचारिणः ॥ पम्पातीरुरुहान्वृक्षान्वीक्षमाणौ समन्ततः ॥ ६ ॥
इमां नदीं शुभजलां शोभयन्तौ तपस्विनौ ॥ धैर्यवन्तौ सुवर्णाभौ कौ युवां चीरवाससौ ॥ ७ ॥
निःश्वसन्तौ वरभुजौ पीडयन्ताविमाः प्रजाः ॥ सिंहविप्रेक्षितौ वीरौ सिंहोतिबलविक्रमौ ॥ ८ ॥
शक्रचापनिभे चापे गृहीत्वा शत्रुसूदनौ ॥ श्रीमन्तौ रूपसंपन्नौ वृषभश्रेष्ठविक्रमौ ॥ ९ ॥

नान्यङ्गविषयाणीतिमन्तव्यानि । यदिहिज्ञानाधिकं दृष्ट्वा कर्ममात्रेणाधिको यतिर्नप्रणमेत् तर्हि " विप्राणांज्ञानतोज्यैष्ठ्यं " इति मनुवचनं विरुध्येत । नहि तत्प्रणामनिषेधकं मनुवचनं किंचिदुपलभ्यते । किंचनाभ्याधीतमदृष्टाकरं यत्किंचिद्यतिप्रणामनिषेधवचनं किंवदन्तीसिद्धं । तस्य च विषयोऽङ्गगृहस्थादिरूपः । यत्तु केश्चिदुक्तं [रामानुजीयं] अत्यद्भुतरामलक्ष्मणरूपदर्शनसंजाताविस्मयस्सन्नङ्गीकृतं भिक्षुरूपं विस्मृत्य " अवशाःप्रतिपेदिरे " इतिवत्प्रणामेति नुविरोध इति । तन्न । उपक्रमविरोधात् । इङ्गितवचनाभिज्ञपरहृदयज्ञानार्थं हि प्रेषितोयं । नहि तथानियुक्तःसुनिपुणमतिःसचिवधुरंधरः स्वकार्यविरोधकरं परिगृहीताकारविरुद्धमविस्पष्टसंदेहतुल्येन परेङ्गितज्ञानाविष्कारहेतुभूतं कार्यकुर्यात् । यदप्युक्तं [रामानु० श्रीभाष्यं] " रूपमेवास्यैतन्महिमानंव्याचष्टे " इति न्यायेन दर्शनमात्रेणैतौसुग्रीवविरोधिनिरसनदक्षाविति निश्चित्य परिगृहीतवेषान्तरस्य स्वस्य चारत्वंप्रकटयितुंनमस्कारं कृतवानिति न दोषइति । तदपि । तथासति सुग्रीवोनामेत्यादिवक्ष्यमाणमेव प्रथमंकथयेत् । केचित्तु [टीका०] भिक्षुर्ब्रह्मचारी । अतो न दोष इत्याहुः । तन्न । तादृशभिक्षुकत्वस्यपूर्वमेव सिद्धत्वेन इदानीमपरिमाह्यत्वात् । अपरे तु [रामानु०] सर्वथा कपिरूपं परित्यज्येत्युपक्रमात् उपरिष्टात्प्रच्छन्नोक्त्या च मानुषरूपाङ्गीकारावश्यंभावात्तद्रूपविशिष्टं ब्रह्मचर्यमेवात्र भिक्षुशब्देनोच्यतइतिनविरोध इत्यूचिरे । तत्पक्षेतु पूर्वोक्त्यादिशादूषणंचिन्त्यं ॥३॥ कामतः भक्त्या । पूर्वोक्तप्रशंसा भक्तिकृता नतु केवलपरीक्षाकृतेति भावः ॥ ४ ॥ राजर्षीत्यादिश्लोकद्वयं । मृगगणान् अन्यान्वनचारिणश्च । त्रासयन्तौ समन्ततः पम्पातीरुरुहान्वृक्षान् वीक्षमाणौ च भवन्तौ वरवर्णिनौ स्निग्धरूपवन्तौ । कर्मधारयादपि मत्वर्थीयो दृष्टचरः । अतएव राजर्षिदेवप्रतिमौ । संशितव्रतौ तीक्ष्णव्रतौ । अतएव तापसौ तपस्विवेषौ भूत्वा । इमं दुर्गमं देशं कथं प्राप्तौ ॥ ५-६ ॥ इमामित्यादिसार्धश्लोकत्रयमेकान्वयं । पम्पायाःसरस्त्वेपि स्वल्पतयापूर्वापरप्रवाहवत्त्वेन नदीत्वमविरुद्धं । शोभयन्तौ । स्वतेजसेति शेषः । सुवर्णाभौ रामस्य श्यामत्वेपि लक्ष्मणस्य पीतवर्णत्वाच्छन्निन्यायात्सुवर्णकान्तित्वं । निःश्वसन्तौ वनसञ्चारायासात् । वरभुजौ सुन्दरभुजौ । हस्तिहस्तेत्यनेन दैर्घ्यपीवरत्वयोर्वक्ष्यमाणत्वात् । इमाः प्रजाः पक्षिमृगादीन् । पीडयन्तौ । अपूर्ववदर्शनेन विद्रावकावित्यर्थः । सिंहप्रेक्षविप्रेक्षितं वीक्षणं ययोस्तौ । सिंहातिबलविक्रमौ सिंहातिशायिबलपराक्रमौ । शक्रचापनिभेइन्द्रधनुस्तुल्ये चापे गृहीत्वा । शत्रुसूदनौ शत्रुसंहारकौ । नीलभेदपरभागतयाधनुषोरामरणत्वं शत्रुसंहारकत्वेनायुधकोटिप्रविष्टत्वंचदर्शितमाभ्यांविशेषणाभ्यां । श्रीमन्तौ कान्तिमन्तौ । रूपसंपन्नौ सौन्दर्ययुक्तौ । वृषभश्रेष्ठविक्रमौ वृषभश्रेष्ठगमनौ । द्युतिमन्तौ तेजस्विनौ । तेजस्तु श्रियोभिन्नमिति न पुनरुक्तिः । एवंभूतौ युवां काविः

र्थं मनुमित्यास्तुतिरित्यर्थः ॥ ३ ॥ रामानु० कामतः सुग्रीवोपदेशाविरुद्धस्वेच्छातः ॥ शि० कामतः सुग्रीवेच्छानुसारात् ॥ ४ ॥ रामानु० वर्णिनौ प्रशस्तवर्णौ । वरौचतौवर्णिनौचेतिविग्रहः ॥ ति० वरवर्णिनौ ब्रह्मचारिश्रेष्ठौ ॥ ५ ॥ ति० समन्ततोवीक्षमाणौ किंचिद्वस्त्वन्वेषमाणाविवेत्यर्थं ॥ ६ ॥ ति० इमांनदीमिति सरस्यपिविस्तृतत्वेननदीत्वोपचारइतिकेचित् । नदेवेत्यन्ये ॥ शि० द्युतसुवर्णस्यश्यामत्वेनदृश्यमानत्वात् अद्भुतस्यचगौरवर्णत्वेनदृश्यमानत्वात्सुवर्णाभावितिनविरुद्धं । सुवर्णशब्दे-

[पा०] १ क. ख. घ.—ट. द्वीरौ. २ छ. झ. ट. न्यायरोत्तमः. ३ ख. वारिमर्यादाभिस्सत्यविक्रमौ. ४ क—ट. तरस्विनौ. ५ झ. महाबलपराक्रमौ. ६ क.—ट. शत्रुनाशनौ. क. ग. घ. शत्रुनाशने.

हस्तिहस्तोपमभुजौ द्युतिमन्तौ नरर्षभौ ॥ १० ॥
प्रभया पर्वतेन्द्रोऽयं युवयोरवभासितः ॥ ११ ॥
राज्यार्हावमरप्रख्यौ कथं देशमिहागतौ ॥ पद्मपत्रेक्षणौ वीरौ जटामण्डलधारिणौ ॥ १२ ॥
अन्योन्यसदृशौ वीरौ देवलोकादिवागतौ ॥ यदृच्छयेव संप्राप्तौ चन्द्रसूर्यौ वसुन्धराम् ॥ १३ ॥
विशालवक्षसौ वीरौ मानुषौ देवरूपिणौ ॥ सिंहस्कन्धौ महोत्साहौ समदाविव गोवृषौ ॥ १४ ॥
आयताश्च सुवृत्ताश्च बाहवः परिघोपमाः ॥ सर्वभूषणभूषार्हाः किमर्थं न विभूषिताः ॥ १५ ॥
उभौ योग्यावहं मन्ये रक्षितुं पृथिवीमिमाम् ॥ ससागरवनां कृत्स्नां विन्ध्यमेरुविभूषिताम् ॥ १६ ॥
इमे च धनुषी चित्रे श्लक्ष्णे चित्रानुलेपने ॥ प्रकाशेते यथेन्द्रस्य वज्रे हेमविभूषिते ॥ १७ ॥
संपूर्णा निशितैर्बाणैस्तूणाश्च शुभदर्शनाः ॥ जीवितान्तकरैर्घोरैः श्वसद्भिरिव पन्नगैः ॥ १८ ॥
महाप्रमाणौ विस्तीर्णौ तप्तहाटकभूषितौ ॥ खड्गावेतौ विराजेते निर्मुक्ताविव पन्नगौ ॥ १९ ॥
एवं मां परिभाषन्तं कस्माद्वै नाभिभाषथः ॥ २० ॥
सुग्रीवो नाम धर्मात्मा कश्चिद्वानरयूथपः ॥ वीरो विनिकृतो भ्रात्रा जगद्भ्रमति दुःखितः ॥ २१ ॥

त्यन्वयः ॥ ७–१० ॥ प्रभयेत्यर्धं ॥ ११ ॥ राज्येत्यादित्रय एकान्वयाः । अमरप्रख्यौ देवतुल्यपराक्रमौ । देवलोकादागतौ वीराविवस्थितौ । यदृच्छया दैवात् । वसुन्धरांप्राप्तौ चन्द्रसूर्याविव स्थितौ । देवरूपिणौ देवतुल्यरूपिणौ । वीरौ मानुषौ युवां राज्यार्होऽपि राज्यं त्यक्त्वा वीरौ जटामण्डलधारिणौ अविच्छिन्नजटामण्डलधारिणौ भूत्वा । इहदेशं वनदेशं । कथं किमर्थं । आगतौ । समस्तराजलक्षणलक्षितयोर्युवयोः राज्यभोगएवोचितः । नतु वनवास इतिभावः ॥ १२–१४ ॥ आयताः आजानुविलम्बिनः । सुवृत्ताः भुजगभोगवद्वृत्ताः । बाहवः रामस्यदक्षिणोबाहुरितिलक्ष्मणस्य रामबाहुत्वात्तद्बाहुभ्यां बहुवचनं । यद्वा हनुमतो भक्तत्वेन तस्य चतुर्भुजत्वेनेश्वरोऽभवत् । यद्वा द्वयोर्बाहुचतुष्टयवत्त्वाद्बहुवचनं । परिघोपमाः परिघोगदाविशेषः तदुपमाः । स्वसौन्दर्यानुभवपराणां समस्तविरोधिनिवर्तनक्षमा इत्यर्थः । सर्वभूषणभूषार्हाः " आभरणस्याभरणं " इत्युक्तरीत्या भूषणान्यपि भूषयितुमर्हाः । किमर्थंनविभूषिताः इमान् भूषणैरलंकृत्य आभरणाभरणत्वं किमितिनप्रकाशितमित्यर्थः । यद्वा दृष्टिदोषपरिहाराय एतादृशबाहुसौन्दर्यमाच्छादयितव्यं । तत्किमर्थं नाच्छादितमितिभावः । यद्वा आभरणच्छन्नसौन्दर्यमेवालमस्मद्वशीकरणाय । अधिकं निरावरणसौन्दर्यप्रदर्शनमितिभावः । यद्वा राजकुमाराणां क्षणमात्रं ताम्बूलाभावेम्लानतावत्क्षणमात्रविरहेपि स्थातुमनर्हौ भूषाःकिमर्थं विश्लेषिताइतिभावः । यद्वा एवं भूषणविरहःकस्यवा शत्रोर्मूलघातायेतिभावः । अनेन अप्रतिहतसंकल्पत्वेपि नित्यसूरीन्विहाय चतुर्धावतरणे को हेतुरित्युक्तं ॥ १५ ॥ विन्ध्यमेरुविभूषितामिति दृष्टान्तार्थः—यथा विन्ध्यमेरू भूरक्षकौ तथा भवन्तावपीति ॥ १६ ॥ चित्रे लोकेएतादृशधनुषोरदर्शनादद्भुतावहे । वज्रे इत्यभूतोपमा ॥ १७ ॥ तूणा इतिबहुवचनं एकैकस्य पार्श्वद्वयेपि तूणीरद्वयसत्त्वात् ॥ १८ ॥ महाप्रमाणाविति दीर्घत्वं । विस्तीर्णाविति विशालता । तप्तहाटकं द्युतकनकं । निर्मुक्तौ निर्मुक्तत्वचौ ॥ १९ ॥ परिभाषन्तं पुनःपुनर्भाषमाणं । नाभिभाषतः नाभिभाषेथे । व्यत्यय आर्षः ॥ २० ॥ एवं स्वावाक्सौष्ठवेन तूष्णीभूतौदृष्ट्वास्वका-

नावस्याद्वयापन्नयोर्ग्रहणेबाधकाभावात् ॥ ति० शोभनोवर्णआभाकान्तिश्चयस्तौ ॥ ७ ॥ वी० एकत्वेनप्रसिद्धस्यापिवज्रायुधस्यानेकत्वकल्पनमुपमेयानेकत्वनिबन्धनमित्यविरुद्धं ॥ स० अमेकेन्द्रापेक्षयाबज्रेइत्युक्ति. ॥ १७ ॥ ति० ननुकस्त्वंकस्यवा यस्या-

[पा०] १ छ. झ. ट. पर्वतेन्द्रोऽसौ. २ क. च. ज. ञ. देशमुपागतौ. ३ क.—ट. दिहागतौ. ४ घ. क. च. ज. ञ. यदृच्छयेह. ५ क. ख. घ. च. ज. ञ. महासत्त्वौ. ६ ग. सुधनुषौ. ७ छ. झ. ट. संपूर्णाश्चितैः. ८ ख. स्तूण्यश्च. ९ क. ख. ङ.—ट. ज्वलद्भिरिव. ग. ज्वलद्भिरिवपावकैः. १० क. ख. ग. क. च. छ. झ. ञ. ठ. विपुलौ. घ. विकृतौ. ११ ज. झ. ट. भूषणौ. १२ घ. ङ.—ट. निर्मुक्तभुजगाविव. क. निर्मुक्तौभुजगाविव. १३ क. ख. ग. कस्मात्त्वैवाभिभाषतः. १४ छ. झ. ट. द्वानरपुङ्गवः.

प्राप्तोऽहं प्रेषितस्तेन सुग्रीवेण महात्मना ॥ राज्ञा वानरमुख्यानां हनूमान्नामवानरः ॥ २२ ॥
युवाभ्यां सह धर्मात्मा सुग्रीवः सख्यमिच्छति ॥ तस्य मां सचिवं वित्तं वानरं पवनात्मजम् ॥२३॥
भिक्षुरूपप्रतिच्छन्नं सुग्रीवप्रियकाम्यया ॥ ऋश्यमूकादिह प्राप्तं कामगं कामरूपिणम् ॥ २४ ॥
एवमुक्त्वा तु हनुमांस्तौ वीरौ रामलक्ष्मणौ ॥ वाक्यज्ञौ वाक्यकुशलः पुनर्नोवाच किंचन ॥२५॥
एतच्छ्रुत्वा वचस्तस्य रामो लक्ष्मणमब्रवीत् ॥ प्रहृष्टवदनः श्रीमान्भ्रातरं पार्श्वतः स्थितम् ॥ २६ ॥
सचिवोऽयं कपीन्द्रस्य सुग्रीवस्य महात्मनः ॥ तमेव काङ्क्षमाणस्य ममान्तिकमुपागतः ॥ २७ ॥
तमभ्यभाष सौमित्रे सुग्रीवसचिवं कपिम् ॥ वाक्यज्ञं मधुरैर्वाक्यैः स्नेहयुक्तमरिंदम ॥ २८ ॥
नानृग्वेदविनीतस्य नायजुर्वेदधारिणः ॥ नासामवेदविदुषः शक्यमेवं प्रभाषितुम् ॥ २९ ॥
नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम् ॥ बहु व्याहरताऽनेन न किंचिदपशब्दितम् ॥ ३० ॥

र्यमावेदयति—सुग्रीव इत्यादिना । विनिकृतः वञ्चितः ॥ २१ ॥ महात्मना महाबुद्धिना ॥ २२ ॥ वित्तं विदेर्लोटि मध्यमपुरुषद्विवचनं ॥ २३ ॥ तर्हि कथं भिक्षुरसीत्याह—भिक्षुरिति ॥ २४ ॥ नोवाच । तद्वचनश्रवणेच्छयेतिभावः ॥ २५ ॥ एतदिति । हनुमन्तंस्तोतुंलक्ष्मणं प्रत्युक्तिः ॥ २६ ॥ उपागतः । स एव सचिवद्वारेति शेषः ॥ २७ ॥ स्नेहयुक्तं । मयि सुग्रीवेषप्रीतियुक्तमित्यर्थः । अभ्यभाष अभिभाषस्व । अदागमपरस्मैपदे आर्षे । मद्भिणा स्वामिनो वचनं स नीतिरिति सौमित्रिं नियोजयति ॥ २८ ॥ अथ चेतनोज्जीवनस्याचार्यमुखमन्तरेणासंभवादाचार्यलाभं दर्शयति—नानृग्वेदेत्यादिना ॥ " आचार्यो वेदसंपन्नो विष्णुभक्तो विमत्सरः । मन्त्रज्ञो मन्त्रभक्तश्च सदा मन्त्रार्थदः शुचिः ॥ गुरुभक्तिसमायुक्तःपुराणज्ञोविशेषतः । एवंलक्षणसंपन्नो गुरुरित्यभिधीयते " इत्युक्तमाचार्यलक्षणंदर्शयति । ऋग्वेदेषु विनीतस्य शिक्षितस्य । विनयधारणवेदनानि सर्वत्रवेदेषुयोज्यानि । यद्वा प्रतिवर्णस्वरभूयस्त्वेनमनोनियमनेन सावधानोचार्यत्वादृग्वेदविनीतस्येत्युक्तिः । एकैकानुवाकेअनुवाकान्तरवाक्यासाङ्कर्येणधारणस्यदुष्करत्वाद्यजुर्वेदधारिणइत्युक्तं । ऊहरहस्यादिगर्भितगानविशेषाणांदुर्विज्ञेयत्वात् सामवेदविदुष इति । आथर्वणस्याध्ययनादिनियमाभावादनुक्तिः । एवं प्रभाषितुं । देशं कथमिमं प्राप्तावित्यारभ्य उक्तरीत्या व्यक्तंवक्तुं न शक्यमिति । अनृग्वेदविनीतस्य एवं प्रभाषितुन शक्यं । अयजुर्वेदधारिण एवंप्रभाषितुं नशक्यं । असामवेदविदुषः एवंप्रभाषितुं नशक्यमिति प्रत्येकमन्वयः । प्रत्येकं नञ्प्रयोगात् दार्ढ्यार्थंव्यतिरेकमुखेनोक्तिः । अनृग्वेदविनीतस्य " उभौ योग्यावहं मन्ये रक्षितुं पृथिवीमिमाम् " इत्यादिनोक्तसृष्टिस्थितिसंहारकर्तृत्वं वक्तुं नशक्यं । ऐतरेयके हि " ब्रह्मवा इदमेक एवाग्र आसीत् " इत्यादिना तथात्वंप्रथमतः प्रतिपाद्यते । अयजुर्वेदधारिणः " मानुषौ देवरूपिणौ" इत्यादिना " अजायमानो बहुधा विजायते " इत्युक्तावताररहस्यं वक्तुं न शक्यं । असामवेदविदुषः "सुवर्णाभौ पद्मपत्रेक्षणौ" इत्येवं भाषितुं न शक्यते। छान्दोग्येहि " अथ य एषोन्तरादित्ये हिरण्मयः पुरुषो दृश्यते " इत्यारभ्य " तस्य यथाकप्यासं पुण्डरीकमेवमक्षिणी " इत्याम्नायते ॥ २९ ॥ न केवलं वेदाध्ययनं अङ्गाध्ययनंच कृतमित्याह—नूनमिति ॥ तत्र हेतुमाह—बहिति । अपशब्दितं अपकृष्टं नशब्दितं । अत्रादौ यदित्यध्याहार्यं । व्याकरणं

स्वामिःप्रत्युत्तरंदेयमतआह—सुग्रीवइति । सुग्रीवस्याक्षुद्रत्वबोधनायतत्स्तुतिपूर्वकमुक्तिः । विनिकृतः निरस्तः ॥२१॥ ति० ननुहनूमज्जेनासत्सभीपेप्रेषणंकिमर्थं । तत्राह—युवाभ्यामिति ॥२३॥ ति० ननुवानरराजसचिवस्यमानुषंरूपंकुतस्तत्राह—भिक्षुरूपेति । अनेनशुद्धंवानररूपमेवनेत्यपिबोध्यं ॥ २४ ॥ शि० वाक्यज्ञः वाक्यतात्पर्यज्ञाता । वाक्यकुशलः वाक्यप्रयोगेनिपुणः ॥ २५ ॥ रामानु० नार्केचिदपशब्दितमित्यनेन संस्कृतभाषयैवव्यवहृतवानित्यवगम्यते ॥ ति० ननुवेदमात्राध्यायिनान किंचिद्राजमन्त्रादिज्ञातुंशक्यंतत्राह—नूनमिति । कृत्स्नं पदपदार्थस्वरूपनिर्णयोपयोगिन्यायसहितं । व्याकरणबोध्यसाधुत्वस्या-

---

[पा०] १ क. हनूमान्मारुतात्मजः. २ ज्ञ. ट. सहि. ३ क. ग.—च. ज. ट. विद्धि. ४ घ. परिच्छन्नं. ५ क. ग. ङ.—ट. कारणात्. ६ छ. ज. ञ. कामचारिण. ७ ट. वाक्यज्ञो ८ ख. वाक्यकुशलौ. ९ क. च. ज. ञ. तच्छ्रुत्वावचनंतस्य. ख. एतच्छ्रुत्वाशुभंवाक्यं. १० छ. ज्ञ. ट. मिहागतः. ११ ख. घ. अभिभाषस्व. १२ छ. ज्ञ. मरिन्दमं. १३ छ. ज्ञ. विभाषितुं.

न मुखे नेत्रयोर्वाऽपि ललाटे च भ्रुवोस्तथा ॥ अन्येष्वपि च गात्रेषु दोषः संविदितः क्वचित्॥३१॥
अविस्तरमसंदिग्धमविलम्बितमद्रुतम् ॥ उरःस्थं कण्ठगं वाक्यं वर्तते मध्यमे स्वरे ॥ ३२ ॥
संस्कारक्रमसंपन्नामद्भुतामविलम्बिताम् ॥ उच्चारयति कल्याणीं वाचं हृदयहारिणीम् ॥ ३३ ॥
अनया चित्रया वाचा त्रिस्थानव्यञ्जनस्थया ॥ कस्य नाराध्यते चित्तमुद्यतासेररेरपि ॥ ३४ ॥
एवंविधो यस्य दूतो न भवेत्पार्थिवस्य तु ॥ सिध्यन्ति हि कथं तस्य कार्याणां गतयोऽनघ ॥३५॥

श्रुतं । अतो नापशब्दितं । कृत्स्नं श्रुतम् । अतो न किंचिदपशब्दितं । प्रकृतिप्रत्ययसमाससन्ध्यादिषु किंचिदपि नापभ्रंशितमित्यर्थः । बहुधा श्रुतंएकवारश्रवणे क्वचिदन्यथाभावोपि स्यात् ॥ ३० ॥ शिक्षा चानेन श्रुतेत्याह चतुर्भिर्न मुख इत्यादिभिः ॥ लोके केषांचिद्व्यवहारदशायां मुखादिषु सर्वत्र यत्र कुत्रापिवा विकारोदृश्यते न तथात्रेति भावः । दोषः विकृतिः । न संविदित इत्यनेन स्वेन सूक्ष्ममवलोकितमिति गम्यते । तदुक्तं शिक्षायां । " गीती शीघ्री शिरःकम्पी तथा लिखितपाठकः । अनर्थज्ञोल्पकण्ठश्च षडेते पाठकाधमाः ॥ न शिरः कम्पयेद्वात्रं भ्रुवौ चाप्यक्षिणी तथा । तैलपूर्णमिवात्मानं तत्तद्वर्णे प्रयोजयेत् " इति ॥ ३१ ॥ एवमुच्चारणशक्तिरुक्ता । अथवाक्यप्रयोगचातुरीं दर्शयति—अविस्तरमिति ॥ अविस्तरं शब्दप्रपञ्चरहितं । " प्रथनेवावशब्दे " इति घञोनिषेधात् " ऋदोरप् " इत्यप्प्रत्ययः । असंदिग्धं पदवर्णसंदेहरहितं । अविलम्बितं विलम्बितत्वे स्वाशक्तिःप्रकटिता स्यात् । अद्रुतं द्रुतोच्चारणे परप्रत्यायनं न स्यात्। उरःस्थं मन्द्रं। कण्ठगं मध्यमं। तादृशं वाक्यं मध्यमे स्वरे वर्तते । न मन्द्रं न मध्यमं न द्रुतं न विलम्बितं चेत्यर्थः । इदं चतुर्दशदोषाभावानामुपलक्षणं । तथाह शिक्षाकारः " शङ्कितं भीतमुद्गृष्टमव्यक्तमनुनासिकम् । काकुस्वरं शीर्षगतं तथा स्थानविवर्जितम् ॥ विस्वरं विरसं चैव विश्लिष्टं विषमान्वितम् । व्याकुलं तालुभिन्नं च पाठदोषाश्चतुर्दश " इति ॥ अन्यत्राप्युक्तं " उपांशुदष्टं त्वरितं निरस्तं विलम्बितं गद्गदितं प्रगीतम् । निष्पीडितं प्रस्तपदाक्षरं च वदेन्न दीनं नतु सानुनास्यम् ॥ ३२॥ एवं पाठदोषा उक्ताः । अथ तद्गुणानाह—संस्कारेति । संस्कारो व्याकरणकृता शब्दशुद्धिः व्यक्तपदत्वमिति यावत् । क्रमः वर्णानांक्रमिकता । व्यक्ताक्षरत्वमिति यावत् । कल्याणीं इतरगुणवतीं । हृदयहारिणीं मधुरां । वाणीं उच्चारयति उच्चरति । तदिदमुक्तं शिक्षायां । " माधुर्यमक्षरव्यक्तिः पदच्छेदस्तथाऽत्वरा। धैर्यं लयसमत्वं च षडेतेपाठकागुणाः " इति ॥ ३३ ॥ माधुर्यपराकाष्ठामाह—अनयेति ॥ चित्रया आश्चर्यावहया । त्रिस्थानानि उरःकण्ठशिरांसि । व्यज्यन्ते एषु वर्णाइतिव्यञ्जनानि । त्रिस्थानरूपव्यञ्जनेषु तिष्ठतीति तया । तथात्वं च न तदुत्पन्नत्वं । शिरस्यत्वस्य निषिद्धत्वात् । शीर्षगतं तथेति ह्युदाहृतं । किंतु उदात्तानुदात्तस्वरितवत्त्वं । तथोक्तं शिक्षायां " अनुदात्तो हृदि ज्ञेयो मूर्ध्न्युदात्त उदाहृतः । स्वरितः कण्ठमूलीयः पार्श्वास्ये प्रचयस्य तु " इति ॥ नाराध्यते न तोष्यते । कस्येत्यस्य विवरणं उद्यतासेररेरपीति । उद्यतासेः ह्येनुमुद्गतासेरित्यतिक्रूरतोक्तिः । अनेन हनुमदादिभी रामादीनां संस्कृतभाषयैव व्यवहार इति गम्यते ॥ ३४ ॥ एवं हनुमतो वाक्चातुरीमभिनन्द्य बुद्धिचातुरीमभिनन्दति—एवंविध इति ।

यैर्घटितत्वात् । अनेनसर्वज्ञत्वसूचितं । तथाश्रवणेहेतुमाह—बङ्किति ॥ ३० ॥ इङ्गितैरप्यसौविश्वासयोग्यइत्याह—नमुखइति । दोषःसंविदितः । व्यवहारकालेहतिशेषः ॥ ३१ ॥ ति० अव्ययं श्रवितेरोतृश्रुतेर्व्ययायस्मात्तादृशं ॥ तेनाश्रुतिकद्वर्णमित्यर्थः । उरस्थं मध्यमारूपेण । कण्ठगं वैखरीरूपेण । कण्ठविवराच्छ्रोतृश्रोत्रंगतं । अतएवमध्यमस्वरं नात्युच्चैः नातिनीचैः ॥ ३२ ॥ ति० संस्कारक्रमसंपन्नां संस्काराणांक्रमे क्रमेणजनने संपन्नांसमर्थां । "विशिष्टानुपूर्वीविशेषरूपेणपदादीनांग्रहणायक्रमवत्तत्तद्वर्णसंस्कारानन्तःकरणसत्पाद्यतत्क्रमेणक्रमवद्वर्णावभासपदवाक्यज्ञानं " इतिवाक्यप्रदीपादुद्धृतं । तेनमध्यमस्वरूपोच्चारणंसूचितं । तदाह—अद्रुतामविलंबितामिति । अतएवहृदयहारिणीं ॥ ३३ ॥ ति० कार्याणांगतयः परिपाकाः ॥ ३५ ॥

[पा०] १ ङ. ञ. ट. नेत्रयोश्चापि. २ क. ग. ङ.—ट. सर्वेषु. ३ घ. अविस्तरं. ४ क. ग. ङ.—ज. मध्यमं. ख. झ. ञ. ट. मध्यमं. ५ ङ. च. ज. झ. मध्यमेवर्ततेस्वरे. छ. ञ. ट. वर्ततेमध्यमस्वरं. ख. वर्ततेमध्यमस्वरे. ६ क. मन्यूनाधिकविस्तरां. ७ घ.—ट. हृर्विणीं.

एवं गुणगणैर्युक्ता यस्य स्युः कार्यसाधकाः ॥ तस्य सिद्ध्यन्ति सर्वार्था दूतवाक्यमचोदिताः ॥३६॥
एवमुक्तस्तु सौमित्रिः सुग्रीवसचिवं कपिम् ॥ अभ्यभाषत वाक्यज्ञो वाक्यज्ञं पवनात्मजम् ॥३७॥
विदिता नौ गुणा विद्वन्सुग्रीवस्य महात्मनः ॥ तमेव चावां मार्गावः सुग्रीवं प्लवगेश्वरम् ॥ ३८ ॥
यथा ब्रवीषि हनुमन्सुग्रीववचनादिह ॥ तत्तथा हि करिष्यावो वचनात्तव सत्तम ॥ ३९ ॥

तत्तस्य वाक्यं निपुणं निशम्य प्रहृष्टरूपः पवनात्मजः कपिः ॥
मनः समाधाय जयोपपत्तौ सख्यं तदा कर्तुमियेष ताभ्याम् ॥ ४० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे तृतीयः सर्गः ॥ ३ ॥

चतुर्थः सर्गः ॥ ४ ॥

हनुमता श्रीरामंप्रति पेपासंप्राप्तिहेतुप्रश्नः ॥ १ ॥ लक्ष्मणेन रामचोदनयातंप्रति सीतावियोगान्तरामवृत्तान्तकथनपूर्वकं कबन्धवचनानुवादेन रामागमनस्य सुग्रीवसख्यसंपादनकत्वोक्तिः ॥ २ ॥ हनुमता रामलक्ष्मणौप्रति सुग्रीवस्य समागमुःखतानिवेदनेन रामप्रसादापेक्षितया तेनसीतान्वेषणेसाहाय्यकरणोक्त्यानिजरूपपरिग्रहणपूर्वकंतयोःस्वस्कन्धारोपणेनाकाशमुत्पपातच ॥ ३ ॥

ततः प्रहृष्टो हनुमान्कृत्यवानिति तद्वचः ॥ श्रुत्वा मधुरसंभाषं सुग्रीवं मनसा गतः ॥ १ ॥
भव्यो राज्यागमस्तस्य सुग्रीवस्य महात्मनः ॥ यदयं कृत्यवान्प्राप्तः कृत्यं चैतदुपागतम् ॥ २ ॥
ततः परमसंहृष्टो हनुमान्प्लवगर्षभः ॥ प्रत्युवाच ततो वाक्यं रामं वाक्यविशारदः ॥ ३ ॥

एवंविधः एवंप्रष्टा । असत्प्रशंसाव्याजेन कुलगोत्रनामधेयराज्यत्यागकारणादीनां प्रष्टा । गतयः सिद्धयः ॥ ३५ ॥ उक्तमर्थमन्वयमुखेनापि दर्शयति—एवमिति ॥ दूतवाक्यप्रचोदिताः । दूतवाक्यमूलाएवसिद्ध्यन्ति । नप्रधानापेक्षा इतिभावः ॥ ३६ ॥ वाक्यज्ञो वाक्यज्ञमित्युक्त्वा यथारीत्या हनुमतोक्तं तयैवसौमित्रिणापीत्युच्यते ॥ ३७ ॥ विद्वन्निति हनुमत्संबोधनं ॥ ३८ ॥ यथेति अनेन ये तावदाचार्याभिमाननिष्ठाः तेषां कार्यं तद्वचनादेव करिष्यामीति भगवतःप्रतिज्ञासूचिता ॥ ३९ ॥ जयोपपत्तौ बालिजयोपपत्तिनिमित्तं ॥ ४० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने तृतीयः सर्गः ॥ ३ ॥

अथाचार्यमुखेन चेतनलाभश्चतुर्थे—तत इत्यादि ॥ मधुरसंभाषं मधुरभाषणं । तद्वचः श्रुत्वा कृत्यवान् कार्यवान् रामः इति प्रहृष्टःसन् सुग्रीवंमनसा गतः । "तमेव चावां मार्गावः"इति वचनभावतया रामस्य कृत्यवत्त्वज्ञानं ॥ १ ॥ मनसा गत इत्येतद्दर्शयति—भव्य इति ॥ यदस्मादयं कृत्यवान्प्राप्तः । तस्मात् महात्मनः महाभाग्यस्य । तस्य सुग्रीवस्य राज्यागमः भव्यः भावी । एतत्कृत्यं राज्यागमनरूपकार्यं । उपागतं समीपे आगतं । निष्पन्नप्रायमित्यर्थः ॥ २ ॥ अस्मिन्श्लोकेप्लवगर्षभ इत्यत्र षकारो गायत्र्या दशमाक्षरं । नवसहस्रश्लोका गताः ॥ ३ ॥

ति० नौ आवयोः । तमेव सुग्रीवमेव । मार्गावः मार्गयावः ॥३८॥ यथाब्रवीषि सख्यमिच्छतीतियदवादीः । तत्तथैवकरिष्यावइत्यर्थः ॥ ३९ ॥ ति० ताभ्यां रामसुग्रीवाभ्यां ॥ स० ताभ्यां रामलक्ष्मणाभ्यां ॥ टीका० "सुग्रीवोमारुतितत्रप्रेषयामास राघवम् । मारुतिप्रेषणंश्रुत्वासङ्कुलंभतेनरः । राममारुतिसंवादश्रवणाद्राज्यमाप्नुयात्" इतिस्कान्दे ॥४०॥ इतितृतीयस्सर्गः ॥३॥

ती० एतदितिषष्ठी । एतस्यरामस्येत्यर्थः । कृत्यंच उपागतं उपसमीपेआगतं निष्पन्नप्रायमितियावत् ॥ शि० कृत्यंतत्प्रयोजनं च एतदुपागतं एतंसुग्रीवउपागतं सुग्रीवसाध्यत्वेननिश्चितमित्यर्थः ॥ ३ ॥ शि० ततः सुग्रीवराज्यप्राप्तिनिश्चयाद्धेतोः परम-

[पा०] १ ब. म. गणैर्युक्तोयस्यस्यात्कार्यसाधकः. २ छ. झ. ट. सर्वेर्थाः. ३ छ. हितवाक्य. ४ क. ग. च. ञ. ब. मधुरं. ५ ब. सहृष्टो. ६ क.—ञ. म. मधुरभाषच. झ. ट. मधुरभावंच. ७ च. छ. झ. ट. भाव्यो. ८ क. यद्रामः. ९ झ. प्लवगोत्तमः. १० क. च. छ. ञ. म. रामंवाक्यं. ११ क. छ. ञ. झ. ट. वाक्यविशारदं. ग. वाक्यविदांवरं.

किमर्थं त्वं वनं घोरं पम्पाकाननमण्डितम् ॥ आगतः सानुजो दुर्गं नानाव्यालमृगायुतम् ॥ ४ ॥
तस्य तद्वचनं श्रुत्वा लक्ष्मणो रामचोदितः ॥ आचचक्षे महात्मानं रामं दशरथात्मजम् ॥ ५ ॥
राजा दशरथो नाम द्युतिमान्धर्मवत्सलः ॥ चातुर्वर्ण्यं स्वधर्मेण नित्यमेवाभ्यपालयत् ॥ ६ ॥
न द्वेष्टा विद्यते तस्य नैव स द्वेष्टि कंचन ॥ स च सर्वेषु भूतेषु पितामह इवापरः ॥
अग्निष्टोमादिभिर्यज्ञैरिष्टवानाप्तदक्षिणैः ॥ ७ ॥
तस्यायं पूर्वजः पुत्रो रामो नाम जनैः श्रुतः ॥ शरण्यः सर्वभूतानां पितुर्निर्देशपारगः ॥ ८ ॥
वीरो दशरथस्यायं पुत्राणां गुणवत्तमः ॥ राजलक्षणसंपन्नः संयुक्तो राजसंपदा ॥ ९ ॥
राज्याद्भ्रष्टो वनं वस्तुं मया सार्धमिहागतः ॥ भार्यया च महातेजाः सीतयाऽनुगतो वशी ॥
दिनक्षये महातेजाः प्रभयेव दिवाकरः ॥ १० ॥
अहमस्यावरो भ्राता गुणैर्दास्यमुपागतः ॥ कृतज्ञस्य बहुज्ञस्य लक्ष्मणो नाम नामतः ॥ ११ ॥
सुखार्हस्य महार्हस्य सर्वभूतहितात्मनः ॥ ऐश्वर्येण च हीनस्य वनवासाश्रितस्य च ॥ १२ ॥
रक्षसाऽपहृता भार्या रहिते कामरूपिणा ॥ तच्च न ज्ञायते रक्षः पत्नी येनास्य सा हृता ॥ १३ ॥
दनुर्नाम दितेः पुत्रः शापाद्राक्षसतां गतः ॥ आख्यातस्तेन सुग्रीवः समर्थो वानरर्षभः ॥ १४ ॥

पम्पाकानने पम्पोपवने मण्डितं वनं दण्डकारण्यं । दण्डकारण्येप्येतत्प्रदेशं किमर्थमागत इति भावः । अनुजत्वमाकारसाम्यात्तत्सभ्यभाषेति नियोजनाचेति ॥ ४ ॥ महाबलेन दशरथाबलजलेन चाचचक्ष इत्यर्थः ॥ ५—६ ॥ सर्वेषु भूतेषु मध्ये पितामह इव श्रेष्ठ इत्यर्थः ॥ ७—८ ॥ पुत्राणां पुत्राणां मध्ये ॥ ९ ॥ ऐश्वर्यभ्रंशदशायामप्यनुवर्तनद्योतनाय दिनक्षय इत्युक्तं ॥ १० ॥ भवानस्य कदलीकाङ्क्षायामाह—अस्यावरो भ्राता एतदभिप्रायेणभ्रातास्मि । अहंतु गुणैर्दास्यमुपागतः गुणवशीकृतहृदयःसन् तस्य दासोस्मि । यद्यपि परवानस्मीत्यादौ स्वरूपप्रयुक्तदास्यमुक्तं तथापि योग्यताप्रकर्षाद्गुणोत्तम्भितंतदास्यमितितदविरोधोद्रष्टव्यः । उपेत्यनेन सर्वदेशसर्वकालसर्वावस्थोचितसर्वविधकैङ्कर्यप्राप्तइत्युच्यते । इदमपि कैङ्कर्यं तन्मुखोल्लासार्थं न तु मदर्थमित्याह—कृतज्ञस्य बहुज्ञस्येति । अल्पमपि कृतं बहुतया जानत इत्यर्थः । इदमपि कैङ्कर्यं सहजमित्याशयेनाह—नाम्ना लक्ष्मणो नामेति । स्वनामतः कैङ्कर्यलक्ष्मीसंपन्न इतिप्रसिद्धः ॥ ११ ॥ सुखेत्यादिश्लोकद्वयमेकान्वयं । यद्वा प्रथमश्लोकस्य पूर्वेणान्वयः । सहजत्वमुपपादयति—सुखेति । महार्हस्य ऐश्वर्यसंपन्नस्य । वनवासाश्रितस्य दुःखितस्येत्यर्थः । तथाच समृद्धिदशायामसमृद्धिदशायां च दास्योक्त्या सहजत्वमुपपादितं । सहजमेवैकैङ्कर्यं । गुणास्तुतद्वर्धकाइतिभावः ॥ १२ ॥ रहिते आधाराधेयरहितदेशे ॥ १३ ॥ दनुः दनुवंशजः कबन्धः । दितेः पुत्रः पुत्रप्रायः । तेनसुग्रीवः समर्थः

संहृष्टः ॥ ति० एवंसुहृदयत्वमवगत्यस्वस्याभ्युत्कृष्टत्वं पृच्छति—ततइति ॥ ३ ॥ ती० सामान्याकारेणावगतकार्यवत्त्वविशेषतः पृच्छति—किमर्थमित्यादिना ॥ स० पंपाकाननमण्डितं पंपाया आम्युदकानि तेषामनेनचैत्रेण मण्डितमितिवा ॥ ४ ॥ ति० रामचोदितः इङ्गितेनेतिशेषः ॥ ५ ॥ ति० पितामहइव पालकत्वेनेत्यर्थः ॥ स० द्वेष्टेतितृजन्तं । तेनषष्ठ्युपपत्तिः ॥ ७ ॥ ति० निर्देशः नियोगः तत्पारगः तत्समाप्तकल्पत्वादेवमुक्तं ॥ शि० निर्देशपारगः निर्देशपाराय आज्ञापितसमाप्तयेगच्छतिसः ॥ ८ ॥ ति० संयुक्तः संयुज्यमानः ॥ ९ ॥ रामानु० दिवाकरप्रभया=दिवाकरानुगमनस्यसायंकालएवसम्यक्प्रतीयमानत्वाद्दिनक्षयपदोपादानं ॥ ती० सीतायाःप्रभासाम्यंसर्वावस्थाखपिनित्यसंनिहितत्वात् ॥ १० ॥ तनि० अस्यावरोभ्राता अहंतुदास्यंगतः । सर्वदेशसर्वकालादिषुअविश्लेषेणकैङ्कर्यकारित्वंद्योतयितुमुपपदं । सहजसिद्धदास्यवतस्तन्वन्धिनोपिभोग्यतमत्वमाह—गुणैरिति ॥ ११ ॥ ति० नज्ञायते विशिष्यतेतिशेषः ॥ स० संहृतेत्यत्र समः नज्ञायतइत्यनेनान्वयः ॥ येनास्यचाहृतेतिपाठे नकाप्य-

[पा०] १ क. ग. ङ. ञ. ट. किमर्थंच. २ ख. दुर्गं. ३ ख. घोरं. ४ क. ग. ङ. मेवाभिपालयत्. ५ छ. झ. ट. यदुद्वेष्टिनकंचन. ६. सचनद्वेष्टिकंचन. ६ छ. झ. ट. सतु. ७ घ. लोकेषु. ८ झ. ट. ज्येष्ठो. ९ क.—क. ङ. ञ. ट. गुणवत्तरः. १० छ. झ. ट. मयावस्तुंवने. ११ छ. झ. ट. महाभाग. १२ ख. ङ.—ङ. ट. विहीनस्य. १३ छ. झ. ट. वनवासेरतस्यच. १४ ङ. संहृता. ङ. वाहृता. छ ट. चाहृता. १५ क. ख. च. श्रिय पुत्रः. १६ ङ. च. ज. ञ. सामाख्यो. १७ क. ग. ङ. छ. झ. ट. वानराधिपः.

सं ज्ञास्यति महावीर्यस्तव भार्यापहारिणम् ॥ एवमुक्त्वा दनुः स्वर्गं भ्राजमानो गतः सुखम्॥१५॥
एतत्ते सर्वमाख्यातं याथातथ्येन पृच्छतः ॥ १६ ॥
अहं चैव हि रामश्च सुग्रीवं शरणं गतौ ॥ १७ ॥
एष दत्त्वा च वित्तानि प्राप्य चानुत्तमं यशः ॥ लोकनाथः पुरा भूत्वा सुग्रीवं नाथमिच्छति॥१८॥
पिता यस्य पुरा ह्यासीच्छरण्यो धर्मवत्सलः ॥ तस्य पुत्रः शरण्यश्च सुग्रीवं शरणं गतः ॥ १९ ॥
सर्वलोकस्य धर्मात्मा शरण्यः शरणं पुरा ॥ गुरुर्मे राघवः सोयं सुग्रीवं शरणं गतः ॥ २० ॥
[इक्ष्वाकूणां कुले जातो रामो दशरथात्मजः । धर्मे निगदितश्चैव पितृनिर्देशपालकः ॥ २१ ॥
तस्यास्य वसतोऽरण्ये नियतस्य महात्मनः ॥ रावणेन हृता भार्या सुग्रीवं शरणं गतः ॥ २२ ॥]
यस्य प्रसादे सततं प्रसीदेयुरिमाः प्रजाः ॥ स रामो वानरेन्द्रस्य प्रसादमभिकाङ्क्षते ॥ २३ ॥
येन सर्वगुणोपेताः पृथिव्यां सर्वपार्थिवाः ॥ मानिताः सततं राज्ञा सदा दशरथेन वै ॥ २४ ॥
तस्यायं पूर्वजः पुत्रस्त्रिषु लोकेषु विश्रुतः ॥ सुग्रीवं वानरेन्द्रं तु रामः शरणमागतः ॥ २५ ॥
शोकाभिभूते रामे तु शोकार्ते शरणं गते ॥ कर्तुमर्हति सुग्रीवः प्रसादं हरियूथपः ॥ २६॥
एवं ब्रुवाणं सौमित्रिं करुणं साश्रुलोचनम् ॥ हनुमान्प्रस्तुवाचेदं वाक्यं वाक्यविशारदः ॥ २७ ॥

त्याख्यातः ॥ १४—१५ ॥ ते तुभ्यं याथातथ्येनाख्यातं ॥ १६ ॥ अहमित्यर्धम् ॥ १७ ॥ परतन्त्रौशील्ये दर्शयति—एष इति । त्रैलोक्यनाथत्वमेव सुग्रीवनाथत्वेच्छायां हेतुः । परत्वं विनासौशील्यस्यागुणत्वात् । इच्छति लप्स्यते नवा स्वयमभिलषति । अपर्यनुयोज्यादिस्वतन्त्राकृतिभावः । चकारेण लब्धा चेत्युच्यते । अनुत्तमं परत्वापेक्षयावतारप्रयुक्तातिशयवत् । लोकनाथः सर्वलोकैर्याच्ञ्यमानःसर्वस्वामीच । "नाथृ नाधृ याच्ञोपतापैश्वर्याशीष्षु" धातुः ॥ १८ ॥ तदेव सौशील्यं प्रकारान्तरेणाह—पितेति । शरण्यः प्राप्यः । शरणं रक्षकं ॥ १९ ॥ शरण्य इत्युक्तं विशेषयति—सर्वलोकस्येति ॥ गुरुः अग्रजः ॥ २०—२२ ॥ इमाःप्रजाःसततं प्रसीदेयुः तत्प्रसादलब्धसकलपुरुषार्थतयासर्वदाप्रसन्नचित्ताभवेयुः । वानरेन्द्रस्य स्वप्रसादप्रजैकदेशक्षुद्रतरजनस्य । प्रसादमभिकाङ्क्षते । स्वतन्त्रेच्छस्य नियन्तुमशक्यत्वादिति भावः ॥ २३ ॥ येनेत्यादिश्लोकद्वयमेकान्वयं । येन सततं सर्वगुणोपेताः सर्वोपचारोपेतायथा भवन्ति तथा सदा मानिताः । वानरेन्द्रं वनमात्रप्रसिद्धशास्त्रागम्यमिति सौशील्यातिशयध्वनिः ॥ २४—२५ ॥ शोकेनाभिभूते शोकपरतन्त्रे । शोकार्ते शोकपीडिते । कर्मपरतन्त्रं शोकाकुलं स्वजनमालोक्य स्वयं शोकाकुलस्याचार्यमुखं विनोभयशोकानुद्धारादिति भावः ॥२६॥ साश्रुलोचनमिति रामदुःखदर्शनादुःखितत्वमुच्य-

---

त्पपत्तिः ॥१३॥ ति० स्वर्गगन्तुं दिवमाकाशं गतः उत्पतितः ॥ स० यद्वा सदादिवंगतएव इदानींतुशापान्मुक्तःस्वर्गगतः ॥१५॥ शि० रामेरक्षणसामर्थ्यमस्तीतिसुग्रीवविश्वासंदृढयितुंरामगुणान्पुनःपुनर्वर्णयति—एषइत्यादिभिः ॥ नाथं रक्षाकामं । सुग्रीवमिच्छति रक्षकत्वेनप्राप्तुंवाञ्छतीत्यर्थः ॥ १८ ॥ शि० शरणं रक्षाकामं सुग्रीवं गतः प्राप्तः ॥ २० ॥ ति० सर्वगुणोपेताः यूथाभिषिक्ताइतियावत् । सदा प्रतिदिनं । सततं अनुक्षणं ॥ शि० मानिताः स्वसेवकत्वेनसत्कृताः ॥ २४ ॥ स० शोकः अभिभूतोयेनस शोकाभिभूतः । वस्तुतस्त्वाहशेपि इदानींशोकार्ते इवविधमाने ॥ शि० सुग्रीवःहरियूथपैस्सहप्रसादंप्रसन्नतांकर्तुमर्हति ॥ एतेनइतःप्रभृतिसुग्रीवेमयंनप्राप्तइतीतिसूचितं ॥ २६ ॥ ति० साश्रुपातनं अस्माकमप्यन्यशरणापेक्षेत्यश्रुपातनसहितं ॥ २७ ॥

[पा०] १ ङ. संज्ञास्यति. २ छ. झ. ञ. ठ. दिवंगतः. ३ ग. ङ.—ट. चैवच. ४ क. ग. ङ.—ञ. भ. प्राप्तवानुत्तमं. ५ छ. झ. ट. सीतायास्त्वनुवाचासीत्. ६ क. ग.—ट. शरण्यस्य. ख. शरण्यस्त्वसुग्रीवं. ७ इदंश्लोकद्वयं क. पाठेदृश्यते. ८ थ. प्राप्ताः. ९ छ. झ. ट. सहयूथपैः. थ. हरियूथपैः. १० क.—घ. छ. झ. ठ. साश्रुपातनं. क. च. ज. ञ. साश्रुभाषितं.

ईदृशा बुद्धिसंपन्ना जितक्रोधा जितेन्द्रियाः ॥ द्रष्टव्या वानरेन्द्रेण दिष्ट्या दर्शनमागताः ॥ २८ ॥
स हि राज्यात्परिभ्रष्टः कृतवैरश्च वालिना ॥ हृतदारो वने त्यक्तो भ्रात्रा विनिकृतो भृशम् ॥२९॥
करिष्यति स साहाय्यं युवयोर्भास्करात्मजः ॥ सुग्रीवः सह चास्माभिः सीतायाः परिमार्गणे ॥३०॥
इत्येवमुक्त्वा हनुमाञ्श्लक्ष्णं मधुरया गिरा ॥ बभाषे सौभिगच्छेम सुग्रीवमिति राघवम् ॥ ३१ ॥
एवं ब्रुवाणं धर्मात्मा हनुमन्तं स लक्ष्मणः ॥ प्रतिपूज्य यथान्यायमिदं प्रोवाच राघवम् ॥ ३२ ॥
कपिः कथयते हृष्टो यथाऽयं मारुतात्मजः ॥ कृत्यवान्सोपि संप्राप्तः कृतकृत्योसि राघव ॥ ३३ ॥
प्रसन्नमुखवर्णश्च व्यक्तं हृष्टश्च भाषते ॥ नानृतं वक्ष्यते वीरो हनुमान्मारुतात्मजः ॥ ३४ ॥
ततः स तु महाप्राज्ञो हनुमान्मारुतात्मजः ॥ जगामादाय तौ वीरौ हरिराजाय राघवौ ॥ ३५ ॥
भिक्षुरूपं परित्यज्य वानरं रूपमास्थितः ॥ पृष्ठमारोप्य तौ वीरौ जगाम कपिकुञ्जरः ॥ ३६ ॥

स तु विपुलयशाः कपिप्रवीरः पवनसुतः कृतकृत्यवत्प्रहृष्टः ॥
गिरिवरमुरुविक्रमः प्रयातः सुशुभमतिः सह रामलक्ष्मणाभ्याम् ॥ ३७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे चतुर्थः सर्गः ॥ ४ ॥

ते ॥ २७ ॥ द्रष्टव्याः अन्वेषितव्याः ॥ २८ ॥ विनिकृतः वञ्चितः ॥ २९ ॥ करिष्यतीति परिमार्गणे साहाय्यं करिष्यति । ततःपरंभवतोरत्रे का शत्रुवार्तेतिभावः ॥ ३० ॥ बभाषे पुनरपीति शेषः ॥ ३१ ॥ यथान्यायं दूतानुरूपं ॥ ३२ ॥ अयं हृष्टः सन् यथा यथार्थं कथयते । यथार्थकथने हृष्टत्वं हेतुः । सीतापरिमार्गणं करिष्यतीति यथार्थमेव । सोपि सुग्रीवः कृत्यवान् प्राप्तः जातः । तस्मात् कृतकृत्योसि ॥३३॥ हृष्टपदसूचितं विवृणोति—प्रसन्नेति ॥ वक्ष्यते वक्ष्यति । अनृतं न वदेदित्यर्थः ॥३४॥ हरिराजाय वानरराजाय ॥ ३५ ॥ उक्तं विवृणोति—भिक्षुरिति ॥ ३६ ॥ विपुलयशाः सर्वदेववरप्रसादेन विशालकीर्तिः । कपिप्रवीरः सुग्रीवमपि नियन्तुं समर्थः । अनेनभगवल्लाभआचार्याधीनइत्युक्तं ॥३७॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने चतुर्थः सर्गः ॥ ४ ॥

स० दर्शनमागताइतिबहुवचनंगौरवात् ॥ २८ ॥ **स०** वालिनेत्येतद्देहलीदीपन्यायेनोभयत्रान्वेति ॥ २९ ॥ **ति०** यदेवं अतः परिमार्गणेसाहाय्यंकरिष्यतीत्यन्वयः ॥ ३० ॥ **रामानु०** अत्रेतिकरणंद्रष्टव्यं । राघव संप्राप्तोऽयंकपिर्मारुतात्मजः हृष्टः मद्वाक्यश्रवणात्संजातहर्षः । सोपि सुग्रीवोपि । कृत्यवानितियथावत्कथयते अतःकृतकृत्योसीतियोजना ॥ **ति०** सोपित्यत्राकृत्यवानितियथाकथयतेतथाजाने एतंदेशंसंप्राप्तस्त्वंकृतकृत्योसीत्यर्थः ॥ संप्राप्तः इहागतस्त्वंकृतकृत्यः सिद्धप्रयोजनोसि । एतेन नष्टाश्वदग्धरथन्यायेनद्वयोस्तस्यमेवद्वयोःकार्यसाधकंभवितेतिध्वनितं ॥ ३३ ॥ **रामानु०** हनुमदुक्तवाक्यस्ययाथार्थ्यंसमर्थयते—**प्रसन्नेति** ॥ ३४ ॥ **शि०** हरिराजाय सुग्रीवायजगाम । "गत्यर्थकर्मणि—" इतिकर्मणिचतुर्थी ॥ ३५ ॥ **ति०** वानरं वानरस्येदं । आर्षोऽण् ॥ ३६ ॥ **स०** किंचिद्व्यवधानात्कृतकृत्यवदित्युक्तिः ॥ ३७ ॥ इतिचतुर्थस्सर्गः ॥ ४ ॥

[पा०] १ क. छ. झ. ट. राज्याच्चविभ्रष्टः. २ क. ग. ङ.—झ. ट. त्रस्तो. ३ ख. करिष्यतिहि. घ. करिष्यतिच. ४ ङ.—ट. साधुगच्छामः ग. सौम्यगच्छामः. ५ च. छ. ज. ञ. ट. ब्रुवन्तं. ६ घ. धर्मज्ञं. ७ क. ग. हृष्टंच. ८ छ. झ. ट. सुमहाप्राज्ञो. ९ ग. कृतकृत्यवान्प्रहृष्टः. १० ख. ङ.—ट. तशुभमति. क. ग. सशुभमुखः.

पञ्चमः सर्गः ॥ ५ ॥

हनुमता मलयस्थंसुग्रीवमेत्य स्वेनराघवयोः ऋश्यमूकप्रापणनिवेदनपूर्वकं सामस्त्येनरामवृत्तान्तनिवेदनम् ॥ १ ॥ सुग्रीवेण सहर्षमानुषवेषस्वीकारेण राममेत्य तंप्रति सप्रशंसनं स्वपाणिप्रसारणपूर्वकं मर्यादाबन्धाय तत्पाणिनास्वपाणिग्रहणप्रार्थना ॥ २ ॥ रामेण सुग्रीवपाणिग्रहणपूर्वकं तत्परिष्वङ्गः ॥ ३ ॥ रामसुग्रीवाभ्यामग्निसाक्षिकं सख्यकरणम् ॥ ४ ॥ सुग्रीवेण स्ववृत्तान्तनिवेदनपूर्वकं वालिवधंप्रार्थितेनरामेण तंप्रतितत्प्रतिज्ञानम् ॥ ५ ॥

ऋश्यमूकात्तु हनुमान्गत्वा तु मलयं गिरिम् ॥ आचचक्षे तदा वीरौ कपिराजाय राघवौ ॥ १ ॥
अयं रामो महाप्राज्ञः संप्राप्तो दृढविक्रमः ॥ लक्ष्मणेन सह भ्रात्रा रामोऽयं सत्यविक्रमः ॥ २ ॥
इक्ष्वाकूणां कुले जातो रामो दशरथात्मजः ॥ धर्मे निगदितश्चैव पितुर्निर्देशपारगः ॥ ३ ॥
तस्यास्य वसतोऽरण्ये नियतस्य महात्मनः ॥ रावणेन हृता भार्या स त्वां शरणमागतः ॥ ४ ॥
राजसूयाश्वमेधैश्च वह्निर्येनाभितर्पितः ॥ दक्षिणाश्च तथोत्सृष्टा गावः शतसहस्रशः ॥ ५ ॥
तपसा सत्यवाक्येन वसुधा येन पालिता ॥ स्त्रीहेतोस्तस्य पुत्रोऽयं रामस्त्वां शरणं गतः ॥ ६ ॥
भवता सख्यकामौ तौ भ्रातरौ रामलक्ष्मणौ ॥ प्रतिगृह्यार्चयस्वैतौ पूजनीयतमावुभौ ॥ ७ ॥
श्रुत्वा हनुमतो वाक्यं सुग्रीवो हृष्टमानसः ॥ भयं च राघवाद्घोरं प्रजहौ विगतज्वरः ॥ ८ ॥
स कृत्वा मानुषं रूपं सुग्रीवः प्लवगर्षभः ॥ दर्शनीयतमो भूत्वा प्रीत्या प्रोवाच राघवम् ॥ ९ ॥
भवान्धर्मविनीतश्च विक्रान्तः सर्ववत्सलः ॥ आख्याता वायुपुत्रेण तत्त्वतो मे भवद्गुणाः ॥ १० ॥
तन्ममैवैष सत्कारो लाभश्चैवोत्तमः प्रभो ॥ यत्त्वमिच्छसि सौहार्दं वानरेण मया सह ॥ ११ ॥
रोचते यदि वा सख्यं बाहुरेष प्रसारितः ॥ गृह्यतां पाणिना पाणिर्मर्यादा बध्यतां ध्रुवा ॥ १२ ॥
एतत्तु वचनं श्रुत्वा सुग्रीवेण सुभाषितम् ॥ स प्रहृष्टमना हस्तं पीडयामास पाणिना ॥ १३ ॥

अथपापभीतस्यकर्मानुरूपंफलंदिशतोभगवतोपित्रस्तस्य आचार्यमुखाद्भगवद्गुणाञ्श्रुत्वा तदेकोपायनिष्ठासूच्यतेपञ्चमे—ऋश्यमूकात्त्वित्यादि । रामलक्ष्मणदर्शनभीतःसुग्रीवः ऋश्यमूकादुत्प्लुत्य गहनं मलयाख्यमृश्यमूकपर्यन्तपर्वतं गतः । हनुमान् रामलक्ष्मणौ तत्रप्रतिष्ठाप्य सुग्रीवंतत्रानीतवानिति बोध्यम् ॥ १ ॥ अयं रामः संप्राप्तः । अयं रामः सत्यविक्रमः स्वच्छत्रुनिबर्हणक्षम इत्यर्थः ॥ २ ॥ निगदितः प्रसिद्धः ॥ ३—८ ॥ राघवं प्राप्येति शेषः ॥ ९—११ ॥ मर्यादा व्यवस्था ॥ १२ ॥ एतत्त्विति राम इति

ति० अयंरामः मलयस्थसुग्रीवदृष्टिपथवर्तित्वादेवंनिर्देशः । पुनराहादराद्रामोयमिति ॥ शि० सत्यविक्रमः सत्याय सत्यपरिपालनाय विक्रमः पादन्यासोयस्यसः ॥ आरामः सर्वाभिरामदाता । अरामः अरं अतिप्रकाशं अमतिप्राप्नोतिसः । अयंरामः अयं शापवशेनवालिनाप्राप्तुमशक्यंऋश्यमूकंसंप्राप्तः ॥ श्लोकद्वयमेकान्वयि ॥ स० सत्यविक्रमः सति बलेसत्यपि अविक्रमः इदानीमप्रदर्शितविक्रमः । भ्रात्रारामः भ्रातु तवभ्रातुर्वालिनः आसम्यक् अरामोदुःखंयस्मात्सतथा संप्राप्तइत्यन्वयः ॥ २ ॥ स० धर्मे धर्मविषये । रामएवेतिनिगदितः लोकैः ॥ ति० धर्मे स्वसत्यपरिपालनरूपधर्मनिमित्तं । निगदितः प्रेरितः । पित्रेतिशेषः ॥ ३ ॥ ति० प्रगृह्य दर्शनाकाङ्क्षिणोर्दर्शनंदत्वा । ती० प्रतिगृह्य प्रत्युद्गम्य ॥ ७ ॥ ती० वानरेण तिरश्चा । असमानेनेत्यर्थः ॥ ११ ॥ ति० ध्रुवामर्यादा अनुल्लङ्घनीयोऽन्योन्यकार्यसंपादनविषयोनिश्चयः । बध्यतां बुद्ध्या विचार्यप्रतिज्ञायतां

[पा०] १ क.—ट. तंमलयं. २ च. हरिराजाय. ३ ब. शूरोयं. ४ ङ.—ट. कारकः. ५ अयंश्लोकः झ. पाठे. तपसासत्यवाक्येनेतिश्लोकानन्तरंदृश्यते. ६ क. ग. रक्षसापहृता. ७ छ. झ. ट. तेन. ८ छ. झ. ट. रामोरण्यंसमागतः. क. ग. ङ. च. ज. ञ. रामःशरणमागतः. ९ च. ज—ट. प्रगृह्यचार्चयस्व. १० ख. स्वेमौ. ११ ङ. छ. झ. ञ. वानराधिपः. १२ भयंचराघवाद्घोरं सकृत्वामानुषंरूपं. इत्यर्द्धद्वयं झ. पाठेनदृश्यते. क. ख. घ. ङ. च. ञ. ट. भयंस. १३ ग. ङ. च. ज. ञ. ट. प्लवगाधिपः. १४ क. ग —छ झ. ट. प्रीत्योवाचच. १५ ग. छ. झ. ट. सुतपाः. क. सुप्रियः. १६ ङ. च. ज. ञ. सत्यविक्रमः. १७ च. तन्ममैवच. १८ ङ —ट. यदिमे. १९ क. ङ.—ज. ञ. ध्रुवं. २० क. ङ. छ.—ट. सुग्रीवस्य २१ क. ख. घ. ङ. छ. झ. ञ. ट. संप्रहृष्ट. २२ क. ग. च. ज. पाणिं.

हृद्यं सौहृदमालम्ब्य पर्यष्वजत पीडितम् ॥ १४ ॥
ततो हनूमान्संत्यज्य भिक्षुरूपमरिंदमः ॥ काष्ठयोः स्वेन रूपेण जनयामास पावकम् ॥ १५ ॥
दीप्यमानं ततो वह्निं पुष्पैरभ्यर्च्य सत्कृतम् ॥ तयोर्मध्येऽथ सुप्रीतो निदधे सुसमाहितः ॥ १६ ॥
ततोऽग्निं दीप्यमानं तौ चक्रतुश्च प्रदक्षिणम् ॥ सुग्रीवो राघवश्चैव वयस्यत्वमुपागतौ ॥ १७ ॥
ततः सुप्रीतमनसौ तावुभौ हरिराघवौ ॥ अन्योन्यमभिवीक्षन्तौ न तृप्तिमुपजग्मतुः ॥ १८ ॥
त्वं वयस्योसि मे हृद्यो ह्येकं दुःखं सुखं च नौ ॥ सुग्रीवो राघवं वाक्यमित्युवाच प्रहृष्टवत् ॥१९॥
ततः स पर्णबहुलां छित्त्वा शाखां सुपुष्पिताम् ॥ सालस्यास्तीर्य सुग्रीवो निषसाद सराघवः ॥२०॥
लक्ष्मणायाथ संहृष्टो हनुमान्प्लवगर्षभः ॥ शाखां चन्दनवृक्षस्य ददौ परमपुष्पिताम् ॥ २१ ॥
ततः प्रहृष्टः सुग्रीवः श्लक्ष्णं मधुरया गिरा ॥ प्रत्युवाच तदा रामं हर्षव्याकुललोचनः ॥ २२ ॥
अहं विनिकृतो राम चरामीह भयार्दितः ॥ हृतभार्यो वने त्रस्तो दुर्गमेतदुपाश्रितः ॥ २३ ॥
सोहं त्रस्तो वने भीतो वसाम्युद्भ्रान्तचेतनः ॥ वालिना निकृतो भ्रात्रा कृतवैरश्च राघव ॥ २४ ॥
वालिनो मे महाभाग भयार्तस्याभयं कुरु ॥ कर्तुमर्हसि काकुत्स्थ भयं मे न भवेद्यथा ॥ २५ ॥
एवमुक्तस्तु तेजस्वी धर्मज्ञो धर्मवत्सलः ॥ प्रत्यभाषत काकुत्स्थः सुग्रीवं प्रहसन्निव ॥ २६ ॥
उपकारफलं मित्रं विदितं मे महाकपे ॥ वालिनं तं वधिष्यामि तव भार्यापहारिणम् ॥ २७ ॥
अमोघाः सूर्यसंकाशा ममैते निशिताः शराः ॥ तस्मिन्वालिनि दुर्वृत्ते निपतिष्यन्ति वेगिताः ॥२८॥
कङ्कपत्रप्रतिच्छन्ना महेन्द्राशनिसन्निभाः ॥ तीक्ष्णाग्रा ऋजुपर्वाणः सरोषा भुजगा इव ॥ २९ ॥
तमद्य वालिनं पश्य क्रूरैराशीविषोपमैः ॥ शरैर्विनिहतं भूमौ विकीर्णमिव पर्वतम् ॥ ३० ॥

शेषः ॥ १३ ॥ हृद्यमित्यर्धं । पीडितं दृढं ॥ १४॥ मर्यादा बध्यतामिति वदतः सुग्रीवस्याशयं विदित्वाचरति—तत इति ॥ भिक्षुरूपंसंत्यज्येत्यनेन सुग्रीवविश्वासार्थं "तौत्वयाप्राकृतेनैवगत्वाज्ञेयौ प्लवङ्गम" इतितदुक्तप्रकारेणपुनर्भिक्षुरूपेणैवतदन्तिकं गतइत्यवगम्यते । स्वेन रूपेण वानररूपेण । काष्ठयोः अरणिभूतशमीकाष्ठयोः । सप्तम्यन्तंपदं ॥ १५ ॥ सत्कृतमित्यभ्यर्च्येत्यस्यानुवादः । तयोः रामसुग्रीवयोः ॥१६॥ प्रदक्षिणंचक्रतुः अन्योन्यं पाणिंगृहीत्वेति शेषः । उपागतौ अग्निसाक्षिकमिति शेषः ॥ १७ ॥ अभिवीक्षन्तौ अभिवीक्षमाणौ ॥ १८ ॥ एकं समानं । त्वद्दुःखेन मम दुःखंभवतु त्वत्सुखेनममसुखंभवत्वित्यर्थः । अनेन परसाम्यापत्त्यभ्यर्थनंसूचितं ॥ १९ ॥ सराघव इत्यनेन एकासनत्वमुक्तं ॥ २०—२१ ॥ प्रत्युवाच तदा राममिति पाठः ॥२२—२३॥ त्रस्तः भीतः उत्तरोत्तरं भीतः । यद्वा वालित्रस्तोहमस्मिन्वने अभीतो वसामीत्यर्थः ॥ २४ ॥ अभयं भयाभावं कुरु । आर्त्यतिशयेनदार्ढ्यायपुनरुच्यते—कर्तुमित्यर्धेन । मे भयं यथानभवेत्तथाकर्तुमर्हसीत्यन्वयः ॥ २५ ॥ प्रहसन्निव कियन्मात्रमेतदितिहसित्वा । इवशब्दो मन्दस्मितत्वे ॥ २६—२८ ॥ कङ्कपत्रप्रतिच्छन्नाः कङ्कपत्रैर्बद्धाइत्यर्थः ॥ २९ ॥ अद्य पश्येत्यनेन क्रिया-

॥ १२ ॥ ती० काष्ठयोरितिसप्तम्यन्तं । अत्र हनुमतापावकोत्पादनंरामाभ्यनुज्ञयैव । अग्निसाक्षिकंस्नेहंकुर्वितिकबन्धेनोक्तत्वात् ॥ १५ ॥ ति० प्रहृष्टवन् प्रहृष्टस्सन् ॥ १९ ॥ ति० एतावत्पर्यन्तंसम्यग्विश्वासाभावात्सुग्रीवः पृथगासनस्थएवासीदितिज्ञायते । तदाह—ततस्सुपर्णेति ॥२०॥ ति० लक्ष्मणायविषादपरिहारार्थंचन्दनशाखास्तरणदानं ॥२१॥ रामानु० त्रस्तः चकितः । अत्रस्तइतिवा ॥ २३ ॥ ति० अभयंकुरु अभयप्रतिज्ञांकुरु ॥ २५ ॥ स० वालिसंहर्तुर्बाणस्यैकत्वेप्यनेकबाणसाध्यमहाकार्यकर्तु-

[पा०] १ छ. झ. ञ ट. हृष्टः. २ ख. पूजितं. ३ छ. झ. ट. निदधौ. ख. निदधेस्म. ४ ख. घ.—ट. मभिजग्मतुः. ५ क. ख. ग. ङ.—ट. हृद्योमे. ६ ग.—ज. ञ. सुग्रीवंराघवो. ख. सुग्रीवोराघवश्चैवमूचतुस्तौप्रहृष्टवत्. ७ क. ग. ङ.—ट. सुपर्णबहुलां. ८ क. ख. ग. ङ.—ट. भङ्क्त्वा. ९ ङ.—ट. हनूमान्मारुतात्मजः. १० ख. ततो. ११ ङ. ञ. ञ. भ्रात्रा. १२ क. ग. घ.—ट. ममेमे. १३ क. घ. छ. परिच्छन्ना. १४ ख. सरोषाइवपन्नगाः. १५ ङ.—ट. तीक्ष्णैः. १६ च. झ. ट. प्रकीर्णमिव.

स तु तद्वचनं श्रुत्वा राघवस्यात्मनो हितम् ॥ सुग्रीवः परमप्रीतः सुमहद्वाक्यमब्रवीत् ॥ ३१ ॥
तव प्रसादेन नृसिंह राघव प्रियां च राज्यं च समाप्नुयामहम् ॥
तथा कुरु त्वं नरदेव वैरिणं यथा निहंस्यद्य रिपुं ममाग्रजम् ॥ ३२ ॥
सीताकपीन्द्रक्षणदाचराणां राजीवहेमज्वलनोपमानि ॥
सुग्रीवरामप्रणयप्रसङ्गे वामानि नेत्राणि समं स्फुरन्ति ॥ ३३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे पञ्चमः सर्गः ॥ ५ ॥

षष्ठः सर्गः ॥ ६ ॥

सुग्रीवेण रामंप्रति हनुमत्सकाशात्स्वस्यतदीयवृत्तान्तपरिज्ञाननिवेदनपूर्वकं सीतान्वेषणप्रतिज्ञानम् ॥ १ ॥ तथा गगने रावणेननीयमानायाःसीतायाः स्वैरवलोकननिवेदनेनसह स्वेप्सितयासोत्तरीयस्याभरणोत्सर्जननिवेदनपूर्वकं तदाभरणप्रदर्शनम् ॥ २ ॥ रामेण लक्ष्मणेनसह तदाभरणानांसीतासंबन्धित्वप्रत्यभिज्ञानेन परिदेवनपूर्वकं सुग्रीवंप्रतिरावणयाथात्म्यप्रश्नः ॥ ३ ॥

पुनरेवाब्रवीत्प्रीतो राघवं रघुनन्दनम् ॥ १ ॥
अयमाख्याति मे राम सचिवो मन्त्रिसत्तमः ॥ हनुमान्यन्निमित्तं त्वं निर्जनं वनमागतः ॥ २ ॥
लक्ष्मणेन सह भ्रात्रा वसता च वने तव ॥ रक्षसाऽपहृता भार्या मैथिली जनकात्मजा ॥ ३ ॥
त्वया वियुक्ता रुदती लक्ष्मणेन च धीमता ॥ अन्तरप्रेप्सुना तेन हत्वा गृध्रं जटायुषम् ॥
[भार्यावियोगजं दुःखं प्रापितस्तेन रक्षसा] ॥ ४ ॥
भार्यावियोगजं दुःखमचिरात्त्वं विमोक्ष्यसे ॥ अहं तामानयिष्यामि नष्टां वेदश्रुतीमिव ॥ ५ ॥

ज्ञादित्यमुक्तं ॥ ३०—३१ ॥ कुरु यतस्वेत्यर्थः । वैरिणं रिपुमितिद्विरुक्त्या वैरकृतंशात्रवं नतुजात्येत्युक्तं ॥ ३२ ॥ प्रसङ्गात्कविराह—सीतेति ॥ सीतानेत्रं राजीवोपमं । वालिनेत्रं हेमोपमं । पिङ्गाक्षत्वात् । रावणनेत्राणि ज्वलनोपमानि । पुरुषस्य वामनेत्रस्फुरणमनर्थकरं स्त्रियास्तु शोभनमिति निमित्तशास्त्रविदः ॥ ३३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने पञ्चमः सर्गः ॥ ५ ॥

एवंरामेण वालिवधेप्रतिज्ञाते सुग्रीवेणापि रामकार्यसिद्धिः प्रतिज्ञायते षष्ठे—पुनरेवेत्यादि ॥ राघवमिति नाम । सुग्रीव इति शेषः ॥ १ ॥ त्वं यन्निमित्तं वनमागतः तदाख्याति स्म ॥२॥ लक्ष्मणेनेत्यादिश्लोकद्वयं । तेन पूर्वमविज्ञातेन ॥ ३—४ ॥ विमोक्ष्यसे

स्वाद्बहुत्वेनोक्तिः ॥२८॥ स० सीतायावामनेत्रस्फुरणं त्रिकालदर्शिनाऋष्यमूकस्थेनोक्तमितिवक्तव्यं । ३३॥ इतिपञ्चमःसर्गः ॥५॥

स० राघवं रघुकुलोत्पन्नं रघूणां नन्दयतीतितथा तं ॥ १ ॥ रामानु० आख्याति आख्यातवान् । " वर्तमानसामीप्ये वर्तमानवद्वा" इतिभूतेलट् ॥ शि० मेसेवकोऽयंहनुमान् मेआख्याति ॥ २ ॥ ती० अन्तरप्रेप्सुना तवान्तरस्थानंप्राप्तुमिच्छता । वैदेहीअपहृतेतिहनुमानाख्यातीत्यत्रकीदितिपूर्वेणसंबन्धः ॥ ति० तेनरक्षसामैथिलीहृता त्वंभार्यावियोगजंदुःखंप्रापितइतिचाख्यातवान् ॥ स० अन्तरमवकाशं । ४॥ ती० वेदश्रुतीमिव श्रूयतइतिश्रुतिरितिव्युत्पत्त्या श्रुतित्वंवेदशास्त्रसाधारणं । तत्प्राबल्यार्थं वेदश्रुतीमित्युक्तं । मधुकैटभाभ्यांपातालेयुगंवेदजातंमत्स्याकृतिर्हरिर्यथाऽऽनीतवान् तद्वत्सीतामानयिष्यामि आनेष्यामीत्यर्थः ॥

[पा०] १ ख. राघवस्यमनोहितं. २ ङ.—ट. परमंवाक्यं. ३ क. ख. ग. ङ.—ट. वीर. ४ ङ. च. ज. ञ. निहन्म्यद्य. छ. झ. ट. नहिंस्यात्सपुनर्ममाग्रजं. ५ ख. मेवीर. झ तेराम. ६ छ. झ. ट. सेवको. ७ ङ. ज. ञ. वैदेही. ८ छ.—ट. अन्तरं. ९ क. ग. गृध्रंहत्वा. १० इदमर्धं ङ. छ. झ. ञ. ट. पाठेषुदृश्यते. ११ छ. झ. दुःखंनचिरात्त्वं. १२ क. ग. वेदश्रुतियथा. झ. देवश्रुतीमिव.

रसातले वा वर्तन्तीं वर्तन्तीं वा नभस्तले ॥ अहमानीय दास्यामि तव भार्यामरिंदम ॥ ६ ॥
इदं तथ्यं मम वचस्त्वमवेहि च राघव ॥ न शक्या सा जरयितुमपि सेन्द्रैः सुरासुरैः ॥ ७ ॥
तव भार्या महाबाहो भक्ष्यं विषकृतं यथा ॥ ८ ॥
त्यज शोकं महाबाहो तां कान्तामानयामि ते ॥ अनुमानात्तु जानामि मैथिली सा न संशयः ॥ ९ ॥
ह्रियमाणा मया दृष्टा रक्षसा क्रूरकर्मणा ॥ क्रोशन्ती रामरामेति लक्ष्मणेति च विस्वरम् ॥
स्फुरन्ती रावणस्याङ्के पन्नगेन्द्रवधूर्यथा ॥ १० ॥
आत्मना पञ्चमं मां हि दृष्ट्वा शैलतटे स्थितम् ॥ उत्तरीयं तया त्यक्तं शुभान्याभरणानि च ॥ ११ ॥
तान्यस्माभिर्गृहीतानि निहितानि च राघव ॥ आनयिष्याम्यहं तानि प्रत्यभिज्ञातुमर्हसि ॥ १२ ॥
तमब्रवीत्ततो रामः सुग्रीवं प्रियवादिनम् ॥ आनयस्व सखे शीघ्रं किमर्थं प्रविलम्बसे ॥ १३ ॥
एवमुक्तस्तु सुग्रीवः शैलस्य गहनां गुहाम् ॥ प्रविवेश ततः शीघ्रं राघवप्रियकाम्यया ॥ १४ ॥
उत्तरीयं गृहीत्वा तु शुभान्याभरणानि च ॥ इदं पश्येति रामाय दर्शयामास वानरः ॥ १५ ॥
ततो गृहीत्वा तद्वासः शुभान्याभरणानि च ॥ अभवद्बाष्पसंरुद्धो नीहारेणेव चन्द्रमाः ॥ १६ ॥
सीतास्नेहप्रवृत्तेन स तु बाष्पेण दूषितः ॥ हा प्रियेति रुदन्धैर्यमुत्सृज्य न्यपतत्क्षितौ ॥ १७ ॥
हृदि कृत्वा तु बहुशस्तमलंकारमुत्तमम् ॥ निशश्वास भृशं सर्पो बिलस्थ इव रोषितः ॥ १८ ॥
अविच्छिन्नाश्रुवेगस्तु सौमित्रिं वीक्ष्य पार्श्वतः ॥ परिदेवयितुं दीनं रामः समुपचक्रमे ॥ १९ ॥
पश्य लक्ष्मण वैदेह्या संत्यक्तं ह्रियमाणया ॥ उत्तरीयमिदं भूमौ शरीराद्भूषणानि च ॥ २० ॥
शाद्वलिन्यां ध्रुवं भूम्यां सीतया ह्रियमाणया ॥ उत्सृष्टं भूषणमिदं तथारूपं हि दृश्यते ॥ २१ ॥

त्यक्ष्यसि । नष्टां मधुकैटभापहृतां । वेदश्रुतीं श्रूयतइति श्रुतिः शब्दः । वेदरूपश्रुतीमिव वेदगिरमिव । दीर्घ आर्षः ॥ ५ ॥ वर्तन्तीं वर्तमानां ॥ ६ ॥ जरयितुं आत्मसात्कर्तुं । विषकृतं विषेण पक्वम् ॥ ७—८ ॥ अनुमानात् योग्यतया । या दृष्टा सा मैथिली न संशयः । अनुमानात्तुजानामीत्यस्यैव विवरणमिदम् ॥ ९—१० ॥ आत्मना मया पञ्चमम् ॥ ११ ॥ प्रत्यभिज्ञातुं स्मर्तुं ॥ १२—१४ ॥ उत्तरीयमाभरणानि च उत्तरीयबद्धानीत्यर्थः ॥ १५—१७ ॥ अलंकारमिति जात्येकवचनं । रोषितः संजातरोषः ॥ १८ ॥ परिदेवयितुं प्रलपितुं । दीनमिति क्रियाविशेषणं ॥ १९ ॥ शरीरात् अपनीयेति शेषः ॥ २० ॥ अत्र शाद्वलशब्देन हरिततृणान्युच्यन्ते । स्वार्थे वलजार्षः । तद्वत्यां भूमौ मृदुस्थले

ति० देवस्य धर्मस्य ब्रह्मणश्च ज्ञानसाधनभूताश्रुतिःत्रयी तामिव ॥ ५ ॥ शि० ननुतस्याःस्थितिरेवनविज्ञायते इतिकथमानेष्यसीत्यतआह—रसातलइति ॥ ६ ॥ शि० जरयितुं गोपयितुमित्यर्थः ॥ ७ ॥ ति० विषकृतं विषमिश्रितं ॥ शि० भार्या भार्याहरणं ॥ ८ ॥ रामानु० मैथिलीत्यत्र इतिकरणंद्रष्टव्यं । ति० यादृष्टासामैथिलीत्यनुमानात् त्वद्भार्यात्वानुमापकाद्रामेत्याक्रोशाल्लिङ्गात् जानामीत्यन्वयः । शि० अनुमानप्रकारस्तु—इयंनैतत्संबन्धिनी एतत्स्पर्शभीतत्वात् चण्डालस्पर्शभीतब्राह्मणवत् । इयंसीता निरन्तरंराममनस्कत्वात्यन्नैवंतन्नैवं । इयंराममनस्का असकृत्तत्प्रार्थनाबोधकशब्दवत्त्वात् शंभुवदिति ॥ ९ ॥ वि० आत्मनापञ्चमं मन्त्रिचतुष्टयसहितमामित्यर्थः ॥ स० आत्मनास्वेनपञ्चमंपञ्चत्वसंख्यापूरकंमांदृष्ट्वेत्यनेन इतरेषांदर्शनकर्मत्वाभावे अस्यपञ्चत्वसंख्यापूरकत्वमेवनभवतीतिभावः ॥ ११ ॥ ती० निहितानि निगूढानि विधिवद्रक्षितानीत्यर्थः । ति० आनयिष्यामि आनेष्यामि । दृष्टेत्यत्र प्रमाणप्रदर्शनमिदं ॥ १२ ॥ ति० गहनां दुष्प्रवेशां ॥ १४ ॥ ति० हाप्रियेतीत्यत्रसंधिरार्षः । स० हाप्रियेअतिरुदन्नितिच्छेदः । इतिशब्दोऽध्याहार्यः । प्रियेतिलक्ष्मणसंबोधनंवा । शि० बाष्पेणदूषितः व्याप्तः ॥ १७ ॥ ति० हृदीति प्रियासंबन्धेनप्रीत्यतिशयात् ॥ १८ ॥

[पा०] १ क. ग. च. जरयितुंसेन्द्रैरपि. २ ज. कान्तांतां. ३ छ. झ. ट. रौद्रकर्मणा. ४ ख. वधूरिव. ५ छ. झ. ट. शैलतले. ६ ङ. ज. ञ. प्रियदर्शनं. ७ क. त्वंविलंबसे. ८ ज. प्रतिकाम्यया. ९ ङ. गृहीत्वास. १० झ. ट. सतान्याभरणानिच. ११ क. छ. झ. ट. वासस्तु. १२ छ.—ट. कृत्वास. १३ ङ.—ठ. प्रेक्ष्य. १४ ख. संत्यक्तंवैदेह्या.

एवमुक्तस्तु रामेण लक्ष्मणो वाक्यमब्रवीत् ॥ नाहं जानामि केयूरे नाहं जानामि कुण्डले ॥
नूपुरे त्वभिजानामि नित्यं पादाभिवन्दनात् ॥ २२ ॥
ततः स राघवो दीनः सुग्रीवमिदमब्रवीत् ॥ २३ ॥
ब्रूहि सुग्रीव कं देशं ह्रियन्ती लक्षिता त्वया ॥ रक्षसा रौद्ररूपेण मम प्राणैः प्रिया प्रिया ॥ २४ ॥
क्व वा वसति तद्रक्षो महद्व्यसनदं मम ॥ यन्निमित्तमहं सर्वान्नाशयिष्यामि राक्षसान् ॥ २५ ॥
हरता मैथिलीं येन मां च रोषयता भृशम् ॥ आत्मनो जीवितान्ताय मृत्युद्वारमपावृतम् ॥ २६ ॥
मम दयिततरा हृता वनान्ताद्रजनिचरेण विमथ्य येन सा ॥
कथय मम रिपुं त्वमद्य वै प्लवगपते यमसादनं नयामि ॥ २७ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे षष्ठः सर्गः ॥ ६ ॥

सप्तमः सर्गः ॥ ७ ॥

सुग्रीवेण रामंप्रति स्वस्यरावणकुलनिलयाद्यपरिज्ञाननिवेदनपूर्वकं सीतान्वेषणप्रतिज्ञानेन समाश्वासनम् ॥ १ ॥ सुग्रीवसमाश्वासनविगतशोकेनरामेण सुग्रीवप्रशंसनपूर्वकं सशपथं वालिवधप्रतिज्ञानम् ॥ २ ॥

एवमुक्तस्तु सुग्रीवो रामेणार्तेन वानरः ॥ अब्रवीत्प्राञ्जलिर्वाक्यं सबाष्पं बाष्पगद्गदः ॥ १ ॥
न जाने निलयं तस्य सर्वथा पापरक्षसः ॥ सामर्थ्यं विक्रमं वाऽपि दौष्कुलेयस्य वा कुलम् ॥ २ ॥

उत्सृष्टत्वात् तथारूपं अविकलरूपं दृश्यते ॥ २१—२३ ॥ कं देशं कां दिशं प्रति । ह्रियन्ती ह्रियमाणेत्यर्थः । प्राणैः प्राणेभ्यः ॥२४॥ अपावृतं उद्घाटितं येन तत्क वसतीत्यन्वयः ॥ २५—२६ ॥ ममेति विषमवृत्तं ॥ २७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने षष्ठः सर्गः ॥ ६ ॥

एवमाभरणदर्शनव्याजेन चेतनस्य यादृच्छिकप्रासङ्गिकसुकृतदर्शनेन तल्लाभत्वरा भगवत उच्यते सप्तमे—एवमुक्त इत्यादि ॥ बाष्पगद्गदः रामबाष्पदर्शनेन स्वयमपि बाष्पगद्गदः । एकं दुःखं सुखं च नावित्यस्य प्रथमोदाहरणमिदं ॥ १ ॥ दौष्कुलेयस्य । दुष्कुले भवोदौष्कुलेयः । "दुष्कुलाड्ढक्" इति ढक् । तस्यपापरक्षसः परदारापहरणरूपपापकृतो राक्षसस्य । निलयं वासस्थानं । सामर्थ्यं शक्तिं । विक्रमं वा । सर्वथा न जाने । किंचिदपि नजानामीत्यर्थः । नन्विदं वक्ष्यमाणेन विरुध्यते । वक्ष्यति वानरप्रेषणावसरे—" द्वीपस्तस्यापरे पारे शतयोजनमायतः । अगम्यो मानुषैर्देवैस्तं मार्गध्वं समन्ततः ॥ सहि

ति० नाहमिति ऊर्ध्वदृष्ट्यापरस्त्रीत्वेनकदाप्यदर्शनादितिभावः ॥ २२ ॥ ती० कंदेशं अत्यन्तसंयोगेद्वितीया । कस्मिन्देशेलक्षितेत्यर्थः ॥ ति० प्राणप्रिया प्राणेभ्योपीष्टा । प्राणसंबन्धस्यतदधीनत्वादितिभावः ॥ २४ ॥ ति० यन्निमित्तं प्रियापहारि तन्निमित्तं । स० महदितिभिन्नं ॥ २५ ॥ रामानु० अस्मिन्सर्गान्तेममदयिततरेत्ययंश्लोकोबहुषुकोशेषुनदृश्यते ॥ २७ ॥ इति षष्ठःसर्गः ॥ ६ ॥

ति० नजानइति । सर्वप्रकारेणनजाने किंचिज्जानामीत्यर्थः । उत्तरत्रसीतान्वेषणार्थंहनुमदादिवानरप्रेषणसमये "सहिदेशस्तुवध्यस्यरावणस्यदुरात्मनः । राक्षसाधिपतेर्वासः सहस्राक्षसमद्युतेः" इतिवचनेनरावणावासस्यसुग्रीवावगतत्वप्रतीतेरेवंव्याख्यातं ॥ ति० पापरक्षसः पापंकृतवतोरक्षसः । निलयं निलयस्थानं गुप्तवासस्थानं । सर्वथानजाने । नहीदृशंपापंकर्मकृत्वाराजधान्यांवस्तुमर्हतीतिभावः । सामर्थ्यं शौर्यादि । विक्रमं विशेषेणक्रामतिपादविक्षेपंकरोतियत्रतद्वासनगरं । दौष्कुलेयस्येत्यनेन रक्षःकुलजत्वंध्वनितं । तज्जाने एवेतिशेषः । वाशब्दस्त्वर्थे । अतएवलङ्काद्वीपंनिर्दिश्य " सहिदेशस्तुवध्यस्य—"इतिहनुमदादिप्रेषण-

[पा०] १ झ. ट. ततस्तुराघवोवाक्यं. २ छ. झ. ञ. प्राणप्रियाहृता. ख. ग. ङ. ट. प्राणप्रियाप्रिया. ३ ङ. च. ज. ञ. यन्निमित्तमिमान्सर्वान्. ४ छ. झ. ट. ध्रुवं. ५ छ. झ. ट. दयिततमा. ६ ग. घ. छ. झ. वनाद्रजनिचरेण. ७ क.—घ. छ. झ. ट. तमद्यवै. ८ क.—ट. यमसंनिधिं. ९ ख. बाष्पगद्गदं. १० ञ. चापि. ११ छ. वैकुलं.

सत्यं ते प्रतिजानामि त्यज शोकमरिन्दम ॥ करिष्यामि तथा यत्नं यथा प्राप्स्यसि मैथिलीम् ॥३॥
रावणं सगणं हत्वा परितोष्यात्मपौरुषम् ॥ तथाऽस्मि कर्ता नचिराद्यथा प्रीतो भविष्यसि ॥ ४ ॥
अलं वैक्लव्यमालम्ब्य धैर्यमात्मगतं स्मर ॥ त्वद्विधानामसदृशमीदृशं विद्धि लाघवम् ॥ ५ ॥

देशस्तु वध्यस्य रावणस्य दुरात्मनः । राक्षसाधिपतेर्वासः सहस्राक्षसमद्युतेः " इति । तत्र हि रावणस्य निलयसामर्थ्यपराक्रमाः सुग्रीवेण स्पष्टमवगता इति गम्यते । सत्यं । तथापि स्वकार्ये प्रथमं प्रवर्तयितुमेवमुक्तवान्सुग्रीवः । अतएव " ब्रूहि सुग्रीव कं देशं ह्रियन्ती लक्षिता त्वया " इत्यस्यापि प्रतिवचनंनोक्तवान् । कथंगमनदेशमपिन जानीयात् । य एवमाह " ह्रियमाणा मया दृष्टा " इति । न चैवमादावेव मित्रद्रोहः कृतःस्यादिति वाच्यं । दूरदर्शिना सुग्रीवेणैवं मनसि कृतं । यदि मया 'रावणवृत्तान्तो मया ज्ञात' इत्युक्तः स्यात् । तदातिव्यसनी रामोयं सीतान्वेषणे प्रथमं मां प्रवर्तयेत् । तथायुक्तं । वानराणां बालिवशंवदत्वेनास्मदधीनत्वाभावात् । कथंचित्केषांचिद्वशीकरणेपि रावणेनकृतसख्यो बाली चास्मन्मनोरथानुरूपां प्रवृत्तिं कथंसहेत । तथा चोभयकार्यभङ्ग इत्यज्ञानममिनीतवान्सुमतिःसुग्रीवः । न चैवंसति वानरप्रेषणकालिकसुग्रीववचनेन कथमिव रामोनाशङ्कतेति वाच्यं । तारोक्तलक्ष्मणवचनश्रवणेनरामस्यन शङ्कावकाशः । पूर्वमयंनजानाति पश्चात्तारावचनैर्ज्ञातवानितिरामस्यापिप्रतिपत्तिर्भवेत् । एवं ह्याह लक्ष्मणंप्रतितारा " शतकोटिसहस्राणि लङ्कायांकिङ्कराक्षसाः । अयुतानिचषट्त्रिंशत्सहस्राणि शतानि च ॥ अहत्वा तांश्च दुर्धर्षान्राक्षसान्कामरूपिणः । नशक्योरावणोहन्तुं येनसामैथिली हृता " इत्यादि । किंच कथंबालोकालोकपर्यन्तं पर्यटतस्तदपरिज्ञानं । अतएवहि रामबलपरीक्षासमये दुन्दुभ्यादिधर्षणकथनप्रसङ्गेवक्तव्यमपिरावणजयवृत्तान्तं नोक्तवान् । नन्वेवमिदानीं परमार्थतो न विजानातिसुग्रीवः पश्चात्तारया ज्ञातवानिति किंन विकल्प्यतइतिचेन्न । तारादर्शनात्प्रभृति कामपरवशेन सुग्रीवेण तारया सह रामकार्यपर्यालोचनाप्रसक्तेः । यदिचसुग्रीवः सर्वथा नजानीयात् तदा सीताक्रोशादिना स्फुटमवगतादिशंवदेदेव । यच्च कैश्चिदुक्तं । निलयं नजानामीत्यस्य इदानीतदवस्थानदेशं नजानामीत्यर्थइति । तन्न । सर्वात्मना रावणवृत्तान्तमपरिज्ञायकियदपितत्स्वरूपज्ञानं भवतितितात्पर्येण क्व वासति तद्ब्रूह इतिपृष्टवन्तंप्रतिज्ञातांशमात्रमप्यनुक्त्वा इदानींतवदवस्थानभूमिं न जानामीत्युत्तरस्य छलत्वापत्तेः । तद्वासमात्रज्ञानेतद्रक्षनेसत्ययमेवेहागमिष्यतीतिहि रामाभिप्रायः । किंच इदानीं निलयापरिज्ञानेपि सामर्थ्यपराक्रमौवा वक्तव्यौ स्यातां । इतरदिशः प्रतिवानराणांप्रेषणं तान्प्रति—"रावणःसहवैदेह्यामागितव्यस्ततस्ततः " इतिवचनंच बहुकालविलम्बेन यत्रकुत्रापि सीतां स्थापयेत्तिष्ठेद्वेतिसंगच्छते । एतेनेदमपिनिरस्तं । सर्वथा सर्वप्रकारेणापितन्निलयंनजानामीतिविशिष्टाभावोर्थः । तथाचाग्रे केनचित्प्रकारेण तन्निलयज्ञानाविरोधइति । वानरान्प्रति यावन्मात्रमुच्यतेतावतआदावपिवक्तव्यत्वात् । यदपि केनचिदुक्तं । संवत्सरपर्यन्तं सीतादुःखकरणाभावे रावणकृतशिवपूजाफलं नभवेदितिदैवप्रतिबन्धवशात्तदानीं सुग्रीवस्याज्ञानमिति । तत्तुच्छं । दृष्टे संभवत्यदृष्टकल्पनाया अन्याय्यत्वात् । सम्यक्च परदारधर्षणं शिवपूजाफलमिति । तस्मात्तथोक्तएवार्थोग्राह्यः ॥ २–३ ॥ सगणं सपरिवारं । रावणं हत्वा भवन्तं परितोष्य आत्मपौरुषं तथाकर्तास्मि । यथा प्रीतोभविष्यसीतिसंबन्धः ॥ ४ ॥ वैक्लव्यं दैन्यं ॥ ५ ॥

कालिकसुग्रीववचसानविरोधः ॥ शि० दौष्कुलेयस्येति । तत्कुलस्यदुष्कुलत्वंतुतन्मातृराक्षसीत्वेन । आकुलं चञ्चलचित्तत्वं तत्कारणंचेत्यर्थः ॥ २ ॥ ति० यद्यप्येतावज्जानामि तथापितदुपवर्णनंनिष्फलं । तावन्मात्रज्ञानेपितद्वधासंभवात् ॥ क्वचिद्वुसेस्थितिसंभवात् । एतावत्त्वमगम्यतामित्याह—सत्यंत्विति । ति० परितोष्यं भवत्परितोषार्हं । आत्मनः सपरिवारस्यमम पौरुषं । अवलंब्येतिशेषः । स० अपरितोष्यं आत्मपौरुषंयस्यतंरावणं ॥ शि० आत्मपौरुषं सेनामित्यर्थः । परितोष्य संतोष्य ॥ ४ ॥

[पा०] १ क. ग. ङ.—ट. सत्यंतु. २ क. ग. ङ. च. झ. ञ. ठ. लद्विधानांनसदृशं. ३ क.—ङ. छ.—ट. बुद्धिलाघवं.

मयाऽपि व्यसनं प्राप्तं भार्याहरणजं महत् ॥ नै चाहमेवं शोचामि न च धैर्यं परित्यजे ॥ ६ ॥
नाहं सामनुशोचामि प्राकृतो वानरोपि सन् ॥ महात्मा च विनीतश्च किं पुनर्धृतिमान्भवान् ॥७॥
बाष्पमापतितं धैर्यान्निग्रहीतुं त्वमर्हसि ॥ मर्यादां सत्त्वयुक्तानां धृतिं नोत्स्रष्टुमर्हसि ॥ ८ ॥
व्यसने वाऽर्थकृच्छ्रे वा भये वा जीवितान्तके ॥ विमृशन्वै स्वया बुद्ध्या धृतिमान्नावसीदति ॥९॥
बालिश्चस्तु नरो नित्यं वैक्लव्यं शोऽनुवर्तते ॥ स मज्जत्यवशः शोके भाराक्रान्तेव नौर्जले ॥ १० ॥
एषोऽञ्जलिर्मया बद्धः प्रणयाच्त्वां प्रसादये ॥ पौरुषं त्रय शोकस्य नान्तरं दातुमर्हसि ॥ ११ ॥
ये शोकमनुवर्तन्ते न तेषां विद्यते सुखम् ॥ तेजश्च क्षीयते तेषां न त्वं शोचितुमर्हसि ॥ १२ ॥
शोकेनाभिप्रपन्नस्य जीविते चापि संशयः ॥ स शोकं त्यज राजेन्द्र धैर्यमाश्रय केवलम् ॥ १३ ॥
हितं वयस्यभावेन ब्रूमि नोपदिशामि ते ॥ वयस्यतां पूजयन्मे न त्वं शोचितुमर्हसि ॥ १४ ॥
मधुरं सान्त्वितस्तेन सुग्रीवेण स राघवः ॥ मुखमश्रुपरिक्लिन्नं वस्त्रान्तेन प्रमार्जयत् ॥ १५ ॥
प्रकृतिस्थस्तु काकुत्स्थः सुग्रीववचनात्प्रभुः ॥ संपरिष्वज्य सुग्रीवमिदं वचनमब्रवीत् ॥ १६ ॥
कर्तव्यं यद्वयस्येन स्निग्धेन च हितेन च ॥ अनुरूपं च युक्तं च कृतं सुग्रीव तत्त्वया ॥ १७ ॥
एष च प्रकृतिस्थोऽहमनुनीतस्त्वया सखे ॥ दुर्लभो हीदृशो बन्धुरस्मिन्काले विशेषतः ॥ १८ ॥
किंतु यत्नस्त्वया कार्यो मैथिल्याः परिमार्गणे ॥ राक्षसस्य च रौद्रस्य रावणस्य दुरात्मनः ॥ १९ ॥
मया च यदनुष्ठेयं विस्रब्धेन तदुच्यताम् ॥ वर्षास्विव च सुक्षेत्रे सर्वं संपद्यते मयि ॥ २० ॥
मया च यदिदं वाक्यमभिमानात्समीरितम् ॥ तत्त्वया हरिशार्दूल तत्त्वमित्युपधार्यताम् ॥ २१ ॥
अनृतं नोक्तपूर्वं मे नच वक्ष्ये कदाचन ॥ एतत्ते प्रतिजानामि सत्येनैव च ते शपे ॥ २२ ॥
ततः प्रहृष्टः सुग्रीवो वानरैः सचिवैः सह ॥ राघवस्य वचः श्रुत्वा प्रतिज्ञातं विशेषतः ॥ २३ ॥
एवमेकान्तसंयुक्तौ ततस्तौ नरवानरौ ॥ उभावन्योन्यसदृशं सुखं दुःखं प्रभाषताम् ॥ २४ ॥

परित्यजे परित्यजामि ॥ ६ ॥ प्राकृतः हीनः । विनीतः वृद्धैःसुशिक्षितः ॥ ७ ॥ सत्त्वयुक्तानां व्यवसायवतां । " द्रव्यासुव्यवसायेषु सत्त्वमस्त्रीतुजन्तुषु " इत्यमरः । मर्यादां व्यवस्थारूपांधृतिं ॥ ८ ॥ अर्थकृच्छ्रे धननाशे ॥ ९–१० ॥ अन्तरं अवकाशं ॥ ११–१३ ॥ ब्रूमि ब्रवीमि । वयस्यतां मित्रत्वं ॥ १४ ॥ प्रमार्जयत् । स्वार्थे णिच् । " अनित्यमागमशासनं " इत्यडभावः ॥ १५–१६ ॥ अनुरूपं मित्रत्वानुरूपं । युक्तं शोकनिवारणयोग्यं । कृतं उक्तमित्यर्थः ॥ १७–१९ ॥ विस्रब्धेन स्निग्धेन ॥ २० ॥ अभिमानात् शौर्याभिमानात् । लघ्यभिमानाद्वा । तत्त्वं यथार्थं ॥ २१—२३ ॥ एकान्तसं-

---

ति० व्यसने इष्टवियोगजे । भये चोरव्याघ्रादिजे । जीवितान्तगे जीवितनाशप्रापके । विमृशन् प्रारब्धवेगमितिशेषः । ती० व्यसने विपदि । अर्थकृच्छ्रे कार्यसंकटे ॥ ९ ॥ शि० पौरुषं स्वैकनिष्ठपरमपुरुषत्वंत्रय स्मरेत्यर्थः ॥११॥ ती० प्रकृतिस्थः स्वभावस्थः दुःखरहितइत्यर्थः ॥ १६ ॥ शि० स्निग्धेन स्नेहविशिष्टेन । युक्तं युक्तिविशिष्टं ॥ १७ ॥ ति० अस्मिन्काले व्यसनकाले ॥ १८ ॥ ति० रावणस्य संहारेचेतिशेषः ॥ स० रावणस्यच परिमार्गणे ॥ १९ ॥ ति० यदनुष्ठेयं तदेतिशेषः ॥ वर्षास्विवसुक्षेत्रे उप्तंबीजमितिशेषः । संपद्यते सफलंभविष्यतीत्यर्थः । शैघ्र्यप्रस्थायनायवर्तमानप्रयोगः ॥ स० विस्रब्धेन विश्वस्तेनमया यत्कर्तव्यंतदुच्यतां । अनन्तरंच वर्षासुतत्रापिचसुक्षेत्रे उप्तंयथासंपद्यते तथात्वसर्वंसंपद्यते ॥ २० ॥ ती० इदंवाक्यं

[पा०] १ छ. झ. ट. भार्याविरहजं. २ छ. झ. ट. नाहमेवंहि. ३ ग. छ. झ. ट. धैर्येनच. ४ ग. अहंतावन्नशोचामि. ङ. ञ. नाहंतमभिशोचामि. ५ छ. झ. ट. न्महान्. ६ ख. ग. घ. छ.—ट. जीवितान्तगे. ७ च. छ. झ. ञ. ट. विमृशंश्च. ८ क. ग. नोनुगच्छति. ९ क. ग. गन्तुमर्हसि. १० छ. झ. क्षयते. ११ ख. वापि. १२ क. नोपदिशाम्यहं. १३ क. प्रमार्जितं. ख. ममार्जतत्. १४ क. ग. मेलया. १५ क. ग. ङ. च. छ. झ. ञ. ट. तव. १६ छ. झ. ट. शपाम्यहं. क.—च. ञ. ञ. शपामिते. १७ ञ. हरिवानरौ. १८ क. ग. सदृशौ. १९ ख. ङ. च. झ. ञ. ट. सुखंदुःखमभाषतां. ञ. सुसुखंश्लक्ष्णभाषतां.

महानुभावस्य वचो निशम्य हरिर्नराणामृषभस्य तस्य ॥
कृतं स मेने हरिवीरमुख्यस्तदा स्वकार्यं हृदयेन विद्वान् ॥ २५ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे सप्तमः सर्गः ॥ ७ ॥

अष्टमः सर्गः ॥ ८ ॥

रामेण सहैकशाखाऽसनगतेनसुग्रीवेण रामंप्रति स्वस्मिन्वालिकृतापकारनिवेदनपूर्वकमभययाचना ॥ १ ॥ तथा रामेण वालिवधप्रतिज्ञाने विस्तरेणभार्याहरणादिरूपवाल्यपकारनिवेदनेन तद्वधप्रार्थना ॥ २ ॥ रामेण सुग्रीवंप्रति वालिनासह तादृशविरोधकारणप्रश्नः ॥ ३ ॥ सुग्रीवेण तंप्रति तत्कथनोपक्रमः ॥ ४ ॥

परितुष्टस्तु सुग्रीवस्तेन वाक्येन वानरः ॥ लक्ष्मणस्याग्रतो राममिदं वचनमब्रवीत् ॥ १ ॥
सर्वथाऽहमनुग्राह्यो देवतानामसंशयः ॥ उपपन्नगुणोपेतः सखा यस्य भवान्मम ॥ २ ॥
शक्यं खलु भवेद्राम सहायेन त्वयाऽनघ ॥ सुरराज्यमपि प्राप्तुं स्वराज्यं किं पुनः प्रभो ॥ ३ ॥
सोहं सभाज्यो बन्धूनां सुहृदां चैव राघव ॥ यस्याग्निसाक्षिकं मित्रं लब्धं राघववंशजम् ॥ ४ ॥
अहमप्यनुरूपस्ते वयस्यो ज्ञास्यसे शनैः ॥ नतु वक्तुं समर्थोऽहं स्वयमात्मगतान्गुणान् ॥ ५ ॥
महात्मनां तु भूयिष्ठं त्वद्विधानां कृतात्मनाम् ॥ निश्चला भवति प्रीतिर्धैर्यमात्मवतामिव ॥ ६ ॥
रजतं वा सुवर्णं वा वस्त्राण्याभरणानि च ॥ अविभक्तानि साधूनामवगच्छन्ति साधवः ॥ ७ ॥
आढ्यो वाऽपि दरिद्रो वा दुःखितः सुखितोपि वा ॥ निर्दोषो वा सदोषो वा वयस्यः परमा गतिः ॥ ८ ॥
धनत्यागः सुखत्यागो देहत्यागोपि वा पुनः ॥ वयस्यार्थे प्रवर्तन्ते स्नेहं दृष्ट्वा तथाविधम् ॥ ९ ॥

पृक्तौ एकान्ते रहसि संयुक्तौ एकान्तंनियतं यथा-तथा संयुक्तौवा । प्रभावतां । व्यत्ययेन परस्मैपद-मडभावश्च ॥ २४—२५ ॥ इति श्रीगोविन्दराजवि-रचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्कि-न्धाकाण्डव्याख्याने सप्तमः सर्गः ॥ ७ ॥

अथ सुग्रीवस्य स्वशोकमूलविज्ञापनमष्टमे—परि-तुष्ट इत्यादि ॥ १ ॥ देवतानामनुग्राह्यः दयनीयो-ऽभवं । यस्य मे भवान् सखाऽऽसीत् । कीदृशः सखा । उपपन्नगुणोपेतः राजयोग्यशौर्यवीर्यादिसर्वगुणोप-पन्नः ॥ २ ॥ शक्यमित्यादि चतुश्चत्वारिंशत् ॥ ३ ॥ सभाज्यः पूज्यः ॥ ४—५ ॥ भूयिष्ठं अतिशयेन । आत्मवतां आत्मज्ञानिनां ॥ ६ ॥ साधूनां मित्राणां । साधवो मित्राणि ॥ ७—८ ॥ तथाविधं स्वस्नेहस-दृशं स्नेहंदृष्ट्वास्थितस्य वयस्यस्य वयस्यार्थे धनत्यागा-दयःप्रवर्तन्तइतियोजना । अनया सुग्रीववचनभङ्ग्या

वालिनंवधिष्यामीतिवाक्यं ॥ २१ ॥ ती० स्वकार्यं वालिवधरूपकार्यं ॥ सर्गश्रुतिफलमुक्तंस्कान्दे—"रामसुग्रीवसंल्लापंश्रुत्वा दुःखाद्विमुच्यते" इति ॥ २५ ॥ इतिसप्तमःसर्गः ॥ ७ ॥

ति० तेनवाक्येन अनृतंनोक्तपूर्वमेहत्यादिवाक्येन ॥ स० तुष्टं तोषः । भावेक्तः । परि उपरतं तुष्टंयस्यसपरितुष्टः । तुरप्यर्थे । तादृशोपि तेनरामेणवाक्येनहर्षितः । "परिस्यात्सर्वतोभावइत्यारभ्य—दोषाख्यानेप्युपरमेव्याप्तौनिवसनेपिच ।" इतिविश्वः ॥ १ ॥ शि० उपपन्नः स्वाभाविकसकलसंपत्तिविशिष्टः । गुणोपेतः सकलसद्गुणयुक्तः ॥ २ ॥ ति० अनुरूपः योग्यः । ज्ञास्यसे आनुरूप्यमितिशेषः । नतुवक्तुंसमर्थः । "आत्मप्रशंसामरणं" इतिन्यायात् ॥ ५ ॥ ती० महात्मनां विमलान्तःकर-णानां । आत्मवतां प्रशस्तबुद्धीनां । स० कृतात्मनां शिक्षितमनस्कानां ॥ ६ ॥ ती० अविभक्तानि स्वेनतुल्यानि ॥ ७ ॥

[पा०] १ ख. ङ. छ. झ. ञ. ट. हरिर्नृपाणामधिपस्य. २ ङ. च. छ. झ. ञ. ट. हर्षितः. ३ क. ग. ङ. च. छ. झ. ञ. ट. स्याग्रजंशूरमिदं. ज. स्याग्रतस्तत्त्वमिदं. ४ ङ. च. छ. झ. ट. देवतानांनसंशयः. ५ छ. झ. ट. किमुतप्रभो. ६ छ. झ. त्वयिआत्मगतान्. ७ छ. झ. मात्मवतांवरा. ८ ङ. च. झ. ट. शुभान्याभरणानिच. ९ ङ.—ञ. निर्दोषश्चस-दोषश्च. क. ग. निर्दोषश्चाक्षमश्चैव. १० ङ. च. छ. झ. ञ. ट. देशत्यागोपिवाऽनघ.

तत्तथेत्यब्रवीद्रामः सुग्रीवं प्रियवादिनम् ॥ लक्ष्मणस्याग्रतो लक्ष्म्या वासवस्येव धीमतः ॥ १० ॥
ततो रामं स्थितं दृष्ट्वा लक्ष्मणं च महाबलम् ॥ सुग्रीवः सर्वतश्चक्षुर्वने लोलमपातयत् ॥ ११ ॥
स ददर्श ततः सालमविदूरे हरीश्वरः ॥ सुपुष्पमीषत्पत्राढ्यं भ्रमरैरुपशोभितम् ॥ १२ ॥
तस्यैकां पर्णबहुलां मङ्क्त्वा शाखां सुपुष्पिताम् ॥ सालस्यास्तीर्य सुग्रीवो निषसाद सराघवः ॥१३॥
तावासीनौ ततो दृष्ट्वा हनूमानपि लक्ष्मणम् ॥ सालशाखां समुत्पाट्य विनीतमुपवेशयत् ॥ १४ ॥
सुखोपविष्टं रामं तु प्रसन्नमुदधिं यथा ॥ फलपुष्पसमाकीर्णे तस्मिन्गिरिवरोत्तमे ॥ १५ ॥
ततः प्रहृष्टः सुग्रीवः श्लक्ष्णं मधुरया गिरा ॥ उवाच प्रणयाद्रामं हर्षव्याकुलिताक्षरम् ॥ १६ ॥
अहं विनिकृतो भ्रात्रा चराम्येष भयार्दितः ॥ ऋश्यमूकं गिरिवरं हृतभार्यः सुदुःखितः ॥ १७ ॥
सोहं त्रस्तो भये मग्नो वसाम्युद्भ्रान्तचेतनः ॥ वालिना निकृतो भ्रात्रा कृतवैरश्च राघव ॥ १८ ॥
वालिनो मे भयार्तस्य सर्वलोकाभयंकर ॥ ममापि त्वमनाथस्य प्रसादं कर्तुमर्हसि ॥ १९ ॥
एवमुक्तस्तु तेजस्वी धर्मज्ञो धर्मवत्सलः ॥ प्रत्युवाच स काकुत्स्थः सुग्रीवं प्रहसन्निव ॥ २० ॥
उपकारफलं मित्रमपकारोरिलक्षणम् ॥ अद्यैव तं हनिष्यामि तव भार्यापहारिणम् ॥ २१ ॥
इमे हि मे महावेगाः पत्रिणस्तिग्मतेजसः ॥ कार्तिकेयवनोद्भूताः शरा हेमविभूषिताः ॥ २२ ॥
कङ्कपत्रप्रतिच्छन्ना महेन्द्राशनिसन्निभाः ॥ सुपर्वाणः सुतीक्ष्णाग्राः सरोषा भुजगा इव ॥ २३ ॥
भ्रातृसंज्ञममित्रं ते वालिनं कृतकिल्बिषम् ॥ शरैर्विनिहतं पश्य विकीर्णमिव पर्वतम् ॥ २४ ॥

आवाभ्यामेवं वर्तितव्यमितिव्यवस्थाद्योत्यते ॥ ९ ॥ लक्ष्म्या कान्त्या वासवस्येव स्थितस्य लक्ष्मणस्याग्रत इतिसंबन्धः । अनेनोक्तार्थे लक्ष्मणानुमतिर्द्योतिता ॥ १० ॥ स्थितं भूषणग्रहणकालात्प्रभृतितिष्ठन्तमित्यर्थः । लोलंचक्षुरपातयदिति । समीचीनशाखालाभार्थं सर्वत्रोन्मेषयामासेत्यर्थः ॥ ११ ॥ ईषत्पत्राढ्यमिति पल्लवप्रचुरमित्यर्थः ॥ १२ ॥ पर्णबहुलां पल्लवबहुलां ॥ १३ ॥ विनीतं । एकासने स्थितिमनङ्गीकुर्वन्तमित्यर्थः । उपवेशयत् उपावेशयत् ॥ १४ ॥ सुखोपविष्टमित्यादिश्लोकद्वयमेकान्वयं । द्वितीयरामपदमभिरामार्थकं । प्रसन्नमुदधिं यथा तद्वत्प्रसन्नं । गम्भीरमित्यर्थः ॥ १५—१८ ॥ हे सर्वलोकाभयंकर । वालिनः सकाशात् भयार्तस्य मे ममापि अत्यन्तभाग्यहीनस्यापि । प्रसादं कर्तुमर्हसि ॥ १९ ॥ प्रहसन्निव पूर्वमेव प्रतिज्ञातेपि चापलातिशयात्पुनः प्रार्थयत इति मन्दस्मितवानित्यर्थः ॥ २० ॥ अरिलक्षणमित्यनन्तरं अत इत्युपस्कार्यं ॥ २१ ॥ पत्रिणः प्रशस्तपत्रिणः । तिग्मतेजसः क्रूरतेजसः । कार्तिकेयवनोद्भूताः शरवणोद्भूताः । कङ्कपत्रप्रतिच्छन्ना इति पत्रिण इत्युक्तं विशेष्यते । महेन्द्रपदेनाशनेस्तत्सन्निहितत्वातिशय उच्यते । इमे मे शराः महावेगत्वादिविशिष्टाहि । अतः एतैः शरैर्वालिनं विनिह-

---

रामानु० लक्ष्मणः तेजोविशेषेणवासवसदृशइत्यर्थः ॥ १० ॥ स० ततः परदिने । अतोनपौनरुक्त्यं ॥ ११ ॥ रामानु० आस्तीर्येति । पुनरासनप्रदानकथनेनायंपरेद्युर्वृत्तान्तइत्यवगम्यते ॥ १३ ॥ शि० गिरिवरोत्तमे गिरिवरस्योत्तमप्रदेशे ॥ रामं ददर्शेतिशेषः ॥ १५ ॥ रामानु० अत्रद्वितीयोरामशब्दोऽभिरामवचनः । क्रियाविशेषणंवा ॥ १५—१६ ॥ स० अहमित्यादिपुनःपुनर्वचनं स्वप्रमेयदार्ढ्याय ॥ ति० अहंविनिकृतइतिपूर्वदिवसोक्तार्थस्मारणं तदर्थस्यावश्यानुष्ठेयत्वाभिप्रायेण ॥ १८ ॥ रामानु० सर्वलोकाभयंकर अतएवममाप्यभयंकर । वालिनोभयार्तस्यमेप्रसादंकर्तुमर्हसि । सखित्वेनमह्यंविशेषतःप्रसादःकर्तव्यइत्यभिप्रायः ॥ स० आपिनोभावः आपित्वं प्राप्तिरित्यर्थः । मम ममतया आपित्वमस्य तंप्रसादं । मे मत्संबन्धिनोवालिन इतिवा ॥ १९ ॥ शि० कार्तिकेयवनोद्भूताः स्कन्दोत्पत्तिभूमिकाननप्रादुर्भूतकाण्डकाः । एतेनतेषामभेद्यत्वंबोधितं । तदुद्भूतशराणामभेद्यत्वेनप्रसिद्धत्वात् ॥ २२ ॥ ति० भ्रातरं अमित्रमप्येकोदरजन्ममात्रेणतथाव्यवहृतं । पश्य द्वित्रैर्दिवसैरितिशेषः ॥२४॥

[पा०] १ क.—झ. ट. प्रियदर्शनं. ञ. प्रियदर्शनः. २ क. च. ज. ञ. स्पर्णाढ्यं. ३ क.—ट. शाखांभङ्क्त्वासुशोभनां. ४ क.—ट. रामस्यास्तीर्य. ५ च. ज. रामंतं. ६ ग. छ. झ. ट. सालपुष्पावसंकीर्णे. ७ क. ग.—ट. श्लक्ष्णयाशुभयागिरा. ८ ग. चराम्येव. ९ क. ग. ङ. च छ. झ. ञ. ट. वनेसंभ्रान्तचेतनः. १० ख. वानरोत्तमं. ११ क.—ट. वधिष्यामि. १२ च. झ. ट. महाभाग. १३ क. ज. ञ. इवपन्नगाः. १४ क.—ट. वालिसंज्ञं. १५ क.—ट. भ्रातरं.

राघवस्य वचः श्रुत्वा सुग्रीवो वाहिनीपतिः ॥ प्रहर्षमतुलं लेभे साधुसाध्विति चाब्रवीत् ॥ २५ ॥
राम शोकाभिभूतोऽहं शोकार्तानां भवान्गतिः ॥ वयस्यइति कृत्वा हि त्वय्यहं परिदेवये ॥ २६ ॥
त्वं हि पाणिप्रदानेन वयस्यो मेऽग्निसाक्षिकम् ॥ कृतः प्राणैर्बहुमतः सैत्येनापि शपामि ते ॥ २७ ॥
वयस्यइति कृत्वा च विस्रब्धं प्रवदाम्यहम् ॥ दुःखमन्तर्गतं यन्मे मनो हरति नित्यशः ॥ २८ ॥
एतावदुक्त्वा वचनं बाष्पदूषितलोचनः ॥ बाष्पोपहतया वाचा नोच्चैः शक्नोति भाषितुम् ॥ २९ ॥
बाष्पवेगं तु सहसा नदीवेगमिवागतम् ॥ धारयामास धैर्येण सुग्रीवो रामसन्निधौ ॥ ३० ॥
सन्निगृह्य तु तं बाष्पं प्रमृज्य नयने शुभे ॥ विनिःश्वस्य च तेजस्वी राघवं वाक्यमब्रवीत् ॥ ३१ ॥
पुराऽहं वालिना राम राज्यात्स्वादवरोपितः ॥ परुषाणि च संश्राव्य निर्धूतोस्मि बलीयसा ॥ ३२ ॥
हृता भार्या च मे तेन प्राणेभ्योपि गरीयसी ॥ सुहृदश्च मदीया ये संयता बन्धनेषु ते ॥ ३३ ॥
यत्नवांश्च दुरुद्दात्मा मद्विनाशाय राघव ॥ बहुशस्तत्प्रयुक्ताश्च वानरा निहता मया ॥ ३४ ॥
शङ्कया त्वेतया चेह दृष्ट्वा त्वामपि राघव ॥ नोपसर्पाम्यहं भीतो भये सर्वे हि बिभ्यति ॥ ३५ ॥
केवलं हि सहाया मे हनुमत्प्रमुखास्त्विमे ॥ अतोऽहं धारयाम्यद्य प्राणान्कृच्छ्रगतोपि सन् ॥ ३६ ॥
एते हि कपयः स्निग्धा मां रक्षन्ति समन्ततः ॥ सह गच्छन्ति गन्तव्ये तिष्ठन्ति च स्थिते ३७
सङ्क्षेपस्त्वेष ते राम किमुक्त्वा विस्तरं हि ते ॥ स मे ज्येष्ठो रिपुर्भ्राता वाली विश्रुतपौरुषः ॥ ३८ ॥
तद्विनाशाद्धि मे दुःखं प्रनष्टं स्यादनन्तरम् ॥ सुखं मे जीवितं चैव तद्विनाशनिबन्धनम् ॥ ३९ ॥

तंपश्येतिसंबन्धः ॥ २२—२४ ॥ वाहिनीपतिः वानरसेनाधिपतिः ॥ २५ ॥ वयस्य इति । वयस्य इतिचेत्यर्थः । त्वयि त्वत्समीपे ॥ २६—२८ ॥ एतावदुक्त्वा पुराहं वालिनेत्यादि वक्तुकामस्तदुपोद्घातत्वेन " दुःखमन्तर्गतं यन्मेमनो हरतिनित्यशः " इत्येतावदुक्त्वा । शक्नोति अशक्नोत् ॥ २९ ॥ रामसन्निधाविति । मांप्रत्युपदिश्य स्वयंनशक्नोतीति रामो मन्येतेति भियाधारयामासेतिभावः ॥ ३०—३१ ॥ स्वाद्राज्यात् यौवराज्यात् । निर्धूतः निरस्तः ॥ ३२ ॥ बन्धनेषु कारागृहेषु ॥ ३३—३४ ॥ एतयाशङ्कया वालिप्रयुक्तस्वशङ्कया । भीतःनोपसर्पामि नोपास्पर्शं । भये भयनिमित्ते ॥ ३५ ॥ केवलं अद्वितीयंयथातथा ॥ ३६ ॥ केवलत्वमुपपादयति—एतेहीति ॥ गन्तव्ये । मयिगच्छतीत्यर्थः ॥ ३७ ॥ संक्षेपइत्यादिद्वयं ॥

॥ २४ ॥ वि० दुःखातिशयात्पुनराह—रामेत्यादि । शोकार्तगतिलाघवस्यलाभाच्च त्वयिपरिदेवनं ॥ २६ ॥ ति० अवक्तव्यमपिवयस्यइतिकृत्वाविस्रब्धः विश्वस्तः । वदामि । हरति क्षीणंकरोति ॥ २८ ॥ रामानु० अत्रपुनश्शब्दोऽध्याहर्तव्यः । एतावदुक्त्वा वचनं " रामशोकाभिभूतोऽहं " इत्यारभ्य " मनोहरतिनित्यशः " इत्येतदन्तंवचनजातंपुनरुक्त्वा ॥ २९ ॥ स० अवरोपितः अपहृताधिकारः । परुषाणि निष्ठुरवचांसि । संश्राव्य श्रावयित्वा । निर्धूतोस्मि ॥ ३२ ॥ रामानु० बन्धनेषु बध्यतेऽस्मिन्निति बन्धनंकारागारं ॥ ३३ ॥ रामानु० परमकारुणिकंलक्ष्मणमपि ॥ ति० भये यत्किंचिद्भयप्राप्तौ । बिभ्यति सर्वतएवेतिशेषः ॥ ३५ ॥ शि० षः मद्वधविषयकयत्नवान् । अतएवरिपुः । वाली अस्तीतिशेषः ॥ ३८ ॥ रामानु० सख्यकरणादिना लब्धमपिसुखादिकंनलब्धप्रायमितिभावः ॥ ति० यद्यपिभ्रातृनाशोदुःखाय । तथाप्यनन्तरं संप्रतिविद्यमानंमेदुःखं तद्विनाशेएवप्रनष्टंस्यात् ।

[पा०] १ घ. वानराधिपः. २ ख. शोकाभितप्तोहं. ३ क. ख. ङ.—ज. ञ. साक्षिकः. ४ क. ग. घ. ज. ञ. प्राणैःप्रियतमः. ५ क. ग. ङ.—ट. सत्येनवशपाम्यहं. ख. घ. सत्येनापिशपाम्यहं. ६ ख.—ट. विस्रब्धः. ७ ङ. छ.—ट. तन्मे. ८ क. ख. दहति. ९ ग. ङ. छ.—ट. बाष्पवूषितया. १० ख. नचशक्नोऽभिभाषितुं. ११ क. ख. ग. पुनरब्रवीत्. ङ.—ट. पुनरुचिवान्. १२ क. ग. बहवः. १३ घ. सदोषताः. १४ झ. चास्थिते. १५ क. ङ. छ. ज. झ. ट. मेराम. १६ ख. बहुविस्तरैः. १७ छ. झ. ट. तद्विनाशेपि. ङ. च. ज. ञ. तद्विनाशेन. १८ ज. ञ. दनन्तकं.

एष मे राम शोकान्तः शोकार्तेन निवेदितः ॥ दुःखितः सुखितो वाऽपि सख्युर्नित्यं सखा गतिः॥४०॥
श्रुत्वैतद्वचनं रामः सुग्रीवमिदमब्रवीत् ॥ किंनिमित्तमभूद्वैरं श्रोतुमिच्छामि तत्त्वतः ॥ ४१ ॥
सुखं हि कारणं श्रुत्वा वैरस्य तव वानर ॥ आनन्तर्यं विधास्यामि संप्रधार्य बलाबलम् ॥ ४२ ॥
बलवान्हि ममामर्षः श्रुत्वा त्वामवमानितम् ॥ वर्धते हृदयोत्कम्पी प्रावृड्वेग इवाम्भसः ॥ ४३ ॥
हृष्टः कथय विस्रब्धो यावदारोप्यते धनुः ॥ सृष्टश्च हि मया बाणो निरस्तश्च रिपुस्तव ॥ ४४ ॥
एवमुक्तस्तु सुग्रीवः काकुत्स्थेन महात्मना ॥ प्रहर्षमतुलं लेभे चतुर्भिः सह वानरैः ॥ ४५ ॥
ततः प्रहृष्टवदनः सुग्रीवो लक्ष्मणाग्रजे ॥ वैरस्य कारणं तत्त्वमाख्यातुमुपचक्रमे ॥ ४६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे अष्टमः सर्गः ॥ ८ ॥

नवमः सर्गः ॥ ९ ॥

दुन्दुभेरग्रजेन मायाविनाऽऽत्मसमेन वालिमित्तकवैरादर्पेणाऽऽकिष्किन्धामेत्य युद्धाय वालिनःसमाह्वानम् ॥ १ ॥ किष्किन्धातो निर्गतयोर्वालिसुग्रीवयोरवलोकनेन भयाद्गुहांप्रविष्टेमायाविति वालिना सुग्रीवंप्रति स्वागमनमावधि गुहामुखेऽवस्थानविनियोजनपूर्वकमसुरवधाय गुहाप्रवेशः ॥ २ ॥ वत्सरान्ते बालागमनप्रतीक्षया गुहाद्वारिस्थिता तावद्यावधि तदागमनमपश्यता पश्यताच गुहासुखात्सफेनरुधिरधारानिस्सरणमुपश्रुण्वताचासुरकण्ठकोलाहलं सुग्रीवेण वालिनोनिर्धननिर्धारणेन महताशिलया बिलद्वारपिधानेन तत्रैव जलदानपूर्वकं किष्किन्धाप्रवेशः ॥ ३ ॥ बलाच्चास्मिन्नीराज्येऽभिषेचितेन सुग्रीवेण रिपुहननपूर्वकं प्रत्यागतवतः कोपाद्भर्त्सयतोवालिनःप्रसादनाय तदभिवादनम् ॥ ४ ॥

[श्रूयेतां राम यद्वृत्तमादितःप्रभृति त्वया ॥ यथा वैरं समुद्भूतं यथा चाहं निराकृतः] ॥ १ ॥

तद्विनाशादनन्तरं मे दुःखं प्रनष्टं स्यात् । मेसुखं मे-जीवितं चैव तद्विनाशनिबन्धनमित्येवसङ्क्षेपइत्यन्वयः ॥ ३८—४१ ॥ तव वैरस्य कारणं श्रुत्वा बलाबलं संप्रधार्य वैरकारणं वा वैरं वा बलवदिति विचार्य । आनन्तर्यम् अनन्तरम् । स्वार्थे ष्यञ् । तव सुखं विधास्यामि । स्वल्पापराधेप्रबलवैरंतेनकृतंचेत्तमप्येव हत्वा तवसुखंविधास्यामि । अनल्पापराधेस्वल्पवैरंचेत्समाधानमुखेन सुखं विधास्यामीतिभावः ॥ ४२ ॥ अपराधस्वल्पत्वपक्ष आह—बलवानिति ॥ प्रावृषि वेगः प्रावृड्वेगः ॥ ४३ ॥ वालिवैरस्वल्पत्व आह—हृष्ट इति ॥ हृष्टइत्यनेन वालिहननानन्तरं शोकं माकुर्वित्यर्थः । क्रमेण तत्काले वक्ष्यत इत्याह—सृष्ट इति । यदा बाणो विसृष्टस्तदैव रिपुर्नष्ट इत्येवेहीत्यर्थः ॥४४—४५॥ लक्ष्मणाग्रज इति निमित्तसप्तमी । तन्निमित्तमित्यर्थः ॥ ४६ ॥ श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने अष्टमः सर्गः ॥ ८ ॥

अपिरेवार्थे । तदेवाह—सुखमिति ॥ ३९ ॥ स० वैरं उभयोरितिशेषः ॥४१॥ रामानु० संप्रधार्य बलाबलंगुणदोषौविचार्य । आनन्तर्यं अनन्तरप्राप्तकर्म । तवसुखंयथाभवतितथा विधास्यामिहि विधास्याम्येव । गर्हितमगर्हितंवा तवाभिमतंकरिष्याम्येवेत्यर्थः ॥ ति० तवतेनवैरस्यकारणंश्रुत्वा उभयोर्बलाबलंचश्रुत्वा आनन्तर्यात् तदनन्तरोत्पन्नविमर्शात् । संप्रधार्य निश्चित्य हि निश्चयेन । तवसुखं त्वत्सुखसाधनंवालिवधं । विधास्यामि ॥ ४२ ॥ शि० अवमानितंश्रुत्वेत्यनेन तदपराधाभावेतंनहन्तास्मीति व्यञ्जितं । तेनरामस्यमर्यादापालकत्वंव्यङ्क्तं । अमर्षोवर्धतइत्यनेन कोपोद्गममन्तरावधस्याशक्यत्वंसूचितं ॥ ४३ ॥ ति० यावदारोप्यते आरोपयिष्यामि । सृष्टः विसृष्टः । रिपुर्निरस्तश्च । समुच्चयालङ्कारः व्यञ्जयातिशयोक्तिश्च ॥ ४४ ॥ स० विरसस्यभावः वैरं तत्कारणं वैरस्यतत्कारणंचेतिवा ॥ ४६ ॥ इत्यष्टमःसर्गः ॥ ८ ॥

[पा०] १ घ. एवरामसशोकान्तः. ख. ग. एवमेरामशोकान्मिः. २ क. ग. घ. दुःखितोऽदुःखितो. ३ क. ग. ङ. छ—ट. श्रुत्वैतद्वचनो. ४ ङ. छ.—ट. आनन्तर्याद्विधास्यामि. ५ ख. बलवान्वै. ६ क. घ.—ट. वर्धते. ७ क. घ. ज. ञ. सृष्टश्चेद्धि. ८ ख. तस्मादारोप्यतां. ९ अयंश्लोकः घ. पाठे दृश्यते.

वाली नाम मम भ्राता ज्येष्ठः शत्रुनिषूदनः ॥ पितुर्बहुमतो नित्यं ममापि च तथा पुरा ॥ २ ॥
पितर्युपरतेऽस्माकं ज्येष्ठोऽयमिति मन्त्रिभिः ॥ कपीनामीश्वरो राज्ये कृतः परमसंमतः ॥ ३ ॥
राज्यं प्रशासतस्तस्य पितृपैतामहं महत् ॥ अहं सर्वेषु कालेषु प्रणतः प्रेष्यवत्स्थितः ॥ ४ ॥
मायावी नाम तेजस्वी पूर्वजो दुन्दुभेः सुतः ॥ तेन तस्य महद्वैरं स्त्रीकृतं विश्रुतं पुरा ॥ ५ ॥
स तु सुप्तजने रात्रौ किष्किन्धाद्वारमागतः ॥ नर्दति स्म सुसंरब्धो वालिनं चाह्वयद्रणे ॥ ६ ॥
प्रसुप्तस्तु मम भ्राता नर्दितं भैरवस्वनम् ॥ श्रुत्वा न ममृषे वाली निष्पपात जवात्तदा ॥ ७ ॥
स तु वै निःसृतः क्रोधात्तं हन्तुमसुरोत्तमम् ॥ वार्यमाणस्ततः स्त्रीभिर्मया च प्रणतात्मना ॥ ८ ॥
स तु निर्धूय सर्वान्नो निर्जगाम महाबलः ॥ ततोऽहमपि सौहार्दान्निःसृतो वालिना सह ॥ ९ ॥
स तु मे भ्रातरं दृष्ट्वा मां च दूरादवस्थितम् ॥ असुरो जातसंत्रासः प्रदुद्राव ततो भृशम् ॥ १० ॥
तस्मिन्द्रवति संत्रस्ते ह्यावां द्रुततरं गतौ ॥ प्रकाशश्च कृतो मार्गश्चन्द्रेणोद्गच्छता तदा ॥ ११ ॥
स तृणैरावृतं दुर्गं धरण्या विवरं महत् ॥ प्रविवेशासुरो वेगादावामासाद्य विष्ठितौ ॥ १२ ॥
तं प्रविष्टं रिपुं दृष्ट्वा बिलं रोषवशं गतः ॥ मामुवाच तदा वाली वचनं क्षुभितेन्द्रियः ॥ १३ ॥
इह त्वं तिष्ठ सुग्रीव बिलद्वारि समाहितः ॥ यावत्तत्र प्रविश्याहं निहन्मि सहसा रिपुम् ॥ १४ ॥
मया त्वेतद्वचः श्रुत्वा याचितः स परंतपः ॥ शापयित्वा तु मां पद्भ्यां प्रविवेश बिलं महत् ॥ १५ ॥
तस्य प्रविष्टस्य बिलं साग्रः संवत्सरो गतः ॥ स्थितस्य च मम द्वारि स कालो व्यत्यवर्तत ॥ १६ ॥
अहं तु नष्टं ज्ञात्वा तं स्नेहादागतसंभ्रमः ॥ भ्रातरं न च पश्यामि पापाशङ्कि च मे मनः ॥ १७ ॥

अथ वाल्यपराधवृत्तान्तो नवमे । वालीनामेत्यादिषड्विंशतिश्लोकाः ॥१–२॥ अयं ज्येष्ठः अतः कपीनामीश्वरइति राज्ये कृतः स्थापितः ॥ ३ ॥ पितृपैतामहं स्वपितुः ऋक्षरजसः पित्राब्रह्मणातस्मैदत्तत्वात् ॥ ४ ॥ दुन्दुभेः पूर्वजः अग्रजः । सुतः मयस्येति शेषः । वक्ष्यत्युत्तरकाण्डे मयः "मायावी प्रथमस्तात दुन्दुभिस्तदनन्तरः" इति । तेन मायाविना । तस्य वालिनः । स्त्रीकृतं स्त्रीनिमित्तं । महद्वैरमस्तीति पुरा विश्रुतं ॥ ५ ॥ सुप्तजने सुप्तः जनोयस्मिन्नात्र्यंशे स सुप्तजनः । अर्धरात्र इत्यर्थः ॥ ६ ॥ भैरवस्वनं भैरवस्वनरूपं । नर्दितं गर्दितं ॥७—१०॥ उद्गच्छता उदयमानेन ॥ ११ ॥ आसाद्य बिलद्वारमिति शेषः ॥ १२—१४ ॥ याचितः सहप्रवेशनमिति शेषः । पद्भ्यां स्वपदाभ्यां । "श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः" इतिचतुर्थी ॥ १५ ॥ तस्यप्रविष्टस्य तस्मिन्प्रविष्टे । साग्रः संपूर्णः । स कालः संवत्सरः । ममापि संवत्सरो गत इत्यर्थः ॥ १६ ॥ अहंतंनष्टं ज्ञात्वा साग्रसंवत्सरमदृष्टंबुद्ध्वा । स्नेहादागतसंभ्रमो-

ति० पितुः क्षेत्रिण । मात्रैक्याच्चभ्रातृत्वंभीमार्जुनादिवत् ॥ स०पुरा कलहात् ॥२॥ ति०पितृपैतामहं आर्षत्वादुत्तरपदवृद्धिः ॥४॥ ति० मायावीत्यन्वर्थनाम । पूर्वजः ज्येष्ठः । स्त्रीकृतं स्त्रीनिमित्तं । अयमितिहासः क्वचित्पुराणेशोधनीयोबहुदर्शिभिः ॥५॥ ति० तृणैरावृतं छन्नं । विवरं बिलं । आसाद्य प्राप्य । विष्ठितौ स्थितौ ॥ १२ ॥ स० क्षुभितेन्द्रियः परिवृत्तनेत्रादिः ॥ १३ ॥ ती० याचितः वालिनासहबिलप्रवेशनमितिशेषः । शापयित्वातुमांपद्भ्यामिति बिलद्वार्येवतिष्ठामिनानुव्रजामीतिस्वपादस्पर्शनपूर्वकंशपथंमयाकारयित्वेत्यर्थः ॥१५॥ स० पापशङ्कि पापजन्यमरणशङ्कि । शि० पापशङ्कि पापात् पापिनोमायाविनः शङ्कते स्वभ्रातृकर्मकवधंसंभावयतितच्छीलं । मेमनोजातमितिशेषः । अतएव तंभ्रातरंनष्टं हिंसितंज्ञात्वा स्नेहात् तद्विषयकातिप्रीतेर्हेतोः ।

[पा०] १ क. ग. शत्रुनिबर्हणः. ख. शक्रनिषूदनः. २ क. ग. ङ. च. छ. झ. ञ. ट. ममचापि. ३ छ. झ. ट. रतेतस्मिन्. ४ ङ. परमसत्तमः. ५ झ. ट. वालिनःस्त्रीकृतंपुरा. ६ झ. ट. सुप्तेजने. ७ ङ. झ. ञ. ट. नर्दतो. ८ ख. निर्गतः. ९ क. ग. ङ.—ट. तास्सर्वानिर्जगाम. १० ग. ङ.—ट. तदा. ११ छ. झ. ट. प्रकाशोपि. क. ङ. प्रकाशोहि. १२ ज. तिष्ठतौ. १३ ख. घ. ङ. च. ज.—ट. ततो. १४ घ.—ट. तिष्ठाद्य. १५ क. ग. ङ.—ट. यावदत्र. १६ क. ख. ङ.—ट. समरे. १७ छ.—ट. समां. ख. ङ. चमां. १८ ङ.—ट. ततः. १९ छ. झ. ट. बिलद्वारि. २० ख. घ. ज. कालोप्यत्यवर्तत. २१ क. ङ. छ.—ट. तंज्ञात्वा. २२ क. ग. ङ. छ.—ट. नप्रपश्यामि. ख. नहिपश्यामि. घ. तुनपश्यामि.

अथ दीर्घस्य कालस्य विलात्तस्माद्विनिःसृतम् ॥ सफेनं रुधिरं रक्तमहं दृष्ट्वा सुदुःखितः ॥ १८ ॥
नर्दतामसुराणां च ध्वनिर्मे श्रोत्रमागतः ॥ निरस्तस्य च संग्रामे क्रोशतो निःस्वनो गुरोः ॥ १९ ॥
अहं त्ववगतो बुद्ध्या चिह्नैस्तैर्भ्रातरं हतम् ॥ पिधाय च बिलद्वारं शिलया गिरिमात्रया ॥
शोकार्तश्चोदकं कृत्वा किष्किन्धामागतः सखे ॥ २० ॥
गूहमानस्य मे तत्त्वं यत्नतो मन्त्रिभिः श्रुतम् ॥ ततोऽहं तैः समागम्य सम्मतैरभिषेचितः ॥ २१ ॥
राज्यं प्रशासतस्तस्य न्यायतो मम राघव ॥ आजगाम रिपुं हत्वा वाली तमसुरोत्तमम् ॥ २२ ॥
अभिषिक्तं तु मां दृष्ट्वा वाली संरक्तलोचनः ॥ मदीयान्मन्त्रिणो बद्ध्वा परुषंवाक्यमब्रवीत् ॥ २३ ॥
निग्रहेऽपि समर्थस्य तं पापं प्रति राघव ॥ न प्रावर्तत मे बुद्धिर्भ्रातृगौरवयन्त्रिता ॥ २४ ॥
हत्वा शत्रुं स मे भ्राता प्रविवेश पुरं तदा ॥ मानयंस्तं महात्मानं यथावच्चाभ्यवादयम् ॥ २५ ॥
उक्तश्च नाशिषस्तेन संतुष्टेनान्तरात्मना ॥ २६ ॥
नत्वा पादावहं तस्य मुकुटेनास्पृशं प्रभो ॥ अपि वाली मम क्रोधान्न प्रसादं चकार सः ॥ २७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे नवमः सर्गः ॥ ९ ॥

ऽभवं । भ्रातरं च न पश्यामि नापश्यं । ततः मे मनः । पापाशङ्कि सम्मरणाशङ्कि जातं ॥ १७ ॥ रक्तं रक्तवर्णं ॥ १८—१९ ॥ चिह्नैः मरणकालिकस्वरैः ॥ २० ॥ तत्त्वं यथार्थं । वालिमरणं गूहमानस्य प्रच्छादयतः । मे मन्त्रिणः । यत्नतः बहुयत्नेन । स्वविषयशापादिना श्रुतमासीत् ॥ २१—२३ ॥ पापं अज्ञानकृतमिति सान्त्वनेपि धिक्करणात् पापिष्ठं । तं प्रति निग्रहेसमर्थस्य प्रकृतिबलसंपन्नत्वादिति भावः । यन्त्रिता नियमिता ॥ २४ ॥ प्रविवेश पुरमित्युक्तया मन्त्रिबन्धनादिकं पुराद्बहिरिति ज्ञेयं ॥ २५—२६ ॥ मम क्रोधात् मयि कोपात् ॥ २७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने नवमः सर्गः ॥ ९ ॥

अगतसंभ्रमः प्राप्तोद्वेगः आसमिति शेषः ॥ १७ ॥ वि० संग्रामेरतस्य निरतस्य । क्रोशतोपिगुरोःस्वनोनश्रोत्रमागतइत्यनुकर्षः ॥ १९ ॥ ती० गिरिमात्रया पर्वतप्रमाणया ॥ ति० चिह्नैः बिलद्वारिरथिरनिस्सरणासुरीयसंग्रामक्रोशनादिभिः । भ्रातरंहतं अवगतः ज्ञातवान् । पिधाय राक्षसनिर्गमशङ्कया ॥ स० अहंअवगतः कर्तरिक्तः ज्ञातवान् । गिरिमात्रया गिरिप्रमाणया । यद्यपि "टिड्ढाण—" इत्यादिनाङापोपवादकेनङीपाभवितव्यं । तथाप्यार्षत्वाट्टाप् । यद्वा नायंमात्रच्प्रत्ययः । किंतु "मात्रापरिच्छदे" इत्यमरोक्तेः परिमाणवाचीमात्राशब्दः । अतोनपूर्वोक्तदोषः ॥ २० ॥ शि० तत्त्वं वालिवधं । यत्नतः अनेकविधोपायैः । गूहमानस्य शब्दाकर्षणादिशङ्कयागोप्यमानस्य । मेमन्त्रिभिः अमात्यैः । श्रुतं तेषांसंनिधौमयाकथितमित्यर्थः । ततः तस्माद्धेतोः । समेतैः तैर्मन्त्रिभिः अहमभिषेचितः ॥ २१ ॥ शि० निग्रहे तत्परुषवाक्यादिनिरोधे ॥ स० मेममनिग्रहेसमर्थस्यापिवालिनः तंपापंप्रति तादृशीबुद्धिर्नप्रावर्तत । तत्रहेतुः भ्रातृगौरवेत्यादि । भ्राता ज्येष्ठभ्राताऽहं किंकनिष्ठभ्रातृबन्धनेनेतिभ्रातृगौरवयन्त्रितासती नप्रावर्तत । एतेनसुग्रीवस्यवालिनिग्रहेसामर्थ्याभावात्कथंनिग्रहेचसमर्थस्येतिवचनमितिशङ्कापरास्ता ॥ २४ ॥ ति० उक्तानुवादपूर्वमवशिष्टव्यापारकथनं हत्वेत्यादि ॥ २५ ॥ ति० अपि तथापीत्यर्थः ॥ २७ ॥ इतिनवमःसर्गः ॥ ९ ॥

[पा०] १ छ. झ. ट. दृष्ट्वातोहंसृगद्रुःखितः. २ छ. झ. ञ. नरतस्यच. ३ ख. घ. च.—ट. क्रोशतोपिखनो. ४ ख. गतं. ५ क. ङ.—ट. समेतैरभि. ६ ङ. च. ज. ञ. न्यायेन. ७ क. ग. ङ. छ. झ. ञ. ट. दानवंसतुवानरः. ८ क.—ङ. झ. ञ. ट. क्रोधात्संरक्त. ९ ग. ङ. छ. झ. ञ. ट. निग्रहेच. १० ङ. समर्थेहि. ११ क.—ट. भ्रातृगौरव. १२ ङ.—म. नोक्तममाशिषस्तेन. च. ज. नोक्तमेचाशिषस्तेन. १३ छ. झ. ट. प्रहृष्टेन. १४ क. ग. राममम.

दशमः सर्गः ॥ १० ॥

सुग्रीवेण बालिनंप्रति राज्येस्वाभिषेचनस्य अमात्यमन्त्रिकृतत्वनिवेदनपूर्वकं पुनाराज्यप्रत्यर्पणोक्त्या सम्प्रणामं क्षमापणम् ॥ १ ॥ बालिना पौराद्यानयनेन तेषु स्वकृतबन्धुवधदुःखात्तामिधानपूर्वकं सुग्रीवदोषारोपणेन क्रोधाक्षस्य नगराद्विर्वासनम् ॥ २ ॥ एवं सुग्रीवेणोभयोर्वैरकारणंनिवेदितेनरामेण तंप्रति बालिवधप्रतिज्ञानेन समाश्वासनम् ॥ ३ ॥

ततः क्रोधसमाविष्टं संरब्धं तमुपागतम् ॥ अहं प्रसादयांचक्रे भ्रातरं प्रियकाम्यया ॥ १ ॥
दिष्ट्याऽसि कुशली प्राप्तो निहतश्च त्वया रिपुः ॥ अनाथस्य हि मे नाथस्त्वमेकोऽनाथनन्दनः ॥२॥
इदं बहुशलाकं ते पूर्णचन्द्रमिवोदितम् ॥ छत्रं सवालव्यजनं प्रतीच्छस्व मयोद्यतम् ॥ ३ ॥
आर्तश्चाथ बिलद्वारि स्थितः संवत्सरं नृप ॥ दृष्ट्वाऽहं शोणितं द्वारि बिलाच्चापि समुत्थितम् ॥ ४ ॥
शोककसंविग्नहृदयो भृशं व्याकुलितेन्द्रियः ॥ अपिधाय बिलद्वारं शैलेशृङ्गेण तत्तथा ॥
तस्मादेशादपाक्रम्य किष्किन्धां प्राविशं पुनः ॥ ५ ॥
विषादाच्चिह मां दृष्ट्वा पौरैर्मन्त्रिभिरेव च ॥ अभिषिक्तो न कामेन तन्मे त्वं क्षन्तुमर्हसि ॥ ६ ॥
त्वमेव राजा मानार्हः सदा चाहं यथापुरम् ॥ राजभावनियोगोऽयं मया त्वद्विरहात्कृतः ॥ ७ ॥
सामात्यपौरनगरं स्थितं निहतकण्टकम् ॥ न्यासभूतमिदं राज्यं तव निर्यातयाम्यहम् ॥ ८ ॥
मा च रोषं कृथाः सौम्य मयि शत्रुनिबर्हण ॥ याचे त्वां शिरसा राजन्मया बद्धोऽयमञ्जलिः ॥९॥
बलादस्मि समागम्य मन्त्रिभिः पुरवासिभिः ॥ राजभावे नियुक्तोऽहं शून्यदेशजिगीषया ॥ १० ॥
स्निग्धमेवं ब्रुवाणं मां स तु निर्भर्त्स्य वानरः ॥ धिक्त्वामिति च मामुक्त्वा बहु तत्तदुवाच ह ॥११॥

अथबालिदोषदर्शनेनरामस्य दृढतरबालिवधप्रतिज्ञा दशमे—तत इत्यादि ॥ १ ॥ अनाथान् नन्दयतीत्यनाथनन्दनः ॥ २ ॥ उद्यतं अर्पितं । प्रतीच्छस्व प्रतीच्छ ॥ ३ ॥ संवत्सरं बिलद्वारिस्थितः । अहं च बिलद्वारिसमुत्थितंशोणितंदृष्ट्वा आर्तश्चास्मि ॥४॥ शोकसंविग्नहृदयः शोककम्पितहृदयः । तद्बिलद्वारं तथा त्वयादृष्टप्रकारेण । अपिधाय प्रच्छाद्य । प्राविशं ॥५॥ इह विषादादागतं मां दृष्ट्वा । विषादात् राज्यनाशविषादात् ॥ ६ ॥ अहं यथापुरं पूर्ववद्युवराजोभवामीत्यर्थः । राजभावनियोगः राजत्वेन राज्यशासनं ॥ ७—९ ॥ शून्यदेशजिगीषया राजशून्यदेशवशीकरणेच्छया ॥ १० ॥ तत् परुषभाषणं । अस्त्री-

---

शि० क्रोधेनसमाविष्टं संयुक्तं । अतएवसंरब्धं क्रोधसूचकचेष्टावन्तं । हितकाम्यया स्वकल्याणकाङ्क्षया । अहंप्रसादयांचक्रे ॥१॥ स० दिष्ट्येति प्राप्तेनेव निहतेनाप्यन्वेति ॥ २ ॥ ति० राजभावे राज्ये । अयंममनियोगः मन्त्रिभिस्त्वद्विरहात्कृतः । अमात्यपौरसहितंनगरं निहतकण्टकं अराजलप्रयुक्तदोषरहितं । कर्तुमितिशेषः । तत्त्वेदंत्वदीयराज्यं मयिन्यासभूतंस्थितं । अहंतवनिर्यातयामिप्रत्यर्पयामि । मारोषंकृथाइत्यन्वयः ॥ ७—८ ॥ रामानु० शून्यदेशजिगीषया देशस्यराजशून्यत्वापनिनीषयेत्यर्थः ॥ वि० शून्यदेशस्यराजहीनदेशस्यापरेषांजिगीषातया तन्निवृत्तिहेतुना । " मशकार्थोधूमः" इतिवदयंप्रयोगः ॥ शून्यदेशजिगीषया । शून्येतिभावप्रधानं । शून्यत्वंददतीतिशून्यदाः तेषांतेदेशाश्चद्विषन्तोराजानः तज्जिगीषया तज्जयेच्छया । यद्वा शून्योदेशइतियाजिगीषा प्राप्तीच्छातया । शिरश्चप्राप्त्यर्थकोधनजितइत्यादिवत् । स्निग्धं स्नेहपूर्वं ॥ शि० शून्यदेशजिगीषया राज-

[पा०] १ ङ. च. ज. ञ. क्रोधसमायुक्तं. २ छ.—ट. हितकाम्यया. ३ ज. कुशलं. ४ ङ. ब. दिष्ट्यासंनिहतोरिपुः. च. ज. दिष्ट्याचनिहतोरिपुः. ५ छ. झ. ब. ट. मयाधृतं. ६ झ. आर्तस्तस्य. ङ.—ज. ब. ट. आर्तस्तत्र. ७ क. ख. ग. ङ.—ट. दृष्ट्वाच. ८ ख. शोकसंरुद्धनयनो. ९ क. पिधायच. १० ग. गिरिशृङ्गेण. ११ क. ख. ङ.—ट. ततदा. १२ ङ.—ट. संतुलमर्हसि. १३ क.—ङ. छ.—ट. यथापुरा. १४ ङ. छ.—ट. राजभावे. १५ ङ. छ.—ट. मम. १६ क. च. छ. झ. ट. ममशत्रुनिषूदन. १७ क. ङ.—ट. विनिर्भर्त्स्य. १८ ङ. बहुनाततदुवाचह.

प्रकृतीश्च समानीय मन्त्रिणश्चैव संमतान् ॥ मामाह सुहृदां मध्ये वाक्यं परमगर्हितम् ॥ १२ ॥
विदितं वो यथा रात्रौ मायावी स महासुरः ॥ मां समाह्वयत क्रूरो युद्धकाङ्क्षी सुदुर्मतिः ॥ १३ ॥
तस्य तद्वचनं श्रुत्वा निःसृतोहं नृपालयात् ॥ अनुयातश्च मां तूर्णमयं भ्राता सुदारुणः ॥ १४ ॥
स तु दृष्ट्वैव मां रात्रौ सद्वितीयं महाबलः ॥ प्राद्रवद्भयसंत्रस्तो वीक्ष्यावां समनुद्रुतौ ॥ १५ ॥
अनुद्रुतश्च वेगेन प्रविवेश महाबिलम् ॥ १६ ॥
तं प्रविष्टं विदित्वा तु सुघोरं सुमहद्बिलम् ॥ अयमुक्तोथ मे भ्राता मया तु क्रूरदर्शनः ॥ १७ ॥
अहत्वा नास्ति मे शक्तिः प्रतिगन्तुमितः पुरीम् ॥ बिलद्वारि प्रतीक्ष त्वं यावदेनं निहन्म्यहम् ॥ १८ ॥
स्थितोयमिति मत्वा तु प्रविष्टोहं दुरासदम् ॥ तं च मे मार्गमाणस्य गतः संवत्सरस्तदा ॥ १९ ॥
स तु दृष्टो मया शत्रुरनिर्वेदाद्भयावहः ॥ निहतश्च मया तत्र सोसुरो बन्धुभिः सह ॥ २० ॥
तस्यास्तु प्रवृत्तेन रुधिरौघेण तद्बिलम् ॥ पूर्णमासीद्दुराक्रामं स्तनतस्तस्य भूतले ॥ २१ ॥
सूदयित्वा तु तं शत्रुं विक्रान्तं दुन्दुभेः सुतम् ॥ निष्क्रामन्नैव पश्यामि बिलस्य पिहितं मुखम् ॥ २२ ॥
विक्रोशमानस्य तु मे सुग्रीवेति पुनः पुनः ॥ यदा प्रतिवचो नास्ति ततोऽहं भृशदुःखितः ॥ २३ ॥
पादप्रहारैस्तु मया बन्धुभिस्तद्विदारितम् ॥ ततोऽहं तेन निष्क्रम्य पथा पुरमुपागतः ॥ २४ ॥
अनेनानेन संरुद्धो राज्यं प्रार्थयताऽऽत्मनः ॥ सुग्रीवेण नृशंसेन विस्मृत्य भ्रातृसौहृदम् ॥ २५ ॥
एवमुक्त्वा तु मां तत्र वस्त्रेणैकेन वानरः ॥ निर्वासयामास तदा वाली विगतसाध्वसः ॥ २६ ॥
तेनाहमपविद्धश्च हृतदारश्च राघव ॥ तद्भयाच्च महीं कृत्स्नां क्रान्तेयं सवनार्णवा ॥ २७ ॥

लतया विशिष्य नोक्तं ॥ ११ ॥ प्रकृतीरिति मामुद्दिश्य प्रकृत्यादीनाहेत्यर्थः ॥ १२—१९ ॥ अनिर्वेदात् अक्लेशात् ॥२०॥ भूतले भूविवरे । स्तनतः गर्जतः । तत् पूर्वोक्तं । तस्य बिलं स्तनतः तस्य आस्यात्प्रवृत्तेन रुधिरौघेण पूर्णसन् दुराक्रममासीदितियोजना ॥ २१ ॥ दुन्दुभेः सुतं भ्रातरमित्यर्थः । यद्वा नायं मायावी मयपुत्रः किंतु दुन्दुभिपुत्रोऽन्यइति बोध्यम् । "पूर्वजो दुन्दुभेःसुतः"इतिहिपूर्वमप्युक्तं । पिहितमिति हेतुगर्भं । पिहितत्वान्मुखं न पश्यामि ॥ २२ ॥ विक्रोशमानस्य आह्वयतः । "क्रुश आह्वाने रोदने च" इति धातुः ॥ २३ ॥ तत् बिलं । विदारितं कथिंत्सरन्ध्रीकृतं । तेनपथा रन्ध्रमार्गेण ॥ २४ ॥ अत्र बिले ॥ २५—२६ ॥ अप-

---

रहितदेशकर्तृकोत्कर्षप्राप्तीच्छया । अस्याक्रमणनिवारणमेवार्थः ॥ १० ॥ ति० आपुरा युद्धाकाङ्क्षातिपूरकेणमया युद्धाकाङ्क्षी महासुरःमायावी मांसमाह्वयत । तत् वोयुष्माकंविदितं ॥ १३ ॥ शि० दुरासदं असुरातिरिक्तैःप्रवेष्टुमशक्यंविवरे । अहंप्रविष्टः ॥ १५ ॥ रामानु० भूतले भुवोऽधस्तले । " अधस्तलरूपयोरस्रीतलं"इत्यमरः । तत् प्रसिद्धं ॥ २१ ॥ ती० अत्रैकस्मच्छब्दःप्रसिद्धपरः ॥२२॥ स० "प्रावां"इतियोगविभागा"द्रादूतेच" इत्यादेर्वैकल्पिकत्वेननसुप्रीवेत्यत्रप्रतिसंप्रयुक्तप्रकृतिभावः ॥ नास्ति नासीत् ॥ २३ ॥ ती० यथाशब्दोवाक्यालङ्कारे ॥ २४ ॥ शि० सर्वांमहींक्रान्तवान् अस्मीतिशेषः । एतेन

[पा०] १ ङ. कुद्धो. २ क. छ. झ. ट. युद्धाकाङ्क्षी. ३ क. ख. छ. झ. ट. तदापुरा. ४ क. ख. छ. झ. ट. तद्भावितं. घ. ङ. च. ज. ञ. तद्भाजितं. ५ ग. तूर्णभ्रातास्रोष. ६ ङ.—ट. समुपागतौ. ख. ग. घ. समनुद्रुतौ. क. समभिद्रुतौ. ७ क. ङ.—ट. अभिद्रुतस्तु. ८ क. ङ.—ट. विवेशसमहाबिलं. ९ ङ.—ट. मत्राहंप्रविष्टस्तु. १० क. ख. छ. झ. ञ. ट. तंमेमार्गयतस्तत्र. ११ ङ.—ट. मयासहःससर्वैःसहबन्धुभिः. १२ छ. झ. तस्यैवच. १३ क. ङ. छ. झ. ट. विक्रान्तंतमहंबुधं. च. ज. विक्रामन्तंमहासुरं. ख. ग. बलिनंदुन्दुभेः. ङ. ञ. विक्रान्तंचमहासुरं. १४ च.—ट. निष्क्रामन्नेह. १५ ख. क. छ. झ. ट. यतः. १६ ग. ङ. च. ज. ञ. बहुशस्तद्विदारितं. क. ख. बहुभिस्तविदारितः. छ. झ. ट. बहुभिःपरिपातितं. १७ ख. यस्मात्. च. यथा. १८ ख.—च. ज. ञ. पुनरुपागतः. क. पुनरिहागतः. १९ क. ख. घ.—ट. तत्रानेन. २० छ. झ. ट. मृगयतात्मनः. घ. ङ. च. ज. ञ. मार्गयतात्मनः. २१ क. ङ.—ट. तदानिर्वासयामास. २२ छ. झ. ट. महींसर्वांक्रान्तवान्सवनार्णवां. ङ. च. ञ. महीसर्वां.

ऋश्यमूकं गिरिवरं भार्याहरणदुःखितः ॥ प्रविष्टोस्मि दुराधर्षं वालिनः कारणान्तरे ॥ २८ ॥
एतत्ते सर्वमाख्यातं वैरानुकथनं महत् ॥ अनागसा मया प्राप्तं व्यसनं पश्य राघव ॥ २९ ॥
वालिनस्तु भयार्तस्य सर्वलोकाभयंकर ॥ कर्तुमर्हसि मे वीर प्रसादं तस्य निग्रहात् ॥ ३० ॥
एवमुक्तस्तु तेजस्वी धर्मज्ञो धर्मसंहितम् ॥ वचनं वक्तुमारेभे सुग्रीवं प्रहसन्निव ॥ ३१ ॥
अमोघाः सूर्यसंकाशा ममैते निशिताः शराः ॥ तस्मिन्वालिनि दुर्वृत्ते निपतिष्यन्ति वेगिताः ॥ ३२ ॥
यावत्तं नाभिपश्यामि तव भार्यापहारिणम् ॥ तावत्स जीवेत्पापात्मा वाली चारित्रदूषकः ॥ ३३ ॥
आत्मानुमानात्पश्यामि मग्नं त्वां शोकसागरे ॥ त्वामहं तारयिष्यामि कामं प्राप्स्यसि पुष्कलम् ॥ ३४ ॥
तस्य तद्वचनं श्रुत्वा राघवस्यात्मनो हितम् ॥ सुग्रीवः परमप्रीतः सुमहद्वाक्यमब्रवीत् ॥ ३५ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे दशमः सर्गः ॥ १० ॥

एकादशः सर्गः ॥ ११ ॥

सुग्रीवेण रामबलपरीक्षणाय वालिबलप्रकारकथनोपक्रमः ॥ १ ॥ महिषाकृतिना दुन्दुभिनाम्नामहासुरेण वीर्योत्सेकाद्युद्धायवालिनः समाह्वानम् ॥ २ ॥ वालिना बाहुयुद्धेन तन्मारणपूर्वकं तद्गात्रस्य मतङ्गाश्रमपरिसरेवेगात्क्षेपणम् ॥ ३ ॥ दूरात्पतनवेगेन महिषमुखोद्गतैरक्तबिन्दुभिराकीर्णे निजाश्रमे रुष्टेन मतङ्गमहर्षिणा वालिनस्तदीयानांच स्वाश्रमप्रवेशक्रमेण प्राणवियोजनशैलीभवनप्रयोजकशापदानम् ॥ ४ ॥ सचिवमुखादृषिशापप्रकारं ज्ञातवतावालिना तदाप्रभृति ऋश्यमूकप्रवेशवर्जनम् ॥ ५ ॥ एवं वालिबलवर्णनेनसह तेनदुष्प्रवेशत्वादृश्यमूकस्य स्वेनशरणीकरणोक्तिपूर्वकं वालिवधे संदिहानंसुग्रीवंप्रति लक्ष्मणेन रामेवालिवधशक्तिप्रत्यायकनिवेदनचोदना ॥ ६ ॥ सुग्रीवेण प्रत्यायकंनिवेदितेनरामेण दुन्दुभिशरीरास्थ्नो निजपादाङ्गुष्ठेन दशयोजनानन्तरदेशेक्षेपणम् ॥ ७ ॥ तावताप्यपरितुष्टेनसुग्रीवेण सालसप्तकप्रदर्शनेन तेषुवालिबलप्रकारनिवेदनपूर्वकमेकबाणेनतेष्वेकतमविदारणस्य स्वप्रत्यायकत्वोक्तिः ॥ ८ ॥

रामस्य वचनं श्रुत्वा हर्षपौरुषवर्धनम् ॥ सुग्रीवः पूजयांचक्रे राघवं प्रशशंस च ॥ १ ॥
असंशयं प्रज्वलितैस्तीक्ष्णैर्मर्मातिगैः शरैः ॥ त्वं दहेः कुपितो लोकान्युगान्त इव भास्करः ॥ २ ॥

विद्धः ताडितः ॥ २७ ॥ कारणान्तरे मतङ्गशापनिमित्तेसति । वालिनो दुराधर्षं दुराक्रमं ॥ २८ ॥ वैरानुकथनं वैरकारणाख्यानं ॥ २९ ॥ वालिनइति पञ्चमी ॥३०—३३॥ आत्मानुमानात् "आत्मवत्सर्वभूतानि" इतिन्यायादित्यर्थः । तारयिष्यामि शोकसागरादितिशेषः ॥ ३४—३५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने दशमः सर्गः ॥ १० ॥

अथ सुग्रीवो वालिवधक्षमं रामबलं परीक्षितुकामस्तद्बलं दर्शयत्येकादशे—रामस्येत्यादि ॥ पूजयांचक्रे अञ्जलिबन्धादिना । प्रशशंस तुष्टाव ॥ १–२ ॥

निर्वासितेपिसुग्रीवेऽनेकविधविघातयत्नंकृतवानितिव्यक्तं । तेनतस्यमहानपराधोव्यञ्जित ॥ २७ ॥ शि० प्रहसन्निव प्रहसन्नेव ॥ ३१ ॥ ति० चारित्रदूषकः निषिद्धानिषिद्धज्ञानवत्त्वेसतिजीवतोभ्रातुर्भार्यापहारात् । स० चारित्रं सदाचारः ॥ ३३ ॥ ती० पुष्कलं सर्वं । पुष्कलं श्रेष्ठमित्यर्थः ॥ ति० आत्मानुमानात् अयंशोकाब्धिमग्नः रिपुहृतदारत्वात् मद्वत्इत्यनुमानं बाढं प्राप्स्यसि भार्यां पुष्कलं राज्यंच ॥ ३४ ॥ स० आत्मनोहितमिति रामदर्शनक्षणएव हितं स्वस्मैस्वसंबन्धिजनायचजातप्रायमितिषष्ठ्यास्पष्टयति । अन्यथा चतुर्थीश्रूयेतेतिज्ञेयं । यद्वा आत्मनास्वेन ऊहितं एवंरामोवदिष्यतीतितर्कितंवचःश्रुत्वा ॥ ३५ ॥ इतिदशमःसर्गः ॥ १० ॥

स० युगान्ते प्रलये । दहेः । दहेदितिपाठे युष्मद्योगेपिप्रथमपुरुषः । "त्वंदेवशक्त्यांगुणकर्मयोनौरेतस्त्वजायांकविरादधेऽजः"

[पा०] १ ख. घ. वालिना. २ झ. ट. वालिनश्च. ३ क. ख. छ. सर्वभूतभयापह. छ. झ. ट. सर्वलोकभयापह. ४ क. छ. झ. ट. मुक्तस्स. ५ ख. धर्मवत्सलः. ६ ङ. छ. ज. झ. ट. निशितामेशराइमे. क. ख. च. ज. ममेमे. ७ क. ङ. छ.—ट. पतिष्यन्तिरुषान्विताः घ. पतिष्यन्तिरुतान्विताः. ८ क. ङ.—ट. नहिपश्येयं. ग. घ. नहिपश्यामि. ९ ग. तावज्जीवेत्सपापीयान्वाली. १० ङ.—ट. मग्नस्त्वं. ११ छ. झ. ट. बाढं. ख. ङ. च. ज. ञ. सुखं. १२ ङ. छ. झ. ट. हर्षपौरुषवर्धनं. क. ख. राघवस्यमनोहितं.

बालिनः पौरुषं बलं च वीर्यं धृतिश्च या ॥ तन्ममैकमनाः श्रुत्वा विधत्स्व यदनन्तरम् ॥ ३ ॥
समुद्रात्पश्चिमात्पूर्वं दक्षिणादपि चोत्तरम् ॥ कामत्यनुदिते सूर्ये बाली व्यपगतक्लमः ॥ ४ ॥
अग्राण्यारुह्य शैलानां शिखराणि महान्त्यपि ॥ ऊर्ध्वमुत्क्षिप्य तरसा प्रतिगृह्णाति वीर्यवान् ॥ ५ ॥
बहवः सारवन्तश्च वनेषु विविधा द्रुमाः ॥ बालिना तरसा भग्ना बलं प्रथयताऽऽत्मनः ॥ ६ ॥
[शृणु चापि रघुश्रेष्ठ विस्तरेण कथामिमाम्] ॥ ७ ॥
महिषो दुन्दुभिर्नाम कैलासशिखरप्रभः ॥ [यथा संनिहितः पापो बालिना क्रूरकर्मणा] ॥ ८ ॥
आसीन्महासुरः कश्चिद्दुन्दुभिर्नाम नामतः ॥ बलं नागसहस्रस्य धारयामास वीर्यवान् ॥ ९ ॥
वीर्योत्सेकेन दुष्टात्मा वरदानाच्च मोहितः ॥ जगाम सुमहाकायः समुद्रं सरितां पतिम् ॥ १० ॥
ऊर्मिमन्तमतिक्रम्य सागरं रत्नसंचयम् ॥ मह्यं युद्धं प्रयच्छेति तमुवाच महार्णवम् ॥ ११ ॥
ततः समुद्रो धर्मात्मा समुत्थाय महाबलः ॥ अब्रवीद्वचनं राजन्नसुरं कालचोदितम् ॥ १२ ॥
समर्थो नास्मि ते दातुं युद्धं युद्धविशारद ॥ श्रूयतां चाभिधास्यामि यस्ते युद्धं प्रदास्यति ॥ १३ ॥
शैलराजो महारण्ये तपस्विशरणं परम् ॥ शङ्करश्वशुरो नाम्ना हिमवानिति विश्रुतः ॥ १४ ॥
गुहाप्रस्रवणोपेतो बहुकन्दरनिर्दरः ॥ स समर्थस्तव प्रीतिमतुलां कर्तुमाहवे ॥ १५ ॥
तं भीत इति विज्ञाय समुद्रमसुरोत्तमः ॥ हिमवद्वनमार्गेच्छच्छरश्चापादिव च्युतः ॥ १६ ॥
ततस्तस्य गिरेः श्वेता गजेन्द्रविपुलाः शिलाः ॥ चिक्षेप बहुधा भूमौ दुन्दुभिर्विननाद च ॥ १७ ॥
ततः श्वेताम्बुदाकारः सौम्यः प्रीतिकराकृतिः ॥ हिमवानब्रवीद्वाक्यं स्व एव शिखरे स्थितः ॥ १८ ॥

पौरुषं बलं । अनन्तरं यत्कर्तव्यं तद्विधत्स्व ॥ ३ ॥ समुद्रादिति । " ब्राह्मे मुहूर्ते उत्थाय " इति ब्राह्ममुहूर्तस्य सन्ध्याकर्मकालत्वेन तस्मिन्नुत्थाय अनुदिते सूर्येसन्ध्याकर्मकरणार्थं पश्चिमात्समुद्रात्पूर्वसमुद्रं दक्षिणात्समुद्रादुत्तरं समुद्रंचव्यपगतक्लमःसन्क्रामति। इदं व्यक्तमुत्तरकाण्डे । तारः—"चतुर्भ्योपिसमुद्रेभ्यः सन्ध्यामन्वास्यरावण । इमं मुहूर्तमायातिवाली तिष्ठ मुहूर्तकं " इति ॥ ननु कथं चतुर्ष्वप्येकसन्ध्याकरणं । उच्यते । एकस्मिंस्तटाकेपार्श्वभेदहव स्नानाचमनार्घ्यप्रदानजपानां कर्तुं शक्यत्वात् ॥ ४ ॥ अग्राणीति । कंतुकानीवेति भावः ॥ ५ ॥ बहव इति । मक्षिकोत्सारणरीत्येति भावः । सारवन्तः स्थिरांशवन्तः । " सारोबलेस्थिरांशेच " इत्यमरः ॥ ६ ॥ कैलासशिखरप्रभः । तदाकार इत्यर्थः ॥ ७–९ ॥ वीर्योत्सेकेन वीर्यगर्वेण । दुष्टात्मा दुर्बुद्धिः । अतिक्रम्यजगाम । पूर्वकालोनविवक्षितः । आक्रामम् जगामेत्यर्थः ॥ १०—११ ॥ समुत्थाय पुरुषवेषेणोत्थाय ॥ १२–१३ ॥ परं तपस्विशरणं तपस्विनांपरमावासस्थानं । नित्यनपुंसकं ॥ १४ ॥ प्रस्रवणं

इतिवस्तुमवति । विस्तृतंचैतत्प्राक् ॥ ३ ॥ स० अनुभूतभ्रातृप्रभावस्मरणेमैत्र्यल्पतोविक्रान्तिश्चेतिभ्रातृपराक्रमंकथयति—बालिनइति । पौरुषं शारीरबलं । मनसकाग्र्यात् । वि० वीर्यं परसंहारशक्तिः । धृतिः रणैर्यं ॥ ३ ॥ रामानु० अनुदितेसूर्येइत्युत्तरावधिरभिहितः । पूर्वावधिस्तु—"ब्राह्मेमुहूर्तउत्थाय"इत्यनुष्ठानाङ्गत्वेनविहितःकालः ॥ ४ ॥ वि० महिष तद्रूपधरः ॥८॥ शि० नागसहस्रस्य गजसहस्रस्य ॥९॥ वि० समुद्रमतिक्रम्य अभिगम्य । तं तदधिष्ठातृदेवतां ॥ स० रत्नानांसंचयोयस्मिन्सः । अथवा रत्नानिसंचीयन्तेऽनेनेतिरत्नसंचयस्तं ॥११॥ स० प्रीतिकराकृतिः नम्रतादिभिःप्रीतिकृदाकारः ॥ १८ ॥

[पा०] १ क. ङ. च. ज. ञ. ट. तदनन्तरं. २ ख. घ. स्पूर्वात्. ३ ख. घ. चोत्तरात्. ४ छ. झ. ट. सुरपात्य. ५ क. बलंदर्शयतात्मन. ज. बलजिज्ञासयात्मनः. ६ इदमर्धं ज. पाठेदृश्यते. ७ ज. वीर्यवान्सुमहाबलः. ८ कुण्डलितमिदमर्धद्वयं ज. पाठेदृश्यते. ९ क. ख. ग. झ. ट. सवीर्योत्सेकदुष्टात्मा. घ. सवीर्योत्सिक्तदुष्टात्मा. १० क. ख. ग. ङ.—ट. सम. ११ झ. ठ. स्वभिधास्यामि. १२ छ. झ. ट. महाप्रस्रवणो. १३ ग. घ. ङ. छ. ज. झ. ट. निर्झरः. १४ ख. दातुमाहवे. छ. झ. ट. कर्तुमर्हति. १५ छ. झ. मागम्यशरः. १६ च. छ. ज. गिरेश्चैव. १७ झ. ट. गजेन्द्रप्रतिमाः. च. ज. नरेन्द्रविपुलाः. १८ ग. नमादह.

क्षेष्टुमर्हसि मां न त्वं दुन्दुभे धर्मवत्सल ॥ रणकर्मसकुशलस्तपस्विशरणं ह्यहम् ॥ १९ ॥
तस्य तद्वचनं श्रुत्वा गिरिराजस्य धीमतः ॥ उवाच दुन्दुभिर्वाक्यं रोषात्संरक्तलोचनः ॥ २० ॥
यदि युद्धेऽसमर्थस्त्वं मद्भयाद्वा निरुद्यमः ॥ तन्माचक्ष्व प्रदद्यान्मे योऽद्य युद्धं युयुत्सतः ॥ २१ ॥
हिमवानब्रवीद्वाक्यं श्रुत्वा वाक्यविशारदः ॥ अनुक्तपूर्वं धर्मात्मा क्रोधात्तमसुरोत्तमम् ॥ २२ ॥
वाली नाम महाप्राज्ञः शक्रतुल्यपराक्रमः ॥ अध्यास्ते वानरः श्रीमान्किष्किन्धामतुलप्रभाम् ॥२३॥
स समर्थो महाप्राज्ञस्तव युद्धविशारदः ॥ द्वन्द्वयुद्धं मेंहद्दातुं नमुचेरिव वासवः ॥ २४ ॥
तं क्षीघ्रमभिगच्छ त्वं यदि युद्धमिहेच्छसि ॥ स हि दुर्धर्षणो नित्यं शूरः सैमरकर्मणि ॥ २५ ॥
श्रुत्वा हिमवतो वाक्यं क्रोधाविष्टः स दुन्दुभिः ॥ जगाम तां पुरीं तस्य किष्किन्धां वालिनस्तदा ॥२६॥
धारयन्माहिषं रूपं तीक्ष्णशृङ्गो भयावहः ॥ प्रावृषीव महामेघस्तोयपूर्णो नभस्तले ॥ २७ ॥
ततस्तद्द्वारमागैम्य किष्किन्धाया महाबलः ॥ ननर्द कम्पयन्भूमिं दुन्दुभिर्दुन्दुभिर्यथा ॥ २८ ॥
समीपस्थान्द्रुमान्भञ्जन्वसुधां दारयन्खुरैः ॥ विषाणेनोल्लिखन्दर्पात्तद्द्वारं द्विरदो यथा ॥ २९ ॥
अन्तःपुरगतो वाली श्रुत्वा शब्दममर्षणः ॥ निष्पपात सह स्त्रीभिस्ताराभिरिव चन्द्रमाः ॥ ३० ॥
मितं व्यक्ताक्षरपदं तमुवाचाथ दुन्दुभिम् ॥ हरीणामीश्वरो वाली सर्वेषां वनचारिणाम् ॥ ३१ ॥
किमर्थं नगरद्वारमिदं रुद्धा विनेदसि ॥ दुन्दुभे विदितो मेऽसि रक्ष प्राणान्महाबल ॥ ३२ ॥
तस्य तद्वचनं श्रुत्वा वानरेन्द्रस्य धीमतः ॥ उवाच दुन्दुभिर्वाक्यं रोषात्संरक्तलोचनः ॥ ३३ ॥
नैं त्वं स्त्रीसन्निधौ वीर वचनं वक्तुमर्हसि ॥ मम युद्धं प्रयच्छाद्य ततो ज्ञास्यामि ते बलम् ॥ ३४ ॥
अथवा धारयिष्यामि क्रोधमद्य निशामिमाम् ॥ गृह्यतामुदयः स्वैरं कामभोगेषु वानर ॥ ३५ ॥

निर्झरः । निर्दराः विदीर्णपाषाणरन्ध्राणि ॥१५–२०॥ त्वं युद्धासमर्थो यदि यदि वा समर्थोपि मद्भयान्निरुद्यमः उभयथापिनलांयोत्स्यामीत्यर्थः । युयुत्सतः योद्धुमिच्छतः ॥ २१ ॥ अनुक्तपूर्वं इतःपूर्वंकेनाप्यनुक्तंवाक्यं । अतएवक्रोधात् ॥ २२–२३ ॥ दातुं समर्थ इत्यन्वयः ॥ २४—२७ ॥ तद्द्वारं किष्किन्धाद्वारं । विषाणेन उल्लिखन् उद्भिन्दन् ॥ २८—२९ ॥ सहस्त्रीभिरिति । मदातिरेकादितिभावः ॥ ३० ॥ व्यक्तान्यक्षराणियेषु तानि व्यक्ताक्षराणि पदानि यस्मिन्कर्मणि तद्व्यक्ताक्षरपदमितिक्रियाविशेषणं । वनचारिणां भल्लूकादीनां ॥ ३१—३३ ॥ स्त्रीसन्निधौ वचनं । स्त्रीजनभ्रामकंवचनमित्यर्थः ॥ ३४ ॥ उदयः सूर्योदयः । गृह्यतां अवधित्वेन गृह्यतां ॥३५॥

स०-शरणगन्तृत्वेनशरणवान् । अर्शआद्यच् । शरणागतइतियावत् । तपस्विशरणइत्येकपदत्वेनकश्चित्पाठः ॥ शि० तपस्विशरणः तपस्विनएवशरणानिरक्षकायस्यसोऽहमस्मि ॥ १९ ॥ ति० अनुक्तपूर्वं इतःपूर्वंनोक्तःयुद्धदातायस्तमसुरं ॥ अनुक्तपूर्वं अन्यंगच्छेतिकदाप्यनुक्तं । क्रोधात्तः स्वीकृतोयेनसक्रोधात्तं ॥२२॥ ति०एकस्यशब्दःप्रसिद्धपराक्रमार्थकः ॥२४॥ ति०मेविदितोसि मयाज्ञातबलोसि । अतःप्राणान्रक्षस्व ॥शि० विदितोसीत्यनेन तत्पराक्रमस्याल्पत्वंध्वनितं ॥३२॥ती० गृह्यतां अवधित्वेनगृह्यतां । सूर्योदयपर्यन्तंस्त्र्यादिभोगाननुभवेतिभावः ॥ ति० स्त्रीसमूहगतोयुद्धायनाज्ञातव्यइतिस्मृत्वापक्षान्तरमाह—अथवेति ॥ ३५ ॥

[पा०] १ ड. स्तपस्वी. २ क—ट. शरणोह्यहं. ३ ज. ततस्तद्वचनं. ४ ग. ङ. ज्ञ. म. ट. क्रोधात्संरक्त. ज. क्रोधसंरक्त. छ. क्रोधात्माक्रोधवत्सलः. क. कोपात्संरक्त. ५ घ. ममाचक्ष्व. ६ ज्ञ. ट. योहि. ७ ट. मसुरेश्वरं. ८ ख. क. छ.—ट. शक्रपुत्रः प्रतापवान्. ९ ख. ज. मतुलप्रभः. १० छ. ज्ञ. ञ. ट. सदातुंते. ११ क. च.—ज्ञ. ट. दुर्मर्षणो. १२ ङ. च. ञ. ञ. सैग्रामकर्मणि. १३ ङ —ट. कोपाविष्ट. १४ क. ख. ङ.—ट. मेषं. १५ क. ख. ङ.—ञ. ततस्तद्द्वारं. १६ ट. मागत्य. १७ क. ग. ङ. च. ज.—ट. समीपजान्. १८ क. ख. ङ.—ट. तमुवाचस. १९ छ. ज्ञ. ट. विनर्दसे. २० क. कोपात्संरक्त. ख. घ.—ट. क्रोधात्संरक्त. ग. क्रोधसंरक्त. २१ ख. ङ. च. ञ. किंत्वं. २२ क. ख. ङ. च. म. वक्तुमिच्छसि. २३ ङ. ख. च. म. प्रयच्छस्वं.

दीयतां संप्रदानं च परिष्वज्य च वानरान् ॥ सर्वशाखामृगेन्द्रस्त्वं संसादय सुहृज्जनान् ॥ ३६ ॥
सुदृष्टां कुरु किष्किन्धां कुरुष्वात्मसमं पुरे ॥ क्रीडस्व च सह स्त्रीभिरहं ते दर्पनाशनः ॥ ३७ ॥
यो हि मत्तं प्रमत्तं वा सुप्तं वा रहितं भृशम् ॥ हन्यात्स भ्रूणहा लोके त्वद्विधं मदमोहितम् ॥३८॥
स प्रहस्याब्रवीन्मन्दं क्रोधात्तमसुरोत्तमम् ॥ विसृज्य ताः स्त्रियः सर्वास्ताराप्रभृतिकास्तदा ॥ ३९ ॥
मैत्तोऽयमिति मा मंस्था यद्यभीतोसि संयुगे ॥ मदोयं संप्रहारेऽस्मिन्वीरपानं समर्ध्यताम् ॥ ४० ॥
तमेवमुक्त्वा संक्रुद्धो मालामुत्क्षिप्य काञ्चनीम् ॥ पित्रा दत्तां महेन्द्रेण युद्धाय व्यवतिष्ठत ॥ ४१ ॥
विषाणयोर्गृहीत्वा तं दुन्दुभिं गिरिसन्निभम् ॥ आविध्यत तदा वाली विनदन्कपिकुञ्जरः ॥ ४२ ॥
वाली व्यापातयाञ्चक्रे ननर्द च महास्वनम् ॥ श्रोत्राभ्यामथ रक्तं तु तस्य सुस्राव पात्यतः ॥ ४३ ॥
तयोस्तु क्रोधसंरम्भात्परस्परजयैषिणोः ॥ युद्धं समभवद्घोरं दुन्दुभेर्वानरस्य च ॥ ४४ ॥
अयुध्यत तदा वाली शक्रतुल्यपराक्रमः ॥ मुष्टिभिर्जानुभिश्चैव शिलाभिः पादपैस्तथा ॥ ४५ ॥
परस्परं ततोस्तत्र वानरासुरयोस्तदा ॥ आसीददसुरो युद्धे शक्रसूनुर्न्यवर्धत ॥ ४६ ॥
व्यापारवीर्यधैर्यैश्च परिक्षीणं पराक्रमैः ॥ तं तु दुन्दुभिमुत्पाट्य धरण्यामभ्यपातयत् ॥ ४७ ॥
युद्धे प्राणहरे तस्मिन्निष्पिष्टो दुन्दुभिस्तदा ॥ [स्रोतोभ्यो बहुरक्तं तु तस्य सुस्राव पात्यतः ॥]
पपात च महाकायः क्षितौ पञ्चत्वमागतः ॥ ४८ ॥
[तस्मिन्पञ्चत्वमापन्ने वाली क्रोधेन चान्वितः ॥ तत्कायं लोष्टवत्क्षेप्तुमारब्धो वीर्यवांस्तदा ॥४९॥]

संप्रदानं देयद्रव्यं । वानरान् बन्धून् । परिष्वज्य शेषैः संप्रदानं दीयतां । चरमकालदानंदीयतामित्यर्थः । संसादय कंचिदपिकालंसंगच्छस्व । आत्मसमं राजानमित्यर्थः । क्रीडस्व क्रीड । अद्येतिशेषः । दर्पनाशनः । पश्चादिति शेषः ॥ ३६—३७ ॥ मत्तं मद्यपानादिना मत्तं । प्रमत्तं अनवहितं । रहितं आयुधादिशून्यं । त्वद्विधं त्वामिवस्त्रीसभ्यगतं । मदमोहितं मदनमोहितं । यो हन्यात्सः भ्रूणहा गर्भवधकृत् ॥ ३८ ॥ मन्दंप्रहस्य धर्मान्वितवाक्यत्वादिति भावः । ताः विसृज्याब्रवीत् ॥ ३९ ॥ संयुगे यद्यभीतोसि तदा अयं मत्त इति मा मंस्थाः । अयं मदः । अस्मिन् संप्रहारे युद्धे । वीरपानं समर्ध्यतां वीरपानं कृतमिति मन्यतां । वीरपानंनाम युद्धोपक्रमे उत्साहवर्धनायवीरैः क्रियमाणं पानं ॥४०॥ उक्षिप्यं अंसयोरुपरि विन्यस्य । एतत्काञ्चनमालाधारणकालेयःपुरो युद्धायागच्छति तस्यबलंसर्वं तवैव भविष्यतीति महेन्द्रेण दत्तामित्यर्थः । व्यवतिष्ठत व्यवातिष्ठत ॥४१॥ आविध्यत अभ्रामयत् ॥ ४२ ॥ व्यापातयांचक्रे भूमौपातयामास । अथ पात्यतः पात्यमानस्य श्रोत्राभ्यांरक्तंसुस्राव । श्रोत्रमूलविषाणपीडनादितिभावः ॥ ४३ ॥ क्रोधसंरम्भात् क्रोधवेगात् ॥ ४४—४५ ॥ ततोः ततोः ॥ ४६—४७ ॥ प्राणहरे तस्मिन्युद्धे निष्पिष्टो दुन्दुभिः । पञ्चत्वं भूतानां पृथग्भावं । मरणमिति यावत् । आगतः प्राप्तः । पपात

ति० संसादय आमन्त्रयस्व । ती०संप्रदानं युद्धं ॥ स० क्रीडस्वेतिपदव्याख्ययेन पुनःक्रीडाकुर्यामित्याशानाशसनीयेतिद्योत्यते ॥३६॥ ति० सुदृष्टां पुनर्दर्शनासंभवात् । आत्मसमं पुत्रादिकं ॥ ३७ ॥ रामानु० मदमोहितं स्त्रीभोगार्थमद्यपानमदादितिकर्तव्यतामूढं ॥३८॥ स० व्यापादयाञ्चक्रे संहृतवान् । एष्यन्निश्चयेनेयमुक्तिः॥ यद्वा व्यापादनं पाश्चात्यपादपूर्वकंव्यापनं ॥४३॥ ति० हीनः हीनबलः ॥४६॥ ति० उद्यम्य हस्ताभ्यामूर्ध्वीकृत्य । उत्साद्येतिपाठे उत्पाटितविषाणंकृत्वेत्यर्थः ॥४७॥ ति० स्रोतोभ्यः

[पा०] १ घ.—ट. ससाधयसुहृज्जनं. २ क. घ. च. ज. ञ. सुहृष्टां. ३ छ. झ. भर्तारं. घ. स्त्रीभोगरहितं. ख. सुप्तंवाव्यचितं. ४ झ. ट. मत्तेश्वरं. ५ क. च. ज. ञ. मत्तोऽमिति. ६ क. ख. ङ. च. ज. ञ. विनदन्. ७ क. ग. छ. झ. वालीव्यापादयांचके. ८ ङ. च. ज. ञ. बहुसुस्राव. ९ ग. आविध्यत. १० घ. ततो. ११ क.—ज. ञ. ट. आसीद्दीनोसुरो. झ. आसीद्दीनोसुरो. १२ ख. परिक्षीणपराक्रमं. १३ झ. मुद्यम्य. १४ इदमर्धं क. ग. घ. छ. झ. ट. पाठेषुदृश्यते. १५ छ. झ. महाबाहुः. १६ अर्धश्लोकः ख. पाठेदृश्यते.

[1]तं तोलयित्वा बाहुभ्यां गतसत्त्वमचेतनम् ॥ चिक्षेप बलवान्वाली वेगेनैकेन योजनम् ॥ ५० ॥
तस्य वेगप्रविद्धस्य वक्त्रात्क्षतजबिन्दवः ॥ अपेतुर्मारुतोत्क्षिप्ता मतङ्गस्याश्रमं प्रति ॥ ५१ ॥
तान्दृष्ट्वा पतितांस्तस्य मुनिः शोणितविप्रुषः ॥ कुद्धस्तत्र महाभागश्चिन्तयामास को न्वयम् ॥ ५२ ॥
येनाहं सहसा स्पृष्टः शोणितेन दुरात्मना ॥ कोयं दुरात्मा दुर्बुद्धिरकृतात्मा च बालिशः ॥ ५३ ॥
इत्युक्त्वाथ विनिष्क्रम्य ददर्श मुनिपुङ्गवः ॥ महिषं पर्वताकारं गतासुं पतितं भुवि ॥ ५४ ॥
स तु विज्ञाय तपसा वानरेण कृतं हि तत् ॥ उत्ससर्ज महाशापं क्षेत्रारं वालिनं प्रति ॥ ५५ ॥
इह तेनाप्रवेष्टव्यं प्रविष्टस्य वधो भवेत् ॥ वनं मत्संश्रयं येन दूषितं रुधिरस्रवैः ॥
संभ्रमाः पादपाश्चेमे क्षिप्यतेहासुरीं तनुम् ॥ ५६ ॥
समन्ताद्योजनं पूर्णमाश्रमं मामकं यदि ॥ आगमिष्यति दुर्बुद्धिर्व्यक्तं स नभविष्यति ॥ ५७ ॥
ये चापि सचिवास्तस्य संश्रिता मामकं वनम् ॥ न च तैरिह वस्तव्यं श्रुत्वा यान्तु यथासुखम् ॥ ५८ ॥
यदि तेपीह तिष्ठन्ति शपिष्ये तानपि ध्रुवम् ॥ वनेऽस्मिन्मामके नित्यं पुत्रवत्परिरक्षिते ॥
पत्राङ्कुरविनाशाय फलमूलाभवाय च ॥ ५९ ॥
दिवसश्चास्य मर्यादा यं द्रष्टा श्वोस्मि वानरम् ॥ बहुवर्षसहस्राणि स वै शैलो भविष्यति ॥ ६० ॥
ततस्ते वानराः श्रुत्वा गिरं मुनिसमीरिताम् ॥ निश्चक्रमुर्वनात्तस्मात्तान्दृष्ट्वा वालिरब्रवीत् ॥ ६१ ॥
किं भवन्तः समस्ताश्च मतङ्गवनवासिनः ॥ मत्समीपमनुप्राप्ता अपि स्वस्ति वनौकसाम् ॥ ६२ ॥
ततस्ते कारणं सर्वं तदा शापं च वालिनः ॥ शशंसुर्वानराः सर्वे वालिने हेममालिने ॥ ६३ ॥

॥ ४८—४९ ॥ तोलयित्वा चालयित्वा । एकेनवेगेन एकप्रयत्नेन ॥ ५० ॥ वेगप्रविद्धस्य वेगेनक्षिप्तस्य ॥ ५१ ॥ शोणितविप्रुष इति पुँल्लिङ्गत्वमार्षं । तत्र शोणितबिन्दुविषये । कुद्धःसन् कोन्वयमिति चिन्तयामास ॥ ५२ ॥ कोन्वयमित्येतद्विवृणोति—येनेति ॥ स्पृष्टः अन्तर्भावितण्यर्थः । दुरात्मा दुःस्वभावः । अतएव दुर्बुद्धिः । अकृतात्मा अवशीकृतान्तःकरणः । बालिशः मूर्खः ॥ ५३—५४ ॥ तपसा तपोमाहात्म्येन ॥ ५५ ॥ अप्रवेष्टव्यं न प्रवेष्टव्यमित्यर्थः । संभ्रमा इति । आसुरींतनुमिह क्षिपतेत्यन्वयः ॥ ५६ ॥ स नभविष्यति नश्यतीत्यर्थः ॥ ५७ ॥ तस्य वालिनः ॥ ५८ ॥ अस्मिन्वने पत्राङ्कुरविनाशाय फलमूलाभवायच यदीहतिष्ठन्तीत्यन्वयः ॥५९॥ अस्य शापस्य । एकोयं दिवसो मर्यादा । श्वः परेह्युः । यं द्रष्टास्मि सः शैलो भविष्यति ॥ ६० ॥ गिरं शापं ॥ ६१ ॥ वनौकसां वानरेभ्यः ॥ ६२ ॥ कारणं

नासादिद्वारेभ्य ॥ ४८ ॥ ति० तोलयित्वा हस्तप्रहणेनभारंज्ञात्वा । योजनंतावद्दूरं ॥ शि० एकेन अल्पेन । वेगेन योजनविक्षेप ॥ ५० ॥ ति० तस्यविप्रुषःकर्तारं कोन्वयमितिचिन्तयामास ॥ स० विप्रुषइतिषष्ठी । तत्संबन्धिनः तान्बिन्दून् । यद्वा बिन्दवोत्रलिङ्गिताः । विप्रुषस्त्वल्पीयांसः ॥ ५२ ॥ ति० शापमेवहेतूपन्यासपूर्वमाह—वनेइति । फलाद्यभावाय तदाशाय ।

[पा०] १ ख. सतोलयित्वा. २ क. मचेतसं. ३ ख. ग. च.—ट. वेगवान्वाली. ४ क. मुखात्क्षतज. ५ तान्दृष्ट्वेत्यर्धानन्तरं क. ङ. च. ज. पाठेषु. मतङ्गश्चमहाप्राज्ञःकुद्धःकस्येतिचाब्रवीत्. इत्यर्धंदृश्यते. ६ ख. ङ.—ट. स्तत्र. ७ क.—ट. कुद्धस्तस्य. ८ ख. ग. येनायमाश्रमस्स्पृष्टः. ९ ग. सबालिशः. १० छ. झ. ट. इत्युक्त्वास. क. ङ. च. ज. ञ. इत्युक्त्वाच ख. इत्युक्त्वायामि. ११ क.—ट. ददर्शमुनिसत्तमः. १२ ख. वानरेन्द्रकृतंमहत्. क. च. ज. ञ. वानरेन्द्रकृतंहि. छ. वानरेणहृतंहि. १३ ग. तदाशापं. १४ छ. झ. ट. वानरं. १५ ग. मत्संश्रितं. ङ. ज. ञ. महत्स्वकं. १६ छ. झ. ट. क्षिपतापादपाश्चेमेसंभ्रमाश्चासुरीं. १७ क. ङ. च. ज. ञ. क्षिपताह्यासुरीं. १८ छ. झ. ट. समन्तादाश्रमंपूर्णंयोजनं. १९ ग. ङ. छ. झ. ञ. ट. आकमिष्यति. २० क. ख. ङ.—ट. चास्यसचिवाःकेचित्. २१ ग. यदि. २२ छ. झ. ट. तेपिवायदि. ङ. च. ज. ञ. यदितेचेह. २३ ख. ग. त्परिपालिते. २४ क. ग. छ. झ. ञ. ट. धाय. ङ. च. ज. धात्र. २५ क. छ. झ. ट. तथा.

एतच्छ्रुत्वा तदा वाली वचनं वानरेरितम् ॥ स महर्षिं तदासाद्य याचते स्म कृताञ्जलिः ॥ ६४ ॥
महर्षिस्तमनादृत्य प्रविवेशाश्रमं तदा ॥ शापधारणभीतस्तु वाली विह्वलतां गतः ॥ ६५ ॥
ततः शापभयाद्भीत ऋश्यमूकं महागिरिम् ॥ प्रवेष्टुं नेच्छति हरिर्द्रष्टुं वापि नरेश्वर ॥ ६६ ॥
तस्याप्रवेशं ज्ञात्वाऽहमिदं राम महावनम् ॥ विचरामि सहामात्यो विषादेन विवर्जितः ॥ ६७ ॥
एषोस्थिनिचयस्तस्य दुन्दुभेः संप्रकाशते ॥ वीर्योत्सेकान्निरस्तस्य गिरिकूटोपमो महान् ॥ ६८ ॥
इमे च विपुलाः सालाः सप्त शाखावलम्बिनः ॥ यत्रैकं घटते वाली निष्पत्रयितुमोजसा ॥ ६९ ॥
एतदस्यासमं वीर्यं मया राम प्रकीर्तितम् ॥ कथं तं वालिनं हन्तुं समरे शक्ष्यसे नृप ॥ ७० ॥
तथा ब्रुवाणं सुग्रीवं प्रहसँल्लक्ष्मणोऽब्रवीत् ॥ कस्मिन्कर्मणि निर्वृत्ते श्रद्दध्या वालिनो वधम् ॥ ७१ ॥
तमुवाचाथ सुग्रीवः सप्त सालानिमान्पुरा ॥ एवमेकैकशो वाली विव्याधाथ स चासकृत् ॥ ७२ ॥
रामोपि दारयेदेषां बाणेनैकेन चेद्द्रुमम् ॥ वालिनं निहतं मन्ये दृष्ट्वा रामस्य विक्रमम् ॥ ७३ ॥
हतस्य महिषस्यास्थि पादेनैकेन लक्ष्मण ॥ उद्यम्याथ प्रक्षिपेच्चेत्तरसा द्वे धनुःशते ॥ ७४ ॥

दुन्दुभिपतनं ॥ ६३—६४ ॥ विह्वलतां गत इति । जगामेतिशेषः ॥ ६५—६७ ॥ अस्थिनिचयः शुष्ककायइतियावत् ॥ ६८ ॥ विपुलाः स्थूलाः । शाखावलम्बिनः लम्बितशाखाः । शाखावृतत्वेन दुर्ज्ञेयलक्ष्या इत्यर्थः । यत्र सालेषु एकं सालं । ओजसा नतुधनुषा । निष्पत्रयितुं निर्गतशरपत्रंकर्तुं । घटते शक्नोति । एकंसालंभित्त्वा शरोनिष्पत्रं यथातथा वृक्षान्तरासक्तमूलंगच्छति तथावेद्धुंसमर्थइत्यर्थः । धनुर्विना केवलबाणेन एकंसालंविध्यतीत्यर्थः । यद्वा वेद्धुंशक्तः नतु कदाचित्तथाकृतवानिति घटतइतिपदेनव्यज्यते । एवमुत्तरत्रापि योज्यं । यद्वा स्वजातिविरुद्धत्वेनयुद्धे धनुर्ग्रहणाभावेपि लीलार्थं धनुरस्तीतिध्येयम् ॥ ६९—७० ॥ कस्मिन्निति । मुहूर्तेनचतुःसमुद्रगमने उत्क्षिप्तपर्वतशिखरग्रहणे दुन्दुभिकायोत्क्षेपणे सालभेदनेवेत्यर्थः ॥ ७१ ॥ पुरा वाली इमान् सप्त सालान् । विव्याध । अथच अनन्तरमपि । एवमेकैकशः असकृद्विव्याधेतियोजना । यद्वा सवाली एवंविधानिमान्सप्त सालान् एकैकशः पुरा विव्याध । अनन्तरमप्यसकृद्विव्याध । एषां मध्ये एकं द्रुमं एकेन बाणेन यदि विदारयेत् तदा तादृशं विक्रमं दृष्ट्वा वालिनं निहतंमन्ये । उद्यम्य अङ्गुष्ठेनोत्क्षिप्य । द्वे धनुःशते धनुःशतद्वयदूरं । धनुर्नाम चतुर्हस्तमानं ।

जायन्तेमतः अतःशपिष्यामि ॥ ५९ ॥ वि० याचतेस्म अयाचत । शापमोक्षमितिशेषः ॥ ६४ ॥ ति० शापधारणेन शापविषयदोषज्ञानेन । स० शापकारणभीतः शापकारणस्वदोषभीतः ॥ ६५ ॥ स० शापेनभयमातयतिप्रापयतीतिशापभयात् मुनिः तस्माद्भीतः शापभयाद्भीतः ॥ ६६ ॥ ति० विपुलाः विशालमूलस्कन्धाः । शाखावलंबिनः प्रशस्तबहुशाखावन्तः । यत्र येषु । एकं एककालमेव । वाली ओजसा ओजोयुक्तकंपनेन । सर्वान्निष्पत्रयितुं पत्रहीनान्कर्तुं घटते चेष्टते । तइमेसप्तसालाइत्यर्थः । अनेनवायोरप्यधिकंबलंसूचितं । नहिवायोर्युगपत्कंपनेनसकलार्द्रपत्रपातनंक्वचिद्दृष्टं । कश्चित्तु निष्पत्रयितुं निष्पत्रीकर्तुमित्यर्थः । एकंसालं शरेणभित्त्वा शरोनिष्पत्रंयथागच्छतितथाकर्तुं अतिव्यथयितुमितियावत् । " सपत्रनिष्पत्रादतिव्यथने " इति शास्त्रात् । अप्राकृतकपित्वाच्चबाणव्यापारस्यापिसंभवइतिव्याचख्यौ ॥ ६९ ॥ प्रहसन् भगवद्वीर्याज्ञानादेवंवादइतिहासः ॥ ७१ ॥ ती० पुरा सवाली इमान् पुरतःस्थितान् सप्तसालान् एकैकशः एकमेकंविव्याध । अथच अनन्तरं । एवं पूर्वोक्तप्रकारेणासकृद्विव्याधेति संबन्धः । एतेषुसालेषु एकंपूर्वंभित्त्वा तत्रस्थानितशरं समुद्धृत्यतस्मिन्रन्ध्रेपुनरन्यंशरंनिधाय तमपिसमुद्धृत्य तथाऽन्यंविध्वा एवमसकृदेताञ्छिद्रीकृतवानितिवाक्यार्थः ॥ ति० एवमुक्तप्रकारेण एकैकशः एकैकस्मिन्काले सप्तापि सः वाली । असकृद्विव्याध पीडितवान् । आर्षपरस्मैपदं ॥ सकृत्कृतेःकाकतालीयत्वव्युदासायासकृदिति । विव्याधेतिपाठान्तरं ॥ ७२ ॥ ति० एकेनबाणेन एषामेकंद्रुममपिचेन्निर्दारयेत् तदापि वालिनंहतंमन्ये । तद्वधयोग्यतासंभावनयेतिभावः ॥ पादेन अस्थ्नोहस्तेनस्पर्शायोग्यत्वात् ।

[पा०] १ ग. ट. तंमहर्षिं. २ क. ख. च. तमासाद्य. छ.—ग. समासाद्य. ३ ख. प्रविवेशस्वमाश्रमं. ४ ङ. छ.—ट. प्रति. ५ ठ. शापकारण. ६ क. मिमंराममहागिरिं. ७ क. ख. घ. चवर्जितः. ८ क. ख. ङ.—ट. कूटनिभो. ९ छ. झ. ट. प्रकाशितं. १० छ. वधे. ११ झ. विव्याधाथ. १२ ग. घ. झ. ट. रामोनिर्दारयेदेषां. १३ क. ख. ग. च. छ. झ. ट. चद्रुमं. १४ ङ.—ट. उद्यम्यप्रक्षिपेच्चापि.

एवमुक्त्वा तु सुग्रीवो रामं रक्तान्तलोचनम् ॥ ध्यात्वा मुहूर्तं काकुत्स्थं पुनरेव वचोऽब्रवीत् ॥ ७५ ॥
शूरश्च शूरघाती च मख्यातबलपौरुषः ॥ बलवान्वानरो वाली संयुगेष्वपराजितः ॥ ७६ ॥
दृश्यन्ते चास्य कर्माणि दुष्कराणि सुरैरपि ॥ यानि संचिन्त्य भीतोऽहमृश्यमूकं समाश्रितः ॥७७॥
तमजय्यमधृष्यं च वानरेन्द्रममर्षणम् ॥ विचिन्तयन्न मुञ्चामि ऋश्यमूकमहं त्विमम् ॥ ७८ ॥
उद्विग्नः शङ्कितश्चापि विचरामि महावने ॥ अनुरक्तैः सहामात्यैर्हनुमत्प्रमुखैर्वरैः ॥ ७९ ॥
उपलब्धं च मे श्लाघ्यं सन्मित्रं मित्रवत्सल ॥ त्वामहं पुरुषव्याघ्र हिमवन्तमिवाश्रितः ॥ ८० ॥
किंतु तस्य बलज्ञोऽहं दुर्भ्रातुर्बलशालिनः ॥ अप्रत्यक्षं तु मे वीर्यं समरे तव राघव ॥ ८१ ॥
न खल्वहं त्वां तुलये नावमन्ये न भीषये ॥ कर्मभिस्तस्य भीमैस्तु कातर्यं जनितं मम ॥ ८२ ॥
कामं राघव ते वाणी प्रमाणं धैर्यमाकृतिः ॥ सूचयन्ति परं तेजो भस्मच्छन्नमिवानलम् ॥ ८३ ॥
[स्निग्धानां प्रीतियुक्तानां सुहृदां सुहृदं प्रति ॥ कातरं हृदयं राम प्रत्ययं नाधिगच्छति ॥ ८४ ॥
यदि बाणेन भेत्ता त्वं सालान्सप्ताद्य राघव ॥ वालिनं समरे हन्तुं समर्थः स्यात्ततो भवान् ॥ ८५ ॥]
तस्य तद्वचनं श्रुत्वा सुग्रीवस्य महात्मनः ॥ स्मितपूर्वमथो रामः प्रत्युवाच हरिं प्रभुः ॥ ८६ ॥
यदि न प्रत्ययोऽसासु विक्रमे तव वानर ॥ प्रत्ययं समरे श्लाघ्यमहमुत्पादयामि ते ॥ ८७ ॥
एवमुक्त्वा तु सुग्रीवं सान्त्वं लक्ष्मणपूर्वजः ॥ राघवो दुन्दुभेः कायं पादाङ्गुष्ठेन लीलया ॥
तोलयित्वा महाबाहुश्चिक्षेप दशयोजनम् ॥ ८८ ॥
असुरस्य तनुं शुष्कं पादाङ्गुष्ठेन वीर्यवान् ॥ क्षिप्तं दृष्ट्वा ततः कायं सुग्रीवः पुनरब्रवीत् ॥ ८९ ॥

" किष्कुःस्यादवटोहस्तश्चतुर्विंशतिरङ्गुलाः । चतुर्हस्तोधनुर्दण्डोधनुर्धन्वन्तरंयुगं " इतिवैजयन्ती । एवं सुग्रीवस्तमुवाचेति पूर्वेणान्वयः ॥ ७२—७४ ॥ एवमविश्वासकरणे सुहृद्दुर्मनायेतेत्यालोच्य यथा रामः संतुष्यति तथावदति एवमुक्त्वेत्यादिना ॥७५—७८॥ उद्विग्नः भीतः ॥ ७९—८२ ॥ वाणी एकरूपंवचनं । प्रमाणं बुद्धिः । धैर्यं अचञ्चलता । आकृतिर्वेषश्च तरसा बलेन । प्रक्षिपेदपिचेत् तदापि रामस्यविक्रमंदृष्ट्वा वालिनंहर्तमन्यइतिसंबन्धः ॥ ७३—७४ ॥ ति० ध्यात्वा रामवीर्यस्याप्रत्यक्षत्वादामेणवालिवधः शक्योनवेतिसंचिन्त्य ॥ ७५ ॥ शि० शूरः अतएवशूरमानी शूरकर्तृकसत्कारवान् । बलवान् प्रशस्तसेनाविशिष्टः । वाली अस्तीतिशेषः ॥ ७६ ॥ ति० वाणी वालिवधविषया । प्रमाणं विश्वसनीया । यतः धैर्यं अकातर्येणतृणीकृत्यवादः । आकृतिः अनुभवसिद्धोदिव्यविग्रहः । एतेद्वे परंतेजः सकलजगत्संहारकंतेजः । कामं अतिशयेन । सूचयन्ति सूचयतः । भस्मच्छन्नमनलोपमयागुप्तावस्थितिमहाशक्तिमत्त्वंसूचितं ॥ ८३ ॥ शि० दुन्दुभेःकायं पादाङ्गुष्ठेनतोलयित्वा शुष्कांततुं पादाङ्गुष्ठेनलीलयादशयोजनंचिक्षेप । कर्मण करणस्यचपुनरुपादानमुभयत्रशब्दान्वयविवक्षया ॥ ८८—८९ ॥

[पा०] १ छ. झ. लोचनः. २ क. पुनरेवाब्रवीद्वचः. ३ छ. झ. ट. शूरश्चशूरमानीच. क. ख. ङ. च. ज. शूरश्चासुरघातीच. ४ छ. झ. ट. मृश्यमूकमुपाश्रितः. ५ ख. चिन्तयन्नविमुञ्चामि. ६ ख. ग. ङ. च. ज.—ट. ममुंलहं. घ. महंगिरिं. ७ क.—ट. शङ्कितश्चाहं. ८ ग. सिंहाश्रितः. ९ ज. छ. झ. ञ. ट. भीमैश्च. १० क. ख. रामभवद्बाणी. ११ इदंश्लोकद्वयं क. ङ. च. ज. पाठेषुदृश्यते. १२ ङ. छ.—ट. हरिंप्रति. क. गिरिंप्रभुः. १३ ख. ग. ङ. समरेश्लाघ्यं. १४ ङ. छ. झ. ञ. ट. सान्त्वयँल्लक्ष्मणाग्रजः. १५ क. ङ. ञ. तोलयन्. च. ज. लोलयन. १६ क. ङ. च. ज. ञ. पुनश्चलीलयारामश्चिक्षेप. १७ क. ख. ङ.—ट. शुष्कां. १८ क. पुनः. १९ क. झ. सुग्रीवोराममब्रवीत्.

लक्ष्मणस्याग्रतो राममिदं वचनमब्रवीत् ॥ ९० ॥
आर्द्रैः समांसः प्रत्यग्रः क्षिप्तः कायः पुरा सखे ॥ लघुः संप्रति निर्मांसस्तृणभूतश्च राघव ॥ ९१ ॥
परिश्रान्तेन मत्तेन भ्रात्रा मे वालिना तदा ॥ क्षिप्तमेवंप्रहर्षेण भवता रघुनन्दन ॥
नात्र शक्यं बलं ज्ञातुं तव वा तस्य वाऽधिकम् ॥ ९२ ॥
आर्द्रं शुष्कमिति ह्येतत्सुमहद्राघवान्तरम् ॥ स एव संशयस्तात तव तस्य च वेद्मले ॥ ९३ ॥
सालमेकं तु निर्भिन्द्या भवेद्व्यक्तिर्बलाबले ॥ ९४ ॥
कृत्स्नेदं कार्मुकं सज्यं हस्तिहस्तमिवाततम् ॥ आकर्णपूर्णमायम्य विसृजस्व महाशरम् ॥ ९५ ॥
इमं हि सालं संहितस्त्वया शरो न संशयोत्रास्ति विदारयिष्यति ॥
अलं विमर्शेन मम प्रियं ध्रुवं कुरुष्व राजात्मज शापितो मया ॥ ९६ ॥
यथा हि तेजस्सु वरः सदा रविर्यथा हि शैलो हिमवान्महाद्रिषु ॥
यथा चतुष्पात्सु च केसरी वरस्तथा नराणामसि विक्रमे वरः ॥ ९७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे एकादशः सर्गः ॥ ११ ॥

पूर्वापेक्षया स्वल्पं । कायं शरीरं ॥८९॥ कथं कथमित्यत्राह—लक्ष्मणस्येति ॥९०॥ आर्द्रः सरक्तः । प्रत्यग्रः यत्किंचित्प्राणचेष्टायुक्तः । लघुत्वंसदृष्टान्तमाह—तृणभूत इति ॥ ९१ ॥ एवं प्रक्षेपेप्यवैषम्यमुक्त्वा प्रक्षेप्तृतारतम्यमाह—परिश्रान्तेनेति ॥ एवंप्रहर्षेण एवंविधप्रहर्षवता । अत्र दुन्दुभिकायक्षेपकर्मणि । तववा तस्यवा अधिकंबलमिति ज्ञातुंनशक्यं ॥ ९२ ॥ पुनःसंग्रहेणाह—आर्द्रमिति ॥ आर्द्रं शुष्कमितेतत्सुमहत् अन्तरं तारतम्यं यद्यस्मादस्ति । अतस्तवच तस्यच बले युवयोर्बलतारतम्ये । सएव संशयोवर्तते । संशयोननिवृत्तइत्यर्थः ॥ ९३ ॥ निर्भिन्द्याः भञ्जय । व्यक्तिः विशेषज्ञानं ॥ ९४—९५ ॥ पुनर्निर्बन्धेन कुपितोभवेदितिसान्त्वयति—इममिति ॥ संहितः संहितः । "समोवा हिततत्तयोः" इतिमलोपः । शरो विदारयिष्यति । विमर्शेन पुनःकिमर्थं प्रत्ययोत्पादनमिति विमर्शेन । ममप्रियं ननुत्वत्परीक्षार्थं ॥ ९६ ॥ तेजस्सु तेजस्विषु । विक्रमे । स्थितानामितिशेषः ॥ ९७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने एकादशः सर्गः ॥ ११ ॥

ती० प्रत्यग्रः अभिनवः ॥ ९१ ॥ ति० मत्तेन भोगार्थंपीतमदेन ॥ ९२ ॥ ति० यद्बलं तत्रेतिशेषः । यद्बले इतिपाठेयदित्यस्यार्थं । यःसंशयोऽस्मिन्प्रक्षेपात्प्राग्बलविषये आसीत् सोऽद्याप्यस्त्येवेत्यर्थः ॥ ९३ ॥ ती० एकंसालं विनिर्भिद्य बलाबले प्रथमाद्विवचनं ॥ व्यक्तेर्भवेत् भवेतामित्यर्थः । एकसालभेदनेकृते त्वंबलाधिक्यंत्वद्दोःप्रतापोमीत्यर्थः ॥ ९४ ॥ ति० मया सख्या । संप्रतिशापितः शपथपूर्वंनियुक्तः । अतोममप्रियंध्रुवंकुरुष्वेत्यर्थः ॥ ९६ ॥ ती० सर्गफलं—"विद्याबलंदैवबलंज्ञानबन्धुबलं तथा । सेनाबलंभवेत्तस्यबालिनोबलकीर्तनात् ॥" इतिस्कान्दे ॥ ९७ ॥ इत्येकादशः सर्गः ॥ ११ ॥

[पा०] १ एतदर्धस्यप्रतिनिधितया क.—ट. पाठेषु. लक्ष्मणस्याग्रतोरामंतपन्तमिवमास्करम् । हरीणामग्रतोवीरमिदं वचनमब्रवीत्. इत्येकःश्लोकोदृश्यते. २ घ. कायस्तदा. ३ लघुःसंप्रतिनिर्मांसः. परिश्रान्तेनमत्तेन. इत्यनयोरर्धयोःपौर्वापर्यं क. च. ज. ञ. ट. पाठेषुदृश्यते. ४ ग. ञ. क्षिप्तएतं. क. ङ. च. ज. ञ. ट. क्षिप्तएव. ५ ङ.—ट. यद्बलं. ६ ङ.—ट. विनिर्भिद्य. ७ घ. भवेद्व्यक्तेर्बलाबले. ८ च.—ट. कृत्स्नैतत्कार्मुकं. ९ छ. ञ. ट. मिवापरं. क. घ. ङ. च. ज. मिवायतं. १० क. ख. घ.—ट. प्रहितस्त्वया. ११ ङ. च. ज. ञ. संशयोऽत्र. १२ क. तवप्रियं. १३ छ. ञ. ट. राजन्प्रतिशापितो. ङ. च. ज. ञ. राजंस्त्वयिशापितो.

द्वादशः सर्गः ॥ १२ ॥

सुग्रीवविस्मयाय रामशक्तेनैकेनैवबाणेन युगपत्सालसप्तकरसातलादिभेदनपूर्वकं पुनःस्वतूणीप्रवेशः ॥ १ ॥ तदद्भुतावलोकनविस्मितेनसुग्रीवेण सप्रणामं प्रशंसनपूर्वकं रामंप्रति वालिवधप्रार्थना ॥ २ ॥ रामेण सुग्रीवंप्रति समरार्थवालिसमाह्वानचोदनपूर्वकं लक्ष्मणादिभिःसह वृक्षमूलेनिलीयावस्थानम् ॥ ३ ॥ सुग्रीवेण निजाह्वानमसहमानेनवालिना निर्युद्धे निजबलभङ्गे वालिसुग्रीवयोःसदाकारादिसादृश्यद्विदोषानुपलब्ध्या रामेण वालिनि शरामोचने सुग्रीवेण पुनर्ऋश्यमूकंप्रति पलायनम् ॥ ४ ॥ सर्वैःसह सुग्रीवसमीपमुपागतेनरामेण तंप्रति वालिवधाकरणे कारणाभिधानेन समाश्वासनपूर्वकं पुनर्वालिनासह निर्युद्धचोदना ॥ ५ ॥ लक्ष्मणेन रामचोदनया प्रत्यभिज्ञानाय सुग्रीवग्रीवायां सपुष्पगजपुष्पीलताबन्धनम् ॥ ६ ॥

एतच्च वचनं श्रुत्वा सुग्रीवेण सुभाषितम् ॥ प्रत्ययार्थं महातेजा रामो जग्राह कार्मुकम् ॥ १ ॥
स गृहीत्वा धनुर्घोरं शरमेकं च मानदः ॥ सालमुद्दिश्य चिक्षेप ज्यास्वनैः पूरयन्दिशः ॥ २ ॥
स विसृष्टो बलवता बाणः स्वर्णपरिष्कृतः ॥ भित्त्वा सालान्गिरिप्रस्थे सप्त भूमिं विवेश ह ॥ ३ ॥
प्रविष्टश्च मुहूर्तेन धरां भित्त्वा महाजवः ॥ निष्पत्य च पुनस्तूणं खतूणीं प्रविवेश ह ॥ ४ ॥
तान्दृष्ट्वा सप्त निर्भिन्नान्सालान्वानरपुङ्गवः ॥ रामस्य शरवेगेन विस्मयं परमं गतः ॥ ५ ॥
स मूर्ध्ना न्यपतद्भूमौ प्रलम्बीकृतभूषणः ॥ सुग्रीवः परमप्रीतो राघवाय कृताञ्जलिः ॥ ६ ॥
इदं चोवाच धर्मज्ञं कर्मणा तेन हर्षितः ॥ रामं सर्वास्त्रविदुषां श्रेष्ठं शूरमवस्थितम् ॥ ७ ॥
सेन्द्रानपि सुरान्सर्वांस्त्वं बाणैः पुरुषर्षभ ॥ समर्थः समरे हन्तुं किं पुनर्वालिनं प्रभो ॥ ८ ॥

अथ प्रत्ययपूर्वकं वालिवधाय गमनं द्वादशे—एतच्चेत्यादि ॥ १—२ ॥ सः एकसालोद्देशेन विसृष्टः । स्वर्णपरिष्कृतः स्वर्णपट्टालंकृतः । अनेन सर्वोत्तमत्वमुक्तं । सप्त सालान् भित्त्वा । गिरिप्रस्थे गिरिप्रस्थमार्गेण भूमिं विवेश । इत्थंह्युक्तमभियुक्तैः । "सालांश्च सप्त सगिरीन्सरसातलान्" इति । संक्षेपेच "गिरिं रसातलंचैव" इति । अन्यस्त्वपपाठः ॥३॥ धरां भित्त्वा प्रविष्टः स शरः महाजवत्वान्मुहूर्तेन । निष्पत्य निर्गत्य । पुनस्तां तूणीं प्रविवेश । मन्त्रप्रभावेनाचेतनस्यापिपुनरागमनं ॥ ४ ॥ दृष्ट्वेत्यनेनाल्पश्रुत्वात्सुग्रीवः सालानेवमिन्नान्ददर्श । सप्तभूमिप्रवेशंत्वहमेवधर्मवीर्येण पश्यामीतिभावः ॥ ५ ॥ ससुग्रीवः परमप्रीतः सन् राघवायकृताञ्जलिः मूर्ध्नाभूमौन्यपतत् । शिरसा भूमिं स्पृष्ट्वा प्रणनामेत्यर्थः । प्रलम्बीकृतभूषणइत्यनेन उदरास्पर्शउक्तः । अनेनभगवद्विषयेप्रणा-

---

तीं० मानंबहुमानंददातीतिमानदः ॥२॥ तीं० सप्तसालान् गिरिप्रस्थेच भित्त्वा भूमिंविवेश। सप्तसालान्भित्त्वा गिरिप्रस्थंपर्वतमपिभित्त्वा भूमिंप्रविश्यतामपिभित्त्वा रसातलंगत्वेतिद्रष्टव्यं ॥ गिरिंरसातलंचेत्युक्तत्वात् । तथाचस्कान्दे—"सप्तभूमीःसप्तगिरीन्सप्तसालान्महाबलान् । सबाणोवेगसंपन्नोभित्त्वातूणीरमाविशत्" इति ॥ शि० सालान् गिरिप्रस्थं तदाश्रयीभूतगिरिखण्डंच सप्तभूमिं अधरसप्तलोकावरकांश्चभित्त्वाविवेश उद्देश्यातिरिक्तभेदनस्यसामर्थ्यसूचकत्वान्नप्रयोक्तृनैपुण्यहानिः । उपलक्षणतयाऽन्यस्याप्युद्देश्यतावा ॥ ३ ॥ ति० निष्पत्य रसातलपर्यन्तंगत्वा । तत्रत्यासुरान्हत्वा तमेवतूणं पूर्वाधारंतूणं । अनेनरामबाणानांचेतनपरशक्तिमद्देवताऽधिष्ठितत्वंसूचयति । तदुक्तं—"युगपत्सप्ततालांश्चरघुनाथोविभेदह ।पातालदानवान्हत्वापुनस्तूणंविवेशच" इति ॥ ४ ॥ ति० प्रलंबीकृतभूषणः साष्टाङ्गप्रणामदशालंबमानावस्थापन्नोरःकण्ठादिवर्तिसकलभूषणः । कृताञ्जलिः उत्थानानन्तर-

[पा०] १ छ.—ट. सुग्रीवस्य. २ ध. मेकंतु. ३ क. ग. ङ. छ. ज. ञ. ट. पूरयन्सरवैर्दिशः. ४ ङ. च. छ. ज. ञ. बाणोहेमविभूषितः. ५ छ.—ट. प्रस्थं. ६ ख. छ. ञ. ट. सायकस्मुहूर्तेन. ग. प्रविश्यच. क. सप्रविष्टो. घ. ज. ञ. प्रविष्टस्तु. ७ छ. ञ. ट. सालान्भित्त्वा. क. घ. ङ. च. ज. ञ. रसांभित्त्वा. ८ घ. ज. महाशरः. ९ क निपत्यच. १० छ. ञ. तमेवप्रविवेशह. ख. ग. खतूणींपुनराविशत्. घ. खतूणींतामुपाविशत्. ११ घ. तोषितः.

येन सप्त महासाला गिरिर्भूमिश्च दारिताः ॥ बाणेनैकेन काकुत्स्थ स्थाता ते को रणाग्रतः ॥ ९ ॥
अद्य मे विगतः शोकः प्रीतिरद्य परा मम ॥ सुहृदं त्वां समासाद्य महेन्द्रवरुणोपमम् ॥ १० ॥
तमद्यैव प्रियार्थं मे वैरिणं भ्रातृरूपिणम् ॥ वालिनं जहि काकुत्स्थ मया बद्धोऽयमञ्जलिः ॥ ११ ॥
ततो रामः परिष्वज्य सुग्रीवं प्रियदर्शनम् ॥ प्रत्युवाच महाप्राज्ञो लक्ष्मणानुमतं वचः ॥ १२ ॥
अस्माद्गच्छेम किष्किन्धां क्षिप्रं गच्छ त्वमग्रतः ॥ गत्वा चाह्वय सुग्रीव वालिनं भ्रातृगन्धिनम् ॥ १३ ॥
सर्वे ते त्वरितं गत्वा किष्किन्धां वालिनः पुरीम् ॥ वृक्षैरात्मानमावृत्य व्यतिष्ठन्गहने वने ॥ १४ ॥
सुग्रीवो व्यनदद्घोरं वालिनो ह्वानकारणात् ॥ गाढं परिहितो वेगान्नादैर्भिन्दन्निवाम्बरम् ॥ १५ ॥
तं श्रुत्वा निनदं भ्रातुः क्रुद्धो वाली महाबलः ॥ निश्चक्राम सुसंरब्धो भास्करोस्ततटादिव ॥ १६ ॥
ततः सुतुमुलं युद्धं वालिसुग्रीवयोरभूत् ॥ गगने ग्रहयोर्घोरं बुधाङ्गारकयोरिव ॥ १७ ॥
तलैरशनिकल्पैश्च वज्रकल्पैश्च मुष्टिभिः ॥ जघ्नतुः समरेऽन्योन्यं भ्रातरौ क्रोधमूर्छितौ ॥ १८ ॥
ततो रामो धनुष्पाणिस्तावुभौ समुदीक्ष्य तु ॥ अन्योन्यसदृशौ वीरावुभौ देवाविवाश्विनौ ॥ १९ ॥
यन्नावगच्छत्सुग्रीवं वालिनं वाऽपि राघवः ॥ ततो न कृतवान्बुद्धिं मोक्तुमन्तकरं शरम् ॥ २० ॥
एतस्मिन्नन्तरे भग्नः सुग्रीवस्तेन वालिना ॥ अपश्यन्राघवं नाथमृश्यमूकं प्रदुद्रुवे ॥ २१ ॥

मप्रकारः शिक्षितोभवति ॥ ६—११ ॥ लक्ष्मणानुमतमिति क्रियाविशेषणं । भ्रातृगन्धिनं भ्रातृहिंसकं । "गन्धनावक्षेपण—" इत्यत्र तथा प्रयोगात् । इति रामः सुग्रीवं प्रत्युवाचेतिपूर्वेणान्वयः ॥ १२—१३ ॥ आत्मानं स्वंस्वमित्यर्थः ॥ १४ ॥ ह्वानं आह्वानं । गाढं परिहितः बलवृद्धयेदृढबद्धपरिधानः ॥ १५ ॥ भास्करोस्ततटादिवेति । यथा सूर्योस्ततटादवतरन्नदृष्टरश्मिर्भवति तथेदानीं किष्किन्धानिर्गमनं वालिनोल्पकालेननाशहेतुरितिद्योतनार्थमस्ततटादित्युक्तं । अस्मद्देशोदयगिरिः प्रदेशान्तरापेक्षया अस्तगिरिरित्युक्तमित्यप्याहुः ॥ १६ ॥ बुधाङ्गारकाख्ययोर्ग्रहयोरिव ॥ १७ ॥ अशनिः मेघज्योतिः ॥ १८ ॥ तत इत्यादिश्लोकद्वयमेकान्वयं । उभावश्विनौ देवाविवस्थितौ तावुभौ समुदीक्ष्य सुग्रीवं वालिनं वा विशेषतो यन्नावगच्छत् । ततः तस्मात् रामः शरं मोक्तुं बुद्धिं न कृतवानित्य-

मितिशेषः ॥ रामानु० प्रलंबगतभूषणइतिपाठान्तरं प्रलंबगतभूषणः प्रलंबत्वंप्राप्तभूषणइत्यर्थः ॥ ६ ॥ ति० भूमिश्च । चात् सप्तपातालास्तद्वर्तिनोसुराश्च ॥ ९ ॥ टीका० भ्रातृगन्धिनं गन्धःसंबन्धः । भ्रातृत्वमात्रेणसंबन्धी नतुदानमानादिनेतिभावः ॥ १३ ॥ ति० वेगात् नादकारणप्राणवेगात् । उत्पन्नैरितिशेषः ॥ १५ ॥ ति० भास्करोस्ततटादतिदूरमप्युदयपर्वतमल्पेन कालेनयाति । एवमदृश्यस्थानतयातत्तुल्यगुहातःक्षणेनबहिरागतइत्यर्थः । यत्तु अस्तपदेनोदयगिरिलक्षणं यदपिमेरूत्तरवासिनोऽधिकृत्येयमुक्तिरितिव्याख्यानं तत्क्लिष्टमसंगतंचेतिस्पष्टंसुधियां ॥ रामानु० अस्माकमुदयपर्वतः सिद्धपुरवासिनामस्तगिरिरितितदपेक्षयाऽस्ततटादित्युक्तं । "उदयोयोलङ्कायांसोस्तमयःसवितुरेवसिद्धपुरे" इत्यार्यभटोक्तेः ॥ ती० मेरोरुत्तरवासिनोऽधिकृत्येदमुच्यते । अस्माकमस्तमयपर्वतोमेरोरुत्तरपार्श्वस्थानामुदयगिरिः । तेषामस्तगिरिरस्माकमुदयगिरिः । अतोस्तगिरेरपिभानोर्निर्गमनंसंभवति ॥ स० अस्ततटात् । स्वल्पोपनिमित्तापञ्चमी । अस्तंतटमुद्दिश्ययथानिष्पतति तथावाल्यपिनिष्पपात । उदयगिरेरित्यनुक्त्वाऽस्ततटादितिकथनेनवालिनोल्पकालशेषोद्योत्यते । प्राचीनेचैतच्छ्लोकव्याख्यानेसंगतेअसंगतेवासुधियोविभावयन्तु ॥ १६ ॥ ति० बुधाङ्गारकयोरिव । "वज्रगोकर्णयोर्यथा" इतिपाठान्तरं । वज्रगोकर्णौ तदाख्यपर्वतौ । यथा तथेतिशेषः ॥ १७ ॥ ति० अशनिः दंभोलिः । वज्रं वज्रायुधं ॥ १८ ॥ शि० यत् यस्माद्धेतोः राघवः नावगच्छत् मिलितत्वात्समानाकारत्वाच्चविविच्यबोद्धुंनैच्छत् ततः तस्माद्धेतोः । अन्तकरंशरंमोक्तुं बुद्धिं निश्चयं । नकृतवान् । एतेन वालिनिरामस्यस्नेहः सूचितः । तेनसुग्रीवविषयकस्नेहस्यपराकाष्ठाव्यञ्जिता । तेनेदानीमपियदिद्वयोर्मैत्रीस्यात्तर्हि नहनिष्यामीतिरामाभिप्रायोव्यक्तः ॥ २० ॥ स० स्तेनश्चासौ

[पा०] १ क. पराहिमे. २ ङ. छ.—ट. लक्ष्मणानुगतं. ३ क. छ. झ. ञ. ट. द्रच्छाम. ङ. च. ज. द्रच्छाव. ४ ख. ङ. छ. झ. ट. व्यतिष्ठन्, ५ च. ज. न्गहनेतुते. ६ ग. ङ. छ. ज. झ. ट. सुग्रीवोप्यनदत्, ७ क. ख. ङ.—ट. निष्पपात. ८ छ. झ. ञ. ट. समुदैक्षत. ९ ख. यन्नाध्यगच्छत्, १० घ. च. छ. ज. ञ. चापि.

क्लान्तो रुधिरसिक्ताङ्गः प्रहारैर्जर्झरीकृतः ॥ वालिनाऽभिद्रुतः क्रोधात्प्रविवेश महावनम् ॥ २२ ॥
तं प्रविष्टं वनं दृष्ट्वा वाली शापभयार्दितः ॥ मुक्तो ह्यसि त्वमित्युक्त्वा संनिवृत्तो महाद्युतिः ॥
[निवृत्तः स्वपुरीं प्राप क्रोधाविष्टो महाबलः ॥ २३ ॥]
राघवोपि सह भ्रात्रा सह चैव हनूमता ॥ तदेव वनमागच्छत्सुग्रीवो यत्र वानरः ॥ २४ ॥
तं समीक्ष्यागतं रामं सुग्रीवः सहलक्ष्मणम् ॥ ह्रीमान्दीनमुवाचेदं वसुधामवलोकयन् ॥ २५ ॥
आह्वयस्वेति मामुक्त्वा दर्शयित्वा च विक्रमम् ॥ वैरिणा घातयित्वा च किमिदानीं त्वया कृतम् ॥२६॥
तामेव वेलां वक्तव्यं त्वया राघव तत्त्वतः ॥ वालिनं न निहन्मीति ततो नाहमितो व्रजे ॥
[किंनु तत्कारणं येन शक्तेन हि न हन्यते ॥ २७ ॥]
तस्य चैवं ब्रुवाणस्य सुग्रीवस्य महात्मनः ॥ करुणं दीनया वाचा राघवः पुनरब्रवीत् ॥ २८ ॥
सुग्रीव श्रूयतां तात क्रोधश्च व्यपनीयताम् ॥ कारणं येन बाणोऽयं न मया स विसर्जितः ॥ २९ ॥
अलंकारेण वेषेण प्रमाणेन गतेन च ॥ त्वं च सुग्रीव वाली च सदृशौ स्थः परस्परम् ॥ ३० ॥
स्वरेण वर्चसा चैव प्रेक्षितेन च वानर ॥ विक्रमेण च वाक्यैश्च व्यक्तिं वां नोपलक्षये ॥
ततोऽहं रूपसादृश्यान्मोहितो वानरोत्तम ॥ ३१ ॥
नोत्सृजामि महावेगं शरं शत्रुनिबर्हणम् ॥ जीवितान्तकरं घोरं सादृश्यात्तु विशङ्कितः ॥
मूलघातो न नौ स्याद्धि द्वयोरपि कृतो मया ॥ ३२ ॥

न्वयः ॥ १९—२१ ॥ जर्झरीकृतः परुषत्वकृतः ॥ २२—२४ ॥ वसुधामवलोकयन्निति लज्जानुभावः ॥ २५ ॥ दर्शयित्वाचविक्रममिति व्यतिरेकोक्तिः । त्वया किंकृतं किंचिन्तितमित्यर्थः । कृतिरनेकार्थः ॥ २६ ॥ तामेववेलामिति । अत्यन्तसंयोगे द्वितीया । वालिनंजहि काकुत्स्थेतिप्रार्थनवेलायामित्यर्थः । ततः तथोक्तंचेत् ॥ २७ ॥ करुणं सदयं अब्रवीत् ॥ २८ ॥ येनकारणेन बाणो नविसर्जितः तत्कारणं श्रूयतां श्रुत्वा क्रोधश्चापनीयतामितियोजना ॥ २९ ॥ वेषेण आकारेण । प्रमाणेन औन्नत्येन । गतेन गमनेन ॥ ३० ॥ वर्चसा तेजसा । प्रेक्षितेन वीक्षणेन । वाक्यैः भाषणैः । व्यक्तिं विशेषं । मोहितः संजातमोहः । विशेषानभिज्ञइत्यर्थः ॥ ३१ ॥ नोत्सृजामीत्यादिसार्धश्लोक एकान्वयः । अन्ते इतिकरणं द्रष्टव्यं । द्वयोरपि नौ मया मूलघातो न कृतःस्यादितिहि शरंनोत्सृजामि नोत्सृष्टवानस्मीति योजना । ननु काञ्चनमालारूपो वालिनोविशेषोस्ति । सत्यं । तस्मिन्दिने तन्नभृत्वागतवानितिज्ञेयं । यद्यप्यत्र मत्तत्वभोगचिह्नाश्रान्तत्वपुरनिर्गतत्वादिकं बाल्यसाधारणमस्ति । समीपस्थाहनुमदादयश्चप्रष्टुंशक्याः स्वयंचसू-

वालीचतेनेत्यप्यर्थः । भार्यापहर्त्रेत्यभिप्रायः ॥ २१ ॥ स० विक्रमंदर्शयित्वा सालभेदनादिनेतिशेषः ॥ ति० किंकृतं अनुचितमेवकृतमित्यर्थः ॥ २६ ॥ शि० हेसुग्रीव त्वंवालीच अलङ्कारादिनास्वरादिनाचपरस्परंसदृशौस्थः । अतः व्यक्तिं द्वयोर्विभिन्नलोकप्राप्तिं । नोपलक्षये नानुमिनोमि । वालिनिमृते त्वमपितत्स्नेहान्मरिष्यसीतितात्पर्यं । वाक्यैः वचनरचनाविशेषैः । अतएववचसेत्यनेननपौनरुक्त्यं ॥ ३०—३१ ॥ ति० मोहितइति । नन्विदमनुचितंयद्भगवतोमोहः । अमोहेमोहइत्यनृतकथनंच । किंचपलायनसमयेऋश्यमूकाभिमुखधावनेनव्यक्तिरस्त्येवेतिचेन्न । वालिनआयुर्दायासमाप्त्यातथाकरणेपिसुग्रीवसंतोषायस्वस्मिन्मानुष्यबुद्ध्यनुत्पादायचात्मनिमोहोत्प्रेक्षयासमाधानादक्षतेः । मोहितइत्यस्यइवेतिशेषः । ईदृशेविषयेएवंविधानृतवचनंन दोषायेत्यप्यनेनध्वनितं । नोत्सृजामि नोदसृजं ॥ शि० ततः तस्मात्रूपसादृश्याद्धेतोः । मोहितः मा न ऊहितं तर्कितंयेनसोहं शरंनोत्सृजामि । ननुममापिमरणेतवकाक्षतिरित्यतआह । सादृश्यात् तन्मूलकात्तवापिमरणादित्यर्थः । हेतोःनौ आवयोर्द्वयोः । मूलघातः मूलयोः राज्यप्राप्तिस्त्रीप्राप्तिरूपहेत्वोः विघातोविनाशोनस्यात् इतिविशङ्कितोहमभवमितिशेषः । सदृशभ्रातृमरणेतज्जनित-

[पा०] १ क. ग. महद्वनं. २ क. च. छ. झ. ञ. ट. भयात्ततः. ३ क. ग. ङ. छ. झ. सनिवृत्तोमहाबलः. ञ. ट. संनिवृत्तोमहाबलः. ४ इदमर्धं क. पाठेदृश्यते. ५ क. सचिवैश्च. ६ ग. ङ. च. ञ. तंनहन्मीति. ख. नहिहन्मीति. ७ इदमर्धं क. ङ. च. ज. ञ. पाठेषुदृश्यते. ८ घं. छ. ट. वचसा. ९ छ. झ. ट. द्वयोरिति.

त्वयि वीरे विपन्ने हि अज्ञानाल्लाघवान्मया ॥ मौढ्यं च मम बाल्यं च ख्यापितं स्याद्धरीश्वर ॥३३॥
दत्ताभयवधो नाम पातकं महदुच्यते ॥ ३४ ॥
अहं च लक्ष्मणश्चैव सीता च वरवर्णिनी ॥ त्वदधीना वयं सर्वे वनेऽस्मिञ्शरणं भवान् ॥ ३५ ॥
तस्माद्युध्यस्व भूयस्त्वं मा मा शङ्कीश्च वानर ॥ एतन्मुहूर्ते सुग्रीव पश्य वालिनमाहवे ॥
निरस्तमिषुणैकेन वेष्टमानं महीतले ॥ ३६ ॥
अभिज्ञानं कुरुष्व त्वमात्मनो वानरेश्वर ॥ येन त्वामभिजानीयां द्वन्द्वयुद्धमुपागतम् ॥ ३७ ॥
गजपुष्पीमिमां फुल्लामुत्पाट्य शुभलक्षणाम् ॥ कुरु लक्ष्मण कण्ठेऽस्य सुग्रीवस्य महात्मनः ॥ ३८ ॥
ततो गिरितटे जातामुत्पाट्य कुसुमाकुलाम् ॥ लक्ष्मणो गजपुष्पीं तां तस्य कण्ठे व्यसर्जयत् ॥ ३९॥
स तया शुशुभे श्रीमाँल्लतया कण्ठसक्तया ॥ विपरीत इवाकाशे सूर्यो नक्षत्रमालया ॥ ४० ॥
मालयेव बलाकानां ससन्ध्य इव तोयदः ॥ विभ्राजमानो वपुषा रामवाक्यसमाहितः ॥
जगाम सह रामेण किष्किन्धां वालिपालिताम् ॥ ४१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे द्वादशः सर्गः ॥ १२ ॥

क्ष्मज्ञः " प्रेक्षितज्ञास्तुकोसलाः " इत्युक्तेः । तथापि " त्वया मया च कुन्त्या च" इति न्यायेनसाधारण्यं परिहर्तुं दृष्टहेतून्कांश्चिदुक्तवान्राम इति ज्ञेयं ॥ ३२—३५ ॥ मा मा शङ्कीरिति । मा मां प्रति । मा शङ्कीः शङ्कां मा कुरु । व्यत्ययेनपरस्मैपदं ॥३६॥ अभिज्ञानं चिह्नं ॥ ३७ ॥ गजपुष्पीं नागपुष्पींनाम लतां ॥ ३८ ॥ व्यसर्जयत् अमोचयत् बद्धवान् ॥३९॥ विपरीत इवेत्याद्युपरि विव्रीयते ॥४०॥ ससन्ध्य इवतोयदइति । सुग्रीवस्यहेमपिङ्गलत्वादितिभावः ॥ ४१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने द्वादशः सर्गः ॥ १२ ॥

दुःखेनयदिसुग्रीवमृतिस्स्यात् तर्हितद्राज्यप्राप्तिविघातःस्यात् अतस्तद्व्यापारसाध्यसीताप्राप्तिविरहोभवेदितितात्पर्यं । अतएवमया कृतःप्रक्षेपाभावइतिशेषः ॥ ३१—३२ ॥ ति० दत्तमभयमस्मै सदत्ताभयः तस्यवधोमहत्पातकमितिनाम प्रसिद्धं ॥ ३४ ॥ स्वमूलघातमप्याह—अहमिति ॥३५॥ ति० मामाशङ्कीरित्याबाधायांद्वित्वं ॥ ३६ ॥ शि० अभिज्ञानमिति । येन द्वन्द्वयुद्धमुपागतंत्वां अहमभिजानीयां भ्रातृमरणजनितं महद्दुःखमस्मिन्नभविष्यतीतिनिश्चिनुयां । तत् आत्मनोऽभिज्ञानं । अतिशोकानुत्पत्त्यभिज्ञापकचिह्नंकुरुष्व ॥ ३७ ॥ ति० शुभंसम्यग्लक्षयतीतिशुभलक्षणा तां ॥ शि० हेलक्ष्मण शुभलक्षणां अतिशोकानुत्पादकत्वेनशुभप्रापिकां गजपुष्पीं । सुग्रीवस्यकण्ठेकुरु । एतेनगजपुष्पीनिबद्धानामतिशोकोनभवतीतिसूचितं ॥ ३८ ॥ टीका० मुत्पाट्यशुभदारुजामितिपाठः । शुभदारुजां देवदारुद्रुमाश्रितां । " भद्रदारुद्रुकिलिमंदेवदारुच " इत्यमरः ॥ ३९ ॥ स० सतयेत्यर्धानन्तरं "विपरीतइवाकाशेसूर्योनक्षत्रमालयेतिपाठःक्वचिद्दृश्यतेचेत्तस्यायमर्थः । विपरीते रात्रौ । "विपरीतंतुशर्वरी" इत्यभिधानात् । सूर्यः राकामध्यगतश्चन्द्रः । " राकामध्यगतश्चन्द्रःसूर्यइत्यभिधीयते"इत्युक्तेः ॥ नक्षत्रमालयासूर्यइवायमपिशुशुभइतिविपरीतः अभूतोदृष्टान्तइतिवा ॥ ४० ॥ इतिद्वादशःसर्गः ॥ १२ ॥

[पा०] १ क.—ट. स्यात्कपीश्वर. २ झ. ट. महदद्भुतं. ३ ञ. मामां. ख. ग. माशङ्कांगन्तुमर्हसि. क. निश्शङ्कोवानरेश्वर. ४ क.—ङ. एतन्मुहूर्तंतुमया. च.—ट. एतन्मुहूर्तेतु. त. ५ ग. वानरोत्तम. ६ क. जातांसमुत्पाट्यसुपुष्पितां. ७ ङ.—ट. कुसुमायुतां. ८ क. ङ. च. ज. समार्पयत्. ख. न्यवेशयत्. घ. न्यसर्जयत्. ९ ङ. च. ज. ञ. श्रीमान्मालया. १० इदमर्धं झ. ठ. पाठयोर्नदृश्यते. ११ क. सन्ध्याताम्रोवलाहकः. १२ झ. पुनरापसः. छ. पुनरागतः.

त्रयोदशः सर्गः ॥ १३ ॥

रामेणवालिवधायसुग्रीवादिभिःसहकिष्किन्धांप्रतिप्रस्थानम् ॥ १ ॥ तथासुग्रीवंप्रतिमध्येमार्गंदृष्टस्यसप्तजनाश्रमस्यतत्वप्रश्नः ॥ २ ॥ सुग्रीवेणतंप्रतितत्रदुश्चरतपश्चर्ययासशरीरंदिवंगतानांसप्तर्षीणांतपःप्रभावेनतदाश्रमस्यसुरादिदुरधिगमत्वादिमहिमानुवर्णनपूर्वकंश्रेयःप्राप्तयेलक्ष्मणेनसहतन्महर्षिनमनचोदना ॥ ३ ॥ रामेणमुनिनमनपूर्वकंसुग्रीवादिभिःसहकिष्किन्धागमनम् ॥ ४ ॥

ऋश्यमूकात्स धर्मात्मा किष्किन्धां लक्ष्मणाग्रजः ॥ जगाम सहसुग्रीवो वालिविक्रमपालिताम् ॥ १ ॥
समुद्यम्य महच्चापं रामः काञ्चनभूषितम् ॥ शरांश्चादित्यसंकाशान्गृहीत्वा रणसाधकान् ॥ २ ॥
अग्रतस्तु ययौ तस्य राघवस्य महात्मनः ॥ सुग्रीवः संहतग्रीवो लक्ष्मणश्च महाबलः ॥ ३ ॥
पृष्ठतो हनुमान्वीरो नलो नीलश्च वानरः ॥ तारश्चैव महातेजा हरियूथपयूथपः ॥ ४ ॥
ते वीक्षमाणा वृक्षांश्च पुष्पभारावलम्बिनः ॥ प्रसन्नाम्बुवहाश्चैव सरितः सागरंगमाः ॥ ५ ॥
कन्दराणि च शैलाश्च निर्दराणि गुहास्तथा ॥ शिखराणि च मुख्यानि दरीश्च प्रियदर्शनाः ॥ ६ ॥
वैडूर्यविमलैः पर्णैः पद्मैश्चाकोशकुड्मलैः ॥ शोभितान्सजलान्मार्गे तटाकांश्च व्यलोकयन् ॥ ७ ॥
कारण्डैः सारसैर्हंसैर्वञ्जुलैर्जलकुक्कुटैः ॥ चक्रवाकैस्तथा चान्यैः शकुनैरुपनादितान् ॥ ८ ॥
मृदुशष्पाङ्कुराहारान्निर्भयान्वनगोचरान् ॥ चरतः सर्वतोऽपश्यन्स्थलीषु हरिणान्स्थितान् ॥ ९ ॥
तटाकवैरिणश्चापि शुक्लदन्तविभूषितान् ॥ घोरानेकचरान्वन्यान्द्विरदान्कूलघातिनः ॥ १० ॥
मत्तान्गिरितटोत्कृष्टान्पर्वतानिव जङ्गमान् ॥ वारणान्वारिदप्रख्यान्महीरेणुसमुक्षितान् ॥ ११ ॥
वने वनचरांश्चान्यान्खेचरांश्च विहङ्गमान् ॥ पश्यन्तस्त्वरिता जग्मुः सुग्रीववशवर्तिनः ॥ १२ ॥
तेषां तु गच्छतां तत्र त्वरितं रघुनन्दनः ॥ द्रुमषण्डं वनं दृष्ट्वा रामः सुग्रीवमब्रवीत् ॥ १३ ॥

अथ पुनः कीष्किन्धाप्रवेशस्त्रयोदशे—ऋश्यमूकादित्यादि ॥ १—२ ॥ संहतग्रीवः निबिडकण्ठ इत्यर्थः । इदं स्वरूपकीर्तनं गजपुष्पीबन्धनेन वा ॥ ३—४ ॥ अथ कार्यसिद्धिसूचकपदार्थानुभवविशेषं दर्शयति—ते वीक्षमाणा इत्यादिना ॥ ५ ॥ कन्दराणि गृहाकारगुहाविशेषान् । निर्दराणि स्फुटितशैलरन्ध्रविशेषान् । गुहाः देवखातबिलानि । दरीः गुहाविशेषान् ॥ ६ ॥ आकोशकुड्मलैः ईषद्विकसितमुकुलैः ॥ ७ ॥ कारण्डैः । "कारण्डको महापक्षी" इति वैजयन्ती । सारसैः सरोनिवासैःशकुनैरुपनादितान् तटाकान् व्यलोकयन्निति पूर्वेणान्वयः ॥८॥ चरतः स्थितांश्चापश्यन् ॥९॥ तटाकवैरिणः कलुषीकरणात् । एकचरान् एकाकिनः । द्विरदाः द्विदन्ताइति चतुर्दन्तव्यावृत्तिः । गिरितटोत्कृष्टान् उल्लिखितगिरितटान् ॥ १०—१२ ॥ द्रुमषण्डंवृक्षषण्डमयमिति

स० आदित्यसंकाशान् आदित्यं प्रागादित्यंसुग्रीवं सम्यक्प्रकाशयन्तीतितथातान् ॥ २ ॥ ति० हरियूथपानामपियूथंपातितादृशः ॥ ४ ॥ रामानु० "कन्दराणिगुहाश्चैवशैलांस्तानिवनानिच" इतिबहुकोशेषुपाठः । कन्दराणि मन्दिराकाराकारितशिलाविवरविशेषान् । गुहाः देवखातबिलानि । दरीः स्फुटितशैलरंध्रविशेषान् ॥ ६ ॥ अकोशकुड्मलैः अकोशैः विकसितैः । कुड्मलैः मुकुलैः ॥ ७ ॥ टी० कारण्डः कारण्डवः नामैकदेशेनामग्रहणं । एतैरुपलक्षितांस्तटाकानपश्यन्नित्यन्वयः ॥ ८ ॥ शि० पश्यन् पश्यन्तः ॥ ९ ॥ रामानु० द्विरदवारणशब्दयोस्तत्तत्स्थलावस्थितव्यक्तिभेदवाचकत्वेननपौनरुक्त्यं । गिरितटा-

[पा०] १ घ. ऋश्यमूकात्तु. २ क. कनकभूषितं. ३ छ. झ. ट. लक्ष्मणस्य. ४ छ. ज. झ. ट. वीर्यवान्. ५ छ.—ट. विमलैस्तोयै. ६ क. ग. ङ. छ.—ट. आवलोकयन्. ७ क. ख. ग. ङ. छ.—ट. शकुनैःप्रतिनादितान्. ८ क. ख. ग. हारान्मृगपोतांश्चनिर्भयान्. ९ ङ. छ. झ. ट. न्वनचारिणः. १० च. ज. पर्वतेपश्यन्. ङ. झ. ट. सर्वतःपश्यन्. ११ ग. हरिणान्मृगान्. क. हरिणांस्तथा. १२ ङ. छ. झ. ट. तटोद्घुष्टान्. ग. तटोत्कृष्टाञ्जङ्गमानिवपर्वतान्. १३ छ. झ. ट. वानरान्द्विरदप्रख्यान्. १४ ग. रेणुसुभूषितान्.

एष मेघ इवाकाशे वृक्षषण्डः प्रकाशते ॥ मेघसंघातविपुलः पर्यन्तकदलीवृतः ॥ १४ ॥
किमेतज्ज्ञातुमिच्छामि सखे कौतूहलं हि मे ॥ कौतूहलापनयनं कर्तुमिच्छाम्यहं त्वया ॥ १५ ॥
तस्य तद्वचनं श्रुत्वा राघवस्य महात्मनः ॥ गच्छन्नेवाचचक्षेऽथ सुग्रीवस्तन्महद्वनम् ॥ १६ ॥
एतद्राघव विस्तीर्णमाश्रमं श्रमनाशनम् ॥ उद्यानवनसंपन्नं स्वादु मूलफलोदकम् ॥ १७ ॥
अत्र सप्तजना नाम मुनयः संशितव्रताः ॥ सप्तैवासन्नधःशीर्षा नियतं जलशायिनः ॥ १८ ॥
सप्तरात्रकृताहारा वायुना वनवासिनः ॥ दिवं वर्षशतैर्याताः सप्तभिः सकलेवराः ॥ १९ ॥
तेषामेवंप्रभावानां द्रुमप्राकारसंवृतम् ॥ आश्रमं सुदुराधर्षमपि सेन्द्रैः सुरासुरैः ॥ २० ॥
पक्षिणो वर्जयन्त्येतत्तथाऽन्ये वनचारिणः ॥ विशन्ति मोहाद्ये तत्र निवर्तन्ते न ते पुनः ॥ २१ ॥
विभूषणरवास्तत्र श्रूयन्ते सकलाक्षराः ॥ तूर्यगीतस्वनाश्चात्र गन्धो दिव्यश्च राघव ॥ २२ ॥
त्रेताग्नयोपि दीप्यन्ते धूमो ह्येष प्रकाशते ॥ वेष्टयन्निव वृक्षाग्रान्कपोताङ्गारुणो घनः ॥ २३ ॥
एते वृक्षाः प्रकाशन्ते धूमसंसक्तमस्तकाः ॥ मेघजालप्रतिच्छन्ना वैडूर्यगिरयो यथा ॥ २४ ॥
कुरु प्रणामं धर्मात्मंस्तान्समुद्दिश्य राघव ॥ लक्ष्मणेन सह भ्रात्रा प्रयतः संयताञ्जलिः ॥ २५ ॥
प्रणमन्ति हि ये तेषां मुनीनां भावितात्मनाम् ॥ न तेषामशुभं किंचिच्छरीरे राम दृश्यते ॥२६॥
ततो रामः सह भ्रात्रा लक्ष्मणेन कृताञ्जलिः ॥ समुद्दिश्य महात्मानस्तानृषीनभ्यवादयत् ॥ २७ ॥
अभिवाद्य तु धर्मात्मा रामो भ्राता च लक्ष्मणः ॥ सुग्रीवो वानराश्चैव जग्मुः संहृष्टमानसाः ॥२८॥

लतागुल्मव्यावृत्तिः॥१३॥ मेघ इवेति नीलवर्णे उपमा ॥ १४—१८ ॥ सप्तरात्रकृताहाराः वायुना सप्तरात्रस्य एकवारंकृताहाराः । सप्तभिर्वर्षशतैरित्यन्वयः ॥ १९ ॥ ये मोहादत्राश्रमे विशन्ति न ते निवर्तन्ते किंतु तत्रैव नश्यन्तीत्यर्थः ॥ २०—२१ ॥ दिवं गताःशरीरान्तरेण पुनरत्रागत्याप्सरोभिः क्रीडन्तीत्याशयेनाह—विभूषणेत्यादिना ॥ भूषणरवेण नृत्तमुपलक्ष्यते । सकलाक्षराइति गीतस्वनविशेषणं । तूर्यशब्दोत्र गीतमिश्रवाद्यपरः ॥ २२ ॥ त्रेताग्निदीपने लिङ्गमाह—धूमो हीति । घनः निबिडः ॥ २३—२४ ॥ समुद्दिश्य किंचित्फलमुद्दिश्य । तेषां प्रणामं कुरु ॥२५॥ शरीरे अशुभं व्याध्यादिकं ॥२६॥ महात्मानः महात्मनः॥२७॥ अभिवाद्येति । अनेन सर्वेषाममिवादनमनूद्यते । अत्राभिवादनं नमस्कारः । तेषां परोक्षत्वात् । अनेन सज्जनप्रणामो विजयावह इत्ययमर्थः सूचितः । तदिदं द्योत्यते उप-

नुत्कर्षन्तीतिगिरितटोत्कृष्टान् तान् । कर्तरिक्तः ॥ स० गिरितटोत्कृष्टान् गिरितटापेक्षयोत्कृष्टान् ॥ ११ ॥ ती० गच्छन्नेवेति शत्रुप्रत्ययेन कार्यक्षमसूचिता ॥ १६ ॥ शि० सप्तजननामनिमित्तमुभयमाह—सप्तेति । सप्तरात्रेष्वतीतेषतीतिशेषः । वायुनाकृताहाराः । अचलवासिनः निश्चलनिवसनशीलाः ॥ १९ ॥ ति० एतदाश्रमं । अर्धर्चादिराश्रमशब्दः । स० नपुंसकत्वमार्ष । "संबन्धमनुवर्तिष्यते"इतिमहाभाष्यानुसारेण "चमजपाः—"इत्यस्यप्रायिकत्वादानदोषः ॥ २० ॥ शि० वर्जयन्ति अतितेजोदर्शनजनितभियानगच्छन्तीत्यर्थः ॥ २१ ॥ ति० सकलाक्षराः कलाक्षरामिर्मधुराक्षरामिर्वाणिसहिताः । भूषणरवाः अप्सरसामितिशेषः ॥२२॥ ति० तेषामुद्दिश्य तानुद्दिश्येतियावत् ॥२५॥ शि० हेराम भावितात्मनां परिशीलितपरमात्मनां । ऋषीणांयेप्रणमन्ति तेषांशरीरे अशुभं शुभविरोधि शोकादिकमित्यर्थः । नविद्यते नश्यति ऋषीणामित्यत्रसंबन्धसामान्यविवक्षयाषष्ठी ॥ २६ ॥ ति० वानराः हनुमदादयः । एतत्कथाप्रश्नादिकं वाल्यायुस्समाप्तिकाललाभाय ॥ २८ ॥

[पा०] १ क. ङ.—ट मम. ख. ग. महत्. २ क. ग. सन्महावनं. ङ. च. ज. ञ. सद्वनंमहत्. ३ क. ङ. नियताः. ४ छ. झ. ट. वायुनाचलवासिनः. ५ क. छ. झ. ट. तेषामेतत्प्रभावेण. ६ च. झ. मोहाद्येप्यत्र. ७ झ. ट. ननिवर्तन्ते. ८ क. ख. घ. ङ. च. ज.—ट. स्वनाश्चापि. घ. स्वराश्चात्र. १० क. ङ. छ.—ट. ह्येषप्रदृश्यते. च. ह्यत्रप्रदृश्यते. ख. ह्यपप्रकाशते. ११ क. धूमसंरक्तसच्छदाः. १२ क.—ङ. छ.—ट. तेषामुद्दिश्य. १३ क.—ङ. ज. झ. ट. तेषामृषीणां. १४ ख. ङ. ज. ट. विद्यते. १५ ङ. छ.—ट. अभिवाद्यच.

ते गत्वा दूरमध्वानं तस्मात्सप्तजनाश्रमात् ॥ ददृशुस्तां दुराधर्षां किष्किन्धां वालिपालिताम् ॥२९॥
ततस्तु रामानुजरामवानराः प्रगृह्य शस्त्राण्युदिताम्यतेजसः ॥
पुरीं सुरेशात्मजवीर्यपालितां वधाय शत्रोः पुनरागताः सह ॥ ३० ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे त्रयोदशः सर्गः ॥ १३ ॥

चतुर्दशः सर्गः ॥ १४ ॥

रामादिभिःकिष्किन्धासमीपवनेवृक्षैरात्माच्छादनेनावस्थानम् ॥ १ ॥ सुग्रीवेणरामंप्रति वालिवधप्रतिज्ञायाःसफलीकरणप्रार्थना ॥ २ ॥ रामेणसुग्रीवंप्रतिप्रत्ययोत्पादनपूर्वकंवालिवधप्रतिज्ञानेनतदाश्वासनोद्यमः ॥ ३ ॥ सुग्रीवेणसगर्जनंयुद्धाह्वानवाक्याक्षालनम् ॥ ४ ॥

सर्वे ते त्वरितं गत्वा किष्किन्धां वालिपालिताम् ॥ वृक्षैरात्मानमावृत्य व्यतिष्ठन्गहने वने ॥ १ ॥
विचार्य सर्वतो दृष्टिं कानने काननप्रियः ॥ सुग्रीवो विपुलग्रीवः क्रोधमाहारयद्भृशम् ॥ २ ॥
ततः स निनदं घोरं कृत्वा युद्धाय चाह्वयत् ॥ परिवारैः परिवृतो नादैर्भिन्दन्निवाम्बरम् ॥
गर्जन्निव महामेघो वायुवेगपुरस्सरः ॥ ३ ॥
अथ बालार्कसदृशो दृप्तसिंहगतिस्तदा ॥ दृष्ट्वा रामं क्रियादक्षं सुग्रीवो वाक्यमब्रवीत् ॥ ४ ॥
हरिवागुरया व्याप्तां तप्तकाञ्चनतोरणाम् ॥ प्राप्ताः स्म ध्वजयन्त्राढ्यां किष्किन्धां वालिनः पुरीम् ॥५॥
प्रतिज्ञा या त्वया वीर कृता वालिवधे पुरा ॥ सफलां तां कुरु क्षिप्रं लतां काल इवागतः ॥ ६ ॥
एवमुक्तस्तु धर्मात्मा सुग्रीवेण स राघवः ॥ तमथोवाच सुग्रीवं वचनं शत्रुसूदनः ॥ ७ ॥
कृताभिज्ञानचिह्नस्त्वमनया गजसाह्वया ॥ लक्ष्मणेन समुत्पाट्य यैषा कण्ठे कृता तव ॥ ८ ॥

रितनश्लोके उदिताभ्यतेजसइति । प्रणामेनेतिभावः ॥ २८—२९ ॥ सह युगपत् ॥ ३० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने त्रयोदशः सर्गः ॥ १३ ॥

अथ बाल्याज्ञानभीतं सुग्रीवं निश्वासयति रामश्चतुर्दशे—सर्वे इत्यादि ॥ १—२ ॥ वायुवेगपुरःसरः वायुवेगान्मेघे अधिको ध्वनिरिति प्रसिद्धिः । यतः वायुवेगपुरस्सरः अतएव गर्जन्महामेघइव स्थितः । परिवारैः परिवृतः सः नादैरम्बरं भिन्दन्निव घोरं निनदं कृत्वा युद्धायाह्वयत् । वालिनमितिशेषः ॥ ३—४ ॥ हरिवागुरया हरय एव वागुरा मृगग्रहणपाशः तया व्याप्तां इतरदुष्प्रवेशामित्यर्थः । यद्वा हरिवागुरया हरिगृहैः । आलेकवचनं । " वागुरा मृगशालिका " इति वैजयन्ती ॥ ५ ॥ आगतः कालः फलकालः ॥ ६—७ ॥ अभिज्ञापकंचिह्नं अभिज्ञानचिह्नं । कृतमभिज्ञानचिह्नं यस्य स तथा । गजपुष्प्यामेव गजसाशब्दः । यद्वा गजेन समा आह्वा आख्या यस्याः सा गजसाह्वा तया शोभत इति । अत्राहुः—विपरीते रात्रौ । सूर्यः पूर्णचन्द्रः । " परीतं तु दिवा प्रोक्तं विपरीतं तु शर्वरी " " राकामभ्यगतश्चन्द्रः सूर्य इत्यभिधीयते " इति वचनात् । यद्वा नक्षत्रमालया विपरीतः विशेषेण

ति० शस्त्राणि यानराणांशस्त्रं शिलादि ॥ ३० ॥ इतित्रयोदशःसर्गः ॥ १३ ॥
ति० बालार्कसदृश' वर्णेनप्रतापेनच ॥ ४ ॥ ति० ध्वजैर्यन्त्रैः प्राकारयुद्धापेक्षितैः । आढ्यां ॥ ५ ॥

[पा०] १ क. ङ. छ.—ट. ष्युदितोग्रतेजस . २ ज. सञ्जाः. ३ छ. झ. ञ. ट. रागतास्त्विह. ४ क. ख. ग. ङ.—ट. वालिनःपुरी. ५ क.—ट. निसार्य. ६ ज. झ. ट. ततस्तु. ७ ख. ङ.—ट. स्वतः. ८ क. ग. ङ. च. ज.—ट. भूषणां. ९ ग. वालिपालितां. १० ख. याप्रतिज्ञा. छ. झ. ञ. ट. प्रतिज्ञायाकृतावीरलया. ११ छ. झ. ञ. कुरुतां. १२ घ. सुग्रीवेणहि. १३ क. ग. तमेवोवाच. छ. झ. ट. तमेवोवाचवचनंसुग्रीवं. ङ. च. ज. ञ. तदेवोवाचवचनंसुग्रीवं. १४ घ. छ. ज. झ. ट. एषा.

शोभसे ह्यधिकं वीर लतया कण्ठसक्तया ॥ विपरीत इवाकाशे सूर्यो नक्षत्रमालया ॥ ९ ॥
अद्य वालिसमुत्थं ते भयं वैरं च वानर ॥ एकेनाहं प्रमोक्ष्यामि बाणमोक्षेण संयुगे ॥ १० ॥
मम दर्शय सुग्रीव वैरिणं भ्रातृरूपिणम् ॥ वाली विनिहतो यावद्वने पांसुषु वेष्टते ॥ ११ ॥
यदि दृष्टिपथं प्राप्तो जीवन्स विनिवर्तते ॥ ततो दोषेण माऽऽगच्छेत्सद्यो गर्हेच्च मा भवान् ॥१२॥
प्रत्यक्षं सप्त ते साला मया बाणेन दारिताः ॥ तेनावेहि बलेनाद्य वालिनं निहतं मया ॥ १३ ॥
अनृतं नोक्तपूर्वं मे वीर कृच्छ्रेऽपि तिष्ठता ॥ धर्मलोभपरीतेन न च वक्ष्ये कथंचन ॥ १४ ॥
सफलां च करिष्यामि प्रतिज्ञां जहि संभ्रमम् ॥ प्रसूतं कलमं क्षेत्रे वर्षेणेव शतक्रतुः ॥ १५ ॥
तदाह्वाननिमित्तं त्वं वालिनो हेममालिनः ॥ सुग्रीव कुरु तं शब्दं निष्पतेद्येन वानरः ॥ १६ ॥
जितकाशी बलश्लाघी त्वया चाधर्षितः पुरा ॥ निष्पतिष्यत्यसङ्गेन वाली स प्रियसंयुगः ॥ १७ ॥

परिवृतः । सूर्यइव चन्द्रइव । अन्यशब्देनान्यस्याभिधानं कथमिति चेत् । "नवो नवो भवति" इति श्रुतौ अह्नां केतुः सूर्यः चन्द्राप्यायकत्वाच्चन्द्रमाइत्युच्यते । तद्वच्चन्द्रोपिसूर्यकिरणानुप्रवेशायत्तप्रकाशविशेषवत्त्वात्सूर्यशब्देनाभिधीयतइति । यद्वा विशेषेणपरीतो विपरीतः नक्षत्रावृतः । सूर्य इवेत्यभूतोपमा । विपरीतइत्यनेन तात्कालिकतेजोवत्त्वमुच्यते । यद्वा विपरीते विपरीतकाले । सूर्यो नक्षत्रमालयेवानया लतयाशोभसे । उत्पातकालेहि मध्याह्ने नक्षत्राणिदृश्यन्तइत्युच्यते ज्योतिश्शास्त्रे । "रात्राविन्द्रधनुर्दर्शे दिवानक्षत्रदर्शने । तद्राष्ट्रनाथनाशःस्यादितिगर्गस्यभाषितम्" इति । अतः भाविवालिवधरूपफलानुसारेण तेजसा ज्वलन्सुग्रीवः शुभ्रपुष्पावलीशोभमानगजपुष्पीमालया उत्पातकाले नक्षत्रमालया सूर्यइव बभावित्यस्मदाचार्योक्तम् ॥८–९॥ प्रमोक्ष्यामि प्रमोचयिष्यामि । अनिट्त्वमार्षं ॥१०॥ यावद्वेष्टते वेष्टिष्यते । "यावत्पुरानिपातयोर्लट्" इति लट् ॥ ११ ॥ सवाली दृष्टिपथं प्राप्तः सन् पुनर्जीवन्यदि विनिवर्तते । ततः तदा । दोषेणोपलक्षितं । मा मां । आगच्छेत् । सद्यो मा मां । भवान् गर्हेच्च गर्हेतच । यदि दृष्टमात्रेण तं नहन्यां तदामत्समीपमागच्छ मां गर्हस्वचेत्यर्थः ॥ १२–१३ ॥ मे मया । "तेमयावेकवचनस्य" इत्येतत्तृतीयायामप्यार्षे दृश्यते । अतस्तद्विशेषणेपि तृतीयाप्रयोगः । धर्मलोभपरीतेन । लोभोलब्धस्य त्यागासहिष्णुता । धर्महान्यसहिष्णुनेत्यर्थः ॥ १४ ॥ संभ्रमं संशयकृतचाञ्चल्यं । पराक्रमेण प्रतिज्ञासफलत्वकरणे दृष्टान्तमाह—प्रसूतमिति ॥ कलमं सस्यं ॥ १५ ॥ तत् तस्मात् ॥ १६ ॥ जितेन जयेन काशते प्रकाशत इति जितकाशी । ताच्छील्ये णिनिः । असङ्गेन अविलम्बेन ॥ १७ ॥

रामानु० चन्द्रसूर्यकिरणानुप्रवेशप्रकाशवत्त्वंविष्णुपुराणेप्रसिद्धं । "क्षीणंसोमंसुरैःपीतमाप्याययतिदीप्तिमान् । मैत्रेयैककलं सन्तंरश्मिनैकेनभास्करः ॥" इति ती० सुवतिप्रेरयतीतिसूर्यइतिव्युत्पत्त्या नक्षत्रमण्डलपरिवृतत्वविशेषणेनचचन्द्रएवसूर्यशब्देनोच्यते । यद्वा अभूतोपमेयं । आकाशेनक्षत्रमालयाविपरीतःविशेषेणपरिवृतःसूर्यइवत्वंशोभसे । यद्वा विपरीतइतिसप्तम्यन्तं । विपरीते रात्रौ । सूर्यः पौर्णमासीचन्द्रः । "परीतंतुदिवाप्रोक्तंविपरीतंतुशर्वरी । पौर्णमासीगतश्चन्द्रःसूर्यइत्यभिधीयते" इतिवचनात् । रात्रावाकाशेपूर्णचन्द्रोनक्षत्रमालयायथाशोभते तथाकण्ठसक्तमालयात्वंशोभसइति । गजसाह्वया गजेनसमाआह्वाआख्यायस्यास्साकुन्दलतेतियावत् । तया ॥ ति० नक्षत्रमालया आकाशेविपरीतःविशेषेणवेष्टितःसूर्यइव । कविविकल्पितोपमाऽलीकोपमा । तेनतादृशस्सूर्योयदिभवेत्तदा तरुणार्कवर्णस्यकण्ठसक्तशुक्लपुष्पमालस्योपमास्यादितित्यशयोक्तिरत्रव्यङ्ग्या ॥ ९ ॥ स० एकेनबाणमोक्षेणेत्यनेन तस्यैवबाणस्यद्वितीयवारंमोचनमपिनास्तीतिसूचितं । प्रमोक्ष्यामि अन्तर्णीतण्यर्थः ॥ १० ॥ स० दृशेर्ण्यन्तत्वदशायां द्विकर्मकत्वेनमामितिवक्तव्येममेत्युक्तिः स्वतस्सर्वज्ञत्वाद्रामस्यदर्शयेत्युक्तिरौपचारिकीतिदर्शयितुं । वालीविनिहतस्सन्यावद्वनेवेष्टते तावन्ममदर्शय । यावद्वनेसमग्रवनइतिवा ॥ ११ ॥ शि० कृच्छ्रे अत्याज्यपितृगुर्वादिपरस्परविरुद्धोक्तिसंशयजनितकष्टे ॥ १४ ॥ ति० जितकाशी जितश्वासोजितभयोवा ॥ ति० ननुकृतेप्याह्वानेस्त्र्यादिसक्तोननिष्पतिष्यतितत्राह—निपतिष्यतीति । अस-

[पा०] १ च. ज. क्षिप्रंविनिहतोयावच्चेष्टतेपांसुलुण्ठितः. २ क. ख. ग. छ. झ. ञ. ट. ततोवेत्सि. ३ छ.—ञ. रणे. ४ ख. कृच्छ्रेमहति. ५ ख. प्रभूतकलमंक्षेत्र. छ. झ. ञ. ट. प्रसूतंकलमक्षेत्रं. ६ छ. झ. ट. निमित्तंच. ७ ग. च.—ट. जयश्लाघी. ८ छ. झ. ञ. ट. पुरात्.

रिपूणां धर्षणं शूरा मर्षयन्ति न संयुगे ॥ जानन्तस्तु स्वकं वीर्यं स्त्रीसमक्षं विशेषतः ॥ १८ ॥
स तु रामवचः श्रुत्वा सुग्रीवो हेमपिङ्गलः ॥ ननर्द क्रूरनादेन विनिर्भिन्दन्निवाम्बरम् ॥ १९ ॥
तस्य शब्देन वित्रस्ता गावो यान्ति हतप्रभाः ॥ राजदोषपरामृष्टाः कुलस्त्रिय इवाकुलाः ॥ २० ॥
द्रवन्ति च मृगाः शीघ्रं भग्ना इव रणे हयाः ॥ पतन्ति च खगा भूमौ क्षीणपुण्या इव ग्रहाः ॥२१॥
ततः स जीमूतगणप्रणादो नादं ह्यमुञ्चत्त्वरया प्रतीतः ॥
सूर्यात्मजः शौर्यविवृद्धतेजाः सरित्पतिर्वाऽनिलचञ्चलोर्मिः ॥ २२ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे चतुर्दशः सर्गः ॥ १४ ॥

पञ्चदशः सर्गः ॥ १५ ॥

सुग्रीवगर्जनश्रवणजरोषेणयुद्धायनिर्गच्छन्तंवालिनंप्रति तारयासपरिष्वङ्गंयुक्त्युपन्यासेन अङ्गदवचनानुवादेनरामसाहाय्योक्त्याचसुग्रीवस्यबलीयस्त्वोक्त्या श्रीरामगुणानुवर्णनेनतच्चरणशरणीकरणपूर्वकंसुग्रीवेणसख्यकरणप्रार्थना ॥ १ ॥

अथ तस्य निनादं तु सुग्रीवस्य महात्मनः ॥ शुश्रावान्तःपुरगतो वाली भ्रातुरमर्षणः ॥ १ ॥
श्रुत्वा तु तस्य निनदं सर्वभूतप्रकम्पनम् ॥ मदश्चैकपदे नष्टः क्रोधश्चापतितो महान् ॥ २ ॥
स तु रोषपरीताङ्गो वाली सन्ध्यातपप्रभः ॥ उपरक्त इवादित्यः सद्यो निष्प्रभतां गतः ॥ ३ ॥

स्त्रीसमक्षमित्यनेन तदानीं सायंकाल इत्यवगम्यते । "प्रातर्मूत्रपुरीषाभ्यां मध्याह्ने क्षुत्पिपासया । सायं कामेनपीड्यन्ते जन्तवो निशि निद्रया" इति वचनात् ॥ १८—१९ ॥ हतप्रभाः भीतिविकृतमुखकान्तयः । गावइत्यनेन गवांपुरप्रवेशकालसूचनात्तत्कालस्य सायंतनत्वंगम्यते । राजदोषपरामृष्टाः राजदोषेण अराजकत्वरूपदोषेण परामृष्टाः परैः परपुरुषैः आमृष्टाः केशेषु गृहीताः । कुलस्त्रियइव आकुलाः गन्तव्यप्रदेशाभावेनाकुलाः ॥ २०—२१ ॥ प्रतीतः नादमोचने प्रसिद्धः । सरित्पतिर्वा समुद्रइव ॥२२॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने चतुर्दशः सर्गः ॥ १४ ॥

अथ ताराबुद्धिः पञ्चदशे—अथ तस्येत्यादि ॥ महात्मनः महाधैर्यस्य ॥ १ ॥ श्रुत्वेति स्थितस्येति शेषः । एकपदे एकस्मिन्नेव स्थाने । सद्यइत्यर्थः । आपतितः उत्पन्न इत्यर्थः ॥ २ ॥ रोषेण परीताङ्गः विपरीताङ्गः विकृतवेष इत्यर्थः । अतएव सन्ध्यातपप्रभः कोपपावकयावकिताननइतिप्रयोगात्कोपरक्तदेहत्वात्सन्ध्यातपप्रभत्वं । किंच उपरक्तः समीपरक्तः । कृतपरिवेष इत्यर्थः । परिवेषयुक्तोहिसूर्योनिष्प्रभोदृश्यते । उप-

---

ङ्गेन क्वयादिसंगपरित्यागेनेत्यर्थः । यतः प्रियसंयुगः । नमर्षयन्तीत्यस्यशूराइतिशेषः ॥ स० जितेन जयेन श्लाघीस्तुत्यः । शि० जयश्लाघीस्वविजयविषयकश्लाघावान् ॥ १७ ॥ वि० विशेषतः नमर्षयन्तीत्यनुषङ्गः ॥ १८ ॥ ती० राजदोषपरामृष्टाः राजदोषव्याप्ताः । राजाज्ञाभावेबलाधिकजारभीत्याकुलस्त्रियोयथानिष्प्रभायान्ति तथागावोयान्तीत्यर्थः ॥ ति० गावः महान्तोवृषभाः । हतप्रभाः हतशक्तयः ॥ २० ॥ स० ग्रहाः देवाः ॥ २१ ॥ ति० जीमूतवत्कृतप्रणादः । प्रतीतः रामेइतिशेषः । शौर्यैपराक्रमकरणेविवृद्धंतेजोयस्य ॥ २२ ॥ इतिचतुर्दशःसर्गः ॥ १४ ॥

टीका० एकपदे तत्काले । "एकंपदंस्यात्तत्कालेपदव्यामेकपद्यपि" इतिविश्वः ॥ शि० तस्यनिनादंश्रुत्वाविद्यमानस्यवालिनः एकपदे तस्मिन्क्षणे । मदः मत्तस्सर्वेबिभ्यतीतिगर्वः । नष्टः । क्रोध आपादितः संप्राप्तः ॥ २ ॥ ति० कनकप्रभस्यक्रो-

[पा०] १ ङ.—ट. धर्षितंश्रुत्वा. क. ग. धर्षणंवीरा. २ घ. छ. धैर्यं. ३ ट. तेन. झ. तत्र. ४ ङ.—ज. ञ. गतप्रभाः. ५ घ. पतगाभूमौ. ६ ङ.—ज. ञ. ग्रहाइव. ७ ङ.—ट. कृतप्रणादो. ८ ग. ङ. च. ज. ञ. विमुञ्चंस्त्वरया. ९ ख.—ट. निनादंतं. १० ख. घ. ङ. छ. झ. ञ. ट. आपादितो. ११ छ. झ. ट. ततो. १२ झ. ट. सकनकप्रभः. छ. कनकसप्रभः.

वाली दंष्ट्राकरालस्तु क्रोधादीप्ताग्निसन्निभः ॥ मात्युत्पतितपद्माभः समृणाल इव ह्रदः ॥ ४ ॥
शब्दं दुर्मर्षणं श्रुत्वा निष्पपात ततो हरिः ॥ वेगेन चरणन्यासैर्दारयन्निव मेदिनीम् ॥ ५ ॥
तं तु तारा परिष्वज्य स्नेहादर्शितसौहृदा ॥ उवाच वैक्लवसंभ्रान्ता हितोदर्कमिदं वचः ॥ ६ ॥
साधु क्रोधमिमं वीर नदीवेगमिवागतम् ॥ शयनादुत्थितः काल्यं त्यज मुक्तामिव स्रजम् ॥ ७ ॥
काल्यमेतेन संग्रामं करिष्यसि च वानर ॥ वीर ते शत्रुबाहुल्यं फल्गुता वा न विद्यते ॥ ८ ॥
सहसा तव निष्क्रामो मम तावन्न रोचते ॥ श्रूयतां चाभिधास्यामि यन्निमित्तं निवार्यसे ॥ ९ ॥
पूर्वमापतितः क्रोधात्स त्वामाह्वयते युधि ॥ निष्पत्य च निरस्तस्ते हन्यमानो दिशो गतः ॥ १० ॥
त्वया तस्य निरस्तस्य पीडितस्य विशेषतः ॥ इहैत्य पुनराह्वानं शङ्कां जनयतीव मे ॥ ११ ॥
दर्पश्च व्यवसायश्च यादृशस्तस्य नर्दतः ॥ निनादश्चापि संरम्भो नैतदल्पं हि कारणम् ॥ १२ ॥
नासहायमहं मन्ये सुग्रीवं तमिहागतम् ॥ अवष्टब्धसहायश्च यमाश्रित्यैष गर्जति ॥ १३ ॥
प्रकृत्या निपुणश्चैव बुद्धिमांश्चैव वानरः ॥ अपरीक्षितवीर्येण सुग्रीवः सह नैष्यति ॥ १४ ॥

रक्तो राहुग्रस्तो वा ॥ ३ ॥ दंष्ट्राकरालः दंष्ट्रादन्तुरः । "करालोदन्तुरेतुङ्गे" इत्यमरः । क्रोधाद्धेतोः दीप्ताग्निसन्निभः अतएवोत्पतितपद्मः विकसितरक्तोत्पलः । उत्पतितपद्माभइतिपाठे उत्पतिता स्रोपरिप्रसृता पद्मानामाभा यस्मिन्स्त इत्यर्थः । समृणालो ह्रद इव भाति यथा ॥ ४–५ ॥ परिष्वज्य स्ववचनश्रवणाभिमुख्यायालिङ्ग्य । स्नेहात् परिष्वज्येत्यन्वयः । दर्शितसौहृदा यथाभवति तथोवाचेत्यर्थः । संभ्रान्ता त्वरिता । "संभ्रमस्त्वरा" इत्यमरः । हितोदर्कं हितफलकं ॥ ६ ॥ काल्यं प्रातः शयनादुत्थितः पुरुषः मुक्तां स्रजमिव । नदीवेगमिव आगतं अप्रतिबद्धं क्रोधं । साधु निःशेषं त्यज ॥ ७ ॥ काल्यं प्रातःकाले । एतेन युद्धं करिष्यसि । तेन फल्गुता लाघवं वा शत्रुबाहुल्यं शत्रुगौरवं वा न विद्यते । अतः किमर्थमदैवनिर्गच्छसीत्यर्थः ॥ ८ ॥ सहसानिर्गमे कोदोष इत्यत्राह—सहसेति ॥ ९ ॥ प्रथमं युक्तिमाह—पूर्वमित्यादिश्लोकद्वयमेकान्वयं ॥ पूर्वमापतितः ते त्वया। क्रोधान्निष्पत्य योयुधि निरस्तः । हन्यमानो दिशो गतश्च । सत्वामाह्वयते । पुनरेत्य स्थितस्य तस्यैतदाह्वानं । मेशङ्कां सहायसहितत्वशङ्कांजनयतीतियोजना । इवशब्दो वाक्यालंकारे । अव्ययानामनेकार्थत्वादवधारणे वा ॥ १०—११ ॥ अवधारणे हेत्वन्तरमप्याह—दर्पश्चेति । नर्दतस्तस्य दर्पश्च व्यवसायश्च यत्नश्च निनादश्च संरम्भश्च यादृशः । अस्य एतत्कारणमल्पं नभवतीतियोजना ॥ १२ ॥ फलितमाह—नासहायमिति ॥ अवष्टब्धसहायश्च परिगृहीतसहायएव । कुतः । एषः यमाश्रित्यगर्जति तादृशगर्जनहेतुसहायाश्रित एषइत्यर्थः ॥ १३ ॥ सहायस्या-

यादृतिरक्तलेसहजप्रभानाधेनोपरक्तादिलोपमेयता । एतदादीन्यासत्रमृत्युलक्षणानि ॥ ३ ॥ रामानु० दीप्ताग्निसंनिभोवाली । क्रोधादंष्ट्राकरालः । उत्पतितपद्माभः गजादिभिरुद्धृतपद्माभः । समृणालोहृदइवभातीतियोजना । दंष्ट्रामृणालस्थानीया । ती० दीप्ताग्निसंनिभश्चंकालुष्यकषायवर्णप्राकट्याय ॥ ४ ॥ ती० शत्रुबाहुल्यं शत्रोर्बाहुल्य गौरवं वा । नविद्यते शत्रुविषयबलाबलविषयशङ्कातवनास्तीतिभावः । यद्यप्येवंतथापि ॥ ८ ॥ स० तंसुग्रीवं । असहायंनमन्ये । अवष्टब्धसहायः परिगृहीतसमानलाभः सन भवतीत्यवष्टब्धसहायः अपरिगृहीतसमानराज्योऽयंसुग्रीवः यमाश्रित्यगर्जति तमपि सुग्रीवन्तं सुग्रीववदाचरन्तं सुग्रीववत्सामान्योपायेनाभेदंमन्यइत्यावर्तितेनान्वयः ॥ अहमिहागतंसुग्रीवं असहायंनमन्ये । भवतुसहायःकश्चित्तमप्यहंहनिष्यामीत्यतआह—अवष्टब्धसहायश्चेति । अवष्टब्धःपरिगृहीतःसहायोयेनसएषः यमाश्रित्यगर्जति संग्राममपि असहायं असहायमूढंमन्येइतिवा । अमेनतारारामविषयकंज्ञानमस्तीतिसूचितं । तच्चानुपदंस्पष्टीभविष्यति ॥ १३ ॥ ती० अस्तुसोपिसहायःसुग्रीवतुल्यएवेत्यत

[पा०] १ क. च. छ. झ. ञ. ट. दीप्ताग्निलोचनः. २ क.—झ. ट. चपदन्यासैः. ३ क. ख. ङ. च. ज. ञ. त्रासंसंभ्रान्ता. ४ क. ङ.—ट. श्रूयतामभिधास्यामि. ख. ग. श्रूयतांत्वमि. ५ झ. निवार्यते. ६ ख. निरस्थस्ते. ७ ख. निनदस्यच. क. ग. च.—झ. ट. निनादस्यच. ८ ञ. ट. माश्रित्यैव. ९ छ. झ. ञ. ट. नापरीक्षितवीर्येण. १० छ. झ. ञ. ट. सख्यमेष्यति.

पूर्वमेव मया वीर श्रुतं कथयतो वचः ॥ अङ्गदस्य कुमारस्य वक्ष्यामि त्वा हितं वचः ॥ १५ ॥
अङ्गदस्तु कुमारोऽयं वनान्तमुपनिर्गतः ॥ प्रवृत्तिस्तेन कथिता चारैरासीन्निवेदिता ॥ १६ ॥
अयोध्याधिपतेः पुत्रौ शूरौ समरदुर्जयौ ॥ इक्ष्वाकूणां कुले जातौ प्रथितौ रामलक्ष्मणौ ॥
सुग्रीवप्रियकामार्थं प्राप्तौ तत्र दुरासदौ ॥ १७ ॥
तव भ्रातुर्हि विख्यातः सहायो रणकर्कशः ॥ रामः परबलामर्दी युगान्ताग्निरिवोत्थितः ॥ १८ ॥
निवासवृक्षः साधूनामापन्नानां परा गतिः ॥ आर्तानां संश्रयश्चैव यशसश्चैकभाजनम् ॥ १९ ॥
ज्ञानविज्ञानसंपन्नो निदेशे निरतः पितुः ॥ धातूनामिव शैलेन्द्रो गुणानामाकरो महान् ॥ २० ॥

तिशये किंमानमित्यतआह—प्रकृत्येति ॥ १४ ॥ न केवलं युक्त्यायंनिर्णयः वचनाच्चेत्याह—पूर्वमिति । वचः यत् प्रासङ्गिकंकथयतोऽङ्गदस्य वचः मयाश्रुतं तत् हितं वचः त्वांप्रति वक्ष्यामि ॥ १५॥ वनान्तमुपवनान्तमभि निर्गतः विहारार्थं गतः । प्रवृत्तिर्वार्ता । " वार्ता प्रवृत्तिर्वृत्तान्तः " इत्यमरः । तत्र ऋश्यमूके । दुरासदावित्यनन्तरमितिकरणं बोध्यं । प्राप्ताविति प्रवृत्तिस्तेनकथितेतिसंबन्धः ॥ १६—१७ ॥ तौ कीदृशावित्यपेक्षायामेकस्य स्वरूपकथनेनान्यस्य स्वरूपमप्यर्थादुक्तंभवतीतिमत्वा प्रधानभूतरामस्वरूपमाह—तवेत्यादिनाश्लोकत्रयेण ॥ रामः उक्तविशेषणविशिष्टइत्यन्वयः । तत्त्वस्थितिं सूचयन्त्याह—निवासेति । यथा सुग्रीवस्यसहायः एवं ममापि कुतोनस्यादित्यत्राह—साधूनामिति । स्वच्छायापेक्षिणामनुकूलानां निवासवृक्षः । वृक्षइत्यभेदाध्यवसायेन सर्वथासादृश्यमुच्यते । यथावृक्षःप्रथमंतापमपहृत्य पुष्पफलप्रदानादिना सर्वेन्द्रियतर्पणः तथाऽयमित्यर्थः । निवासइतिविशेषणेन कादाचित्कच्छायकतरुव्यावृत्तिः । " वासुदेवतरुच्छाया नातिशीतानघर्मदा । नरकाङ्गारशमनी साकिमर्थंनसेव्यते " इत्युक्तत्वात् । सुग्रीवद्रोहकरणेन नास्माकंसाधुत्वलेशइत्याशयः । साधूनामेवं आपन्नानां तु परागतिः । " योगक्षेमं वहामि " इत्युक्तरीत्या आश्रितविषयेउपायदशाप्रभृतिफलपर्यन्तसर्वकार्यकरइत्यर्थः । तत्राप्यार्तानांसंश्रयश्चैव आश्रितेष्वप्यार्तानांतुसर्वदासमीचीनाश्रयः । सर्वकार्यनिर्वाहकइत्यर्थः । भवत्वेवं । ममापि कश्चिदाश्रयोभविष्यतीत्यत्राह—यशसश्चैकभाजनमिति । एवंविधरक्षको लोकेऽन्योनास्तीत्यर्थः । अत्र " चतुर्विधाभजन्तेमां जनाःसुकृतिनोर्जुन । आर्तोजिज्ञासुरर्थार्थी ज्ञानीचभरतर्षभ " इत्युक्ताश्चतुर्विधाधिकारिण उच्यन्ते । साधूनां जिज्ञासूनां । कैवल्यकामानामित्यर्थः । आपन्नानां अपूर्वैश्वर्यकामानां । आर्तानां भ्रष्टैश्वर्यकामानां । यशसः " ज्ञानी त्वात्मैव मे मतं " इत्युक्तयशोयुक्तस्य । एकवचनेन तस्य सुदुर्लभत्वमुक्तं । एकभाजनं अद्वितीयाश्रयः । यद्वा साधूनामुपासकानां । आपन्नानां "सकृदेवप्रपन्नाय" इत्युक्तरीत्या ईषत्प्रपन्नानां । आर्तानां आर्तप्रपन्नानां । " आर्तोवायदिवादृप्तः परेषांशरणागतः " इतिवक्ष्यमाणत्वात् । यशसश्चैकभाजनमित्यनेन एवंभूतोन्यो नास्तीत्युच्यते । आश्रितफलप्रदानोपयोगिज्ञानसंपत्तिमाह—ज्ञानविज्ञानसंपन्न इति ॥ ज्ञानं लौकिकज्ञानं । विज्ञानं शास्त्रजन्यज्ञानं । ताभ्यांसंपन्नः । यद्वा विज्ञानेन धर्मभूतेन संपन्नः । ज्ञानश्चासौ विज्ञानसंपन्नश्चेतिकर्मधारयः । ज्ञानस्वरूपोज्ञानगुणकश्चेत्यर्थः । ज्ञानसंपत्तिमुक्त्वानुष्ठानसंपत्तिमाह—निदेशेनिरतःपितुरिति । प्रधानत्वात्पितृवचन-

आह—अपरीक्षितेति । अपरीक्षितवीर्येण सहायेनेतिशेषः । अपरीक्षितंवीर्यंयस्येतिविग्रहः ॥१४॥ स० कथयतोऽङ्गदस्यवचः श्रुतं । तद्वचोद्यवक्ष्यामि । हेअवचइतिसंबोधनं । तूष्णीभूतवालिन्नितितदर्थः ॥ १५ ॥ ति० वनान्तं वनमध्यं । यातस्मैचारैर्निवेदिताप्रवृत्तिरासीत् । प्रवृत्तिःसुग्रीववृत्तान्तः । सातेनममकथिता ॥ १६ ॥ रामानु० "स्वरक्षणेप्यशक्तस्यकोहेतुःपररक्षणे" इतिन्यायेनराज्याद्विनाशितोरामःसुग्रीवंकथंरक्षितुंशक्तः । शक्तोवासदृशंमांविहायदुर्बलंसुग्रीवंकथमवलंबतइत्याशङ्कायामाह—तवभ्रातुरित्यादिना ॥१८॥ रामानु०आर्तानां नष्टैश्वर्यकामानां ॥१९॥ रामानु० ज्ञानविज्ञानसंपन्नः ज्ञानं ब्रह्मविषयकंज्ञानं ।

[पा०] १ घ. महावीर. २ ङ.—ट. वक्ष्याम्यद्य. क. ख. ग. वक्ष्यामित्वां. ३ क. ख. ग. कुमारोसौ. ४ छ. झ. ठ. रासीन्निवेदिता. ५ ङ.—ठ. प्रस्थितौ. ६ छ. झ. ट. सतेभ्रातुर्हि. ७ छ. झ. ठ. रणकर्मणि.

तत्क्षमं न विरोधस्ते सह तेन महात्मना ॥ दुर्जयेनाप्रमेयेन रामेण रणकर्मसु ॥ २१ ॥
शूर वक्ष्यामि ते किंचिन्न चेच्छाम्यभ्यसूयितुम् ॥ श्रूयतां क्रियतां चैव तव वक्ष्यामि यद्धितम् ॥२२॥
यौवराज्येन सुग्रीवं तूर्णं साध्वभिषेचय ॥ विग्रहं मा कृथा वीर भ्रात्रा राजन्बलीयसा ॥ २३ ॥
अहं हि ते क्षमं मन्ये तेन रामेण सौहृदम् ॥ सुग्रीवेण च संप्रीतिं वैरमुत्सृज्य दूरतः ॥ २४ ॥
लालनीयो हि ते भ्राता यवीयानेष वानरः ॥ तत्र वा सन्निहस्थो वा सर्वथा बन्धुरेव ते ॥ २५ ॥
न हि तेन समं बन्धुं भुवि पश्यामि कंचन ॥ दानमानादिसत्कारैः कुरुष्व प्रत्यनन्तरम् ॥ २६ ॥
वैरमेतत्समुत्सृज्य तव पार्श्वे स तिष्ठतु ॥ सुग्रीवो विपुलग्रीवस्तव बन्धुः सदा मतः ॥ २७ ॥
भ्रातुः सौहृदमालम्ब नान्या गतिरिहास्ति ते ॥ २८ ॥
यदि ते मत्प्रियं कार्यं यदि चावैषि मां हिताम् ॥ याच्यमानः प्रयत्नेन साधु वाक्यं कुरुष्व मे ॥ २९ ॥
प्रसीद पथ्यं शृणु जल्पितं हि मे न रोषमेवानुविधातुमर्हसि ॥
क्षमो हि ते कोसलराजसूनुना न विग्रहः शक्रसमानतेजसा ॥ ३० ॥

परिपालनत्वमुक्तं । इदमुपलक्षणं धर्मान्तराणां । अनेन सौलभ्यंचोक्तं । समस्तकल्याणगुणसमृद्धिमाह—गुणानामाकरइति । बहुवचनेनासङ्ख्येयत्वमुक्तं । आकरइत्यनेन गुणातिरिक्तत्वंगुणिनउक्तं । महानित्यनेन गुणानामप्युत्कर्षावहंगुणिस्वरूपमुच्यते । धातूनामित्यनेन गुणानांज्ञानशक्तिबलैश्वर्यादिभेदेन नानाविधत्वमुक्तं । शैलेन्द्रो हिमवान् । अनेनाप्रकंप्यत्वमुक्तं ॥ १८—२० ॥ रणकर्मसु दुर्जयेनेत्यन्वयः ॥ २१ ॥ ते अभ्यसूयितुंनेच्छामि त्वद्विषयेअभ्यसूयां दोषाविष्करणं कर्तुंकदाचिदपिनेच्छामीत्यर्थः । यद्वा मया वक्ष्यमाणे हिते त्वया अभ्यसूयानकार्येत्यर्थः ॥ २२ ॥ यौवराज्येनाभिषेचय यौवराज्येनोपलक्षितो यथाभवति तथाभिषिञ्चेत्यर्थः ॥ २३—२५ ॥ प्रत्यनन्तरं त्वदनन्तरं । समीपवर्तिनं वा कुरुष्व ॥ २६—२७ ॥ भ्रातुरित्यर्धं ॥ आलम्ब आलम्बस्व ॥ २८ ॥ अवैषि जानासि । प्रयत्नेन बहुप्रयत्नेन ॥ २९ ॥ स्ववचनाश्रवणेबाधकंसूचयन्त्याह—प्रसीदेति ॥ प्रसीद त्यक्तरोषो भव । पथ्यं हितं । जल्पितं वचनं । भावे क्तः ।

विज्ञानं शिल्पशास्त्रयोर्ज्ञानं । "मोक्षेधीर्ज्ञानमन्यत्रविज्ञानंशिल्पशास्त्रयोः" इत्यमरः । यद्वा ज्ञानं सामान्यज्ञानं । विज्ञानं विशेषज्ञानं ॥२०॥ तनि० साधूनां संसारतापतप्तानां । निवासवृक्षः विश्रामस्थानं । "वासुदेवतरुच्छायानातिशीतानघर्मदा" इत्युक्तत्वात् । साधूनां " साधवस्त्वभिगन्तव्याः " इत्युक्त्याअभिगन्तव्यतयायेप्रसिद्धास्तेषामावासवृक्षः अभिगन्तव्यस्थानं । साधूनां ज्ञानिनां । आवासवृक्षः प्राप्यदेशइतिच । आपन्नानां आकिञ्चन्यात्सङ्गपुरस्कारेणशरणंगतानांदृप्तानां । सदागतिः अपुनरावृत्तिप्राप्यस्थानं । अभ्युपगमप्रारब्धसहिष्णुतयादेहस्थितिकालेपिगतिरितिच । आर्तानां प्रारब्धदेहेनार्दितानां संश्रयः इतरवैलक्षण्येनाश्रयणीयः । यद्वा साधूनां भगवत्प्राप्तिकामानां । आपन्नानां कैवल्यनिष्ठानां । आर्तानां ऐश्वर्यकामानां । इतरवैलक्षण्येनाश्रयणीयः । यशसश्च यशसएव नायशसः । एकभाजनं अनितरसाधारण्येनाश्रयः । सुप्रतिष्ठितत्वपरिपूर्णत्वादिद्योतनायभाजनग्रहणं । अत्रयशश्शब्देन औदार्यप्रतापजनितकीर्तिर्लोकप्रसिद्धा । " नतस्येशेकश्चनतस्यनाममहद्यशः " इत्युक्तवैदिकप्रसिद्धाचकीर्तिःकथिता ॥१९–२०॥ ति० दुर्जयेनेत्यस्यार्धंपूर्वान्वयि ॥ २१ ॥ किंचिद्वक्ष्यमाणंत्वयाऽभ्यसूयितुंनेच्छामि । कथमियंमांप्रतिवदतीतिमदसूयानकर्तव्येत्यर्थः । आर्षत्वादसमानकर्तृत्वेपितुमुन् ॥ २२ ॥ शि० सुग्रीवं दानादिभिः प्रत्यनन्तरं प्राप्तान्तररहितं अन्तरङ्गमित्यर्थः । कुरुष्व । अतएवससुग्रीवःपार्श्वेतिष्ठतु ॥ २६ ॥ स० भ्रातृसौहृदमालंब्य आलंब्यैवगतिर्नान्यातेऽस्ति । आलंब्यस्थितस्येतिशेषोवा । " यदोर्वशंनरःश्रुत्वा । सेतुंदृष्ट्वासमुद्रस्य " इत्यादौसमानकर्तृकत्वाभावस्यदर्शनात्तादृशनियमस्यप्रायिकत्वाद्वानदोषः । विस्तृतंचैतच्छेषवाक्यार्थचन्द्रिकायांतत्रतत्र ॥ २८ ॥ इतिपञ्चदशःसर्गः ॥ १५ ॥

[पा०] १ ख. छ.—ट. तत्क्षमो. २ ख. घ. राज्येतु. क. ग. राज्येच. ३ ङ. च. म. विरोधं. ४ ङ.—ट. राजन्यवीयसा. ५ छ. झ. ट. विपुलग्रीवोमहाबन्धुर्मतस्तव. ६ क. ख. ग. ङ. च. ज.—ट. भ्रातृसौहृदं. ७ क. ख. ग. ङ.—ट. मालम्ब्य. ८ छ. झ. ट. प्रियत्वेन.

तदा हि तारा हितमेव वाक्यं तं वालिनं पथ्यमिदं बभाषे ॥
न रोचते तद्वचनं हि तस्य कालाभिपन्नस्य विनाशकाले ॥ ३१ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे पञ्चदशः सर्गः ॥ १५ ॥

षोडशः सर्गः ॥ १६ ॥

वालिनासनिर्भर्त्सनंतारानिवर्तनपूर्वकंयुद्धायनिर्गमः ॥ १ ॥ वालिसुग्रीवाभ्यांसवीरवादंनियुद्धप्रवर्तनम् ॥ २ ॥ ततोयुद्धेवालिनिवर्धमानेसुग्रीवेचहीयमानेश्रीरामेणवालिवक्षसिशरविमोक्षणम् ॥ ३ ॥ वक्षस्स्रवद्रुधिरोक्षितेनवालिनानिश्चेष्टंक्षितौपतनम् ॥ ४ ॥

तामेवं ब्रुवतीं तारां ताराधिपनिभाननाम् ॥ वाली निर्भर्त्सयामास वचनं चेदमब्रवीत् ॥ १ ॥
गर्जतोस्य च संरम्भं भ्रातुः शत्रोर्विशेषतः ॥ मर्षयिष्याम्यहं केन कारणेन वरानने ॥ २ ॥
अधर्षितानां शूराणां समरेष्वनिवर्तिनाम् ॥ धर्षणामर्षणं भीरु मरणादतिरिच्यते ॥ ३ ॥
सोढुं न च समर्थोऽहं युद्धकामस्य संयुगे ॥ सुग्रीवस्य च संरम्भं हीनग्रीवस्य गर्जतः ॥ ४ ॥
न च कार्यो विषादस्ते राघवं प्रति मत्कृते ॥ धर्मज्ञश्च कृतज्ञश्च कथं पापं करिष्यति ॥ ५ ॥
निवर्तस्व सह स्त्रीभिः कथं भूयोऽनुगच्छसि ॥ सौहृदं दर्शितं तारे मयि भक्तिः कृता त्वया ॥ ६ ॥
प्रतियोत्स्याम्यहं गत्वा सुग्रीवं जहि संभ्रमम् ॥ दर्पमात्रं विनेष्यामि न च प्राणैर्विमोक्ष्यते ॥ ७ ॥
अहं ह्याजिस्थितस्यास्य करिष्यामि यथेप्सितम् ॥ वृक्षैर्मुष्टिप्रहारैश्च पीडितः प्रतियास्यति ॥ ८ ॥
न मे गर्वितमायस्तं सहिष्यति दुरात्मवान् ॥ कृतं तारे सहायत्वं सौहृदं दर्शितं मयि ॥ ९ ॥

शक्रसमानतेजसा शक्रतेजस्तुल्यतेजसा । अनेन वालिनो रामस्याधिक्यमुक्तं ॥ ३० ॥ तदा वक्तव्यकाले । वालिनंप्रतीतिशेषः । भाषतेर्द्विकर्मकत्वात् । तस्य तस्मै । चतुर्थ्यर्थेषष्ठी । "रुच्यर्थानां—" इति हिस्मृतिः । विनाशकालत्वेहेतुः कालाभिपन्नस्येति । मृत्युनागृहीतस्येत्यर्थः ॥ ३१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने पञ्चदशःसर्गः ॥ १५ ॥

अथ वालिवधः षोडशे—तामेवमित्यादि ॥ १—२ ॥ धर्षणामर्षणं धर्षणस्य आमर्षणं सहनमितिवा । धर्षणायाः तिरस्कारस्य मर्षणमितिवार्थः ॥ ३ ॥ हीनग्रीवस्येतिपरुषोक्तिः ॥ ४ ॥ पापं निरपराधवधं ॥ ५ ॥ निवर्तने क्रियमाणेपि भूयः । सौहृदं सुहृत्कर्तव्यं । हितोपदेशइति यावत् । भक्तिः कृता प्रकाशितेत्यर्थः ॥ ६ ॥ सुग्रीवं प्रतियोत्स्यामि ॥ ७ ॥ संप्रहारव्याकुलेन त्वया कथं तस्य प्राणरक्षणं कर्तुं शक्यं तत्राह—अहं हीति ॥ यथेप्सितं ईप्सितं तत्प्राणरक्षणमनतिक्रम्य । आजौ युद्धे स्थितस्य ॥ ८ ॥ गर्वितं गर्वं । आयस्तं आयासं । प्रयत्नमिति यावत् । सहि-

---

वि० सुसंरब्धं स्वार्थेनिष्ठा । सुसंरंभमित्यर्थः ॥ सुसंरंभमितिपाठः सुगमः ॥ १ ॥ स० मद्गमनेनग्रीवाहीनोभवतीतिमत्वाहीनग्रीवस्येत्युक्तवान् ॥ शि० इनग्रीवस्यइनाश्रेष्ठाविपुलेत्यर्थः । ग्रीवायस्यतस्य । संरंभं गर्वंगर्जितंचसोढुंनैव समर्थः । हिशब्दएवार्थे । अतएवविपुलग्रीवइत्यनेननविरुध्यते ॥ ४ ॥ ति० राघवंप्रति राघवनिमित्तभयमालक्ष्य . मत्कृतेत्वयाविषादोन कार्यः । यतोधर्मज्ञत्वादिगुणःसः ॥ ५ ॥ शि० यदुक्तंदानमानादिसत्कारैरितितस्यप्रत्युत्तरमाह—नेति । गर्वितं सामानाधिकर-

[पा०] १ छ. झ. ञ. ट. सुसंरब्धं. ख. ङ. ज. तुसंरंभं. २ ख. च. छ. झ. ट. मर्षयिष्यामिकेनापि. ३ ख. संयुगेषु. ४ ङ. छ. झ. ञ. ट. गर्जितं. ५ ङ. च. ज. ञ. मामनुगच्छसि. ६ क. ग. दर्शितंसौहृदं. ७ क. ग. च.—ट. तावन्मयि. ८ ङ.—ट. भक्तिस्त्वयाकृता. ९ ख. घ.—ट. दर्पंचास्य. क. ग. दर्पंचास्यापनेष्यामि. १० ख. ङ. छ.—ट. वियोक्ष्यते. च. वियोज्यते. ११ ङ. च. ज. ञ. अहमाजि. १२ ङ. झ. ट. यदीप्सितं. १३ ङ. च. ज. ञ. नाहंगर्वितमायस्तंसहिष्यामिदुरात्मनः. १४ क. ख. घ.—ट. दर्शितंसौहृदं.

शापिताऽसि मम प्राणैर्निवर्तस्व जयेन च ॥ अहं जित्वा निवर्तिष्ये तमहं भ्रातरं रणे ॥ १० ॥
तं तु तारा परिष्वज्य वालिनं प्रियवादिनी ॥ चकार रुदती मन्दं दक्षिणा सा प्रदक्षिणम् ॥ ११ ॥
ततः स्वस्त्ययनं कृत्वा मन्त्रवद्विजयैषिणी ॥ अन्तःपुरं सह स्त्रीभिः प्रविष्टा शोकमोहिता ॥ १२ ॥
प्रविष्टायां तु तारायां सह स्त्रीभिः स्वमालयम् ॥ नगरान्निर्ययौ क्रुद्धो महासर्प इव श्वसन् ॥ १३ ॥
स निःश्वस्य महातेजा वाली परमरोषणः ॥ सर्वतश्चारयन्दृष्टिं शत्रुदर्शनकाङ्क्षया ॥ १४ ॥
स ददर्श ततः श्रीमान्सुग्रीवं हेमपिङ्गलम् ॥ सुसंवीतमवष्टब्धं दीप्यमानमिवानलम् ॥ १५ ॥
स तं दृष्ट्वा महावीर्यं सुग्रीवं पर्यवस्थितम् ॥ गाढं परिदधे वासो वाली परमरोषणः ॥ १६ ॥
स वाली गाढसंवीतो मुष्टिमुद्यम्य वीर्यवान् ॥ सुग्रीवमेवाभिमुखो ययौ योद्धुं कृतक्षणः ॥ १७ ॥
श्लिष्टमुष्टिं समुद्यम्य संरब्धतरमागतः ॥ सुग्रीवोपि तमुद्दिश्य वालिनं हेममालिनम् ॥ १८ ॥
तं वाली क्रोधताम्राक्षः सुग्रीवं रणपण्डितम् ॥ आपतन्तं महावेगमिदं वचनमब्रवीत् ॥ १९ ॥
एष मुष्टिर्मया बद्धो गाढः सन्निहिताङ्गुलिः ॥ मया वेगविमुक्तस्ते प्राणानादाय यास्यति ॥ २० ॥
एवमुक्तस्तु सुग्रीवः क्रुद्धो वालिनमब्रवीत् ॥ तवैव चाहरन्प्राणान्मुष्टिः पततु मूर्धनि ॥ २१ ॥
ताडितस्तेन संक्रुद्धः समभिक्रम्य वेगितः ॥ अभवच्छोणितोद्गारी सोत्पीड इव पर्वतः ॥ २२ ॥
सुग्रीवेण तु निःसङ्गं सालमुत्पाट्य तेजसा ॥ गात्रेष्वभिहतो वाली वज्रेणेव महागिरिः ॥ २३ ॥

ष्यतीति परस्मैपदमार्षं । सहायत्वं बुद्धिसाहाय्यं ॥ ९—१० ॥ दक्षिणा स्वस्मिन्परस्मिंश्च तुल्यहिता ॥ ११ ॥ मन्त्रवत् स्वस्त्ययनमन्त्रवत् । मन्त्रश्च वैदिकादन्य इति ज्ञेयः ॥ १२—१३ ॥ चारयन् प्रस्थित इति शेषः ॥ १४ ॥ सुसंवीतं वाससा सुष्ठु परिवीतं । अवष्टब्धं युयुत्सया भूमिमाक्रम्य स्थितं ॥ १५ ॥ पर्यवस्थितं समीपे अवस्थितं ॥ १६ ॥ कृतक्षणः कृतोत्सवः । लब्धावसरो वा । " निर्व्यापारस्थितौ कालविशेषोत्सवयोःक्षणः " इत्यमरः ॥ १७—२० ॥ पततु मूर्धनीत्यनन्तरमितिकरणंद्रष्टव्यं ॥ २१ ॥ तेन वालिना ताडितः । अतएव संक्रुद्धः । वेगितः संजातवेगः । पुनः प्रहारायेतिशेषः । अत्रसुग्रीवइत्यध्या-

---

ष्यसंबन्धेनस्वबलवत्त्वादिजनितगर्वविशिष्टं । मेआयस्त प्रवृत्तिं । नसहिष्यति । एतेनतस्यमद्वशवर्तित्वंनभविष्यतीतिसूचितं ॥ ९ ॥ रामानु० जयेनेतिपाठः । जयेन मनोजवेन । यद्वा जयेनेतिपाठः । जयाशिषेत्यर्थः । चोवधारणे ॥ ती० अहंजित्वाअहंनिवर्तिष्यइत्यहंशब्दद्वयस्यनिर्वाहः ॥ ति० जनेन स्वपरिवारजनेनालं । जित्वा जयमात्रंकृत्वा । निवर्तिष्ये नतुवधमित्यर्थः । अहंजित्वेतिपाठस्त्वसांप्रदायिकः ॥ स० तं भ्रातरं सुग्रीवं । अलंजित्वानिवर्तिष्ये । अहंजित्वेतिपाठे तमहमित्येकंपदं । "तमंतुतमसासमं " इत्युक्तेः तमं हन्तीतितमहस्तंसूर्यावतारं । बाहुलकाद्वः ॥ १० ॥ शि० तं स्वोक्तस्वीकाराभाववन्तं वालिनं ॥ ११ ॥ ति० मन्त्रवित् स्वस्त्ययनमन्त्रवेत्री । देवांशत्वाद्वेदनं ॥ १२ ॥ शि० कृतक्षणः प्रकटितयुद्धोत्सवः ॥ १७ ॥ शि० सुनियताङ्गुलिः सुनियताः यथोचितनिवेशिताअङ्गुल्योयस्मिन्सएषमहान्मुष्टिः ॥ २० ॥ ती० तेन वालिना । सोत्पीडइव सनिर्झरइव । समतिक्रम्य धीरसमयमितिशेषः । तथाचोक्तं—"धीरंप्रवर्ततेपूर्वंधिक्कर्तातदनन्तरम् । समयोऽयंद्वन्द्वयुद्धे " इति ॥ वेगितः संजातचलनः ॥ २२ ॥ ति० निश्शङ्कं शोणितोद्गारजदुःखसंबन्धरहितंयथातथाऽभिहतोवालीसागरेनौरिववि-

[पा०] १ क. ग. ङ. च. छ. झ. ञ. ट. जनेनच. २ ङ. छ. झ. ञ. ट. अलंजित्वा. ३ ख. तमलं. ४ झ. मन्त्रवित्. ५ क. ख. घ. ङ. छ.—ट. नगर्यानिर्ययौ. ६ ख. समुत्पत्य. ७ ङ.—ट. महारोषो. क.—घ. महावेगो. ८ घ. परममर्षणः. ङ.—ट. परमवेगवान्. ९ छ. झ. ट. तंसदृष्ट्वामहाबाहुः. क. ङ. च. ज. ञ. तंसदृष्ट्वामहाबाहुं. ग. तंसदृष्ट्वामहावीर्यः. १० ङ. ज. ञ. समुपस्थितं. ११ छ. झ. ट. परमकोपनः. घ. परममर्षणः. ङ. ज. ञ. समरदुर्मदः. १२ ङ. च. ज. ञ. मुद्यम्यदक्षिणं. १३ घ. ङ. क्लिष्टमुष्टिं. च. छ. झ. ञ. ट. श्लिष्टमुष्टिं. १४ क. ख. घ.—ट. समुद्दिश्य. १५ क. घ.—ट. ताम्राक्षं. १६ छ. झ. ट. रणकोविदं. घ. च. ज. ञ. रणकर्कशं. १७ छ. झ. ट. महान्बद्धो. १८ क. ङ. छ. झ. ट. सुनियताङ्गुलिः. १९ ख. सतुवेगविमुक्तस्तु. २० छ.—ट. तवचैषहरन्. क. ख. घ. तवचैवहरन्. २१ ख. समतिक्रम्य. ङ. च. ज. ञ. समभिद्रुत्य. २२ ग. घ. छ. झ. ट. वेगतः. २३ छ. झ. ट. सापीडइव. २४ क. ग. सुग्रीवेणापि. २५ छ. झ. ञ. ट. निश्शङ्कं.

सं तु वाली प्रचलितः सालताडनविह्वलः ॥ गुरुभारसमाक्रान्तो नौसार्थ इव सागरे ॥ २४ ॥
तौ भीमबलविक्रान्तौ सुपर्णसमवेगिनौ ॥ प्रवृद्धौ घोरवपुषौ चन्द्रसूर्याविवाम्बरे ॥
परस्परमभिघ्नन्तौ छिद्रान्वेषणतत्परौ ॥ २५ ॥
ततोऽवर्धत वाली तु बलवीर्यसमन्वितः ॥ सूर्यपुत्रो महावीर्यः सुग्रीवः परिहीयते ॥ २६ ॥
वालिना भग्नदर्पस्तु सुग्रीवो मन्दविक्रमः ॥ वालिनं प्रति सामर्षो दर्शयामास लाघवम् ॥ २७ ॥
वृक्षैः सशाखैः संशिखैर्वज्रकोटिनिभैर्नखैः ॥ मुष्टिभिर्जानुभिः पद्भिर्बाहुभिश्च पुनः पुनः ॥
तयोर्युद्धमभूद्घोरं वृत्रवासवयोरिव ॥ २८ ॥
तौ शोणिताक्तौ युध्येतां वानरौ वनचारिणौ ॥ मेघाविव महाशब्दैस्तर्जयानौ परस्परम् ॥ २९ ॥
ह्रीयमानमथोऽपश्यत्सुग्रीवं वानरेश्वरम् ॥ वीक्षमाणं दिशश्चैव राघवः स मुहुर्मुहुः ॥ ३० ॥
ततो रामो महातेजा आर्तं दृष्ट्वा हरीश्वरम् ॥ शरं च वीक्षते वीरो वालिनो वधकारणात् ॥ ३१ ॥
ततो धनुषि संधाय शरमाशीविषोपमम् ॥ पूरयामास तच्चापं कालचक्रमिवान्तकः ॥ ३२ ॥
तस्य ज्यातलघोषेण त्रस्ताः पत्ररथेश्वराः ॥ प्रदुद्रुवुर्मृगाश्चैव युगान्त इव मोहिताः ॥ ३३ ॥
मुक्तस्तु वज्रनिर्घोषः प्रदीप्ताशनिसन्निभः ॥ राघवेण महाबाणो वालिवक्षसि पातितः ॥ ३४ ॥
ततस्तेन महातेजा वीर्योत्सिक्तः कपीश्वरः ॥ वेगेनाभिहतो वाली निपपात महीतले ॥ ३५ ॥

हार्यं । सोत्पीडः सनिर्झरः ॥ २२—२३ ॥ नौः पोतः ॥ २४ ॥ विक्रान्तौ विक्रमवन्तौ भीमबलौ च तौ विक्रान्तौ चेति कर्मधारयः । सुपर्णसमवेगिनौ गरुडवेगतुल्यवेगवन्तौ । कर्मधारयान्मत्वर्थीयः । चन्द्रसूर्याविव पौर्णमासीचन्द्रसूर्याविव । प्रवृद्धावभूतामित्यर्थः ॥ २५ ॥ अवर्धत । तेजसेति शेषः । परिहीयते पर्यहीयतेत्यर्थः ॥ २६ ॥ लाघवं शैघ्र्यं । "लघु भाधुर्यशीघ्रयोः" इतिनिघण्टुः ॥२७—२८॥ युध्येतां अयुध्येतां । तर्जयानाविति । उभयत्रागमशासनस्यानित्यत्वादडभावः सुमभावश्च ॥२९—३०॥ शरं वीक्षते । वालिवधोचितं शरं पर्यालोचयदित्यर्थः ॥ ३१ ॥ कालचक्रं यमस्यायुधविशेषः ॥ ३२ ॥ पत्ररथेश्वराः पक्षिश्रेष्ठाः ॥ ३३ ॥ वज्रस्येव निर्घोषोयस्यतथा । प्रदीप्ताशनिसन्निभः प्रदीप्तविद्युत्तुल्यः । "अशनिस्तु द्वयोर्वज्रे सौदामिन्यां" इतिदर्पणः ॥ ३४ ॥ तत इत्यादिश्लोकद्वयमेकान्वयं ॥ उद्भूतः पातितः । आश्वयुक्समये आश्वयुक्समयरूपे । मासि पौर्णमास्यां । महीतलेपातितइत्यन्वयः

ह्लोऽभवत् ॥ २३ ॥ ती० सार्थनौः संघसहितानौरिव । सार्थाः व्यावहारिकावा ॥ २४ ॥ ति० चन्द्रसूर्याविवेति । यथार्थातिशयोक्तिरेषा ॥ शि० भीमबलविक्रान्तौ बलेनविक्रान्तौ कृतपादन्यासौ । अतएवभीमौ भयंकरौ । भीमौचतौबलविक्रान्तावितिकर्मधारयः । भयंकरबलेनकृतपादन्यासावित्यर्थोवा । सुपर्णसमवेगितौ गरुडसमवेगशालिनौ । प्रवृद्धौ प्रवृद्धयुद्धविशिष्टौ । तौवालिसुग्रीवौ अंबरेचन्द्रसूर्याविवदृश्येतेइतिशेषः । स० सुपर्णवद्बलवेगविशिष्टौ ॥२५॥ ति० परिहीयत अडभावआर्षः ॥२६॥ शि० राघवंदर्शयामास बोधयामास । स्वहार्निवालिनोवृद्धिंचेतिशेषः ॥२७॥ ती० सशिखैःसाग्रैः ॥ शि० सिंहावलोकनन्यायेन

[पा०] १ क. च. ज.—ट. सतुवृक्षेणनिर्भग्नः ग. ङ. सतुवृक्षेणनिर्भिन्नः. २ ङ. ञ. ज.—ट. गुरुभारसमाक्रान्तानौस्थसार्थेवसागरे. क.—घ गुरुभारसमाक्रान्तासागरेनौरिवाभवत्. ३ च. सार्थनौरिव. ४ क. ख. ग. सुपर्णानिलवेगितौ. ङ. छ. झ. सुपर्णबलवेगितौ. घ. सुपर्णसमतेजसौ. छ. झ. ट. सुपर्णसमवेगितौ. ५ ट. प्रयुद्धौ. ६ छ. झ. ञ. ट. परिहीयत. ७ घ. भिन्नदर्पस्तु. ८ क. छ. झ.ट. राघवं. ९ क. ख. ङ.—ट. शिखरैः. १० ख. शोणिताक्षौ. ११ ख. ङ. झ. ञ. ट. स्तर्जमानौ. १२ छ. ज. झ. ट. हीयमानमथापश्यत्. ख. हीयमानंततोपश्यत्. १३ क. ख. ग. ङ.—ट. प्रेक्षमाणं. १४ ख. ग. घ. छ. झ. ञ. ट. सशरंवीक्षते. क. च. ज. सव्यंचक्रेधनुर्वरो. १५ छ. झ. ट. वधकाङ्क्षया. १६ ङ. प्रदीप्तानलसंनिभः. १७ क. ग. छ.—ट. वीर्ययुक्तः.

इन्द्रध्वज इवोद्भूतः पौर्णमास्यां महीतले ॥ आश्वयुक्समये मासि गतश्रीको विचेतनः ॥
[बाष्पसंरुद्धकण्ठस्तु वाली चार्तस्वरः शनैः] ॥ ३६ ॥
नरोत्तमः कालयुगान्तकोपमं शरोत्तमं काञ्चनरूप्यभूषितम् ॥
ससर्ज दीप्तं तममित्रमर्दनं सधूममग्निं मुखतो यथा हरः ॥ ३७ ॥
अथोक्षितः शोणिततोयविस्रवैः सुपुष्पिताशोक इवानलोद्धतः ॥
विचेतनो वासवसूनुराहवे विभ्रंशितेन्द्रध्वजवत्क्षितिं गतः ॥ ३८ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे षोडशः सर्गः ॥ १६ ॥

सप्तदशः सर्गः ॥ १७ ॥

रामबाणेनहृदयविदारणेपि इन्द्रदत्तकाञ्चनमालाधारणेनप्राणान्धारयतावालिनः स्वसमीपमागतंरामंप्रतिस्वमारणस्यान्याय्यत्वोक्त्यागर्हणम् ॥ १ ॥

ततः शरेणाभिहतो रामेण रणकर्कशः ॥ पपात सहसा वाली निकृत्त इव पादपः ॥ १ ॥
स भूमौ न्यस्तसर्वाङ्गस्तप्तकाञ्चनभूषणः ॥ अपतद्देवराजस्य मुक्तरश्मिरिव ध्वजः ॥ २ ॥
तस्मिन्निपतिते भूमौ वानराणां गणेश्वरे ॥ नष्टचन्द्रमिव व्योम न व्यराजत भूतलम् ॥ ३ ॥

॥ ३५—३६ ॥ उक्तमर्थं वृत्तान्तरेण संगृह्णाति—नरोत्तम इत्यादिश्लोकद्वयेन ॥ कालयुगान्तकोपमं । युगान्तकालोपममित्यर्थः । स्वार्थे कप्रत्ययः । युगान्तकालो युगान्तमृत्युः । काञ्चनरूप्यभूषितं परभागाय स्वर्णरजताभ्यामलंकृतं । सधूममित्यनेन ज्वालोन्मुखत्वमुच्यते । हरः प्रलये संहर्ता । नन्वत्र एकवचनादेकेन बाणेन वाली हत इत्युक्तं । इदमुत्तरत्र तारावाक्येन "रामेण प्रहितैः रौद्रैर्मार्गणैर्दूरपातिभिः" इत्यनेन बहुबाणहतत्ववचनेन विरुध्यते । नैवं व्याकुलवचनत्वात्तस्य । यतस्तारा एकबाणहतं श्रुत्वाप्येवमाह । वक्ष्यति हि—"तं मार्गा बाणमोक्षेण रामदत्तेन संयुगे । हतं प्लवगशार्दूलं तारा शुश्राव वालिनं" इति ॥ सर्गोपक्रमेच "निजघान च तत्रैनं शरेणैकेन राघव" इत्यत्रैकशब्दःप्रयुक्तः । "प्रतिज्ञातं चरामेण तथावालिवधंप्रति" इति प्रतिज्ञानिर्वाहाय छद्मनापि वालिवधःकृतः ॥ ३७—३८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने षोडशः सर्गः ॥ १६ ॥

अथ रामंप्रति वालिनिन्दा सप्तदशे—ततः शरेणेत्यादि ॥ आरम्भणार्थोयमनुवादः ॥ १ ॥ रश्मिः

तयोर्युद्धमेववर्णयति—वृक्षैरित्यादिभिः ॥ २८ ॥ ती० इन्द्रध्वजइति । गौडदेशेकस्मिंश्चिदुत्सवेआश्वयुक्पौर्णमास्यामिन्द्रमुद्दिश्यध्वजंसंस्थाप्य उत्सवानन्तरंध्वजंपातयन्तितद्वद्वालीपतितइत्यर्थः ॥ ति० आश्वयुक्समयेमासिपौर्णमास्यामिन्द्रध्वजोत्सवान्ते उद्भूतः उत्क्षिप्तः । इन्द्रध्वजोयथाभूमौपतति तद्वद्वालीग्रीष्मान्तेपतितइत्यर्थः । अतएवसुग्रीवाभिषेकसमयेश्रावणोमासोऽधुनावर्ततइतिवचनेननविरोधः ॥ शि० आश्वयुजः अश्विनीयुक्पौर्णमास्याः सम्यक्क्षयःप्राप्तिर्यस्मिंस्तस्मिन् । आश्विनेइत्यर्थः ॥ स० आश्वयुगितिसमयः संकेतोयस्यतस्मिन् ॥ ३६ ॥ ती० कालयुगान्तकोपमं अन्तयतीत्यन्तकः । युगानांकृतत्रेतादीनां अन्तकः युगान्तकः । कालश्चासौयुगान्तकश्चेतिविशेष्यपूर्वपदः कर्मधारयः । विशेषणविशेष्यभावसंकामचारित्वात् । सउपमायस्तं ॥ वि० मुखतः मुखस्थललाटनेत्रेणेत्यर्थः ॥ ३७ ॥ ती० फलश्रुतिस्तत्कान्दे—"गिरीणांभेदनंचैवकिष्किन्धागमनंतथा । वालिसुग्रीवयोर्युद्धंश्रुत्वाविजयपूर्वकम् । युद्धेविजयमाप्नोतिवालिनोविजयंयथा" इति ॥ ३८ ॥ इतिषोडशःसर्गः ॥ १६ ॥

[पा०] १ ङ.—ट. गतसत्वो. २ इदमर्धं च.—झ. ट. पाठेषुदृश्यते. ३ क. ग. ङ.—झ. कालहवान्तकोपमं. ४ झ. रूपभासितं. ङ. च. ज. ञ. ट. रूपभूषितं. ५ क. कर्शनं. ६ क. ङ.—ट. प्रपुष्पिता. ७ ङ. छ. झ. इवाचलोद्भूत. च. इवाचलोत्थितः. ट. इवाग्निलोद्भतः. ख. इवातिलोहितः. ८ ख.—ट. प्रभ्रंशितेन्द्र. ९ झ. अस्मिन्निपतिते. १० क. ख. ङ. ज.—ट. हर्यृक्षाणां. ११ झ. ट. भेदिनी.

भूमौ निपतितस्यापि तस्य देहं महात्मनः ॥ न श्रीर्जहाति न प्राणा न तेजो न पराक्रमः ॥ ४ ॥
शक्रदत्ता वरा माला काञ्चनी वैत्रभूषिता ॥ दधार हरिमुख्यस्य प्राणांस्तेजः श्रियं च सा ॥ ५ ॥
स तया मालया वीरो हैमया हरियूथपः ॥ सन्ध्यानुगतपर्यन्तः पयोधर इवाभवत् ॥ ६ ॥
तस्य माला च देहश्च मर्मघाती च यः शरः ॥ त्रिधेव रचिता लक्ष्मीः पतितस्यापि शोभते ॥ ७ ॥
तदस्त्रं तस्य वीरस्य स्वर्गमार्गप्रभावनम् ॥ रामबाणासनक्षिप्तमावहत्परमां गतिम् ॥ ८ ॥
तं तदा पतितं संख्ये गतार्चिषमिवानलम् ॥ बहुमान्य च तं वीरं वीक्षमाणं शनैरिव ॥ ९ ॥
ययातिमिव पुण्यान्ते देवलोकात्परिच्युतम् ॥ आदित्यमिव कालेन युगान्ते भुवि पातितम् ॥१०॥
महेन्द्रमिव दुर्धर्षं महेन्द्रमिव दुःसहम् ॥ महेन्द्रपुत्रं पतितं वालिनं हेममालिनम् ॥ ११ ॥
सिंहोरस्कं महाबाहुं दीप्तास्यं हरिलोचनम् ॥ लक्ष्मणानुगतो रामो ददर्शोपससर्प च ॥ १२ ॥
[तं तथा पतितं वीरं गतार्चिषमिवानलम् ॥ बहुमान्य च तं वीरं वीक्षमाणं शनैरिव ॥
उपयातौ महावीर्यौ भ्रातरौ रामलक्ष्मणौ ॥] १३ ॥
तं दृष्ट्वा राघवं वाली लक्ष्मणं च महाबलम् ॥ अब्रवीत्प्रश्रितं वाक्यं परुषं धर्मसंहितम् ॥ १४ ॥
[बाष्पसंरुद्धकण्ठस्तु वाली सार्तस्वरं शनैः ॥ स भूमावल्पतेजोसुर्निहतो नष्टचेतनः ॥ १५ ॥
अर्थसंहितया वाचा गर्वितं रणगर्वितः ॥ उवाच रामं संप्रेक्ष्य पङ्कलग्न इव द्विपः ॥ १६ ॥]

बन्धनरज्जुः ॥ २—३ ॥ तेजः प्रतापः ॥ ४ ॥ उक्तेऽर्थे हेतुमाह—शक्रेति ॥ ५ ॥ हैमयेति ङीभावआर्षः ॥ ६ ॥ लक्ष्मीः तेजः ॥ ७ ॥ स्वर्गमार्गस्य प्रभावनं प्रापकं । "भू, प्राप्तौ" इत्यस्माद्धुट् । अतएव परमां गतिं आवहत् । संपादयामासेत्यर्थः ॥ ८ ॥ तं तदेत्यादिचत्वारः ॥ संख्ये युद्धे । तं वीरं रामं बहुमान्य साधुवाणं पातितवानसीति श्लाघयित्वा । स कुत्र स्थित इति शनैः वेदनातिशयान्मन्दं वीक्षमाणं । इवशब्दो वाक्यालंकारे । ययातिमिव । कालेन दैवेन । "कालः श्यामलदिष्टयोः" इति दर्पणः । महेन्द्रमिव दुःसहं आभिमुख्येन स्थातुमशक्यं । दीप्तास्यं दीप्तमुखं । हरिलोचनं कपिलनेत्रं ॥ ९—१३ ॥ प्रश्रितं विनयान्वितं ॥ १४—१६ ॥

ति० त्रिधारचितेव त्रिधाविभक्तेव । मालादेहशररूपालक्ष्मीरित्यावत् ॥ ७ ॥ तौ० स्वर्गमार्गः प्रभवत्यस्मादितिस्वर्गमार्गप्रभावनं । आवहत् संपादयामास । वालिनोमुक्तिरभूदित्यर्थः ॥ ति० बाणाअस्यन्तेऽनेनेतिबाणासनं धनुः ॥ स० अस्त्रमत्रबाणः । बाणासनं धनुः । स्वर्गमार्गप्रभावनमितियतः अतः परमांगतिमावहत् ॥ ८ ॥ स० तंतथेतिश्लोकस्यद्वितीयान्तानांचतुर्थश्लोकस्थयाददर्शेतिक्रिययाऽन्वयः ॥ ९ ॥ ति० महेन्द्रं उपेन्द्रस्यैवकृत्रवधोत्तरमिदंनामेत्येके । महेन्द्रः आजानदेवः । उपेन्द्रः कर्मदेवइत्यन्ये ॥ स० महेन्द्रमिवदुर्धर्षमित्यादि पूर्वमेवबोध्यं । अतोगतार्चिषमित्यादिनानविरोधः ॥ ११ ॥ शि० हरिलोचनं पीतनेत्रं । हरिश्छन्दःपीतपर्यायः । "हरिदाभःपालाशोहरितोहरित्" इतिकोशः । आर्षस्तलोपः इतिभद्राः । वस्तुतस्तु हरिशब्दस्यापिपीतवाचकत्वं । "स्वर्णवर्णोहरिःस्मृतः" इत्यनेकार्थः ॥ १२ ॥ ति० बहुमान्य संमान्य । शनैरेवोपयातौ समीपंगतौ ॥ शि० संख्येतथापतितं वीरपरिपाट्यासंग्रामभुविलुण्ठितं । अतएवबहुमान्यं अधिकंसत्करणीयं । वीक्ष्यमाणं दृष्टिपथंप्राप्तं । वीरंतं प्राप्तमोक्षंतंवालिनं । शनैरुपयातौ । "तत्रोरामृतपुच्छेषु" इतिकोशः ॥ १३ ॥ ति० अल्पंतेजोसवश्वयस्यसः । नष्टचेतनः नष्टचेष्टः । गर्वितं गर्वोपेतंयथाभवतितथारणगर्वितं रामं अर्थयुक्तयावाचापरुषमब्रवीदित्यन्वयः ॥

[पा०] १ ङ.—ट. रत्नभूषिता. २ क. हरिराजस्य. ३ क. ख. ग. सन्ध्यानुरक्त. ४ छ. पतितस्यापि. ङ. च. ज. पतितस्याव. ५ क.—ट. तथा. ६ इदमर्धं झ. ट. पाठयोर्नदृश्यते. ७ ग. ङ—ज. ञ. लोकादच्युतं. झ. ट. लोकादिहच्युतं. ८ छ. झ. ञ. ट. दुर्धर्षमुपेन्द्रमिव. ९ ङ. च. छ. झ. ट. व्यूढोरस्कं. १० ख. ङ.—ट. लक्ष्मणानुचरो. ११ ग. ङ.—ट. पाठेष्विदमर्धत्रयंदृश्यते. १२ ट. बहुमान्यंच. १३ घ. सहट्ठा. १४ ङ—ट. अब्रवीत्परुषंवाक्यंप्रश्रितं. १५ इदंश्लोकद्वयं क. ख. ग. ङ.—ज. ञ. पाठेषुदृश्यते. झ. ठ. पाठयोस्तु बाष्पसंरुद्धकण्ठस्तु उवाचरामंसंप्रेक्ष्येत्यर्धत्रयवर्जंदृश्यते. १६ झ. ट. रणगर्वितं.

त्वं नराधिपतेः पुत्रः प्रथितः प्रियदर्शनः ॥ कुलीनः सत्त्वसंपन्नस्तेजस्वी चरितव्रतः ॥ १७ ॥
पराङ्मुखवधं कृत्वा को नु प्राप्तस्त्वया गुणः ॥ यदहं युद्धसंरब्धः शरेणोरसि ताडितः ॥ १८ ॥
रामः करुणवेदी च प्रजानां च हिते रतः ॥ सानुक्रोशो जितोत्साहः समयज्ञो दृढव्रतः ॥
इति ते सर्वभूतानि कथयन्ति यशो भुवि ॥ १९ ॥
दमः शमः क्षमा धर्मो धृतिः सत्यं पराक्रमः ॥ पार्थिवानां गुणा राजन्दण्डश्चार्ह्येषराधिषु ॥ २० ॥
तान्गुणान्संप्रधार्याहमभ्यं चाभिजनं तव ॥ तारया प्रतिषिद्धोपि सुग्रीवेण समागतः ॥ २१ ॥
न मामन्येन संरब्धं प्रमत्तं योद्धुमर्हति ॥ इति मे बुद्धिरुत्पन्ना बभूवादर्शने तव ॥ २२ ॥
न त्वां विनिहतात्मानं धर्मध्वजमधार्मिकम् ॥ जाने पापसमाचारं तृणैः कूपमिवावृतम् ॥ २३ ॥
सतां वेषधरं पापं प्रच्छन्नमिव पावकम् ॥ नाहं त्वामभिजानामि धर्मच्छद्माभिसंवृतम् ॥ २४ ॥
विषये वा पुरे वा ते यदा नापकरोम्यहम् ॥ न च त्वामवजाने च कस्मात्त्वं हंस्यकिल्बिषम् ॥ २५ ॥
फलमूलाशनं नित्यं वानरं वनगोचरम् ॥ मामिहाप्रतियुध्यन्तमन्येन च समागतम् ॥ २६ ॥
लिङ्गमप्यस्ति ते राजन्दृश्यतेऽधर्मसंहितम् ॥ कः क्षत्रियकुले जातः श्रुतवान्नष्टसंशयः ॥
धर्मलिङ्गप्रतिच्छन्नः क्रूरं कर्म समाचरेत् ॥ २७ ॥

प्रश्नितं वचनमाह—त्वमित्यादिना ॥ प्रियदर्शनः प्रियं दर्शनं शास्त्रं यस्य सः । "दर्शनं दृशि शास्त्रे स्यात्" इति धरणः । पराङ्मुखवधं परयुद्धासक्तवधं । गुणः उत्कर्षः । युद्धसंरब्धः अन्ययुद्धपराङ्मुख इत्यर्थः ॥ १७—१८ ॥ करुणवेदी कारुण्यज्ञः । सानुक्रोशः सदयः । समयज्ञः आचारज्ञः । ते यश इत्यन्वयः ॥ १९ ॥ दम इति । "शमश्चित्तप्रशान्तिःस्यादम इन्द्रियनिग्रहः" ॥ २० ॥ अभिजनं आभिजात्यं । समागतः युद्धंकृतवानस्मीत्यर्थः ॥ २१ ॥ प्रमत्तं युद्धपरवशं । अर्हति । उक्तगुणो राम इति शेषः । अदर्शने तव । दर्शने सत्येवमभूदितिभावः ॥ २२ ॥ विनिहतात्मानं विशेषेण निहतबुद्धिं । धर्मध्वजं धर्मलिङ्गं । वस्तुतो धर्मरहितमित्यर्थः ॥ २३ ॥ एतदेव स्पष्टयति—सतामिति ॥ धर्मच्छद्माभिसंवृतं धर्मव्याजयुक्तं ॥ २४ ॥ यदा नापकरोमि यस्मान्नापाकरवं । त्वां नावजाने । त्वय्यवमानं नाकरवमित्यर्थः । तस्मादकिल्बिषं मां किमर्थं हंसीति संबन्धः ॥२५॥ फलेत्यस्य श्लोकस्य पूर्वेण संबन्धः ॥ २६ ॥ हे राजन् अधर्मसंहितं अधर्मकृतं । लिङ्गमपि ते अस्ति दृश्यतेच स्पष्टमवगम्यते चेत्यर्थः । कुत इत्यत्राह क

॥ १५ ॥ १६ ॥ शि० चरितव्रतः चरितानिकृतालिव्रतानिवेदोक्तकर्माणियेनसः ॥ १७ ॥ ती० समयज्ञः उचितानुचितसमयज्ञइत्यर्थः । करुणवेदी विचारादिसामग्रीसमेतस्सन् आश्रयान् रक्षयत्वेनवेत्तीतिकरुणवेदी ॥ शि० करुणवेदी करुणं दयावन्तंवेत्तिस्वकीयत्वेनजानातितच्छीलः । प्रजानांहितेइष्टसाधनेरतः । समयज्ञः समयंकार्योचितकालंजानातिसः । दृढव्रतः अप्रच्युतसंकल्पः रामोस्तीत्येतत्तत्वयशः भुविसर्वेभूतानिसर्वेप्राणिनः कथयन्ति । श्लोकचतुष्टयमेकान्वयि ॥ १९ ॥ ति० क्षमा शक्यप्रतिक्रियापकारसहिष्णुता ॥ २० ॥ वि० अन्येनसंयुक्तं अतएव ते त्वयि प्रमत्तं असावधानं मां नवेद्धुमर्हतीति बुद्धिः त्वदादर्शने त्वदर्शनात्प्रागुत्पन्ना ॥ २२ ॥ रामानु० विनिहतात्मानं गूढात्मानं ॥ वि० विनिहतात्मानं अधर्माचरणान्नष्टात्मानं ॥ शि० विनिहतात्मानं विनिहतः घातितः आत्मा ममदेहोयेनतं ॥ २३ ॥ ति० यदा यस्मात् । पापंनकरोमि । नेत्यस्यानुकर्षः । तनि० अविमार्व्यंकलहनिमित्तमित्याह—विषये देशे । पुरे पट्टणेवा । ते तुभ्यं । नापकरोमि भूतेलट् । त्वांनावजाने त्वयिविषयेअवज्ञानाकरवं । आवयोस्सामन्तलाभावात्सीमाविवादोवाजलविवादोवागोभूम्यादिविवादोवाकुलगत-

[पा०] १ इदमर्धं ब्र. ट. पाठयोर्नदृश्यते. २ इदमर्धं यदहंयुद्धसंरब्धइत्यर्धात्परं ब्र. ट. पाठयोर्दृश्यते. ३ छ. ब्र. ट. कोत्र. ४ छ. ज. ब्र. ट. संरब्धस्त्वत्कृतेनिधनंगतः. ५ क. ख. ग. ङ.—ट. महोत्साहः. ६ छ. ब्र. ट. इत्येतत्सर्वं. ७ छ. ब्र. ट. सत्वं. ८ क.—छ. ब्र. ञ. प्यपकारिषु. ९ ख. ब्र. ट. प्रतिषिद्धस्त्वन्मुग्रीवेण. १० ङ. च. ज. संयुक्तं. ११ छ. ब्र. वेद्धुमर्हसि. क. ज. ट. वेद्धुमर्हति. १२ छ. ब्र. इतिते. १३ ङ. ब्र. ट. पापंकरोम्यहं. १४ ख. घ. ङ च. ज. ञ. त्वांप्रतियोत्स्यामि. क. ब्र. ट. मवजानेहं ख. त्वांप्रतियोत्स्यामि. १५ ङ. च. ज. ञ. राजानंचबनौकसां.

रामं राजकुले जातो धर्मवानिति विश्रुतः ॥ अभव्यो भव्यरूपेण किमर्थं परिधावसि ॥ २८ ॥
साम दानं क्षमा धर्मः सत्यं धृतिपराक्रमौ ॥ पार्थिवानां गुणा राजन्दण्डश्चाप्यपराधिषु ॥ २९ ॥
वयं वनचरा राम मृगा मूलफलाशनाः ॥ एषा प्रकृतिरस्माकं पुरुषस्त्वं नरेश्वरः ॥ ३० ॥
भूमिर्हिरण्यं रूप्यं च विग्रहे कारणानि च ॥ अत्र कस्ते वने लोभो मदीयेषु फलेषु वा ॥ ३१ ॥
नयश्च विनयश्चोभौ निग्रहानुग्रहावपि ॥ राजवृत्तिरसंकीर्णा न नृपाः कामवृत्तयः ॥ ३२ ॥
त्वं तु कामप्रधानश्च कोपनश्चानवस्थितः ॥ राजवृत्तैश्च संकीर्णः शरासनपरायणः ॥ ३३ ॥
न तेऽस्त्यपचितिर्धर्मे नार्थे बुद्धिरवस्थिता ॥ इन्द्रियैः कामवृत्तः सन्कृष्यसे मनुजेश्वर ॥ ३४ ॥
हत्वा माणेन काकुत्स्थ मामिहानपराधिनम् ॥ किं वक्ष्यसि सतां मध्ये कर्म कृत्वा जुगुप्सितम् ॥ ३५ ॥
राजहा ब्रह्महा गोघ्नश्चोरः प्राणिवधे रतः ॥ नास्तिकः परिवेत्ता च सर्वे निरयगामिनः ॥ ३६ ॥
सूचकश्च कदर्यश्च मित्रघ्नो गुरुतल्पगः ॥ लोकं पापात्मनामेते गच्छन्ते नात्र संशयः ॥ ३७ ॥
अधार्यं चर्म मे सद्भी रोमाण्यस्थि च वर्जितम् ॥ अभक्ष्याणि च मांसानि त्वद्विधैर्धर्मचारिभिः ॥ ३८ ॥
पञ्च पञ्चनखा भक्ष्या ब्रह्मक्षत्रेण राघव ॥ शल्यकः श्वाविडो गोधा शशः कूर्मश्च पञ्चमः ॥ ३९ ॥

इति ॥ २७ ॥ अभव्यः क्रूरः । भव्यरूपेण सौम्यरूपेण । परिधावसि चरसि ॥ २८ ॥ साम सान्त्वनं ॥ २९ ॥ लोके कस्यचिद्वधे अपराधस्तदर्थलाभेच्छा वा हेतुर्भवेत् । तत्र नाद्य इत्याह—वयमिति । पुरुषः मनुष्यः । नच केवलमनुष्यः अपितु नरेश्वरः ॥ ३० ॥ द्वितीयोपि नेत्याह—भूमिरिति ॥ लोके भूम्यादीनि कलहे कारणानि भवन्ति । अत्र अन्येषु वा मदीयेषु फलेषु ते को लोभः किं विषयेच्छा वर्तते ॥ ३१ ॥ नयोनुग्रहश्च सद्राजधर्मौ । विनयो विपरीतनयः निग्रहश्च कुराजधर्मौ । इत्येषा राजवृत्तिरसङ्कीर्णा प्राह्या । तथाच नृपाः कामवृत्तयो नस्युः । स्वेच्छया नयो विनयश्च निग्रहोनुग्रहश्च राजभिर्नैकार्या इत्यर्थः ॥ ३२ ॥ अनवस्थितः अमर्यादः । राजवृत्तैः राजचरितैः हेतुभिः संकीर्णः । संकीर्णराजवृत्त इत्यर्थः । शरासनपरायणः यदृच्छयायं हन्तुमिच्छसि तं हंसीत्यर्थः ॥ ३३ ॥ अपचितिः पूजा । धर्मश्रद्धा नास्तीत्यर्थः । अवस्थिता व्यवस्थिता । परद्रव्याभिलाषिणीत्यर्थः । कामे च न व्यवस्थेत्याह—इन्द्रियैरिति ॥ ३४ ॥ मां हत्वा स्थितः त्वं जुगुप्सितं कर्म कृत्वा सतां साधुकर्मकारिणां मध्ये किं वक्ष्यसि ॥ ३५ ॥ परिवेत्ता ज्येष्ठेऽनूढे दारपरिग्रहकृत् । "परिवेत्तानुजोनूढे ज्येष्ठे दारपरिग्रहात्" इत्यमरः । निरयगामिनः नरकगामिनः ॥ ३६ ॥ सूचकः पिशुनः । कदर्यः लुब्धः । गच्छन्ते गच्छन्ति ॥ ३७ ॥ किमेवं निन्दसि मृगयायां मृगवधस्यादोषत्वादित्यत्राह—अधार्यमिति ॥ मृगचर्मवन् मे चर्म न धार्यं । मे रोमाणि ऊर्णादिवत्रास्तरणार्हाणि । मे अस्थि च गजास्थिवन्न स्पृश्यं । मांसानि च न भक्ष्याणि । अतः किमर्थं मां हतवानसि ॥ ३८ ॥ अभक्ष्यता कुत इत्यत्राह—पञ्चेति ॥ शल्यकः श्वाविडः गोधा शशः कूर्मश्चेति पञ्चनखाः

वैरेवा स्वयंवरादीनार्षादिविषयकविवादोवानास्तीतिभावः ॥ २५ ॥ स० भव्यरूपेण मङ्गलरूपेण । संहारकर्तृत्वेनभव्यरूपेण रुद्ररूपेणेत्यप्यर्थः ॥ २८ ॥ तनि० वयंवनचराः भवन्तः पुरचराः । वयंमृगाः भवन्तोमनुष्याः । वयंमूलफलाशनाः यूयंराज्ञभोजनाः । नरेश्वरस्त्वं वयंपरिचारकाः ॥ ३० ॥ ति० रूपं रूप्यं ॥ ३१ ॥ ति० शरासनपरायणः यत्रक्वापिशराणामसनंक्षेपणं तत्परायणः ॥ ३३ ॥ वि० परिवेत्ता ज्येष्ठेअकृतदारेऽकृतामिहोत्रेच कृतदारःकृताग्निहोत्रोऽनुजः ॥ ३६ ॥ स० गच्छन्तइतिपदव्यत्ययेन रामस्यतदनर्हत्वंसूचयति ॥ ३७ ॥ ती० शल्यवाञ्शल्यः । अर्शआदित्वादच् । शल्यएवशल्यकः । शुक्तिकाकारशल्यावृतसर्वाङ्गोजन्तुविशेषः । श्वाविधः कण्टकाकारदीर्घरोमभिः श्वानंविध्यतीति श्वाविधः ॥ दी० पञ्चनखत्वात्कथमयोग्यमित्याशंक्ययोग्यान्पञ्चनखान्संपरिचष्टे—पञ्चेति ॥ स० ब्रह्मक्षत्रेणेत्यत्र समाहारउत्तरपदलोपीवासमासः ॥ शि०

[पा०] १ ङ. ञ. त्वंराघवकुले. २ ङ. ञ. ट. परिधावसे. ३ क.—ट. व्यपकारिषु. ४ ब. छ. ञ. ट. फलाशिनः. ५ क. घ. च. छ. ञ. नरेश्वर. ६ रूपंच. ७ च. छ. ञ. ट. तत्र. ८ ख. ग. ङ. ज. ब. लाभः. ९ ङ. च. ज. ब. कोपी चाप्यनवस्थितः. १० ञ. ट. राजवृत्तेषु. च. राजवृत्तेसमुत्तीर्णः. ज. राजवृत्तंसमुत्तीर्णं. ब. राजवृत्तेश्चसंकीर्णः. ११ ङ. ज. कृलाकर्मं. १२ ख. सुदुष्करं. १३ ट. लोके.

चर्म चास्थि च मे राजन्न स्पृशन्ति मनीषिणः ॥ अभक्ष्याणि च मांसानि सोहं पञ्चनखो हतः ॥४०॥
तारया वाक्यमुक्तोऽहं सत्यं सर्वज्ञया हितम् ॥ तदतिक्रम्य मोहेन कालस्य वशमागतः ॥ ४१ ॥
त्वया नाथेन काकुत्स्थ न सनाथा वसुन्धरा ॥ प्रमदा शीलसंपन्ना धूर्तेन पतिना यथा ॥ ४२ ॥
शठो नैकृतिकः क्षुद्रो मिथ्याप्रश्रितमानसः ॥ कथं दशरथेन त्वं जातः पापो महात्मना ॥ ४३ ॥
छिन्नचारित्रकक्ष्येण सतां धर्मातिवर्तिना ॥ त्यक्तधर्मांकुशेनाहं निहतो राम हस्तिना ॥ ४४ ॥
अशुभं चाप्ययुक्तं च सतां चैव विगर्हितम् ॥ वक्ष्यसे चेदृशं कृत्वा सद्भिः सह समागतः ॥ ४५ ॥
उदासीनेषु योसासु विक्रमस्ते प्रकाशितः ॥ अपकारिषु तं राजन्न हि पश्यामि विक्रमम् ॥ ४६ ॥
दृश्यमानस्तु युध्येथा मया यदि नृपात्मज ॥ अद्य वैवस्वतं देवं पश्येस्त्वं निहतो मया ॥ ४७ ॥
त्वयाऽदृश्येन तु रणे निहतोऽहं दुरासदः ॥ प्रसुप्तः पन्नगेनेव नरः पानवशं गतः ॥ ४८ ॥
मामेव यदि पूर्वं त्वमेतदर्थमचोदयः ॥ मैथिलीमहमेकाह्ना तव चानीतवान्भवेत् ॥
[राक्षसं च दुरात्मानं तव भार्यापहारिणम् ॥ ४९ ॥]
सुग्रीवप्रियकामेन यत्कृतेऽस्मि हतस्त्वया ॥ कण्ठे बद्ध्वा प्रदास्यां ते निहतं रावणं रणे ॥ ५० ॥

पञ्च भक्ष्याः । पञ्चनखेषु जन्तुषु एते पञ्चैव भक्ष्याः । नान्य इत्यर्थः । परिसंख्याविधिरयं । ब्रह्मक्षत्रेणेत्युपलक्षणं । त्रैवर्णिकेनेत्यर्थः । शलतीति शल्यः । "शल—चल, अशुगमने" इत्यस्माद्धातोः "सानसिवर्णसिपर्णसितण्डुलाङ्कुशचषालेल्वलधिष्ण्यशल्याः" इति निपातनाद्यत्प्रत्ययः । ततः स्वार्थे कः । यद्वा शल्यं शङ्कुः । "वा पुंसि शल्यं शङ्कुर्ना" इत्यमरः । तत्सदृशानि रोमाणि शल्यानि तद्वान् शल्यः । अर्शआद्यजन्तः । ततः स्वार्थे कः । श्वानं विध्यतीति श्वाविधः । पचाद्यच् । "अन्येषामपि" इति दीर्घः । पृषोदरादित्वाङ्कारः (?) । इमौ वराहविशेषौ ॥ ३९ ॥ उपसंहरति—चर्म चेति ॥ सोहं अभक्ष्यपञ्चनखान्तर्भूतोहं ॥ ४०—४१ ॥ पतिना पत्या शठः गूढविप्रियकृत् । निकृत्या अपकारेण जीवतीति नैकृतिकः । क्षुद्रः क्षुद्रकर्मकारी । मिथ्याप्रश्रितमानसः मिथ्याशान्तमनस्कः ॥ ४२—४३ ॥ छिन्ना चारित्रमेव कक्ष्या इभबन्धनं येन स तथा । सतां धर्मातिवर्तिना सतां धर्माः पूर्वोक्ताः सामदानसापराधजनदण्डनाद्यः । तानतीत्य वर्तत इति तथा । गजविषये अतिक्रान्तमर्यादेनेत्यर्थः ॥ ४४ ॥ ईदृशं कृत्वा स्थितस्त्वं सद्भिः ईदृशं अशुभत्वादिविशिष्टं वक्ष्यसे । अशुभकारीत्येवं वक्ष्यसीत्यर्थः ॥ ४५ ॥ अपकारिषु रावणादिषु ॥ ४६—४७ ॥ अदृश्येनेति च्छेदः ॥ ॥ ४८ ॥ एतदर्थं मैथिल्यानयनार्थं । भवेत् भवेयम् । पुरुषव्यत्ययः आर्षः ॥ ४९ ॥ यत्कृते यस्य रावणस्यकृते हतोस्मि । तं कण्ठे बद्ध्वा ते प्रदास्यामिति

पञ्चनखाःशल्यकादयः पञ्चैवभक्ष्याः । परिसंख्याविधिरयं । रागादन्यत्रापिभक्षणस्यप्राप्तत्वात् । अतएवैवकारलाभः । तथाच मीमांसा—"विधिरत्यन्तमप्राप्तौनियमःपाक्षिकेसति । तत्रचान्यत्रचप्राप्तौपरिसंख्येतिगीयते" इति ॥ ३९ ॥ स० पञ्चमी विहाबदशरथेनेतितृतीयाप्रयोगेण नसाक्षाज्जनिर्विवक्षिता किंतुप्रादुर्भावरूपैवेतिसूचयति ॥ ४१ ॥ ती० चकारःकिमित्यर्थकः । किंवक्ष्यसे वक्ष्यसि ॥ ४५ ॥ शि० दृश्यीति । हेनृपात्मज, दृशी सर्वद्रष्टा अतएव अमानः सर्वद्रष्टृत्वादिगर्वरहितः । किंच नमानः पूजावान् यस्मात् सर्वपूज्यइत्यर्थः । स्वयंदिमयासहयुधियुध्येथाः तदा अहैवमयानिहतः ताडितएवत्वं स्वतं अतिविस्मृतं । देवं मघुद्योत्साहजनितकान्तिं । लपश्येः । एतेनसुग्रीवस्याल्पबलत्वान्ममातीवयुद्धोत्साहोनजातइतिध्वनितं । तुशब्दोवधार्थे । वैवश्वन्दीएवार्थे ॥ ४७ ॥ ति० अतस्त्वंपापवशंगतइत्यर्थः । टीका० ननुवालिसुग्रीवयोर्युद्धेरामस्त्वदृश्योभूत्वाकथंवालिनंहतवानिति चेत्सत्यं—"आहूयवालिनंब्रह्मादद्यौवरमनुत्तमम् । प्रतीपवर्तिनोभूयादधैवत्वमरिंदम" इतिवरप्रदानान्नाभिमुख्येनयुद्धकरणं ॥ ४८ ॥ स० एकेतिरामसंबोधनं प्रधानत्वाद्भार्याहितत्वाद्वा । "राजाहस्सखिभ्यः—" इतिसमासान्तविधेरनित्यत्वाद्वा एका-

[पा०] १ क.—ट. रामनस्पृशन्ति. २ ख. घ. ङ. ट. शीलसंपूर्णा. ३ क. ख. ग. ङ.—ट. पक्षेवचविधर्मणा. ४ क. ङ.—ट. विक्रमोयं. ५ क. ग. ङ. च. छ. झ ब. ट. तेरामनैवपश्यामि. ६ ङ. झ. ट. युधि. ७ क. ग. च.—ञ. पापवशं. ८ ख. ज्ञानयिष्याम्यसंशयं. ९ इदमर्धं घ. च.—ञ. पाठेषुदृश्यते. १० क. ङ. ज.—ट. यदहंनिहतस्त्वया. ११ क. ङ. बध्वादशग्रीवंदयांते.

न्यस्तां सागरतोये वा पाताले वाऽपि मैथिलीम् ॥ आनयेयं तवादेशाच्छ्वेतामश्वतरीमिव ॥ ५१ ॥

योजना । सुग्रीवसख्यनिमित्तमूनं मैथिल्यानयनं मन्थरीमिव मधुकैटभाभ्यां पाताले निरुद्धां च तारया पूर्वनिवेदितमिति ज्ञेयं ॥ ५० ॥ श्वेता- श्वेताश्वतरीरूपां द्युतिं द्यामीव इत्यर्थः ॥ ५१ ॥

ज्ञेतिमात्रम् ॥ ५१ ॥ ही० आनयेयमिति । मनूक्तराजधर्मानभिज्ञस्तीजनसामान्यबुद्धाहं राजधर्मानभिज्ञस्त्रीजनसामान्यबुद्धाहमिति भावः । तत्र पूर्वं सख्यप्रतिबन्धनिवारणस्य प्रतिज्ञातत्वाद्देवान्तरसद्भावाच्च । तथाचोक्तकाण्डे—" अभयेवादिनेदमेवप्रतिज्ञातमिति द्रष्टव्यं । रावणस्त्रीहरणेपि प्रतिज्ञातमेव । रावणस्त्रीहरणाभावादकथनमेवहि " इति । " तंत्वद्यैवाहमेष्यामि सख्यमेवमहाफलं " इत्यत्र्यसंगसमाप्तिपर्यन्तस्त्रीहरणाभावाच्चोक्तमर्थं । वालिनिधौरामेणिदुरात्मनेप्रकृतेऽपिवालिवधोश्रीरामस्यैवस्वतन्त्रमिति । इत्यादि । वधं वाक्यरूपवधप्रतीक्षमार्थं । यद्वा-प्रथिमं धर्मसंयुतं अनविनवाक्यमयदीदिवत्यवः । तदेवाह पराक्रमेत्यादि । पराक्रमेणधर्मपराक्रमेणविषयोक्तपक्षमसमयपरिपालनाद्धेतोर्नृपः निर्वेगुणवाक्यसहकृतः प्राप्तः । यतः यस्मात्कारणात् । बुद्धसंभोऽहत्वकृतेनैवधनसत्कृते लक्ष्मिणे । लक्ष्मणिधनगतदृश्यर्थं । अनेनैवयोगेनिरोधः । द्युगुणप्रसादतियोजना । "राजाप्रसन्नसन्यायप्रसन्नदधान्नोमिथिलेश्वरं " इतिवचनात्प्रसन्नेनैवसन्यविहारकर्तृगुणस्यवाप्राप्तः । "राजभिर्धृतदण्डास्तुकृत्वापापानिमानवाः । निर्मलाःस्वर्गमायान्तिसन्तः सुकृतिनोयथा " इतिवचनात्स्वयंपापिनिष्कल्मषस्वरूपगुणप्राप्तहेतुभावः । अथसुग्रीवसख्यंकृत्वापिवृद्धावालस्वभावकिमर्थंहनोमीत्याशङ्क्य सुग्रीवहृदयवाक्यमदेवादुःकृतमुक्तिकारणत्वहृदयबोधनायाहृदयाह—कुलीनहृदयादिश्लोकपञ्चकेन । कुलीनत्वादीनांचगुणानांकृत्वा अथवहमादिरावणंमर्षिविधायैवसख्यमभिजनंचसंप्रधार्यपुरावनन्तव्यमिति तारावाक्यप्रतिबद्धोपिअन्येनसख्यंकृत्वेत्युत्तरार्धेनैवमेवपुरुषव्यवहारभूतेतिकृत्वासुग्रीवेणसमागतः । तथापि स्वदुष्टमनसंबाहतवान् । अतोऽसमग्रदृढत्वमनसाऽतिसंधानेनैवयोजना । अतएवस्यामेवमन्यहृदयाह—सख्यमित्यादिना । सख्यमित्यादिसख्यधर्मव्यवस्थापनार्थिकस्वरूपसमाचारादिविशेषणविशिष्टसख्यमाचरति । किंचनत्वादिविशेषणविशिष्टसख्यमाचरति । किंचनत्वादिसख्यस्यापिद्वैगुण्यकरीश्वरमेवमानयीत्यर्थः । मनसवराधिनस्तवापिदुःखमनेनैवहेतोर्हृदयाहृदयाह—विषयहरत्वादिना । समर्थकिंचिदर्थनहरति । अहमपितेविषयेहरेतुरोवहानपराधोपि अपराधंनकृतवान् । तावत्यवनेव । तथाविधमूलशिथिलंवानरमप्रतियुध्यन्तमनेनमारयतीहि । तत् तस्मात् सविशेषसद्भावादेवत्यर्थः । किंच कृत्रिमकुलेऽवतीर्यलोकानुग्रहार्थमवतीर्णस्यमोक्षायवत्वरमकथनाद्विनिश्चयमन्यायाचरणसंभविष्यतीत्याशयेनाह—धर्मज्ञेत्यादिसार्धश्लोकेन । हेराघवराजकुलेजात धर्मज्ञेतिविशेषणमस्मिन् अर्थे प्रयोजनमुद्दिश्यमाध्यस्थं मध्यस्थेनपरिधावतिहि । कृत्यंसमाचार हि । इत्यवविशेषणवटनहेतुभावः । राजनीतिंचैव वैनाशाद्यां मनुप्रकाशयुक्तएवेत्याशयेनाह—साम्नेत्यमिति । अपकारिष्वपिषु वैरकुलाद्यनवलंबनमेवमेवंनीत्याशङ्क्यपरमेवंनीत्याशङ्क्यपरमेवंनीत्याशङ्क्यपर

युक्तं यत्प्राप्नुयाद्राज्यं सुग्रीवः स्वर्गते मयि ॥ अयुक्तं यदधर्मेण त्वयाऽहं निहतो रणे ॥ ५२ ॥
काममेवंविधे लोकः कालेन विनियुज्यते ॥ क्षमं चेद्भवता प्राप्तमुत्तरं साधु चिन्त्यताम् ॥ ५३ ॥
इत्येवमुक्त्वा परिशुष्कवक्त्रः शराभिघाताद्व्यथितो महात्मा ॥
समीक्ष्य रामं रविसन्निकाशं तूष्णीं बभूवामरराजसूनुः ॥ ५४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे सप्तदशः सर्गः ॥ १७ ॥

अष्टादशः सर्गः ॥ १८ ॥

रामेणवालिनंप्रतिसुग्रीवेजीवतिस्रुषातुल्यतद्भार्याहरणरूपतदपराधादिहेतुभिस्तद्वधस्यधर्म्यत्वसमर्थनम् ॥ १ ॥ श्रीरामगर्हणानुतप्तेनवालिनारामक्षमापणपूर्वकमङ्गदपालनप्रार्थना ॥ २ ॥ रामेणाङ्गदपालनादिप्रतिज्ञानेनवालिसमाश्वासनम् ॥३॥

इत्युक्तः प्रश्रितं वाक्यं धर्मार्थसहितं हितम् ॥ परुषं वालिना रामो निहतेन विचेतसा ॥ १ ॥

राज्यार्थं सुग्रीवो मां हतवानित्येतद्युक्तं । त्वं तु मां हतवानित्येतत्त्वयुक्तमित्यर्थः । ज्ञातीनामेवंविधकृत्यस्य स्वाभाविकत्वादिति भावः ॥ ५२ ॥ लोकः एवंविधे मरणरूपे कर्मणि विनियुज्यते । जातस्य मरणं स्वभाव इत्यर्थः । भवता प्राप्तं अदृश्यतया प्रहरणं क्षमं चेत् तत्र साधूत्तरं चिन्त्यतामित्यर्थः ॥ ५३ ॥ परिशुष्कवक्त्रः बहुभाषणक्लेशादिति भावः ॥ ५४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने सप्तदशः सर्गः ॥ १७ ॥

अथ रामस्योत्तरमष्टादशे—इत्युक्त इत्यादि ॥

तिशेषः । यादृशंकृत्वा हत्वेत्यर्थः । सवाली मा मांगत मत्पार्षदत्वंप्राप्तइतित्वसद्भिस्सहवक्ष्यते । एतादृशत्वत्कथनमेवममकृतार्थत्वसूचकमितिभावः। निरुपाधिककरुणामृतसागरस्यतवमहिमानंकोवावर्णयितुंशक्तइत्याशयेनाह—उदासीनेष्विति। हेराम अपकारिष्वस्मासु त्वद्भक्तसुग्रीवायकृतापकारएव तस्मैकृतापकारइतिकृत्वाऽपकारिष्वित्युक्तिः । अस्मास्विति बहुवचनं ताराङ्गदाद्यभिप्रायेण । एतादृशापकारिष्वस्मासुतेजोविक्रमःब्रह्मादीनामपिदुर्लभःपदारविन्दविन्यासःप्रकाशितः । पादारविन्दंप्रदर्शितमित्यर्थः । उदासीनेषुसर्वतोनिवृत्तेषुमुनिषु तंविक्रमंपादारविन्दविन्यासंनपश्यामीतियोजना । अतोऽहंकृतकृत्यइतिभावः । पादारविन्दप्रदर्शनंतु " बहुमान्यचतंवीरंवीक्षमाणंशनैरिव । उपयातौमहावीरौभ्रातरौरामलक्ष्मणौ " इत्युक्तेः । रामस्यपादारविन्दप्रदर्शनार्थमेवासन्नमरणवालिसमीपागमनमित्यवगन्तव्यं । त्वयादृश्यमानः त्वत्प्रतियोद्धाजीवितुनशक्नोतीतिशङ्कयाऽहमदृश्यएवत्वांहतवानित्याशङ्कायांसत्यां तथात्वंत्वदन्येषामेवतवतुनास्तीत्याशयेनाह—दृश्यमानइत्यादि । यदिःकिमित्यर्थे । हेनृपात्मज अद्यमयादृश्यमानस्सन्युध्येथाअपि मयाहतस्सन्वैवस्वतंदेवंपश्येःकिं नपश्येरित्यर्थः । ईश्वरस्यतवमरणशङ्कानास्तीतिभावः । समक्षंरामेणसहप्रतियुध्यवालीनिहतइतिकीर्तिर्मयानलब्धेतिदुःखितआह । त्वयाऽदृश्येनेति । पापवशंगतोऽहंअदृश्येनत्वयानिहतइतिसंबन्धः । त्वदाज्ञाकरणरूपसेवाभाग्यंमयानलब्धमित्याशयेनखिद्यति । सुग्रीवप्रियकामेनेत्यादि । पूर्वंराज्यस्थंसुग्रीवंकिमर्थंनिष्कासितवानित्यतआह—युक्तमिति । अधर्मेण मन्नाशनिमित्तबिलद्वारपिधानरूपाधर्मेण । सुग्रीवः राज्यंप्राप्नुयादितियत् तदयुक्तं । अहंत्वयारणेनिहतः । इतःपरंमयिस्वर्गतेसतिसुग्रीवोराज्यंप्राप्नुयादितियत् तद्युक्तमितिसंबन्धः । अधर्मतोराज्यस्वीकारान्निष्कासितइतिभावः । एतादृशंकिमर्थंहतवानस्मीतिचिन्ताक्रान्तंप्रत्याह—काममिति । एवंविधोलोकः क्षत्रियवृत्तिमाञ्जनः । यद्वा लोकएवंविधश्चेत् मादृशाधर्मचारीजनश्चेदित्यर्थः । कामंकालेनविनियुज्यते । अतोहेतोः राम भवताप्राप्तंमद्वधरूपंउत्तरं उत्तमं । क्षमंयुक्तंउत्तमंयथातथाचिन्त्यतां । मयाकृतपापप्रायश्चित्तरूपत्वान्मद्वधस्ययुक्तत्वमुत्तमत्वंचेतिभावः ॥ ५१ ॥ स० एवंविधोलोकःकालेनअदृष्टप्रेरकश्रीहरिणावियुज्यतइतिहेतोःकाममेतद्भवतु । भवताक्षमंचप्राप्तं । उत्तरं उत्तरत्रक्रियमाणंत्वत्कार्यंसाधुयथातथाचिन्त्यतां ॥ ५२ ॥ स० सूर्यसंकाशमित्यनेन वैरिसादृश्योक्त्यातन्निरीक्षणंतद्वदेवेतिसूचयति ॥ ति० अस्यसर्गस्यतीर्थेनरामस्तुतिपरतयायद्योजनंतन्नकविनिबद्धस्यवक्तुर्वालितस्तात्पर्यविषयभूतं । " यदयुक्तंमयापूर्वंप्रमादाद्वाक्यमप्रियम् । तत्रापिखलुमेदोषंकर्तुंनार्हसिराघव " इत्यग्रे वाल्युक्तेः । नापिवाल्मीकेः तस्यदुरुक्त्यनुवादकत्वात् । अतात्पर्यविषयमपिबुद्धिवैभवादक्षरार्थत्वेनवर्ण्यतइतिचेत्काव्यान्तरमेवभगवतस्स्तावकंक्रियतांकिमनेनप्रयासेनेतिदिक् ॥ ५४ ॥ इतिसप्तदशःसर्गः ॥ १७ ॥

रामानु० इत्युक्तइतिश्लोकस्स्वतन्त्रंवाक्यं । अन्यथारामशब्दोतिरिच्यते ॥ ती० वालिनारामःपरुषमुक्तः अधिक्षिप्तइत्यादेर-

[पा०] १ झ. एवंविधो. २ झ. बभौवानरराजसूनु० बभूवामरराजसूनुरित्यनन्तरं क. ग. पाठयोः तमुक्तवन्तप्रवरंहरीणामथोत्तरंवाक्यमुवाचराम' । हितंचतत्वंवचनंप्रसक्तंसमस्तधर्मार्थसमाहितंच ॥ इतिश्लोकोदृश्यते.

तं निष्प्रभमिवादित्यं मुक्ततोयमिवाम्बुदम् ॥ उक्त्वावाक्यं हरिश्रेष्ठमुपशान्तमिवानलम् ॥ २ ॥
धर्मार्थगुणसंपन्नं हरीश्वरमनुत्तमम् ॥ अधिक्षिप्तस्तदा रामः पश्चाद्वालिनमब्रवीत् ॥ ३ ॥
धर्ममर्थं च कामं च समयं चापि लौकिकम् ॥ अविज्ञाय कथं बाल्यान्मामिहाद्य विगर्हसे ॥ ४ ॥
अपृष्ट्वा बुद्धिसंपन्नान्वृद्धानाचार्यसंमतान् ॥ सौम्य वानरचापल्यात्किं मां वक्तुमिहेच्छसि ॥ ५ ॥
इक्ष्वाकूणामियं भूमिः सशैलवनकानना ॥ मृगपक्षिमनुष्याणां निग्रहेऽग्रहावपि ॥ ६ ॥
तां पालयति धर्मात्मा भरतः सत्यवागृजुः ॥ धर्मकामार्थतत्त्वज्ञो निग्रहानुग्रहे रतः ॥ ७ ॥
नयश्च विनयश्चोभौ यस्मिन्सत्यं च सुस्थितम् ॥ विक्रमश्च यथादृष्टः स राजा देशकालवित् ॥ ८ ॥
तस्य धर्मकृतादेशा वयमन्ये च पार्थिवाः ॥ चरामो वसुधां कृत्स्नां धर्मसन्तानमिच्छवः ॥ ९ ॥
तस्मिन्नृपतिशार्दूले भरते धर्मवत्सले ॥ पालयत्यखिलां भूमिं कश्चरेद्धर्मनिग्रहम् ॥ १० ॥
ते वयं धर्मविभ्रष्टं स्वधर्मे परमे स्थिताः ॥ भरताज्ञां पुरस्कृत्य निगृह्णीमो यथाविधि ॥ ११ ॥

वालिना इत्युक्त इत्यन्वयः । विचेतसेत्यनेन परुषवचनमज्ञानकृतमित्युच्यते ॥ १ ॥ तमित्यादि द्वौ ॥ तदा पूर्वं । अधिक्षिप्तो रामः धर्मार्थगुणसंपन्नं अनुत्तमं यथाभवतितथा पश्चाद्वालिनमब्रवीदिति योजना ॥२—३॥ समयं आचारं । "समयाः शपथाचारकालसिद्धान्तसंविदः" इत्यमरः । बाल्यात् अज्ञानात् ॥ ४ ॥ अपृष्ट्वा धर्मादिकमितिशेषः । वानरचापल्यात् वानरत्वकृतचापल्यात् ॥ ५ ॥ इयं जम्बूद्वीपात्मिका । लोके कस्यचिद्भूमेः स्वत्वेपि शैलवनादिकमाक्रम्यान्ये भूमिं पीडयन्ति तद्व्यावृत्त्यर्थमाह—सशैलेति । काननं महारण्यं । मृगादिनिग्रहानुग्रहावपि इक्ष्वाकूणामेव । कृत्यमिति शेषः ॥ ६ ॥ तां भूमिं ॥ ७ ॥ नयो नीतिः । विनयः शिक्षा । तावुभौ सत्यं च यथादृष्टः शास्त्रविहितः विक्रमश्च । एतत्सर्वं यस्मिन्सुस्थितं देशकालवित् स भरतो राजेतियोजना ॥ ८ ॥ धर्मकृतादेशाः धर्मकृतनियोगाः । कथं कनिष्ठेन ज्येष्ठनियोग इत्यपेक्षायां राजधर्मोयमित्याशयेनोक्तं धर्मपदं । धर्मसन्तानं धर्मवृद्धिं । यद्यपि भरतेन नादेशः कृतः तथापि नेदमसत्यं । यथाकथंचिद्धरतेन राज्यभरणस्य स्वीकृतत्वात्तदन्येषां तत्कुलीनानां तदादिष्टत्वं सिद्धमिति हृदयं । अत एवायोध्याकाण्डे दर्शितं—त्वं राजेति ॥ ९ ॥ धर्मनिग्रहं धर्महानिं ॥ १० ॥ धर्मविभ्रष्टं जनमितिशेषः ॥ ११ ॥

यमाशयः । यद्यपिवालिनोवाणीराममसहौषीत् । बालीतंरामंपरुषमुक्तवानितिकृत्वा बालिनाराम'परुषमुक्तइत्यादुक्तिः । अतएवधीरामोपिबालिपरुषोक्तिमनुसृत्यैवोत्तरंवक्ति " धर्ममर्थंचकामंच " इत्यादिना ॥ ति० प्रश्रितं प्रश्रयाभासोपेतं । एवंधर्मार्थसहितत्वंचाभासरूपमेव । तत्र " मामेवयदिपूर्वं " इत्यादिहिताभासोर्थाभासश्च । धर्माभासोराजहेत्वादि । परुषत्वंतुमुख्यमेव । निहतेनविरुद्धेन ॥ स० निहतेन बाणेनेत्यर्थः ॥ १ ॥ शि० अनुत्तमं अनुजदारग्रहणरूपाधर्मकर्मणाऽधमं ॥ ३ ॥ तनि० धर्मं वैदिकपुरुषार्थं । लौकिकंसमयं लौकिकाचारं । तेनद्वयोरेकभार्यत्वेपिमाससंवत्सरादिप्रतिनियतकालसंकेतः ॥ ४ ॥ तनि० विषयेषापुरेवातेकलहनिमित्तेनास्तीत्यस्योत्तरं । लघुपमुक्तवनगिर्युपवनपत्तनान्यस्मदीयानिनभवन्तिकिं । ज्ञातिभावोप्यस्ति । " त्वंवयस्यश्चहृद्योमे " " एकंदुःखसुखंचनौ " इतिसुग्रीवसख्यममभवान्ज्ञातिर्नभवतिकिं । " तेनाहंप्रतिषिद्धश्चहृतदारश्चराघव " इतितेनमांप्रतिनोक्तंकिं । " बलेनैकेनवानरः " इत्युक्तरीत्याएकबलस्यननिर्वासितःकिं । सुग्रीवगृहदारभूजलादिकंबयानगृहीतंकिं । श्रीविष्वक्सेन " भ्रातुर्वर्तसिभार्यायां " इत्यनेनदर्शितः ॥ ६ ॥ तनि० ममतदवचपरस्परज्ञानंपरिचयबलाच्च । ममगृहमागत्यानपराधिनंहृतवानसीत्यस्योत्तरमाह । " तांपालयतिधर्मात्मा " इत्यारभ्य " कामतन्त्रप्रधानश्चनस्थितोराजवर्त्मनि " इत्यन्तं । त्वंसापराधएवेत्यर्थः ॥ ७ ॥ ति० यथादृष्टः अपरोक्षानुभवसिद्धः । सराजा अस्मिन्काले । सर्वभूमेरितिशेषः ॥ स० यथादृष्टः शास्त्रेक्षितियस्मयोचिकमोदृष्टस्तमित्यर्थः ॥ ८ ॥ ती० धर्मकृतादेशाः धर्मइत्यधर्मस्याप्युपलक्षणं । धर्माधर्मकृतनियोगाः

[पा०] १ ख. ग्मांधर्मयितुमिच्छसि. २ क. ग. संपन्नानाचार्यान्धर्मसंहितान्. ३ क. च. ञ. ट. नाचारसंमतान्. ४ क. ख. ग. ङ.—ट. चापल्यात्त्वं. ५ ङ. च. छ. झ. ञ. ट. निग्रहानुग्रहेष्वपि. क. निग्रहप्रग्रहेष्वपि. ज. निग्रहानुग्रहावपि. ६ ङ. च. भरतस्यकृतादेशाः. ७ ख. धर्मसंस्थानं. ८ झ यस्मिन्. ९ क. ख. सत्यविक्रमे. १० ङ.—ट. पृथ्वीं. ११ ङ—ट. विप्रियं. १२ च. ज. नवर्त्ममार्गविभ्रष्टाः. १३ क. ख. ग. छ. झ. ञ. ट. मार्गविभ्रष्टं. १४ ङ—ट. चिन्तयामो.

त्वं तु [1]संक्लिष्टधर्मा च कर्मणा च विगर्हितः ॥ कामतन्त्रप्रधानश्च न स्थितो राजवर्त्मनि ॥ १२ ॥
ज्येष्ठो भ्राता पिता[2] चैव यश्च विद्यां प्रयच्छति ॥ त्रयस्ते पितरो ज्ञेया धर्मे[3] पथि हि वर्तिनः ॥ १३ ॥
यवीयानात्मनः[4] पुत्रः शिष्यश्चापि गुणोदितः[5] ॥ पुत्रवत्ते त्रयश्चिन्त्या धर्मश्चेदत्र[6] कारणम् ॥ १४ ॥
सूक्ष्मः परमदुर्ज्ञेयः सतां धर्मः प्लवङ्गम ॥ हृदिस्थः सर्वभूतानामात्मा वेद शुभाशुभम्[8] ॥ १५ ॥
चपलश्चपलैः सार्धं वानरैरकृतात्मभिः ॥ जात्यन्ध इव जात्यन्धैर्मन्त्रयन्द्रक्ष्यसे[9] नु किम् ॥ १६ ॥
अहं तु व्यक्ततामस्य वचनस्य ब्रवीमि ते ॥ न हि मां केवलं रोषात्त्वं विगर्हितुमर्हसि ॥ १७ ॥
तदेतत्कारणं पश्य यदर्थं त्वं मया हतः ॥ भ्रातुर्वर्तसि भार्यायां[10] त्यक्त्वा धर्मं सनातनम् ॥ १८ ॥
अस्य त्वं धरमाणस्य सुग्रीवस्य महात्मनः ॥ रुमायां वर्तसे कामात्स्नुषायां[11] पापकर्मकृत् ॥ १९ ॥

संक्लिष्टधर्मा धर्मविलोपकृत् । कर्मणा च विगर्हित इति अकृत्यकारीत्यर्थः ॥ १२—१३ ॥ आत्मन इति त्रिष्वप्यन्वेति । गुणोदित इति च । ते त्रयः पुत्रवच्चिन्त्याः । पुत्रशब्दोत्र दृष्टान्तार्थः । यथा पुत्रे पुत्रवद्वर्तते तथान्ययोरपि वर्तितव्यमित्यर्थः । पुत्रे पुत्रवद्वृत्तिर्नाम सम्यक् स्नेहः । "गगनं गगनाकारं" इतिवत् । एवं चिन्त्यत्वे किं प्रमाणं तत्राह—धर्मश्चेदिति । अत्र अस्मिन्नर्थे । धर्मः कारणं व्यवस्थापकं चेत् यदि धर्मो नानुवर्तनीयः तदा नैवं द्रष्टव्यं । अनुवर्तनीयश्चेत् अवश्यमेवं द्रष्टव्यमिति चेच्छब्दस्य भावः ॥ १४ ॥ सूक्ष्मः अतीन्द्रियः । अतएव सतामपि परमदुर्ज्ञेयः किमुत भवादृशस्येति भावः । यद्वा जनस्य धर्माधर्मकरणं न कोपि वेत्तुमर्हति । तर्हि को वेत्तीत्यत्राह—हृदिस्थ इति । सर्वभूतानां हृदिस्थः सर्वान्तर्यामी । अलुक् । आत्मा परमात्मा । शुभाशुभं शुभाशुभकरणं वेत्तीत्यर्थः । सूक्ष्मं धर्मं परमात्मना मया विना को वेत्तुं दक्ष इति भावः ॥ १५ ॥ त्वया तु न शक्य इत्याह—चपल इति ॥ किं नु द्रक्ष्यसे न किमपि द्रक्ष्यसीत्यर्थः ॥ १६ ॥ अस्य वचनस्य यवीयानात्मन इति पूर्वोक्तवचनस्य ॥ १७ ॥ वर्तसि वर्तसे ॥ १८ ॥ धरमाणस्य जीवितं धारयतः । अनेन जीवतो भ्रातुर्भार्या भ्रात्रा न ग्राह्या । मृतस्य तु

धर्माधर्मविचारार्थनियुक्ताइत्यर्थः ॥ ९ ॥ वि० कामतन्त्र कामरूपः पुरुषार्थः । सएवप्रधानोमुख्योयस्यसः ॥ १२ ॥ ति० अत्रचिन्तनेतथाधर्मः धर्मज्ञानमेवकारणं ॥ १४ ॥ ति० तच्चनसर्वेषांसुलभमित्याह—सूक्ष्मइति । सतांसूक्ष्मोयोधर्मःस परा सद्गुरूपदेशादिजा मा शोभायेषां तैरेवविज्ञेयः । अन्यैः परं अत्यर्थं । अविज्ञेयएव । किंच ईश्वरएवतज्ज्ञइत्याह—हृदिस्थइति । सर्वभूतानामात्मा तत्वभूतोव्यापकश्च । अतएवसर्वप्राणिहृदिस्थःसः सर्वभूतानां सर्वप्राणिनां शुभाशुभंवेद । एवंचान्तर्यामित्वात्तवपापमहंजानइतिव्यङ्ग्यमत्र ॥ स० परमैर्ज्ञानिभिर्विज्ञेयः ॥ १५ ॥ ति० जात्यन्धोजात्यन्धैरिव चपलैः अकृतात्मभिः आचार्याशिक्षितैर्वानरैस्सह । मन्त्रयन् निश्चिन्वन् । किंनु कथंनु । प्रेक्षसे ज्ञास्यसि । धर्ममितिशेषः । "रक्षसेनुकिं" इतिपाठे रक्षणीयप्रजाजातंकिंनुरक्षसि नकिमपि । अतोधर्मभ्रष्टोराजदण्ड्यस्त्वमितिभावः ॥ १६ ॥ ति० अस्यवचनस्य चपलश्चपलैरितिवचनस्य । व्यक्ततां व्यक्तोर्थोस्येत्यर्थआद्यजन्तंव्यक्तपदं । तद्भावोव्यक्तता तदर्थस्तंब्रवीमि ॥ स० हेव्यक्ततामस्य व्यक्ततमोगुण । तेवचनस्य "कस्मात्त्वंहंसकिल्बिषं" इत्यस्य । ब्रवीमि इत्युत्तरमितिशेषः । स्वार्थेतल्वा । व्यक्तं । अस्यवचनस्य ज्येष्ठइत्यादिवचनस्य । ब्रवीमि अर्थमितिशेषः ॥ १७ ॥ ति० धरमाणस्येति । सुग्रीवस्तुतवजीवननिश्चयाभावात्त्वत्पत्न्यांतारायांप्रागवर्तिष्ट । अतःपरंवर्त्स्यतिच । किंच त्रैवर्णिकेष्वपिदेवरस्यमृतभ्रातृस्त्रियामपुत्रायांवृत्तिदर्शनात्तिर्यग्योनिषुतस्यांवृत्तिर्नदोषः । तथावृत्तौचमरणज्ञानमेवप्रयोजकंतिर्यक्ष्वितिभगवदाशयः । अनेनत्रैवर्णिकेतरस्त्रीणांमृतभर्तृकाणांतरुणीनांस्वजातीयपुरुषाङ्गीकारोनाधर्मइतिसूचितं । दृश्यतेचतथाव्यवहारःशूद्रादिजातौ । नचमनुष्याधिकारस्यनिषेधादिशास्त्रस्यकथंतिर्यक्षुप्रवृत्तिरितिवाच्यं । तिर्यग्योनेरपिमनुष्यवद्राजादिव्यवहारदर्शनेनमनुष्यतुल्यज्ञानवत्त्वादस्त्येवायंदोषइत्याशयात् । किंचधर्मेऽनधिकारिणामपीन्द्रादीनांवृत्रवधादौब्रह्महत्यादिदोषस्मरणेननिषेधेषुतदतिक्रमप्रायश्चित्तादौचदेवानामधिकारवदेषामप्यधिकारेबाधकाभावः । किंच देवादीनांस्वयजनीयेन्द्रान्तराभावादनधिकारइतिपूर्वमीमांसायांनिर्णीतं । एवंचतदनपेक्षदानादिधर्मेषुब्रह्मविद्यायांचाधिकारोस्त्येवेत्युत्तरमीमांसायांस्पष्टं । तद्वदी-

[पा०] १ ख. संकीर्णधर्मश्च. क. छ. झ. संक्लिष्टधर्मश्च २ छ. झ. पितावापि. ङ. च. ज. ञ. ट. पिताचापि. ३ क. धर्मवर्त्मानुगच्छता. घ. धर्मेहिपथि. ङ.—ट. धर्मेचपथि. ४ क. ख. यवीयान्सोदरःपुत्रः. ५ क. गुणान्वितः. ६ ङ.—ट. धर्मश्चैवात्र ७ च.—ट. परमविज्ञेयः. ८ ख.—ज. शुभाशुभे. ९ छ.—ट. न्प्रेक्षसे. १० ङ. च. ज. ञ. भार्यायांदण्डोयं प्रतिपादितः. ११ च. कामंस्नुषायां.

तथातीतस्य ते धर्मात्कामवृत्तस्य वानर ॥ भ्रातृभार्याभिमर्शेऽस्मिन्दण्डोऽयं प्रतिपादितः ॥ २० ॥
नहि धर्मविरुद्धस्य लोकवृत्तादपेयुषः ॥ दण्डादन्यत्र पश्यामि निग्रहं हरियूथप ॥ २१ ॥
नैं हि ते मर्षये पापं क्षत्रियोऽहं हरीश्वर ॥ २२ ॥
औरसीं भगिनीं वापि भार्यां वाऽप्यनुजस्य यः ॥ प्रचरेत नरः कामात्तस्य दण्डो वधः स्मृतः ॥२३॥
भरतस्तु महीपालो वयं त्वादेशवर्तिनः ॥ ईदृशं तु धर्मादतिक्रान्तः कथं शक्य उपेक्षितुम् ॥ २४ ॥
गुरुर्धर्मव्यतिक्रान्तं प्राज्ञो धर्मेण पालयन् ॥ भरतः कामवृत्तानां निग्रहे पर्यवस्थितः ॥ २५ ॥

प्राज्ञेति वक्ष्यमाणधर्म इतिप्रतीयते । अतएवहि वालिनो वधौचित्यमाह—न हीति ॥ २२ ॥ औरसीं पुत्रीं । विलगमनानन्तरं मन्त्रिभिरभिषिक्तस्य सुग्रीवस्यतारापरिग्रहं रामो ननिन्दितवान् । अतएव प्रायोपवेशेऽङ्गदोवक्ष्यति " भ्रातुर्जेष्ठस्ययोभार्यां जीवतो महिषीं प्रियाम् । धर्मेणमातरंयस्तुस्वीकरोतिजुगुप्सितः " इति ॥ १९—२१ ॥ तर्हिशिक्षैव कर्तव्या किमर्थमवधीस्तत्राह—न हीति ॥ २२ ॥ औरसीं पुत्रीं । प्रचरेत गच्छेत् ॥ २३—२४ ॥ भरतस्तुमहीपाल इत्युक्तं विवृणोति—गुरुरिति ॥ धर्मव्यतिक्रान्तं धर्मव्यतिक्रमणं । पालयन् परामृशन् । गुरुः भरतश्च निग्रहेपर्यवस्थितः । वयं च तदादेशं विधिं साकांक्षत्वा । नियन्तुं पर्यवस्थिताः । अतः कथं शक्य उपेक्षितु-

---

रक्षानेत्रानवतारित्वानधिकारेणाकाशः । स्त्रिय सर्वदेवतात्वाच्चकपदानामन्तर्भावोऽवरवाचकत्वेनसर्वत्रदेवानामधिकारोस्त्येव । यत्रत्राह्मणत्वादयोजातेष्वनधिकारः । तेषामधिकारित्वंवह्निकल्पमन्त्रादेरेव । अतएवचन्द्रवंश्यादीनांवङ्गक्षत्रियत्वंपुराणेषु । एवंसतिकर्मण्यधिकारात्फलकल्पनयापुराणस्यार्थवादैकदेशाधिकारस्यापिकल्पयितुंयुक्तत्वात् । स्त्रिय " त्रैवर्णिकस्याधिकारः " इत्यत्रवेदत्वंपूर्वपक्षयत्वा । अतोदेवादीनामनधिकारसिद्धइतिभगवतोव्यासस्यास्त्रीशूद्रप्रभृतीनांकारुण्यतः । जैमिनेस्त्वेतदंशेऽज्ञानमेव । अतएवहरीश्वरार्जुनमार्कण्डेयेनसनातनंप्रतिधर्मान्पृच्छतोर्जैमिनेर्विघ्नव्याख्यायासिद्धत्वंपक्षिमुखेनधर्मोद्घोषणंकृतं । तेनह्यपक्षिणांज्ञानाधिकारइतिलोकेत्वत्रापिश्लोकेतदादिग्रहणेनोक्तेऽप्येतत्प्रायेणसामान्यमहोमस्त्रियतीतिदाक्षायणहवनमन्त्रवत्विस्तरः । अतएवपृथ्वराजस्यभगवताहारितंकृतं । अग्नेश्चसंपातिनातद्वाक्यविघ्नमानमुदकदानादि नासंगतमितिदिक् ॥ सु० धरमानस्य प्राणान्धारयतः । जीवतइतियावत् । वर्तसे प्रवर्तसे । ननुवालिन स्त्रीत्वाधर्मसुग्रीवभार्यापहारित्वेनाप्यदोषत्वात् सुग्रीवस्यतुल्योत्तमवालिभार्यास्वीकारित्वेनमहादोषित्वात्तद्वधकरणंकिमर्थमितिचेत् । उच्यते । वालिनोऽपरापराधस्तत्रैवैतन्मन्त्रिमण्डलक्षयमन्यपापचक्रंतदा । सुग्रीवातुलोकद्वारब्रह्मवरलक्षणमहापातकचक्रमेभूतंमुक्ताधमन्त्रोद्धाराप्तिश्रीकृष्णवनारेन्द्रब्रह्मवर्मनामकासुरविहतयावत्किंचारणीभूतदोषोत्पादकवालिमारणनिमित्तीकर्तुंशक्यतंतत्रवधमयमवान्तरः । तदुक्तंभगवत्पादैरनुव्याख्यानेसुग्रीवस्यमहाभारतात्पर्वनिर्णयेषु : "अन्यसुग्रीवयोर्वैरमुद्धारपरिहात् । प्राग्दहानिरभूत्तेषांमहानि कथंचन " इति । " पुराणवालिमारणप्रभूतदोषकारणात् । सहस्रवर्षनाशिनाऽसुरेणवेष्टितोऽत्रवि " इति भरतस्त्वल्पापराधकत्वात्तस्यात्रैवपर्यवसितार्थवक्तृत्वंच ॥ ति० मनु " इत्येवंस्त्रीशूद्रबन्धूनामधिकारस्तु " इतिसूत्रभाष्यादौ मनुष्यमात्रस्यैव ब्रह्मनिरूपणसिद्धान्तितत्रत्यानुलिखितयेषांमतेधर्मेविचार सर्वेषांपरमात्मनारायणेकर्तृकत्वंहरिवंशेच । " तदुपर्यपिबादरायणः " इतिशूद्राधिकरणभाष्यादौनन्धर्वादीनामधिकारनिरूपणसिद्धान्तितत्रैवबालिनोदेवपुत्रत्वाद्देवत्वेनदोषात् । अतएवभगवत्पार्श्वर्तीनांनन्दीश्वरगणेशकाकभुशुण्यादीनांवेदाधिकारोनविरुध्यते । अतएव सर्वेश्वरपरमात्मरूपकृताकटायुधप्रभीतक्रिया तत्रत्यासंपातिनाकरिष्यमाणोदकदानादिचसंगच्छते । तत्रत्यात्राक्षणाद्युदेशेनकर्मणोधर्मप्रवृत्तेर्वेदादीनांतदभावात्कथंतद्विषयत्वमितिचार्ष्यं । तेषामधिकरणसिद्धान्तिनात्राक्षणादित्वादितिदिक् ॥१९॥ ति० वयंहरयति तदिति । तत् तस्मात् । धर्मात्यतीतस्य धर्मभ्रष्टस्य । एवंचेदृशेष्वप्यहरेःप्राज्ञान्तोष्यद्यतिमूर्छितं ॥ २० ॥ ति० लोकवृत्तात् लोकव्यवहारयथार्थतः । अपेयुषः अपगतवतः । दण्डादन्यत्र ततोऽन्यस्मिन्वधः । केचित्तु अनेनतिर्यग्योनिव्यवहारमर्यादायैवैनेतिव्याख्यातं । दृश्यतेचदृष्टेष्वप्यमानेषुपुराणतात्पर्यव्यवस्थयाभार्यासहितंतत्रत्यपुरस्सरंयुद्धं । भार्यायाश्चप्रकारान्तरेणविदग्धत्वाद्वा । स० अन्यत्र स्त्रीवधे ॥ २१ ॥ ति० गुरुः महान् । धर्मैकः संव्यतिक्रान्तं तत्रत्युतं । निष्पन्निनिशेषः । प्राज्ञोविद्वान् । धर्मेणपालयन् । धर्मयुक्तमितिशेषः ॥ रामानु० धर्मेणति-

[पा०] १ क. घ. च. ज. भ्रातुर्भार्यां. ग. ङ. छ.—ट. भ्रातृभार्यांभिमर्शे. २ ङ.—ट. लोकविरुद्धस्य. ३ छ. दण्डादन्यत्र पश्यामि. ४ ङ.—छ. झ. ञ. ट. नवसे. ध. नवेदमर्षयेपापं. ५ क. ङ. च. ज.—ट. कुलोद्वह.. ६ क. ङ. च.—ञ. ज. वापि. ७ च.—ज. ञ. वाप्यनुजस्य. ट. वाप्यनुजस्यच. ८ ङ च. ज. ञ. प्रचरेद्धावरः. ध. योजनेनरः. ९ ङ. वादेशवर्तिनः. १० ङ. ङ.—ञ. ञ. ट. ह्यंधर्मादतिक्रान्तं. ध. झ. संच. ११ क. ङ. च. ङ.—ट. कथमुपेक्षितुं. १२ ङ. गुरुर्धर्मातिक्रान्तः. १३ ङ. झ. ट. कामवृत्तानां.

वयं तु भरतादेशं विधिं कृत्वा हरीश्वर ॥ त्वद्विधान्भिन्नमर्यादान्नियन्तुं पर्यवस्थिताः ॥ २६ ॥
सुग्रीवेण च मे सख्यं लक्ष्मणेन यथा तथा ॥ दारराज्यनिमित्तं च निःश्रेयसि रतः स मे ॥ २७ ॥
प्रतिज्ञा च मया दत्ता तदा वानरसन्निधौ ॥ प्रतिज्ञा च कथं शक्या मद्विधेनानवेक्षितुम् ॥ २८ ॥
तदेभिः कारणैः सर्वैर्महद्भिर्धर्मसंहितैः ॥ शासनं तव यद्युक्तं तद्भवाननुमन्यताम् ॥ २९ ॥
सर्वथा धर्म इत्येव द्रष्टव्यस्तव निग्रहः ॥ ३० ॥
वयस्यस्यापि कर्तव्यं धर्ममेवानुपश्यतः ॥ शक्यं त्वयाऽपि तत्कार्यं धर्ममेवानुपश्यता ॥ ३१ ॥
श्रूयते मनुना गीतौ श्लोकौ चारित्रवत्सलौ ॥ गृहीतौ धर्मकुशलैस्तत्तथा चरितं हरे ॥ ३२ ॥

मिति पूर्वेण संबन्धः ॥ २५—२६ ॥ एवं निरपराधवधदोषशङ्कायाः परिहारमुक्त्वा " मामेव यदि पूर्वं त्वमेतदर्थमचोदयः " इत्युक्तस्य परिहारमाह—सुग्रीवेणेति ॥ सुग्रीवेण यत्सख्यं तल्लक्ष्मणसख्यतुल्यं तद्वदपरिहार्यं । दारराज्यनिमित्तं च दारराज्यफलकं च । स च मे निःश्रेयसि रतश्च । अतः कथमुपेक्षितुं शक्य इत्यन्वयः ॥ २७ ॥ हेत्वन्तरमप्याह—प्रतिज्ञा चेति ॥ तदा सख्यकरणकाले । अनवेक्षितुं उपेक्षितुमिति यावत् ॥ २८ ॥ तत्तस्मात् उपेक्षितुमशक्यत्वात् । एभिः भ्रातृभार्यापहरणादिकारणैः । तव भ्रातृभार्यावमर्शकस्य यच्छासनं कृतं तद्युक्तं शास्त्रविहितमिति भवाननुमन्यतां ॥ २९ ॥ पुनर्हेत्वन्तराणि वक्तुं पीठिकामारचयति—सर्वथेति ॥ ३० ॥ शत्रुवद्धर्ममेवानुपश्यतो वयस्यस्यापि स्वमित्रशत्रुनिरसनं कर्तव्यं । धर्ममेवानुपश्यतात्वयापि तत्कार्यं आत्मनिग्रहरूपं शक्यं । प्रायश्चित्तत्वेनानुमन्तुं योग्यमित्यर्थः ॥ ३१ ॥ स्वेनावश्यं हन्तव्यत्वे वालिनावश्यमनुमन्तव्यत्वे च संवादं दर्शयति—श्रूयत इति ॥ चारित्रवत्सलौ

क्रान्तं व्यतिक्रान्तधर्माणं ॥ स० अतिक्रान्तोनभवतीतिव्यतिक्रान्तः गुरुधर्मेणव्यतिक्रान्तः गुरुधर्मव्यतिक्रान्तस्तं । भावेवानिष्ठाप्रत्ययः । गुरुधर्मव्यतिक्रमणंपालयन्परामृशन् विचारयन् ॥ शि० किंच गुरुधर्मव्यतिक्रान्तंपालयन् दण्डपूर्वकशुद्ध्यारक्षन् । भरतः कामयुक्तानांनिग्रहे अन्वेषणेपर्यवस्थितः । वयंतु अवधिं कालनियमंकृत्वाभरतादेशाः भरतेआदेशःप्रजापालनाज्ञायेषांतेसन्तोवने चरामइतिशेषः । देशावधिमित्यत्र । " नमुने " इतिसूत्रेनेतियोगविभागेनक्वचित्त्रिपाद्याअसिद्धत्वाभावज्ञापनात्संहिता । भागुरिमतेअवाकारलोपेन वधिशब्दोप्यवधिवाचकोवा । भरतकर्तृकाज्ञायाअवधिकृत्वेत्यर्थोवा । अत्रपक्षेसमासप्रयुक्तषष्ठ्यालुप्तत्वान्नसंहितायांसंदेहः । भरताज्ञप्ताइत्यर्थस्तुनयुक्तः । रामकर्मकभरताज्ञायाअप्रसिद्धत्वादयोग्यत्वाच्चक्लिष्टकल्पनायांप्रमाणाभावाच्च । सार्धश्लोकएकान्वयी ॥ २५ ॥ ती० भरतादेशविधिं भरताज्ञाकरणं । " औरसींभगिनींवापिभार्यांवाप्यनुजस्ययः । प्रचरेत्सनरः कामात्तस्यदण्डोवधःस्मृतः" इत्युक्तप्रकारेणामार्गवर्तिनस्तववधेदुष्टनिग्राहकशिष्टपरिपालकसार्वभौमभरतस्याज्ञाकारिणोममदोषोनास्तीति ॥ ति० भरतादेशावधिंकृत्वा भरतादेशंतदाज्ञां अवधिं प्रमाणंकृत्वा । ननुभरतेनरामंप्रत्याज्ञायाअकृतत्वान्मृषोक्तिरेषेतिचेन्न । अस्मादेवभगवद्वाक्यात्तथाभरतोक्तेरनुमानेनाक्षतेः । यद्वा राज्यमूलप्रभौपर्यवस्थिते सर्वेषांतदीयानांदण्ड्यदण्डनादावनुक्तापितदाज्ञासिद्धैवेतिनदोषः । अपिच स्वराज्येभगवताभरतस्यपालनाज्ञायांदत्तायामर्थात्स्वस्मिन्प्रधानराजपुरुषत्वसिद्धौतदाज्ञाऽर्थसिद्धैवेतिनदोषः ॥ २६ ॥ ति० एभिरुक्तैःकारणैः एकैकमेवतववधेपर्याप्तं किंपुनर्मिलितानि । तस्माद्यत्तवमयाशासनमिदंकृतंतद्युक्तंशास्त्रसंमतमितिभवानप्यनुमन्यतां चिन्तयतु । तवभ्रातृभार्यापहारकत्वेनदण्ड्यत्वात्सखिकार्यस्यस्वकार्यत्वात्क्षत्रियस्यतत्प्रतिज्ञाहानौ चमहतोऽधर्मस्यश्रवणात्तद्वधोमेआवश्यकोधर्मश्चेत्याशयः ॥२९॥ रामानु० वयस्यस्यापीत्ययंश्लोकोबहुषुकोशेषुनदृष्टः । विषम० किंचधर्ममेवानुपश्यताजानता मित्रस्योपकर्तव्यं । मित्रोपकारकरणमपिधर्मएवेतिसुग्रीवोपकाररूपत्वाद्वधस्यधर्मत्वमितिभावः । किंचानुतापादिनाधर्ममनुवर्तता एतद्दुष्कर्मप्रायश्चित्तरूपधर्मानुवृत्तिंकुर्वतात्वयापितत्कार्यंमत्कृतनिग्रहरूपंकार्यंशक्यं राजप्रार्थनापूर्वंकारयितुंशक्यं । सत्यनुतापेत्वयाप्रार्थनापूर्वमयंदण्डःस्वस्यकारणीयएवेति त्वत्करणीयस्यैवमयाकृतत्वान्नात्रक्षोभःकार्यइतिभावः ॥३१॥

[पा०] १ छ. झ. ट. भरतादेशावधिं. ग. भरतादेशंहृदिकृत्वा. २ छ. झ. ञ. निग्रहीतुंव्यवस्थिताः. घ. निहन्तुं. ख. नियन्तुंकृतनिश्चयाः. ३ ङ. च. ज. ञ. यथापुरा. ४ ङ. च. छ. झ. ञ. ट. निःश्रेयसकरः. ख. ग. घ. निःश्रेयसरतः. ५ ङ. च. ञ. पावकसंनिधौ. ६ ग. प्रतिज्ञातु. ७ ख. ङ. च. ज. ञ. मद्विधानामुपेक्षितुं. ग. मद्विधेनानपेक्षितुं. ८ छ. झ. ट. धर्मसंश्रितैः. ९ छ. झ. ट. वयस्यस्योपकर्तव्यं. १० ग. ङ.—ञ. पश्यता. ख. वर्ततः. ११ ग. ङ. च. ज. कर्तव्यं १२ ग. छ. झ. ञ. ट. मेवानुवर्तता. ङ. च. ज. मेवानुवर्तिना. १३ क. कुशलैस्तथाविचरितं. छ. झ. ट. कुशलैस्तथातच्चरितं. १४ क. ख. ङ. च. ज. विभो. छ. झ. ट. मया. ञ. परैः.

राजभिर्धृतदण्डास्तु कृत्वा पापानि मानवाः ॥ निर्मलाः स्वर्गमायान्ति सन्तः सुकृतिनो यथा ॥ ३३ ॥
शासनाद्वा विमोक्षाद्वा स्तेनः स्तेयाद्विमुच्यते ॥ राजा त्वशासन्पापस्य तदवाप्नोति किल्बिषम् ॥ ३४ ॥
आर्येण मम मान्धात्रा व्यसनं घोरमीप्सितम् ॥ श्रमणेन कृते पापे यथा पापं कृतं त्वया ॥ ३५ ॥
अन्यैरपि कृतं पापं प्रमत्तैर्वसुधाधिपैः ॥ प्रायश्चित्तं च कुर्वन्ति तेन तच्छाम्यते रजः ॥ ३६ ॥
तदलं परितापेन धर्मतः परिकल्पितः ॥ वैधो वानरशार्दूल न वयं स्ववशे स्थिताः ॥ ३७ ॥
शृणु चाप्यपरं भूयः कारणं हरिपुङ्गव ॥ यच्छ्रुत्वा हेतुमद्वीर न मन्युं कर्तुमर्हसि ॥ ३८ ॥
न मे तत्र मनस्तापो न मन्युर्हरियूथप ॥ वागुराभिश्च पाशैश्च कूटैश्च विविधैर्नराः ॥ ३९ ॥
प्रतिच्छन्नाश्च दृश्याश्च गृह्णन्ति सुबहून्मृगान् ॥ प्रधावितान्वा विस्रब्धान्विस्रब्धांश्चापि निष्ठितान् ॥ ४० ॥
प्रमत्तानप्रमत्तान्वा नरा मांसार्थिनो भृशम् ॥ विध्यन्ति विस्रब्धांश्चापि न च दोषोऽत्र विद्यते ॥ ४१ ॥

आचारैकपरौ । गृहीतौ धृतौ । तत् श्लोकद्वयोक्तं ॥ ३२ ॥ श्लोकौ पठति—राजभिरित्यादिना ॥ ३३ ॥ शासने परस्याभ्युदयमुक्त्वा अशासने राज्ञोऽभ्युदयमाह—शासनादिति ॥ राज्ञा शासने मोचने वा स्तेनश्चोरो मुच्यत एव पापात् । पापस्य पापिष्ठस्याशासनाद्राजा तत्किल्बिषं पापमाप्नोति ॥ ३४ ॥ न केवलं वचनं आचारश्चास्मिन्नर्थेऽस्तीत्याह—आर्येणेति ॥ यथा त्वया पापं कृतं तथाश्रमणेन क्षपणकेन केनचित्पापे कृते मम आर्येण वृद्धप्रपितामहेन मान्धात्रा । घोरं व्यसनं दण्डनं । ईप्सितं प्रयुक्तमिति यावत् ॥ ३५ ॥ प्रमत्तैर्वसुधाधिपैर्हेतुभिः । अन्यैरपि जनैः पापं कृतं ते वसुधाधिपाः विगतानवधानाः सन्तः कर्मपरामर्शवेलायां पापीनां प्रायश्चित्तं वधादिकं । कुर्वन्ति । तेन प्रायश्चित्तेन । तद्रजः तत्पापं । शाम्यति अद्यापीतिशेषः ॥ ३६ ॥ न स्ववशे स्थिताः न स्वतन्त्राः शास्त्रवश्याइत्यर्थः । अनेन पराङ्मुखवधस्यदोषत्वमपि परिहृतं । प्रायश्चित्तस्य यथाकथंचित्कर्तव्यत्वात् । पञ्चमहापातकादिप्रायश्चित्तस्य मरणान्तिकत्वाद्वलादेवह्निकार्यं भवति नान्यथा ॥ ३७ ॥ एवं सन्ध्योपासनराज्यपालनादिकं नियमेनानुतिष्ठतोवालिनः शास्त्रवश्यत्वमवलम्ब्योक्तं । अथ शास्त्रामृगत्वमवलम्ब्याह—शृणुचेत्यादिना ॥ ३८ ॥ "दृश्यमानस्तु युध्येथामया यदि नृपात्मज । अथ वैवस्वतं देवं पश्येस्त्वं निहतो मया" इति ॥ "त्वया दृश्येन तु रणे निहतोहं दुरासदः । प्रसुप्तः पन्नगेनेव नरः पानवशंगतः" इति च वालिनायदुक्तं तदुभयश्लोकोत्तरमाह—न मे तत्र मनस्ताप इति ॥ तत्र यमसदनप्रापणोक्तिप्रच्छन्नवेधननिन्दोक्तिविषये । मे मन्युर्नास्ति । शास्त्रामृगस्य तवावध्यत्वादितिभावः । मनस्तापाभावश्च मृगविषये प्रच्छन्नवेधनस्यराज्ञांस्वभावतयादोषाभावादितिभावः । तदेवोपपादयति वागुराभिरित्यादिना । कूटैः कपटव्यापारैः विस्रब्धान् विश्वस्तान् । यद्यपि प्रकृतेनमांसार्थिता

ति० त्वयापिप्रार्थनापूर्वमयमर्थःकारणीयःस्यादित्यर्थंप्रतिपादकंश्लोकमाह—शासनाद्वेति । पापोऽहंमेदण्डंकुर्वितिप्रार्थनयास्वसमीपमागतस्यापिनःशासनाद्दण्डकरणाद्वामोक्षाद्ययाविसर्जनाद्वा । स्तेनइतिपापोपलक्षणं । तत्रद्वितीयःपक्षोराज्ञोदोषायेत्याह—राजात्विति । राजातुपापस्याशासन्पापनिग्रहमकुर्वन् । अनेनत्वदण्डकरणमस्मादशामावश्यकमितिध्वनितं ॥ वि० राजातु पापस्येत्यर्थः । अशासनात् निग्रहाकरणात् । तत्किल्बिषंपापं अवाप्नोति । अतस्तवदण्डआवश्यकइतिभावः । ती० पापस्य पापकारिणः । किल्बिषं दुरितं ॥ ३४ ॥ रामानु० कुर्वन्तिशाम्यतइत्येतदुभयमपिभूतार्थेलट् ॥ स० नकेवलमस्मत्पूर्वजैरेव अन्यैरपिकृतमित्याह—अन्यैरिति । अन्यैरपिप्रमत्तैः पापंकृतं । वसुधाधिपैःकृतं शासनमितिशेषः । यद्वा एतादृशैःपापंकृतं राजानश्चतत्प्रायश्चित्तंचनकुर्वन्ति । तेनेति ॥ ३६ ॥ तनि० वागुराभिरिति । प्रयोजनान्तराभावेपिजनपदहिंसापरिहारार्थंनिघ्नन्तीतिभावः । "विध्यन्तिविस्रब्धांश्चापिनचदोषोत्रविद्यते । यान्तिराजर्षयश्चात्रमृगयांधर्मकोविदाः । " तेनमृगयासक्तिर्नदोषायेतिसूचितं ॥ ३९ ॥ शि० ननुशिष्टाचारेणप्रहणेदोषाभावःप्रतीयते नतुवधे । अत्रतुवधइष्यतेआह—प्रमत्तानिति । मांसार्थिनः अनराः

[पा०] १ क.—ट. दण्डाश्च. २ ख. छ. झ. ञ. ट. द्वापिमोक्षाद्वा. ३ छ. झ. ट. पापात्प्रमुच्यते. ञ. पापाद्विमुच्यते. ४ क. ग.—च. ज. ञ. तशासनात्पापंतदेवा. ५ क. च. ज. ञ. तमाकृतं. ६ ख. वधस्तेहरिशार्दूल. ७ छ. झ. ट. तच्छ्रुत्वा हिमद्वीर. ८ छ. झ. ट. पुत्रव. ९ छ. विविधानराः. १० च. ज. प्रधावितांश्च. क. विस्रब्धांश्चाप्यविस्रब्धान्विनिघ्नन्तितथैवच, ११ न्विस्रब्धानविविक्षितान्. १२ क. च. ज. प्रमत्तान्वाऽप्रमत्तान्वा. क. प्रसुप्तानप्रसुप्तांश्च. १३ छ. झ. मांसादिनोभृशं,

यान्ति राजर्षयश्चात्र मृगयां धर्मकोविदाः ॥ तस्मात्त्वं निहतो युद्धे मया बाणेन वानर ॥
अयुध्यन्प्रतियुध्यन्वा यस्माच्छाखामृगो ह्यसि ॥ ४२ ॥
दुर्लभस्य च धर्मस्य जीवितस्य शुभस्य च ॥ राजानो वानरश्रेष्ठ प्रदातारो न संशयः ॥ ४३ ॥
तान्न हिंस्यान्न चाक्रोशेन्नाक्षिपेन्नाप्रियं वदेत् ॥ देवा मनुष्यरूपेण चरन्त्येते महीतले ॥ ४४ ॥
त्वं तु धर्ममविज्ञाय केवलं रोषमास्थितः ॥ प्रदूषयसि मां धर्मे पितृपैतामहे स्थितम् ॥ ४५ ॥
एवमुक्तस्तु रामेण वाली प्रव्यथितो भृशम् ॥ न दोषं राघवे दध्यौ धर्मेऽधिगतनिश्चयः ॥
प्रत्युवाच ततो रामं प्राञ्जलिर्वानरेश्वरः ॥ ४६ ॥
यत्त्वमात्थ नरश्रेष्ठ तदेवं नात्र संशयः ॥ प्रतिवक्तुं प्रकृष्टे हि नाप्रकृष्टस्तु शक्नुयात् ॥ ४७ ॥
तदयुक्तं मया पूर्वं प्रमादादुक्तमप्रियम् ॥ तत्रापि खलु मे दोषं कर्तुं नार्हसि राघव ॥ ४८ ॥
त्वं हि दृष्टार्थतत्त्वज्ञः प्रजानां च हिते रतः ॥ कार्यकारणसिद्धौ ते प्रसन्ना बुद्धिरव्यया ॥ ४९ ॥
मामप्यगतधर्माणं व्यतिक्रान्तपुरस्कृतम् ॥ धर्मसंहितया वाचा धर्मज्ञ परिपालय ॥ ५० ॥

तथापि पराङ्मुखवधान्नदोषइतितात्पर्यम् ॥ ३९—४२ ॥ परपीडाकरो राज्ञां व्यापारो निष्फल इत्याशङ्क्य व्रणचिकित्सान्यायेन स श्रेयस्कर एवेत्याह—दुर्लभस्येति ॥ जीवितस्य जीवनस्य ॥४३॥ न हिंस्यात् न पीडयेत् । तेष्वनर्थकरत्वबुद्धिं न कुर्यादित्यर्थः । नाक्रोशेत् ननिन्देत् । नाक्षिपेत् नोक्तिखण्डनं कुर्यात् । नाप्रियं वदेत् परुषं नवदेदित्यर्थः । तत्रहेतुमाह—देवाइति । एते पूर्वोक्ता राजानः । देवाः अष्टौ लोकपालाः । "अष्टाभिर्लोकपालानांमात्राभिः कल्पितो नृपः" इति वचनात् । मनुष्यरूपेण मनुष्यशरीरेण । उपलक्षिताश्चरन्ति ॥ ४४ ॥ पितृपैतामहे पितृपितामहप्राप्ते । नन्वेवमपि कथंचित्परिहार्यं "वरतनुहतिं वालिद्रोहं मनागपसर्पणं" इत्याद्यपवादकरं छन्नवेधंन समर्थोपि किमर्थंकृतवान् । तदवहितमनाःशृणु । यदि रामो वालिनःपुरतस्तिष्ठेत्तदा विदिततदीयप्रभावतया वालीप्रह्वोभवेत् । तदा तद्वधो न युक्तः । प्रतिज्ञा च व्याहन्येत । तद्द्वारा तन्मित्रं रावणोपि शरणं व्रजेत् । देवकार्यं च लुप्येत् । अतः प्रच्छन्नो वालिनमवधीत् ॥ ४५ ॥ प्रव्यथितः अज्ञानाद्राममधिक्षिप्तवानस्मीत्यनुतप्तः ॥ ४६ ॥ प्रकृष्टे विषये ॥ ४७ ॥ कर्तुं चिन्तयितुं ॥ ४८ ॥ दृष्टार्थश्चासौ तत्त्वज्ञश्च दृष्टार्थतत्त्वज्ञः । यद्वा ज्ञः पण्डितः । दृष्टार्थतत्त्वश्चासौ ज्ञश्चेति समासः । कार्यकारणसिद्धौ कार्यं दण्डनं कारणं तद्धेतुभूतं पापं तयोः सिद्धौ परिज्ञाने । बुद्धिः अन्तःकरणं ॥ ४९ ॥ अगतधर्माणं कृत्याकरणवन्तं । व्यतिक्रान्तपुरस्कृतं पुरस्कृतव्यतिक्रमं अकृत्यकारिणमित्यर्थः ।

नरसदृशाः राजानस्तुप्रमत्तानप्रमत्तान्वाविमुखान्पलायितान्वामृगान् विध्यन्ति घ्नन्ति । अत्र वधे दोषः मनुष्यवधवत्पापं । नविद्यते । एतेन मृगवधजनितपापस्याल्पत्वात्प्रायश्चित्तस्यसुकरत्वान्नतद्वधेभीतिरितिसूचितं ॥ यदिचमांसार्थित्वंयागार्थमित्युच्यतेतदानदोष इत्यस्यदोषसंसर्गाभावोबोध्यइतिदिक् ॥ ४१ ॥ ति० प्रतियुध्यन् अन्येनयुद्धंकुर्वन् । मांसादिलोभाभावेपिक्षत्रियस्वाभाव्यात्तववधो मयाकृतः इतरव्याघ्रादितिर्यग्जन्तुवत् । तत्रमेनकश्चिन्महान्दोषः । अल्पस्तुप्राणायाममात्रापनेयइतिभावः ॥ ४२ ॥ ति० आक्रोशोनिन्दा । आक्षेपोऽवमाननं । अप्रियवादः प्रतिकूलवचनं । खंतुनतादृशोराजेतिभावः । एतेनराज्ञोवधादौब्रह्मवधादिदोषइतिसूचितं ॥ ४४ ॥ ती० "नाविष्णुःपृथिवीपतिः" इतिस्मरणात् देवतारूपाणांराज्ञामधिक्षेपस्तवनयुक्तइत्याशयेनाह—दुर्लभस्येत्यादिश्लोकद्वयेन ॥ शि० जीवितस्यप्रदातारइत्यनेनयदित्वयिजीवितेच्छा तर्हित्वांजीवयिष्यामीतिसूचितं ॥ ४३—४४ ॥ टीका० प्रकृष्टः श्रेष्ठः । सर्वज्ञइत्यर्थः । अपकृष्टः किञ्चिज्ज्ञः ॥ ४७ ॥ ति० धर्मादेवव्यतिक्रान्तानां पुरस्कृतं अग्रेसरं । अवगतं अग्रेसरत्वेनप्रसिद्धं । वाचापरिपालय उत्तमलोकान्प्राप्नुहीतिवाचानुगृहाणेत्यर्थः ॥ स० सुग्रीवंपुरस्कृतस्त्वं व्यतिक्रान्तोयेनसव्यति-

[पा०] १ ग. घ. छ. झ. ञ. ट. मानुषरूपेण. २ ङ. छ.—झ. ट. विदूषयसि. च. त्वंदूषयसि. ३ ग. प्रव्यथितेन्द्रियः. ट. प्रमथितो. ४ क. ग. धर्मार्थकृतनिश्चयः. ५ झ. ट. तत्तथैवनसंशयः. ६ क. छ.—ट. नापकृष्टस्तु. ७ ख. छ. झ. ट. यदयुक्तं क ग. च. यदुक्तंते. ८ क. ग. छ. झ. ट. प्रमादाद्वाक्यं. ९ ङ. च. ज. ञ. रोषं. १० क. ग. छ.—ट. सिद्धौच. ङ. च. शुद्धौच. ११ ग. ङ. छ. झ. ञ. ट. मामप्यवगतंधर्मात्. क.—घ. मामप्यपगतं.

[बाष्पसंरुद्धकण्ठस्तु वाली सार्तस्वरं शनैः ॥ उवाच रामं संप्रेक्ष्य पङ्कलग्न इव द्विपः ॥ ५१ ॥]
न त्वात्मानमहं शोचे न तारां न च बान्धवान् ॥ यथा पुत्रं गुणश्रेष्ठमङ्गदं कनकाङ्गदम् ॥ ५२ ॥
स ममादर्शनादीनो बाल्यात्प्रभृति लालितः ॥ तटाक इव पीताम्बुरुपशोषं गमिष्यति ॥ ५३ ॥
बालश्चाकृतबुद्धिश्च एकपुत्रश्च मे प्रियः ॥ तारेयो राम भवता रक्षणीयो महाबलः ॥ ५४ ॥
सुग्रीवे चाङ्गदे चैव विधत्स्व मतिमुत्तमाम् ॥ त्वं हि शास्ता च गोप्ता च कार्याकार्यविधौ स्थितः ॥५५॥
या ते नरपते वृत्तिर्भरते लक्ष्मणे च या ॥ सुग्रीवे चाङ्गदे राजंस्तां त्वमाधातुमर्हसि ॥ ५६ ॥
मद्दोषकृतदोषां तां यथा तारां तपस्विनीम् ॥ सुग्रीवो नावमन्येत तथाऽवस्थातुमर्हसि ॥ ५७ ॥
त्वया ह्यनुगृहीतेन राज्यं शक्यमुपासितुम् ॥ त्वद्वशे वर्तमानेन तव चित्तानुवर्तिना ॥ ५८ ॥
शक्यं दिवं चार्जयितुं वसुधां चापि शासितुम् ॥ ५९ ॥
त्वत्तोऽहं वधमाकाङ्क्षन्वार्यमाणोपि तारया ॥ सुग्रीवेण सह भ्रात्रा द्वन्द्वयुद्धमुपागतः ॥ ६० ॥
इत्युक्त्वा संवृतो रामं विरराम हरीश्वरः ॥ ६१ ॥
स तमाश्वासयद्रामो वालिनं व्यक्तदर्शनम् ॥ सौम्यसंपन्नया वाचा धर्मतत्त्वार्थयुक्तया ॥ ६२ ॥
न संतापस्त्वया कार्य एतदर्थं प्लवङ्गम ॥ ६३ ॥
न वयं भवता चिन्त्या नाप्यात्मा हरिसत्तम ॥ वयं भवद्विशेषेण धर्मतः कृतनिश्चयाः ॥ ६४ ॥

वाचा परिपालय सर्वं मया क्षान्तमितिवदेत्यर्थः ॥ ५०—५१ ॥ कार्यान्तरमप्यर्थयते—न त्वित्यादिना ॥ नात्मानंप्रतिशोचे त्वयादत्तसम्यग्गतिकत्वात् । नापि तारादिकान्प्रति सुग्रीवस्याविद्यमानत्वात् । पुत्रं " अङ्गादङ्गात्संभवसि " इत्युक्तरीत्या स्वातिरिक्तं । गुणश्रेष्ठं पितृशुश्रूषादिगुणैः श्रेष्ठं । कनकाङ्गदं दर्शनीयमित्यर्थः ॥ ५२—५४ ॥ मतिं तुल्यामितिशेषः ॥ ५५ ॥ वृत्तिः प्रीतिरिति यावत् ॥ ५६ ॥ नावमन्येत पुत्रनिर्वासनेनेति भावः । अवस्थातुं व्यवस्थापयितुं ॥ ५७ ॥ उपासितुं मयेतिशेषः । न केवलं मद्राज्यं । अन्यच्चेत्याह—शक्यमिति ॥ ५८—५९ ॥ तर्हि तथा किं न कृतं तत्राह—त्वत्त इति । आकाङ्क्षन् आकाङ्क्षमाण इवेत्यर्थः ॥६०—६१॥ व्यक्तदर्शनं विशदज्ञानं । साम सान्त्वनं ॥ ६२ ॥ एतदर्थं पुत्रपालनार्थं ॥ ६३ ॥ वयं न चिन्त्याः अकृत्यकारिण इतिशेषः । नाप्यात्मा निकृत्तपापत्वात् । कृत इत्यत्राह—वयमिति । भवद्विशेषेण भवतो कृत्यरूपविशेषेण हेतुना । धर्मतः प्रायश्चित्तरूपे धर्मे ।

क्रान्तपुरस्कृतस्तं ॥ ५० ॥ ति० उवाच पुत्रादिमायाकृष्टस्सन्नुवाचेत्यर्थः ॥ ५१ ॥ वि० पीतांबुः सस्याद्युपयोजितांबुः ॥ शि० पीतांबुः सूर्यकिरणशोषितजलः ॥ ५३ ॥ ति० मतिमुत्तमां । " मरणान्तानिवैराणि " इतिन्यायेनेतिभावः । सुग्रीवेचतत्रैवेत्यर्थः । भ्रातृक्षेहोद्भवेनवातत्राप्यनुग्रहप्रार्थनं । कार्यविधौगोप्ता अकार्यविधौशास्ता ॥ ५५ ॥ नी० मद्दोषकृतदोषां सुग्रीवायमत्कृतापराधेनकृतापराधां । अवस्थातुं अवस्थापयितुं ॥ ५७ ॥ ति० शक्यमिति । स्वाराज्यमपिलप्रसादलभ्यमितिभावः ॥ ५९ ॥ अहंत्वदुपदेशतस्त्वदर्शनतश्चेदानींक्षीणपापस्त्वत्तोवधं उत्तमलोकराज्यफलकं आकांक्षन् अपेक्षमाणः । इदानीमस्मि । अतस्त्वयावार्यमाणोपि यद्भ्रात्रायुद्धमुपागतः तत्पूर्वकृतपुण्यपरिपाकेनेतिशेषः । शि० ननुतवेच्छाचेत्त्वांजीवयामिराज्यंकुर्वित्यतआह—त्वत्तइति । एतेनवालिनोजीवनेच्छाभावस्सूचितः ॥ ६० ॥ नी० व्यक्तदर्शनं अभिव्यक्तसर्वेश्वरस्वरूपज्ञानं ॥ ६२ ॥ ती० वयंभवतानचिन्त्याः नविचार्याः । पराङ्मुखस्वमेवधर्मप्रच्छन्नंकृत्वा एषपापमार्जितवान् उतपुण्यमितिभवतानविचार्याइत्यर्थः । नाप्यात्माचिन्त्यः भ्रातृभार्याहरणादिकंकृत्वागतोहंकिंभविष्यदिति त्वंच त्वयानविचार्यः । कुतः वयं भवद्विशेषेण भवतोविशेषेण । धर्मतः धर्मे । कृतनिश्चयाः । अस्यवधःकिंधर्मःउताधर्मइतिविशेषेणविचार्यधर्मेनिश्चयंकृतवन्तः

[पा०] १ अयंश्लोकः. ङ. छ. झ. ट. पुस्तकेषु दृश्यते. २ छ. झ. ट. नचात्मानं. ३ क. ग. छ.—ट. नापि. ४ ङ.—ट. गुणज्येष्ठं. ५ झ. रुदकोषं. ६ ग. महाबल. ७ छ. झ. ट. गोप्ताचशास्ताच. ८ ग. घ. वृत्तिर्लक्ष्मणेभरतेचया. ९ क. ग. ङ. च. ज.—ट. तांचिन्तयितुमर्हसि. १० ख. नाभिमन्येत. ११ ग. ङ—ट. शक्यंराज्यं. १२ ग. शाश्वतीं. १३ छ. झ. ञ. ट. वानरो. १४ क. व्यक्तविक्रमं. ख. व्यक्तदर्शनः. १५ ङ.—ट. साधुसंमतया. १६ क. धर्महेत्वर्थयुक्तया. १७ ख. नापित्वं.

दण्डये यः पातयेद्दण्डं दण्ड्यो यश्चापि दण्ड्यते ॥ कार्यकारणसिद्धार्थावुभौ तौ नावसीदतः ॥६५॥
तद्भवान्दण्डसंयोगादस्माद्विगतकल्मषः ॥ गतः स्वां प्रकृतिं धर्म्यां धर्मदृष्टेन वर्त्मना ॥ ६६ ॥
त्यज शोकं च मोहं च भयं च हृदये स्थितम् ॥ त्वया विधानं दुर्नय्य न शक्यमतिवर्तितुम् ॥ ६७ ॥
यथा त्वय्यङ्गदो नित्यं वर्तते वानरेश्वर ॥ तथा वर्तेत सुग्रीवे मयि चापि न संशयः ॥ ६८ ॥
स तस्य वाक्यं मधुरं महात्मनः समाहितं धर्मपथानुवर्तिनः ॥
निशम्य रामस्य रणावमर्दिनो वचः सुयुक्तं निजगाद वानरः ॥ ६९ ॥
शराभितप्तेन विचेतसा मया प्रदूषितस्त्वं यदजानता प्रभो ॥
इदं महेन्द्रोपमभीमविक्रम प्रसादितस्त्वं क्षम मे नरेश्वर ॥ ७० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे अष्टादशः सर्गः ॥ १८ ॥

एकोनविंशः सर्गः ॥ १९ ॥

वालिमरणश्रवणेनशोकाक्रान्तायाकिष्किन्धातस्तत्पत्नीप्रतिनिर्गमनम् ॥ १ ॥ रामभयात्पलायमानैर्वानरैर्मध्येमार्गंमागच्छन्तीतारांप्रतिरामेणवालिमारणनिवेदनपूर्वकंभयोत्पादनेननगररक्षणाङ्गदाभिषेचनचोदनेनसहनगरंप्रतिनिवर्तनचोदनम् ॥ २ ॥ तन्निराकरणपूर्वकंशोकादापतन्त्यातारयारणाङ्गणशायिनोवालिनोरामादीनांचावलोकनम् ॥ ३ ॥

स वानरमहाराजः शयानः शरविक्षतः ॥ प्रत्युक्तो हेतुमद्वाक्यैर्नोत्तरं प्रत्यपद्यत ॥ १ ॥
अश्मभिः परिभिन्नाङ्गः पादपैराहतो भृशम् ॥ रामबाणेन चाक्रान्तो जीवितान्ते मुमोह सः ॥ २ ॥

सप्तम्यर्थे तसिः । कृतनिश्चयाः अतो वयं न चिन्त्या इत्यादि पूर्वेणान्वयः ॥ ६४ ॥ उक्तं विवृणोति—दण्डय इति ॥ कार्यकारणसिद्धार्थौ दण्ड्यत्वदण्डयितृत्वाभ्यां निष्पन्नप्रयोजनावित्यर्थः ॥ ६५ ॥ धर्मदृष्टेन धर्मशास्त्रदृष्टेन । वर्त्मना दण्डसंयोगात् विगतकल्मषः सन् । धर्म्यां धर्मादनपेतां । स्वां प्रकृतिं यथावस्थितशुद्धस्वरूपं गतः ॥ ६६ ॥ हेत्वन्तरेणाश्वासयति—त्यजेति ॥ विधानं विधिः प्रारब्धकर्मेतियावत् ॥ ६७—६८ ॥ उक्तमर्थं सर्गान्ते श्लोकाभ्यांपुनः संगृह्णाति—सतस्येति ॥ समाहितं समाधानरूपं ॥ ६९ ॥ प्रदूषित इति यत् इदं मे अपचरितं क्षम क्षमस्व ॥ ७० ॥

इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहारास्ख्याने किष्किन्धाकाण्डव्याख्याने अष्टादशः सर्गः ॥ १८ ॥

तारागमनमेकोनविंशे—सवानरमहाराजइत्यादि॥ विक्षतः विशेषेण क्षतः । जीवितान्ते जीवितान्त-

इत्यर्थः । यद्वा भवद्विशेषेण भवदकृत्यविशेषेणहेतुना । धर्मतः प्रायश्चित्तरूपधर्मे । वयंकृतनिश्चयाः । अतोवयंभवताऽचिन्त्याः अकृत्यंकृतवन्तइतिनविचार्याः । नाप्यात्मा ममपरलोकप्रतिबन्धकमस्तीतिभवानपिनविचार्यइत्यर्थः । " राजभिर्धृतदण्डास्तुकृत्वापापानिमानवः । निर्मलाःस्वर्गमायान्ति संतःसुकृतिनोयथा । शासनाद्वाविमोक्षाद्वास्तेनःस्तेयाद्विमुच्यते । राजात्वशासन्पापस्यतदवाप्नोतिकिल्बिषं " इतिमनुवचनानुसारेणोभयोरपिदोषाभावइतिभावः ॥ ६४ ॥ ति० दण्डदिष्टेन दण्डबोधकशास्त्रोक्तेन ॥६६॥ ति० मयं भ्रातृभार्याहरणजनितनरकभयं मदूषणनिमित्तपरलोकभयंच । दण्डेनकर्मणोनाशान्मदूषणस्यमयाक्षान्तत्वाच्च । शोकमोहौ तारातारेयविषयौ । विधानं प्रारब्धीयंकर्म । अत्रान्तेदण्डस्यैवसंहारात्तिरश्चामपिज्ञानवतांशास्त्रार्थेऽधिकारोदृढः कृतइतिबोध्यं ॥ ६७ ॥ स० इदं परुषभाषणं । क्षम क्षमस्व । क्षमेत्युत्तरारामस्यकोपलेशोपिनास्तीतिसूचयति ॥ ७० ॥

इत्यष्टादशःसर्गः ॥ १८ ॥

[पा०] १ घ. किल्बिषः. २ ङ.—ट. दण्डदिष्टेन. ३ क. ख. मन्युंच. ४ छ. झ. वर्तितं. ५ ङ. च. सयुक्तं. ६ छ. झ. ट. प्रभावितस्त्वं. ७ ङ.—ट. विभो. ८ ग. वीर्यविक्रम. ९ ग. च. छ. ज. ञ. महीश्वर. ङ. ट. महेश्वर. १० क. ग. च. ज. वानरोमहातेजाः. ११ ङ.—ट. शरपीडितः. ख. क्षतविक्षतः. १२ ङ. छ. ज. ञ. ट. प्रतिपद्यते. १३ क. ङ.—ट. परिभिन्नाङ्गः. १४ क. ग. पादपेनाहतो. १५ क. ङ.—ट. चाक्रान्तो.

तं मार्या बाणमोक्षेण रामदत्तेन संयुगे ॥ हतं प्लवगशार्दूलं तारा शुश्राव वालिनम् ॥ ३ ॥
सा सपुत्राऽप्रियं श्रुत्वा वधं भर्तुः सुदारुणम् ॥ निष्पपात भृशं त्रस्ता विविधाद्गिरिगह्वरात् ॥ ४ ॥
ये त्वङ्गदपरीवारा वानरा भीमविक्रमाः ॥ ते सकार्मुकमालोक्य रामं त्रस्ताः प्रदुद्रुवुः ॥ ५ ॥
सा ददर्श ततस्त्रस्तान्हरीनापततो भृशम् ॥ यूथादिव परिभ्रष्टान्मृगान्निहतयूथपान् ॥ ६ ॥
तानुवाच समासाद्य दुःखितान्दुःखिता सती ॥ रामवित्रासितान्सर्वाननुबद्धानिवेषुभिः ॥ ७ ॥
वानरा राजसिंहस्य यस्य यूयं पुरःसराः ॥ तं विहाय सुसंत्रस्ताः कस्माद्द्रवथ दुर्गताः ॥ ८ ॥
राज्यहेतोः स चेद्भ्राता भ्रात्रा रौद्रेण पातितः ॥ रामेण प्रहितै रौद्रैर्मार्गणैर्दूरपातिभिः ॥ ९ ॥
कपिपत्न्या वचः श्रुत्वा कपयः कामरूपिणः ॥ प्राप्तकालमविक्लिष्टमूचुर्वचनमङ्गनाम् ॥ १० ॥
जीवपुत्रे निवर्तस्व पुत्रं रक्षस्व चाङ्गदम् ॥ अन्तको रामरूपेण हत्वा नयति वालिनम् ॥ ११ ॥
क्षिप्तान्वृक्षान्समाविध्य विपुलाश्च शिलास्तथा ॥ वाली वज्रसमैर्बाणै रामेण विनिपातितः ॥ १२ ॥
अभिद्रुतमिदं सर्वं विद्रुतं प्रसृतं बलम् ॥ अस्मिन्प्लवगशार्दूले हते शक्रसमप्रभे ॥ १३ ॥
रक्ष्यतां नगरद्वारमङ्गदश्चाभिषिच्यताम् ॥ पदस्थं वालिनः पुत्रं भजिष्यन्ति प्लवङ्गमाः ॥ १४ ॥
अथवाऽरुचितं स्थानमिह ते रुचिरानने ॥ आविशन्ति हि दुर्गाणि क्षिप्रमन्यानि वानराः ॥ १५ ॥

काले ॥ १—३ ॥ अप्रियमिति च्छेदः । विविधात् नानाकक्ष्यात् । गिरिगह्वराद्गिरिगुहातः । गुहारूपा हि किष्किन्धेत्युक्तं ॥ ४ ॥ ये त्वित्यादिश्लोकद्वयमेकान्वयं ॥ ५—६ ॥ पूर्वं सामान्यतो विदितवृत्तान्तापि विशेषजिज्ञासया पृच्छति तानिति ॥ ७ ॥ वानराइत्यानिश्लोकद्वयमेकान्वयं । दुर्गताः अगतिकाः । राज्यलोभाय सुग्रीवेण वाली हतश्चेद्भवतांकिंभयमित्यर्थः । मार्गणैरिति बहुवचनं संभावनयोक्तं ॥ ८—९ ॥ अविक्लिष्टं सयुक्तिकमितियावत् ॥ १० ॥ जीवपुत्रे इति अपुत्रायाः खलु मृतभर्त्रनुगमनमितिभावः । नयति लोकान्तरमिति शेषः ॥ ११—१२ ॥ विद्रुतं पूर्वं किष्किन्धातो निर्गतमिदं बलं प्रसृतं प्रकीर्णं सत् । अभिद्रुतं किष्किन्धाभिमुख्येन द्रुतं ॥ १३—१४ ॥ हे रुचिरानने ते इह किष्किन्धायां । स्थानं अवस्थानं । अरुचितं अनभिमतं । अत्र स्थातुं अस्माकं नरोचते इत्यर्थः । हि यस्मात्कारणात् वानराः शत्रु-

रामानु० विविधात् विचित्रान्तःप्रदेशात् ॥ ४ ॥ इषुभिरनुविद्धानिव अनुसृतानिवविद्यमानान् ॥ रामवित्रासितान् रामाद्वित्रस्तान् ॥ ७ ॥ वि० भ्राता प्रयोजककर्ता । राम प्रयोज्यकर्ता । बाणाःकरणं । दूरात् दूरेस्थितामार्गणैःपातितश्चेत्किंयुष्माभिः पलायितमितिशेषः । तत्सेवयैवभवज्जीवनसंभवादितिभावः । वालिविषयबहुबाणप्रयोगसंभावनयामार्गणैरितिबहुवचननिर्देशः ॥९॥ ती० अविक्लिष्टं एकरूपं । स० ननुकथंकपिपत्न्याइति "पत्युर्नोयज्ञसंयोगे" इतियज्ञसंयोगएवपत्नीत्वविधानात् वालिनश्चतिर्यग्जातीयत्वेनयज्ञाधिकाराभावादितिचेन्न । तस्यदेवत्वेनदेवानांचदेवताधिकरणेऽधिकारस्यसमर्थितत्वात्परिदृश्यमानकपित्वंनयज्ञाधिकारविलोपकमितिभावः । अधिकारनिषेधस्तुप्रसिद्धपामरतिर्यग्विषयइतिभावः ॥ १० ॥ स० जीवन्पुत्रोयस्यास्सातथा तस्यास्संबुद्धिः । जीवेत्युक्तिविषयःपुत्रोयस्यास्सेतिवा ॥ ११ ॥ शि० वज्रेण वज्रिणेव । रामेणेतिशेषः । वज्रशब्दअर्शआद्यजन्तः । स० क्षिप्तान् स्वेनेतिशेषः । बाणैस्समाविध्यनिपातितः रामेणेतिशेषः । वालीपरमसमर्थं कथमेकेनबाणेननिपतेदितिवालिसामर्थ्यंजानद्भिः अजानद्भिश्चरामसामर्थ्यं बाणैरित्याद्युक्तमित्यदोषः । 'मार्गणैर्दूरपातिभिः' इतिपूर्वश्लोकेप्येवमेवार्थोबोध्यः ॥ १२ ॥ ति० वानरं वानराणामिदं ॥ १३ ॥ ति० अथवेति । सरामेसुग्रीवेकिष्किन्धामागच्छतिअभिषिक्तेनाप्यङ्गदेनास्मत्पालनमशक्य-

[पा०] १ ख. रामहस्तेन. २ छ. झ. ट. भृशंतस्मादुद्विग्नागिरिकन्दरात्. क. ग. भृशायत्तारम्याद्गिरिगुहान्तरात्. ङ. च. ज. ञ. भृशंतस्माद्विविधाद्गिरिकंदरात्. ३ क. ग. ङ. ट. वानराहिमहाबलाः. ४ क. घ. च.—ट. हुतं. ५ क. ख. ग. विद्धानिवेषुभिः. ६ क. ग. ङ.—ट. सुवित्रस्ताः. ७ ङ.—ञ. क्रूरेण. ८ क. ग. प्रहितैर्दूरान्मार्गणैः. ख. ङ.—ट. प्रसृतैर्दूरान्मार्गणैः. घ. प्रहृतैरौद्रैर्बाणैर्दूरातिपातिभिः. ९ छ.—ट. मविक्लिष्टं. १० च.—ट. तथाशिलाः. ११ क. घ. च. छ. झ. ञ. ट. बाणैर्वज्रेणेवनिपातितः. ग. बाणैर्वज्रेण. ज. बाणैरिन्द्रेणेवनिपातितः. १२ छ. झ. ट. अभिभूतमिदं. १३ छ. झ. ट. वानरंबलं. १४ च. ज. ञ. तस्मिन्प्लवग. १५ नगरीशूरैरङ्गदश्चा. क. ख. ग. च. नगरंशूरैरङ्गदश्चा. १६ ग. ङ. च. ज. ञ. अथवाऽरुचिरं. १७ क. ग. छ. झ. ट. आविशन्तिच. ज. ञ. आविशन्तिह. १८ क. ख. ग. छ. झ. ट. क्षिप्रमद्यैव. घ. ज. ञ. क्षिप्रमद्यच.

अभार्याश्च सभार्याश्च सन्त्यत्र वनचारिणः ॥ लुब्धेभ्यो विप्रयुक्तेभ्यस्तेभ्यो नस्तुमुलं भयम् ॥ १६ ॥
अल्पान्तरगतानां तु श्रुत्वा वचनमङ्गना ॥ आत्मनः प्रतिरूपं सा बभाषे चारुहासिनी ॥ १७ ॥
पुत्रेण मम किं कार्यं किं राज्येन किमात्मना ॥ कपिसिंहे महाभागे तस्मिन्भर्तरि नश्यति ॥ १८ ॥
पादमूलं गमिष्यामि तस्यैवाहं महात्मनः ॥ योसौ रामप्रयुक्तेन शरेण विनिपातितः ॥ १९ ॥
एवमुक्त्वा प्रदुद्राव रुदन्ती शोककर्शिता ॥ शिरश्चोरश्च बाहुभ्यां दुःखेन समभिघ्नती ॥ २० ॥
आव्रजन्ती ददर्शाथ पतिं निपतितं भुवि ॥ हन्तारं दानवेन्द्राणां समरेष्वनिवर्तिनाम् ॥ २१ ॥
क्षेप्तारं पर्वतेन्द्राणां वज्राणामिव वासवम् ॥ महावातसमाविष्टं महामेघौघनिःस्वनम् ॥ २२ ॥

भूताः । दुर्गाणि किष्कन्धायाः दुष्प्रवेशस्थलानि । आविशन्ति आक्रमिष्यन्ति । अन्यानि अस्मदावासस्थलभिन्नानीत्यर्थः ॥ १५ ॥ अस्त्वाक्रमणं ततः किमित्यत्राह—अभार्या इति ॥ अभार्याः भार्याविरहिताः । सभार्याः समानभार्याः साधारणभार्याइत्यर्थः । ये वालिना विप्रवासिताः वनचारिणः सन्ति तेभ्यः विप्रयुक्तेभ्यः स्वभार्याविरहिभ्यः । लुब्धेभ्यः साधारणभार्यान्तराभिलाषिभ्यः । स्वेभ्यः ज्ञातिभ्यः सुग्रीवादिभ्यः । नः अस्माकं । अत्र किष्कन्धास्थाने । तुमुलं निरन्तरं । भयं भवति । अनेन भाविसुग्रीवव्यापारःसूचितः । रुचिरानन इत्यादिसंबोधनात्तस्याः सहमरणसाहसंद्योत्यते ॥ १६ ॥ अल्पान्तरगतानां किंचिदवकाशं प्राप्तानां । संभाषणाय कियन्मात्रावकाशं प्राप्तानामित्यर्थः । आत्मनः प्रतिरूपं स्वबुद्ध्यनुगुणं । यद्वा आन्तरं बुद्धिः अल्पबुद्धीनामित्यर्थः ॥ १७—१९ ॥ बाहुभ्यां हस्ताभ्यामित्यर्थः ॥ २० ॥ दानवेन्द्राणां मायाविप्रभृतीनां । वज्राणामिति प्रयोगबाहुल्यापेक्षया बहुवचननिर्देशः । महावातसमाविष्टं समाविष्टमहावातमिव स्थितं । समावेशः संधीभावः । यद्वा समाविष्टमिति भावे निष्ठा । महावातसमावेशमिव स्थितं । पराक्रान्तं पराक्रमः । नर्दतां मध्ये भीमं नर्दन्तं । शार्दूलेन सिंहेन । " सिंहोमृगेन्द्रः पञ्चास्यो हर्यक्षः श्वेतपिङ्गलः । व्यादीर्णास्यो महानादः शार्दूलोतुलविक्रमः " इतिवैजयन्ती । यद्वा असंभावितत्वद्योतनाय शार्दूलहिंसितसिंहमिवेत्यभूतोपमा । अर्चितमिति । अत्र भागवताद्युक्तकालीयनागप्रहरणवेलायां बलिस्थानं चैत्यमप्युन्मथितमित्यवगन्तव्यमित्याहुः । सर्वलोकस्य सर्वलोकेन । अर्चितं सपताकं अलकृतमित्यर्थः । सवेदिकं श्रमहरवेदिकासंपन्नं । एवं वर्तमानमपि तत्र निगूढनागग्रहणाय गरुडोन्मथितं चैत्यमिव स्थितमित्यर्थः । शौर्यादिसंपन्नोपि भ्रातृभार्यापहरणपापवत्त्वेन हत इत्यत्र दृष्टान्तोयं । ऊर्जितं दृढं । धनुरवष्टभ्य तिष्ठन्तं । अनेनाकर्षकाकार उच्यते । चकारेण तादृशसंस्थानविशेषेणाकर्षकता कथ्यते । भर्तारं हतवन्तं रामं तत्साहाय्यकृतं तदनुजं तेन संहारयितारं सुग्रीवं च ददर्श । शुभा तत्र शत्रुत्वबुद्धिं विहाय शुभहृदया बभूव । न रामस्य दोषोस्ति । किंतु वालिन एव । पानीयपानाय तटाके स्वाते तत्र कण्ठे गुर्वीं शिलां बद्ध्वा पतित्वा म्रियमाणस्यैवहि दोषः । अयमप्यनुकूलश्चेत्कथमेनं न रक्षेत् । किंच " मम प्राणा हि पाण्डवाः " इत्युक्तरीत्या स्वप्राणभूते स्वाश्रिते हिंसां कुर्वन्तं कथं मृष्येत् । अतएव हि प्रथमयुद्धे न हिंसितवान् । किंतु स्वाश्रितापराधं दृष्ट्वैव पुनर्युद्धे वालिनं हतवानित्यमन्यतेति भावः

मेवेतिनेहस्थातुंयोग्यमितिशेषः । हेरुचिरानने यद्यपीदंस्थानं तेतुभ्यंरुचितं अभीष्टं । तथापि इह किष्किन्धायांविद्यमानानिदुर्गाणि अद्यैवधानराः सुग्रीवहनुमदादयः आविशन्ति । वर्तमानसामीप्येलट् । लुब्धेभ्यः राज्यादिविषये । विप्रलब्धेभ्यःपूर्वमस्माभिर्वञ्चितेभ्यः । अस्माकं तुमुलं महत् । भयमस्ति । यतइतिशेषः । केचित्तुइहतेस्थानंअस्माकंअरुचितं अनभिमतं । इतरत्पूर्ववदित्याहुः । स० येसभार्याःसुग्रीवाद्या तेअभार्याःविरहितभार्याःकृताः ॥ १५–१६ ॥ ती० अल्पान्तरगतानां नातिदूरवर्तिनां । आत्मनः प्रतिरूपं आत्मानुरूपं । अल्पान्तरगतानांएवंभयेनकिंचिद्भेदंप्राप्तानामितिवा । ति० अवान्तरगतानामितिपाठे मध्येमार्गमागतानामित्यर्थः ॥ स० चारुहासिनी पूर्वं ॥१७॥ ती० महावातसमाविष्टं । भावेनिष्ठा । महावातस्येवसमाविष्टंसमावेशनंयस्यसतथो-

[पा०] १ क. घ. छ. झ. ट. अभार्यास्सहभार्याश्च. २ छ. झ. ञ. विप्रलब्धेभ्यः. ट. विप्रलुब्धेभ्यः. ३ छ. झ. ट. नस्तुमहद्भयं. ४ च. छ. झ. ट. राज्येनापिकिमात्मना. ग. ङ. राज्येनचकिमात्मना. ५ ङ.—ट. शोकमूर्च्छिता. ६ च.—ट. साव्रजन्ती. क. ग. आविशन्ती. ७ ख. महाबलसमाविष्टं.

शक्रतुल्यपराक्रान्तं वृष्ट्वेवोपरतं घनम् ॥ नर्दन्तं नर्दतां भीमं शूरं शूरेण पातितम् ॥ २३ ॥
शार्दूलेनामिषस्यार्थे मृगराजं यथा हतम् ॥ २४ ॥
अर्चितं सर्वलोकस्य सपताकं सवेदिकम् ॥ नागहेतोः सुपर्णेन चैत्यमुन्मथितं यथा ॥ २५ ॥
अवष्टभ्य च तिष्ठन्तं ददर्श धनुरूर्जितं ॥ रामं रामानुजं चैव भर्तुश्चैवानुजं शुभा ॥ २६ ॥
तानतीत्य समासाद्य भर्तारं निहतं रणे ॥ समीक्ष्य व्यथिता भूमौ संभ्रान्ता निपपात ह ॥ २७ ॥
सुप्तैव पुनरुत्थाय आर्यपुत्रेति क्रोशती ॥ रुरोद सा पतिं दृष्ट्वा संदितं मृत्युदामभिः ॥ २८ ॥
तामवेक्ष्य तु सुग्रीवः क्रोशन्तीं कुररीमिव ॥ विषादमगमत्कष्टं दृष्ट्वा चाङ्गदमागतम् ॥ २९ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे एकोनविंशः सर्गः ॥ १९ ॥

विंशः सर्गः ॥ २० ॥

तारया बाल्यालिङ्गनपूर्वकं सकरुणं बहुधाविलापेन प्रायोपवेशाध्यवसायः ॥ १ ॥

रामचापविसृष्टेन शरेणान्तकरेण तम् ॥ दृष्ट्वा विनिहतं भूमौ तारा तारापिपानना ॥
सा समासाद्य भर्तारं पर्यष्वजत भामिनी ॥ १ ॥
इषुणाऽभिहतं दृष्ट्वा वालिनं कुञ्जरोपमम् ॥ वानरेन्द्रं महेन्द्राभं शोकसंतप्तमानसा ॥
तारा तरुमिवोन्मूलं पर्यदेवयदातुरा ॥ २ ॥
रणे दारुणविक्रान्त प्रवीर प्लवतां वर ॥ किं दीनामपुरोभागामद्य त्वं नाभिभाषसे ॥ ३ ॥

॥ २१—२६ ॥ तमिममर्थं व्यञ्जयन्नाह—तानिति ॥ अतीत्येति नातिक्रम उच्यते । सर्वेषां समीपस्थत्वात् । किंतु तत्र दोषबुद्धिमकृत्वेत्यर्थः । भर्तारं समासाद्येति उपसर्गेण स्वाज्ञानेनायं हत इति बुद्धवतीति ज्ञाप्यते ॥ २७ ॥ संदितं बद्धं । मृत्युदामभिः मृत्युपाशैः । आसन्नप्राणमित्यर्थः ॥२८॥ कष्टं विषादं । अत्यन्तविषादमित्यर्थः ॥ २९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने एकोनविंशतिः सर्गः ॥ १९ ॥

अथ ताराप्रलापो विंशे—रामेत्यादिःसार्धश्लोकः । सा तारा तं दृष्ट्वा पर्यष्वजत ॥ १ ॥ इषुणेत्यादिःसार्धः ॥ २ ॥ अपुरोभागां दोषदर्शनरहितां अनपराधामि-

क ः । तं । युद्धेमहावातसदृशवेगमित्यर्थः ॥ रामानु० वज्राणामिति । किंकरवज्रादिभेदविवक्षयाबहुवचननिर्देशः ॥ ति० रणेष्वितिशेषः । रणभेदमपेक्ष्यवज्राणामितिबहुवचनप्रयोगः ॥ २२ ॥ ति० मृगराजं प्रभूतमांसादिमत्त्वेनमृगश्रेष्ठं । शार्दूलोव्याघ्रः ॥ २३ ॥ ति० चैत्यं चतुष्पथवर्तिवल्मीकं । नागहेतोः अन्तर्विद्यमाननागभक्षणार्थंसुपर्णेनगरुडेनयथोन्मथितंतथासुग्रीवस्यराज्यभोगहेतोः रामेणोन्मथितमित्यर्थः ॥ २५ ॥ रामानु० संदितं बद्धं । " बद्धेसंदानितंमूतमुदितंसन्दितंसितं" इत्यमरः ॥ २८ ॥ इत्येकोनविंशः सर्गः ॥ १९ ॥

रामानु० रामचापेति । एतदनन्तरं सा समासाद्येतिश्लोकःकतिपयकोशेषुप्रमादाल्लिखितोवर्तते । अयमुपरि "दुर्लभंदर्शनंतस्यतवत्सभविष्यति " इत्यनन्तरंद्रष्टव्यः । तारा उच्चैस्स्वरा । अतोनपुनरुक्तिः । स० तारापिपानना प्राक् । यद्वा मुखस्य कलङ्कितत्वेनतद्योक्तिः ॥ १ ॥ ति० दारुणंविक्रान्तंविक्रमोयस्यतत्संबोधनं । पुरोभागां अग्रेस्थितां ॥ ति० इदानींपुरोभागां एत-

[पा०] १ छ. ज. ञ ट. मृगराजमिवाहतं. २ च. ज.—ट. भर्तुश्चैवतथानुजं. ३ ग. सासमीक्ष्याथतंभूमौ. ४ क. ख. आर्यपुत्रेति. ५ ङ.—ट. वादिनी. घ. शोचती. ६ ङ. च. ज. ञ. पतितंदृष्ट्वा. ७ छ. ज्ञ. ट. संवीतं. क. ग. ङ. च. ज. ञ. स्यन्दितं. ८ ङ. करेणच. ९ क. ख. ग. तारतरखना. १० सासमासाद्यभर्तारं. इषुणाभिहतं. इत्यर्धद्वयरामानुजीयपाठेअत्रनदृश्यते. उत्तरत्रदुर्लभंदर्शनंवत्सेत्यर्धात्परंदृश्यते. स. घ. समासाद्यच. ११ छ. ज्ञ. ट. वानरंपर्वतेन्द्राभं. १२ ग. महाभागं. १३ क. ग. शोकसंविग्नमानसा. ख. शोकसंतापकर्शिता. १४ घ. छ. ज्ञ. ट. पर्यदेवयतातुरा. १५ छ. ज्ञ. ञ. ट. किमिदानीं रोभागां. क. ग. किंदीनामनुरक्तांमामद्य.

उत्तिष्ठ हरिशार्दूल भजस्व शयनोत्तमम् ॥ नैवंविधाः शेरते हि भूमौ नृपतिसत्तमाः ॥ ४ ॥
अतीव खलु ते कान्ता वसुधा वसुधाधिप ॥ गतासुरपि यां गात्रैर्मां विहाय निषेवसे ॥ ५ ॥
व्यक्तमन्या त्वया वीर धर्मतः संप्रवर्तिता ॥ किष्किन्धैव पुरी रम्या स्वर्गमार्गे विनिर्मिता ॥ ६ ॥
गान्यस्माभिस्त्वया सार्धं वनेषु मधुगन्धिषु ॥ विहृतानि त्वया काले तेषामुपरमः कृतः ॥ ७ ॥
निरानन्दा निराशाऽहं निमग्ना शोकसागरे ॥ त्वयि पञ्चत्वमापन्ने महायूथपयूथपे ॥ ८ ॥
हृदयं सुस्थिरं मह्यं दृष्ट्वा विनिहतं पतिम् ॥ यन्न शोकाभिसंतप्तं स्फुटतेऽद्य सहस्रधा ॥ ९ ॥
सुग्रीवस्य त्वया भार्या हृता स च विवासितः ॥ यत्तु तस्य त्वया व्युष्टिः प्राप्तेयं प्लवगाधिप ॥ १० ॥
निःश्रेयसपरा मोहात्त्वया चाहं विगर्हिता ॥ यैषाऽब्रवं हितं वाक्यं वानरेन्द्र हितैषिणी ॥ ११ ॥
रूपयौवनदृप्तानां दक्षिणानां च मानद ॥ नूनमप्सरसामार्य चित्तानि प्रमथिष्यसि ॥ १२ ॥
कालो निःसंशयो नूनं जीवितान्तकरस्तव ॥ बलाद्येनावपन्नोसि सुग्रीवस्यावशो वशम् ॥ १३ ॥
[अस्थाने वालिनं हत्वा युध्यमानं परेण च ॥ न संतप्यति काकुत्स्थः कृत्वा कर्म सुगर्हितम् ॥ १४ ॥]
वैधव्यं शोकसंतापं कृपणं कृपणा सती ॥ अदुःखोपचिता पूर्वं वर्तयिष्याम्यनाथवत् ॥ १५ ॥
लालितश्चाङ्गदो वीरः सुकुमारः सुखोचितः ॥ वत्स्यते कामवस्थां मे पितृव्ये क्रोधमूर्च्छिते ॥ १६ ॥

ति यावत् ॥ ३—५ ॥ हे वीर अत्र निर्मिता किष्किन्धैवान्या पुरी स्वर्गमार्गे त्वया धर्मतःप्रवर्तिता। अतः त्वत्त्विमां त्यक्त्वा गन्तुमुद्यतोसीति भावः ॥ ६ ॥ अस्माभिरिति इतरव्यपेक्षया बहुवचनं । अस्माभिः सह त्वया यानि विहृतानि विहाराः । कृतानीत्यध्याहारः । तेषां त्वया उपरमः विरामः कृतः ॥ ७ ॥ अद्य निरानन्दा । निराशा कालान्तरे आनन्दो भविष्यतीत्याशारहिताऽहं शोकसागरे निमग्ना अस्मीति शेषः । पञ्चत्वं मरणं ॥ ८ ॥ मह्यं मम ॥ ९ ॥ व्युष्टिः फलं । " व्युष्टिः फले समृद्धौ च " इत्यमरः। विवासित इति यत्तस्य व्युष्टिरित्यन्वयः ॥ १० ॥ निःश्रेयसपरा श्रेयस्कामा ॥ ११ ॥ दक्षिणानां अनङ्गतन्त्रे कुशलानां । प्रमथिष्यसि वशीकरिष्यसीतिभावः । वीरस्य स्वर्गसिद्धेरितिभावः ॥ १२ ॥ वशं अवपन्नः प्राप्तः ॥ १३—१४ ॥ अहं पूर्वं अदुःखोपचिता अकृपणाचसती संप्रति कृपणाभूत्वा वैधव्यं शोककृतसंतापंच वर्तयिष्यामि धारयिष्यामि ॥ १५ ॥ मे मया लालितः अङ्गदः पितृव्ये पितृभ्रातरि । क्रोधमूर्च्छिते सति कामवस्थां वत्स्यते

स्मिन्काले कृतापराधामलाऽद्यनाभिभाषेकिमित्यन्वयः ॥ ३ ॥ ति० हेवीर धर्मत संप्रवर्तिता धर्मेणयुद्धमाचरतात्वयाऽयस्वर्गमार्गे स्वर्गसाधनरणभूमौकिष्किन्धेवाऽन्यारम्यापुरीनिर्मिता । नोचेत्कथंकिष्किन्धांविहायात्रशेषेहत्यर्थः । कतक० धर्मतःप्रवर्तिता रक्षिता । किष्किन्धैवान्यापिस्वर्गमार्गे स्वर्गरूपदेशेनिर्मिता ॥ स० अन्यापुरी वीरस्वर्गलक्षणा ॥ ६ ॥ स० नकालःअकालःअयस्यअदृष्टस्यअकालः अयाकालः । घटानधिकरणमित्रिवत् ॥ ७ ॥ ति० सविवासितइतियत् तत्प्रसिद्धंकर्म तस्यकर्मण इयंव्युष्टिःपरिपाकःप्राप्तइत्यर्थः ॥ १० ॥ ति० प्राप्तदिव्यदेहेनाप्सरसांकाममोहजननेनेतिशेषः ॥ शि० स्त्रीयोगेममैवदुःखं तवतुतत्रापिसुखमित्याह—रूपेति ॥ १२ ॥ स० नूनमित्यत्रवक्ष्यमाणेनोत्प्रेक्षानेनान्वयादपौनरुक्त्यम् ॥ १३ ॥ ति० नसंतप्यति तत् अस्थाने अयुक्तं ॥ शि० अस्थाने अप्रसङ्गे स्वभार्यासुवियमानास्त्रिलर्थः । सुगर्हितं अतिनिन्दितं कर्म अनुजवधूपरिग्रहंकृत्वापरेणसुग्रीवेणयुध्यमानंबालिनंहत्वाकाकुत्स्थोनसंतप्यतिसंतापहेतोरवध्यवधस्यामावादितिभावः ॥ १४ ॥ ति० कृपणाकृपणा अतिशयेनकृपणा । आबाधायांवाद्विर्वं । पूर्वमदुःखोपचिता अदुःखं दुःखरहितंयथाभवतितथा उपचिता वर्धिता ॥ १५ ॥

[पा०] १ ङ. ट. तांगात्रैः. २ छ.—ट. व्यक्तमयं. ३ छ. झ. ट. संप्रवर्तिता. च. ज. परिवर्तिना. ४ ख. ग. वीर. ५ छ. झ. ट. सुस्थितं. ६ क. ग. ङ. च. ज. मन्ये. ७ क. ग. घ. विनिहतंभुवि. च.—ट. निपतितंभुवि. ८ च.—ट. यत्तत्तस्य. क. यत्तस्यहि. ग यत्तस्यच. ९ झ. वशी. १० अयंश्लोकः ङ.—ट. पाठेषुदृश्यते. ११ ग. छ. झ. ञ. ट. कृपणाकृपणा.

कुरुष्व पितरं पुत्र सुदृष्टं धर्मवत्सलम् ॥ [1]दुर्लभं दर्शनं वत्स तव तस्य भविष्यति ॥ १७ ॥
समाश्वासय पुत्रं त्वं संदेशं संदि[2]शस्व च ॥ मूर्ध्नि चैनं [3]समाघ्राय प्रवासं प्रस्थितो ह्यसि ॥ १८ ॥
रामेण हि महत्कर्म कृतं त्वामभिनिघ्नता ॥ [4]आनृण्यं च गतं तस्य सुग्रीवस्य प्रतिश्रवे ॥ १९ ॥
सकामो भव सुग्रीव रुमां त्वं प्रतिपत्स्यसे ॥ भुङ्क्ष्व राज्यमनुद्विग्नः [5]शस्तो भ्राता रिपुस्तव ॥ २० ॥
किं मामेवं वि[6]लपतीं प्रे[7]म्णा त्वं नाभिभाषसे ॥ इमाः पश्य वरा [8]बह्वीर्भार्यास्ते वानरेश्वर ॥ २१ ॥
तस्या विलपितं श्रुत्वा वा[9]नर्यः सर्वतश्च ताः ॥ परिगृह्याङ्गदं [10]दीनं दुःखार्ताः [11]परिचुक्रुशुः ॥२२ ॥

किमङ्गदं साङ्गदवीरबाहो विहाय [12]यास्यद्य चिरप्रवासम् ॥
न युक्तमेवं गुणसन्निकृष्टं विहाय पुत्रं प्रि[13]यपुत्र गन्तुम् ॥ २३ ॥
कि[14]मप्रियं ते प्रियचारुवेष मया कृतं नाथ सुतेन वा ते ॥
सहाङ्गदां मां स विहाय वीर यत्प्रस्थितो दीर्घमितः प्रवासम् ॥ २४ ॥
यद्यप्रियं किंचिदसंप्रधार्य कृतं मया स्यात्तव दीर्घबाहो ॥
क्षमस्व मे तद्धरिवंशनाथ व्रजामि मूर्ध्ना तव वीर पादौ ॥ २५ ॥
तथा तु तारा करुणं रुदन्ती भर्तुः समीपे सह वानरीभिः ॥
व्यवस्यत [15]प्रायमुपोपवेष्टुमनिन्द्यवर्णा भुवि यत्र वाली ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे विंशः सर्गः ॥ २० ॥

वर्तयिष्यति । नश्यत्येवेतिभावः ॥ १६ ॥ कुरुष्वेति अनेन तदानीमङ्गदः समागत इति द्योत्यते ॥ १७—१८ ॥ महत् अन्यैरशक्यं । कर्म कृतं । आनृण्यंच गतं प्राप्तं । प्रतिश्रवे प्रतिज्ञाविषये ॥ १९ ॥ सुग्रीवं प्रत्याह—सकाम इति ॥ शस्तः हिंसितः ॥ २० ॥ वालिनं प्रत्याह—किमिति ॥ २१ ॥ विलपितं विलापं ॥ २२ ॥ साङ्गदौ वीरौ वीर्यवन्तौ बाहू यस्य स तथोक्तः । गुणसन्निकृष्टं गुणैः प्रत्यासन्नं । गुणैस्तव सदृशमित्यर्थः । हे प्रियपुत्रेति संबुद्धिः । प्रियः पुत्रो यस्य सः प्रियपुत्रइति । इयं स्त्रीजनप्रलापपरिपाटी ॥ २३—२४ ॥ असंप्रधार्य अविज्ञाय ॥२५॥ प्रायमुपोपवेष्टुं प्रायोपवेशंकर्तुमित्यर्थः । " प्रसमुपोदः पादपूरणे " इति द्विर्वचनं ॥ २६ ॥ अत्र सर्गे श्लोकव्यत्यासो लेखककृतः । अस्मिन्सर्गे षड्विंशतिश्लोकाः ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने विंशः सर्गः ॥ २० ॥

स० विगतःईरःकंपोययोस्तौवीरौ । ततस्त्रिपदगर्भबहुव्रीहिः ॥ शि० वीरः मानिवीरविध्वंसकत्वेनवीरत्वविशिष्टोबाहुर्यस्यतत्संबोधनं ॥ २३ ॥ ती० प्रायमुपोपवेष्टुं प्रायोपवेशंकर्तुं अनशनदीक्षांकर्तुमित्यर्थः ॥ २६ ॥ इतिविंशस्सर्गः ॥ २० ॥

[पा०] १ दुर्लभंदर्शनंवत्सेत्यर्धादनन्तरं रामानुजीयपाठे सासमासाद्यभर्तारंपर्यष्वजतभामिनी । इषुणाभिहतंदृष्ट्वावालिनं कुञ्जरोपमम् । इतिश्लोकोदृश्यते । रामानुजार्येणव्याख्यातश्च । साअङ्गदंप्रतितथोक्तवतीति. २ ङ. छ.—ट. संदिशस्वमे. ३ क. समाजिघ्रन्प्रवासं. ४ क.—च. ज.—ट. आनृण्यंतु. ५ च. मृतोभ्राता. ६ छ. झ. ट. प्रलपतीं. ७ ङ.—ट. प्रियांत्वं. ८ छ. झ. ट. बह्वधोभार्या. ९ झ. वानर्याः. १० छ. झ. ट. दीनाः. ११ ङ. च. ज. ञ संप्रचुक्रुशुः. छ. झ. ट. प्रतिचुक्रुशुः. १२ ङ.—ञ. यातोसिचिरंप्रवासं. १३ छ. झ. ञ. प्रियचारुवेषं. १४ अयंश्लोकः झ. ट. पाठयोर्नदृश्यते. ञ. तवाप्रियंकान्त मयाक्वचित्किंप्राज्यंकृतंनाथ. १५ ख. ग. घ. च.—ट. प्रायमनिन्द्यवर्णाउपोपवेष्टुंभुवि.

एकविंशः सर्गः ॥ २१ ॥

हनुमताश्वोचन्तींतारांप्रति शास्त्रार्थकथनेन समाश्वासनपूर्वकमङ्गदेनवालिनऔर्ध्वदैहिकविधानचोदनेन सहाङ्गदस्यु-दर्यावलोकनेन शोकनिर्हरणोक्तिः ॥ १ ॥ तारया तंप्रति स्वस्याङ्गदस्युदयापेक्षया मृतभर्तृपार्श्वशयनस्यैव सुखसाधन-त्वोक्तिः ॥ २ ॥

ततो निपतितां तारां च्युतां तारामिवाम्बरात् ॥ शनैराश्वासयामास हनुमान्हरियूथपः ॥ १ ॥
गुणदोषकृतं जन्तुः स्वकर्मफलहेतुकम् ॥ अव्यग्रस्तदवाप्नोति सर्वं प्रेत्य शुभाशुभम् ॥ २ ॥
शोच्या शोचसि कं शोच्यं दीनं दीनाऽनुकम्पसे ॥ कस्य को वाऽनुशोच्योस्ति देहेस्मिन्बुद्बुदोपमे ॥ ३ ॥
अङ्गदस्तु कुमारोऽयं द्रष्टव्यो जीवपुत्रया ॥ आयत्यां च विधेयानि समर्थान्यस्य चिन्तय ॥ ४ ॥
जानास्यनियतामेवं भूतानामागतिं गतिम् ॥ तस्माच्छुभं हि कर्तव्यं पण्डितेनेहलौकिकम् ॥ ५ ॥
यस्मिन्हरिसहस्राणि प्रयुतान्यर्बुदानि च ॥ वर्तयन्ति कृतांशानि सोयं दिष्टान्तमागतः ॥ ६ ॥
यदयं न्यायदृष्टार्थः सामदानक्षमापरः ॥ गतो धर्मजितां भूमिं नैनं शोचितुमर्हसि ॥ ७ ॥
सर्वे हि हरिशार्दूलाः पुत्रश्चायं तवाङ्गदः ॥ इदं हर्यृक्षराज्यं च त्वत्सनाथमनिन्दिते ॥ ८ ॥

अथ हनुमत्समाश्वासनमेकविंशे—तत इत्यादि ॥ तारां तारकां ॥ १ ॥ जन्तुः गुणदोषकृतं ज्ञानाज्ञानाभ्यांकृतं । स्वकर्मफलं स्वकर्मवासना हेतुर्यस्य तत्तथोक्तं । यत् कर्मास्ति तत् तस्य शुभाशुभं फलभूतंसुखदुःखं । प्रेत्य लोकान्तरंप्राप्य । अव्यग्रः एकाग्रः सन् । अवाप्नोति । अत्रकृतंशुभाशुभरूपं कर्म लोकान्तरे फलदानाय सहैव गच्छतीत्यर्थः । सुग्रीवेणायं मारित इति न मन्तव्यं । किंतु स्वकर्मणैवहतः । निमित्तमात्रं सुग्रीवहतिभावः ॥ २ ॥ नायंशोचनीयः स्वकर्मानुरूपेणगतत्वात् । किंतु स्वात्मैवशोच्यः केनकर्मणा कंलोकंगमिष्यामीति । तदर्शयति—शोच्येति ॥ स्वयंशोच्या त्वं कंप्रति शोचसि । स्वयंदीना कं दीनं अनुकम्पसे दयसे । बुद्बुदोपमे जलबुद्बुदवदस्थिरे देहे । निमित्तसप्तमी । कस्य कोवानुशोच्योस्ति । सर्वेषामप्यस्थिरत्वाविशेषात् । स्वयं स्थिर एव ह्यस्थिरं शोचेदिति भावः ॥ ३ ॥ द्रष्टव्यः परिपालनीयः । आयत्यां उत्तरकाले । समर्थानि हितानि ॥ ४ ॥ अनियतामागतिं गतिं अस्थिरतामितियावत् । शुभं और्ध्वदैहिकं । ऐहलौकिकं रोदनादिकं ॥ ५ ॥ यस्मिन् विषये । हरीत्यविभक्तिकनिर्देशः । हरीणामित्यर्थः । कृतांशानि कृतविभागानि सन्ति वर्तयन्ति जीवनं कुर्वन्ति । सोयं दिष्टान्तं दिष्टस्य दैवकल्पितकालस्य अन्तं समाप्तिं । "कालो दिष्टोप्यनेहापि" इत्यमरः । बहून्स्वजनाञ्जीवयित्वा गतः स्वसुकृतफलं प्राप्तुं गतः । अतः स न शोच्य इतिभावः ॥ ६ ॥ न्यायदृष्टार्थः शास्त्रदृष्टतत्त्वार्थः । साम दुःखितानां स्वजनानां सान्त्वनं । दानं अभीष्टार्थदानं । क्षमा तत्कृतापराधसहनं । एतासु परः सक्तः अयं । धर्मजितां स्वाधीनधर्माधर्मकाणां । भूमिं लोकं । यत् यस्मात् गतः । तस्मान्नैनं शोचितुमर्हसि ॥ ७ ॥ हरीणां ऋक्षाणां च । राज्यं त्वत्सनाथं त्वया सनाथं ॥ ८ ॥

स० गुणदोषकृतं गुणदोषजन्यं । स्वकर्मफलहेतुकं सुकृतकर्मफलंयस्य स्वकर्मफलोविष्णुः तद्धेतुकंशुभं स्वर्गनरकादिकं जन्तुः प्रेत्य अव्यग्रस्सन्प्राप्नोतीतियोजना ॥ शि० अव्यग्रोजन्तुः प्राणी गुणदोषकृतं गुणेनधर्मबुद्ध्या । दोषेण पापबुद्ध्या । कृतं निष्पादितं । फलहेतुकंशुभाशुभफलकारणीभूतंयत्स्वकर्मेतत् तत्स्वकर्मेण शुभाशुभंफलं । प्रेत्यप्राणांस्त्यक्त्वा । अवाप्नोति । एतेन पूर्वोपार्जितकर्मफलमेवलभ्यमप्राप्तमितिसूचितं ॥ २ ॥ स० आयत्या प्रयत्नेन । अस्य वालिनः । विधेयानिकार्याणिसमर्थानि सुगतिप्रापकाणीत्यर्थः । चिन्तय कारयेतियावत् ॥ ४ ॥ ति० हेपण्डिते इह पतिपित्रादिवियोगकाले । लौकिकं बहुरोदनादि । नकर्तव्यं प्रीतिमात्रबोधकतयामृतेष्टसाधनत्वेनचतत्सलौकिकं । स० अनियतां अव्यवस्थितांभगवन्नियतामित्यध्यर्थः । नियतामितिपाठेतुस्फुटोर्थः । पण्डितेनेत्येकवापदं । अङ्गदेनेत्यर्थः । लौकिकं ऊर्ध्वलोकप्रापकं । कर्तव्यं त्वयाकारयितव्यंच ॥ ५ ॥ रामानु०

[पा०] १ क. घ. ङ. ञ. स्वयं. २ क. ग. घ. च. छ. झ. ञ. ट. कस्यकस्यानु. ३ ट. आयत्याच. ४ क. ख. ङ.—ट. पण्डितेनेह. ५ क. ख. ग. छ. झ. शतानियुतानिच. च. ज. ट. प्रयुक्तान्यर्बुदानिच. ६ ज. धर्मकृतां. ७ ग, ङ.—ट. सर्वेन. क. सर्वेतु. ८ क. घ.—ट. हर्यृक्षपतिराज्यं.

ताविमौ शोकसंतापौ शनैः प्रेरय भामिनि ॥ त्वया परिगृहीतोऽयमङ्गदः शास्तु मेदिनीम् ॥ ९ ॥
संततिश्च यथा दृष्टा कृत्यं यच्चापि सांप्रतम् ॥ राज्ञस्तत्क्रियतां तावदेष कालस्य निश्चयः ॥ १० ॥
संस्कार्यो हरिराजश्च अङ्गदश्चाभिषिच्यताम् ॥ सिंहासनगतं पुत्रं पश्यन्ती शान्तिमेष्यसि ॥ ११ ॥
सा तस्य वचनं श्रुत्वा भर्तृव्यसनपीडिता ॥ अब्रवीदुत्तरं तारा हनुमन्तमवस्थितम् ॥ १२ ॥
अङ्गदप्रतिरूपाणां पुत्राणामेकतः शतम् ॥ हतस्याप्यस्य वीरस्य गात्रसंश्लेषणं वरम् ॥ १३ ॥
न चाहं हरिराजस्य प्रभवार्म्यङ्गदस्य वा ॥ पितृव्यस्तस्य सुग्रीवः सर्वकार्येष्वनन्तरः ॥ १४ ॥
न ह्येषा बुद्धिरास्थेया हनुमन्नङ्गदं प्रति ॥ पिता हि बन्धुः पुत्रस्य न माता हरिसत्तम ॥ १५ ॥
न हि मम हरिराजसंश्रयात्क्षमतरमस्ति परत्र चेह वा ॥
अभिमुखहतवीरसेवितं शयनमिदं मम सेवितुं क्षमम् ॥ १६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे एकविंशः सर्गः ॥ २१ ॥

द्वाविंशः सर्गः ॥ २२ ॥

वालिनाकनिष्ठमपिसुग्रीवंप्रतिस्वापकारक्षमापणपूर्वकं ताराद्युक्तिप्रशंसनेन तद्वचनसंमाननचोदनेन सहाङ्गदपालनराम-कार्यकरणयोश्रोदना ॥ १ ॥ तया सुग्रीवाय स्वकण्ठस्थकाञ्चनमालादानपूर्वकमङ्गदंप्रति हितमुपदिशतिसतिवालिनि सहसा सत्राणैस्तच्छरीरादुत्क्रमणं ॥ २ ॥ वानरगणेषु वालिनोऽद्भुतापदानप्रशसनपूर्वकमुच्चैः परिदेवयमानेषु तारया सहसा वालिपरिरंभणपूर्वकं भूमौनिपतनं ॥ ३ ॥

वीक्षमाणस्तु मन्दासुः सर्वतो मन्दमुच्छ्वसन् ॥ आर्द्रावेव तु सुग्रीवं ददर्श त्वात्मजाग्रतः ॥ १ ॥

ताविमौ शोकसंतापौ शोकतत्कृततापौ । शनैः क्रमेण । प्रेरय निवर्तय । भर्तृमरणशोकस्य सद्यो दुस्त्यजत्वा-दिति भावः ॥ ९ ॥ संततिश्च यथा दृष्टा यत्प्रयोज-नकः संतानोलब्धः । सांप्रतं इदानीं । यच्च कृत्यं कर्तुं योग्यं तत्सर्वं राज्ञः क्रियतां । एष निश्चयोस्य कालस्य योग्य इति शेषः । ननु शोक इति भावः । पुत्रोत्पादनफलमौर्ध्वदैहिकं क्रियतामित्यर्थः ॥ १० ॥ उक्तमर्थं वाचा दर्शयति—संस्कार्य इति । शान्तिं दुःख-शमं ॥११—१२॥ अङ्गदप्रतिरूपाणां अङ्गदतुल्यानां । पुत्राणां सत्पुत्राणां शतं एकतः एकत्र एकतुलायामस्तु । हतस्याप्यस्य गात्रसंश्लेषणं गाढालिङ्गनं । एकतो-स्तु । तयोर्मध्ये भर्तृसंश्लेषणमेव वरमित्यर्थः ॥ १३ ॥ संस्कार्य इत्युत्तरमाह—न चेति ॥ हरिराजस्य न प्रभवामि तस्य संस्कारकरणे न समर्थास्मि । अङ्गदस्य वा न प्रभवामि तस्य राज्याभिषेककरणे न प्रभवा-मीत्यर्थः ॥ १४ ॥ नास्थेया नादर्तव्या । नकर्तव्येत्यर्थः । पिता पितृव्यः ॥ १५ ॥ परत्र परलोके । इह अस्मिँल्लोके । शश्वदभिमुखतया हतः अभिमुखहतः स चासौ वीरश्च तेन सेवितं ॥ १६ ॥ इति श्रीगोविन्द-राजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने एकविंशः सर्गः ॥ २१ ॥

एवममोघरामशराभिधातेन मोहसमाविष्टं वालिनं मृतं निश्चित्य संस्कारादिकरणाय त्वरमाणे हनुमति

हर्यृक्षपतिराज्यंचेतिपाठः । अन्यथावक्ष्यमाणाङ्गदाभिषेकवचनविरोधःस्यात् ॥ ८ ॥ रामानु० स्वयेति । अङ्गदाभिषेचनं तारा-दुःखशान्तयेदर्शितं ॥ ति० ताविमौ सुग्रीवाङ्गदौ शनैःप्रेरय उत्तरकार्यकरणायेतिशेषः ॥ ९ ॥ शि० ननुत्वत्कर्तृकाभिषेकाप्रद-र्शौलद्विषयकाङ्गदप्रीतिर्विलक्षयतीत्यतआह—नहीति । हेहनुमन् पिता तदुपलक्षितपितृव्यादिश्चपुत्रस्यबन्धुः । माताहु न एषाबुद्धिः अङ्गदंप्रतिआस्थेया प्रापणीया , किंचमातैवबन्धुः पित्रादिस्तुनेतिबुद्धिर्नास्थेया । पितृव्येपिबन्धुत्वंबोधनीयमित्यर्थं एतेनेदंदुक्त्या-दुत्पत्तौसुग्रीवविद्वेषेऽङ्गदविध्वंसोभविष्यतीतिव्यञ्जित ॥ १५ ॥ इत्येकविंशःसर्गः ॥ २१ ॥

[पा०] १ ख. च. छ. ज. ञ, ट. शोकसंतप्तौ. २ क. ख. ग. ङ. ज.—ट. सर्वमेषकालस्य. च. सर्वमेषकार्यस्य. ३ घ. च.—ञ. ट. हरिराजस्तु. ४ ख. हतस्यास्यप्रवीरस्य. ५ ग. राजसिंहस्य. ६ क. च. म्यङ्गदस्यच. ७ ज. ञ चेहच. ८ क. आरादेवतु. ९ ख. ङ. च. छ. झ. ञ. ट. ददर्शानुजमग्रतः. ज. ददर्शानुजमग्रजः.

तं प्राप्तविजयं वाली सुग्रीवं प्लवगेश्वरः ॥ आभाष्य व्यक्तया वाचा सस्नेहमिदमब्रवीत् ॥ २ ॥
सुग्रीव दोषेण न मां गन्तुमर्हसि किल्बिषात् ॥ कृष्यमाणं भविष्येण बुद्धिमोहेन मां बलात् ॥ ३ ॥
युगपद्विहितं तात न मन्ये सुखमावयोः ॥ सौहार्दं भ्रातृयुक्तं हि तदिदं तात नान्यथा ॥ ४ ॥
प्रतिपद्य त्वमद्यैव राज्यमेषां वनौकसाम् ॥ मामप्यद्यैव गच्छन्तं विद्धि वैवस्वतक्षयम् ॥ ५ ॥
जीवितं च हि राज्यं च श्रियं च विपुलामिमाम् ॥ प्रजहाम्येष वै तूर्णं महच्चागर्हितं यशः ॥ ६ ॥
अस्यां त्वहमवस्थायां वीर वक्ष्यामि यद्वचः ॥ यद्यप्यसुकरं राजन्कर्तुमेव तदर्हसि ॥ ७ ॥
सुखार्हं सुखसंवृद्धं बालमेनमबालिशम् ॥ बाष्पपूर्णमुखं पश्य भूमौ पतितमङ्गदम् ॥
मम प्राणैः प्रियतरं पुत्रं पुत्रमिवौरसम् ॥ ८ ॥
मया हीनमहीनार्थं सर्वतः परिपालय ॥ त्वमेवास्य हि दाता च परित्राता च सर्वतः ॥
मयेष्वभयदश्चैव यथाऽहं प्लवगेश्वर ॥ ९ ॥
एष तारात्मजः श्रीमांस्त्वया तुल्यपराक्रमः ॥ रक्षसां तु वधे तेषामग्रतस्ते भविष्यति ॥ १० ॥

दैवात्किंचित्समाश्वस्तो वाली कर्तव्यभागं नियच्छति द्वाविंशे—वीक्षमाण इत्यादि ॥ मन्दासुः अल्पप्राणः ॥ १ ॥ आभाष्य संबोध्य ॥ २ ॥ किल्बिषात् राज्यविनासनदारहरणरूपकिल्बिषाद्धेतोः । मां दोषेण गन्तुं दोषसहितं ज्ञातुं नार्हसि । किंतु भविष्येण भाविफलेन हेतुनाजातेन बुद्धिमोहेन बलात्कृष्यमाणं मां गन्तुमर्हसि ॥ ३ ॥ आवयोः भ्रात्रोः । भ्रातृयुक्तं भ्रातृत्वप्रयुक्तं । सौहार्दं सुखं राज्यसुखं च । एतदुभयं दैवेन युगपन्नविहितं । मन्ये ध्रुवं । अन्ययमेतत् । तदिदं दैवकृतं युगपद्विधानं । अन्यथा न हि अन्यप्रकारं न भवतिहि ॥ ४ ॥ प्रतिपद्य पालयेतिशेषः । यद्वा प्रतिपद्यप्राप्नुहि । श्यश्नन्तोयं । वैवस्वतक्षयं यमगृहं ॥ ५ ॥ अगर्हितं यशः केनाप्यवध्यो वालीति प्रसिद्धं यशः ॥ ६ ॥ अस्यामवस्थायां चरमावस्थायां । यद्वचो वक्ष्यामि एतद्यद्यप्यसुकरं तथाप्यवश्यं कर्तुमर्हसि । मदुक्तरीत्या राजाभवेत्यर्थः ॥ ७ ॥ वयसा बालमप्यबालिशं बालबुद्धिरहितं । प्राणैः प्राणेभ्यः । मम पुत्रं त्वं औरसं पुत्रमिव पश्येति संबन्धः ॥ ८ ॥ अस्य अङ्गदस्य । दाता वस्त्राभरणादीनामिति शेषः । सर्वतः

ति० हेसुग्रीव मांकिल्बिषात् प्राग्भवीयदुष्कृतवशात् । भविष्येण भविष्यताऽवश्यंभाविनाबुद्धिमोहेन लयिशबुद्धिरूपेण बलात्कृष्यमाणंमांज्ञाला लंदोषेण स्वापकारदोषवत्त्वेन । मांगन्तुं अवगन्तुं । नार्हसि ॥ ३ ॥ स० मन्येऽस्मेतदव्ययमितिकश्चित् सन्मूलंचिन्त्यं । ति० कार्यानुमितंकर्मप्राक्कल्पंदर्शयति—युगपदिति । भ्रातृयुक्तं भ्रात्रोर्युक्तंउचितं । सौहार्दं सुखंचराज्यसुखंच आवयोःकर्मणायुगपन्नविहितमितिमन्ये । यतस्तदिदमुचितमपिसौहार्दसुखंचान्यथाजातंविघटितमित्यर्थः ॥ ४ ॥ ति० अयरामशरक्षीणपापलाभ्राप्तदिव्यप्रकृतिःस्वयमेवसुग्रीवायस्वानन्तरंप्राप्तंराज्यंददाति—प्रतिपद्येति । प्रतिपद्यस्वेत्यर्थः । ननुराजनिमृतेतत्पुत्रएवराज्याधिकारी नतुतत्कनीयान्भ्रातेतिचेन्न । पुत्रस्यबालत्वेनराज्यरक्षणासामर्थ्याद्बलवदाश्रितत्वाच्चपुत्रनाशोमाभूदितिभोजः । भगवतारामेणापिराज्यरक्षणासामर्थ्येनाङ्गदस्यसुग्रीवोऽभिषिक्तो यौवराज्येचाङ्गदः । सुग्रीवानन्तरंत्वङ्गदस्यैवराज्याधिकारो नतुसुग्रीवपुत्राणांज्येष्ठपुत्रत्वादिस्याहु ॥ स० अद्यैवगच्छन्तमित्यनेन नमर्ज्जीवनमयतवेतिद्योतयति ॥ शि० ननुराजपुत्रसत्त्वेभ्रातुराज्यानौचित्यात्कथमेवमुक्तमितिचेन्न । बिलप्रविष्टबालिमरणनिश्चयेतदानींबालिपुत्रस्यामावात्सुग्रीवस्यप्राप्तराज्यत्वेननवीनराज्यत्वाभावेनादोषात् ॥५॥ति० अगर्हितंयशः बालीकेनाप्यवध्यइत्येवंरूपं । प्रजहामि एकेनैवशरेणरामहतत्वादितिप्रायः। अन्येतुचरस्थैर्यं यशइत्युत्तरंबोध्यः । अगर्हितंयशस्तुप्राप्नोमीतिशेषः । वालीभगवतारामेणच्छन्नेनहतइत्येवंरूपंचयशइत्याहुः ॥ ६ ॥ ति० अस्यामवस्थायां चरमदशायां । यद्यप्यसुकरं मयाऽत्यन्तमपकृतत्वात् । तथापिकर्तुमर्हस्येवेतियोजना । सालिकलात्सालिकसमाश्रयणाभेत्याशयः । स्वंराज्यस्यदत्तत्वादाज्ञप्तिसंबोधनं ॥ ७ ॥ वि० सर्वतः सर्वत्रदेशेकालेच । पालय स्वानन्तरमस्मैवराज्यंदेहीं-

[पा०] १ घ.—ञ. प्लवगेश्वरं. २ क. ग. ङ. च. ञ. आमाष्याव्यक्तया. ३ च.—ट. जातमन्यथा. ४ छ. झ. ञ. ट. विपुलांतथा. ५ ग. सौम्य. ङ. च. ज. तूर्णमहंवाऽगर्हितं. क. छ. झ. ञ. ट. तूर्णमहंचागर्हितं. ६ ङ.—ट. त्वमर्हसि. ७ ख. बालमत्यन्तबालिशं. ८ छ. झ. ट. त्वमप्यस्यपितादाता. ख. त्वमप्यमितदाताच. क. च. ज. ञ. त्वमस्यहितदाताच. क. ग. घ. त्वमप्यस्यहिदाताच. ९ घ. हिसर्वेशः. क. तुसर्वेशः. ख. ग. ङ.—ट. चसर्वेशः. १० ङ.—ट. रक्षसांच.

अनुरूपाणि कर्माणि विक्रम्य बलवान्रणे ॥ करिष्यत्येष तारेयस्तरस्वी तरुणोद्गदः ॥ ११ ॥
सुषेणदुहिता चेयमर्थसूक्ष्मविनिश्चये ॥ औत्पातिके च विविधे सर्वतः परिनिष्ठिता ॥ १२ ॥
यदेषा साध्विति ब्रूयात्कार्यं तन्मुक्तसंशयम् ॥ नहि तारामतं किंचिदन्यथा परिवर्तते ॥ १३ ॥
राघवस्य च ते कार्यं कर्तव्यमविशङ्कया ॥ स्यादधर्मो ह्यकरणे त्वां च हिंस्याद्विमानितः ॥ १४ ॥
इमां च मालामाधत्स्व दिव्यां सुग्रीव काञ्चनीम् ॥ उदारा श्रीः स्थिता ह्यस्यां संप्रजह्यान्मृते मयि ॥१५॥
इत्येवमुक्तः सुग्रीवो वालिना भ्रातृसौहृदात् ॥ हर्षं त्यक्त्वा पुनर्दीनो ग्रहग्रस्त इवोडुराट् ॥ १६ ॥
तद्वालिवचनाच्छान्तः कुर्वन्युक्तमतन्द्रितः ॥ जग्राह सोऽभ्यनुज्ञातो मालां तां चैव काञ्चनीम् ॥ १७ ॥
तां मालां काञ्चनीं दत्त्वा वाली दृष्ट्वाऽऽत्मजं स्थितम् ॥ संसिद्धः प्रेत्यभावाय स्नेहादङ्गदमब्रवीत् ॥ १८ ॥
देशकालौ भजस्वाद्य क्षममाणः प्रियाप्रिये ॥ सुखदुःखसहः काले सुग्रीववशगो भव ॥ १९ ॥
यथा हि त्वं महाबाहो लालितः सततं मया ॥ न तथा वर्तमानं त्वां सुग्रीवो बहु मंस्यते ॥ २० ॥
मास्यामित्रैर्गतं गच्छेर्मा शत्रुभिररिंदम ॥ भर्तुरर्थपरो दान्तः सुग्रीववशगो भव ॥ २१ ॥
न चातिप्रणयः कार्यः कर्तव्योऽप्रणयश्च ते ॥ उभयं हि महान्दोषस्तस्मादन्तरदृग्भव ॥ २२ ॥

शत्रुभ्यः परित्राता । भयेष्वभयदः शत्रुपुत्रत्वेन स्थानान्निष्कासनादिभयहेतुषु विषये अभयदः ॥ ९—११ ॥ अर्थसूक्ष्मविनिश्चये सूक्ष्मार्थविनिश्चये । औत्पातिके उत्पातविषयज्ञाने च । परिनिष्ठिता संजातनिष्ठा । समर्थेतियावत् ॥ १२ ॥ न परिवर्तते न भवतीत्यर्थः ॥ १३ ॥ विमानितः राघव इति शेषः ॥ १४ ॥ संप्रजह्यान्मृतेमयि मृते सति श्रीरिमां काञ्चनीं मालां संप्रजह्यात् । ततः पूर्वमेव मयि जीवति गृहाणेति भावः ॥ १५ ॥ दीनः अभूदिति शेषः । ग्रहग्रस्तः राहुग्रस्तः ॥ १६ ॥ तत् तदनन्तरं । शान्तः त्यक्तवैरः ॥ १७ ॥ प्रेत्यभावाय मरणाय । संसिद्धः कृतनिश्चयः ॥ १८ ॥ अद्य मत्प्रयाणानन्तरं । देशकालौ भजस्व । गत्यर्था ज्ञानार्थाः । देशकालौ जानीहि । अस्मिन्देशे अस्मिन्काले च एवं वर्तितव्यं एवं न वर्तितव्यमिति विवेचयेत्यर्थः । प्रियाप्रियेक्षममाणः । प्रभोः प्रियवचनवदप्रियवचनमपि सोढव्यमित्यर्थः । काले सुखदुःखसहः दुःखकाले सुखं सुखकाले दुःखं च सहमान इत्यर्थः । सुग्रीववशो भव सुग्रीवपरतन्त्रोभव ॥ १९—२० ॥ अस्य सुग्रीवस्यामित्रैर्गतं प्राप्तं पुरुषं मा गच्छेः । अस्य शत्रुमित्रं न भजेरित्यर्थः । शत्रुभिः सह च मा गच्छेः ॥ २१ ॥ अतिप्रणयः अतिस्नेहः अप्रणयः स्नेहाभावश्च ।

तिव्यङ्ग्यं ॥ ९ ॥ स० अनुरूपाणि मदनुरूपाणि त्वदनुरूपाणिवा ॥ ११ ॥ ती० ननुसमुद्रसंजातायास्तारायास्सुषेणदुहितृत्वंकथमितिचेत् तत्रक्षीराब्धिमथनसमयोत्पन्नांतारांदृष्ट्वासुषेणोवामंकरमग्रहीत् । वालीतुतारायादक्षिणंकरमगृह्णात् । तदाऽन्योन्यंविवादेसति देवैस्सुषेणदुहितृत्वंतारायावालिनोजायात्वंचनिश्चितं । तदुक्तंस्कान्दे—" देवैस्सुषेणकलहेपुत्रीतिप्रतिपादिता । सुषेणोदुहितुस्तस्याःस्वयंवरमकल्पयत् । इत्थमूढाकपीन्द्रेणतारासर्वाङ्गसुन्दरी । सुग्रीवमेकदारात्रौरूपसादृश्यमोहिता । प्रार्थयामासकामार्तारन्तुंरतिमतीप्रभुम् । नममायोनिजातायागमनंलोकगर्हितम् ।" इति ॥ ति० तारारक्षणंततउपकारमादर्श्यसूचयति—सुषेणेति । तद्दुहिता तारा । अर्थानांमध्येसूक्ष्मःपरमदुर्ज्ञेयोयोर्थस्तस्यनिश्चये औत्पातिकेविविधेनानाप्रकारोत्पातसूचितापत्कालिकानुष्ठेयनिश्चयेसर्वतऐहिकामुष्मिकनिश्चयेच । परिनिष्ठिता अतिसमर्था ॥१२॥ ति० नहीति । मदनुभवसिद्धमेतदितिभावः । अनेनत्रैवर्णिकेतरत्वेनतरुणत्वेनावश्यकर्तव्यपुरुषान्तरस्वीकारायास्तारायादेवरत्वात्सुग्रीवस्यस्वीकारोप्यनुमतइतिगम्यते ॥ १३ ॥ रामानु० संप्रजह्याः संप्रजहि । शत्रूनितिशेषः ॥ १५ ॥ ति० विपक्षेबाधकमाह—यथाहीति । बालतयाकेवलंलालितः यथासेवोचितकालेपिसेवारहितोऽवर्तिष्ट तथा सेवाराहित्येनवर्तमानंत्वां सुग्रीवोनबहुमन्येत । अतस्सेवांकुर्वित्युपदेशः ॥ २० ॥ स० अस्य माशत्रुभिः मित्रैस्सह गच्छेः ॥ २१ ॥ ति० नातिप्रणयः पुत्रत्वात् अप्रणयश्चनकार्यः । अस्मद्वधादिनान्तरदृक् 'अत्यासत्तिर्वि-

[पा०] १ ग. कार्याणि. २ ख. ङ.—ट. तारेयस्तेजस्वी. ३ क. ग. विनिर्णये. ४ ङ.—ट. हिंस्यादमानितः. ५ क. ग. वालिनोवचनाच्छान्तः. ६ घ. चाभ्यनुज्ञातः. ७ ङ.—ट. दृष्ट्वाचैवात्मजंस्थितं. ८ क. ग.—ट. बहुमन्यते. ९ ख. छ. झ. ञ. ट. नास्यामित्रैः. १० ग. घ. छ. झ. ञ. ट. महादोषंतस्मात्. क. ङ. च. ज. महादोषः.

इत्युक्त्वाऽथ विवृत्ताक्षः शरसंपीडितो भृशम् ॥ विवृतैर्दशनैर्भीमैर्बभूवोत्क्रान्तजीवितः ॥ २३ ॥
ततो विचुक्रुशुस्तत्र वानरा हरियूथपाः ॥ परिदेवयमानास्ते सर्वे प्लवगपुङ्गवाः ॥ २४ ॥
किष्किन्धा ह्यद्य शून्यासीत्स्वर्गते वानराधिपे ॥ उद्यानानि च शून्यानि पर्वताः काननानि च ॥
हते प्लवगशार्दूले निष्प्रभा वानराः कृताः ॥ २५ ॥
यस्य वेगेन महता काननानि वनानि च ॥ पुष्पौघेणानुबध्यन्ते करिष्यति तदद्य कः ॥ २६ ॥
येन दत्तं महद्युद्धं गन्धर्वस्य महात्मनः ॥ गोलभस्य महाबाहोर्दश वर्षाणि पञ्च च ॥ २७ ॥
नैव रात्रौ न दिवसे तद्युद्धमुपशाम्यति ॥ ततस्तु षोडशे वर्षे गोलभो विनिपातितः ॥ २८ ॥
हत्वा तं दुर्विनीतं तु वाली दंष्ट्राकरालवान् ॥ सर्वाभयकरोस्माकं कथमेष निपातितः ॥ २९ ॥

हते तु वीरे प्लवगाधिपे तदा प्लवङ्गमास्तत्र न शर्म लेभिरे ॥
वनेचराः सिंहयुते महावने यथा हि गावो निहते गवांपतौ ॥ ३० ॥
ततस्तु तारा व्यसनार्णवाप्लुता मृतस्य भर्तुर्वदनं समीक्ष्य सा ॥
जगाम भूमिं परिरभ्य वालिनं महाद्रुमं छिन्नमिवाश्रिता लता ॥ ३१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे द्वाविंशः सर्गः ॥ २२ ॥

अन्तरहरभव । मध्यमभावमवलम्बस्वेत्यर्थः ॥ २२ ॥ विवृत्ताक्षः भ्रामितनेत्रः । विवृतैः प्रकाशितैः । अत एव भीमैः । दशनैः दन्तैरुपलक्षितः । उत्क्रान्तजीवितः उद्गतप्राणः ॥ २३ ॥ परिदेवयमानाः रुदन्त इत्यर्थः । प्लवगपुङ्गवाः बलेन श्रेष्ठाः । पुनश्च हरियूथपाः यूथस्य निर्वोढारः । वानराः वानरजातयः ॥ २४ ॥ परिदेवनमेवाह—किष्किन्धेत्यादिना ॥ शून्या शून्यप्राया ॥ २५ ॥ वेगेन पराक्रमेण । काननानि अरण्यानि । वनानि जलानि । सरांसीत्यर्थः। पुष्पौघेण अनुबध्यन्ते संबध्यन्ते । सदा पुष्पितानि भवन्तीत्यर्थः । तत् पुष्पानुबन्धनम् । अद्यतु वालिमरणानन्तरकाले । यद्वा । वनानि क्षुद्रारण्यानि । यस्मिन् वालिनि गच्छति सति तदूरुवेगेनाविशेषेण सर्वाणि वनानि पुष्पैः सहानुगच्छन्तीत्यर्थः ॥ २६ ॥ गोलभस्य गोलभाख्यस्य । उपशाम्यति उपाशाम्यत् । भूते लट् । दंष्ट्राकरालवान् करालदंष्ट्रावान् । परनिपातः ॥ २७—२९ ॥ शर्म सुखं । सिंहयुत इति । सिंहस्थानीयो रामः ॥ ३० ॥ व्यसनार्णवे आप्लुता मग्नेति यावत् ॥ ३१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने द्वाविंशः सर्गः ॥ २२ ॥

नाशामत्वतिदूरंतुनिष्फलं । सेवामध्यमभावेनराजवह्निगुरुस्त्रियाम्' इतिन्यायेनमध्यममार्गमवलंबस्वेत्याशयः ॥ २२ ॥ स० षोडशमे असंख्यादेरिति नञानिर्दिष्टत्वेनानित्यत्वाद्वा संख्यापूरकमप्रत्ययाङ्गीकाराद्वाऽयंशब्दःसाधुः ॥ २८ ॥ रामानु० दंष्ट्राकरालवान् । भावप्रधानोनिर्देशः । दंष्ट्राभ्यांकरालवान् ॥ ति० दंष्ट्राकरालवान् आर्षःस्वार्थेमतुप् । दंष्ट्राकरालइत्यर्थः । अस्माकंसर्वाभयंकरः सर्वेभ्योऽभयंकरः ॥ २९ ॥ स० आवने सम्यग्रक्षके । नन्द्यादित्वाल्ल्युः । वालिनि हतेसति अचराः जडप्रायास्सन्तः । शर्म नलेभिरे । द्वितीयवनेचरशब्दोवानरपरः । गवांपतौ गोपाले । अलुक्समासत्वाद्वापतिरित्याख्यातइत्यादिरीत्यावासाधुरयं शब्दः ॥ ३० ॥ इतिद्वाविंशःसर्गः ॥ २२ ॥

[पा०] १ ङ.—ट. प्लवगसत्तमाः. २ क. ख. ग. शून्येयंस्वर्गते. ङ.—ट. शून्याचस्वर्गते. ३ ङ.—ट. वानरेश्वरे. ४ ख. वानरानिष्प्रभाःकृताः. ५ छ.—ट. ततःषोडशमे. ६ क.—ट. तंहत्वा. ७ छ. झ. ट. वनेचरास्तत्र. ८ क. ख. भर्तुर्व्यसनंसमाश्रिता. ग. च. ज. भर्तुर्वदनंसमाश्रिता. घ. भर्तुर्व्यसनंसमीक्ष्यसा.

त्रयोविंशः सर्गः ॥ २३ ॥

वालिवदनाघ्राणपूर्वकं विविधं विलपन्त्यां तारायां तदङ्गालिङ्गनाक्षमायां नीलेन वालिहृदयाद्रामबाणोन्मूलनं ॥ १ ॥ अङ्गदेन ताराप्रेरणया वालिचरणयोश्चरमप्रणामः ॥ २ ॥

ततः समुपजिघ्रन्ती कपिराजस्य तन्मुखम् ॥ पतिं लोकाच्च्युतं तारा मृतं वचनमब्रवीत् ॥ १ ॥
शेषे त्वं विषमे दुःखमकृत्वा वचनं मम ॥ उपलोपचिते वीर सुदुःखे वसुधातले ॥ २ ॥
मत्तः प्रियतरा नूनं वानरेन्द्र मही तव ॥ शेषे हि तां परिष्वज्य मां च न प्रतिभाषसे ॥ ३ ॥
सुग्रीवस्य वशं प्राप्तो विधिरेष भवत्यहो ॥ सुग्रीव एव विक्रान्तो वीर साहसिकप्रिय ॥ ४ ॥
ऋक्षवानरमुख्यास्त्वां बलिनः पर्युपासते ॥ एषां विलपितं कृच्छ्रमङ्गदस्य च शोचतः ॥
मम चेमां गिरं श्रुत्वा किं त्वं न प्रतिबुध्यसे ॥ ५ ॥
इदं तद्वीरशयनं यत्र शेषे हतो युधि ॥ शायिता निहता यत्र त्वयैव रिपवः पुरा ॥ ६ ॥
विशुद्धसत्त्वाभिजन प्रिययुद्ध मम प्रिय ॥ मामनाथां विहायैकां गतस्त्वमसि मानद ॥ ७ ॥
शूराय न प्रदातव्या कन्या खलु विपश्चिता ॥ शूरभार्यां हतां पश्य सद्यो मां विधवां कृताम् ॥ ८ ॥
अवमग्नश्च मे मानो भग्ना मे शाश्वती गतिः ॥ अगाधे च निमग्नाऽस्मि विपुले शोकसागरे ॥ ९ ॥
अश्मसारमयं नूनमिदं मे हृदयं दृढम् ॥ भर्तारं निहतं दृष्ट्वा यन्नाद्य शतधा गतम् ॥ १० ॥
सुहृच्चैव हि भर्ता च प्रकृत्या मम च प्रियः ॥ आहवे च पराक्रान्तः शूरः पञ्चत्वमागतः ॥ ११ ॥
पतिहीना तु या नारी कामं भवतु पुत्रिणी ॥ धनधान्यैः सुपूर्णापि विधवेत्युच्यते जनैः ॥ १२ ॥

अथ मरणानन्तरं ताराविलापस्त्रयोविंशे—ततः समुपजिघ्रन्तीत्यादि ॥ लोकाच्च्युतं अस्माल्लोकाच्च्युतं स्वर्गतमित्यर्थः ॥ १ ॥ दुःखमित्येतत्क्रियाविशेषणं । सुदुःखे सुतरां दुःखकरे ॥ २—३ ॥ त्वं सुग्रीवस्य त्वत्तो बहुशः कान्दिशीकस्य । वशं प्राप्तः । सुग्रीव एव विक्रान्त इत्येषः । विधिः दैवव्यापारः । अहो आश्चर्यकरो भवति ॥ ४ ॥ कृच्छ्रं दुःखं ॥ ५ ॥ युधि हतो यत्र शेषे पुरा त्वया निहता रिपवो यत्र शायिताः तदिदं वीरशयनमित्यन्वयः । युद्धपरायणस्य तवयुद्धेनैव मरणं प्राप्तं खल्विति भावः ॥ ६ ॥ विशुद्धसत्त्वाभिजनेति कूटयुद्धाभावाद्विशुद्धबल । सत्कुलप्रसूतत्वाद्विशुद्धकुल ॥ ७ ॥ अप्रदातव्यत्वे हेतुमाह—शूरभार्यामिति ॥ ८ ॥ गतिः पतिशुश्रूषेत्यर्थः । यद्वा गम्यत इति गतिः सुखमित्यर्थः ॥ ९ ॥ अश्मसारमयत्वे हेतुः—दृढमिति ॥ १० ॥ हृदयभेदने हेतुमाह—सुहृदिति ॥ पञ्चत्वं मरणं ॥ ११—१२ ॥

स० लोकात् देहात् च्युतं । लोकश्रुतेतिपाठे श्रुता प्रसिद्धेत्यर्थः ॥ १ ॥ वि० उपलैः पाषाणैः । उपचिते व्याप्ते । सुदुःखे सुतरांदुःखकरे ॥ २ ॥ ति० एषविधिः रामरूपः । सुग्रीवस्यवशंप्राप्तोभवति । अहोइत्याश्चर्ये । नतुत्वद्वशंप्राप्तः । येनाद्यैवभार्ययायोजितस्स्यादितिभावः । अतःसुग्रीवएवविक्रान्तोत्रराज्येभवितेतिशेषः । साहसिकं साहसकर्म ॥ शि० हेसाहसिकप्रिय यस्सुग्रीवः विक्रान्तः त्वयाबहुवारंपराभूतः तस्यसुग्रीवस्यवशंत्वंप्राप्तः । अतःएषः वशप्रापकरामरूपः । विधिः अहोआश्चर्यंभवति ॥४॥ ति० मानः राजपत्नीत्वाभिमानः । शाश्वती स्थिरा । गतिः सुखप्राप्तिः ॥ ९ ॥ ति० प्रहारे रणे । पराक्रान्तः परेणाक्रान्तोऽभिभूतः । पञ्चत्वमागतः । एतद्दृष्ट्वापियद्धृदयंनभिन्नंअतोदृढमितिपूर्वेणान्वयः ॥ ११ ॥ ति० ननुसपुत्रायाःकस्तेशोकःअतआह—

[पा०] १ छ. झ. ट. लोकश्रुता. ग. ङ. च. ञ. लोकच्युतं. २ ग. नित्यं. ३ क. ग. ट. भवत्यसौ. ४ ख. वीर. ५ क.—घ. छ. झ. ञ. ट. बलिनं. ६ ङ.—ट. तेषां. ७ क. प्रलापितं. ८ ट. च. ञ. चैतागिरः. छ. झ. ट. चेमागिरः. ९ क. ग. किंचनप्रति. घ. किंचिन्नप्रति. १० क. ग. घ. तच्छूरशयनं. ११ क. ग. ङ.—ट. कृतं. १२ क. ग. ज. झ. ट. सुहृच्चैवच. १३ क. ग. भर्ताहि. १४ क. च.—ट. प्रकृत्याचमम. १५ च. ज. प्रहारेचपरिक्रान्तः. छ. झ. ञ. ट. प्रहारेचपरा. १६ च.—ट. धनधान्यसमृद्धापि.

स्वगात्रप्रभवे वीर शेषे रुधिरमण्डले ॥ कृमिरागपरिस्तोमे त्वमात्मशयने यथा ॥ १३ ॥
रेणुशोणितसंवीतं गात्रं तव समन्ततः ॥ परिरब्धुं न शक्नोमि भुजाभ्यां प्लवगर्षभ ॥ १४ ॥
कृतकृत्योद्य सुग्रीवो वैरेऽस्मिन्नतिदारुणे ॥ यस्य रामविमुक्तेन हृतमेकेषुणा भयम् ॥ १५ ॥
शरेण हृदि लग्नेन गात्रसंस्पर्शने तव ॥ वार्यामि त्वां निरीक्षन्ती त्वयि पञ्चत्वमागते ॥ १६ ॥
उद्बबर्ह शरं नीलस्तस्य गात्रगतं तदा ॥ गिरिगह्वरसंलीनं दीप्तमाशीविषं यथा ॥ १७ ॥
तस्य निष्कृष्यमाणस्य बाणस्य च बभौ द्युतिः ॥ अस्तमस्तकसंरुद्धो रश्मिर्दिनकरादिव ॥ १८ ॥
पेतुः क्षतजधारास्तु व्रणेभ्यस्तस्य सर्वशः ॥ ताम्रगैरिकसंपृक्ता धारा इव धराधरात् ॥ १९ ॥
अवकीर्णं विमार्जन्ती भर्तारं रणरेणुना ॥ आस्रैर्नयनजैः शूरं सिषेचास्त्रसमाहतम् ॥ २० ॥
रुधिरोक्षितसर्वाङ्गं दृष्ट्वा विनिहतं पतिम् ॥ उवाच तारा पिङ्गाक्षं पुत्रमङ्गदमङ्गना ॥ २१ ॥
अवस्थां पश्चिमां पश्य पितुः पुत्र सुदारुणाम् ॥ संप्रसक्तस्य वैरस्य गतोन्तः पापकर्मणा ॥ २२ ॥
बालसूर्योदयतनुं प्रयान्तं यमसादनम् ॥ अभिवादय राजानं पितरं पुत्र मानदम् ॥ २३ ॥
एवमुक्तः समुत्थाय जग्राह चरणौ पितुः ॥ भुजाभ्यां पीनवृत्ताभ्यामङ्गदोऽहमिति ब्रुवन् ॥ २४ ॥
अभिवादयमानं त्वामङ्गदं त्वं यथा पुरा ॥ दीर्घायुर्भव पुत्रेति किमर्थं नाभिभाषसे ॥ २५ ॥
अहं पुत्रसहाया त्वामुपासे गतचेतसम् ॥ सिंहेन निहतं सद्यो गौः सवत्सेव गोवृषम् ॥ २६ ॥
इष्ट्वा संग्रामयज्ञेन रामप्रहरणांभसि ॥ अस्मिन्नवभृथे स्नातः कथं पत्न्या मया विना ॥ २७ ॥
या दत्ता देवराजेन तव तुष्टेन संयुगे ॥ शातकुम्भमयीं मालां तां ते पश्यामि नेह किम् ॥ २८ ॥
राजश्रीर्न जहाति त्वां गतासुमपि मानद ॥ सूर्यस्यावर्तमानस्य शैलराजमिव प्रभा ॥ २९ ॥
न मे वचः पथ्यमिदं त्वया कृतं न चास्मि शक्ता विनिवारणे तव ॥

कृमेः इन्द्रगोपस्य राग इव रागो यस्मिन् स कृमिरागः परिस्तोमः आस्तरणं यस्मिन् स तथा ॥ १३—१५ ॥ वार्यामि वारितास्मीत्यर्थः ॥ १६ ॥ उद्बबर्ह उद्धृतवान्। नीलः सुग्रीवसेनापतिः ॥ १७ ॥ निष्कृष्यमाणस्य तस्य द्युतिः अस्तमस्तकसंरुद्धः अस्ताद्रिशिखरनिरुद्धः । दिनकरादुद्गच्छन् रश्मिरिव बभौ । पूर्वश्लोकोक्तसर्पसाम्यापेक्षया चशब्दः ॥ १८ ॥ व्रणेभ्यः इति बहुवचनं पाशाधिकरणन्यायेनावयवबहुत्वात् । यद्वा शिलापादपप्रहारकृतव्रणानि एतावत्पर्यन्तं शोणितनिर्गमशून्यतयास्थितानि इदानीं शरव्रणाच्छोणितनिर्गमकाले सर्वेभ्योपि शोणितानि सुस्रुवुरित्यर्थः । इदानीं रुधिरनिर्गमादेतावत्पर्यन्तं सर्वात्मना प्राणो न गत इतिगम्यते ॥ १९—२१ ॥ पापकर्मणा पापरूपकर्मणा । संप्रसक्तस्येति संबन्धः ॥ २२—२४ ॥ त्वामभिवादयमानमित्यन्वयः ॥ २५—२६ ॥ रामप्रहरणांभस्येवावभृथ इतिव्यस्तरूपकं ॥ २७—२८ ॥ शैलराजं मेरुं । आवर्तमानस्य अस्तं गच्छत इत्यर्थः ॥ २९ ॥ पथ्यं हितं वचः । न

पतिहीनेत्यादि ॥ १२ ॥ ति० कृमिरागः लाक्षारागः । 'कृमिरागंवदन्त्यार्यालाक्षिकंप्रियदर्शनं' इत्युत्पलमालाकोशादित्यन्ये ॥ १३ ॥ ति० मालामिहनपश्यामि किंतु सुग्रीवायमालादानस्यादर्शनं शोकवशाद्दृष्टस्यापिविस्मरणंचेत्येवमुक्तिः ॥ २८ ॥ वि० पथ्यमिदंवचइतिस्मृतिसंनिहितस्यप्रागुपदिष्टस्यपरामर्शः ॥ ३० ॥ इतित्रयोविंशःसर्गः ॥ २३ ॥

[पा०] १ क. ग. त्वंपुराशयने. ख. छ. झ. ट. स्वकीयेशयने. घ. च. त्वमेवशयने. ङ. ञ. स्वएवशयने. २ क. ख. ग. निरीक्षन्ती. ३ घ. माशीविषोपमं. ४ ग. सर्वतः. ५ बालसूर्योज्ज्वलतनुं ६ घ. छ. झ. ट. गतचेतनं. ७ छ. झ. ट. पातितं. ८ घ. रामबाणमहांभसि. ख. छ. झ. ञ. ट. रामप्रहरणांभसा. क. ग. ङ. च. ज. नानाप्रहरणांभसा. ९ क. ख. छ. झ. ट. [illegible] १० क. ख. ग. ङ. च. छ. झ. ट. शातकौम्भींप्रियां. ११ क. तांतु. १२ ग. छ. झ. ट. शक्ताहि निवारणे. ख. शक्तापिनिवारणे.

हता सपुत्राऽस्मि हतेन संयुगे सह त्वया श्रीर्विजहाति मामिह ॥ ३० ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे त्रयोविंशः सर्गः ॥ २३ ॥

चतुर्विंशः सर्गः ॥ २४ ॥

ताराविलापश्रवणसमुद्बुद्धदुःखान्निर्वेदमुपगतवति सुग्रीवे रामंप्रति वालिश्लाघनात्मनिन्दनपूर्वकमङ्गदादिभिः सीतान्वेषणनिवेदनेन स्वस्याग्निप्रवेशाभ्यनुज्ञानमर्थयति रामेणापिशोकान्मुहूर्तं विमनीभवनं ॥१॥ रामसमीपमेत्य भक्त्या तत्स्तवनपूर्वकं जीवितत्यागोन्मुखींतारांप्रति रामेणाङ्गदाभ्युदयाद्युपपादनेनसमाश्वासनं ॥ २ ॥

तां चाश्रुवेगेन दुरासदेन त्वभिप्लुतां शोकमहार्णवेन ॥
पश्यंस्तदा वाल्यनुजस्तरस्वी भ्रातुर्वधेनाप्रतिमेन तेपे ॥ १ ॥
स बाष्पपूर्णेन मुखेन वीक्ष्य क्षणेन निर्विण्णमना मनस्वी ॥
जगाम रामस्य शनैः समीपं भृत्यैर्वृतः संपरिदूयमानः ॥ २ ॥
स तं समासाद्य गृहीतचापमुदात्तमाशीविषतुल्यबाणम् ॥
यशस्विनं लक्षणलक्षिताङ्गमवस्थितं राघवमित्युवाच ॥ ३ ॥
यथाप्रतिज्ञातमिदं नरेन्द्र कृतं त्वया दृष्टफलं च कर्म ॥
ममाद्य भोगेषु नरेन्द्रपुत्र मनो निवृत्तं सह जीवितेन ॥ ४ ॥
अस्यां महिष्यां तु भृशं रुदन्त्यां पुरे च विक्रोशति दुःखतप्ते ॥
हतेऽग्रजे संशयितेऽङ्गदे च न राम राज्ये रमते मनो मे ॥ ५ ॥
क्रोधादमर्षादतिविप्रधर्षाद्भ्रातुर्वधो मेऽनुमतः पुरस्तात् ॥
हते त्विदानीं हरियूथपेस्मिन्सुतीव्रमिक्ष्वाकुकुमार तप्स्ये ॥ ६ ॥

कृतं नानुष्ठितं ॥ ३० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने त्रयोविंशः सर्गः ॥ २३ ॥

अथ ताराप्रलापश्रवणदुःखितसुग्रीवनिर्वेदप्रदर्शनपूर्वकं ताराया रामे प्रतिपत्तिं दर्शयति चतुर्विंशे—तामित्यादि ॥ अश्रुवेगेनच दुरासदेन दुष्प्रापेण । शोकमहार्णवेनच । अभिप्लुतां व्याप्तां । तां तारां पश्यन् तेन भ्रातुर्वधेन च । तेपे दुःखितोभूत् ॥ १ ॥ मुखेन उपलक्षितः सः । वीक्ष्य तारामितिशेषः ॥ २ ॥ उदात्तं श्रेष्ठं । क्षणेन सुलक्षणेन लक्षिताङ्गं ॥ ३ ॥ यथाप्रतिज्ञातं प्रतिज्ञातमनतिक्रम्य । दृष्टफलं दृष्टराज्यफलकं । कर्म त्वया कृतं । जीवितेन सह स्थितेषुभोगेषु जीवितेभोगेषु च । मनो निवृत्तमित्यर्थः ॥ ४ ॥ पुरे पुरस्थजने । संशयिते पितृमरणदुःखेन जीवति वा न वेति संशयविषयीभूतेसति । राज्ये मनः न रमते रतिं न प्राप्नोति ॥ ५ ॥ क्रोधात् निर्निमित्तनिर्वासनकृतात् । अमर्षात् परुषभाषणाक्षमया । अतिविप्रधर्षात् अत्य-

वि० अप्रतिमेन असदृशेन । आत्मनइतिशेषः ॥ १ ॥ टी० इदं वालिवधरूपंकर्म । यथाप्रतिज्ञातं तथैवकृतं । तर्हितथैवराज्यमनुभूयतामित्याशङ्क्याह—ममाद्येति ॥ ४ ॥ टी० तर्हिवालिवधप्रयत्नःकिमर्थंकृतइत्याह—क्रोधादिति । पुरस्तात् आदौ-अतिविप्रधर्षात् अत्यन्ततिरस्कारात् । तन्निमित्तादमर्षादसहनात् तदुत्पन्नात्क्रोधात्मनःप्रज्वलनात् भ्रातुर्वधोमेऽनुमतइत्यन्वयः ।

[पा०] १ छ. झ. मामपि. २ ख. ञ. ट. तामश्रुवेगेन. छ. झ. तामाशुवेगेन. ३ छ. झ. ट. पश्यन्क्षणेन. ४ ङ. संपरिदृश्यमानः. ५ च. ज. चापंतदातमाशीविष. ६ च.—झ. ट. नरेन्द्रसूनो. ७ छ. झ. ट. हतजीवितेन. ८ छ. झ. ट. हतेनृपे. ९ ख. हरिपुङ्गवेस्मिन्. १० ग. छ. झ. ट. सुतीक्ष्णं. ११ झ. ट. मिक्ष्वाकुवराव.

CENTRAL ARCHAEOLOGICAL LIBRARY New Delhi

श्रेयोऽद्य मन्ये मम शैलमुख्ये तस्मिन्निवासश्चिरमृश्यमूके ॥
यथातथा वर्तयतः स्ववृत्त्या नेमं निहत्य त्रिदिवस्य लाभः ॥ ७ ॥
न त्वां जिघांसामि चरेति यन्मामयं महात्मा मतिमानुवाच ॥
तस्यैव तद्राम वचोनुरूपमिदं पुनः कर्म च मेऽनुरूपम् ॥ ८ ॥
भ्राता कथं नाम महागुणस्य भ्रातुर्वधं राघव रोचयेत ॥
राज्यस्य दुःखस्य च वीर सारं न चिन्तयन्कामपुरस्कृतः सन् ॥ ९ ॥
वधो हि मे मतो नासीत्स्वमाहात्म्याव्यतिक्रमात् ॥ ममासीद्बुद्धिदौरात्म्यात्प्राणहारी व्यतिक्रमः ॥१०॥
द्रुमशाखावभग्नोऽहं मुहूर्तं परिनिष्टनन् ॥ सान्त्वयित्वा त्वनेनोक्तो न पुनः कर्तुमर्हसि ॥ ११ ॥
भ्रातृत्वमार्यभावश्च धर्मश्चानेन रक्षितः ॥ मया क्रोधश्च कामश्च कपित्वं च प्रदर्शितम् ॥ १२ ॥
अचिन्तनीयं परिवर्जनीयमनीप्सनीयं स्वनवेक्षणीयम् ॥
प्राप्तोस्मि पाप्मानमिमं नरेन्द्र भ्रातुर्वधात्त्वाष्ट्रवधादिवेन्द्रः ॥ १३ ॥
पाप्मानमिन्द्रस्य मही जलं च वृक्षाश्च कामं जगृहुः स्त्रियश्च ॥
को नाम पाप्मानमिमं क्षमेत शाखामृगस्य प्रतिपत्तुमिच्छन् ॥ १४ ॥

न्तमाक्रमणाच्च ॥ ६ ॥ यथातथा कथंचित् । स्ववृत्त्या वानरजात्युचितवृत्त्या । तस्मिन् शैलमुख्ये ऋष्यमूके । निवासः श्रेयस्करः । इमं वालिनं निहत्य त्रिदिवस्य स्वर्गस्य लाभोपि न श्रेय इत्यर्थः ॥ ७ ॥ महात्मा महास्वभावः । मतिमान् कर्तव्याकर्तव्यविवेकशीलः । अयं वाली । त्वां न जिघांसामि न मारयितुमिच्छामि । चर यथेष्टं गच्छेति मामुवाचेतियत् तद्वचः तस्यैव अनुरूपं सदृशं तद्बुद्धिशीलतुल्यं । इदं भ्रातृवधरूपं कर्मतु । मे दुरात्मनो दुर्मतेरनुरूपं ॥ ८ ॥ राज्यस्य भ्रातृवधसाध्यस्य । दुःखस्य वधानन्तरभाविदुःखस्य च । सारं उत्कर्षं । नचिन्तयन् उभयोस्तारतम्यमचिन्तयन्नित्यर्थः ॥९॥ महात्मेत्युक्तं विशदयति—वध इति । अस्य वालिनः । स्वमाहात्म्यस्य स्वमहत्त्वस्य अव्यतिक्रमात् अनतिक्रमणात् । मे वधः मन्निधनं । मतो नासीत् । ममतु बुद्धिदौरात्म्यात् बुद्धेर्दुःस्वभावात् । प्राणहारी भ्रातृवधकारी । व्यतिक्रमः अमर्यादा आसीत् ॥ १० ॥ मतो नासीदित्युक्तं विशदयति—द्रुमेति ॥ परिनिष्टनन् आर्तरवं कुर्वन् । नपुनःकर्तुमर्हसि युद्धमिति शेषः । अत्रेतिकरणं द्रष्टव्यं ॥ ११—१२ ॥ अचिन्तनीयं अपरिच्छेद्यमित्यर्थः । परिवर्जनीयं साधुभिस्त्यक्तव्यं । अनीप्सनीयं अनभिलषणीयं । कदाचिदपि इच्छाया अयोग्यमित्यर्थः । स्वनवेक्षणीयं सुतरामदर्शनीयं । जुगुप्सितमित्यर्थः । त्वष्टुःपुत्रः त्वाष्ट्रः विश्वरूपः । तं हत्वा इन्द्रो महान्तं पाप्मानमगमदिति कथा ॥ १३ ॥ इन्द्रस्य परमैश्वर्यसंपन्नस्य । पाप्मानं मह्यादयः ऊषरफेननिर्यासऋतुरूपेण जगृहुः । खातपूरणादिवरप्रदत्वात् । मम तु शाखामृगस्य कस्याप्यनुपकारस्य । पाप्मानं प्रतिपत्तुं किंचिद्वरं प्राप्तुमिच्छन् को नाम क्षमेत । ग्रहीतुमितिशेषः । यद्यपि विश्वरूपाख्यायिकायां त्वाष्ट्रशिरस्त्रयच्छेदकृत-

---

इदानींतुसुतीव्रं अत्यन्तंतप्स्ये । वैरस्यमरणान्तत्वादितिभावः ॥ स० अतिविप्रधर्षात् भार्यायाः ॥ ६ ॥ टी० वालिनंप्रशंसन्नात्माननिन्दति—नत्वामिति ॥ ८ ॥ ति० मांहन्तुंतस्यमतिर्नासीदित्यर्थः । तत्रहेतुःस्वमाहात्म्यव्यतिक्रमात् अनुचितकर्मकारीवालीत्ययशःप्रसङ्गभयात् ॥ १० ॥ स० अचिन्तनीयमनीप्सनीयमनवेक्षणीयमित्यभ्यासोभ्रातृवधस्याकार्यत्वेतात्पर्यद्योतकः । जहिहिजहाहीत्यादिवत् । इदंपाप्मानमितितु इदमधिकमित्यत्रेवव्याख्येयं ॥ १३ ॥ ती० प्रतिहर्तुं परिहर्तुं । कोवाइच्छेत् कोवा सहेतेतिसंबन्धः ॥ स० पुराणान्तरेवह्निप्रथमज्वालादिरूपेणविभागस्तु कल्पान्तरविवक्षयेतिबोध्यं । " भूम्यंबुद्रुमयोषिद्भ्यः "

[पा०] १ च. छ. झ. ञ. ट. वचःकर्मच. क. पुनःकर्मतु. २ ङ.—ट. रामविरोचयेत. ३ ख. छ. झ. ट. विचिन्तयन्. ङ. च. ञ. नाचिन्तयन्. ४ झ. ट. पुरस्कृतोपि. ५ ग. ङ.—ट. स्वमाहात्म्यव्यतिक्रमात्. ६ क. ग. बुद्धिसंमोहात्. ७ ज. सान्त्वयित्वेतियेनोक्तो. ८ च. झ. धर्माश्चानेनरक्षिताः. ९ छ. ज. झ. मिदंवयस्य. क. ट. मिमंवयस्य. ग. महंवयस्य. १० च.—ट. सहेत. ११ च. प्रतिहर्तुं. १२ क. ग. ङ.—ट. मिच्छेत्.

नार्हामि संमानमिमं प्रजानां न यौवराज्यं कुत एव राज्यम् ॥
अधर्मयुक्तं कुलनाशयुक्तमेवंविधं राघव कर्म कृत्वा ॥ १५ ॥
पापस्य कर्ताऽस्मि विगर्हितस्य क्षुद्रस्य लोकापकृतस्य चैव ॥
शोको महान्मामभिवर्ततेऽयं वृष्टेर्यथा निम्नमिवाम्बुवेगः ॥ १६ ॥
सोदर्यघातापरगात्रवालः संतापहस्ताक्षिशिरोविषाणः ॥
एनोमयो मामभिहन्ति हस्ती दृप्तो नदीकूलमिव प्रवृद्धः ॥ १७ ॥
अंहो बतेदं नृवराविषह्य निवर्तते मे हृदि साधुवृत्तम् ॥
विवर्णमग्नौ परितप्यमानं किट्टं यथा राघव जातरूपम् ॥ १८ ॥
महाबलानां हरियूथपानामिदं कुलं राघव मन्निमित्तम् ॥
अस्याङ्गदस्यापि च शोकतापादर्धस्थितप्राणमितीव मन्ये ॥ १९ ॥

ब्रह्महत्यात्रितयं पृथिवीवनस्पतिस्त्रिय एव जगृहुरित्युक्तं । तथापि शाखान्तरानुरोधेन जलेनापि कश्चिदंशोगृहीत इत्यवगन्तव्यं ॥ १४ ॥ कुलनाशयुक्तं कुलनाशफलकं । वालिविनाशेनाङ्गदादेरजीवनादिति भावः । एवंविधं भ्रातृवधरूपं कर्म कृत्वा । प्रजानां संमानं प्रजाकर्तृकराजसंमानं नार्हामि । अतएव यौवराज्यमेव नार्हामि । कुतो महाराज्यमितिभावः ॥ १५ ॥ क्षुद्रस्य दुष्टस्य । विगर्हितस्य विशेषेण शिष्टैर्निन्दितस्य । लोकापकृतस्य सर्वलोकैस्त्यक्तस्य । पापस्य कर्तास्मि । एतादृशपापस्योत्तरपापहेतुत्वज्ञापनाय तृच्प्रत्ययः । वृष्टेरुत्पन्नोम्बुवेगो यथा तादृशशोको मां निम्नमिवाभिवर्तते । उभयत्राप्युपमावाचकप्रयोगो महाकविनिबन्धनेष्वस्त्येव ॥ १६ ॥ सोदर्यस्य भ्रातुः घात एवापरगात्रवालौ अपरकायपुच्छौ यस्य स तथा । संताप एव हस्तादीनि यस्य स तथा । वधादपि संतापस्य प्राधान्यादूर्ध्वकायत्वरूपणं । वधप्रकारवैविध्यात्संतापवैविध्याच्च नानावयवत्वेन रूपणं । एनोमय इतिस्वार्थे मयट् । पापमेव हस्ती । एनसो दृप्तत्वमुत्कटत्वं । तस्य प्रवृद्धत्वं महत्त्वं गजस्योन्नतत्वं ॥ १७ ॥ हे नृवर राघव । मे हृदि इदं साधुवृत्तं अंहः स्वेन सहवर्तमानं पापं अविषह्य असोढ्वा । निवर्तते निर्गच्छति । कथमिव । विवर्णं जातरूपं अग्नौ परितप्यमानं सत् किट्टं यथा ऋजीषांशमविषह्य निवर्तते । किट्टाद्वियुज्यत इत्यर्थः । बतेति विषादे ॥ १८ ॥ अपिचेति समुच्चयः पूर्वश्लोकोक्तदोषापेक्षया । मन्निमित्तं मत्तो निमित्तात् । अस्याङ्गदस्य शोकतापात् महाबलानां हरियूथपानां इदं परिदृश्यमानं कुलं यूथं । अर्धस्थितप्राणमिव भवतीति मन्ये । " सजातीयैः कुलं यूथं

इतिश्रीमद्भागवतोक्तेरत्रोक्तएवैतत्कल्पीयइतिध्येयं ॥ १४ ॥ शि० ननुराज्यप्राप्त्यनन्तरंयागादिनाशुद्धिर्भवितेत्यतआह—नेति । एवंविधं भ्रातृविनाशनंकर्मकृत्वाप्रजानांसंमानंप्रजाकर्तृकसत्कारंनार्हामि । अतएव यौवराज्यंनार्हामि । राज्यंकुतः राज्यप्राप्तेर्नसंभावनेत्यर्थः ॥ १५ ॥ शि० लोकापकृतस्य राजापकृतिद्वारासर्वजनापकारस्य । कर्तास्मि ॥ वि० लोकापकृतस्य परलोकेपरमानर्थसाधनस्यपापस्यकर्तास्मि । अतोमहाञ्शोकःमां इव तथा अभिवर्तते । इवशब्दस्तथाशब्दार्थे ॥ १६ ॥ ति० हेनृवर इदमंहः पापं । बत खेदे । अविषह्यं सोढुमशक्यं । प्राप्यमेहृदिस्थितं । साधुवृत्तं जन्मार्जितपुण्यंनिवर्तते । विवर्णं अतएवाग्नौ परितप्यमानंजातरूपं । अविषह्यं अशक्यसहावस्थानं । प्राप्यकिट्टं मलंयथानिवर्तते तथेत्यर्थः । यथाबलवतोत्तमेनाधमःस्थातुंन शक्नोति तथा बलवताऽधमेनसहोत्तमोपीत्याशयः । एवंचानेनपापेनसर्वपुण्यक्षयोजातइतितात्पर्यं । केचित्तु अग्नौपरितप्यमानंजातरूपं स्वर्णं । यथाविवर्णं विवर्णताकारकं । किट्टं दाहकक्षारद्रव्यं । प्राप्यनिवर्तते भस्मभवति तथेत्यर्थइत्याहुः ॥१८॥ शि० हरियूथपानामिदंकुलं मन्निमित्तं मदभिन्ननिमित्तात् । अङ्गदस्यातीवशोकसंतापाद्धेतोः अर्धस्थितप्राणंमन्ये । यद्वा मन्निमित्तं अहंनिमित्तं यस्मिन् वालिवधजनितदुःखे । तत्प्राप्य अतीव अत्यन्तं । अङ्गदस्यशोकतापात् शोकतापंविहायविद्यमानमिदंकुलं अर्धस्थिताः

[पा०] १ क. ग. ङ. च. ज. संमानमहं. २ ङ. च. ज. झ. लोकेपरिनिन्दितस्य. क.—घ. लोकावमतस्य. ३ छ. झ. ट. लोके. ४ क. ख. घ.—छ. झ. ञ. ट. नृवराविषह्यं. ५ छ. झ. ट. अग्नौविवर्णं. ६ क. ग. शोकभावात्. ७ ख. घ. ट. प्राणमतीव.

सुतः सुलभ्यः सुजनः सुवश्यः कृतः सुपुत्रः सदृशोऽङ्गदेन ॥
न चापि विद्येत स वीर देशो यस्मिन्भवेत्सोदरसंनिकर्षः ॥ २० ॥
यद्यङ्गदो वीरवराई जीवेज्जीवेच्च भ्राता परिपालनार्थम् ॥
विना तु पुत्रं परितापदीना तारा न जीवेदिति निश्चितं मे ॥ २१ ॥
सोहं प्रवेक्ष्याम्यतिदीप्तमग्निं भ्रात्रा च पुत्रेण च सख्यमिच्छन् ॥
इमे विचेष्यन्ति हरिप्रवीराः सीतां निदेशे तव वर्तमानाः ॥ २२ ॥
कृत्स्नं तु ते सेत्स्यति कार्यमेतन्मय्यप्रतीते मनुजेन्द्रपुत्र ॥
कुलस्य हन्तारमजीवनार्हं रामानुजानीहि कृतागसं माम् ॥ २३ ॥
इत्येवमार्तस्य रघुप्रवीरः श्रुत्वा वचो बाल्यनुजस्य तस्य ॥
संजातबाष्पः परवीरहन्ता रामो मुहूर्तं विमना बभूव ॥ २४ ॥
तस्मिन्क्षणेऽभीक्ष्णमवेक्ष्यमाणः क्षितिक्षमावान्भुवनस्य गोप्ता ॥
रामो रुदन्तीं व्यसने निमग्नां समुत्सुकः सोथ ददर्श ताराम् ॥ २५ ॥
तां चारुनेत्रां कपिसिंहनाथं पतिं समाश्लिष्य तदा शयानाम् ॥

तिरश्चां पुन्नपुंसकं " इत्यमरः ॥ १९ ॥ सुजनः सौजन्यवान् । सुवश्यः सुतरां वश्यः स्वाधीनः सुतः । सुलभ्यः लोके सुखेन लब्धुं योग्यः । अङ्गदेन तुल्यः पुत्रस्तु कुतो हेतोः सुलभ्यः । दुर्लभ इत्यर्थः । सोदरसन्निकर्षोपि दुर्लभ इत्याह—न चापीति । संनिकर्षः संनिधानं ॥ २० ॥ अङ्गदो यदि जीवेत्तदा तारापि जीवेत् अन्यथा नेत्याह—यदीति ॥ २१ ॥ अङ्गदमरणं निश्चित्याह—सोहमिति ॥ पुत्रेण अङ्गदेन । " भ्रातृणामेकजातानां यद्येकः पुत्रवान्भवेत् । तेन पुत्रेण ते सर्वे पुत्रिणो मनुरब्रवीत् " । इति स्मृतिः । तन्मरणे मरणं हि स्नेहस्य पराकाष्ठा । निदेशे त्वदाज्ञायां ॥ २२ ॥ अप्रतीते अप्रकाशे मृत इति यावत् । मां विनापि त्वं सर्वं कार्यं कर्तुं क्षम इत्यर्थः ॥ २३ ॥ अथ रामस्याश्रितकार्यमेव स्वकार्यं नतु स्वतःकिंचिदस्ति । अतएव मम शत्रुर्वालीति सुग्रीवेणोक्ते तं निहत्य तस्मिन्नश्रूणि मुक्त्वा शोचतिसति स्वयमपि तथा शोचति स्नेहाद्—इत्येवमिति ॥ यद्वा सर्वेश्वरस्य कुत्रचिद्विषयीकारस्तत्संतानपर्यन्तः घण्टाकर्णमालाकारादिष्विवेत्याह—इत्येवमिति ॥ रघुप्रवीर इत्यनेन स्वस्य वानरेण संबन्धान्तरप्रसक्तिर्नास्तीत्युच्यते । बाल्यनुजस्य आर्तस्य बाल्यनुजे आर्ते सतीत्यर्थः । वचः श्रुत्वा तद्वचनं च श्रुत्वा संजातबाष्पः तदार्तिनिमित्तकार्तिक इत्यर्थः । परवीरहन्ता आश्रितविरोधिनिरसनशीलः । तच्छील्ये तृन् । सुग्रीववचनात्कृतवालिवधत्वेन तच्छोचनादशोचदित्यर्थः । अनेन रामस्य क्रोधशोकावाश्रितक्रोधशोकायत्ताविति व्यमर्थःसूचितः ॥ २४ ॥ तस्मिन्क्षणे तस्मिन्नवसरे । अभीक्ष्णं पुनः पुनः । अवेक्ष्यमाणः तारयेतिशेषः । अनेन तारायाः रामविषयमानुकूल्यमुक्तं । क्षितिक्षमावान् क्षितेर्यादृशी क्षमा तादृशक्षमावान् । क्षमावत्त्वभुवनगोप्तृत्वगुणौ तारया चिन्तितौ कविनोक्तौ । रुदन्तीमित्यादिना तारायाः दयनीयतोक्ता । समुत्सुकः शोकापनयने कृतादरः ॥२५॥ रामागमनमालोक्य मन्त्रिणस्तामुत्था-

प्राणामस्तित्वत् अहंमन्ये ॥ १९ ॥ टीका० पितृवियोगादङ्गदेनश्रेष्ठपुत्रःकथंसुसंपादनीयइत्याह—सुतइति । सुलभ्यःसुतमात्रस्सुलभएवेत्यर्थः । किंतु सुजनःसुवश्यः अङ्गदेनसदृशःपुत्रः कुतः अतिदुर्लभइत्यर्थः । किंचसोदरसङ्गःकुत्रापिनास्तीत्याह—नचेति । स० लोकेसुजनःसुवंश्यःसुतःसुलभ्यः । परंतु अङ्गदेनसदृशःसुपुत्रःकुतः ॥ २० ॥ स० भुवनस्यगोप्ता श्रुत्यनुवाद' । समुत्सुकः समाधानोत्सुकः ॥ २५ ॥ ति० कपिसिंहनाथां कपिसिंहानांस्वामिनीं ॥ स० कपिसिंहेनसुग्रीवेणनाथस्तापोयस्यास्सातां ॥२६॥

[पा०] १ क. ज. सुवंश्यः. २ ख. ग, ङ.—ट. कृतस्सुपुत्रः. ३ च. ज.—ट. अथाङ्गदो. ४ घ.—ञ. ट. सानैवजीवेदिति. ५ ख. घ.—ट. परिवर्तमानाः. ६ क.—ट. वालिजघन्यजस्य. ७ क. ग. घ. च. ञ. ज. ट. सिंहनाथां. ८ क. ग. समालिङ्ग्य.

उत्थापयामासुरदीनसत्त्वां मन्त्रिप्रधानाः कपिवीरपत्नीम् ॥ २६ ॥
सा विस्फुरन्ती परिरभ्यमाणा भर्तुः सकाशादपनीयमाना ॥
ददर्श रामं शरचापपाणिं स्वतेजसा सूर्यमिव ज्वलन्तम् ॥ २७ ॥
सुसंवृतं पार्थिवलक्षणैश्च तं चारुनेत्रं मृगशावनेत्रा ॥
अदृष्टपूर्वं पुरुषप्रधानमयं स काकुत्स्थ इति प्रजज्ञे ॥ २८ ॥
तस्येन्द्रकल्पस्य दुरासदस्य महानुभावस्य समीपमार्या ॥
आर्ताऽतित्वूर्णं व्यसनाभिपन्ना जगाम तारा परिविह्वलन्ती ॥ २९ ॥
सा तं समासाद्य विशुद्धसत्त्वा शोकेन संभ्रान्तशरीरभावा ॥
मनस्विनी वाक्यमुवाच तारा रामं रणोत्कर्षणलब्धलक्षम् ॥ ३० ॥
त्वमप्रमेयश्च दुरासदश्च जितेन्द्रियश्चोत्तमधार्मिकश्च ॥
अक्षय्यकीर्तिश्च विचक्षणश्च क्षितिक्षमावान्क्षतजोपमाक्षः ॥ ३१ ॥

पयामासुरित्याह—तामिति ॥ २६—२७ ॥ पार्थिवलक्षणैः राजलक्षणैः । सुसंवृतं । अन्यूनतया युक्तमित्यर्थः । चारुनेत्रं पुण्डरीकाक्षं । मृगशावनेत्रा "विद्वानेव विजानाति विद्वज्जनपरिश्रमं" इति न्यायेन स्वयं चारुनेत्रतया तत्रैव प्रथमं दृष्टिं न्यधादिति भावः । अदृष्टपूर्वं इतः पूर्वं कुत्राप्यदृष्टचरं । योगं विना अदृष्टमित्यर्थः । पुरुषप्रधानं पुरुषोत्तमं । अयं स इति विजज्ञे । यः पूर्वं भर्तारं हतवान् सोयमिति ज्ञातवती । यद्वा यः पूर्वमङ्गदाच्छ्रुतः । यद्वा यः पूर्वं पुण्डरीकाक्षत्वादिगुणविशिष्टतया महाजनेभ्यः श्रुतः स एवायमित्यर्थः । अतएव वक्ष्यति—त्वमप्रमेयश्चेति ॥ २८ ॥ तस्येति व्यसननिवर्तनक्षमागुणा उच्यन्ते । परिविह्वलन्ती मूर्छन्तीत्यर्थः ॥ २९ ॥ रणे उत्कर्षणेन उत्कर्षेण लब्धं लक्षं शरव्यं यस्य तथा । एकेनशरेण स्वभर्तृहन्तारमित्यर्थः । तं रामं । शोकेन संभ्रान्तः अयथाभूतः शरीरभावः शरीरकृतभावः यस्याः सा कुपितेत्यर्थः । मनस्विनी मन्त्रिप्रधानं यावच्छक्ति परुषाणि वदेयमिति कृताध्यवसाया । समासाद्य विशुद्धसत्त्वा रामसंनिधिमाहात्म्येन निवृत्तकालुष्यतया समुन्मिषितशुद्धसत्त्वा । तारा वाक्यमुवाच । परुषभाषणोद्युक्तयैव वाचा अस्तौषीदित्यर्थः ॥ ३० ॥ एवं पुरुषोत्तमत्वपुण्डरीकाक्षत्वादिभिरनुसंहितं परत्वं ताराऽनुसंधत्ते—त्वमप्रमेयश्चेति । त्वं वक्ष्यमाणकल्याणगुणानुगुणधर्मैर्वैलक्षण्ययुक्तः । अप्रमेयः "वेदाहमि"त्युपक्रम्य "महान्तं क इत्था वेदे" ति वेदैरप्यपरिच्छेद्यः । अप्रमेयः "सो अङ्ग वेद यदि

स० परिरभ्यमाणा इतरस्त्रीभिः ॥ २७ ॥ शि० किंच नदृष्टःपौर्वकालिकदर्शनकर्मीभूतभिन्नःसचासौपूर्वःसर्वेषामादिः ॥ २८ ॥ ति० परिविह्वलन्ती कष्टेनस्खलनपूर्वंगच्छन्ती ॥ शि० इन्द्रकल्पस्य इन्द्रादिनिर्माणेसमर्थस्य ॥ २९ ॥ तनि० विशुद्धसत्त्वा तत्संनिधिमाहात्म्येनसमुन्मिषितसत्त्वा । परुषभाषणोद्युक्तापि सत्त्वनिष्पन्नपरमकारुण्यतयानिवृत्तकोपकलुषासान्त्वमुक्तवती ॥ वी० रणोत्कर्षणलब्धलक्ष्यं रणेउत्कर्षणमुत्कर्षःयेषांतेतयोक्तास्तैः । प्रथमगणनायांवीरशब्दोरितिलक्ष्यत्वेनलब्धमित्यर्थः ॥ शि० संभ्रान्तः विस्मृतशरीरभावःराजलीलादर्यमासा । रणेषु युद्धेषु । उत्कर्षणेनसर्वाधिकोत्कर्षणलब्धंलक्ष्यंवेध्यंयेन सर्वतोधिकवेध्यवेधकइत्यर्थः ॥ स० संभ्रान्तशरीरभावा अपगतशरीराभिमाना ॥ शि० विशुद्धसत्त्वं प्राकृतविलक्षणसत्त्वविशिष्टं ॥ ३० ॥ तनि० त्वमप्रमेयः रावणदुन्दुभिनिग्रहीतारंबालिनंहत्वा अकिंचित्करंबिभेषिस्थितस्त्वं बालिभयप्राप्तगिरिवरस्थसुग्रीवस्यापिजयंदत्तवान् । शापायोद्यतमांस्तोतुंघटयिता । त्वमप्रमेयः । त्वत्स्वरूपमस्मत्स्वरूपंचविचार्यस्तोतुमुद्युक्ताऽहंत्वमप्रमेयःवेदैरप्यपरिच्छेद्योसि । अतोऽहंकथंस्तोतुंशक्नोमि । त्वमप्रमेयः पुरतोविद्यमानोप्यपरिच्छेद्यश्चक्षुषामनसाऽप्रमेयः । ' नचक्षुषागृह्यतेमनसातुविशुद्धेन ' इतिश्रुतेः । त्वमप्रमेयः धनुष्पाणिसुलभस्त्वंशङ्खचक्रगदादिधरोनारायणोसि । त्वमप्रमेयः परत्वमपरिच्छेद्यमितिस्थितं सौलभ्यंचापरिच्छेद्यंजातं । त्वमप्रमेयः एकाकीसमपिपरिकरपरीतइवाप्रधृष्योसि । त्वमप्रमेयः तापसइवस्थितोपिविराधादिदुष्टनिग्रहंकृत्वाशिष्यान्परिपालितवान् ॥ स० क्षितेःक्षमाक्षितिक्षमा । सा वर्तृतासंबन्धेनास्यास्तीतिक्षितिक्षमावान् । अनेनभूम्याअपिक्षमादानंयदा

[पा०] १ क.—घ. च.—ट. कपिराजपत्नीं. २ च.—ञ. समीपात्. ३ क, ग. सांतंशुनेत्रं. ४ क.—ट. व्यसनंप्रपन्ना. ५ क.—ट. तंसा. ६ क. ग.—ट. विशुद्धसत्वं. ७ ग. छ.—ट. लक्ष्यं. ८ छ. झ. ट. धर्मकथ. ९ क.—ट. अक्षीणकीर्तिश्च.

वा न वेद" इति स्वेनापि परिच्छिद्य ज्ञातुमशक्यः । स्वमप्रमेयः प्रत्यक्षगम्योपि मनसा दुर्विभाव्यस्वभावः । स्वमप्रमेयः शरचापधरोपि त्वं शङ्खचक्रधरोसि । स्वमप्रमेयः सौलभ्यदशैव न परिच्छेत्तुं शक्यते । स्वमप्रमेयः परिकररहितोपि प्रतापातिशयेन निरवधिकपरिकरपरिगत इव दुरवगाहोसीत्येकवचनस्यभावः । एवमन्तःकरणेन दुष्प्रापोपि किं बाह्यकरणैः सुप्रापः नेत्याह—दुरासदश्च । मनसापि दुरासदः कथं प्रकारान्तरेण त्वासद इति भावः । दुरासदश्च "महाजनो येन गतः स पन्थाः" इत्युक्तं सन्मार्गं विना पथस्खलितेन दुष्प्राप इत्यर्थः । दुरासदश्च " षदॢ विशरणगत्यवसादनेषु" इति धातुपाठोक्तार्थत्रयमपि तत्रैणोच्यते । नित्यत्वान्न विशरणार्हः । विभुत्वान्न विचालनार्हः । नित्यानन्दत्वान्नावसादमापादयितुं शक्य इत्यर्थः । दुरासदश्च वालिवधकुपितानां प्रतीकाराय सन्निधानमपि गन्तुमशक्य इत्यर्थः । दुरासदश्च बाह्यकुदृष्टिभिरुक्त्याभासैरप्रकम्प्यवैभव इत्यर्थः । एवमप्रमेयत्वदुर्धर्षत्वाभ्यां सुग्रीवोपि परदाररराज्यपरिग्रहलुब्ध इत्याह—जितेन्द्रियश्च । निस्पृहतया सुग्रीवाय दत्तराज्य इत्यर्थः । जितेन्द्रियश्च । यः कोपिपुरुषः कांचिद्योषितमालक्ष्य निर्वर्णयति त्वं तु न तथा । " न रामः परदारान्वै चक्षुर्भ्यामपि पश्यति " इत्युक्तेः । जितेन्द्रियश्च " पश्यत्यचक्षुः स शृणोत्यकर्णः । अपाणिपादो जवनो ग्रहीता"इत्याद्युक्तरीत्या सर्वेन्द्रियैर्विनापि सर्वं सर्वत्र सर्वदा जानन्नित्यर्थः । जितेन्द्रियः " दुर्ग्रहं मनसाऽप्यन्यैरिन्द्रियैरपि दुर्जयैः " इत्युक्तरीत्या बाह्यमनसागोचरः । त्वं जितेन्द्रियः त्वमेव जितेन्द्रियः । सर्वं वाक्यं सावधारणं । अब्भक्षो वायुभक्ष इतिवत् । " अहल्यायै जारः सुरपतिरभूदात्मतनयां प्रजानाथोऽयासीदभजत गुरोरिन्दुरबलां " इत्युक्तरीत्या त्वद्व्यतिरिक्ताः सर्वेपि विषयचपलाः । त्वमेको जितेन्द्रिय इत्यर्थः । एवं विरक्तोप्ययमस्मद्विषया अधार्मिक इति मयाश्वितं । न तथेत्याह—उत्तमधार्मिकश्च । स्वाश्रितसंरक्षणार्थमेवंविधव्यापारकारितया परमधार्मिकः । स्वार्थकर्मकारी अधमधार्मिकः । स्वपरसाधारणकर्मकारी मध्यमधार्मिकः । परार्थमेव प्रवर्तमान उत्तमधार्मिकः । यद्वा वर्णाश्रमाचारसमाराध्यो धार्मिकः । उत्तमधार्मिको भक्तिमार्गभजनीयः । यद्वा उत्तमधार्मिकः शरणागतसंरक्षकः । यद्वा " उपायो गुरुरेवस्यात्तेनानुगृहीतो ब्रह्मलोकं गच्छति " इत्युक्तधर्मवानुत्तमधार्मिकः । यद्वा " आनृशंस्यं परो धर्मः " इत्युक्तधर्मवान् धार्मिकः । स्वाश्रितानामापत्सु स्ववक्षोलक्षीकुर्वन्नुत्तमधार्मिकः । यद्वा आर्तसुग्रीवरक्षणाद्धार्मिकः । अकृत्यकरणेन नारकिणं वालिनं निहत्य तस्य पूतत्वकरणादुत्तमधार्मिकः । प्रच्छन्नवेधितया निरपराधवधेन च कथमस्य धार्मिकत्वमित्याशङ्क्याह—अक्षय्यकीर्तिश्च । आश्रितापराधितया तिर्यक्षु मृगयान्यायेन पराङ्मुखवधस्यादोषत्वात्तिर्यग्भिरामिमुख्येन युद्धकरणस्य सार्वभौमस्यावद्यावहत्वाच्च तव कीर्तिं दूषयितुं शक्येत्यर्थः । अक्षय्यकीर्तिश्च " तस्य नाम महद्यशः " इत्युक्तरीत्या परत्वप्रथायुक्तः । विचक्षणश्च दूरदृष्टितया युक्तायुक्तविचारपूर्वकं सर्वकार्यकृत् । अतएव हि निरपराधवधो मा भूदिति कदाचिद्वालितः पराभवं प्रापितवान् । लक्ष्यवैपरीत्यपरिहाराय गजपुष्पीं धारितवान् । एवं चसंहर्तापि " सपुत्रपौत्रं सामात्यं समस्त्रिज्ञातिबान्धवम् । हत्वा " इत्युक्तरीत्या अक्षुद्रादिष्वकिंचित्करतया प्रशस्तक्षमावानसीत्याह—क्षितिक्षमावान् । स्वाश्रितापराधकारिविषये तव सान्वयविनाशकरणे प्राप्तेपि तत्क्षमणं तवातिश्लाघ्यमित्यर्थः । क्षितिक्षमावान् " क्षमया पृथिवीसमः " इत्युक्तरीत्या पञ्चाशत्कोटिविस्तीर्णायाः पृथिव्या यावती क्षमा तावती तवैकस्यास्तीति भावः । नित्ययोगे मतुप् । तेन कदाचिदप्यस्याक्षमाप्रसङ्गोपि नास्तीतिद्योत्यते । क्षतजोपमाक्षः वालिविषये कोपातिशयेनाद्यापि शोणीकृतनयनोपि तदीयेषु क्षमावान् । यद्वा रक्ताम्बुनेत्रपाणिः त्रिताम्रः इत्यदिसामुद्रिकोक्तरीत्या रक्तान्तनेत्रः । " रामो रक्तान्तलोचनः " इति श्रुतिः । अत्र प्रतिपदं चकारप्रयोगः एकैकएव गुणः परत्वे पर्याप्तं लिङ्गमिति द्योतयितुं । क्षमावानित्यत्र चकाराप्रयोगस्तु रामेण क्षान्ते सर्वैरपि क्षान्तमेव । अतोन्यत्रापि संभवेन निरपेक्षत्वाभावाच्चकाराप्रयोगः । क्षतजोपमाक्ष इत्यत्र तु विग्रहगुणत्वेन भिन्नाधिकरणत्वात्समुच्चयाभावः । क्षतजोपमाक्षेति संबुद्ध्यन्तं वा । यद्वा अप्रमेयः अनाश्रितानां दुर्ज्ञेयः । चकारादाश्रितानां सुप्रमेयः । " नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन । यमेवैष वृणुते

त्वमात्तबाणासनबाणपाणिर्महाबलः संहननोपपन्नः ॥
मनुष्यदेहाभ्युदयं विहाय दिव्येन देहाभ्युदयेन युक्तः ॥ ३२ ॥
येनैकबाणेन हतः प्रियो मे तेनैव मां त्वं जहि सायकेन ॥
हता गमिष्यामि समीपमस्य न मामृते राम रमेत वाली ॥ ३३ ॥
स्वर्गेऽपि पद्मामलपत्रनेत्रः समेत्य संप्रेक्ष्य च मामपश्यन् ॥
न क्षेप उच्चावचताम्रचूडा विचित्रवेषाप्सरसोभजिष्यत् ॥ ३४ ॥
स्वर्गेऽपि शोकं च विवर्णतां च मया विना प्राप्स्यति वीर वाली ॥
रम्ये नगेन्द्रस्य तटावकाशे विदेहकन्यारहितो यथा त्वम् ॥ ३५ ॥
त्वं वेत्थ यावद्वनिताविहीनः प्राप्नोति दुःखं पुरुषः कुमारः ॥
तत्त्वं प्रजानञ्जहि मां न वाली दुःखं ममादर्शनजं भजेत ॥ ३६ ॥
यद्यापि मन्येत भवान्महात्मा स्त्रीघातदोषो न भवेत्तु मह्यम् ॥
आत्मेयमस्येति च मां जहि त्वं न स्त्रीवधः स्यान्मनुजेन्द्रपुत्र ॥
शास्त्रप्रयोगाद्विविधाच्च वेदादात्मा ह्यनन्यः पुरुषस्य दाराः ॥ ३७ ॥

तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वां" इति श्रुतेः । "नमोनमो वाङ्मनसातिभूमये नमोनमो वाङ्मनसैकभूमये" इत्युक्तेश्च । एवमनाश्रितानां दुरासदो दुष्प्रापः । चकारादाश्रितानां सुलभः । जितेन्द्रियः चकारादाश्रितविषये चपलः । उत्तमधार्मिकः चकाराद्दूरीकृताधर्मः । अक्षय्यकीर्तिः तदनुरूपकृत्यश्चशब्दार्थः । विचक्षणः चकारादाश्रितविषयत्यागाशक्तश्च । "मित्रभावेन संप्राप्तं न त्यजेयं" इत्यशक्तिर्ह्युच्यते । अत्रत्यचकारः देहलीदीपन्यायेनोभयत्रान्वेति । तेन दयादिकं समुच्चीयते ॥ ३१ ॥ त्वमिति अनेनाप्राकृतविग्रहत्वमुच्यते । संहननेन समीचीनावयवसंस्थानेन उपपन्नः युक्तः । मनुष्यदेहाभ्युदयं मानुषशरीरपरिग्रहं । विहाय । दिव्येन देहाभ्युदयेन देहसौभाग्येन युक्तः ॥ ३२ ॥ एवं रामस्य दिव्यतेजोविशेषदर्शनेन विस्मिता क्षणंविस्मृतशोका तद्वैभववर्णयित्वा स्वप्रकृत्यनुसारेण प्रलपति —येनेत्यादिना ॥ ३३ ॥ पद्मामलपत्रनेत्रो वाली स्वर्गेऽपि अप्सरोभिः समेत्य ताः संप्रेक्ष्य च मामपश्यन् उच्चावचताम्रचूडाः विविधताम्रकुसुमैः कृतशेखराः विचित्रवेषाप्सरसः । नाभजिष्यत् न भजिष्यति । लृडर्थे लृङ् ॥ ३४ ॥ नगेन्द्रस्य ऋश्यमूकस्य ॥ ३५ ॥ कुमारः युवा । तत् वनिताविरहदुःखं । प्रजानन् त्वं मां जहि । वाली ममादर्शनजं दुःखं नभजेत ॥ ३६ ॥ यद्यापीत्यादिसार्धश्लोकः ॥ मह्यं

तदाऽस्यतदपेक्षयाऽधिकक्षमास्तीतिकिमुवक्तव्यमितिकैमुत्यंसूचितंभवति ॥ ३१ ॥ तनि० महाबलत्वेहेतुमाह—संहननोपपन्न इति । महावीर्यत्वनिमित्तान्तस्साराभिव्यञ्जकशरीरसंस्थानविशेषइत्यर्थः । अयंचप्राकृतशरीरेष्वनुसंभवतीत्याह—मनुष्येति । महाराजलक्षणशौर्यादिगुणाभिव्यञ्जकमनुष्यशरीरसंस्थानविशेषेष्वपिनैतादृशइतिद्योतयितुमभ्युदयपदप्रयोगः । दिव्येन 'त्रिपादस्यामृतंदिवि' इत्यादिप्रमाणसिद्धाप्राकृतलोकस्थितदिव्यमङ्गलविग्रहसंनिवेशेनेत्यर्थः ॥ स० आत्तबाणासनश्चासौबाणपाणिश्चेतिवा आत्तौबाणासनबाणौयाभ्यांतादृशौपाणीयस्येतिवा । संहननोपपन्नः सिंहस्कन्धःममप्रियोवालीहतस्सन् । मनुष्यदेहाभ्युदयं मनुष्यसदृशमपिराज्यसौभाग्यंविहायदिव्येनविभवेनदेहाभ्युदयेन सौभाग्येनयुक्तः । अथवा दिविभवंदिव्यं देवजातंतत्स्वेनःस्वामीइन्द्रः तस्यदेहाख्याभ्युदयेनयुक्तोभूत् । तेनैवबाणेनमांजहि संहर । इहि गच्छ । मांहत्वागच्छेतिलौकिकवाक्यीतिरियं । जहि इहीतिच्छेदः ॥ ३२ ॥ ति० कुमारः सुन्दरःपुरुषः । यद्वा दुःखहेतुमाह—कुमारइति । कुत्सितोमारोयस्य मारकत्वेनमदनस्यप्रसिद्धेः । अथवाकुत्सितोमारोमरणंयस्य । मरणादपिदुःखजनकत्वादेवमुक्तिः । भावेघञ् ॥ शि० कुमारः नित्यंकुमारत्वेनप्रतीयमानस्त्वं वेत्थ ॥ ३६ ॥ ति० महात्मेत्यनेन ताटकावधादिकृतवत स्त्रीवधोकिंचित्करइत्यपिसूचितं ॥ ३७ ॥

[पा०] १ क.—ट. येनैवबाणेन. २ ङ—ट. तेनैवबाणेनहिमांजहीहि. ३ च.—ङ. मांविनावीरमेत. ४ क. संप्रेक्ष्यतु. ५ ङ.—ट. तावद्वनिता. ६ ङ.—श, स्त्रीघातदोषस्तुभवेन्ममां. ७ छ. सूनो. ८ ङ.—ट. वेदादनन्यरूपाःपुरुषस्य.

दारप्रदानान्न हि दानमन्यत्प्रदृश्यते ज्ञानवतां हि लोके ॥ ३८ ॥
त्वं चापि मां तस्य मम प्रियस्य प्रदास्यसे धर्ममवेक्ष्य वीर ॥
अनेन दानेन न लप्स्यसे त्वमधर्मयोगं मम वीरघातात् ॥ ३९ ॥
आर्तामनाथामपनीयमानामेवंविधामर्हसि मां निहन्तुम् ॥
अहं हि मातङ्गविलासगामिना प्लवङ्गमानामृषभेण धीमता ॥
विना वरार्होत्तमहेममालिना चिरं न शक्ष्यामि नरेन्द्र जीवितुम् ॥ ४० ॥
इत्येवमुक्तस्तु विभुर्महात्मा तारां समाश्वास्य हितं बभाषे ॥ ४१ ॥
मा वीरभार्ये विमतिं कुरुष्व लोको हि सर्वो विहितो विधात्रा ॥
तं चैव सर्वं सुखदुःखयोगं लोकोऽब्रवीत्तेन कृतं विधात्रा ॥ ४२ ॥
त्रयो हि लोका विहितं विधानं नातिक्रमन्ते वशगा हि तस्य ॥
प्रीतिं परां प्राप्स्यसि तां तथैव पुत्रस्तु ते प्राप्स्यति यौवराज्यम् ॥
धात्रा विधानं विहितं तथैव न शूरपत्न्यः परिदेवयन्ति ॥ ४३ ॥
आश्वासिता तेन तु राघवेण प्रभावयुक्तेन परंतपेन ॥

स्त्रीघातदोषोभवेदिति भवान् यन्मन्येत तन्न युक्तं । इयं तारा । अस्य वालिनः । आत्मा इति मत्वा मां जहि । तेन ते स्त्रीवधः स्त्रीवधदोषो नस्यात् । आत्मेत्येतदुपपादयति—शास्त्रेति । "अर्धो वा एषआत्मनः यत्पत्नी, आत्मा हि दाराः" इत्यादिरूपात् विविधात् वेदात् वेदरूपात् शास्त्रप्रयोगादित्यन्वयः । यद्वा वेदात् शास्त्रप्रयोगात् धर्मशास्त्रप्रयोगाच्चेति वार्थः ॥ ३७ ॥ सुकृतमप्यस्तीत्याह—दारेति ॥ ३८ ॥ न केवलं पापनिवृत्तिसुकृते प्रायश्चित्तंचेदमित्याह—त्वंचापीति । वीरघातादित्येतत्सुग्रीवदुःखदुःखितरामहृदयानुसारेणोक्तं । त्वमुत्तमधार्मिकश्चेति पूर्वमुक्तत्वात् ॥ ३९ ॥ अपनीयमानां वालिनावञ्चिताम् ॥ ४०—४१ ॥ हितवचनमेवाह—मावीरेति ॥ विमतिं जीवितुं नशक्ष्यामीत्यादिविरुद्धमतिं । सर्वो लोकः विधात्रा ब्रह्मणा । विहितो निर्मितः । हिः प्रसिद्धौ । तं सुखदुःखयोगंच । विधात्रा कृतमिति लोकः पण्डितः पामरश्चाब्रवीत् ॥ ४२ ॥ वस्तुस्थितिश्च तथेत्याह—त्रय इति ॥ लोकाः लोकस्थजनाः । विहितं विधानं ब्रह्मकल्पितं प्रकारं । नातिक्रमन्ते । हि यस्मात्तस्य वशगाः । तां वालिसंभोगसदृशभोगमिति द्योतयति ॥ ४३ ॥ प्रभावयुक्तेन अङ्गदयौवराज्यप्रदानसमर्थेन । परंतपेन तद्विरोधिनिरसनसमर्थेन । आश्वासिता अतएव ध्वनता शब्दायमानेन मुखेनोपलक्षिता । सुवेषरूपेत्यनेन समाश्वासनकृता-

ति० स्त्रीणांपुरुषात्मत्वमेवसाधयति—शास्त्रेति । शास्त्रेशास्त्रीययागाद्यनुष्ठाने । प्रकर्षेणसहैवयोगात् अधिकारात् । नकेवलं दोषाभावमात्रं अपितुस्त्रीदानफलमपीत्याह—दारेति ॥ ३८ ॥ ति० ममवीरस्यपत्युश्छलेनघातात्प्राप्तमधर्मसंबन्धंनलप्स्यसे । किंच ततएवमच्छापतःप्राप्तमधर्मयोगमधर्मफलयोगंस्त्रीवियोगरूपंनलप्स्यसे । ममावधेतु लप्स्यसएव । अतएवक्वचित्पठ्यते—'अचिरेणैवकालेनत्वयावीर्यबलाहृता । सासीताममशापेननचिरात्त्वयिवत्स्यति' इति ॥ ३९ ॥ शि० अपनीयमानां पत्यालिङ्गनाद्बहिष्कृतां ॥ ४० ॥ ति० विमतिं मरणविषयांविरुद्धमतिं । सर्वोलोकोविधात्राविहित । अहरादौसृष्टः तंलोकं सुखदुःखाभ्यामवर्ज्याभ्यांयोगोस्यतं तेनैवविधात्राकृतं । लोक्यतेऽनेनेतिलोकोवेदः अब्रवीत् । 'नहवैसशरीरस्यसत प्रियाप्रिययोरपहतिरस्ति' इतिश्रुतेः ॥ ४२ ॥ ति० त्रयोपिलोकाः लोकत्रयवासिनोपिजनाः । विधातृविहितंविधानंनातिक्रमन्ते । हियतः तस्यवशगाः ब्रह्मादिस्थावरान्ताः । वालीपरांप्रीतिं त्वत्संबन्धजांप्राप्स्यति मत्सङ्कल्पात् । किंच भवत्यपिवालिसंबन्धजांप्रीतिंसुग्रीवसंबन्धात्प्राप्स्यति । तेपुत्रोयौवराज्यंप्राप्स्यतिच । चेनाहमपिशापंप्राप्स्याम्येवेति ॥ टीका० ममाज्ञाकरणेन फलमस्तीत्याह—प्रीतिमिति । जीवतिवालिनियादृशीप्रीतिस्तादृशीमित्यर्थः ॥ ४३ ॥ इतिचतुर्विंशःसर्गः ॥ २४ ॥

[पा०] १ ग.—ट. प्रदानाद्धिनदानं. २ क. ग. ङ.—ट. मेवंगतांनार्हसिमामहन्तुं. ३ ज. प्रायोहि. छ. झ. ट. त्रयोपि. ४ ख. घ. ज. ञ. विधातुर्नाति. ५ ख.—ठ. पुत्रश्च. ६ क. ग. ङ.—ट. तेनमहात्मनातु.

सा वीरपत्नी ध्वनता मुखेन सुवेषरूपा विरराम तारा ॥ ४४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे चतुर्विंशः सर्गः ॥ २४ ॥

पञ्चविंशः सर्गः ॥ २५ ॥

रामेणसुग्रीवादिसमाश्वासनानन्तरं लक्ष्मणेनसुग्रीवंप्रति वालिसंस्करणावकाशादिसंभारसञ्जीकरणचोदनपूर्वकंतारंप्रति शिबिकानयनचोदना ॥ १ ॥ सुग्रीवेणरामाज्ञयाऽङ्गदेनसह वालिशरीरस्थतारानीतशिबिकारोपणपूर्वकं सर्वैःसहगिरिनदीमेत्य पुलिनेवानरैः शिबिकावतारणपूर्वकंचितानिर्माणम् ॥ २ ॥ वालिशिरस्स्वाङ्कसमारोपणेनबहुधाविलपन्ताराया वानरीभिःसमाश्वासनम् ॥ ३ ॥ अङ्गदेनसुग्रीवेणसह वालिशरीरस्थचितारोपणेन यथाविधिसंस्करणम् ॥ ४ ॥ सुग्रीवेणाङ्गदपुरस्कारेण वानरैःसहवालिनेजलदानपूर्वकं रामसमीपगमनम् ॥ ५ ॥

सुग्रीवं चैव तारां च साङ्गदं सह लक्ष्मणः ॥ समानशोकः काकुत्स्थः सान्त्वयन्निदमब्रवीत् ॥ १ ॥
न शोकपरितापेन श्रेयसा युज्यते मृतः ॥ यदत्रानन्तरं कार्यं तत्समाधातुमर्हथ ॥ २ ॥
लोकवृत्तमनुष्ठेयं कृतं वो बाष्पमोक्षणम् ॥ न कालादुत्तरं किंचित्कर्म शक्यमुपासितुम् ॥ ३ ॥
नियतिः कारणं लोके नियतिः कर्मसाधनम् ॥ नियतिः सर्वभूतानां नियोगेष्विह कारणम् ॥ ४ ॥

न्तरहर्षवत्त्वं सूचितं । स्वलंकारयुक्तशरीरेत्यर्थः ॥४४॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने चतुर्विंशः सर्गः ॥ २४ ॥

अथ रामः सर्वसान्त्वनपूर्वकं वालिनः संस्कारं कारयति पञ्चविंशे—सुग्रीवमित्यादि ॥ साङ्गदमिति सुग्रीवविशेषणं । समानशोकः ताराङ्गदादिभिस्तुल्यशोकः ॥ १ ॥ शोकपरितापेन शोककृतपरितापेन । युष्मदीयेनेतिशेषः । मृतो वाली श्रेयसा नयुज्यते । अत्रवालिनि विषये । अनन्तरं मरणानन्तरं । यत् श्रेयस्करं कार्यं और्ध्वदैहिकरूपं । तत्समाधातुं कर्तुं । अर्हथ ॥ २ ॥ लोकवृत्तं लोकाचारसिद्धं । अतएव सर्वैरनुष्ठेयं बाष्पमोक्षणं । वः युष्माभिः । कृतं । बाष्पमोक्षणादतिरिक्तं किमपि न युष्माभिःकर्तुं शक्यमित्याह—कालादिति ॥ कालादुत्तरं कालं विनेत्यर्थः । किंचित्कर्म उपासितुं कर्तुं । न शक्यं देवाज्ञामुल्लङ्घ्य स्वातन्त्र्येण किंचिदपि कर्मकर्तुं न शक्यमित्यर्थः ॥ ३ ॥ तदेतदुपपादयति—नियतिरिति ॥ नियम्यतेनेनेति नियतिः ईश्वरः । लोकेविषये कारणं सर्वलोककर्तेत्यर्थः । क्रियत इति कर्म कार्यं तस्य साधनं सहकारीत्यर्थः । सर्वभूतानां नियोगेषु प्रेरणेषु । नियतिः कारणं । सर्वप्रवर्तकोपीश्वर इत्यर्थः । "तेन विना तृणाग्रमपि न चलति" इति न्यायात् । ईश्वरपरतन्त्रतया लोकः कर्म करोति न तु स्वात-

रामानु० कालात् विहितात्कालात् । उत्तरं उत्तरस्मिन्काले । "कालाध्वनोरत्यन्तसंयोगे" इतिद्वितीया ॥ स० यद्वा बाष्पमोक्षणं बाष्पाणांपतनंयत्रानभवेत्तत्रयाकरणं भवदभिलषितकरणेनकृतं । मयेतिशेषः । यद्वा अक्षणंसेचनं तदभावोमोक्षणं । बाष्पैर्मोक्षणं मयावःकृतं । करणनिश्चयात्तथाव्यपदेशः । कालादुत्तरं अन्यं । किंचित्कर्मउपासितुंनशक्यं । कर्मउपासितुमित्यत्र "वाक्येतुसाविवक्षामपेक्षते" इत्युक्तेस्तच्यभावः । कर्मशक्यमुपासितुमितिपाठे नकाचिदनुपपत्तिः ॥ ति० लोकवृत्तं लोकाचारोप्यनुष्ठेयएव । तत्रबाष्पमोक्षणरूपंकृत युष्माभिरितिशेषः । यद्वा कृतंपर्याप्तं । बाष्पमोक्षणमितिद्वितीयातृतीयार्थे । यतः कालात् तत्तत्कर्मणेविहितात्कालात् । उत्तरंपरे तस्मिन्नतिक्रान्तेहतियावत् । किंचिदपिपरंकर्म विहितंकर्म । उपासितुं कर्तुं । अशक्यं । कालस्योपादेयकारणत्वात् । अकालेकृतस्याकृतप्रायत्वादितिभावः ॥ ३ ॥ ति० कालस्यमुख्यत्वंदर्शयति—नियतिरिति । नियम्यतेऽनयेतिनियतिः कालः । कालकृतान्यवस्था निमेषादिपरार्धान्ता । कालस्त्वीश्वरएव । लोके लोकस्थाविव्यवहारे । कर्मणोलौकिकवैदिककर्मप्रवृत्तेर्दिनादिरूपेणकारणंकालएव । सर्वभूतानां नियोगाधिकृतप्राणिमात्रस्य । नियोगेषु ज्योतिष्टोमादिषु । नियतिः वसन्तादिःकारणं

[पा०] १ ङ. च. ज. ञ. मुक्तचेष्टा. २ ङ. ञ. किंचित्परंकर्मउपासितुं.

न कर्ता कस्यचित्कश्चिन्नियोगे चापि नेश्वरः ॥ स्वभावे वर्तते लोकस्तस्य कालः परायणम् ॥ ५ ॥
न कालः कालमत्येति न कालः परिहीयते ॥ स्वभावं च समासाद्य न कश्चिदतिवर्तते ॥ ६ ॥
न कालस्यास्ति बन्धुत्वं न हेतुर्न पराक्रमः ॥ न मित्रज्ञातिसंबन्धः कारणं नात्मनो वशः ॥ ७ ॥

क्येणेत्यर्थः ॥ ४ ॥ एवमन्वयमुखेन ईश्वराधीनत्वमुक्त्वा व्यतिरेकमुखेन दर्शयति—न कर्तेति ॥ कश्चित्पुरुषः कस्यचित्कर्मणः न कर्ता न स्वातन्त्र्येण कर्ता । नियोगे कस्यचित्प्रेरणे च । नेश्वरः । किंतु स्वभावे वर्तते स्वभावाधीनो वर्तते लोकः । तत्रहेतुमाह—तस्येति । कालः तस्य परायणं गतिः । अत्र स्वभावनियतिकालादिशब्दैरीश्वरएवाभिधीयते । अन्यथानेकराजत्वापत्तेः । श्वेताश्वतरश्रुतिश्च—" स्वभावमेके कवयो वदन्ति " इत्यादिकैवमाह ॥ ५ ॥ कालः ईश्वरः । कालं आत्मानं । नात्येति नातिक्रामति । सः स्वाधीन एव नतु लोकवत्कस्यचित्परतन्त्रः । " न चास्य कश्चिज्जनिता न चाधिपः " इतिश्रुतेः । न कालः परिहीयते न नश्यति । इदमुपलक्षणं । षट्भावविकाररहित इत्यर्थः । " अपक्षयविनाशाभ्यां परिणामर्द्धिजन्मभिः । वर्जितःशक्यते वक्तुं यः सदास्तीति केवलं " इति ह्युक्तं । स्वस्मिन् भवतीति स्वभाव ईश्वरः । वाशब्दोऽवधारणे । स्वभावमासाद्यैव वर्तते नतु कश्चित्तमतिवर्तते । निरङ्कुशः स्वतन्त्रः । स्वकृतां व्यवस्थां स्वयमपि नातिवर्तते । तत्परतन्त्रोनीशः किमुतेतिभावः ॥ ६ ॥ पुनरपीश्वरस्य स्वातन्त्र्यमुपपादयति—न कालस्येति ॥ कालस्येश्वरस्य । बन्धुत्वं नास्ति पक्षपातो नास्तीत्यर्थः । हेतुश्च नास्ति । वशीकरणोपायश्च नास्ति । तत्प्रसादं विना स्वयत्नेन वशीकर्तुं न शक्यते इत्यर्थः । न पराक्रमः तज्जयहेतुपराक्रमोपिनास्ति । पुरुषपराक्रमस्य स नबिभेतीति भावः । न मित्रज्ञातिसंबन्धः न सुहृत्सगोत्रसंबन्धः । अपराधिषु दण्डधरत्वमुक्तं । " एष सेतुर्विधरण एषां लोकानामसंभेदाय " इति श्रुतेः । अतः कारणमीश्वरः । आत्मनो जीवस्य । न वशः न परतन्त्रः ।

शि० नियम्यते तत्तत्कर्मणिप्रवर्त्यतेऽनयेति । किंच नितरांयतिः ऐहिकभोगान्निवृत्तिर्ययासानियतिः ॥ ४ ॥ ति० कालातिरिक्तेनसाक्षात्प्रवर्तकमित्याह—नकर्तेत्यादि । कस्यचित् कृष्यादेः । कश्चित्कर्तान नियतिनिरपेक्षःकर्तान । तथा नियोगे नियोगानुष्ठानेपि । नियतिनिरपेक्षःकश्चिदीश्वरोन नियतिनैरपेक्ष्येणसमर्थोन । यतोलोकोलोकव्यवहारः स्वभावे ईश्वरसहितेप्राकृतस्वकर्मणि वर्तते तदधीनोवर्तते । तस्यचस्वभावस्य कालःपरायणं सहकारीत्यर्थः । तदुक्तसूतसंहितायांशिववाक्येन " स्वभावादेव संभूतंसमस्तमितिकेचन । तन्नसिध्यतिविप्रेन्द्रादेशकालाद्यपेक्षणात् । मत्तःकर्मादिरूपेणजगज्जन्मादिजायते । एषस्वभावोविप्रेन्द्राइतिवेदार्थनिर्णयः । नमयाकेवलेनापिनचकेवलकर्मणा । प्राणिनांकर्मपाकेनमयाचमुनिसत्तमाः । जगत संभवोनाशःस्थितिश्चभवति द्विजाः " इति ॥ ती० किमनयाकालादृष्टकल्पनया प्राणिनएवान्योन्यंकर्तारःकारयितारश्चभवन्तीत्यतआह—नकर्तेति । स० कश्चित् जीवादिः । नेश्वरः नसमर्थः । स्वः स्वतन्त्रोविष्णुः । तल्लक्षणेभावेपदार्थेसर्वोलोकोवर्तते । तस्य लोकस्य । कालः परायणं पराश्रयः ॥ ५ ॥ ती० कालः महाकालः । कालं प्राणिनांसुखदुःखप्रापकत्वेनदिवसपक्षमासत्वादिरूपमौपाधिकंकालं । नात्येति नातिक्रामति । यस्मिन्कालेजन्तुनासुखंदुःखंवाभोक्तव्यं तमतिक्रम्यकालान्तरेणभोजयितुनसमर्थइत्यर्थः । नकालःपरिहीयते नन्यूनतांप्राप्नोति । स्वभावंकालंसमासाद्य कश्चिन्नातिवर्तते । वाशब्दोऽवधारणे । निरङ्कुशस्वतन्त्रःकालःस्वकृतांव्यवस्थांस्वयमपिनातिक्रामति । तत्परतन्त्रोऽन्यःकिमुतेतिभावः ॥ ति० कालात्माभगवानेवसर्वकर्मप्रवर्तकइत्याह—नकालइति । कालः भगवानीश्वरः । कालं स्वकृतांकालव्यवस्थां जन्ममरणादिरूपां । नात्येति नातिक्रामति । सभगवान्कालोनपरिहीयते । अनुक्षणं जगद्धानिकरस्यहानिकारणाभावात् । स्वभावं उक्तलक्षणंसमासाद्य किंचिदत्युत्कृष्टमपिजीवजातंनातिवर्तते उत्पत्तियोग्यमुत्पद्यते नश्वरंनश्यत्येवेत्यर्थः ॥ स० कालः प्रसिद्धःकालः । कालं कालनियामकं तच्छब्दवाच्यंभगवन्तं । नात्येति । कालः प्रसिद्धः । नपरिहीयते नत्यज्यते । भगवतेतिशेषः । तत्रदृष्टान्तःस्वभावंवेति । कश्चित्पुमान् भगवन्तंवायथानातिवर्तते तथास्वभावंनात्येतीत्यर्थः ॥ ६ ॥ ति० सचभगवान्नपक्षपातस्वभावइत्याह—नकालस्येति । नकालस्यबन्धुत्वमस्ति । प्राप्तकालंवस्तुसर्वथासंहरत्येव । नतुपक्षपातेनकिमपित्यजतीत्यर्थः । नहेतुः स्वसृज्येस्वनाश्येवास्वकृतव्यवस्थातिरिक्तकारणनिरपेक्षइत्यर्थः । यद्वा प्राप्तकालसंहारनिवर्तनेनकश्चिदपिहेतुर्मन्त्रतन्त्रौषधादिःप्रभवतीत्यर्थः ॥ तस्यैवप्रपञ्चः । नपराक्रमः महापराक्रमवतामपिकालेप्राप्ते संहारोभवत्येव । नमित्रज्ञातिसंबन्धः नबहुमित्रतानबहुज्ञातिताप्राप्तकालसंहारनिवर्तनेहेतुः । सोपिभगवानात्मनःप्रत्यग्वर्गस्यजीवजातस्य नवशः तदिच्छाधीनोन । किंतु परमस्वतएव । तेनचभगवताकालेनक्रियमाणोनियत्यधीनःस्वस्वकर्मपरिणामएवसर्वसुख-

[पा०] १ क. छ. झ. ट. नापिचेश्वरः. २ क. ग. ङ. छ. ज. ञ. स्वभावंवा. ख. स्वभावंहि. ३ झ. ट. किंचिदतिवर्तते.

किं तु कालपरीणामो द्रष्टव्यः साधु पश्यता ॥ धर्मश्चार्थश्च कामश्च कालक्रमसमाहिताः ॥ ८ ॥
इतः स्वां प्रकृतिं वाली गतः प्राप्तः क्रियाफलम् ॥ धर्मार्थकामसंयोगैः पवित्रं ध्रुवगेश्वरः ॥ ९ ॥
स्वधर्मस्य च संयोगाज्जितस्तेन महात्मना ॥ स्वर्गः परिगृहीतश्च प्राणानपरिरक्षता ॥ १० ॥
एषा वै नियतिः श्रेष्ठा यां गतो हरियूथपः ॥ तदलं परितापेन प्राप्तकालमुपास्यताम् ॥ ११ ॥
वैचनान्ते तु रामस्य लक्ष्मणः परवीरहा ॥ अवदत्प्रश्रितं वाक्यं सुग्रीवं गतचेतसम् ॥ १२ ॥
कुरु त्वमस्य सुग्रीव प्रेतकार्यमनन्तरम् ॥ १३ ॥
ताराङ्गदाभ्यां सहितो वालिनो दहनं प्रति ॥ समाज्ञापय काष्ठानि शुष्काणि च बहूनि च ॥
चन्दनादीनि दिव्यानि वालिसंस्कारकारणात् ॥ १४ ॥
समाश्वासय चैनं त्वमङ्गदं दीनचेतसम् ॥ मा भूर्वालिशबुद्धिस्त्वं त्वदधीनमिदं पुरम् ॥ १५ ॥
अङ्गदस्त्वानयेन्माल्यं वस्त्राणि विविधानि च ॥ घृतं तैलमथो गन्धान्यत्रात्र समनन्तरम् ॥ १६ ॥
त्वं तार शिबिकां शीघ्रमादायागच्छ संभ्रमात् ॥ त्वरा गुणवती युक्ता ह्यस्मिन्काले विशेषतः ॥ १७ ॥
सज्जीभवन्तु प्लवगाः शिबिकावहनोचिताः ॥ समर्था वालिनश्चैव निर्हरिष्यन्ति वालिनम् ॥ १८ ॥

तत्तत्कर्मानुगुणमेव ईश्वरः सर्वं वर्तयतीत्यर्थः ॥ ७ ॥ तर्ह्यनीशेन जन्तुना किं कर्तव्यं तत्राह—किं त्विति ॥ साधु सम्यक् । पश्यता शास्त्रनिष्कर्षमवगच्छतेत्यर्थः । कालस्य ईश्वरस्य परिणामः चेतनकर्मानुगुणप्रवृत्तिविशेषः द्रष्टव्यः ईश्वरकृतव्यापारेषु न शोकः कर्तव्यः । यद्धितं तत्करिष्यतीति स्थातव्यमिति भावः । धर्मार्थकामास्तु कालक्रमेण ईश्वरमर्यादया समाहिताः समर्पिता भवन्ति । धर्मादिषु यत् प्राप्तव्यं तत् प्रापयतीश्वर एवेतिभावः । अत्र नियतिकालस्वभावपदैः व्याभिश्रतयोक्तिस्तदानीं रहस्यस्य वक्तुमनर्हत्वादितिबोध्यम् ॥ ८ ॥ एवमर्थस्थितिमुक्त्वा तां प्रकृते संगमयति—इत इति ॥ स्वां प्रकृतिं गतः भद्राणवेधकृतप्रायश्चित्ततया स्वकीयं शुद्धभावं प्राप्तः सन् । ध्रुवगेश्वरो वाली । इतः अस्माल्लोकात् । धर्मार्थकामसंयोगैः विहितकालानुष्ठितधर्मार्थकामसंबन्धैः । पवित्रं क्रियाफलं स्वर्गं प्राप्तः । सामदानार्थसंयोगैरितिपाठे नीतिशास्त्रानुष्ठानैरित्यर्थः ॥ ९ ॥ केन स्वां प्रकृतिं प्राप्त इत्यपेक्षायामुक्तं विशदयति—स्वधर्मस्य चेति ॥ स्वधर्मस्य संयोगात् स्वविहितधर्मानुष्ठानात् । रणे प्राणानपरिरक्षतेत्यनेन शौर्यकृतधर्मोप्युक्तः । उभाभ्यां जितः पूर्वं स्ववशीकृतः स्वर्गः इदानीं परिगृहीतश्च ॥ १० ॥ हरियूथपः यां नियतिं गतः सा नियतिर्गतिः श्रेष्ठा । तत्तस्मात्कारणात् । परितापेनालं । सद्गतिं प्राप्तं प्रति शोको न कार्यः । प्राप्तकालं एतत्कालोचितं । उपास्यतां अनुष्ठीयतां ॥ ११ ॥ गतचेतसं दुःखितमिति यावत् ॥ १२ ॥ कुरु त्वमस्येत्यर्धमेकं वाक्यं ॥ १३ ॥ वालिनो दहनं प्रति ताराङ्गदाभ्यां सहितः सन् । वालिसंस्कारकारणात् वालिसंस्कारार्थं । चन्दनादीनि काष्ठानि समाज्ञापय ॥ १४—१५ ॥ यत्रात्र समनन्तरं मरणानन्तरं यदानेतव्यमस्ति तत्सर्वमङ्गदः समानयेदित्यर्थः ॥ १६ ॥ त्वरा गुणवती अस्मिन्काले विशेषतोयुक्ता ॥ १७ ॥ ये निर्हरिष्यन्ति ते सज्जीभवन्त्विति योजना । निर्हारः

दुःखादिलाभहत्येवसाधुपश्यतासुमतिनाविवेकवताद्रष्टव्यः ज्ञातव्यः । ननुविधादहर्षौकर्तव्यौ नापिखसामर्थ्यनिन्देतिभावः । एवं धर्मादयोपि चादधर्मादयोपिकालक्रमेणैवसमाहिताः संपादितभवन्ति ॥ ७–८ ॥ ती० धर्मश्चार्थश्चकालश्चकालक्रमसमाहिताः । पूर्वाद्धमध्याह्नापराह्नकालक्रमायत्ताः यस्मिन्कालेयत्कर्मकर्तव्यंसकालोऽनुल्लङ्घनीयइतिभावः ॥ ८ ॥ ति० प्रकृतमाह—इतइति । सामदानाभ्यामर्जितैः अर्थसंयोगैः ऐश्वर्यैः । पवित्रं शुभं । क्रियाफलं भोगं । इहलोकेप्राप्तवान्वालीइतोलोकादेहाच्च गतः अपगतः । स्वांप्रकृतिं गतः प्राप्तः । कार्याणांकारणेलयात् । एवंचेन्द्रलोकंगतोवालीतिसूचितं ॥ ९ ॥ शि० नियतिः मृतिः । प्राप्तकालं एतत्कालोचितं ॥ ११ ॥ ति० दहनंप्रति दहननिमित्तं । यतस्तेतिशेषः ॥ १४ ॥

[पा०] १ घ. ङ. धर्मकामार्थसंयोगैः. ख. ग. दानमानार्थसंयोगैः. क. छ. झ. ट. सामदानार्थसंयोगैः. २ क. ग. ङ. प्रतिगृहीतश्च. ३ क. ग. वचनादेवरामस्य. घ. वचनात्तस्यरामस्य. ४ क. ग. ङ.—ट. चन्दनानिच. ५ ख. माभूत्तेवालिशबुद्धिः. ६ ङ. च. ज. ञ. ट. गन्धानन्यत्र. ७ क. ग.—ट. वाहनोचिताः.

एवमुक्त्वा तु सुग्रीवं सुमित्रानन्दवर्धनः ॥ तस्थौ भ्रातृसमीपस्थो लक्ष्मणः परवीरहा ॥ १९ ॥
लक्ष्मणस्य वचः श्रुत्वा तारः संभ्रान्तमानसः ॥ प्रविवेश गुहां शीघ्रं शिबिकासक्तमानसः ॥ २० ॥
आदाय शिबिकां तारः स तु पर्यापतत्पुनः ॥ २१ ॥
वानरैरुह्यमानां तां शूरैरुद्वहनोचितैः ॥ दिव्यां भद्रासनयुतां शिबिकां स्यन्दनोपमाम् ॥ २२ ॥
पक्षिकर्मभिराचित्रां द्रुमकर्मविभूषिताम् ॥ आचितां चित्रपत्रीभिः सुनिविष्टां समन्ततः ॥ २३ ॥
विमानमिव सिद्धानां जालवातायनावृताम् ॥ सुनियुक्तां विशालां च सुकृतां विश्वकर्मणा ॥ २४ ॥
दारुपर्वतकोपेतां चारुकर्मपरिष्कृताम् ॥ वराभरणहारैश्च चित्रमाल्योपशोभिताम् ॥ २५ ॥
गुहागहनसंछन्नां रक्तचन्दनरूषिताम् ॥ पुष्पौघैः समभिच्छन्नां पद्ममालाभिरेव च ॥
तरुणादित्यवर्णाभिर्भ्राजमानाभिरावृताम् ॥ २६ ॥
ईदृशीं शिबिकां दृष्ट्वा रामो लक्ष्मणमब्रवीत् ॥ क्षिप्रं विनीयतां वाली प्रेतकार्यं विधीयताम् ॥ २७ ॥
ततो वालिनमुद्यम्य सुग्रीवः शिबिकां तदा ॥ आरोपयत विक्रोशन्नङ्गदेन सहैव तु ॥ २८ ॥
आरोप्य शिबिकां चैव वालिनं गतजीवितम् ॥ अलंकारैश्च विविधैर्माल्यैर्वस्त्रैश्च भूषितम् ॥ २९ ॥
आज्ञापयत्तदा राजा सुग्रीवः प्लवगेश्वरः ॥ और्ध्वदैहिकमार्यस्य क्रियतामनुरूपतः ॥ ३० ॥
विश्राणयन्तो रत्नानि विविधानि बहून्यपि ॥ अग्रतः प्लवगा यान्तु शिबिकासमनन्तरम् ॥ ३१ ॥

शववहनं ॥ १८—१९ ॥ गुहां किष्किन्धां ॥ २० —२१ ॥ भद्रासनयुतां राजासनयुक्तां । पक्षिकर्मभिराचित्रां कृत्रिमपक्षिभिः समन्तादाश्चर्यभूतां । क्रियत इति कर्म प्रतिकृतिः द्रुमकर्मभिः द्रुमप्रतिकृतिभिः विभूषितां । आचितां चित्रपत्रीभिः चित्रलेखाभिः । पदातिभिरित्येके । आर्षो दीर्घः । सुनिविष्टां शोभनसंनिवेशवतीं । जालवातायनावृतां सूक्ष्मरन्ध्रसमूहो जालं गोनयनाकृतिरन्ध्रसमूहो गवाक्षं तदावृतां । सुनियुक्तां सुश्लिष्टां । सुकृतां सुष्ठुकृतां । यत्नेन कृतामित्यर्थः । दारुपर्वतकोपेतां दारुनिर्मितक्रीडापर्वतयुक्तां । चारुकर्मणा उत्तेजनेन परिष्कृतां अलंकृतां । वराभरणैः हारैश्च युक्तामिति शेषः । गुहागहनसंछन्नां कृत्रिमैर्गुहागहनैः गुहाभिः काननैश्च संछन्नां । पुष्पौघैः मुक्तकपुष्पनिचयैः आस्तरणार्थैः । समभिच्छन्नां व्याप्तां । चतुर्दिक्षु पुष्पसरोपेतलेप्यन्तरान्तरा पद्ममालाभिः पद्मपङ्क्तिभिर्युक्तामित्यर्थः ॥ २२—२६ ॥ ईदृशीं शिबिकामिति पुनरुक्तिर्व्यवहितानुस्मरणार्था ॥ २७ ॥ ततः लक्ष्मणं प्रति वाली विनीयतामित्युक्तिश्रवणानन्तरमित्यर्थः । यद्वा । लक्ष्मणं प्रत्युक्तिः स्वमुद्दिश्यैवेति ज्ञात्वेत्यर्थः । आरोपयत आरोपयन् ॥ २८—२९ ॥ आर्यस्य ज्येष्ठस्य । देहादूर्ध्वं कर्तव्यं और्ध्वदैहिकं उत्तरक्रिया । शिबिकासमनन्तरं आसन्नीसमीपे । अत्रेतिकरणं द्रष्टव्यं । इत्याज्ञा-

शि० दिव्यां देवलोकात्प्राप्तां । भद्रासनयुतांकल्याणकारकासनयुतां अतएवशिबिकां आरोहकाणांकल्याणप्रदां । उदीचामितीत्वं ॥ २२ ॥ ती० जालवातायनान्वितां जालैर्वातायनैरन्वितां । कुड्योपरितिर्यगवस्थितफलकनिर्मितविविधसंनिवेशरन्ध्राणि जालानि । वातायनानि वायुप्रवेशार्थगवाक्षाकाररन्ध्राणि ॥ २४ ॥ ति० गुहागहनशब्देन शिबिकोपरिप्रसार्यमाणपञ्जरमुच्यते ॥ २६ ॥ रामानु० क्षिप्रंप्रेतकार्यंविधीयतामितिलक्ष्मणोद्देशेनोक्तार्थंसुग्रीवेणक्रियमाणत्वाल्लक्ष्मणेनसुग्रीवोप्याज्ञप्तइत्यवगम्यते ॥ २७ ॥ स० अनुकूलतः कूलमनुसृत्य ॥ ३० ॥ शि० विश्राणयन्तः प्रक्षेपेणददतः । प्लवगाअग्रतोयान्तु । तदनन्तरं शिबिकायातु ॥ ३१ ॥

[पा०] १ क. ख. ग. ङ. च. ज. ञ. शिबिकागतमानसः. २ ख. शीघ्रंतारःपर्यापतत्. ३ ङ. च. ज. रुद्वहनोचितां. ४ ख. द्रुमकर्मभिरावृतां. ५ ख. ग. घ. आश्रितां. ६ क. ग. घ. च. ज. चित्रपक्षीभिः. ७ क. ख. ग. ञ. ट. वातायनायुतां. च. वातायनान्वितां. ८ क.—च. ञ. ञ. ट. शिल्पिभिःकृतां. ९ ङ. छ. ञ. ट. भूषितां. १० क. छ. ञ. ट. पुष्पाद्यैः. ११ घ. संपरिच्छन्नां. १२ घ. वर्णाभिर्लम्बमानाभिः. १३ ख. गतचेतसं. १४ ग. शोभितः. १५ ख.—ट. अनुकूलतः. १६ क. ग.—ट. बहूनिच. १७ क. ङ.—ट. शिबिकातदनन्तरं.

राज्ञामृद्धिविशेषा हि दृश्यन्ते भुवि यादृशाः ॥ [तादृशीमिह कुर्वन्तु वानरा मर्तृसत्क्रियाम्] ॥
तादृशं वालिनः क्षिप्रं प्राकुर्वन्नौर्ध्वदैहिकम् ॥ ३२ ॥
अक्रन्दं परिगृह्याशु तारप्रभृतयस्तदा ॥ क्रोशन्तः प्रययुः सर्वे वानरा हतबान्धवाः ॥ ३३ ॥
ततः प्रणिहिताः सर्वा वानर्योऽस्य वशानुगाः ॥ चुक्रुशुर्वीरवीरेति भूयः क्रोशन्ति ताः स्त्रियः ॥ ३४ ॥
तारप्रभृतयः सर्वा वानर्यो हतयूथपाः ॥ अनुजग्मुर्हि भर्तारं क्रोशन्त्यः करुणस्वनाः ॥ ३५ ॥
तासां क्रन्दितशब्देन वानरीणां वनान्तरे ॥ वनानि गिरयः सर्वे विक्रोशन्तीव सर्वतः ॥ ३६ ॥
पुलिने गिरिनद्यास्तु विविक्ते जलसंवृते ॥ चितां चक्रुः सुबहवो वानराः शोककर्शिताः ॥ ३७ ॥
अवरोप्य ततः स्कन्धाच्छिबिकां वहनोचिताः ॥ तस्थुरेकान्तमाश्रित्य सर्वे शोकसमन्विताः ॥ ३८ ॥
ततस्तारा पतिं दृष्ट्वा शिबिकातलशायिनम् ॥ आरोप्याङ्के शिरस्तस्य विललाप सुदुःखिता ॥ ३९ ॥
हा वानरमहाराज हा नाथ मम वत्सल ॥ हा महार्ह महाबाहो हा मम प्रिय पश्य माम् ॥
जनं न पश्यसीमं त्वं कस्माच्छोकाभिपीडितम् ॥ ४० ॥
प्रहृष्टमिव ते वक्त्रं गतासोरपि मानद ॥ अस्तार्कसमवर्ण च लक्ष्यते जीवतो यथा ॥ ४१ ॥
एष त्वां रामरूपेण कालः कर्षति वानर ॥ येन सा विधवाः सर्वाः कृता एकेषुणा वने ॥ ४२ ॥
इमास्तास्तव राजेन्द्र वानर्यो वल्लभाः सदा ॥ पादैर्विकृष्टमध्वानमागताः किं न बुध्यसे ॥
तवेष्टा ननु नामैता भार्याश्चन्द्रनिभाननाः ॥ ४३ ॥
इदानीं नेक्षसे कस्मात्सुग्रीवं प्लवगेश्वरम् ॥ एते हि सचिवा राजंस्तारप्रभृतयस्तव ॥ ४४ ॥
पुरवासी जनश्चायं परिवार्याऽऽसतेऽनघ ॥ विसर्जयैतान्प्लवगान्यथोचितमरिन्दम ॥
ततः क्रीडामहे सर्वा वनेषु मदनोत्कटाः ॥ ४५ ॥
एवं विलपतीं तारां पतिशोकपरिप्लुताम् ॥ उत्थापयन्ति स्म तदा वानर्यः शोककर्शिताः ॥ ४६ ॥

पयदिति पूर्वेण संबन्धः ॥ ३०—३१ ॥ ऋद्धिविशेषाः ऋद्धिविशेषानुरूपाः । यादृशा और्ध्वदैहिकक्रियाप्रकारा दृश्यन्ते तादृशमौर्ध्वदैहिकं क्षिप्रं प्राकुर्वन् ॥ ३२ ॥ तारप्रभृतयो वानरा इति सम्यक् ॥ ३३ ॥ प्रणिहिताः आप्ताः ॥ ३४—३७ ॥ वहनोचिताः वाहकाः ॥ ३८—४२ ॥ विकृष्टं विप्रकृष्टं । अध्वानं पादैरागताः ॥ ४३—४४ ॥ मदनोत्कटाः उत्कटमदनाः ॥ ४५ ॥ विलपतीं विलपन्तीं ॥ ४६ ॥

शि० हताःराजविघातेनहतप्रायाबान्धवायेषांते हतबान्धवाः ॥ ३३ ॥ रामानु० प्रणिहिताः अत्यन्तप्राप्ताइत्यर्थः । स० अस्य वालिनः । क्रोशन्तीति लटाक्रोशस्यविरामोनास्तीतिध्वन्यते ॥ ३४ ॥ ती० विविक्ते पूते । "विविक्तौपूतविजनौ" इत्यमरः ॥ ३७ ॥ ति० अनुवगाः द्रुतगतिमजानन्त्यः । विकृष्टं दूरं ॥ ४३ ॥ स० यथापुरं यथापूर्वंक्रीडामहे । पदव्यत्ययः । यद्वा हेनाथ वयंक्रीडामेतिलोडुत्तमबहुवचनं । जीवतीतिभ्रान्त्यावचनमिदं ॥ ४५ ॥

[पा०] १ क. ग. ङ. च. ज. ञ. राज्ञामृद्धिर्विशिष्टादृश्यतेभुवियादृशी. २ इदमर्धं क. ग. ङ.—ट. पाठेषुदृश्यते. तादृशीमिह. ३ घ. तादृशाः. ४ ङ. छ.—ट. परिरभ्याशु. ५ क.—घ. च. ज. तारप्रभृतयः. ६ ङः.—ञ. स्तया. ७ क. प्रणादिताः. ८ छ. ज. वानरस्य. ९ ङ.—ट. प्रियं. १० क. ङ. च. ज.—ट. हतबान्धवाः. ११ ङ. झ. ञ. ट. अगमुख. १२ ग. क्रन्दितशब्देन. १३ ङ.—ट. गिरयश्चैव. क. गिरयोवृक्षाःक्रोशन्तीवचसर्वतः. १४ क. ग. ङ.—ट. वानराश्चनचारिणः. १५ छ. झ. ट. वानरोत्तमाः. क. ग. ङ. च. ज. वाहनोचिताः. १६ ङ.—ट. शोकपरायणाः. १७ क. महावीर. १८ ङ.—ट. दृश्यते. १९ ख. छ. झ. ट. रणे. २० ङ—ट. वानर्योऽवगास्तव. क. वानर्योऽन्तवल्लभाः. २१ छ. झ. ट. चैवेमाभार्याः. २२ क. कस्मादनायाः. २३ क. च.—ट. प्लवगेश्वर. २४ ग. ज.—ट. पुरवासिजनः. २५ ङ.—ट. परिवार्यविषीदति. २६ ङ.—ट. विसर्जयैतान्सचिवान्. ग. च. विसर्जयैनान्. २७ ठ. न्यथापुर. २८ ङ.—ट. शोकपरीतां.

सुग्रीवेण ततः सार्धमङ्गदः पितरं रुदन् ॥ चितामारोपयामास शोकेनाभिहतेन्द्रियः ॥ ४७ ॥
ततोग्निं विधिवद्दत्त्वा सोपसव्यं चकार ह ॥ पितरं दीर्घमध्वानं प्रस्थितं व्याकुलेन्द्रियः ॥ ४८ ॥
संस्कृत्य वालिनं ते तु विधिपूर्वं प्लवङ्गमाः ॥ आजग्मुरुदकं कर्तुं नदीं शीतजलां शिवाम् ॥ ४९ ॥
ततस्ते सहितास्तत्र ह्यङ्गदं स्थाप्य चाग्रतः ॥ सुग्रीवतारासहिताः सिषिचुर्वालिने जलम् ॥ ५० ॥
सुग्रीवेणैव दीनेन दीनो भूत्वा महाबलः ॥ समानशोकः काकुत्स्थः प्रेतकार्याण्यकारयत् ॥ ५१ ॥
तँतस्तु तं वालिनमप्यपौरुषं प्रकाशमिक्ष्वाकुवरेषुणाहतम् ॥
प्रदीप्य दीप्ताग्निसमौजसं तदा सलक्ष्मणं राममुपेयिवान्हरिः ॥ ५२ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे पञ्चविंशः सर्गः ॥ २५ ॥

षड्विंशः सर्गः ॥ २६ ॥

हनुमताकिष्किन्धाप्रवेशंप्रार्थितेनरामेण तंप्रति स्वस्यपितृनियोगानुरोधेनग्रामनगराप्रवेशनिवेदनपूर्वकं सुग्रीवंप्रतितस्य राज्येऽभिषेकचोदनेनसहाङ्गदस्ययौवराज्येऽभिषेचनचोदना ॥ १ ॥ तथा वर्षाकालावसानपर्यन्तंलक्ष्मणेनसहस्वस्यगिरिगुहायांनिवासोक्तिपूर्वकं तदनन्तरंसीतान्वेषणप्रयतनविधानम् ॥ २ ॥ सुग्रेवण रामाज्ञयानगरमेत्य यथाविधिवानरवैराज्ये स्वाभिषेचनपूर्वकमङ्गदस्यचौवराज्येऽभिषेचनम् ॥ ३ ॥

ततः शोकाभिसंतप्तं सुग्रीवं क्लिन्नवाससम् ॥ शाखामृगमहामात्राः परिवार्योपतस्थिरे ॥ १ ॥
अभिगम्य महाबाहुं राममक्लिष्टकारिणम् ॥ स्थिताः प्राञ्जलयः सर्वे पितामहमिवर्षयः ॥ २ ॥
ततः काञ्चनशैलाभस्तरुणार्कनिभाननः ॥ अब्रवीत्प्राञ्जलिर्वाक्यं हनुमान्मारुतात्मजः ॥ ३ ॥

पितरं पितृशरीरं ॥४७॥ अपसव्यं अप्रदक्षिणं ॥४८॥ वालिनं वालिशरीरं । उदकं कर्तुं जलतर्पणं कर्तुं । नदीं किष्किन्धासमीपवर्तिनीं ॥ ४९ ॥ सुग्रीवतारासहिताइति तारयाप्युदकदानं कुलाचारः ॥५०॥ सुग्रीवेणेति ॥ अनेन रामः सहैवागत इत्यवगम्यते ॥५१॥ प्रकाशं प्रसिद्धं । प्रदीप्य दृष्ट्वा । हरिः सुग्रीवः । अन्येपुरं प्रविविशुरित्यर्थसिद्धं । यद्यपि तिर्यगधिकरणरीत्या तिरश्चां न शास्त्रविहितसंस्काराधिकारः । तथापि देवांशसंभूतानां तिर्यगवस्थामात्रभाजां वेदाध्ययनसंयोगादेवक्षत्रजातत्वात्संस्काराईत्वास्तीति बोध्यं ॥५२॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकण्डव्याख्याने पञ्चविंशः सर्गः ॥ २५ ॥

अथ सुग्रीवाभिषेकः षड्विंशे—तत इत्यादि ॥ क्लिन्नवाससं आर्द्रवस्त्रं । सद्यः स्नानादितिभावः । शाखामृगमहामात्राः वानररूपामन्त्रिणः ॥ १ ॥ सर्वे

ति० विधिवत् देवांशत्वेनस्वयंज्ञातवेदत्वाज्ज्ञानवत् । तिर्यग्देहोचितविधिवदित्यर्थः । विधिवत् अग्निहोत्रविधिनेत्यर्थइत्यन्ये ॥ ४९ ॥ शि० वालिन. वालिने ॥ ५० ॥ रामानु० समानशोकःकाकुत्स्थइत्यनेन समानदुःखदुःखितसखित्वमित्येतत्प्रकटितंभवति ॥ शी० सुग्रीवेणैवाकारयत् तत्प्रामुख्येनैवाकारयदित्यर्थः ॥ ५१ ॥ शी० गतसर्गाणाफलश्रुतिः । " ताराप्रलापमाकर्ण्यवालिनोनिधनंतथा । कपीन्द्रसंस्कृतिंनारीश्रुत्वावालिवधाभवेत् । दीर्घायुष्यंभवेद्भर्तुःपुत्रिणीसंभविष्यति " इतिस्कान्दे ॥ ५२ ॥ इतिपञ्चविंशःसर्गः ॥ २५ ॥

[पा०] १ ङ. ज.—ट. सार्धंसोऽदः. २ छ.—ट. नाभिहतेन्द्रियः. ३ क.—ट. तंतु. ४ ङ.—ट. विधिवत्तत्रसपर्धमाः. ५ क. ङ. छ.—ट. शुभजलां. स. शिवजलां. ६ क. ख. घ. शुभां. ७ ङ. ज. झ. स्तस्थुरग्रतः. क. ग. घ. छ. झ. ट. स्तत्रअग्रतः. ८ छ. झ. वानराग्रजं. क.—च. झ. ट. वालिनो. ९ ग. ङ.—ज. झ. सुग्रीवेणच. थ. सुग्रीवेणतु. १० ग. ङ.—ट. ततोथतं. ११ स. क्लिश्यमानसं. १२ क. घ. ङ. ज. महामात्याः. १३ ख. घ. अभिवाद.

भवत्प्रसादात्सुग्रीवः पितृपैतामहं महत् ॥ वानराणां सुदुष्प्रापं प्राप्तो राज्यमिदं प्रभो ॥ ४ ॥
भवता समनुज्ञातः प्रविश्य नगरं शुभम् ॥ संविधास्यति कार्याणि सर्वाणि ससुहृज्जनः ॥ ५ ॥
स्नातोयं विविधैर्गन्धैरौषधैश्च यथाविधि ॥ अर्चयिष्यति रत्नैश्च माल्यैश्च त्वां विशेषतः ॥ ६ ॥
इमां गिरिगुहां रम्यामभिगन्तुमितोर्हसि ॥ कुरुष्व स्वामिसंबन्धं वानरान्संप्रहर्षयन् ॥ ७ ॥
एवमुक्तो हनुमता राघवः परवीरहा ॥ प्रत्युवाच हनूमन्तं बुद्धिमान्वाक्यकोविदः ॥ ८ ॥
चतुर्दश समाः सौम्य ग्रामं वा यदि वा पुरम् ॥ न प्रवेक्ष्यामि हनुमन्पितुर्निर्देशपालकः ॥ ९ ॥
सुसमृद्धां गुहां रम्यां सुग्रीवो वानरर्षभः ॥ प्रविष्टो विधिवद्वीरः क्षिप्रं राज्येऽभिषिच्यताम् ॥ १० ॥
एवमुक्त्वा हनूमन्तं रामः सुग्रीवमब्रवीत् ॥ वृत्तज्ञो वृत्तसंपन्नमुदारबलविक्रमम् ॥ ११ ॥
इममप्यङ्गदं वीरे यौवराज्येऽभिषेचय ॥ ज्येष्ठोऽस्य स सुतो ज्येष्ठः सदृशो विक्रमेण ते ॥
अङ्गदोऽयमदीनात्मा यौवराज्यस्य भाजनम् ॥ १२ ॥
पूर्वोऽयं वार्षिको मासः श्रावणः सलिलागमः ॥ प्रवृत्ताः सौम्य चत्वारो मासा वार्षिकसंज्ञिकाः ॥ १३ ॥
नायमुद्योगसमयः प्रविश त्वं पुरीं शुभाम् ॥ अस्मिन्वत्स्याम्यहं सौम्य पर्वते सहलक्ष्मणः ॥ १४ ॥
इयं गिरिगुहा रम्या विशाला युक्तमारुता ॥ प्रभूतसलिला सौम्य प्रभूतकमलोत्पला ॥ १५ ॥
कार्तिके समनुप्राप्ते त्वं रावणवधे यत ॥ एष नः समयः सौम्य प्रविश त्वं स्वमालयम् ॥ १६ ॥

सुग्रीवादयः ॥ २—३ ॥ वानराणां राज्यमित्यन्वयः ॥ ४—५ ॥ अतिनिपुणतया हनुमान् प्रथमं संग्रहेण विज्ञाप्य तच्छृण्वति रामे पुनर्विशदमाह—स्नात इति ॥ ६ ॥ गिरिगुहां किष्किन्धां । वानराणां स्वामिना संबन्धं कुरु सुग्रीवंवानरराजंकुर्वित्यर्थः ॥ ७—११ ॥ भाजनं योग्यमित्यर्थः ॥ १२ ॥ अस्त्वभिषेकः सीतान्वेषणरावणवधादिकं प्रत्युद्योगः क्रियत इत्याशङ्क्याह—पूर्व इत्यादि ॥ पूर्वः वर्षर्त्वपेक्षयाप्रथमः । वर्षाः वर्षर्तुः । " स्त्रियां प्रावृट् स्त्रियां भूम्नि वर्षाः " इत्यमरः । तत्र भवो वार्षिकः । " द्वौ द्वौ मार्गादिमासौ स्याद्ऋतुः " इति श्रावणभाद्रपदौ वर्षर्तुः । तदेकदेशत्वाच्छ्रावणोवार्षिक इत्युच्यते । " वर्षाभ्यष्ठक् " इति ठक्प्रत्ययः । वार्षिकसंज्ञिकाश्चत्वारोमासा इति । आश्वयुजाषाढाभ्यां चतुष्टमिति ज्ञेयं । छत्रिन्यायात् । वर्षमुखत्वाद्वर्षानन्तरकालत्वाच्च चत्वारोपि युद्धयोग्या न भवन्ति । कश्चित्तु—"पक्षा वैमासाः" इति श्रुतिपक्षमाश्रित्य चत्वारो वार्षिका मासा इत्युक्तम् । श्रावणः प्रथमो मास इत्यत्रापि प्रथमः पक्ष इत्यर्थः । " चत्वारो वार्षिका मासा गता वर्षशतोपमाः " इत्युपसंहारादित्याह ॥ १३—१५ ॥ कार्तिके मासि समनुप्राप्ते समीपंप्राप्ते । आश्वयुजान्तइत्यर्थः । यत यतस्व । सेनासंनहनंकुरु । कार्तिकशब्दस्य आश्वयुजान्तपरत्वं स्वयमेव वक्ष्यति—"वयमाश्वयुजे मासिपिङ्गाक्षप्रतिचोदिताः " इति । प्रचोदनं संनहनं नतुनिर्गमः । निर्गमस्तु मार्गशीर्षे । स्वसंकेतितकार्तिकातिक्रमादेव रामस्य सुग्रीवे कोपो लक्ष्मणप्रेषणं च । स्वयंप्रभादिलनिर्गमनानन्तरं "द्रुमान्वासन्तिकान्दृष्ट्वा " इत्येतद्वसन्तपुष्पोद्गमोपक्रमभूतपत्रविगलनहेतुफाल्गुनापेक्षया । पक्षान्तरे फाल्गुनचैत्रयोर्वसन्तत्वोक्तेर्वा । अयमत्र क्रमोऽनुसन्धेयः । उत्तरस्यादिना पूर्वस्यावधिं जानीयादिति न्यायेन उत्तरस्योत्तरस्य ग्रहणात् पूर्वपूर्वकालसंख्याज्ञापनं वाल्मीकेः शैली । तथा च चैत्रे रामस्य साकेतान्निर्गमः । अगस्त्याश्रमागमनात्पूर्वं दश संवत्सरा गता इत्युक्तं ।

टीका० औषधैः अभिषेकद्रव्यैः ॥ ६ ॥ स० स्वामिसंबन्धं सुग्रीवस्वराज्याभिषेकेणस्वामिलसंबन्धं ॥ ७ ॥ स० ग्रामं अल्पजनाधिष्ठितं ॥ ९ ॥ टी० प्रवृत्ताः प्रवर्तितुमुपक्रान्ताः ॥ स० सलिलानामागमः आगमनंयस्मिन्ससतथा ॥ १३ ॥

[पा०] १ क. ग. ङ. झ. ट. त्रसादात्कुरुस्व. २ वानराणामित्यर्धस्थाने छ. झ. ट. पाठेषुवानराणांसुदंष्ट्राणांसंपन्नबलशालिनाम् । महात्मनांसुदुष्प्रापंप्राप्तंराज्यमिदंप्रभो । इत्यर्धद्वयदृश्यते. ३ क. ङ.—ट. ससुहृद्गणः. ४ ङ.—ट. माल्यैश्चरत्नैश्च. ५ ङ.—ञ. गन्तुंत्वमर्हसि. ६ ग. स्प्रतिहर्षयन्. ७ ङ. छ.—ट. पारगः. ८ क. ग.—च. ज.—ट. दिव्यां. ९ घ.—ट. वीरं. १० क. ख. ङ. छ.—ट. ज्येष्ठस्यहि. घ. ज्येष्ठस्यतु. ११ ग. विक्रमेणहि. ख. घ.—ट. विक्रमेणच.

अभिषिक्तः स्वराज्ये च सुहृदः संप्रहर्षय ॥ १७ ॥
इति रामाभ्यनुज्ञातः सुग्रीवो वानराधिपः ॥ प्रविवेश पुरीं रम्यां किष्किन्धां वालिपालिताम् ॥ १८ ॥
तं वानरसहस्राणि प्रविष्टं वानरेश्वरम् ॥ अभिवाद्य प्रविष्टानि सर्वतः पर्यवारयन् ॥ १९ ॥
ततः प्रकृतयः सर्वा दृष्ट्वा हरिगणेश्वरम् ॥ प्रणम्य मूर्ध्ना पतिता वसुधायां समाहिताः ॥ २० ॥
सुग्रीवः प्रकृतीः सर्वाः संभाष्योत्थाप्य वीर्यवान् ॥ भ्रातुरन्तःपुरं सौम्यं प्रविवेश महाबलः ॥ २१ ॥
प्रविश्य त्वभिनिष्क्रान्तं सुग्रीवं प्लवगेश्वरम् ॥ अभ्यषिञ्चन्त सुहृदः सहस्राक्षमिवामराः ॥ २२ ॥
तस्य पाण्डुरमाजह्रुश्छत्रं हेमपरिष्कृतम् ॥ शुक्ले च वालव्यजने हेमदण्डे यशस्करे ॥ २३ ॥
तथा सर्वाणि रत्नानि सर्वबीजौषधैरपि ॥ सक्षीराणां च वृक्षाणां प्ररोहान्कुसुमानि च ॥ २४ ॥
शुक्लानि चैव वस्त्राणि श्वेतं चैवानुलेपनम् ॥ सुगन्धीनि च माल्यानि स्थलजान्यम्बुजानि च ॥ २५ ॥
चन्दनानि च दिव्यानि गन्धांश्च विविधान्बहून् ॥ अक्षतं जातरूपं च प्रियङ्गुमधुसर्पिषी ॥
दधि चर्म च वैयाघ्रं वाराही चाप्युपानहौ ॥ २६ ॥
समालम्भनमादाय रोचनां समनःशिलाम् ॥ आजग्मुस्तत्र मुदिता वराः कन्यास्तु षोडश ॥ २७ ॥
ततस्ते वानरश्रेष्ठं यथाकालं यथाविधि ॥ रत्नैर्वस्त्रैश्च मक्षैश्च तोषयित्वा द्विजर्षभान् ॥ २८ ॥

अथ पञ्चवट्यां वर्षत्रयानन्तरं चैत्रे प्राप्ते शूर्पणखानासिकाच्छेदनखरवधादिकं कृतमित्यवगम्यते । रावणेन च मारीचवचनादिना किंचिद्विलम्ब्य तस्मिन्नेव चैत्रे सीता हृता । सीताविरहेण दूयमानस्य रामस्य वसन्तवर्णने चैत्रवनानिल इत्युक्तेः । लङ्कायां सीतायाः संवत्सरवासोक्तेश्च । पुनः फाल्गुने हि रावणवधः । आषाढे वालिवधः । शरदि सेनासंनहनं । मार्गशीर्षे वानरप्रस्थापनं । स्वयंप्रभाबिले बहुकालयापनं । "कालश्च नो महान्यातः" इत्युक्तेः । बहिर्निर्गमनानन्तरं फाल्गुनशुद्धत्रयोदश्यां हनुमतः समुद्रतरणं । चतुर्दश्यां पुनरागमनं (?) । पौर्णमास्यां दण्डयात्रेत्यादि । अन्यद्युद्धकाण्डे वक्ष्यते । समयः संकेतः ॥ १६—१९ ॥ मूर्ध्ना प्रणम्य वसुधायांपतिताः । समाहिताः अनन्यमनस्काः ॥ २० ॥ भ्रातुरन्तःपुरं प्रविवेशेति । तारां संमान्य स्ववशीकरणार्थमितिभावः ॥ २१—२२ ॥ प्ररोहान् पल्लवान् । अनुलेपनं कर्पूरादि । गन्धाः अगरुप्रभृतयः । अक्षतं जातरूपं अक्षततण्डुलं हरिद्रामिश्रं । प्रियङ्गुः सूक्ष्मधान्यविशेषः । वाराही वराहचर्मविकृती । "सुपां सुलुक्" इत्यादिना पूर्वसवर्णदीर्घः ॥ २३—२६ ॥ समालम्भनं अनुलेपनविशेषः । "समालम्भो विलेपनं" इत्यमरः । रोचनां गोरोचनां । समनःशिलां । शैलधातुविशेषसंहितं तिलकसाधनं मनःशिला ॥ २७ ॥ ततस्ते वानरश्रेष्ठमित्यारभ्य वसवो वासवं यथेत्यन्तमेकं वाक्यं ॥ यथाकालं विहितकालमनतिक्रम्य । यथाविधि यथाक्रमं । द्विजर्षभान् याजनार्थमाहूतान् । समिद्धं ज्वलितं । जातवेदसं अग्निं । मन्त्रविदः वानरपुरोहि-

ति० प्रविश्यत्वभिनिष्क्रान्तमितिपाठे प्रविश्य अन्तःपुरगतशोकादिकंदृष्ट्वा अभिषेकायतुपुनःनिष्क्रान्तप्रतिनिवृत्तं सभामागतमित्यर्थः ॥२२॥ स० यशस्करे सुग्रीवे । पाण्डुरंछत्रं आजह्रुः । तस्यसुहृदइतितस्येत्यस्यपूर्वेणान्वयः । यशस्करेइतिवालव्यजनविशेषणंच ॥ २३ ॥ टीका० श्वेतमनुलेपनं कर्पूरद्रवः ॥ २५ ॥ टीका० प्रियङ्गुः फलिनीपुष्पं । "प्रियङ्गुःफलिनीफली" इत्यमरः । यद्वा "प्रियङ्गुःसिद्धार्थःसमौ" इतिविश्वप्रकाशः ॥ स० गन्धान् गन्धद्रव्याणि । जातरूपं रौप्यं । प्रियङ्गुसहितंमधु प्रियङ्गुमधु । अनन्तरंद्वन्द्वः । अतोनद्विवचनानुपपत्तिः ॥ २६ ॥ ती० द्विजर्षभान् वानरजातीयद्विजर्षभान् ॥ २८ ॥

[पा०] १ क. ग. छ. ज. झ. ट. अभिषिञ्चस्व. २ ग. संप्रचोदय. ३ क. ग. छ —ट. वानरर्षभः. ४ क.—घ. च. ज. ञ. ट. प्रहृष्टानि. ५ ङ. छ.—ञ. प्लवगेश्वरं. ६ ङ.—ञ. प्रविष्टंभीमविक्रान्तंसुग्रीवंवानरर्षभं. ७ क.—घ. वानरर्षभं. ८ ङ.—ट. रत्नानिसर्वाणि. ९ क.—ट. सर्वबीजौषधानिच. १० क. ग. घ. ज. ञ. वराहौ. ङ. छ. झ. ट. पराघ्यौ. ११ क. समालेपन. १२ झ. गोरोचनंमनःशिलां. छ. ट. गोरोचनमनःशिलां. ङ. ञ. गोरोचनमनःशिलाः. घ. च. ज. रोचनांसुमनःशिलाः. ख. रोचनांसुमनःशिलां. ग. रोचनांचमनःशिलां. १३ ख. ङ. छ. झ. ञ. ट. कन्याश्च. १४ ख.—ङ. ज. ञ. ततस्तं. १५ ङ. झ. ट. श्रेष्ठमभिषेक्तुं. १६ ग. ङ. द्विजोत्तमान्.

ततः कुशपरिस्तीर्णे समिद्धं जातवेदसम् ॥ मन्त्रपूतेन हविषा हुत्वा मन्त्रविदो जनाः ॥ २९ ॥
ततो हेमप्रतिष्ठाने वरास्तरणसंवृते ॥ प्रासादशिखरे रम्ये चित्रमाल्योपशोभिते ॥ ३० ॥
प्राङ्मुखं विविधैर्मन्त्रैः स्थापयित्वा वरासने ॥ नदीनदेभ्यः संहृत्य तीर्थेभ्यश्च समन्ततः ॥ ३१ ॥
आहृत्य च समुद्रेभ्यः सर्वेभ्यो वानरर्षभाः ॥ अपः कनककुम्भेषु निधाय विमलाः शुभाः ॥ ३२ ॥
शुभैर्वृषभशृङ्गैश्च फलशैश्चापि काञ्चनैः ॥ शास्त्रदृष्टेन विधिना महर्षिविहितेन च ॥ ३३ ॥
गजो गवाक्षो गवयः शरभो गन्धमादनः ॥ मैन्दश्च द्विविदश्चैव हनुमाञ्जाम्बवानलः ॥ ३४ ॥
अभ्यषिञ्चन्त सुग्रीवं प्रसन्नेन सुगन्धिना ॥ सलिलेन सहस्राक्षं वसवो वासवं यथा ॥ ३५ ॥
अभिषिक्ते तु सुग्रीवे सर्वे वानरपुङ्गवाः ॥ प्रहृष्टमुदिताहृष्टास्तत्र सहस्रशः ॥ ३६ ॥
रामस्य तु वचः कुर्वन्सुग्रीवो हरिपुङ्गवः ॥ अङ्गदं संपरिष्वज्य यौवराज्येऽभ्यषेचयत् ॥ ३७ ॥
अङ्गदे चाभिषिक्ते तु सानुक्रोशाः प्लवङ्गमाः ॥ साधु साध्विति सुग्रीवं महात्मानोऽभ्यपूजयन् ॥ ३८ ॥
रामं चैव महात्मानं लक्ष्मणं च पुनः पुनः ॥ प्रीताश्च तुष्टुवुः सर्वे तादृशे तत्र वर्तति ॥ ३९ ॥
हृष्टपुष्टजनाकीर्णा पताकाध्वजशोभिता ॥ बभूव नगरी रम्या किष्किन्धा गिरिगह्वरे ॥ ४० ॥

निवेद्य रामाय तदा महात्मने महाभिषेकं कपिवाहिनीपतिः ॥
रुमां च भार्यां प्रतिलभ्य वीर्यवानवाप राज्यं त्रिदशाधिपो यथा ॥ ४१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे षड्विंशः सर्गः ॥ २६ ॥

ताः । हैमप्रतिष्ठाने हेममयपादयुक्ते । वरासनविशेषणमेतत् । नदीनदेभ्यस्तीर्थेभ्यः समुद्रेभ्यश्च अपः आहृत्य आनीय । संहृत्य संमिश्रीकृत्य । सद्विमलं जलं कनककुम्भेषु निधाय तेभ्यो वृषभशृङ्गादिभिरुद्धृत्य । शास्त्रदृष्टेन विधिना क्रमेण । महर्षिविहितेन कल्पसूत्रविहितेन च विधिना । अभ्यषिञ्चन्त ॥२८—३७॥ सानुक्रोशाः अक्लदे सदयाः ॥ ३८ ॥ तादृशे सुग्रीवाभिषेकरूपोत्सवे । वर्तति वर्तमाने सति ॥ ३९ ॥ पताकाध्वजयोर्भेद उक्तः ॥ ४० ॥ निवेद्य रामसमीपमागत्य निवेद्येत्यर्थः ॥ ४१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने षड्विंशः सर्गः ॥ २६ ॥

ति० ततःकुशेति । अनेनाभिसाध्यकर्माधिकारितेषादर्शयति । मनुष्यसदृशसर्वव्यवहाराद्वेदकल्पाच्च ॥ २९ ॥ ति० मन्त्रैरस्थापयित्वा " वसवस्त्वागायत्रेणच्छन्दसा " इत्यादिमन्त्रैरासनेस्थापयित्वेत्यर्थः ॥ स० नदीनदेभ्यः अविक्षितत्वात्तत्रैकशेषः ॥ ३१ ॥ स० अपः अविद्यते पःपालकोवसुसोपः । अस्यगजोगवाक्षइत्यादिनापृथगन्वयः । तेननजलशब्देनपौनरुक्त्यं ॥ ति० अपआहृत्यमिलिताःकूलाविमलंजलंकुंभेषुनिधायेतिसंबन्धः ॥ ३२ ॥ ति० तादृशेतत्रवर्तति अभिषिक्तेसुग्रीवेऽङ्गदेच । तत्र किष्किन्धायां । वर्तति वर्तमानेसतीत्यर्थः ॥ ३९ ॥ ती० फलश्रुतिः । " अभिषेकंच तारायाकमायाःप्राप्तिमुत्तमाम् । सुग्रीवस्यसदाशुक्लाराज्यशोभंसगच्छति " इति ॥ ४१ ॥ इतिषड्विंशःसर्गः ॥ २६ ॥

[पा०] १ ग. माल्यानुशोभिते. २ क. ग. ङ. ट. विमलंजलं. क. च. ग. विधिवज्जलं. ३ क. शुभैर्हिरण्यशृङ्गैश्च. ४ छ. झ. ट. फलशैश्चैव. ञ. सुकुशैश्चापि. ५ क. छ. झ. ट. जांबवांस्तथा. ६ क. प्रतुष्टुवुः. ७ क. छ.—ट. हृष्टाःशतसहस्रशः. ८ ग. रामस्यवचनं. ९ छ. झ. ङ. वानरेश्वरः. १० क. छ.—ट. अपूजयन्. ११ ग. रामंचलक्ष्मणंचैवप्रशशंसुःपुनःपुनः. १२ छ. झ. वर्तिनि. १३ घ. समाकीर्णा. १४ घ.—ट. भार्यामुपलभ्य.

सप्तविंशः सर्गः ॥ २७ ॥

रामेण प्रस्रवणगिरिगुहामेत्यलक्ष्मणंप्रति तद्गुहायाःस्ववासानुगुणगुणसमृद्धिवर्णनपूर्वकं लक्ष्मणेनसहतत्रनिवासः ॥ १ ॥ लक्ष्मणेन चन्द्रदर्शनादिनासमुद्दीपितशोकंरामंप्रति बहुधासमाश्वासनम् ॥ २ ॥ रामेण लक्ष्मणप्रशंसनपूर्वकंशरत्प्रतीक्षया तत्रनिवासः ॥ ३ ॥

अभिषिक्ते तु सुग्रीवे प्रविष्टे वानरे गुहाम् ॥ आजगाम सह भ्रात्रा रामः प्रस्रवणं गिरिम् ॥ १ ॥
शार्दूलमृगसंघुष्टं सिंहैर्भीमैरवेष्टितम् ॥ नानागुल्मलतागूढं बहुपादपसंकुलम् ॥ २ ॥
ऋक्षवानरगोपुच्छैर्मार्जारैश्च निषेवितम् ॥ मेघराशिनिभं शैलं नित्यं शुचिजलाश्रयम् ॥ ३ ॥
तस्य शैलस्य शिखरे महतीमायतां गुहाम् ॥ अत्यगृह्णत वासार्थं रामः सौमित्रिणा सह ॥ ४ ॥
कृत्वा च समयं सौम्यैः सुग्रीवेण सहानघः ॥ कालयुक्तं महद्वाक्यमुवाच रघुनन्दनः ॥
विनीतं भ्रातरं भ्राता लक्ष्मणं लक्ष्मिवर्धनम् ॥ ५ ॥
इयं गिरिगुहा रम्या विशाला युक्तमारुता ॥ अस्यां वत्स्याव सौमित्रे वर्षरात्रमरिंदम ॥ ६ ॥
गिरिशृङ्गमिदं रम्यमुन्नतं पार्थिवात्मज ॥ श्वेताभिः कृष्णताम्राभिः शिलाभिरुपशोभितम् ॥ ७ ॥
नानाधातुसमाकीर्णं देवीनिर्झरशोभितम् ॥ विविधैर्वृक्षषण्डैश्च चारु चित्रलतावृतम् ॥ ८ ॥
नानाविहगसंघुष्टं मयूररवनादितम् ॥ मालतीकुन्दगुल्मैश्च सिन्धुवारकुरण्टकैः ॥ ९ ॥
कदम्बार्जुनसर्जैश्च पुष्पितैरुपशोभितम् ॥ १० ॥
इयं च नलिनी रम्या फुल्लपङ्कजमण्डिता ॥ नातिदूरे गुहाया नौ भविष्यति नृपात्मज ॥ ११ ॥
प्रागुदक्प्रवणे देशे गुहा साधु भविष्यति ॥ पश्चाच्चैवोन्नता सौम्य निवातेयं भविष्यति ॥ १२ ॥
गुहाद्वारे च सौमित्रे शिला समतला शुभा ॥ श्लक्ष्णा चैवायता चैव भिन्नाञ्जनचयोपमा ॥ १३ ॥
गिरिशृङ्गमिदं तात पश्य चोत्तरतः शुभम् ॥ भिन्नाञ्जनचयाकारमम्भोधरमिवोत्थितम् ॥ १४ ॥

अथ रामस्यैकान्तवाससमुद्भूतसीताविरहशोकप्रशमनं लक्ष्मणेन क्रियते सप्तविंशे—अभिषिक्त इत्यादि ॥ १—२ ॥ शैलं शिलामयमिति मृच्छिलोभयमयगिरिभ्यो व्यावृत्तिः । अतो न गिरिं शैलमिति पुनरुक्तिः ॥ ३—४ ॥ कालयुक्तं तत्कालोचितं ॥ ५ ॥ युक्तमारुता उचितमारुता यावदपेक्षमारुतेत्यर्थः । वसाव लोडुत्तमद्विवचनं । वर्षरात्रमिति अच् समासान्त आर्षः । जात्येकवचनं ॥ ६—८ ॥ कदम्बाः अर्जुनाः नदीसर्जाः ॥ ९ ॥ नातिदूरे भविष्यतीत्यनेन वर्षाकालस्य प्रवृत्तत्वाद्गाविजलसमृद्धा समीपवर्तिनी भविष्यतीत्यर्थः ॥ १०—११ ॥ प्रागुदक्प्रवणे देशे वर्तमाना गुहा साधु भविष्यति । प्रागुदक्प्रवणे देशे वर्तमानत्वाभिधानाद्गुहाया नैर्ऋत्यभिमुखद्वारत्वमुक्तं । अतएव पौरस्त्यवर्षप्रवेशाभावेन साधुत्वमुक्तं भवति । इयं पश्चादुन्नता पश्चाद्भागोन्नता । अतएव पुरोवातनिरोधकत्वान्निवाता च भविष्यति ॥ १२ ॥ गुहाद्वारेचेति । अस्मिन् श्लोके वर्ततइतिशेषः ॥ १३ ॥ श्वेतमिव रूप्यमिव । " दुर्वर्णं रजतं रूप्यं खर्जूरं

ति० प्रस्रवणं तदाख्यं ॥ १ ॥ स० गोपुच्छैः नीलमुखवानरविशेषैः ॥ ३ ॥ स० जीवन्तलक्ष्मीशब्दोप्यस्तीतिलक्ष्मिवर्धनमित्येतत्साधु ॥ " द्वारलक्ष्मिभर्तृपुण्यान् " इत्यादिप्रयोगात् ॥ शि० अनघः शरणागतानामघनिवर्तकः ॥ ५ ॥ स० नदीदर्दुरसंयुतं नद्यांविद्यमानमण्डूकसदृशमहामण्डूकोपेतं ॥ ७ ॥ स० प्रागुदक्प्रवणे पूर्वोत्तरभागयोर्निम्नभूते ॥ ११ ॥

[पा०] १ ङ. च. ञ. संयुक्तं. २ क. ख. घ. ङ. च. ज. ञ. भीमतरैर्वृतं. ३ ख. नानाद्रुम. ४ ङ.—ट. शुचिकरंशिवं. ख. शुचिजलंशिवं. क. शुचिकरंशुभं. ५ क. ग, ङ.—ट. रामः. ६ छ. झ. ञ. ट. वत्स्याम. ख.—च. ज. वत्स्यामि. क. वत्स्याव. ७ ख. सौम्यमुन्नतं. क. ङ.—ट. रम्यमुत्तमं. ८ ग. र मिश्रोभितं. ९ ङ.—ट. नदीदर्दुरसंयुतं. १० ख. घ. द्वारिचित्र. ११ च. ज. झ. ट. सिन्धुवारैःशिरीषकैः. ख. सिन्धुवारैश्चशोभितैः. १२ च. ज. ञ. संघैश्च. क. संकीर्णैः. ख. वंशैश्च. १३ ङ. छ. झ. ट. कृष्णाचैव. १४ ग. घ. ङ. छ. ञ. ट. गिरेःशृङ्गं. १५ ङ. झ. ञ. ट. निवोदितं. घ. निवोन्नतं.

दक्षिणस्यामपि दिशि स्थितं श्वेतमिवापरम् ॥ कैलासशिखरप्रख्यं नानाधातुविभूषितम् ॥ १५ ॥
प्राचीनवाहिनीं चैव नदीं भृशमकर्दमाम् ॥ गुहायाः पूर्वतः पश्य त्रिकूटे जाह्नवीमिव ॥ १६ ॥
चम्पकैस्तिलकैस्तालैस्तमालैरतिमुक्तकैः ॥ पद्मकैः सरलैश्चैव अशोकैश्चैव शोभिताम् ॥ १७ ॥
वानीरैस्तिनिशैश्चैव वेतसैः केतकैर्धवैः ॥ हिन्तालैस्तिरिटैर्नीपैर्वेत्रकैः कृतमालकैः ॥ १८ ॥
तीरजैः शोभिता भाति नानारूपैस्ततस्ततः ॥ वसनाभरणोपेता प्रमदेवाभ्यलङ्कृता ॥ १९ ॥
शतशः पक्षिसङ्घैश्च नानानादैर्विनादिता ॥ एकैकमनुरक्तैश्च चक्रवाकैरलङ्कृता ॥ २० ॥
पुलिनैरतिरम्यैश्च हंससारससेवितैः ॥ प्रहसन्तीव मात्येषा नारी सर्वविभूषिता ॥ २१ ॥
क्वचिन्नीलोत्पलच्छन्ना भाति रक्तोत्पलैः क्वचित् ॥ क्वचिदाभाति शुक्लैश्च दिव्यैः कुमुदकुड्मलैः ॥ २२ ॥
पारिप्लवशतैर्जुष्टा बर्हिणक्रौञ्चनादिता ॥ रमणीया नदी सौम्य ह्यनिसङ्गनिषेविता ॥ २३ ॥
पश्य चन्दनवृक्षाणां पङ्क्तीः सुरुचिता इव ॥ ककुभानां च दृश्यन्ते मनसेवोदिताः समम् ॥ २४ ॥
अहो सुरमणीयोयं देशः शत्रुनिषूदन ॥ इदं रंस्याव सौमित्रे साध्वत्र निवसावहै ॥ २५ ॥
इतश्च नातिदूरे सा किष्किन्धा चित्रकानना ॥ सुग्रीवस्य पुरी रम्या भविष्यति नृपात्मज ॥ २६ ॥
गीतवादित्रनिर्घोषः श्रूयते जयतां वर ॥ नर्दतां वानराणां च मृदङ्गाडम्बरैः सह ॥ २७ ॥
लब्ध्वा भार्यां कपिवरः प्राप्य राज्यं सुहृद्वृतः ॥ ध्रुवं नन्दति सुग्रीवः संप्राप्य महतीं श्रियम् ॥२८॥
इत्युक्त्वा न्यवसत्तत्र राघवः सहलक्ष्मणः ॥ बहुदृश्यदरीकुञ्जे तस्मिन्प्रस्रवणे गिरौ ॥ २९ ॥

श्वेतं" इत्यमरः । अपरं शृङ्गं पश्येति पूर्वेणान्वयः ॥ १४—१५ ॥ अतिमुक्तकैः पुण्ड्रकैः । पद्मकैः पद्मपर्णाख्यवृक्षविशेषैः । सरलैः यूपसरलैः । तिनिशैः स्यन्दनैः । " तिनिशे स्यन्दनो नेमिः " इत्यमरः । धवैः धुन्धुरैः । हिंतालैः लताङ्कुराख्यवृक्षैः । " अथ स्याल्लताङ्कुरः । हिन्तालस्तृणराजश्च" इति वैजयन्ती । तिरिटैः तिल्ववृक्षैः । " तिरीटस्तिल्वसार्जनौ " इत्यमरः । वेत्रकैरिति सम्यक् ॥ १६—१९ ॥ एकैकमनुरक्तैः अन्योन्यानुरागयुक्तैः ॥ २०—२२ ॥ पारिप्लवैः जलोपरिसंचारिपक्षिविशेषैः ॥ २३ ॥ सुरुचिता इव मालारूपेण ग्रथिता इव । ककुभानां अर्जुनवृक्षाणां । दृश्यन्ते पङ्क्तय इति शेषः । मनसेवोदिताः सममिति मनसा संकल्पेन । समं युगपत् । उदिता इव स्थिताः ॥ २४ ॥ रंस्याव रंस्यावहे । अतः अत्र गिरौ । निवसावहै निवसाव ॥ २५ ॥ अत्र वासे क्रियमाणे किष्किन्धा च समीपवर्तिनीभविष्यतीत्याह—इतश्चेति ॥ २६ ॥ मृदङ्गाडम्बरैः सह नर्दतां वानराणां निर्घोषः श्रूयत इत्यन्वयः ॥ २७—२८ ॥ तत्र गुहायां । कुञ्जः लतागृहं

ति० श्वेतमिवांबरं श्वेतवस्त्रमिवस्थितं ॥ १५ ॥ ति० जाह्नवीपदेन तत्रत्याजाह्नवीसदृशीमन्दाकिन्याख्यानदी ॥ १६ ॥ टीका० समंमनसाउदिताइव एकोच्छ्रायविस्तारोद्भवामदृतिसंकल्पोत्थिताइवेत्युत्प्रेक्षा ॥ शि० मनसा मदिच्छया । समं उदिताः जाताइव । चन्दनवृक्षाणांककुभानां अर्जुनवृक्षाणांचयाःपङ्क्तयोदृश्यन्ते ताःसुरुचिराःपङ्क्तीःपश्य ॥२४॥ ति० बहूनिदृश्यान्युत्तमवस्तूनियत्र तादृशकुञ्जाश्रयस्मिंतिगिरिविशेषणं ॥ २९ ॥

[पा०] १ ख. ट. शिवांवरं. क. शिवांवुदं. २ ख. घ.—ङ. ट. विराजितं. ३ ङ. परतः. छ. ट. पुरतः. ४ क. छ. झ. ट. चन्दनैस्तिलकैस्तालैः. ५ ख. अङ्कोलैश्चैव. घ. अशोकैश्च. ङ. च. ज. ञ. अशोकैरपि. क. अङ्कोठैरपि. ६ क. ग. ङ. च. ज. ञ. नीवारैः. झ. वानीरैस्तिमिदैश्चैव. ७ क. ख. वञ्जुलैः. ८ ख. झ. ट. केतकैरपि. ९ झ. तिनिशैर्नीपैः. ङ. च. ज. ञ. रज्जुनैर्नीपैः. १० क. छ. झ. ट. वेंतसैः. ११ क. ख. ङ. छ.—ट. नादविनादिता. घ. निनदनादिता. १२ ङ.—ट. सेविता. १३ क. छ.—ट. नानारससमन्विता. क. ख. नानारत्नविभूषिता. १४ झ. बर्हिणक्रौञ्चविनादिता. १५ घ. ऋषिसंघैः. छ. झ. ट. मुनिसंघनिषेविता. १६ क. सुरुचिरामुवि. १७ क. ख. घ. इह. १८ छ. झ. ट. नर्दतां. १९ ख. घ. ट. मृदङ्गा. डंबरः. २० इत्युक्त्वेत्यर्धस्थाने क. पाठे. एवमुक्त्वामहातेजालक्ष्मणंशुभलक्षणम् । न्यवसत्तत्रधर्मज्ञोराघवःसहलक्ष्मणः । इत्येकःश्लोकोदृश्यते.

सुसुखेऽपि बहुद्रव्ये तस्मिन्हि धरणीधरे ॥ बसतस्तस्य रामस्य रतिरल्पाऽपि नाभवत् ॥
हृता हि भार्या स्मरतः प्राणेभ्योऽपि गरीयसीम् ॥ २० ॥
उदयाभ्युदितं दृष्ट्वा शशाङ्कं चैव विशेषतः ॥ आविवेश न तं निद्रा निशासु शयनं गतम् ॥ २१ ॥
तत्समुत्थेन शोकेन बाष्पोपहतचेतसम् ॥ तं शोचमानं काकुत्स्थं नित्यं शोकपरायणम् ॥
तुल्यदुःखोऽब्रवीद्भ्राता लक्ष्मणोऽनुनयन्वचः ॥ २२ ॥
अलं वीर व्यथां गत्वा न त्वं शोचितुमर्हसि ॥ शोचंतो व्यवसीदन्ति सर्वार्था विदितं हि ते ॥ २३ ॥
भवान्क्रियापरो लोके भवान्दैवपरायणः ॥ आस्तिको धर्मशीलश्च व्यवसायी च राघव ॥ २४ ॥
न ह्यव्यवसितः शत्रुं राक्षसं तं विशेषतः ॥ समर्थस्त्वं रणे हन्तुं विक्रमैर्जिह्मकारिणम् ॥ २५ ॥
समुन्मूलय शोकं त्वं व्यवसायं स्थिरं कुरु ॥ ततः सपरिवारं तं निर्मूलं हंस राक्षसम् ॥ २६ ॥
पृथिवीमपि काकुत्स्थ ससागरवनाचलाम् ॥ परिवर्तयितुं शक्तः किमङ्ग पुनरावणम् ॥ २७ ॥
शरत्कालं प्रतीक्षस्व प्रावृट्कालोऽयमागतः ॥ ततः सराज्यं सगणं रावणं त्वं वधिष्यसि ॥ २८ ॥
अहं तु खलु ते वीर्यं प्रसुप्तं प्रतिबोधये ॥ दीप्तैरौहुतिभिः काले भस्मच्छन्नमिवानलम् ॥ २९ ॥
लक्ष्मणस्य तु तद्वाक्यं प्रतिपूज्य हितं शुभम् ॥ राघवः सुहृदं स्निग्धमिदं वचनमब्रवीत् ॥ ४० ॥
वाच्यं यदनुरक्तेन स्निग्धेन च हितेन च ॥ सत्यविक्रमयुक्तेन तदुक्तं लक्ष्मण त्वया ॥ ४१ ॥
एष शोकः परित्यक्तः सर्वकार्यावसादकः ॥ विक्रमेष्वप्रतिहतं तेजः प्रोत्साहयाम्यहम् ॥ ४२ ॥
शरत्कालं प्रतीक्षिष्ये स्थितोऽस्मि वचने तव ॥ सुग्रीवस्य नदीनां च प्रसादमनुपालयन् ॥ ४३ ॥

॥ २९ ॥ बहुद्रव्ये बहुपुष्पफलादिधने ॥ ३० ॥ उदयाभ्युदितं उदयपर्वतादुद्गतं ॥ ३१ ॥ लक्ष्मणोऽनुनयन्वचइतिपाठः ॥ ३२—३३ ॥ क्रियापरइत्यनेन कार्यसिद्धिहेतुभूतपुरुषकारवत्त्वमुक्तं । दैवपरायण इत्यनेन कार्यसिद्धिहेतुभूतदेवतानिष्ठतोक्ता ॥ ३४ ॥ अव्यवसितः धैर्यरहितइत्यर्थः । रणे विक्रमैर्हन्तुं नसमर्थइत्यन्वयः ॥ ३५—३६ ॥ परिवर्तयितुं अधरोत्तरं कर्तुं । अङ्गेति संबोधनं । पुनरित्यत्रदीर्घाभावार्षः ॥ २७—२८ ॥ दीप्तैः ज्वलनकरैः । हुद्बोधकैः वाक्यैरितिशेषः ॥ ३९—४० ॥ अनुरक्तेन अनुरागयुक्तेन । स्निग्धेन तत्कालोचितप्रियपरेण । हितेन हितपरेण । सत्यविक्रमयुक्तेन अमोघविक्रमयुक्तेन । यद्वाच्यं

स० बहुद्रव्ये अनेकद्रव्योत्पत्तिस्थाने ॥ ३० ॥ स० उदयाभ्युदितं उदयपर्वतेऽभ्युदितं । सविशेषतः द्वितीयान्तत्वात्तसिः । सविशेषं पूर्णत्वविशेषसहितं । शशाङ्कं चन्द्रं दृष्ट्वास्थितं । शयनं तल्पं प्राप्तंतरामंनिद्राविवेश । यद्वासविशेषशशाङ्कउदयाभ्युदितंउदयपर्वतंयतंसूर्यमिवदृष्ट्वास्थितमित्यादियोजना ॥३१॥ टीका० तत्समुत्थेनसीतास्मरणसमुत्थेन । ति० अनुनयं अनुनयवत् ॥ ३२ ॥ स० हेवीरव्यर्थांगलाअलं व्यर्थांनकुर्विंत्यर्थः । " अलंखल्वोःप्रतिषेधयोः प्राचांक्त्वा" इतिप्रतिषेधार्थकालंशब्दयोगेसमाप्तकर्तृकत्वाभावेपिक्त्वाप्रत्ययः । यद्वा अलमत्यन्तंव्यर्थांगला मानसिकदुःखविशेषंप्राप्य शोचितुमार्हसीत्येकमेववाक्यं । शोचतः पुरुषस्यसर्वार्थाः अवसीदन्ति अवसन्नाभवन्ति नश्यन्तीतियावत् ॥ शि० सर्वेषा अत्यन्तंशोचन्तोजनाअवसीदन्तिइतितेविदितं ॥ ३३ ॥ टीका० दैवपरायणः भाग्यसंपन्न उभयत्रहेतुः ॥ ति० क्रियापरः नित्यकर्मानुष्ठाता ॥ शि० दैवपरायणः देवपराणांदेवतृप्तिकारकाणांअयनआश्रयः भवानेव । अतएव आस्तिकादिर्भवानेव । एतेनलक्षणानतामात्रेणसर्वकार्यसेत्स्यतीतिसूचितं ॥ स० आस्तिकः अस्तिपरलोकइतिज्ञानी । धर्मशीलः धर्मेमनुषिशीलंस्वभावोयस्य सदाधनुर्धारीतियावत् ॥ अभिधानंतूत्तरपूर्वं । व्यवसायी उद्योगवान् ॥ ३४ ॥ रामानु० विक्रमेजिह्मकारिणं विक्रमविषयेछद्मकारिणं ॥ ति० अव्यवसितः शोकेनोद्यमहीनस्त्वं हन्तुंनसमर्थः । विक्रमे विक्रमस्थानेरणे जिह्मकारिणं कुटिलं ॥ ३५ ॥ ति० काले होमकाले ॥ ३९ ॥

[पा०] १ क. छ. ट. सुसुखेहि. २ ब. क. घ. ञ. तस्मिन्प्रस्रवणेगिरौ. ३ च. उदयाभ्युदयं. ४ क. घ. ट. सविशेषतः. ५ क. ञ. ञ. चेतन. ६ ञ. लक्ष्मणोनुनयंवचः ७ ट. शोचन्तो. ८ ख. ग. छ.—ट. अवसीदन्ति. ९ ट. सर्वेषा. १० क. ग.—ट. विक्रमेजिह्मकारणं. ख. विक्रमोद्यमकारणं. ११ छ. ञ. ञ. ट. स्थिरीकुरु. १२ छ. ञ. ट. तंराक्षसंहन्तुमर्हसि. १३ ञ. किंपुनस्तंहिरावणं. छ. ट. किंपुनस्त्वंहि. ग. किंपुनारावणंरणे. म. किमङ्गयुधिरावणं. १४ क राहुतिसंघातैर्भस्म. १५ छ. ञ. ट. लक्ष्मणस्यहि.

उपकारेण वीरस्तु प्रतिकारेण युज्यते ॥ अकृतज्ञोऽप्रतिकृतो हन्ति सत्त्ववतां मनः ॥ ४४ ॥
अथैवमुक्तः प्रणिधाय लक्ष्मणः कृताञ्जलिस्तत्प्रतिपूज्य भाषितम् ॥
उवाच रामं स्वभिरामदर्शनं प्रदर्शयन्दर्शनमात्मनः शुभम् ॥ ४५ ॥
यथोक्तमेतच्च सर्वमीप्सितं नरेन्द्र कर्ता नचिराद्वरीश्वरः ॥
शरत्प्रतीक्षः क्षमतामिमं भवाञ्जलप्रपातं रिपुनिग्रहे धृतः ॥ ४६ ॥
नियम्य कोपं प्रतिपाल्यतां शरत्क्षमस्व मासांश्चतुरो मया सह ॥
वसन्गिरेऽस्मिन्मृगराजसेविते संवर्धयञ्शत्रुवधे समुद्यमम् ॥ ४७ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे सप्तविंशः सर्गः ॥ २७ ॥

अष्टाविंशः सर्गः ॥ २८ ॥

रामेणलक्ष्मणंप्रतिवर्षाकालवर्णनम् ॥ १ ॥

स तथा वालिनं हत्वा सुग्रीवमभिषिच्य च ॥ वसन्माल्यवतः पृष्ठे रामो लक्ष्मणमब्रवीत् ॥ १ ॥
अयं स कालः संप्राप्तः समयोऽद्य जलागमः ॥ संपश्य त्वं नभो मेघैः संवृतं गिरिसन्निभैः ॥ २ ॥

तत्सर्वं त्वयोक्तमितिसंबन्धः ॥ ४१—४३ ॥ तुशब्दोऽवधारणे । उपकारेण युक्तो वीरः प्रतिकारेण युज्यतएव । प्रत्युपकारंकरोत्येवेत्यर्थः । अप्रतिकृतः अकृतप्रत्युपकारः पुरुषः । सत्त्ववतां सात्त्विकानां मनः । हन्ति पीडयति । सात्त्विकास्तमजस्रं निन्दन्तीत्यर्थः । सज्जनापवादभीतः सुग्रीवोस्माकं प्रत्युपकारंकरोत्येवेति भावः ॥ ४४ ॥ प्रणिधाय भाविकार्यमालोच्य । दर्शनं मतं । प्रणिधानेनदृष्टार्थमित्यर्थः ॥ ४५ ॥ नचिरात् अविलम्बितं । जलानि प्रपात्यन्तेस्मिन्निति जलप्रपातो वर्षाकालः । भवान् क्षमतां त्वं क्षमस्व । वर्षाकालकृतविरहवेदनां मा कुर्वित्यर्थः । रिपुनिग्रहे धृतः धैर्ययुक्तः ॥ ४६ ॥ सुग्रीवः प्रत्युपकारं करोतुवा मा वा सद्यः शत्रुवधः कर्तव्यइति पुनः संजातकोपंरामं प्रत्याह—नियम्येति ॥ चतुरोमासान् आषाढश्रावणभाद्रपदाश्वयुजान् । शरत् कार्तिकमासः । शत्रुवधेसमुद्यमं उत्साहं । संवर्धयन् अभिवर्धयन् । समुद्यतइतिपाठे संवर्तयन् मृगराजादीन्नाशयन् ॥ ४७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने सप्तविंशः सर्गः ॥ २७ ॥

अथ रामः स्वस्याश्रितविश्लेषासहिष्णुत्वमन्यापदेशेन लक्ष्मणाय प्रदर्शयन् वर्षर्तुवर्णनमारभतेऽष्टाविंशे—स तथेत्यादि ॥ यत्किंचिद्विरोधिनिरसनाश्रितसंरक्षणलाभेप्यसत्कल्पमेतन्मन्यमानः । माल्यवतः पूर्वं प्रस्रवणाख्यतयोक्तस्य गिरेः । पृष्ठे उपरि । वसन् सर्वजनोज्जीवनाय सन्निहित इत्यर्थः ॥ १ ॥ समयः सुग्रीवस्य स्थानावधिलेन संकेतितः । सोयं जलागमः

तीo सुग्रीवस्त्वयमस्माकंप्रत्युपकारंकरिष्यतीत्याशयेनाह—उपकारेणेति ॥ शिo अकृतज्ञः विस्मृतोपकारः । अतएव अप्रतिकृतः प्रत्युपकाररहितःजनः । सत्त्ववतां महात्मनां । मनः ईप्सितार्थां धर्मशास्त्रमिस्यर्थः । हन्ति नमन्यते । एतेनशास्त्रानुसारित्वात्सुग्रीवोमदुपकृतिंनविस्मरिष्यतीतिसूचितं ॥ ४४ ॥ तिo तदेव रामवाक्यमेव । युक्तं प्रणिधायनिश्चित्य । आत्मनः शुभंदर्शनं शुभांबुद्धिं । प्रदर्शयन्नुवाच ॥ ४५ ॥ रामानुo संवर्तयन् कालंयापयन् ॥ ४७ ॥ इतिसप्तविंशःसर्गः ॥ २७ ॥

टीकाo वर्षर्तोर्धर्मोविरहिभिर्दुस्सहइतिहृदिनिधायतल्लक्षणमाह—अयमिति ॥ सoo जलागमः जलानामागमआगमनंयस्मिन्सतथा । शिo जलागमः वृष्टिप्रापकःअतएवकालः सर्वस्थित्युपदेशकः । कालइत्युपदेशार्थककालधातुप्रकृतिककर्त्रन्तः । अत-

[पाo] १ ङ. छ. झ. ञ. ट. तदेवमुक्तं. च. ज. तदैवमुक्तं. २ छ. झ. ट. नचिरात्सुवानरः. ३ ख. शोकं. ४ छ. झ. ट. परिपाल्यतां. ५ क. ग.—ट. संवर्तयन्. ६ छ. झ. ट. समर्थः. ग. घ. च. ज. ञ. समुद्यतः. ७ क.—ङ. छ. झ. ञ. ट. सतदा. क. च. ञ. तथाहि. ८ ग. मभिषिच्यतु.

नवमासधृतं गर्भं भास्करस्य गभस्तिभिः ॥ पीत्वा रसं समुद्राणां द्यौः प्रसूते रसायनम् ॥ ३ ॥
शक्यमम्बरमारुह्य मेघसोपानपङ्क्तिभिः ॥ कुटजार्जुनमालाभिरलंकर्तुं दिवाकरम् ॥ ४ ॥
सन्ध्यारागोत्थितैस्ताम्रैरन्तेष्वधिकपाण्डरैः ॥ स्निग्धैरभ्रपटच्छेदैर्बद्धव्रणमिवाम्बरम् ॥ ५ ॥
मन्दमारुतनिश्वासं सन्ध्याचन्दनरञ्जितम् ॥ आपाण्डुजलदं भाति कामातुरमिवाम्बरम् ॥ ६ ॥
एषा घर्मपरिक्लिष्टा नववारिपरिप्लुता ॥ सीतेव शोकसन्तप्ता मही बाष्पं विमुञ्चति ॥ ७ ॥
मेघोदरविनिर्मुक्ताः कैलासशिखरोपमाः ॥ शक्यमञ्जलिभिः पातुं वाताः केतकिगन्धिनः ॥ ८ ॥
एष फुल्लार्जुनः शैलः केतकैरधिवासितः ॥ सुग्रीव इव शान्तारिर्धाराभिरभिषिच्यते ॥ ९ ॥

कालः वर्षाकालः । अद्य संप्राप्तः संप्रवृत्तः ॥ २ ॥ द्यौः भास्करस्य गभस्तिभिः किरणैः । समुद्राणां रसं पीत्वा नवमासधृतं कार्तिकाद्यापाढपर्यन्तनवमासधृतं । रसायनं पदूसानां कारणं । गर्भं जलं । प्रसूते जनयति । भास्करस्य गभस्तिभिरित्यनेन " यामिरादित्यस्तपति रश्मिभिस्ताभिः पर्जन्यो वर्षति " इति श्रुतिः सूच्यते । समुद्राणां रसमित्यनेन हंसस्य क्षीरनीरविभागचातुर्यवत् नीरलवणविभागसामर्थ्यं द्योत्यते । अत्र प्रस्तुतद्योवर्षवृत्तान्तेनाप्रस्तुतस्यानेकनावकाहितवीर्यगर्भं भस्त्रिकाभिर्धृत्वा काले प्रेमास्पदसुतप्रसवकृद्भूवृत्तान्तस्य प्रतीतेः समासोक्तिरलंकारः । यदि सीता सन्निहिता सापीदानीं नवप्रसूतिःस्यादिति राममनोरथो गम्यते ॥ ३ ॥ मेघा एव सोपानानि तेषां पङ्क्तिभिरम्बरमारुह्य । कुटजार्जुनानां वार्षिकपुष्पाणां मालाभिः । दिवाकरं अस्मत्कुलगुरुभूतसूर्यमध्ये सदा ध्येयं विष्णुं । " अलंकारप्रियो विष्णुः " इति न्यायेनालंकर्तुं शक्यं । लिङ्गसामान्ये नपुंसकं । " सह पत्न्या विशालाक्ष्या नारायणमुपागमत् " इत्युक्तरीत्या सीतया सहाराधनं न लब्धमित्युत्कण्ठा द्योत्यते ॥ ४ ॥ सन्ध्यारागोत्थितैः उत्थितसन्ध्यारागैः । आहिताग्न्यादित्वात्परनिपातः । बद्धव्रणपक्षे उत्थितसन्ध्यातुल्यरागैः अतएव ताम्रैः । अन्तेषु प्रान्तेषु । अधिकपाण्डरैः अत्यन्तशुभ्रैः । स्निग्धैः आर्द्रैः । अभ्रपटच्छेदैः अभ्राणि मेघा एव पटच्छेदाः वस्त्रखण्डाः तैः । बद्धव्रणमिवाम्बरं भाति । उपमालंकारः ॥ ५ ॥ मन्दमारुत एव निश्वासो यस्य तत् तथा । अनेन निरंतरनिश्वासवत्त्वमुच्यते । सन्ध्या सन्ध्यारागः स एव चन्दनं तेनरञ्जितं आलिप्तं । अनेन तापशान्तिकरशीतोपचार उक्तः । आपाण्डुजलदमित्यनेन विरहपाण्डुतोक्ता । अतएव कामातुरं । कान्ताविरहपीडितमिवेत्युत्प्रेक्षा रूपकानुप्राणिता ॥ ६ ॥ घर्मेण ग्रीष्मसंतापेन । सीतापक्षे विरहतापेन परिक्लिष्टा । नववारिभिः परिप्लुतासिक्ता । सीतापक्षे अश्रुक्लिन्ना । बाष्पं ऊष्म अश्रुजलं च । विमुञ्चति । प्रथमजलनिपाते हि भूमेरूष्मा समुद्भवति । मेघालंकारः ॥७॥ मेघेत्यादिना मान्द्यमुक्तं । कैलासेत्यादिना शैत्यसौरभ्ये । एवंगुणत्वात् वाताः आदरातिशयेन अञ्जलिभिरादाय पातुं शक्यं । अतिशयोक्तिरलंकारः ॥ ८ ॥ फुल्लार्जुन इत्यनेन मालालंकृतत्वमुच्यते । केतकैरधिवासित इत्यनेन चन्दनादिमत्त्वं च सुग्रीवस्य सूच्यते । शान्तारिरित्यनेन शैलस्य निस्तापत्वमुक्तं । बिम्बप्रतिबिम्बभावेन साम्यप्रतिपादनादुपमालंकारः ॥ ९ ॥

एषनपौनरुक्त्यं ॥ २ ॥ स० कुटजो गिरिमल्लिका ॥ ४ ॥ तनि० अंबरस्य वणसंबन्धासंभवादतिशयोक्तिरलङ्कारः ॥ टीका० व्रणरोपनायनिहितेनभूतादिनेत्यर्थः ॥ प्रतीयतइतिशेषः ॥ ५ ॥ ति० घर्मेण रवितेजसा । परिक्लिष्टा संतप्ता ॥ ७ ॥ तनि० अञ्जलिभिःपातुंशक्यमिति वातावयवानामतिप्रक्लिन्नावयवलमतिशीतलत्वं च व्यञ्जितं ॥ टी० शक्यमञ्जलिभिःपातुमित्यनेन शैत्यसौरभ्यसौरभ्यभूयस्त्वादादरातिशयेनाञ्जलिभिरादाय पातुंशक्यतइत्युच्यते ॥ स० मेघोदरविनिर्मुक्ताइत्यनेन बहुदूरागमनेन मान्द्यं सूचयति । कैलासदलच्छीतलाः । केतक्यागन्धइव गन्धएषामस्तीति केतकिगन्धिनः । एतादृशावाता अनेकवारं अञ्जलिभिरादाय पातुं शक्यं शक्याः । " सुखनासिकावचनः—" सूत्रभाष्यकैयटादिदिशा " शक्यंश्रुदपहन्तुं " इतिवच्छक्यमित्युपपदं पदसंस्कारपक्षदर्शितेवं ॥ ८ ॥ ति० अत्र शैलस्यारिवनदाहकलाहावाभिः ॥ ९ ॥

[पा०] १ ङ. ञ. ट. दिवाकरः. २ ग. कालोत्थितैः. ३ रन्तेष्वधिकपाण्डुभिः. ग. क. घ. छ. ज. रन्तेष्वधिकपाण्डुभिः. ४ ङ.—ट. कर्पूरदलशीतलाः. ५ क. ख. ग. ङ.—ट. केतकगन्धिनः. ६ ङ.—ट. रविवासितः.

मेघकृष्णाजिनधरा धारायज्ञोपवीतिनः ॥ मारुतापूरितगुहाः प्राधीता इव पर्वताः ॥ १० ॥
कशाभिरिव हैमीभिर्विद्युद्भिरिव ताडितम् ॥ अन्तः स्तनितनिर्घोषं सवेदनमिवाम्बरम् ॥ ११ ॥
नीलमेघाश्रिता विद्युत्स्फुरन्ती प्रतिभाति मा ॥ स्फुरन्ती रावणस्याङ्के वैदेहीव तपस्विनी ॥ १२ ॥
इमास्ता मन्मथवतां हिताः प्रतिहता दिशः ॥ अनुलिप्ता इव घनैर्नष्टग्रहनिशाकराः ॥ १३ ॥
क्वचिद्बाष्पाभिसंरुद्धान्वर्षागमसमुत्सुकान् ॥ कुटजान्पश्य सौमित्रे पुष्पितान्गिरिसानुषु ॥
मम शोकाभिभूतस्य कामसंदीपनान्स्थितान् ॥ १४ ॥

रजः प्रशान्तं सहिमोऽद्य वायुर्निदाघदोषप्रसराः प्रशान्ताः ॥
स्थिता हि यात्रा वसुधाधिपानां प्रवासिनो यान्ति नराः स्वदेशान् ॥ १५ ॥
संप्रस्थिता मानसवासलुब्धाः प्रियान्विताः संप्रति चक्रवाकाः ॥
अभीक्ष्णवर्षोदकविक्षतेषु यानानि मार्गेषु न संपतन्ति ॥ १६ ॥

मेघा एव कृष्णाजिनानि तेषां धराः । नीलवर्णतया तद्रूपणं । शुभ्रत्वेन धाराया उपवीतत्वरूपणं । धारा निर्झरधाराः । मारुतापूरितगुहा इत्यनेन शब्दहेतुवायुमत्कण्ठत्वमुच्यते । प्राधीताः प्रकर्षेणाध्येतुमुपक्रान्ताः । आदिकर्मणि क्तः । रूपकानुप्राणित उपमालंकारः ॥ १० ॥ विद्युद्भिरेव हैमीभिः कशाभिः । व्यस्तरूपकं । ताडितमिव स्थितं । स्तनितमेव निर्घोषो यस्य तत् । अतएव अन्तः सवेदनमिवाम्बरं भाति । कशाभिघातेन ऊर्ध्वरधीयानसखेदमाणवकसाम्यमुच्यते । उपमोत्प्रेक्षारूपकाणामङ्गाङ्गिभावेन सङ्करः ॥ ११ ॥ स्फुरन्ती चलन्ती । तपस्विनी शोच्या ॥ १२ ॥ घनैरनुलिप्ता इव स्थिताः । नष्टग्रहनिशाकराः अदृष्टशुक्रादिग्रहचन्द्राः । " णश अदर्शने " इत्यस्यानिष्ठा । यद्वा नष्टग्रहः ग्रहणरहितः अदृश्यमान इत्यर्थः । तादृशश्चन्द्रो यासु ताः । अतएव प्रतिहताः अज्ञातप्राच्युदीच्यादिविदिशाविभागाः । ता इमाः दिशः । मन्मथवतां सस्त्रीकाणां । हिताः सुखकराः । विरहिणां तु दुःखकरा इत्यर्थः । यद्वा मन्मथवतां अभिसारिकजनानां । हिताः ॥ १३ ॥ क्वचिदित्यादिसार्धश्लोक एकान्वयः । बाष्पाभिसंरुद्धान् अभिनवजलकणसेचनसमुत्थनिदाघोष्मसमावृतान् । कामुकपक्षे आनन्दबाष्पवतः । वर्षागमेन समुत्सुकान् आप्यायितान् । अन्यत्र स्त्रीसङ्गमसन्तुष्टान् । गिरिसानुषु पुष्पितान् । अन्यत्र सहासान् । अतएव मम शोकाभिभूतस्य कामसंदीपनान् । अन्यरतिदर्शनस्योद्दीपनत्वादिति भावः । अनेन केषुचिदस्मदीयेषु ब्रह्मानुभवसंतुष्टेषु सत्सु केषांचिदस्मदनुभवाभावो ममातीव दुःसहइत्युक्तं ॥ १४ ॥ अथ भगवत्कटाक्षफलमन्यापदेशेन दर्शयति—रज इत्यादिना । रज इत्युपलक्षणं । रजस्तमसी प्रक्रान्ते । वायुशब्देन सततसंसारगतिर्जन उच्यते । सहिम इति शीतलहृदयत्वं । निदाघेत्यादिना आध्यात्मिकादितापशान्तिः । यात्रा संसारगतिः । स्वदेशान् स्वप्राप्यभूतपरमपदं । स्वभावार्थस्तु स्पष्टएव ॥ १५ ॥ मानसवासलुब्धाः हंसाः संप्रस्थिताः वर्षभीततया क्वचिल्लीनाः । परमहंसाख्यानां संन्यासिनां चातुर्मास्यतया संचारनिवृत्तिर्योत्यते । चक्रवाकाः कामोद्रेकेण प्रियासमन्विता भवन्ति । यानासंपतने हेतुः अभीक्ष्णेति । यानानि शकटरथादीनि । संप्रस्थिता इत्यनेन कृतवैराग्यत्वमुच्यते । प्रियान्विताइति भगवद्वचिः ।

तनि० अन्तस्संनिहितशब्देन प्राधीयमानवेदानांमाणवकानां कशाघातजनितरुदितं गुरुभारणानूद्वारणशब्दमिश्रमित्युच्यते ॥ ११ ॥ **स०** अस्यापत्यं इः चतुर्मुखः । तं रावयतीति इरावणः । " सभाषामकरोत् " इतिश्रुतेः । एतादृशस्य मे अङ्के स्फुरन्ती तपस्विनीवैदेहीव प्रतिभाति । स्वस्य नीलमेघसदृशत्वादितिभावः ॥ १२ ॥ **स०** मन्मथवतांहिताभितिषष्ठीप्रयोगेण स्वस्य तत्कृतबाधा नास्तीति सूचयति ॥ १३ ॥ **स०** ममच शोकश्च ममशोकौ । ताभ्यामभिभूतस्यपुरुषस्य स्थितान् अचञ्चलान् ॥ १४ ॥ **रामानु०** सहिमः सशीकरः । स्थिता निवृत्ता स्थिता यान्तीतिच सिद्धवन्निर्देशः वर्षाकाले संभावितत्वात्कृतः ॥ १५ ॥ **टीका०** नसंपतन्ति भ्रमन्ति ॥ १६ ॥

[पा०] १ क. ग. च.—ट. मातिमे, २ ख. संनद्धान्,

क्वचित्प्रकाशं क्वचिदप्रकाशं नभः प्रकीर्णाम्बुधरं विभाति ॥
क्वचित्क्वचित्पर्वतसन्निरुद्धं रूपं यथा शान्तमहार्णवस्य ॥ १७ ॥
व्यामिश्रितं सर्जकदम्बपुष्पैर्नवं जलं पर्वतधातुताम्रम् ॥
मयूरकेकाभिरनुप्रयातं शैलापगाः शीघ्रतरं वहन्ति ॥ १८ ॥
रसाकुलं षट्पदसन्निकाशं प्रभुज्यते जम्बुफलं प्रकामम् ॥
अनेकवर्णं पवनावधूतं भूमौ पतत्याम्रफलं विपक्वम् ॥ १९ ॥
विद्युत्पताकाः सबलाकमालाः शैलेन्द्रकूटाकृतिसन्निकाशाः ॥
गर्जन्ति मेघाः समुदीर्णनादा मत्ता गजेन्द्रा इव संयुगस्थाः ॥ २० ॥
वर्षोदकाप्यायितशाद्वलानि प्रवृत्तनृत्तोत्सवबर्हिणानि ॥
वनानि निर्वृष्टबलाहकानि पश्यापराह्णेष्वधिकं विभान्ति ॥ २१ ॥
समुद्वहन्तः सलिलातिभारं बलाकिनो वारिधरा नदन्तः ॥
महत्सु शृङ्गेषु महीधराणां विश्रम्यविश्रम्य पुनः प्रयान्ति ॥ २२ ॥
मेघाभिकामा परिसंपतन्ती संमोदिता भाति बलाकपङ्क्तिः ॥
वातावधूता वरपौण्डरीकी लम्बेव माला रचिताम्बरस्य ॥ २३ ॥

अभीक्ष्णेत्यादिना भगवत्कटाक्षेण निवृत्तकर्मत्वमुच्यते ॥ १६ ॥ प्रकीर्णाम्बुधरं विप्रकीर्णमेघं । अतएव क्वचित्प्रकाशं क्वचिदप्रकाशं नभः । क्वचित्क्वचित् पर्वतसन्निरुद्धं । शान्तमहार्णवस्य निस्तरङ्गसमुद्रस्य । रूपं स्वरूपमिव भाति । अनेनमन्दाज्ञानेन प्रकाशाप्रकाशं ब्रह्मस्वरूपमुच्यते ॥ १७ ॥ सर्जैः असनपुष्पैः । कदम्बपुष्पैश्च व्यामिश्रितं संमिलितं । पर्वतधातुताम्रमित्यनेन नदीनां पर्वतादुत्पत्तिरुक्ता । मयूराणां केकाभिः केकारवैः । अनुप्रयातं अनुस्यूतं । नवं जलं वहन्ति । अत्र सात्त्विकराजसज्ञानमिश्रं भगवद्विषयानुरागयुक्तं भक्तिप्रेरितस्तुतिरवमुखरितपरिसरं हृदयं वहन्तो भक्ताः कथ्यन्ते ॥१८॥ रसाकुलं माधुर्यव्याप्तं । षट्पदसन्निकाशं भृङ्गवन्नीलं । जम्बू जम्ब्वाख्यं फलं । "जम्बूःस्त्री जम्बु जाम्बवं" इत्यमरः । प्रकामं अतिशयेन प्रभुज्यते । जनैरिति शेषः । अनेकवर्णं रक्तहरिताद्यनेकरूपं । आम्रफलं चूतफलं । अनेन भगवत्कृपया जीवफलभोग उच्यते ॥ १९ ॥ नक्षत्रमालास्थानीया बलाकमाला । शैलेन्द्रस्य कूटानां शृङ्गाणामाकृतेः संस्थानस्य सन्निकाशास्तुल्याः । अनेन सर्वलोकप्रसिद्धाः सकलवावदूकाः वेदमार्गप्रतिष्ठापका उक्ताः ॥ २० ॥ निर्वृष्टाः वर्षुकाः बलाहकाः मेघाः येषु तानि । कर्तरि क्तः । अत्र दिव्यदम्पत्योः स्वकरोद्धृतकुम्भजलसिक्तालवालकलितोद्यानतुल्या लोकाः सर्वे भगवत्कृपावर्षेण संपन्नार्थकामा इत्युच्यते ॥ २१ ॥ समुद्वहन्तइति सगर्भस्त्रीजनाः पर्वतमारोहन्त इव महत्सु शृङ्गेषु पुनःपुनर्विश्रम्य प्रयान्ति । अनेन "हृदयेनोद्वहन्हरिं" इत्युक्तरीत्या भगवद्ध्यानेन युक्ताः विशदज्ञानाः सन्ततस्तुतिशीलाः पूर्वाघोत्तराघक्लेशं क्रमेणोत्तीर्य परां कोटिमापन्नाः प्रतिपाद्यन्ते ॥ २२ ॥ गर्भधारणार्थं मेघमभिकामयत इति मेघा-

स० प्रकीर्णाम्बुधरंनभः । क्वचित्प्रकाशमित्यादि क्रियाविशेषणं । विभाति । पर्वतैः संनिरुद्धं संवृतं शान्तंमहार्णवस्वरूपमिव दृश्यते । अभूतोपमेयं ॥ रामेश्वरे जलस्तंभस्योत्तरत्र करिष्यमाणत्वात् ॥१७॥ शि० रसाकुलं रसैर्व्याप्तं । षट्पदसंनि षट्पदैःसंनीयते रसपानार्थंप्राप्यते । तत् अनेकवर्णं पवनावधूतं वायुनाकंपितं विपक्वं जम्बुफलं आम्रफलंच भूमौपतति ।अतएव काशं सुखव्याप्तंयथाभवतितथा प्रकामं भुज्यतेजन्तुभिरितिशेषः ॥ १९ ॥ टीका० लोकेभारभृतामयंस्वभावइतिभावः ॥ स० सलिलातिभारं सलिलानांअत्यन्तभारंसमुद्वहन्तः । बलाकिनः बलाकाएषांसन्तीतिशिखादित्वादिनिः । "बलाकादयश्च" इतिनिपातनात्साधुः । "बलाकाबिसकण्ठिका" इत्यमरः । यद्वा पूर्वमत्रोत्तरत्रचबलाकशब्दोबकवाचीपुँल्लिङ्गोबोध्यः । अतएवोक्तं "बलाकादयश्चे"तिसूत्रव्याख्यानावसरेमनोरमायां । "बलाकाबकपङ्क्तिःस्याद्बलाकाबिसकण्ठिका । बलाकाकामुकीप्रोक्ताबलाकश्चबकोमतः" इतितत्त्वसुबोधि-

[पा०] १ क. ख. ग. ङ. च. ज. ञ. रुतानुयातं. २ ख. विपक्वं. ३ क. ख. विमृश्यविश्रम्य. ४ छ. झ. ट. रुचिरांबरस्य.

बालेन्द्रगोपान्तरचित्रितेन विभाति भूमिर्नवशाद्वलेन ॥
गात्रानुवृत्तेन शुकप्रभेण नारीव लाक्षोक्षितकम्बलेन ॥ २४ ॥
निद्रा शनैः केशवमभ्युपैति द्रुतं नदी सागरमभ्युपैति ॥
हृष्टा बलाका घनमभ्युपैति कान्ता सकामा प्रियमभ्युपैति ॥ २५ ॥
जाता वनान्ताः शिखिसंप्रनृत्ता जाताः कदम्बाः सकदम्बशाखाः ॥
जाता वृषा गोषु समानकामा जाता मही सस्यवनाभिरामा ॥ २६ ॥
वहन्ति वर्षन्ति नदन्ति भान्ति ध्यायन्ति नृत्यन्ति समाश्वसन्ति ॥
नद्यो घना मत्तगजा वनान्ताः प्रियाविहीनाः शिखिनः प्लवङ्गाः ॥ २७ ॥
प्रहर्षिताः केतकपुष्पगन्धमाघ्राय हृष्टा वननिर्झरेषु ॥
प्रपातशब्दाकुलिता गजेन्द्राः सार्धं मयूरैः समदा नदन्ति ॥ २८ ॥
धारानिपातैरभिहन्यमानाः कदम्बशाखासु विलम्बमानाः ॥
क्षणार्जितं पुष्परसावगाढं शनैर्मदं षट्चरणास्त्यजन्ति ॥ २९ ॥

मिकामा परिसंपतन्ती मेघंप्राप्तुमागच्छन्तीत्यर्थः । संमोदिता संजातसंमोदा । पुण्डरीकाणां सितपद्मानां विकारः पौण्डरीकी वरा चासौ पौण्डरीकीचेति कर्मधारयः । लम्बा रचिता लम्बमानतया कृता । अनेन भगवन्तं कालमेघश्यामं प्राप्तुं प्रवृत्ता भक्तिरूपापन्नधीर्भवति सत्पुरुषस्येति द्योत्यते ॥ २३ ॥ बालेन्द्रगोपैः अन्तरेषुचित्रितेन नानावर्णीकृतेन । नवशाद्वलेन उपलक्षिता भूमिः । शुकप्रभेण प्राचुर्येण शुकवर्णेन । लाक्षोक्षितकम्बलेन मध्येमध्ये लाक्षारसरञ्जितेन कम्बलेन नारीवभाति । अत्र भगवत्कटाक्षवर्षेण किंचिदुदञ्चितभक्तिका उच्यन्ते ॥ २४ ॥ निद्रेति । आषाढे स्वापारम्भः । श्रावणे निद्राशक्तिरुच्यते । अत्र तुल्ययोगितालंकारः । लोकोज्जीवनप्रवृत्त्या हरेस्तदेकचित्तत्वं शेषभूतानां शेषिपारतन्त्र्यसिद्धिश्च द्योतिता ॥ २५ ॥ शिखिभिः संप्रनृत्तं येषु ते तथोक्ताः । कदम्बशब्देन कदम्बपुष्पमुच्यते । सकदम्बपुष्पशाखा इत्यर्थः । सस्यवनेन सस्यसमूहेन । अभिरामा रम्या । अनेन सर्वानुकूल्यमुक्तं ॥ २६ ॥ वहन्तीति यथासंख्यमलंकारः । प्लवङ्गाः वानराः । समाश्वसन्ति । एकत्रैवबहुभक्ष्यलाभेन अचलचित्ता भवन्तीत्यर्थः ॥ २७ ॥ हृष्टाः पूर्वमेव संतुष्टाः । केतकगन्धमाघ्राय प्रहर्षिताः प्रकर्षेण संतुष्टाः । वननिर्झरेषु यः प्रपातशब्दः पतनकृतशब्दः तेनाकुलिताः ॥ २८ ॥ क्षणार्जितं तत्क्षणसंपादितं । पुष्परसेनावगाढं उत्पन्नं मदं । धारानिपातैः अभिहन्यमानाः अतएव पुष्पं विहायकेवलं शाखासु लम्बमा-

न्यामप्येवमेवबोध्यं । विश्रम्यविश्रम्यभारवहत्वादितिभावः ॥ २२ ॥ स० निद्रा निद्रामुद्रा । केशवं नारायणं । आषाढशुक्लैकादश्यांहरेःस्वापोक्तेः ॥ २५ ॥ शि० नदीप्रभृतयःयथाक्रमंवहनादिकुर्वन्ति । तत्रप्लवङ्गाः वानराः । समाश्वसन्ति इदानींनकस्माच्चित्तेभयमितिबोधयन्तीत्यर्थः । समाह्वयन्तीतिपाठान्तरं । तत्र हर्षेणेतस्ततोगच्छन्तीत्यर्थः ॥ स० वहन्तीत्यादेर्यथाक्रममन्वयः ॥ २७ ॥ प्रहर्षिताः हृष्टाः । स्वार्थिकेडन्तत्वादिडुपपद्यते । केतकिगन्धं केतकीनांगन्धआमोदस्तं । अगन्धद्रव्यवचनत्वादेकवचनंयुज्यते । केतकिगन्धमित्यत्र "ङ्यापोःसंज्ञाछन्दसोः—"इत्युक्तेःकेतकीतिसंज्ञात्वाद्ध्रस्वइतिबोध्यं । प्रपातशब्दाकुलिताः प्रपातशब्दाः उन्नतप्रदेशान्नतप्रदेशेजलपातजनितध्वनयः । तैराकुलिता येप्रहृष्टास्तैर्मयूरैःतेष्वेवमेघबुद्धिभिर्बर्हिभिःसार्धंनदन्तीत्यन्वयः । एतेन मेघदर्शनाभावान्मयूरसाहित्यवर्णनमयुक्तं । प्रहर्षिताइतिपूर्वमुक्तिःउत्तरत्रप्रहृष्टाइतिवचनंचतदिवेतिनिरस्तं । यद्वा प्रहर्षिताः संतोषकारणवस्तुभिस्तोषिताः । प्रहृष्टाः स्वयंतुष्टाइतिमन्तव्यं । आघ्रायमत्ताइतिपाठे समदाःससंतोषाइत्यर्थोऽवसेयः ॥ २८ ॥ स० क्षणार्जितंएकेनक्षणेनैवार्जितंसंपादितं । पुष्परसावगाढं पुष्पमकरन्दोत्रद्धं । मदं गर्वं । धारानिपातैरभिहन्यमानास्त्यजन्तीतियोजना । जलधारापातेनकदंबशाखावलंबनं । तेनपुनःपुष्पान्तरार्जनाभावः आर्जितस्यापित्यागः । क्षणार्जितंपुष्परसावगाढंमदमित्यनेन मदनिर्भरताद्योत्यतइतिज्ञेयं । क्षणेनोत्सवेनार्जितमितिव्याख्यानेबहुदिनार्जितत्वस्यापिशक्योक्तित्वान्माहात्म्यातिशयालाभः

[पा०] १ क. झ. ट. गात्रानुपृक्तेन. ख. ङ. ज. ञ. गात्रानुपक्तेन. छ. गात्रानुसक्तेन. २ ग. वराभिरामा. ३ क. झ. ञ. प्लवङ्गमाः. ४ क. गन्धानाघ्राय. ५ घ. विलीयमानाः.

अङ्गारचूर्णोत्करसन्निकाशैः फलैः सुपर्याप्तरसैः समृद्धैः ॥
जम्बूद्रुमाणां प्रविभान्ति शाखा निलीयमाना इव षट्पदौघैः ॥ ३० ॥
तटित्पताकाभिरलङ्कृतानामुदीर्णगम्भीरमहारवाणाम् ॥
विभान्ति रूपाणि बलाहकानां रणोद्यतानामिव वारणानाम् ॥ ३१ ॥
मार्गानुगः शैलवनानुसारी संप्रस्थितो मेघरवं निशम्य ॥
युद्धाभिकामः प्रतिनामशङ्की मत्तो गजेन्द्रः प्रतिसन्निवृत्तः ॥ ३२ ॥
क्वचित्प्रगीता इव षट्पदौघैः क्वचित्प्रनृत्ता इव नीलकण्ठैः ॥
क्वचित्प्रमत्ता इव वारणेन्द्रैर्विभान्त्यनेकाश्रयिणो वनान्ताः ॥ ३३ ॥
कदम्बसर्जार्जुनकन्दलाढ्या वनान्तभूमिर्नववारिपूर्णा ॥
मयूरमत्ताभिरुतप्रनृत्तैरापानभूमिप्रतिमा विभाति ॥ ३४ ॥
मुक्तासकाशं सलिलं पतद्वै सुनिर्मलं पत्रपुटेषु लग्नम् ॥
हृष्टा विवर्णच्छदना विहङ्गाः सुरेन्द्रदत्तं तृषिताः पिबन्ति ॥ ३५ ॥
षट्पादतन्त्रीमधुराभिधानं प्लवङ्गमोदीरितकण्ठतालम् ॥
आविष्कृतं मेघमृदङ्गनादैर्वनेषु संगीतमिव प्रवृत्तम् ॥ ३६ ॥
क्वचित्प्रनृत्तैः क्वचिदुन्नदद्भिः क्वचिच्च वृक्षाग्रनिषण्णकायैः ॥
व्यालम्बबर्हाभरणैर्मयूरैर्वनेषु संगीतमिव प्रवृत्तम् ॥ ३७ ॥

नाः । षट्चरणाः भृङ्गाः । त्यजन्ति । कदम्बपुष्पेषु रसबाहुल्यात्क्षणेन मदः क्षणेन तद्धानिश्च भवतीत्यर्थः ॥ २९ ॥ अङ्गारचूर्णानां इङ्गालचूर्णानां उत्करैः समूहैस्तुल्याः अङ्गारचूर्णोत्करसन्निकाशाः तद्वन्नीला इत्यर्थः ॥ ३० ॥ तटिदिति विद्युत्पताका इति श्लोकोक्तमेवार्थमादरातिशयेन भङ्ग्यन्तरेणोक्तवान् ॥ ३१ ॥ मार्गानुगः सन्मार्गचारी वेदमार्गानुसारी । दिग्जयाय प्रवृत्तः प्रतिवादिशब्दं श्रुत्वा वादाहवकाङ्क्षी प्रतिसन्निवृत्तः पुरुषधौरेयोत्र गम्यते ॥ ३२ ॥ प्रकृष्टं गीतं येषां ते प्रगीताः एवमुत्तरत्रापि योज्यं । अनेकाश्रयिणः गीतनृत्तमदाश्रयिणः ॥ ३३ ॥ कदम्बैः सर्जैः बन्धूकैः कन्दलैः भूतालपुष्पैश्चाढ्या । मयूराणां मत्ताभिरुतैः प्रनृत्तैश्च । आपानभूमिप्रतिमा मद्यपानस्थलीतुल्या विभाति । सा हि संस्कारपुष्पाढ्या मद्यपूर्णा उन्मादनृत्तवत्पुरुषयुक्ता च भवति ॥ ३४ ॥ विवर्णच्छदनाः विविधवर्णपक्षाः । विहङ्गाः चातकाः । सुरेन्द्रदत्तं देवेन्द्रदत्तं । चातकाः भूस्थं जलं न पिबन्ति किंतु सद्यो वर्षदेवताभूतेन्द्रदत्तमेव पिबन्तीति प्रसिद्धिः ॥ ३५ ॥ षट्पादा भृङ्गा एव तन्त्री तस्या मधुराभिधानं मधुरनादः यस्मिंस्तत् । प्लवङ्गमोदीरितं मण्डूकनादएव कण्ठतालो यस्मिंस्तत् । मेघाएव मृदङ्गा मर्दलाः तेषांनादैराविष्कृतं प्रकटीकृतं संगीतं वनेषु प्रवृत्तमिव संबभूवेतियोजना ॥ ३६ ॥ संगीतविषये केचिन्नृत्यन्ति केचिद्गायन्ति केचित्प्रधाना अनुभवन्ति तत्सर्वं वनेपि दर्शयति । नृत्यन्तो मयूराः नर्तकस्थानीयाः । नदन्तो मयूराः

इतिज्ञेयं ॥ २९ ॥ रामानु० अत्राङ्गारशब्दः शान्ताङ्गावाची । अन्यथा षट्पदौघसाम्यंनस्यात् ॥ ति० अङ्गारः शान्ताग्निः । तच्चूर्णस्ययउत्करस्तत्समैः । अनेनफलानामतिमहत्त्वंसूचितं । अत्युक्तिरत्रालङ्कारः ॥ ३० ॥ स० उदीर्णः उच्चः । गंभीरः उच्चतरः । महान् उच्चतमः । रवोयेषांतेषां । रूपाणि आकाराः ॥ ३१ ॥ ती० स्वनिवासभूमिशैलवनानुसारी । मार्गानुगः मार्गानुगमनेनसंप्रस्थितःपृष्ठतोमेघरवंनिशम्य प्रतिनिवृत्तइतिसंबन्धः ॥ ति० प्रतिनादशङ्की शत्रुभूतगजान्तरनादशङ्की ॥ ३२ ॥ टी० मुक्ताभिःसमानःकाशःप्रकाशोयस्यतत्तथोक्तं ॥ ३५ ॥

[पा०] १ ङ.—ट. निपीयमानाइव. २ घ.—छ. झ. ञ. ट. रणोत्सुकानामिव. ३ ख. युद्धाभिरामः. ४ ख. झ. ट. प्रतिनादशङ्की ५ ग. क्वचिच्चमत्ताइव. ६ ङ. ज. झ. ट. भूमिर्मधुवारि. ७ क. निकाशं. छ. झ. ट. समाभं. ङ. च. ज. ञ. समानं. ८ क. ङ. च. ज. ञ. मधुराभिनादं. ९ क. त्प्रमत्तैः. १० क. दुन्नमद्भिः.

स्वनैर्घनानां प्लवगाः प्रबुद्धा विहाय निद्रां चिरसन्निरुद्धाम् ॥
अनेकरूपाकृतिवर्णनादा नवाम्बुधाराभिहता नदन्ति ॥ ३८ ॥
नद्यः समुद्वाहितचक्रवाकास्तटानि शीर्णान्यपवाहयित्वा ॥
दृप्ता नवप्राभृतपूर्णभोगा द्रुतं स्वभर्तारमुपोपयान्ति ॥ ३९ ॥
नीलेषु नीलाः प्रविभान्ति सक्ता मेघेषु मेघा नववारिपूर्णाः ॥
दवाग्निदग्धेषु दवाग्निदग्धाः शैलेषु शैला इव बद्धमूलाः ॥ ४० ॥
प्रहृष्टसन्नादितबर्हिणानि सशक्रगोपाकुलशाद्वलानि ॥
चरन्ति नीपार्जुनवासितानि गजाः सुरम्याणि वनान्तराणि ॥ ४१ ॥
नवाम्बुधाराहतकेसराणि द्रुतं परित्यज्य सरोरुहाणि ॥
कदम्बपुष्पाणि सकेसराणि नवानि हृष्टा भ्रमराः पतन्ति ॥ ४२ ॥
मत्ता गजेन्द्रा मुदिता गवेन्द्रा वनेषु विश्रान्ततरा मृगेन्द्राः ॥

गायकस्थानीयाः । वृक्षाग्रनिषण्णकायाः मयूराः अनुभवितृस्थानीयाः । अतस्तैः संगीतं प्रवृत्तमिव ॥ ३७ ॥ प्लवगाः मण्डूकाः । घनानां स्वनैः चिरसन्निरुद्धां चिरकालव्यापारनिरोधिकां । निद्रां विहाय प्रबुद्धा इति संबन्धः ॥ ३८ ॥ अथ नदीनां स्वभर्तृसङ्गममिच्छन्तीभिरुत्कटमन्मथाभिर्युवतिभिः साम्यमुच्यते । समुद्वाहितचक्रवाकाः वारिपूरोन्नमितचक्रवाकाः स्तनस्थानीयाः । अपवाहयित्वेत्येतन्नवोढोचितलज्जातिलङ्घनस्थानीयं । नवप्राभृतपूर्णभोगाः । प्राभृतं फलाद्युपहारः । भोगश्चन्दनकर्पूरकुसुमताम्बूलादिः । स्वभर्तारं समुद्रं । उपोपयान्ति उपयान्तीत्यर्थः ॥३९॥ दवाग्निदग्धेषु बद्धमूला दवाग्निदग्धाः शैला इव नीलेषु मेघेषु सक्ता नववारिपूर्णाः नीला मेघाः प्रविभान्ति । बद्धमूलत्वस्थाने नववारिपूर्णा इत्युक्तं । उभयत्र स्थायित्वमर्थः ॥ ४० ॥ वनान्तराणि वनमध्यानि चरन्ति । वनमध्येषु चरन्तीत्यर्थः ॥ ४१ ॥ कदम्बकेसराणामहतत्वे हेतुः—नवानीति ॥ ४२ ॥ मृगेन्द्राः सिंहाः । नगेन्द्राः पर्वतश्रेष्ठाः । रम्याः पल्लवपुष्पाङ्कु-

ति० अनेकरूपाकृतिःसंस्थानं वर्णःनीलपीतादिः नादश्चयेषां ॥ ३८ ॥ ती० तटानिशीर्णान्यपवाहयित्वेत्येतत् वृद्धपरिजनातिक्रमस्थानीयं नवोढोचितलज्जातिलङ्घनस्थानीयंवा ॥ स० समुद्वाहितचक्रवाकाः उत्थापितचक्रवाकपक्षिण्यः । अन्यत्रोपमानपदेनोपमेयस्तनानांग्रहणं । यद्वाहितचक्रवाकेत्यनेनसद्योवेदीकृतस्तनत्वेनतारुण्यंद्योत्यते । तटानिप्रवाहवेगतोविशीर्णानि अवहापयित्वा त्याजयित्वा । अनेनचोद्वेलप्रसर्पणंसूचितंभवति । अन्यत्रजरत्यादीनांत्याजनज्ञेयं । नवंनूतनंप्रावृतःप्रगतमावृतमावरणंयस्यसः । सचासौपूर्णःस्वस्वमनोनुसारः भोगोयासांतास्तथा । अन्यत्रनदीपक्षेवप्रेषुतटेषुआवृताश्चतेपूर्णाःपुष्टाभोगानागाङ्गानिप्रवृत्तपूर्णभोगानविद्यन्तेतेयासांताः । तीव्रप्रवहनेनानधिगततटस्वान्तः । सरत्सरीसृपशरीराइतिभावः । अवहापयित्वेतित्यबभावआर्षः । यद्वा " छन्दसिपरेव्यवहिताश्च " इत्युक्तेरवेत्यस्यशीर्णपदेनान्वयेहापयित्वेतिसाधुः । स्वभर्तारं समुद्रं । अन्यत्रपतिं । " वप्रस्तुरेणौचरोधसि " इतित्रिकाण्डशेषः । " वप्रःप्राकाररोधसोः " इतिविश्वः । अथवा नवप्रावृतेषु नूतनप्रावरणेषु स्वकञ्चुकेषुपूर्णा भोगाःशरीराणियेषांसर्पाणांतेतथा । दृप्ताः आसम्यक्प्रवृत्तपूर्णभोगायासांताः । उपोपयन्ति " प्रसमुपोदःपादपूरणे " इत्युपोपसर्गाद्वित्वं । वप्रावृतः रेणुरूषितोनभवतीतिनवप्रावृतः सचासौपूर्णः तटद्वितयसंबन्धोभोगोविलासोयासांताः । वप्रैरेणुभिः आवृतं आवरणं तैःपूर्णारेणुरूषितास्तेनभवन्तीतितथातेभोगायासांतावा । स्वभर्तारमुपोपयन्ति । दृप्ताइत्यादिनास्मरपारवश्यंप्राग्विटघटनाच सूचितेइतिज्ञातव्यं । नदीपक्षेकांश्चननदान्मध्येऽध्वनस्संगम्यस्वभर्तारंसमुद्रमुपोपयान्तीत्यर्थः ॥ ३९ ॥ स० सशक्रगोपाकुलशाद्वलानि शक्रगोपैः तन्नामककीटविशेषैः आकुलैःशाद्वलैःसहितानि । नीपैरर्जुनैश्चवासितानिसुरभीकृतानिवनान्तराणिवनमध्यानि । वनविशेषानुद्दिश्यगजाश्चरन्ति संचरन्ति । बहुनैविध्येनान्तर्झटितिगन्तुमशक्ताश्चरन्तीतिभावः । " सप्तसुप्रथमा " इत्युक्तेर्वनान्तरेषुसंचरन्तीतिवा । अथवावनान्तराणि । द्वितीयाबहुवचनं । चरन्ति भक्षयन्ति ॥ ४१ ॥ टीका० निभृताः निश्चलाः । दण्डया-

[पा०] १ च. छ. ज. झ. विहगाः. २ छ. समुत्थापित. ३ ठ. न्यवहापयित्वा. ४ क. ज.—ट. प्रावृत. ५ क.—ड. नीलानववारिपूर्णामेघेषुमेघाःप्रविभान्तिसक्ताः. ६ क.—ट. प्रमत्तसंनादित. ७ क.—ज. झ. ट. ध्रुवं. ८ क. वनेषु. ९ क. ग. ङ.—ट. पिबन्ति. १० क. च. ज. झ. वृषेन्द्राः. ११ छ. झ. ट. विक्रान्ततराः.

रम्या नगेन्द्रा निभृता नरेन्द्राः प्रक्रीडितो वारिधरैः सुरेन्द्रः ॥ ४३ ॥
मेघाः समुद्भूतसमुद्रनादा महाजलौघैर्गगनावलम्बाः ॥
नदीस्तटाकानि सरांसि वापीर्महीं च कृत्स्नामपवाहयन्ति ॥ ४४ ॥
वर्षप्रवेगा विपुलाः पतन्ति प्रवान्ति वाताः समुदीर्णघोषाः ॥
प्रनष्टकूलाः प्रवहन्ति शीघ्रं नद्यो जलैर्विप्रतिपन्नमार्गाः ॥ ४५ ॥
नरैर्नरेन्द्रा इव पर्वतेन्द्राः सुरेन्द्रदत्तैः पवनोपनीतैः ॥
घनाम्बुकुम्भैरभिषिच्यमाना रूपं श्रियं स्वामिव दर्शयन्ति ॥ ४६ ॥
घनोपगूढं गगनं सतारं न भास्करो दर्शनमभ्युपैति ॥
नवैर्जलौघैर्धरणी विसृप्ता तमोविलिप्ता न दिशः प्रकाशाः ॥ ४७ ॥
महान्ति कूटानि महीधराणां धाराभिधौतान्यधिकं विभान्ति ॥
महाप्रमाणैर्विपुलैः प्रपातैर्मुक्ताकलापैरिव लम्बमानैः ॥ ४८ ॥
शैलोपलप्रस्खलमानवेगाः शैलोत्तमानां विपुलाः प्रपाताः ॥
गुहासु सन्नादितबर्हिणासु हारा विकीर्यन्त इवाभिभान्ति ॥ ४९ ॥
शीघ्रप्रवेगा विपुलाः प्रपाता निर्धौतशृङ्गोपतला गिरीणाम् ॥
मुक्ताकलापप्रतिमाः पतन्तो महागुहोत्सङ्गतलैर्ध्रियन्ते ॥ ५० ॥
सुरतामर्दविच्छिन्नाः स्वर्गस्त्रीहारमौक्तिकाः ॥ पतन्तीवाकुला दिक्षु तोयधाराः समन्ततः ॥ ५१ ॥
निलीयमानैर्विहगैर्निमीलद्भिश्च पङ्कजैः ॥ विकसन्त्या च मालत्या गतोस्तं ज्ञायते रविः ॥ ५२ ॥
वृत्ता यात्रा नरेन्द्राणां सेना प्रतिनिवर्तते ॥ वैराणि चैव मार्गाश्च सलिलेन समीकृताः ॥ ५३ ॥

रादिमत्त्वादिति भावः । प्रक्रीडित इति कर्तरि निष्ठा ॥ ४३ ॥ अपवाहयन्ति परिवाहयन्ति ॥ ४४ ॥ वर्षप्रवेगाः अतिवेगा वृष्टय इत्यर्थः । विपुलाः निरन्तराः । नद्यो जलैः विप्रतिपन्नमार्गाः विरुद्धं प्राप्तमार्गाः ॥ ४५ ॥ अभिषिक्ताः नरेन्द्राः स्वां श्रियमिव अभिषिच्यमानाः पर्वताः स्वं रूपं दर्शयन्ति । नैर्मल्यादिनेति भावः ॥ ४६ ॥ तमोविलिप्ता दिशः न प्रकाशाः ॥ ४७ ॥ प्रपातैः निर्झरैः ॥ ४८ ॥ शैलोत्तमानां विपुलाः प्रपाताः निर्झराः । शैलोपलप्रस्खलमानवेगाः सन्तः । सन्नादितबर्हिणासु गुहासु विकीर्यन्तः विकीर्यमाणाः । हारा इव अवभान्ति ॥ ४९ ॥ निर्धौतानि निर्मलीकृतानि शृङ्गोपतलानि शृङ्गसमीपतलानि यैस्ते तथा । गुहोत्सङ्गतलैः गुहामध्यतलैः ॥ ५० ॥ तोयधाराः मौक्तिका इव पतन्तीति स्वरूपोत्प्रेक्षा ॥ ५१ ॥ निलीयमानैः नीडेषु गच्छद्भिः ॥ ५२ ॥ वृत्ता निवृत्ता । अतोग्रे गता सेना प्रतिनिवृत्ता । सलिलेन वैराणि समीकृतानि । सलिलप्रतिरोधाद्वैराणि शान्तानीत्यर्थः । मार्गाश्च समीकृताः

त्रादिव्यापाररहिताइत्यर्थः ॥ ४३ ॥ रामानु० अपवाहयन्ति वर्षन्ति ॥ शि० अपवाहयन्ति पूरयन्तीत्यर्थः ॥ ति० अपवाहयन्ति प्रवहज्जलानिकुर्वन्ति ॥ ४४ ॥ ति० वितृप्ता जामितांप्राप्ता ॥ ४७ ॥ टीका० स्वर्गस्त्रीहारमौक्तिकाः । मौक्तिकशब्दः पुंल्लिङ्गोप्यस्ति । " मुक्तास्त्रीमौक्तिकोस्त्रियां " इत्युक्तेः ॥ ५१ ॥

[पा०] १ क. ग. घ. च. छ. झ. ञ. ट. समुद्भूत. २ ख. मभिपूरयन्ति. ख. ङ. च. ञ. मभितर्पयन्ति. ३ ख. ग. वर्षप्रयोगाः. ४ छ. झ. ट. समुदीर्णवेगा. ५ ख. ग. छ. झ. ट. जलंविप्रतिपन्न. ६ घ. झ. सुरेन्द्रनीतैः. ७ छ. झ. ञ. ट. सतारा. ८ क. ग. ङ. च. छ. झ. ञ. ट. वितृप्ता. ९ छ. झ. ट. धाराविधौतानि. १० क. विशीर्यन्त. घ. विकीर्णाइवभान्तितासु. ११ ख. ङ. झ. ञ. ट. इवावभान्ति. १२ झ. शीघ्रंप्रवेगाः. ङ. सुशीघ्रवेगाः. १३ ख. वनैः. १४ झ. ट. पतन्ति चातुला. १५ छ. झ. ट. पथ्येववर्तते.

मासि प्रोष्ठपदे ब्रह्म ब्राह्मणानां विवक्षताम् ॥ अयमध्यायसमयः सामगानामुपस्थितः ॥ ५४ ॥
निवृत्तकर्मायतनो नूनं संचितसंचयः ॥ आषाढीमभ्युपगतो भरतः कोसलाधिपः ॥ ५५ ॥
नूनमापूर्यमाणायाः सरय्वा वर्धते रयः ॥ मां समीक्ष्य समायान्तमयोध्याया इव स्वनः ॥ ५६ ॥
इमाः स्फीतगुणा वर्षाः सुग्रीवः सुखमश्नुते ॥ विजितारिः सदारश्च राज्ये महति च स्थितः ॥ ५७ ॥
अहं तु हृतदारश्च राज्याच्च महतश्च्युतः ॥ नदीकूलमिव क्लिन्नमवसीदामि लक्ष्मण ॥ ५८ ॥
शोकश्च मम विस्तीर्णो वर्षाश्च भृशदुर्गमाः ॥ रावणश्च महाञ्शत्रुरपारं प्रतिभाति मे ॥ ५९ ॥
अयात्रां चैव दृष्ट्वेमां मार्गांश्च भृशदुर्गमान् ॥ प्रणते चैव सुग्रीवे न मया किंचिदीरितम् ॥ ६० ॥
अपि चातिपरिक्लिष्टं चिराद्दारैः समागतम् ॥ आत्मकार्यगरीयस्त्वाद्वक्तुं नेच्छामि वानरम् ॥ ६१ ॥
स्वयमेव हि विश्रम्य ज्ञात्वा कालमुपागतम् ॥ उपकारं च सुग्रीवो वेत्स्यते नात्र संशयः ॥ ६२ ॥
तस्मात्कालप्रतीक्षोहं स्थितोस्मि शुभलक्षण ॥ सुग्रीवस्य नदीनां च प्रसादमनुपालयन् ॥ ६३ ॥
उपकारेण वीरो हि प्रतिकारेण युज्यते ॥ अकृतज्ञोप्रतिकृतो हन्ति सत्त्ववतां मनः ॥ ६४ ॥

तमेवमुक्तः प्रणिधाय लक्ष्मणः कृताञ्जलिस्तत्प्रतिपूज्य भाषितम् ॥
उवाच रामं स्वभिरामदर्शनं प्रदर्शयन्दर्शनमात्मनः शुभम् ॥ ६५ ॥

जलेन मार्गामार्गविवेको नासीदित्यर्थः ॥ ५३ ॥ अनेन भाद्रपदो मासः संप्रवृत्त इति सूचयति । ब्रह्म वेदं । विवक्षतां अध्येतुमिच्छतां । अध्यायसमयः वेदारम्भसमयः ॥ ५४ ॥ निवृत्तं कर्म यस्य तन्निवृत्तकर्म आयतनं गृहं यस्य सः निवृत्तकर्मायतनः । उपरतसकलगृहोपकरणसंपादन इत्यर्थः । संचितसंचयः संपादितधननिचयः । आषाढीं आषाढमाससमाप्तिपौर्णमासीं । अभ्युपगतः व्रताङ्गत्वेन स्वीकृतवान् । अनेन चत्वारोवार्षिका मासा इति पूर्वोक्तमासानां आषाढः प्राथमिक इति सूचितम् ॥ ५५ ॥ अयोध्यायाः अयोध्यावासिजनस्य ॥ ५६ ॥ वर्षा इत्यत्यन्तसंयोगे द्वितीया ॥ ५७ ॥ अहं त्विति अजितारिश्चेत्यपि ज्ञेयं । क्लिन्नं आर्द्रं ॥ ५८ ॥ मम शोकश्च विस्तीर्णः । वर्षाश्च भृशदुर्गमाः अत्यन्तं दुरत्ययाः । रावणश्च महाञ्शत्रुः । अतश्च एतत्त्रितयं अपारं दुस्तरं प्रतिभाति ॥ ५९ ॥ अयात्रां राज्ञामेतत्कालोचितदण्डयात्राभावं । प्रणते चैव इदानीमेव सीतान्वेषणरावणनिरसनोद्योगः कर्तव्य इति प्रार्थनापूर्वकं प्रह्वीभूते सत्यपीत्यर्थः ॥ ६० ॥ आत्मकार्यगरीयस्त्वात् अस्मत्प्रयोजनस्यातिमहत्त्वात् । अल्पयत्नेन अल्पकालेनचासाध्यत्वादित्यर्थः । वक्तुं नियोक्तुं । नेच्छामीति भूतार्थे लट् ॥ ६१ ॥ कालं शरत्कालं ॥ ६२ ॥ उक्तोपपत्तिभिः पूर्वसर्गोक्तं द्रढयति—तस्मादित्यादिना ॥ ६३ ॥ अकृतज्ञः कृतोपकारानभिज्ञः पुरुषः । अप्रतिकृतः प्रत्युपकारमकुर्वन् । सत्त्ववतां महात्मनां । मनो हन्ति क्षोभयति । वीरः प्रत्युपकारसमर्थः । उपकारेण हेतुना प्रतिकारेण प्रत्युपकारेण युज्यते हि युज्यत एव । सुग्रीवोप्येवंविधत्वात्प्रत्युपकारं करिष्यतीतिभावः । अनेन प्रत्युपकारं कारयित्वा लोके प्रत्युपकारधर्मं प्रवर्तयिष्यामीत्याशयः ॥ ६४ ॥ अस्य

शि० ब्रह्म वेदविवक्षतां पठितुमिच्छतां सामगानां । प्रौष्ठपदे भाद्रेमासि । अयंशुक्लतृतीयातिथिः । अध्यायसमयः उपाकरणकालः । उपस्थितः प्राप्तः ॥ ५४ ॥ ती० निवृत्तकर्मायतनः निवृत्तंकर्मयस्यतत् निवृत्तकर्म आयतनंगृहंयस्यतथोक्तः । उपरतगृहव्यापारइत्यर्थः । आषाढींआषाढमासपरिसमाप्तिपौर्णमासीं अभ्युपगतः व्रताङ्गत्वेनस्वीकृतवान् । तदुक्तंमहाभारते—" आषाढेतुसितेपक्षएकादश्यामुपोषितः । चातुर्मास्यव्रतंकुर्याद्यत्किंचित्प्रयतोनरः । वार्षिकांश्चतुरोमासान्व्रतंकिंचित्समापयेत् । असंभवे तुलार्केपिकर्तव्यंतत्प्रयत्नतः " इति ॥ ५५ ॥ रामानु० अपिचातिपरिक्लिष्टश्चिराद्दारैःसमागतः" इतिप्रथमान्तपाठेइतिकरणं द्रष्टव्यं ॥ ६१ ॥ इत्यष्टाविंशःसर्गः ॥ २८ ॥

[पा०] १ क. च. ञ. भाद्रपदे. २ ख. मार्गांश्च. ३ क. ख. ग. ङ.—ट. रपारः. ४ झ. ट. चापि. घ. नाति. ५ ख. अयमेव. ६ क. छ. झ. ट. मभिकाङ्क्षयन्. क. मभिपालयन्. ७ क. ख. युक्तोहि. ८ घ. छ. झ. ट. अथैवमुक्तः.

यथोक्तमेतच्च सर्वमीप्सितं नरेन्द्र कर्ता नचिराद्वरीश्वरः ॥
शरत्प्रतीक्षः क्षमतामिमं भवाञ्जलप्रपातं रिपुनिग्रहे धृतः ॥ ६६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे अष्टाविंशः सर्गः ॥ २८ ॥

एकोनत्रिंशः सर्गः ॥ २९ ॥

शरदागमेपि विषयासक्ततयाविस्मृतरामकार्यंसुग्रीवंप्रतिहनुमता श्रीराममहिमानुवर्णनपूर्वकंतदुपकारस्मारणेन सीतान्वेषणार्थंसकलवानरानयनायदूताज्ञापनचोदना ॥ १ ॥ सुग्रीवेणनीलंप्रति सकलवानरसैन्यानयनाय दूतप्रेषणचोदना ॥२॥

समीक्ष्य विमलं व्योम गतविद्युद्बलाहकम् ॥ सारसारवसंवृष्टं[1] रम्यज्योत्स्नानुलेपनम्[2] ॥ १ ॥
समृद्धार्थं च सुग्रीवं मन्दधर्मार्थसंग्रहम्[3] ॥ अत्यर्थमसतां[4] मार्गमेकान्तगतमानसम्[5] ॥ २ ॥
निर्वृत्तकार्यं सिद्धार्थं प्रमदाभिरतं सदा ॥ प्राप्तवन्तमभिप्रेतान्सर्वानेव मनोरथान्[6] ॥ ३ ॥
स्वां च पत्नीमभिप्रेतां तारां चापि समीप्सिताम्[7] ॥ विहरन्तमहोरात्रं कृतार्थं विगतज्वरम्[8] ॥ ४ ॥
क्रीडन्तमिव देवेशं नन्दनेऽप्सरसांगणैः[9] ॥ मन्त्रिषु न्यस्तकार्यं च मन्त्रिणामनवेक्षकम्[10] ॥ ५ ॥
उत्सन्नराज्यसन्देशं[11] कामवृत्तमवस्थितम्[12] ॥ निश्चितार्थोऽर्थतत्त्वज्ञः कालधर्मविशेषवित्[13] ॥ ६ ॥
प्रसाद्य वाक्यैर्मधुरैर्हेतुमद्भिर्मनोरमैः[14] ॥ वाक्यविद्वाक्यतत्त्वज्ञं हरीशं मारुतात्मजः ॥ ७ ॥

रामवचनस्य पूर्वसर्गान्तोत्तरमाह—तमिति ॥ तं राममित्यन्वयः । दर्शनं मतं ॥ ६५ ॥ कर्ता करिष्यति । लुट् ॥ ६६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने अष्टाविंशः सर्गः ॥ २८ ॥

अथ हनुमान् रामभक्तोपि स्वस्वाम्यनुज्ञाभावेन तं ध्यायन् सुग्रीवसमीप एव स्थितः स्वस्वामिना सर्वस्वामिहितानुगुणं कार्यमारब्धवानित्याहैकोनत्रिंशे—समीक्ष्येत्यादि हनुमान्वाक्यमब्रवीदित्यन्तमेकं वाक्यं ॥ हनुमान् उक्तगुणविशिष्टं व्योम उक्तगुणविशिष्टं सुग्रीवं च समीक्ष्य । हरीशं प्रसाद्य हरीश्वरमुपागम्य प्रणयाद्वाक्यमब्रवीदितिसंबन्धः । विमलमित्यादिना सेनासन्नाहस्य प्राप्तकालत्वमुक्तं । समृद्धार्थमित्यादिना समयातिक्रमहेतवः प्रदर्श्यन्ते । समृद्धार्थं संपूर्णरत्नवस्त्राभरणादिकं । मन्दः अल्पः धर्मार्थयोः संग्रहः संपादनं यस्य तं । एकान्तगतमानसं एकस्मिन् कामपुरुषार्थे अन्तं निश्चयं गतं मानसं यस्य तथोक्तं । यद्वा असतां कामुकानां मार्गं एकान्तगतं अत्यन्तगतं मानसं यस्य स तथा । " तीव्रैकान्तनितान्तानि " इत्यमरः । निर्वृत्तकार्यं निष्पन्नबालिवधरूपकार्यं । सिद्धार्थं प्राप्तराज्यं । अभिप्रेतान् ईप्सितान् । मनोरथान् राज्यप्राप्त्यनन्तरमेवं करिष्यामीति संकल्पविषयीभूतानर्थान् । तारां च प्राप्तवन्तमिति संबन्धः । कृतार्थं निष्पन्नधनं । मन्त्रिणामनवेक्षकं मन्त्रिकृतकार्यापरामर्शकं । उत्सन्नराज्यसन्देशं नष्टराज्यनियमनं । कामवृत्तं कामव्यापारं । अवस्थितं कामव्यापारपरतयावस्थितमित्यर्थः । निश्चितार्थः निश्चितकर्तव्यः । अत्र हेतुः—अर्थतत्त्वज्ञ इति । कालोचितो धर्मः कालधर्मः तद्विशेषवित् । वाक्यवित् तदुचितव्यवहारवित् । हितं तदर्कसुखक-

---

टी० मन्दोऽल्पोधर्मार्थौसंगृह्णातीतितथा ॥ स० अत्यर्थंअत्यन्तंअसतांमार्गोयस्यसः । अलुक्समासोयं । एकान्तेअन्तःपुरेगतं आसक्तंमानसंयस्यसतथातं ॥ २ ॥ ति० उच्छिन्नराज्यसन्देहं मन्त्रिसौष्ठवेननष्टराज्यपालनसन्देहं ॥ ६ ॥

[पा०] १ ङ. ञ. ट. यदुक्तमेतत्. २ घ. ङ. छ. झ. ञ. मिदं. ३ क. ग. ङ.—ट. सारसाकुल. ४ छ. झ. ट. अत्यर्थंचासतां. ५ क. चैव. ख. यसममीप्सितां. ६ छ. झ. ट. मन्दर्षांसरसांगणैः. ७ क. ख. घ. ङ. ञ. मन्त्राणां. ग. मन्त्राणमनवेक्षणं. ८ ख.—ङ. छ.—ट. उच्छिन्नराज्यसंदेहं. ९ ज. झ. मिवस्थितं. १० झ. ट. वाक्यैर्विविधैः. क. च. ग. विविधैर्वाक्यैः. ञ. मधुरैर्वाक्यैः. ११ ख. ग. मनोहरैः. ज. ञ. मनोनुगैः. १२ क. ञ. तत्त्वज्ञो.

हितं तत्त्वं च पथ्यं च सामधर्मार्थनीतिमत् ॥ प्रणयप्रीतिसंयुक्तं विश्वासकृतनिश्चयम् ॥
हरीश्वरमुपागम्य हनुमान्वाक्यमब्रवीत् ॥ ८ ॥
राज्यं प्राप्तं यशश्चैव कौली श्रीरभिवर्धिता ॥ मित्राणां संग्रहः शेषस्तं भवान्कर्तुमर्हति ॥ ९ ॥
यो हि मित्रेषु कालज्ञः सततं साधु वर्तते ॥ तस्य राज्यं च कीर्तिश्च प्रतापश्चाभिवर्धते ॥ १० ॥
यस्य कोशश्च दण्डश्च मित्राण्यात्मा च भूमिप ॥ समवेतानि सर्वाणि स राज्यं महदश्नुते ॥ ११ ॥
तद्भवान्वृत्तसंपन्नः स्थितः पथि निरत्यये ॥ मित्रार्थमभिनीतार्थं यथावत्कर्तुमर्हति ॥ १२ ॥
सन्त्यज्य सर्वकर्माणि मित्रार्थे योनुवर्तते ॥ संभ्रमाद्धि कृतोत्साहः सोनर्थैर्नावरुध्यते ॥ १३ ॥
यस्तु कालव्यतीतेषु मित्रकार्येषु वर्तते ॥ स कृत्वा महतोप्यर्थान्न मित्रार्थेन युज्यते ॥ १४ ॥
यदिदं वीर कार्यं नो मित्रकार्यमरिंदम ॥ क्रियतां राघवस्यैतद्वैदेह्याः परिमार्गणम् ॥ १५ ॥
तदिदं वीर कार्यं ते कालातीतमरिंदम ॥ १६ ॥
न च कालमतीतं ते निवेदयति कालवित् ॥ त्वरमाणोपि सन्प्राज्ञस्तव राजन्वशानुगः ॥ १७ ॥

रं । तत्त्वं यथार्थं । पथ्यं नीतिमार्गादनपेतं । सामधर्मार्थनीतिमत् साम च धर्मश्च अर्थश्च नीतिश्च सामधर्मार्थनीति तदस्यास्तीति सामधर्मार्थनीतिमत् । प्रणयप्रीतिसंयुक्तं प्रणयः समानविषयस्नेहः । प्रीतिः न्यूनविषयः । विश्वासकृतनिश्चयं आप्तवाक्यत्वविश्वासे विषये कृतनिश्चयं ॥ १—८ ॥ कौली कुलक्रमागता । श्रीः संपत् । अभिवर्धिता । अप्रतिद्वन्द्वत्वादिति भावः । मित्राणां संग्रहः तत्कार्यकारणं । शेषः अवशिष्टो भवति । इदमेव वचनं प्रसाद्य वाक्यैरित्यादिना पूर्वं प्रशंसितं ॥ ९ ॥ मित्रकार्यस्यावश्यकर्तव्यत्वमाह—यो हीति ॥ कालज्ञः मित्रसंग्रहकालज्ञः । तत्कालातिक्रमे विपरीतं भवतीत्यर्थः । मित्रेषु वर्तते मित्राधीनो भवतीत्यर्थः ॥१०॥ दण्ड्यतेनेनेति दण्डः सेनाविशेषः । आत्मा प्रभुरित्यर्थः । समवेतानि समुदितानि । एकन्यूनत्वे महाराज्यहानिरिति भावः ॥ ११ ॥ निरत्यये अविनाशिनि । पथि सन्मार्ग इत्यर्थः । मित्रार्थं मित्रकार्यं । अभिनीतार्थं प्रापितप्रयोजनं यथा भवति तथा । यथावत् यथाप्रतिज्ञमिति यावत् ॥ १२ ॥ सर्वकर्माणि स्वभोगसाधनानि सन्त्यज्य । कृतोत्साहः सन् संभ्रमात् आदरात् मित्रार्थे विषये । यःअनुवर्तते अनुस्यूततया तिष्ठति । सोनर्थैर्नावरुध्यते न संबध्यते ॥ १३ ॥ एवं कर्तव्यं मित्रकार्यमुचितकाले कर्तव्यमित्याह—यस्त्विति ॥ कालव्यतीतेषु अतिक्रान्तकालेषु ॥ १४ ॥ हेवीर । नः अस्माभिः । यदिदं मित्रकार्यं कर्तव्यं एतत् वैदेह्याः परिमार्गणं क्रियतामिति संबन्धः ॥ १५ ॥ तेकार्यं त्वया कर्तव्यं । इदं मित्रकार्यं ॥ १६ ॥ कालवित् रामइतिशेषः । त्वरमाण इत्यर्धं

स० कुलपरंपराप्राप्ताश्रीःकौली । शेषःशिष्टः । सचउक्तगुणश्चासौभवांश्च तद्भवान् । तदित्यव्ययंदोषपरामर्शकमितिवा ॥ ९ ॥ रामानु० दण्डःदण्ड्यतेऽनेनेतिदण्डःसैन्यविशेष । तथाहकामन्दकः—"पितृपैतामहोवंशसंभवोदत्तवेतनः । विख्यातपौरुषोजन्ये कुशलःकुशलैर्वृतः । नानाप्रहरणोपेतोनानायुद्धविशारदः । नानायोधसमाकीर्णोविराजितहयद्विपः । प्रवासचसुदुःखेषुयुद्धेषुचकृतश्रमः । अद्वैध्यःक्षत्रियप्रायोदण्डोदण्डविदांमतः ।" इति ॥ ति० समानि स्ववशत्वेनसमत्वं । समवेतानीतिपाठे मिलितानीत्यर्थः । नत्वेकमपिपृथग्भूतमितिभावः ॥ ११ ॥ ति० अभिनीतार्थं प्रतिज्ञातार्थं ॥ शि० निरत्यये ध्वंसरहिते । पथि रामाश्रयणरूपेमार्गेस्थितः ॥ १२ ॥ ति० संभ्रमात् त्वरया । विशेषेणकृतोत्साहः । अन्यत्रकर्मणीतिशेषः ॥ शि० विपक्षेदोषमाह । समिति । योजनःसर्वकर्माणिसंत्यज्य मित्रार्थे मित्रप्रयोजनसिद्धये । संभ्रमात् उद्वेगात् । नवर्तते सजनः कृतःछिन्नःउत्साहो यस्यससन् । अनर्थेनावरुध्यतेनप्राप्यतइत्यर्थः । कृतोत्साहः जातोत्साहविशिष्टस्सन् नवर्ततइतिवायोजना ॥ १३ ॥

[पा०] १ घ. पथ्यंचतत्वंच. ख. ग. ङ. च. ज.—ट. तथ्यंचपथ्यंच. छ. पथ्यंचतथ्यंच. २ ख. घ. प्राप्तंराज्यं. ३ क. ख. ग. च. ज. म. श्रीरपि. ४ क. ग. घ. च. ज.—ट. शेषस्तद्भवान्. ५ क. ख. झ. ट. प्रतापश्चापि. ६ झ. ट. समान्येतानि. ७ ख. घ. ङ. च. ज. म. सर्वकार्याणि. ८ ख. ङ. झ. ट. योनवर्तते. ९ झ. संभ्रमाद्विकृतोत्साहः. १० ग. झ. ट. सोनर्थैनावरुध्यते. ङ. च. ज. सोयंनैवावरुध्यते. ११ छ. झ. ट. योहि. १२ ख. मित्रार्थयोनुवर्तते. १३ ट. मित्रार्थेहि. १४ झ. तदिदंमित्रकार्यंनःकालातीतमरिंदम. ज. तदिदंवीर. १५ झ. ञ. ट. सप्राज्ञः.

कुलस्य हेतुः स्फीतस्य दीर्घबन्धुश्च राघवः ॥ अप्रमेयप्रभावश्च स्वयं चाप्रतिमो गुणैः ॥ १८ ॥
तस्य त्वं कुरु वै कार्यं पूर्वं तेन कृतं तव ॥ हरीश्वर हरिश्रेष्ठानाज्ञापयितुमर्हसि ॥ १९ ॥
न हि तावद्भवेत्कालो व्यतीतश्चोदनादृते ॥ चोदितस्य हि कार्यस्य भवेत्कालव्यतिक्रमः ॥ २० ॥
अकर्तुरपि कार्यस्य भवान्कर्ता हरीश्वर ॥ किं पुनः प्रतिकर्तुस्ते राज्येन च धनेन च ॥ २१ ॥
शक्तिमानपि विक्रान्तो वानरर्क्षगणेश्वर ॥ कर्तुं दाशरथेः प्रीतिमाज्ञायां किं न सज्जसे ॥ २२ ॥
कामं खलु शरैः शक्तः सुरासुरमहोरगान् ॥ वशे दाशरथिः कर्तुं त्वत्प्रतिज्ञां तु काङ्क्षते ॥ २३ ॥
प्राणत्यागाविशङ्केन कृतं तेन तव प्रियम् ॥ तस्य मार्गाम वैदेहीं पृथिव्यामपि चाम्बरे ॥ २४ ॥
नैं देवा न च गन्धर्वा नासुरा न मरुद्गणाः ॥ न च यक्षा भयं तस्य कुर्युः किंमुत राक्षसाः ॥ २५ ॥
तदेवं शक्तियुक्तस्य पूर्वं प्रियकृतस्तव ॥ रामस्यार्हसि पिङ्गेश कर्तुं सर्वात्मना प्रियम् ॥ २६ ॥
नाधस्तादवनौ नाप्सु गतिर्नोपरि चाम्बरे ॥ कस्य चित्सज्जतेऽस्माकं कपीश्वर तवाज्ञया ॥ २७ ॥
तदाज्ञापय कैः किं ते क्रियते कुत्र व्यवस्यतु ॥ हरयो ह्यप्रधृष्यास्ते सन्ति कोट्यग्रतोऽनघाः ॥ २८ ॥
तस्य तद्वचनं श्रुत्वा काले साधु निवेदितम् ॥ सुग्रीवः सत्त्वसंपन्नश्चकार -मतिमुत्तमाम् ॥ २९ ॥
सैं संदिदेशाभिमतं नीलं वित्यकृतोद्यमम् ॥ दिक्षु सर्वासु सर्वेषां सैन्यानामुपसंग्रहे ॥ ३० ॥
यथा सेना समग्रा मे यूथपाश्च सर्वशः ॥ सैंमागच्छन्त्यसङ्गेन सेनाग्राणि तथा कुरु ॥ ३१ ॥

पूर्वेणान्वेति । कालवित् प्राज्ञो रामः स्मरमाणोपि सन् वैदेहीसमानयनाय स्वरमाणोपि सन् । न निवेदयतीति संबन्धः ॥ १७ ॥ स्वयं चेति । स्वमपि गुणैरप्रतिम इत्यर्थः ॥ १८ ॥ आज्ञापयितुं वानरसेनामानेतुमिति शेषः ॥ १९ ॥ इदानीं वानरानयनेपि कालव्यतिक्रमस्तुल्य इत्याशङ्क्याह—न हीति ॥ चोदनादृते रामप्रेरणं विना । कालो न व्यतीतो भवेत् । रामचोदनानन्तरं कार्यं क्रियते चेत्तदाकालातिक्रमः । तचोदनात्पूर्वमस्माभिः कार्यप्रवर्तनेन न कालातिक्रमदोष इतिभावः ॥ २० ॥ अकर्तुः अनुपकर्तुः ॥ २१ ॥ प्रीतिं कर्तुं आज्ञायां आज्ञापने । न सज्जसे नोद्योगं करोषि ॥ २२—२३ ॥ प्राणत्यागाविशङ्केनेत्यनेन उपकारमहत्त्वं द्योतितं ॥ २४—२६ ॥ कस्यचिदिति । अस्माकं मध्ये कस्यचिद्गतिर्न सज्जते न मन्दीभवति ॥ २७ ॥ अप्रधृष्याः कोट्यग्रतः कोट्यधिकाः । हरयः ते सन्ति तेषां मध्ये कः । ते कृते स्वर्थं । किं करोमीति शेषः । कुत्र कुत्र कार्ये व्यवस्यतु व्यवसायं करोतु । तदाज्ञापय ॥ २८—३० ॥ सेनाग्राणि सेनाग्रेसरान् । सेनानेतॄनित्यर्थः ।

ति० यद्यपिरामस्यनसहायापेक्षा । तथापिसपरिवारोऽहंसीतामन्वेषयिष्यामीतिलक्ष्मणप्रतिज्ञामवेक्षते । सख्याऽसख्यावेतिपरीक्षतइत्यर्थः ॥ शि० लक्ष्मणप्रतिज्ञामवेक्षते । एतेनलक्ष्मणमहार्थमेवरामस्त्यामाश्रितइतिसूचितं ॥ २३ ॥ ति० प्राणत्यागाविशङ्केन अवपकारिवालिप्राणत्याजनेतदनौचित्यशङ्काहितेन मित्रकृत्यंस्वकृत्यमेवेतिबुध्यातवप्रियंकृतं । मार्गाम अन्वेषयाम ॥ स० प्राणत्यागाविशङ्केनकर्मचिह्नालिङ्गनेरामस्यजीवनेसंशयःस्यादितिसुग्रीवंप्रतिरामोपकारवर्णनं । ति० प्रतिकृतः कृतोपकारस्य । पिङ्गेश कपिराज ॥ २६ ॥ ति० आज्ञापनीयासेनाकियत्यत्रत्याह—हरयइति । कोट्यग्रतः कोटिघटितसंख्यायान्यर्बुदस्याग्रेउपरि यासंख्यासमुद्राख्यातयासंख्ययेत्यर्थः ॥ २८ ॥ ति० असङ्गेन अविलम्बेव । सेनाग्येण सेनानायेन । सहेतिशेषः ॥ ३१ ॥

[पा०] १ क. च. ज. हेतुभूतःसन्, क. केतुभूतःसन्, ख. ग. केतुःस्फीतश्च. २ ग. दीर्घबाहुश्च. घ. दीर्घबन्धुस्त. ३ ख. ट. कपिश्रेष्ठान्. ४ क. च. ज.—ट. शक्तिमानसि. क. ग. शक्तिमानसि. ५ ख. ट. त्प्रतिज्ञामवेक्षते. ६ ख. ट. महत्प्रियं. ७ क.—ट. देवदानवगन्धर्वाअसुरास्समरुद्गणाः. क. देवदानवगन्धर्वानासुरा. ८ क.—ट. किमिव. ९ क. ख.—ट. प्रतिकृतस्तवा. घ. प्रियकृतस्तवा. १० ज. ट. सज्जतेऽस्मासु. ११ ग. क. ग. तवाज्ञापय. ख. तमाज्ञापय. १२ क. नःकिंते. १३ ख. ग. ट. कृतोवापिव्यवस्यतु. ग. क. ज. कृतेवसतुकुत्रचित्. १४ ख. घ. क. च. ज. ग. ट. कोट्यग्रशो. १५ क. च. ज.—ट. निरूपितं. १६ घ सत्यसंपन्नः. १७ क. घ. ज.—ट. संदिदेशातिमतिमाशीलं. क. ससंदिदेशातिबलं. १८ च. ज. समागच्छन्तिवेगेन. १९ ख. ग. ट. सेनाग्येण.

ये त्वन्तपालाः प्लवगाः शीघ्रगा व्यवसायिनः ॥ समानयन्तु ते[1] सैन्यं त्वरिताः शासनान्मम ॥
स्वयं चानन्तरं सैन्यं भवानेवानुपश्यतु ॥ ३२ ॥
त्रिपञ्चरात्रादूर्ध्वं यः प्रायुयान्नेह वानरः ॥ तस्य प्राणान्तिको दण्डो नात्र कार्या विचारणा ॥ ३३ ॥
हरींश्च वृद्धानुपयातु साङ्गदो भवान्ममाज्ञामधिकृत्य निश्चिताम् ॥
इति व्यवस्थां हरिपुङ्गवेश्वरो विधाय वेश्म प्रविवेश वीर्यवान् ॥ ३४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे एकोनत्रिंशः सर्गः ॥ २९ ॥

त्रिंशः सर्गः ॥ ३० ॥

लक्ष्मणे शरदागमेऽचन्द्रदर्शनादिभासमुद्दीपितशोकतया सीताचिन्तयाबहुधाविलपतोरामस्य समाश्वासनम् ॥ १ ॥ रामेणलक्ष्मणंप्रति शरद्वर्णनम् ॥ २ ॥ शरदागमेऽपिसुग्रीवानुद्योगकुपितेनरामेणलक्ष्मणंप्रति सुग्रीवे स्वकोपनिवेदनपूर्वकं तेनस्वकार्योद्यमनचोदना ॥ ३ ॥

गुहां प्रविष्टे सुग्रीवे विमुक्ते गगने घनैः ॥ वर्षरात्रोषितो रामः कामशोकाभिपीडितः ॥ १ ॥
पाण्डुरं गगनं दृष्ट्वा विमलं चन्द्रमण्डलम् ॥ शारदीं रजनीं चैव दृष्ट्वा ज्योत्स्नानुलेपनाम् ॥ २ ॥
कामवृत्तं च सुग्रीवं नष्टां च जनकात्मजाम् ॥ बुद्ध्वा कालमतीतं च सुमोह परमातुरः ॥ ३ ॥
स तु संज्ञामुपागम्य मुहूर्तान्मतिमान्पुनः ॥ मनःस्थामपि वैदेहीं चिन्तयामास राघवः ॥ ४ ॥
आसीनः पर्वतस्याग्रे हेमधातुविभूषिते ॥ शारदं गगनं दृष्ट्वा जगाम मनसा प्रियाम् ॥ ५ ॥
दृष्ट्वा च विमलं व्योम गतविद्युद्बलाहकम् ॥ सारसारवसंघुष्टं विललापार्तया गिरा ॥ ६ ॥

तथा कुरु तथा आज्ञापय ॥ ३१ ॥ अन्तपालाः सेनापर्यन्तपालकाः ॥ ३२ ॥ त्रिपञ्चरात्रादूर्ध्वं पञ्चदशरात्रादनन्तरदिवसे ॥ ३३ ॥ वृद्धान् जाम्बवत्प्रभृतीन् ॥ ३४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने एकोनत्रिंशः सर्गः ॥ २९ ॥

अथ शरत्समागमेऽपि सुग्रीवस्यानुद्योगाद्रामकोपश्लिष्टे—गुहामित्यादि ॥ सुग्रीवे गुहां प्रविष्टे वर्षरात्रोषितो रामः कामशोकाभिपीडितः सन् । क्रमेण गगने घनैर्विमुक्ते । पाण्डुरं निर्मलं । गगनं दृष्ट्वा—परमातुरः वर्षाकालिकशोकादधिकं शोकं प्राप्तः सन् सुमोह । एतावत्पर्यन्तं कस्यचिदवधेर्विद्यमानतया कथंचिदुत्तवान् । संप्रतितदभावान्मुमोहेत्यर्थः ॥ १—३ ॥ मनःस्थामपि वैदेहीं चिन्तयामास । पुनःपुनर्विशेषतश्चिन्तितवानित्यर्थः ॥ ४ ॥ मनसा जगाम । चिन्तयामासेति यावत् ॥ ५ ॥ गिरा स्वरेण ॥ ६ ॥

ति० समानयन्तु समागच्छन्तु ॥ ३२ ॥ रामानु० त्रिपञ्चरात्रादूर्ध्वंयःप्रायुयादिहवानरइतिपाठे पञ्चदशरात्रादर्वागेवागन्तव्यमितिभावः ॥ ति० त्रिपञ्चरात्रात् पञ्चदशदिनादूर्ध्वंयआगच्छेत् तस्यदण्डः । तेनपक्षमध्येसर्वैरागन्तव्यमितिभावः । कार्तिकशुक्लादावियमाज्ञेतिबोध्यं ॥३३॥ ति० वृद्धान्हरीन्साङ्गदोभवानुपयातु । समाननार्थमितिशेषः ॥३४॥ इत्येकोनत्रिंशःसर्गः ॥२९॥

ती० सुग्रीवेविमुक्तइत्यत्रअविमुक्तइतिच्छेदः । सुग्रीवे गुहां किष्किन्धां प्रविष्टे गगने घनैरविमुक्ते आवृतेसति । वर्षरात्रोषितोरामः पाण्डुरंगगनंदृष्ट्वासुमोहेत्युत्तरत्रसंबन्धः ॥ १—२ ॥ शि० कामशोकाभिपीडितः कामेनजानकीप्राप्तिविषयकोत्कटेच्छया शोकेन तत्प्राप्त्यभावजनितचिन्तया अभिपीडितः व्याप्तः आसीदितिशेषः ॥ १ ॥ रामानु० सतिति ॥ अस्माच्छ्लोकात्परतः

[पा०] १ ख. सबलाः. २ क.—ट. तेशीघ्रं. ३ ज. तेषांचानन्तरंकार्यं. च. छ. झ. ट. स्वयंचानन्तरंकार्यं. क. यदत्रानन्तरंकार्यमवान्समनुपश्यतु. ४ क. ग. छ. झ. ट. प्रायुयादिहवानरः. ५ क. ख. सर्वान्. ६ झ. निश्चितं. ७ छ. झ. गुहं. ८ छ. झ. वर्षरात्रेस्थितो. ९ क.—ट. दृष्ट्वा. १० क. ख. मतिमान्नरः च. ज. ञ. मतिमांस्ततः. छ. झ. ट. मतिमान्नृपः. ११ अयंश्लोकः ट. पुस्तकेनदृश्यते. १२ ख. दृष्ट्वास. १३ च. ञ. विललापाकुलेन्द्रिय.

सारसारवसम्नादैः सारसारवनादिनी ॥ याऽश्रमे रमते बाला साऽद्य मे रमते कथम् ॥ ७ ॥
पुष्पितांश्चासनान्दृष्ट्वा काञ्चनानिव निर्मलान् ॥ कथं सा रमते बाला पश्यन्ती मामपश्यती ॥ ८ ॥
या पुरा कलहंसानां स्वरेण कलभाषिणी ॥ बुध्यते चारुसर्वाङ्गी सौऽद्य मे बुध्यते कथम् ॥ ९ ॥
निःस्वनं चक्रवाकानां निशम्य सहचारिणाम् ॥ पुण्डरीकविशालाक्षी कथमेषा भविष्यति ॥ १० ॥
सरांसि सरितो वापीः काननानि वनानि च ॥ तां विना मृगशावाक्षीं चरंश्चाद्य सुखं लभे ॥ ११ ॥
अपि तां मद्वियोगाच्च सौकुमार्याच्च भामिनीम् ॥ न दूरं पीडयेत्कामः शरद्गुणनिरन्तरः ॥ १२ ॥
एवमादि नरश्रेष्ठो विललाप नृपात्मजः ॥ विहङ्ग इव सारङ्गः सलिलं त्रिदशेश्वरात् ॥ १३ ॥
ततश्चक्रूर्य रम्येषु फलार्थी गिरिसानुषु ॥ ददर्श पर्युपावृत्तो लक्ष्मीवाँल्लक्ष्मणोऽग्रजम् ॥ १४ ॥

तं चिन्तया दुःसहया परीतं विसंज्ञमेकं विजने मनस्वी ॥
भ्रातुर्विषादात्परितापदीनः समीक्ष्य सौमित्रिरुवाच रामम् ॥ १५ ॥
किमार्य कामस्य वशंगतेन किमात्मपौरुष्यपराभवेन ॥
अयं सदा संहियते समाधिः किमत्र योगेन निवर्तितेन ॥ १६ ॥

सारसारवसन्नादैः सारसारावोत्थितध्वनिभिः ॥ ७ ॥ पश्यन्ती मदिदक्षया इतस्ततो दृष्टिं निक्षिपन्ती ॥ ८—९ ॥ पुण्डरीकविशालाक्षी चक्रवाकनिनदश्रवणश्वासशब्दतया नायकागमपर्यं सलीलमवलोकयन्तीत्यर्थः । कथं भविष्यति कथं सत्तां धारयिष्यतीत्यर्थः ॥ १० ॥ वापीः कृत्रिमसरांसि । काननानि महावनानि ॥ ११ ॥ शरद्गुणनिरन्तरः शरद्गुणैः साधनैः निरन्तरः पूर्णः । कामः । सौकुमार्यात् मद्वियोगाच्च हेतोः । तां भामिनीं दूरं आमरणं । न पीडयेत् । अपिः संभावनायां । पीडयेदेवेत्यर्थः ॥ १२ ॥ त्रिदशेश्वरात् सलिलमुद्दिश्य सारङ्गश्चातक इव विललापेति संबन्धः ॥ १३ ॥ चक्रूर्य कुटिलं चरित्वा । फलाभिलाषेण कुटिलमार्गेण चरित्वा । "नित्यं कौटिल्ये गतौ" इति यङ् ॥ १४—१५ ॥ वंशगतेन मनसेति शेषः । पौरुष्यं पौरुषं स्वार्थे ष्यञ् । अयं वर्तमानः । समाधिः चित्तसमाधानं । सदा तत्र तत्र काले । संहियते संपाद्यते । अत्र अस्मिन्काले । निवर्तितेन योगेन किं । अयं यदा संहियते समाधिरिति पाठान्तरं । यदा यस्मिन्काले । अयं समाधिः चित्तसमाधानं । संहियते संपाद्यते । अत्रास्मिन्काले

आसीनःपर्वतस्याग्रे इतिश्लोकः । अस्माच्चपरतः दृष्ट्वाचविमलंव्योमहृतिश्लोकः । व्यासस्तुल्लेखकप्रमादकृतः ॥ ४ ॥ ति० सारसनादसदृशनादवती या सारसानामारावाय परस्परसमाह्वानाय । कृतैर्नादैर्या रमतेऽश्रमे ॥ ७ ॥ ति० काननवनयोःकान्तारोपवनात्मनाभेदः ॥ ११ ॥ ति० ततः तत्रकाले । रम्येषुगिरिसानुषुचक्रूर्य भ्रातृदुःखेनगर्हितंचरित्वा । यङ्लुगन्तादार्धधातुकात्ल्यप् । पर्युपावृत्तोलक्ष्मणः अग्रजंरामंददर्श ॥ १४ ॥ ती० आर्य यदा यस्मिन्काले समाधिश्चित्तसमाधानं संपादनीयं । अत्र अस्मिन्काले । अयंकिंसंहियते किमर्थंसंहियते । कामस्यवशंगतेनकिं कामवशंगमनेनकिं । द्वितीयायाअलुगार्षः । भावेनिष्ठा । आत्मपौरुष्यपराभवेनकिं पौरुषस्यापौरुष्यं । निवर्तितेनयोगेनकिं । योगः संनहनं उद्योगइत्यर्थः ॥ ति० अयलक्ष्मणःकर्मयोगज्ञानयोगाभ्यांपौरुषवृद्धयेदुःखशान्तयेचानुतिष्ठेतिस्मारयति किमार्येत्यादि । हेआर्य कामस्यवशंगतेनलब्धा किंकर्मकृतंस्यात् । अपिचैवंकामवशलेनआत्मपौरुषस्यापौरुषस्यअभिभवेनकिंप्रयोजनंसाधितंस्यात् । तस्मात्कामवशलंत्यक्त्वा कर्मयोगंकुरु । किंच आत्मादिकर्मयोगोत्तरकालमनसप्राप्तोयंसमाधिः ब्रह्मानुसंधानं । हियंहरतीतिहीःशोकः तेनकिमर्थंसंहियते । अत्र अस्मामवस्थायां योगेन समाधिना । सर्वदुःखमितिशेषः । किंननिवर्तते अपितुनिवर्ततएवेत्यर्थः । एवमेवपाङ्क्तःपाठइतिकतकृत् । पाठान्तरंत्वस्ययोजना-

[पा०] १ क. ख. घ.—छ. झ. ञ. ट, सारसारव. २ झ. ट. कलेन. ३ ट. साधवै. ४ छ. रमतेकथं. ५ क. पलाशाक्षी. ६ ग. चिरंनाथ. ७ छ. झ. सुदूरं. घ. ननूनं. ८ क. ख. ततस्त्वेचार्यं. ङ. च. ज. ञ. अतःस्वेचार्यकुटिलं. ९ ख. लक्ष्मणोलक्ष्मणाग्रजं. १० छ. झ. ट. सचिन्तया. ११ ङ.—ट. त्वरितोतिदीनः. १२ ख. ङ.—ट. दीनं. १३ क. ग. ज. यदा. ख. छ. झ. ट. हिया. घ. ङ. ञ. यथा.

क्रियाभियोगं मनसः प्रसादं समाधियोगानुगतं च कालम् ॥
सहायसामर्थ्यमदीनसत्त्व स्वकर्महेतुं च कुरुष्व हेतुम् ॥ १७ ॥
न जानकी मानववंशनाथ त्वया सनाथा सुलभा परेण ॥
न चाग्निचूडां ज्वलितामुपेत्य न दह्यते वीरवरार्ह कश्चित् ॥ १८ ॥
सलक्षणं लक्ष्मणमप्रधृष्यं स्वभावजं वाक्यमुवाच रामः ॥
हितं च पथ्यं च नयप्रसक्तं ससाम धर्मार्थसमाहितं च ॥ १९ ॥
निःसंशयं कार्यमवेक्षितव्यं क्रियाविशेषो ह्यनुवर्तितव्यः ॥
ननु प्रवृत्तस्य दुरासदस्य कुमार कार्यस्य फलं न चिन्त्यम् ॥ २० ॥
अथ पद्मपलाशाक्षीं मैथिलीमनुचिन्तयन् ॥ उवाच लक्ष्मणं रामो मुखेन परिशुष्यता ॥ २१ ॥
तर्पयित्वा सहस्राक्षः सलिलेन वसुन्धराम् ॥ निर्वर्तयित्वा सस्यानि कृतकर्मा व्यवस्थितः ॥ २२ ॥

निवर्तितेन योगेन सन्नहनेन उत्साहेन किमित्यर्थः ॥ १६ ॥ क्रियाभियोगं कार्योद्योगम् । मनसः प्रसादं समाधियोगानुगतं धैर्योपायाभ्यामनुबद्धं । कालं च । सहायसामर्थ्यं सुग्रीवादिसहायसामर्थ्यं । स्वकर्म देवतोपासनात्मकं तदेव हेतुः तं च हेतुं कुरुष्व । क्रियाभियोगादिकं सर्वं स्वकार्यसिद्धौ हेतुं कुरुष्वेत्यर्थः । अत्र प्रकरणे लक्ष्मणेन रामस्याश्रितरक्षणत्वरा संदीप्यत इति स्वोपदेशः सुलभः ॥ १७ ॥ सुलभा लब्धुमर्हा । अग्निचूडां अग्निज्वालां ॥ १८ ॥ रामः अप्रधृष्यं युक्तिभिरविचाल्यं । स्वभावजं स्वभावसिद्धं । हितं उदर्कसुखकरं । पथ्यं तत्कालसुखकरं । नयप्रसक्तं राजनीतियुक्तं । ससाम सान्त्वयुक्तं धर्मार्थसमाहितं च वाक्यमुक्तवन्तं सलक्षणं लक्ष्मणमुवाचेति योजना । यद्वा अप्रधृष्यत्वादिविशेषणविशिष्टं वाक्यं राम उवाच । लक्ष्मणोक्तानुवादरूपत्वाद्रामवाक्यस्यापि तथात्वमिति बोध्यं ॥ १९ ॥ कार्यं सीतान्वेषणादिकं । निःसंशयं यथाभवतितथा अवेक्षणीयं । तदनुरूपं धैर्यं कर्तव्यमित्यर्थः । क्रियाविशेषः उत्साहादिः । अनुवर्तितव्यः अनुवर्तितव्य एव । हे कुमार प्रवृत्तस्य दुरासदस्य कार्यस्य फलं सीताप्राप्तिरूपं । न चिन्त्यं ननु चिन्त्यमेव ॥ २० ॥ एवं लक्ष्मणसमाश्वासनेन प्रतिष्ठापितधैर्योपि सीताविषयकामानुवृत्त्यापुनः शरदंवर्णयति—अथेत्यादिना ॥ २१ ॥ निर्वर्तयित्वा परिपक्वानि कृत्वा । कृतकर्मा

शक्त्याकल्पितमितिचसः ॥ १६ ॥ ति० उक्तमेवविवृणोति—क्रियाभियोगमिति । क्रियाणांशौचस्नानादीनां अभितःकार्त्स्न्येः नयोगं अनुष्ठानं । मनसःप्रसादंचास्थाय । कालं सर्वकालं समाधियोगानुगतं तेनसंबद्धमेवकुरुष्व । तथा अदीनसत्वः अक्षीणसत्वसन् । स्वकर्महेतुं पौरुषवृद्धेःकारणं । सहायसामर्थ्यं तद्घटनरूपंस्वकर्मदेवार्चनादिरूपकर्मयोगंचकुरुष्व । अनेनयावत्फलंनिदिध्यासनजातकर्मसमुच्चयउक्तः ॥ स० क्रियाभियोगं सन्ध्यावन्दनाद्युद्योगंकुरुष्व । समाधियोगं चित्तैकाग्र्यरूपमुपायं अनुगतोयः कालस्तंचकुरुष्व । सहायसामर्थ्यं सुग्रीवादिसहायघटनां । हे अदीनसत्त्व स्वकर्महेतुं स्वकार्यसाधकं । एतच्चसहायसामर्थ्यस्यविशेषणं ॥ १७ ॥ ति० अतो या नीता सातत्प्रतिकृतिरेव । सातुत्वदुपासिताभावितिव्यङ्ग्यं ॥ १८ ॥ वि० रामः अप्रधृष्यं युक्तिभिरविचाल्यं । स्वभावजं स्वभावसिद्धंवाक्यमुक्तवन्तं लक्षणसहितंलक्ष्मणमुवाच । हेलक्ष्मण यत्त्वयाप्रयुक्तंवाक्यं तद्धितं तत्कालसुखं । पथ्यं कालान्तरेपिसुखं । नयप्रसक्तं राजनीतियुक्तं । सामसहितधर्मार्थाभ्यांसमाहितं संगतं ॥ रामानु० एतच्छ्लोकोक्ताप्रधृष्यत्वादिधर्माणांपूर्वोक्तलक्ष्मणवाक्येषुविद्यमानत्वादुपरिष्टाद्रामेलक्ष्मणोक्तस्यास्यैवानूद्यमानत्वादुक्तवन्तमितिपदमध्याहर्तव्यं ॥ स० सलक्ष्मणं लक्षणसहितं । "लक्ष्मणंनाम्निचिह्नेचरामभ्रातरिलक्ष्मणः" इतिविश्वः ॥ १९ ॥ ति० तस्मात्त्वदुक्तंनिस्संशयंकार्यं त्वद्वाक्यार्थोनुष्ठेयएव । अनुष्ठेयमाह—अवेक्षितव्यं समाधियोगेनभगवत्तत्वंद्रष्टव्यं । क्रियाविशेषः कर्मयोगः । सोप्यनुवर्तितव्यः अनुष्ठेयः । हेकुमार नतुकर्मज्ञानयोगौहित्वाप्रकर्षेणवृद्धिंप्राप्तस्य । अतएव दुरासदस्य । वीर्यस्य वीर्यवतःकर्मणः फलंच फलमेव ।

[पा०] १ ङ. च. ज. महीन. २ छ. झ. ट. तात. ङ. च. ञ. योगं. ४ ख. सलक्ष्मिवाँल्लक्ष्मणं. ५ ङ. च. ञ. वचःप्रयुक्तं. ६ ङ. च. ज. धर्मसमाहितार्थं. ७ ग. मवेक्षणीयं. ८ ग. घ. ङ. झ. ट. विशेषोप्यनुवर्तितव्यः. ९ झ. ट. नतुप्रवृद्धस्य. घ. नचप्रवृत्तस्य. ग. ज. नतुप्रवृत्तस्य. १० झ. ट. वीर्यस्य. ११ घ. च. झ. ट. फलंच. १२ ग. वैदेहीमनु.

स्निग्धगम्भीरनिर्घोषाः शैलद्रुमपुरोगमाः ॥ विसृज्य सलिलं मेघाः परिश्रान्ता नृपात्मज ॥ २३ ॥
नीलोत्पलदलश्यामाः श्यामीकृत्वा दिशो दश ॥ विमदा इव मातङ्गाः शान्तवेगाः पयोधराः ॥ २४ ॥
जलगर्भा महावेगाः कुटजार्जुनगन्धिनः ॥ चरित्वा विरताः सौम्य वृष्टिवाताः समुद्यताः ॥ २५ ॥
घनानां वारणानां च मयूराणां च लक्ष्मण ॥ नादः प्रस्रवणानां च प्रशान्तः सहसाऽनघ ॥ २६ ॥
अभिवृष्टा महामेघैर्निर्मलाश्चित्रसानवः ॥ अनुलिप्ता इवाभान्ति गिरयश्चित्रदीप्तिभिः ॥ २७ ॥
दर्शयन्ति शरन्नद्यः पुलिनानि शनैः शनैः ॥ नवसङ्गमसंव्रीडाजघनानीव योषितः ॥ २८ ॥

शाखासु सप्तच्छदपादपानां प्रभासु तारार्कनिशाकराणाम् ॥
लीलासु चैवोत्तमवारणानां श्रियं विभज्याद्य शरत्प्रवृत्ता ॥ २९ ॥
संप्रत्यनेकाश्रयचित्रशोभा लक्ष्मीः शरत्कालगुणोपनीता ॥
सूर्याग्रहस्तप्रतिबोधितेषु पद्माकरेष्वभ्यधिकं विभाति ॥ ३० ॥
सप्तच्छदानां कुसुमोपगन्धी पदादवृन्दैरनुगीयमानः ॥
मत्तद्विपानां पवनोनुसारी दर्पं वनेष्वभ्यधिकं करोति ॥ ३१ ॥
अभ्यागतैश्चारुविशालपक्षैः सरःप्रियैः पद्मरजोवकीर्णैः ॥
महानदीनां पुलिनोपयातैः क्रीडन्ति हंसाः सह चक्रवाकैः ॥ ३२ ॥

कृतकृत्यः ॥ २२ ॥ शैलद्रुमपुरोगमाः शैलद्रुमाणामग्रे गच्छन्तः । अत्र प्रकरणे सर्वत्र विषये प्रवृत्तिः रामावतारकृता सूच्यते ॥ २३—२४ ॥ वृष्टिकरा वाता वृष्टिवाताः पुरोवाता इत्यर्थः ॥ २५—२६ ॥ चित्रदीप्तिभिः नानावर्णकान्तिभिः ॥२७॥ दर्शयन्तीति । अनेन चिरकालानुवर्तनेन गुरूणां शिष्येभ्यो रहस्यार्थप्रकाशनं सूच्यते ॥ २८ ॥ सप्तच्छदानाम शरत्पुष्पवृक्षाः । शरत् कर्त्री । श्रियं स्वसमृद्धिं । विभज्य त्रेधाविभज्य । सप्तच्छदशाखादिषु प्रवृत्ता सप्तच्छदेषु पुष्पविकासरूपाश्रीः । तारादिप्रभासुनिर्मलतारूपा । गजलीलासु उन्मत्तकतारूपा ॥ २९ ॥ अनेकाश्रयचित्रशोभा सितरक्तनीलपद्मजादिरूपानेकाश्रयतया चित्रशोभा नानावर्णकान्तिः । शरत्कालगुणोपनीता शरत्कालोत्कर्षेण प्रापिता । लक्ष्मीः समृद्धिः । सूर्यस्याग्रहस्तैः प्राथमिककिरणैः । हस्तशब्देन करा लक्ष्यन्ते । भगवत्कटाक्षबोधितेषु पुरुषेषु नानारूपसंवित्प्रकाश उच्यते ॥ ३० ॥ अनुसारी अनुसृत्य वर्तमानः। अविच्छेदेनैव प्रवर्तमान इत्यर्थः । मत्तद्विपानां दर्पकरोति । मदवृद्धिहेतुत्वादिति भावः ॥ ३१ ॥ अभ्यागतैरिति । मिथुनतया आभिमुख्येन संगतैः । चारु यथा तथा विशालपक्षैः हर्षेण विस्तृतपक्षैरित्यर्थः । क्रीडन्ति हंसाः सह चक्रवाकैः हंसाश्च क्रीडन्ति

चिन्त्यं अपेक्षणीयं । अनेनयावत्कलंनिर्दिश्यासनकर्मसमुच्चयउक्तः ॥ २० ॥ ति० शैलद्रुमपुरइति द्वितीयाबहुवचनान्तं । तान्गच्छन्तितथाभूतानसलिलंविसृज्यपरिशान्ताः ॥ शि० दीर्घः गंभीरः निर्घोषोयेषांतेगमाः गगनमागतामेघाः सलिलं शैलद्रुमपुरः विसृज्य प्रापय्य परिशान्तास्वमवस्थितिशेषः । शैलद्रुमपुरोगमाइत्येकंपदंवा । तदर्थस्तु शैलद्रुमाणांपुरः अग्रमार्गेगच्छन्तीति ॥२३॥ ति० नीलोत्पलदलश्यामाइतिपयोधरविशेषणं । अहंत्वशान्तकामवेगइतिव्यञ्जय ॥ २४ ॥ स० मयूराणामिववारणानामपि वर्षाकालएवसंतोषातिशयइतिसंप्रदायः ॥ २६ ॥ स० अनुसारीशरत्कालानुगुणः मत्तद्विपानांदर्पंविनेष्यन् क्रीडासाधनजलापहारेणवा मदगन्धसहशसप्तच्छदगन्धभ्रमरादिसाहित्येनवेतिज्ञेयं । त्री० सप्तच्छदानामितिकर्मणिषष्ठी । ताननुसारी अनुसृत्यवर्तमानः पवनः मत्तद्विपानांदर्पकरोतीतिसंबन्धः ॥ ति० पवनमनुसरतिच्छीलः । विनेष्यन् जलंशोषयन् । शरत्कालइतिशेषः ॥ ३१ ॥ रामानु० क्रीडन्तिहंसास्सहचक्रवाकैरिति । हंसचक्रवाकाः परस्परवैरेणोपिशरद्गुणसंजातहर्षपरवशाद्वैरंविस्मृत्यविहरन्तीतिनवि-

[पा०] १ ग. ङ.—ट. दीर्घगंभीर. २ च. छ. झ. ञ. परिशान्ता. ३ ङ.—ट. गिरयश्चन्द्ररश्मिभिः. ४ ग. क्रीडासु. ५ ञ—ट. गुणोपपन्ना. ६ ञ. ण. सूर्याग्रपाद्. ७ ङ. च. छ. झ. ञ. ट. पवनानुसारी. ८ ङ.—ट. दर्पंविनेष्यन्नभिवंविभाति. ९ छ. झ. ट. सरःप्रियैः.

मदप्रगल्भेषु च वारणेषु गवां समूहेषु च दर्पितेषु ॥
प्रसन्नतोयासु च निम्नगासु विभाति लक्ष्मीर्बहुधा विभक्ता ॥ ३३ ॥
नभः समीक्ष्याम्बुधरैर्विमुक्तं विमुक्तबर्हाभरणा वनेषु ॥
प्रियासखसक्ता विनिवृत्तशोभा गतोत्सवा ध्यानपरा मयूराः ॥ ३४ ॥
मनोज्ञगन्धैः प्रियकैरनल्पैः पुष्पातिभारावनताग्रशाखैः ॥
सुवर्णगौरैर्नयनाभिरामैरुच्छ्रोतितानीव वनान्तराणि ॥ ३५ ॥
प्रियान्वितानां नलिनीप्रियाणां वने रतानां कुसुमोद्धतानाम् ॥
मदोत्कटानां मदलालसानां गजोत्तमानां गतयोऽद्य मन्दाः ॥ ३६ ॥
व्यभ्रं नभः शस्यविधौतवर्णं कृशप्रवाहानि नदीजलानि ॥
कहारशीताः पवनाः प्रवान्ति तमोविमुक्ताश्च दिशः प्रकाशाः ॥ ३७ ॥
सूर्यातपक्रामणनष्टपङ्का भूमिश्चिरोद्घाटितसान्द्ररेणुः ॥
अन्योन्यवैरामर्षायुतानामुद्योगकालोऽद्य नराधिपानाम् ॥ ३८ ॥
शरद्गुणाप्यायितरूपशोभाः प्रहर्षिताः पांसुसमुत्थिताङ्गाः ॥
मदोत्कटाः संप्रति युद्धलुब्धा वृषा गवां मध्यगता नदन्ति ॥ ३९ ॥
समन्मथं तीव्रगतानुरागाः कुलान्विता मन्दगतिं करिण्यः ॥
मदान्वितं संपरिवार्य यान्तं वनेषु भर्तारमनुव्रजन्ति ॥ ४० ॥
त्यक्त्वा वराण्यात्मविभूषणानि बर्हाणि तीरोपगता नदीनाम् ॥
निर्भर्त्स्यमाना इव सारसौघैः प्रयान्ति दीना विमदा मयूराः ॥ ४१ ॥
वित्रास्य कारण्डवचक्रवाकान्महारवैर्भिन्नकटा गजेन्द्राः ॥
सरस्सु बुद्धाम्बुजभूषणेषु विक्षोभ्य विक्षोभ्य जलं पिबन्ति ॥ ४२ ॥

चक्रवाकाश्च क्रीडन्तीत्यर्थः ॥ ३२—३३ ॥ गतोत्सवाः नष्टहर्षा इत्यर्थः । बभूवुरिति शेषः ॥ ३४ ॥ प्रियकैः बन्धूकैः । "सर्जकासनबन्धूकपुष्पप्रियकजीवकाः" इत्यमरः ॥ ३५ ॥ कुसुमोद्धतानां सप्तच्छदकुसुमाघ्राणेन मत्तानां । मदोत्कटानां मदेन उद्भिन्नकटानां ॥ ३६ ॥ व्यभ्रं विगतमेघं । शस्यविधौतवर्णं विधौतशस्यवर्णं । कृशप्रवाहानि संकुचितप्रवाहानि ॥ ३७ ॥ चिरोद्घाटितसान्द्ररेणुः चिरात् इषत् उत्पादितनिबिडरेणुः । स्थूलरेणुरित्यर्थः । अन्योन्यवैरामर्षायुतानामित्यत्र वृत्तभङ्ग आर्षः । वैरं विरोधः । अमर्षः असहिष्णुता । ताभ्यां आयुतानां आसमन्ताद्युतानां । वैरामर्षपूर्णानामित्यर्थः ॥३८॥ रूपशोभाः शरीरशोभाः ॥ ३९ ॥ कुलान्विताः सजातीयसमूहेन युक्ताः ॥४०॥ सारसौघैः हंससमूहैः ॥४१॥ महारवैः वित्रासः ॥ १२ ॥ शि० ध्यानपराः मेघचिन्तनरताः बभूवुरितिशेषः ॥३४॥ ति० कुसुमोद्धतानां सप्तच्छदकुसुमाघ्राणप्रवृत्तानां । उद्धतानामित्येवपाठः । उद्धतानामितिकल्पितइतिकृतकृतः । मदोत्कटाः अधिकमदाः । अतएवमदलालसाः । मदशब्देन तज्जन्यःकामभोगः तत्रेच्छावन्तः ॥ ३६ ॥ ति० सूर्यातपस्यक्रामणंसंबन्धः । चिरेणोद्घाटितः प्रकाशितःसान्द्ररेणुर्यया । अनेनशरदुत्तरार्धकालोयमितिज्ञायते ॥ ३८ ॥ ति० समन्मथत्वादिविशेषणचतुष्टयंकरेण्याः । करेणूरितिदीर्घत्वमार्षं ॥ ४० ॥ ति० विभूषितं विभूषणं । विमनायमूराः । मनःपर्यायोमनशब्दोकारान्तोपि द्विरूपकोशात् ॥ ४१ ॥ ति० बुद्धाम्बुजानि विकसित-

[पा०] १ ग. मत्तप्रगल्भेषु. ख. घ. मदप्रगल्भेष्वपि. २ क. झ. ट. प्रियासखरक्ता. ३ घ. रनेकैः. ४ च. छ. झ. ट. पुष्पाप्रभारा. ५ क. ज.—ट. वनप्रियाणां. घ. वनेचराणां. ६ क. ङ. च. छ. झ. ञ. ट. कुसुमोद्धतानां. ७ झ. ट. व्यभ्रं. ८ क. ग. घ. भूमिःसमुत्पादित. ट. भूमिःखुरोद्घाटित. ९ क.—ट. वैरेणसमायुतानां. ख. वैरादमर्षायुतानां. १० क. ख. घ.—ट. समन्मथातीव्रतरानुरागा. ११ क. मन्दगताःकरिण्यः. छ. झ. ञ. ट. मन्दगतिःकरेणूः. १२ ग. मदान्विता. १३ ख. कान्तं. १४ छ. झ. ट. प्रयाति. १५ ग.—ट. विभूषितानि. १६ ङ.—ट. विमनाः. १७ घ. गजाधिपाः. १८ ग. क्षिपन्ति.

व्यपेतपङ्कासु सवालुकासु प्रसन्नतोयासु सगोकुलासु ॥
ससारसा रावविनादितासु नदीषु हृष्टा निपतन्ति हंसाः ॥ ४३ ॥
नदीघनप्रस्रवणोदकानामतिप्रवृद्धानिलबर्हिणानाम् ॥
ध्रुवक्रमाणां च गतोत्सवानां हृतं रवाः संप्रति संप्रवृष्टाः ॥ ४४ ॥
अनेकवर्णाः सुविनष्टकाया नवोदितेष्वम्बुधरेषु नष्टाः ॥
क्षुधार्दिता घोरविषा बिलेभ्यश्चिरोषिता विप्रसरन्ति सर्पाः ॥ ४५ ॥
चञ्चच्चन्द्रकरस्पर्शहर्षोन्मीलिततारका ॥ अहो रागवती सन्ध्या जहाति स्वयमम्बरम् ॥ ४६ ॥
रात्रिः शशाङ्कोदितसौम्यवक्त्रा तारागणोन्मीलितचारुनेत्रा ॥
ज्योत्स्नांशुकप्रावरणा विभाति नारीव शुक्लांशुकसंवृताङ्गी ॥ ४७ ॥
विपक्वशालिप्रसवानि भुक्त्वा प्रहर्षिता सारसचारुपङ्क्तिः ॥
नभः समाक्रामति शीघ्रवेगा वातावधूता ग्रथितेव माला ॥ ४८ ॥
सुनैकहंसं कुसुमैरुपेतं महाह्रदस्थं सलिलं बिभाति ॥
घनैर्विमुक्तं निशि पूर्णचन्द्रं तारागणाकीर्णमिवान्तरिक्षम् ॥ ४९ ॥
प्रकीर्णहंसाकुलमेखलानां प्रबुद्धपद्मोत्पलमालिनीनाम् ॥
वाप्युत्तमानामधिकाऽद्य लक्ष्मीर्वराङ्गनानामिव भूषितानाम् ॥ ५० ॥
वेणुस्वनव्यञ्जिततूर्यमिश्रः प्रत्यूषकालानिलसंप्रबुद्धः ॥
संमूर्छितो गर्जितगोवृषाणामन्योन्यमापूरयतीव शब्दः ॥ ५१ ॥

स्रोति संबन्धः । मिलकटाः मदेनेति शेषः ॥ ४२ ॥ सवालुकासु ससिकतासु । ससारसा इति पदच्छेदः । रावविनादितासु निजशब्देन संजातशब्दासु ॥ ४३ ॥ नद्यश्च घनप्रस्रवणानि च तेषां उदकानां । ध्रुवक्रमाणां शम्बूकानां ॥ ४४ ॥ अनेकवर्णाः कृष्णपीतादिवर्णाः । सुविनष्टकायाः अत्यन्तकृशशरीराः । नष्टाः लीनाः ॥ ४५ ॥ चञ्चच्चन्द्रकरस्पर्शेन यो हर्षः तेन उन्मीलिततारका निर्मलनक्षत्रा । रागवती आरुण्यवती सन्ध्या । अम्बरं आकाशं । स्वयं जहाति । अत्र कान्तकरस्पर्शेन हर्षविस्फारितनेत्रकनीनिका उत्तेजितानुरागा स्वयमेव रत्ये अम्बरं त्यजन्ती कामुकी प्रतीयत इति समासोक्तिः । सन्ध्यारागः प्रायेण शरद्येव भवतीत्येवमुक्तं ॥४६॥ शशाङ्कोदितसौम्यवक्त्रा उदितशशाङ्करम्यवक्त्रा । तारागणोन्मीलितचारुनेत्रा उन्मीलिततारागणचारुनेत्रा ॥ ४७ ॥ भुक्त्वा मुखाभ्रे गृहीत्वा । माला नानावर्णपुष्पमाला ॥ ४८ ॥ सुनैकहंसमिति इदं चन्द्रस्थाने । महाह्रदस्थमिति गाम्भीर्यकृतनैर्मल्यातिशयेन आकाशसाम्याय । घनैर्विमुक्तमिति परिपूर्णत्वायोक्तं ॥ ४९—५० ॥ वेणूनां सुषिरवंशानां स्वनेन व्यञ्जितं यत्तूर्यं गीतवाद्यं तेन

रूपकानि ॥ यद्वा विक्षोभ्यजलं अगाधजलपिङ्गतीत्यर्थः ॥ ४२ ॥ **ती०** ससारसारावविनादितासु ससारसाश्चतेषामारावविनादिताश्चेतितया । तासु ॥ ४३ ॥ **स०** सुनिविष्टकायाः बल्मीकेषुसम्यङ्निवेशितदेहाः । अंबुधरेषुनवोदितेषुसत्सु नष्टाः अदर्शनंगताः । विप्रसरन्ति बहिर्निर्गच्छन्ति ॥ इतःपरंचचच्चन्द्रकरेत्यादिश्लोकःकश्चित्पुस्तकेदृश्यते । सचमूलचट्टपुस्तकेष्वदर्शनात्प्रक्षिप्त इतिनव्याख्यायते ॥ ४५ ॥ **स०** शशाङ्कात्मकंउदितंसौम्यवक्त्रंयस्यास्सा । ज्योत्स्नैवांशुकप्रावरणंयस्यास्सा ॥ ४७ ॥ **ति०** शालिप्रसवाः व्रीहयः ॥ ४८ ॥ **तनि०** महाह्रदशब्देनागाधत्वमुक्तं । तेनातिनीलाश्रयस्वतयाहंसस्यातिधावल्यंप्रकाश्यते ॥ ४९ ॥ **ति०** महतां गिरिगह्वराणांगोवृषाणांचकाननवर्तिनांशब्दः । अन्योन्यमापूरयतीव वर्धयतीव । गह्वरगोवृषशब्दाः साजात्यात्परस्परवर्धकाइत्यर्थः । गह्वरगोवृषाणामितिपाठः ॥ **स०** प्रत्यूषः ऊष रुजायां । प्रत्यूषतिरजनीमितिप्रत्यूषकालः प्रातःकालः तस्मिन् ।

[पा०] १ ङ. ग. सुसारसाः. २ घ. विरावितासु. ञ. निनादितासु. ३ ङ. च. ज.—ट. हंसानिपतन्तिहृष्टाः. ४ घ. नदीजल. ५ ग. हृतोत्सवानां. ६ ङ. च. ज.—ट. ध्रुवं. ७ घ. नवोदकेषु. ८ ग. घ. च. ज.—ट. कुसुमैरुपेतं. ९ ङ. झ. वेणुस्वर. १० ग. छ. ञ. झ. ट. संप्रवृत्ताः. ११ झ. ट. गह्वर.

नवैर्नदीनां कुसुमप्रभासैर्व्याधूयमानैर्मृदु मारुतेन ॥
धौतामलक्षौमपटप्रकाशैः कूलानि काशैरुपशोभितानि ॥ ५२ ॥
वनप्रचण्डा मधुपानशौण्डाः प्रियान्विताः षट्चरणाः प्रहृष्टाः ॥
वनेषु मत्ताः पवनानुयात्रां कुर्वन्ति पद्मासनरेणुगौराः ॥ ५३ ॥
जलं प्रसन्नं कुमुदं प्रभासं क्रौञ्चस्वनाः शालिवनं विपक्वम् ॥
मृदुश्च वायुर्विमलश्च चन्द्रः शंसन्ति वर्षव्यपनीतकालम् ॥ ५४ ॥
मीनोपसंदर्शितमेखलानां नदीवधूनां गतयोऽद्य मन्दाः ॥
कान्तोपभुक्तालसगामिनीनां प्रभातकालेष्विव कामिनीनाम् ॥ ५५ ॥
सचक्रवाकानि सशैवलानि काशैर्दुकूलैरिव संवृतानि ॥
सपत्रलेखानि सरोचनानि वधूमुखानीव नदीमुखानि ॥ ५६ ॥
प्रफुल्लबाणासनचित्रितेषु प्रहृष्टषट्पादनिकूजितेषु ॥
गृहीतचापोद्यतचण्डदण्डः प्रचण्डचारोद्य वनेषु कामः ॥ ५७ ॥
लोकं सुवृष्ट्या परितोषयित्वा नदीस्तटाकानि च पूरयित्वा ॥
निष्पन्नसस्यां वसुधां च कृत्वा त्यक्त्वा नभस्तोयधराः प्रनष्टाः ॥ ५८ ॥
प्रसन्नसलिलाः सौम्य कुररीभिर्विनादिताः ॥ चक्रवाकगणाकीर्णा विभान्ति सलिलाशयाः ॥ ५९ ॥
असनाः सप्तपर्णाश्च कोविदाराश्च पुष्पिताः ॥ दृश्यन्ते बन्धुजीवाश्च श्यामाश्च गिरिसानुषु ॥ ६० ॥
हंससारसचक्राहैः कुररैश्च समन्ततः ॥ पुलिनान्यवकीर्णानि नदीनां पश्य लक्ष्मण ॥ ६१ ॥

मिश्रः । प्रत्यूषकालानिलेन प्रातःकालवायुना संप्रवृद्धः । नुयात्रां वातानुगमनं । कुर्वन्ति परिमलानुसारादिति अभिवृद्धः । संमूर्छितः अभिव्याप्तः । गर्गरगोवृषाणां भावः ॥ ५३ ॥ प्रभासत इति प्रभासं । पचाद्यच् । गर्गराणां दधिमथनभाण्डानां गवां वृषाणां च शब्दः । विकस्वरमित्यर्थः । वर्षव्यपनीतकालं वर्षाव्यतीतकालं । अन्योन्यमापूरयतीव परस्परमभिवर्धयतीव । प्रातः- शरत्कालमिति यावत् ॥ ५४ ॥ कामिनीनां वारस्त्री- कालिकदधिमथनघोषः वत्सोत्सुकानां गवां पुष्टया णामित्यर्थः ॥ ५५ ॥ चक्रवाकशैवलकाशाः रोचना- कामातुराणां वृषाणां च शब्दः गोपाल- पत्रलेखावकुण्ठनदुकूलस्थानीयाः ॥ ५६ ॥ बाणाः वेणुस्वनैः प्राभातिकवायुमिश्राभिवृद्धो जायत इत्यर्थः बाणवृक्षाः । असनाः सर्जकाः । गृहीतचापेन उद्यतः ॥ ५१ ॥ कुसुमैः प्रभासन्त इति कुसुमप्रभासाः प्रयुक्तः चण्डदण्डः तीक्ष्णदण्डनं येन स तथा । यद्वा तैः । पटप्रकाशैः पटतुल्यैः । काशैः शुभ्रपुष्पदर्भवि- गृहीतचापश्चासौ उद्यतचण्डदण्डश्च । दण्डः शरविशे- शेषैः । नदीनां कूलानि तटानीत्युक्त्या स्त्रीणां जघ- षः । "दण्डस्त्रयः काण्डभेदाः स्युः" इति हलायुधः । नोपमा सूच्यते ॥ ५२ ॥ वने प्रचण्डाः निरङ्कुशगत- प्रचण्डचारः उग्रसंचारः ॥ ५७ ॥ लोकं जनं ॥५८॥ यः । मधुपाने शौण्डाः धूर्ताः । पद्मानामसनानां च कुररीभिः क्रौञ्चीभिः । सलिलाशयाः सरांसि ॥ ५९ ॥ रेणुभिः गौराः । षट्चरणाः भृङ्गाः । वनेषु पवना- बन्धुजीवाः श्यामाश्च लताविशेषाः ॥ ६०—६१ ॥

संमूर्छितः समूर्जितः । गर्गरः हस्तिहस्तः । तस्यगोवृषाणांचशब्दः । गर्गरशब्दस्यहस्तिहस्तार्थकत्वंतुकर्मनिर्णयटीकारीत्याज्ञेयं । मीनभेदोवा । " गर्गरोमीनभेदेस्यात् " इतिविश्वः ॥ ५१ ॥ स० मीनाएवउपसंदर्शितामेखलायासांतासां । शरत्कालएवमीन- दर्शनं स्वच्छत्वादुदकस्य ॥ कान्तोपभुक्ताश्चताश्चलसगामिन्यश्च । यद्वा भावेक्तः । तेनालसगामिन्यः ॥ ५५ ॥ ति० प्रचण्ड-

[पा०] १ ख. ग. ङ. छ. झ. ट. कुसुमप्रहासं. च. ञ. कुसुमं. २ क. ग. घ. च.—झ. ट. क्रौञ्चस्वनं. ३ क. वनेच पद्मं. ४ क. सरोमुखानि. ५ घ. छ. झ. ठ. दण्डचण्डः. ६ क. छ. झ. ञ. ट. प्रचण्डचापोद्य. ७ ग. प्रयाताः. ८ असनाः सप्तपर्णश्चेत्यादीनांचतुर्णांश्लोकानांपौर्वापर्यं. छ. झ. ञ. ट. पाठेषुदृश्यते.

अन्योन्यबद्धवैराणां जिगीषूणां नृपात्मज ॥ उद्योगसमयः सौम्य पार्थिवानामुपस्थितः ॥ ६२ ॥
इयं सा प्रथमा यात्रा पार्थिवानां नृपात्मज ॥ न च पश्यामि सुग्रीवमुद्योगं वा तथाविधम् ॥ ६३ ॥
चत्वारो वार्षिका मासा गता वर्षशतोपमाः ॥ मम शोकाभिभूतस्य सौम्य सीतामपश्यतः ॥ ६४ ॥
चक्रवाकीव भर्तारं पृष्ठतोऽनुगता वनम् ॥ विषमं दण्डकारण्यमुद्यानमिव यो ऽऽगता ॥ ६५ ॥
प्रियाविहीने दुःखार्ते हृतराज्ये विवासिते ॥ कृपां न कुरुते राजा सुग्रीवो मयि लक्ष्मण ॥ ६६ ॥
अनाथो हृतराज्योऽयं रावणेन च धर्षितः ॥ दीनो दूरगृहः कामी मां चैव शरणं गतः ॥ ६७ ॥
इत्येतैः कारणैः सौम्य सुग्रीवस्य दुरात्मनः ॥ अहं वानरराजस्य परिभूतः परन्तप ॥ ६८ ॥
स कालं परिसंख्याय सीतायाः परिमार्गणे ॥ कृतार्थः समयं कृत्वा दुर्मतिर्नावबुध्यते ॥ ६९ ॥
एवं प्रविश्य च किष्किन्धां ब्रूहि वानरपुङ्गवम् ॥ मूर्खं ग्राम्यसुखे सक्तं सुग्रीवं वचनान्मम ॥ ७० ॥
अर्थिनामुपसन्नानां पूर्वं चाप्युपकारिणाम् ॥ आशां संश्रुत्य यो हन्ति स लोके पुरुषाधमः ॥ ७१ ॥
शुभं वा यदि वा पापं यो हि वाक्यमुदीरितम् ॥ सत्येन परिगृह्णाति स वीरः पुरुषोत्तमः ॥ ७२ ॥
कृतार्था ह्यकृतार्थानां मित्राणां न भवन्ति ये ॥ तान्मृतानपि क्रव्यादाः कृतघ्नान्नोपभुञ्जते ॥ ७३ ॥
नूनं काञ्चनपृष्ठस्य विकृष्टस्य मया रणे ॥ द्रष्टुमिच्छति चापस्थ रूपं विद्युद्गणोपमम् ॥ ७४ ॥
घोरं ज्यातलनिर्घोषं क्रुद्धस्य मम संयुगे ॥ निर्घोषमिव वज्रस्य पुनः संश्रोतुमिच्छति ॥ ७५ ॥
काममेवंगतेप्यस्य परिज्ञाते पराक्रमे ॥ त्वत्सहायस्य मे वीर न चिन्ता स्यान्नृपात्मज ॥ ७६ ॥

हे नृपात्मज जिगीषूणां पार्थिवानामित्यन्वयः ॥ ६२ ॥ यात्रा उपस्थितेतिशेषः ॥ ६३ ॥ चत्वारः आषाढाद्याः । केचिदाहुः श्रावणाद्या इति । "पूर्वोयं वार्षिकोमासः श्रावणः सलिलागमः" इत्युपक्रमोक्तेः । आश्वयुजकार्तिकयोर्वर्षानुवृत्त्या वार्षिकत्वं । "कार्तिके समनुप्राप्ते त्वं रावणवधे यत" इति पूर्वोक्तवचनेतु कार्तिके समनुप्राप्त इत्यस्य समाप्तेइत्यर्थइत्याहुः ॥ ६४—६७ ॥ सुग्रीवस्य परिभूत इति "कर्तरि च वर्तमाने" इति षष्ठी । कृपां न कुरुत इत्यादिकं सुग्रीवाभिमानमनुसृत्योक्तं ॥ ६८—६९ ॥ त्वं प्रविश्य चेत्यादि ॥ यः उदीरितं वाक्यं सत्येन परिगृह्णाति सत्यत्वेन स्वीकरोति । यथोक्तमनुतिष्ठतीत्यर्थः । मित्राणां न भवन्ति मित्राणामुपकाराय न भवन्तीत्यर्थः । अस्य श्लोकस्य अन्ते इतिकरणं द्रष्टव्यं । इति सुग्रीवं ब्रूहीतिपूर्वेणसंबन्धः ॥ ७०—७४ ॥ घोरमिति ॥ निर्घोषमिव वज्रस्य पुनः संश्रोतुमिच्छतीति पाठः ॥ ७५ ॥ वीर नृपात्मज । त्वत्सहायस्य मे एवंगते सालगिरिभूदलनादिषु इत्थमप्रतिहते पराक्रमे कामं परिज्ञातेसत्यपि अस्य सुग्रीवस्य चिन्ता समयव्यतिक्रमे मामपि हनिष्यतीति विचारः

आषोमस्यसः । इदहेतुगर्भं ॥ ५७ ॥ चत्वारइति । यद्यपिचतुर्योमासोविंशतएवतथापितत्रोद्योगाभावेनतस्यापिगतप्रायत्वाद्गता इत्युक्तिः ॥६४॥ ति० कृपायाअकरणेहेतुमुद्गयति—अनाथइति । दूरग्रहइतिपाठे दूरवर्तिस्त्रीविषयोग्रहोरावणोऽभिनिवेशोवा यस्येत्यर्थः । शि० ननुस्वयंसमर्थत्वात्सुग्रीवापेक्षाकिमर्थंक्रियतइत्यतआह—अनाथइति । रावणेन रावणसदृशेनबालिना धर्षितः । अतएव अनाथः रक्षकरहितः । अतएवदीनः कामी अयंसुग्रीवः मांशरणंगतइत्येतैः कारणैः वानरराजस्यसुग्रीवस्य सुग्रीवेणपरिभूतः वशीकृत अहमसीतिशेषः । स० दूरगृहः दूरेअयोध्यायांगृहंयस्य ॥ ६७ ॥ ति० वानरराजस्य वानरराजेन । शेषेषष्ठी ॥ ६८ ॥ ति० उपपन्नानां बलवीर्यादियुक्तानां । आशां अभिमतार्थविषयां । संश्रुत्य प्रतिज्ञाय ॥ ७१ ॥ स० वालिसंहारात्पूर्वमेकदाज्यातलशब्दश्रवणात्पुनरित्युक्तं । श्रोतुमिच्छतीलतःपरंइतिशब्दस्याध्याहृतस्य इतिवानरपुङ्गवंब्रूहीत्यन्वयः ॥ ७५ ॥ स० नन्वेवंसुग्रीवहननेकथंलक्ष्मणचिन्तानिष्पत्तिरित्यतिलक्ष्मणशङ्कांपरिहरति—काममिति । एवं पूर्वोक्तप्रकारेण । मत्कोपेनसुग्रीवे गतेपि नष्टेपि । अस्यमे कामंयथातथा लयंप्राप्तेसति । तत्रापित्वत्सहायस्यमेचिन्तानागमिकार्येनस्यात् । यद्वः त्वत्सहायस्यमे

[पा०] १ ङ. ञ. ट. मुद्योगंच. २ क. ग.—ट. शोकाभितप्तस्य. ३ ङ. ञ. ट. तथा. ४ क. ङ.—ट. चाङ्गना. ५ ग. ञ. चागता. ६ क. ङ.—ट. सकिष्किन्धांप्रविश्यत्वं. ग. किष्किन्धांसंप्रविश्यत्वं. ६ क. ग्राम्यसुखैर्युक्तं. ७ ञ. सुपपन्नानां. ८ क. ख. ज. येनवाक्यं. ९ क. ञ. सलोके. १० ङ.—ट. मिच्छसि.

यदर्थमयमारम्भः कृतः परपुरञ्जय ॥ समयं नाभिजानाति कृतार्थः प्लवगेश्वरः ॥ ७७ ॥
वर्षासमयकालं तु प्रतिज्ञाय हरीश्वरः ॥ व्यतीतांश्चतुरो मासान्विहरन्नावबुध्यते ॥ ७८ ॥
सामात्यपरिषत्क्रीडन्पानमेवोपसेवते ॥ शोकदीनेषु नास्मासु सुग्रीवः कुरुते दयाम् ॥ ७९ ॥
उच्यतां गच्छ सुग्रीवस्त्वया वैत्स महाबल ॥ मम रोषस्य यद्रूपं ब्रूयाश्चैनमिदं वचः ॥ ८० ॥
न च संकुचितः पन्था येन वाली हतो गतः ॥ समये तिष्ठ सुग्रीव मा वालिपथमन्वगाः ॥ ८१ ॥
एक एव रणे वाली शरेण निहतो मया ॥ त्वां तु सत्यादतिक्रान्तं हनिष्यामि सबान्धवम् ॥ ८२ ॥
तदेवं विहिते कार्ये यद्धितं पुरुषर्षभ ॥ तच्चब्रूहि नरश्रेष्ठ त्वर कालव्यतिक्रमः ॥ ८३ ॥

कुरुष्व सत्यं मयि वानरेश्वर प्रतिश्रुतं धर्ममवेक्ष्य शाश्वतम् ॥
मा वालिनं प्रेत्य गतो यमक्षयं त्वमद्य पश्ये मम चोदितैः शरैः ॥ ८४ ॥
स पूर्वजं तीव्रविवृद्धकोपं लालप्यमानं प्रसमीक्ष्य दीनम् ॥
चकार तीव्रां मतिमुग्रतेजा हरीश्वरे मानवंशनाथः ॥ ८५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे त्रिंशः सर्गः ॥ ३० ॥

मा भूदित्यर्थः ॥ ७६ ॥ अयमारम्भः सख्यकरणवालिनिरसनरूपः । यदर्थं यस्मै सीतान्वेषणप्रयोजनाय कृतः । समयं तद्विषयसंकेतं । प्लवगेश्वरो नाभिजानातीति संबन्धः ॥ ७७ ॥ वर्षासमयकालं वर्षा एव समयकालः संकेतकालः सं । वर्षाशब्देन चत्वारो मासा उपलक्ष्यन्ते ॥ ७८ ॥ सामात्यपरिषत् सामात्यबान्धवः ॥ ७९ ॥ मम रोषस्य यद्रूपं तत्सुग्रीव उच्यतां । एनमिदं वक्ष्यमाणं वचश्च ब्रूयाः ॥ ८० ॥ हतो वाली येन पथा गतः स पन्थाः । परलोकइत्यर्थः । न संकुचितः न नष्टइत्यर्थः । समये मर्यादायां तिष्ठ । वालिपथं वालिगतं मार्गं ॥ ८१ —८२ ॥ कार्ये एवं विहिते एवमवस्थिते सति । यद्धितं तद्ब्रूहि । कालव्यतिक्रमः मा भूदितिशेषः । अतः त्वर त्वरस्वेतिसंबन्धः ॥ ८३ ॥ उक्तमर्थं पुनः संक्षेपेण सर्गान्ते दर्शयति—कुरुष्वेति ॥ मयि विषये प्रतिश्रुतं सत्यं कुरु । शाश्वतं धर्ममवेक्ष्य प्रतिश्रुतकरणमक्षयोधर्म इत्यवेक्ष्य ॥ ८४ ॥ सः लक्ष्मणः । हरीश्वरे सुग्रीवे । तीव्रांमतिं निग्रहबुद्धिमित्यर्थः । लालप्यमानं प्रलपन्तं ॥ ८५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने त्रिंशः सर्गः ॥ ३० ॥

परोक्षमेवास्यसुग्रीवस्यएवंगतेकालेपरिज्ञातेपिचिन्तानस्यादितिकामं आश्वर्यं । ती० वीर नृपात्मज त्वत्सहायस्यमे एवंगते सालगिरिभूविदलनादिभित्यमप्रतिहतेपराक्रमे । कामंपरिज्ञातेसत्यपि अस्यसुग्रीवस्यचिन्तानस्यात् । समयव्यतिक्रमेपिहनिष्यतीतिविचारोनाभूदित्यर्थः । यद्वा सुग्रीवस्यामोघातिक्रयंप्रतिविसमयवचनमेतत् । एवंगते त्वत्सहायस्यमेपराक्रमेकामंपरिज्ञातेपि अस्यसुग्रीवस्यचिन्ता मयिबुद्धिर्नस्यात् नभवेत् । अहोविसमयइत्यर्थः ॥ ७६ ॥ स० चतुरोमासान् व्यतीतान्ततप्रायान् । कार्तिकस्यभोक्तुमारब्धत्वेनालपावशिष्टत्वात् ॥ शि० वर्षासमयकालं वर्षस्य वृष्टिसमयस्य आसमयःसम्यग्गमनंयस्मिन् तंकालं हरीश्वरः प्रतिज्ञाय विहरन्सन् व्यतीतांश्चतुरोमासान्नावबुध्यते ॥ ७८ ॥ ति० प्रेतपतः प्रेतत्वंप्राप्तः ॥ ८४ ॥ इतित्रिंशःसर्गः ॥ ३० ॥

[पा०] १ क. सहरीश्वरः. २ ञ. वर्षाःसमय. क. ग. ङ. वर्षसमय. ३ ङ. छ. ञ. ट. वीर. ४ क. च. ज. ञ. वधिष्यामि. ५ ञ. ट. यदेवं. ६ क. च. ज. चिन्तितं. ७ च. ञ. ञ. ट. ममवा. ८ ख.—छ. ञ. ट. प्रेतगतो. ९ क. ङ.—ञ. यमक्षये. १० क. पश्येनिहतोमयाशरैः. ११ ञ. ञ. ट. चोदितः. १२ क. घ.—ट. वंशवर्धनः.

एकत्रिंशः सर्गः ॥ ३१ ॥

रामेण सुग्रीवेऽपातजकोपोदितस्वपरुषभाषणश्रवणमात्रेणसुग्रीवबधंप्रतिज्ञातमालक्ष्मणंप्रति सान्त्वोक्त्यातत्कोपापनो-दनपूर्वकं साङ्गैवसुग्रीवेऽव्यवहारचोदना ॥ १ ॥ सशरचापपाणिनालक्ष्मणेन क्रोपाटोपेनकपिकुलभीषणपूर्वकमङ्गदंप्रति सुग्रीवेऽागमननिवेदनचोदना ॥ २ ॥ साभिधावनमङ्गदेन लक्ष्मणागमननिवेदनेऽपिमदनमदपरवशतयातदवुद्धवतिसुग्रीवे लक्ष्मणसंत्रस्तकपिकुलकिलकिलाकोलाहलश्रवणसमुद्बुद्धेसति संप्रति मन्त्रिवराम्यां लक्ष्मणागमननिवेदनपूर्वकंतत्प्रसादन-चोदना ॥ २ ॥

स कामिनं दीनमदीनसत्त्वं शोकाभिपन्नं समुदीर्णकोपम् ॥
नरेन्द्रसूनुर्नरदेवपुत्रं रामानुजः पूर्वजमित्युवाच ॥ १ ॥
न वानरः स्थास्यति साधुवृत्ते न मंस्यते कर्मफलानुषङ्गान् ॥
न भोक्ष्यते वानरराज्यलक्ष्मीं तथाहि नाभिक्रमतेऽस्य बुद्धिः ॥ २ ॥
मतिक्षयाद्भ्राम्यसुखेषु सक्तस्तव प्रसादाप्रतिकारबुद्धिः ॥
हतोऽग्रजं पश्यतु वीर तस्य न राज्यमेवंविगुणस्य देयम् ॥ ३ ॥
न धारये कोपमुदीर्णवेगं निहन्मि सुग्रीवमसत्यमद्य ॥
हरिप्रवीरैः सह वालिपुत्रो नरेन्द्रपत्न्या विचयं करोतु ॥ ४ ॥
तमात्तबाणासनमुत्पतन्तं निवेदितार्थं रणचण्डकोपम् ॥
उवाच रामः परवीरहन्ता स्वावेक्षितं सानुनयं च वाक्यम् ॥ ५ ॥
न हि वै त्वद्विधो लोके पापमेवं समाचरेत् ॥ पापमार्येण यो हन्ति स वीरः पुरुषोत्तमः ॥ ६ ॥
नेदृशं मय्य त्वया ग्राह्यं साधुवृत्तेन लक्ष्मण ॥ तां प्रीतिमनुवर्तस्व पूर्ववृत्तं च सङ्गतम् ॥ ७ ॥

अथाङ्गदेन लक्ष्मणकोपकथनं सुग्रीवायैकत्रिंशे—स कामिनमिति ॥ कामिनं अधिककामं । अतएव दीनं । तथाप्यदीनसत्त्वं । एतेन वस्तुतः अदीनसत्त्वोऽपि दैन्यं भावयतीति गम्यते । शोकाभिपन्नं शोकंप्राप्तं । समुदीर्णकोपं अभिवृद्धकोपं । अस्मिन्श्लोके नरदेवपुत्रमित्यत्र देकारो गायत्र्या एकादशाक्षरं । दशसहस्रश्लोका गताः ॥ १ ॥ साधुवृत्ते साधूनां मित्रसमानसुखदुःखानां सुहृदां वृत्ते आचारे । नस्थास्यति । कर्मफलानुषङ्गान् अभिसाक्षिकसख्यरूपकर्मणा वालिनिरसनराज्यदारलाभरूपफलानुबन्धान् । नमंस्यते । वानरराज्यलक्ष्मीं न भोक्ष्यते । तथाह्यस्य बुद्धिः नाभिक्रमते अस्मत्प्रयोजनाभिमुख्ये न वर्तते इति योजना ॥ २ ॥ मतिभ्रमान् बुद्धिविपर्यासात् । तव प्रसादाप्रतिकारबुद्धिः प्रसादस्य राज्यप्रदानादिरूपस्य अप्रतिकारबुद्धिः प्रत्युपकारबुद्धिरहितः । अतएव हतःसुग्रीवः अग्रजं वालिनं । पश्यतु । एवंविगुणस्य तस्य राज्यं नदेयं । वालिनमिति क्वचित्पाठः । तत्र वृत्तमुपजातिः ॥ ३ ॥ नधारये अकार्यकरं धर्तुं न क्षम इत्यर्थः । असत्यं सत्यवचनरहितं । नरेन्द्रपत्न्याः सीतायाः । विचयं अन्वेषणं ॥ ४ ॥ मम अहृदयवचनमात्रेण अयं तं हन्यादेवेत्यनुतप्तो रामः प्राहस्म । परवीरहन्ता नतुस्वाश्रितहन्ता । स्वावेक्षितं सुष्ठुनिरूपितं ॥ ५ ॥ पापं मित्रहननाध्यवसायरूपं । आर्येण सम्यग्विवेकेन ॥ ६ ॥ इदं मित्रहननाध्यवसायरूपं

स० तव प्रतिकारबुद्धिः प्रत्युपकारबुद्धिः । नेत्यत्राप्यन्वेति । नवर्ततइत्यर्थः । हेवीर एवंगुणस्यत्वया प्रसादाद्राज्यंनदेयं ॥ ति० नदेयं दत्तं नानुपालनीयमित्यर्थः ॥ रामानु० वीरवालिनमित्यत्रवृत्तभङ्गभयात् ॥ ३ ॥ रामानु० सानुनयं सप्रसादं ॥ शि० स्वावीक्षितं स्वेननिश्चितंवाक्यमुवाच । किंच स्वदीक्षितमितिलक्ष्मणविशेषणं । स्वस्मिन्वीक्षितंवीक्षणंयस्येत्यर्थः ॥ ५ ॥

[पा०] १ छ.—ट. समुदीर्णकामं. २ क. ग. ङ. नमन्यते. ३ क. फलानुषङ्गं. ४ ङ. छ. झ. ट. नातिक्रमते. ५ ग. घ. छ. झ. ट. प्रसादात्प्रतिकार. क. च. ज. ञ. प्रसादात्प्रतिपन्नराज्यः. ६ झ. ञ. ट. वीरवालिनं. ७ क. घ. छ.—ट. नरेन्द्रपुत्र्याः. ८ ङ. च. छ. ट. स्वावीक्षितं. ९ ङ. झ. ट. क्रोपमार्येण. १० छ. झ. ट. नेदमत्र. ११ घ. कार्यं.

सामोपहितया वाचा रूक्षाणि परिवर्जयन् ॥ वक्तुमर्हसि सुग्रीवं व्यतीतं कालपर्ययेः ॥ ८ ॥
सोऽग्रजेनानुशिष्टार्थो यथावत्पुरुषर्षभः ॥ प्रविवेश पुरीं वीरो लक्ष्मणः परवीरहा ॥ ९ ॥
ततः शुभमतिः प्राज्ञो भ्रातुः प्रियहिते रतः ॥ लक्ष्मणः प्रतिसंरब्धो जगाम भवनं कपेः ॥ १० ॥
शक्रचापासनप्रख्यं धनुः कालान्तकोपमः ॥ प्रगृह्य गिरिशृङ्गाभं मन्दरः सानुमानिव ॥ ११ ॥
यथोक्तकारी वचनमुत्तरं चैव सोत्तरम् ॥ बृहस्पतिसमो बुद्ध्या मत्वा रामानुजस्तथा ॥ १२ ॥
कामक्रोधसमुत्थेन भ्रातुः कोपाग्निना वृतः ॥ प्रभञ्जन इवाग्नीतः प्रययौ लक्ष्मणस्तदा ॥ १३ ॥
सालतालाश्वकर्णांश्च तरसा पातयन्बहून् ॥ पर्यस्यन्गिरिकूटानि द्रुमानन्यांश्च वेगितः ॥ १४ ॥
शिलाश्च शकलीकुर्वन्पद्भ्यां गज इवाशुगः ॥ दूरमेकपदं त्यक्त्वा ययौ कार्यवशाहृतम् ॥ १५ ॥
तामपश्यद्गुहाकीर्णां हरिराजमहापुरीम् ॥ दुर्गामिक्ष्वाकुशार्दूलः किष्किन्धां गिरिसंकटे ॥ १६ ॥
रोषात्प्रस्फुरमाणोष्ठः सुग्रीवं प्रति लक्ष्मणः ॥ ददर्श वानरान्भीमान्किष्किन्धाया बहिश्चरान् ॥ १७ ॥
तं दृष्ट्वा वानराः सर्वे लक्ष्मणं पुरुषर्षभम् ॥ शैलशृङ्गाणि शतशः प्रवृद्धांश्च महीरुहान् ॥
जगृहुः कुञ्जरप्रख्या वानराः पर्वतान्तरे ॥ १८ ॥
तान्गृहीतप्रहरणान्हरीन्दृष्ट्वा तु लक्ष्मणः ॥ बभूव द्विगुणं क्रुद्धो वह्निरिन्धन इवानलः ॥ १९ ॥
तं ते भयपरीताङ्गाः क्रुद्धं दृष्ट्वा प्लवङ्गमाः ॥ कालमृत्युयुगान्ताभं शतशो विद्रुता दिशः ॥ २० ॥
ततः सुग्रीवभवनं प्रविश्य हरिपुङ्गवाः ॥ क्रोधमागमनं चैव लक्ष्मणस्य न्यवेदयन् ॥ २१ ॥
तारया सहितः कामी सक्तः कपिवृषो रहः ॥ न तेषां कपिवीराणां शुश्राव वचनं तदा ॥ २२ ॥
ततः सचिवसंदिष्टा हरयो रोमहर्षणाः ॥ गिरिकुञ्जरमेघाभा नगर्या निर्ययुस्तदा ॥ २३ ॥

पापं । पूर्ववृत्तं च सङ्गतं पूर्वकृतं सख्यरूपं बान्धवं च ॥ ७ ॥ कालपर्यये कालक्रमेविषये । व्यतीतं व्यतिक्रान्तवन्तं सुग्रीवं । रूक्षाणि परुषाणि । परिवर्जयन् । सामोपहितया सान्त्वयुक्तया वाचा । वक्तुमर्हसि ॥ ८—९ ॥ प्रतिसंरब्धः प्रतिनिवृत्तहननाध्यवसायः ॥ १० ॥ सोऽग्रजेनेत्यादिश्लोकद्वयोक्तं विस्तरेणाह—शक्रेत्यादिना ॥ धनुः प्रगृह्य सानुमान् पर्वत इवस्थितः ॥ ११ ॥ यथोक्तं रामोक्तमनतिक्रम्य करोतीति यथोक्तकारी लक्ष्मणः । वचनंसुग्रीवं प्रति स्वेन वक्तव्यं वचनं । यथोक्तकारीति विशेषणाद्रामोपदिष्टं वचनमिति सिद्धं । उत्तरं च स्ववचनस्य सुग्रीवेण वक्ष्यमाणमुत्तरं च । सोत्तरं स्वेन वक्ष्यमाणोत्तरसहितं । मत्वा आलोच्य । प्रययाविति संबन्धः । एकपदं पौरुष्यपदं । दूरं त्यक्त्वा दूरे क्षिप्त्वा । अनेन द्रुतगमनं सूचितं । द्रुतं गच्छन्हि पुरुषः पुरःपादं दूरे क्षिपति ॥ १२—१५ ॥ गिरिसङ्कटे निबिडगिरिमध्ये । अनेन पूर्वोक्तगुहाशब्दो विवृतः ॥ १६—१७ ॥ वानराः

स० अनुशिष्टः शिक्षितः अर्थोयस्यैसः ॥ ९ ॥ शि० सोत्तरं दास्यमानसुग्रीवप्रत्युत्तरसहितं । उत्तरं सुग्रीवप्रत्युत्तरानन्तरकालिकदास्यमानस्वप्रत्युत्तरंवचनं । किंच उत्तरं उत्कृष्टं । सोत्तरं उत्तरत्वसहितंउत्तरमित्यर्थः ॥१२॥ ति० एकपदं एकैकपदं ॥ १५ ॥ ति० कुद्धलक्ष्मणदर्शनेनभीत्या शैलशृङ्गादिप्रहोद्यानराणां ॥ १८ ॥ ति० द्विगुणंक्रुद्धः मादृष्टेर्मेप्रणामंत्यक्त्वाप्रहरणंगृह्णन्तीतिकोपहेतुगुण्यं ॥ १९ ॥ स० सचिवैः सुग्रीवामात्यैः संदिष्टाः भीषयध्वमित्याज्ञप्ताः ॥ ति० सचिवसंदिष्टाः सुग्रीवं बोधयित्वातदनुमत्या लक्ष्मणोत्साभिर्यांवत्प्रवेश्यते तावद्द्वाःस्थलक्ष्मणप्रवेशंनिरुन्धानास्तिष्ठत इत्येवंसचिवैःहनुमदादिभिःसंदिष्टाहरयोनगरान्निर्ययुः ॥ २३ ॥

[पा०] १ क. ङ.—ट. कालान्तकोपमं. २ क.—ट. स्तदा. ३ घ. समुद्भवेन. ४ घ.—ट. क्रोधाग्निना. ५ क. इवाविष्टः. ६ क. ङ.—ट. स्ततः. ७ ङ. छ. झ. ट. ज्वलात्. ८ ग. शृङ्गाणि. ९ क. ख. ग. छ. झ. ञ. ट. वेगितः. १० ग. गिरिगह्वरे. ११ घ. झ. किष्किन्धायां. १२ क. ख. ङ. छ.—ट. प्रहरणान्सर्वान्. १३ ज. परमक्रुद्धः. १४ क. ग. ततोभय. १५ ङ.—ट. क्रुध्यं. १६ ट. मृत्युसमायान्तं. क. मृत्युमिवायान्तं. १७ छ. झ. ट. कपिवृषस्तदा. ग. कपिवरो. १८ ङ. छ.—ट. कपिसिंहानां. १९ घ. जग्राह. २० ख. सुग्रीवसंदिष्टाः. २१ क. ग. ङ. छ.—ट. नगरान्निर्ययुः.

नखदंष्ट्रायुधा घोराः सर्वे विकृतदर्शनाः ॥ सर्वे शार्दूलदर्पाश्च सर्वे च विकृताननाः ॥ २४ ॥
दशनागबलाः केचित्केचिद्दशगुणोत्तराः ॥ केचिन्नागसहस्रस्य बभूवुस्तुल्यविक्रमाः ॥ २५ ॥
[सन्ति चौघबलाः केचित्केचिद्वायुबलोत्तराः ॥ अप्रमेयबलाः केचित्त्रासन्हरिपुङ्गवाः ॥ २६ ॥
प्रतिपूर्णमिवाकाशं संछन्नमिव तद्वनम् ॥ तेन वानरसैन्येन सुग्रीवस्य महात्मनः ॥ २७ ॥
ततो द्वाराणि सर्वाणि अङ्गदो राजशासनात् ॥ पर्यधावत दुर्धर्षो नक्षत्राणीव चन्द्रमाः] ॥ २८ ॥
कृत्स्नां हि कपिभिर्व्याप्तां द्रुमहस्तैर्महाबलैः ॥ अपश्यल्लक्ष्मणः क्रुद्धः किष्किन्धां तां दुरासदाम् ॥२९॥
ततस्ते हरयः सर्वे प्राकारपरिघान्तरात् ॥ निष्क्रम्योदग्रसत्त्वास्तु तस्थुराविष्कृतं तदा ॥ ३० ॥
सुग्रीवस्य प्रमादं च पूर्वजं चार्तमात्मवान् ॥ बुद्ध्वा कोपवशं वीरः पुनरेव जगाम सः ॥ ३१ ॥
स दीर्घोष्णमहोच्छ्वासः कोपसंरक्तलोचनः ॥ बभूव नरशार्दूलः सधूम इव पावकः ॥ ३२ ॥
[बाणासनमहावीर्यो लक्ष्मणः परवीरहा ॥ अविवेश दुराधर्षां पुरीं सुग्रीवपालिताम् ॥ ३३ ॥
ततो नीलाभ्रसंकाशं तप्तकाञ्चनवेदिकम् ॥ श्रीमद्विमानमासाद्य रमणीयं मनोरमम् ॥
शुश्राव परमस्त्रीणां सोत्कृष्टहसितस्वनम्] ॥ ३४ ॥
बाणशल्यस्फुरज्जिह्वः सायकासनभोगवान् ॥ स्वतेजोविषसंघातः पञ्चास्य इव पन्नगः ॥ ३५ ॥
तं दीप्तमिव कालाग्निं नागेन्द्रमिव कोपितम् ॥ समासाद्याङ्गदस्त्रासाद्विषादमगमद्भृशम् ॥ ३६ ॥
सोऽङ्गदं रोषताम्राक्षः सन्दिदेश महायशाः ॥ सुग्रीवः कथ्यतां वत्स ममागमनमित्युत ॥ ३७ ॥
एष रामानुजः प्राप्तस्त्वत्सकाशमरिन्दमः ॥ भ्रातुर्व्यसनसंतप्तो द्वारि तिष्ठति लक्ष्मणः ॥ ३८ ॥
तस्य वाक्ये यदि रुचिः क्रियतां साधु वानर ॥ इत्युक्त्वा शीघ्रमागच्छ वत्स वाक्यमरिन्दम ॥३९॥
लक्ष्मणस्य वचः श्रुत्वा शोकाविष्टोऽङ्गदोऽब्रवीत् ॥ पितुः समीपमागम्य सौमित्रिरयमागतः ॥ ४० ॥

पूर्वोक्ता बहिश्चराः ॥ १८—२९ ॥ प्राकारपरिघान्तरान्निष्क्रम्य आविष्कृतं प्रकाशं यथा भवति तथा तस्थुः ॥ ३० ॥ आर्तं कामपीडितं ॥ ३१—३४ ॥ बाणशुल्यं बाणाग्रमेव स्फुरन्ती जिह्वा यस्य स तथा । सायकासनं धनुः तदेव भोगः फणा तद्वान् बभूवेति पूर्वेणसंबन्धः ॥ ३५—३६ ॥ वत्स अरिन्दमः एष रामानुजः त्वत्सकाशं प्राप्त इति ममागमनं सुग्रीवः कथ्यतां । भ्रातृव्यसनसंतप्तः स लक्ष्मणः द्वारि तिष्ठति । तस्य वाक्ये तव यदि रुचिः तर्हि साधु युक्तं । तत्र तव गमनं वा अत्रैव तस्यानयनं वा क्रियतां । इत्येतद्वाक्यमुक्त्वा शीघ्रमागच्छ इति सोऽङ्गदं सन्दिदेशेति संबन्धः ॥ ३७—३९ ॥ अयमागतमित्यनन्तरमितिकरणं बोध्यं ॥ ४० ॥

स० विवृतदर्शनाः प्रकटीभूताइत्यर्थः । दशगुणोत्तराः शतनागबलाः । नागसहस्रस्यतुल्यवर्चसः सहस्रगजबलाभिव्यञ्जकवर्चोविशेषवन्तइत्यर्थः ॥ २५ ॥ ति० प्रमादंच । पाद्मानरप्रतिरोधंच ॥ शि० सुग्रीवस्यप्रमादं समीपानागमनानुमितानवधानता । क्रोधवशं कोपकारिंत ॥ ३१ ॥ ति० स्वतेजोरूपविषेणसंभृतः व्याप्तः ॥ स० बाणस्यच्छल्यं अग्रस्थितमयोमयं तदेवस्फुरन्ती जिह्वायस्य ॥ ३५ ॥ ति० विषादमगमत् एतावत्पर्यन्तंरामकार्यंनचिन्तितमितिविषादः ॥ ३६ ॥ ति० इदमुक्तंममवाक्यंतवैव इति उक्तप्रकारेण । उक्त्वा सवानरःसुग्रीवः साधु साधुकारीयथाभवतितथाक्रियतां । अनन्तरंतस्यास्मामुपदिरुचिर्भवति तदा

[पा०] १ क. ङ.—ञ. ञ. वीराःसर्वे. झ. ट. सर्वेवीराः. २ ठ. विवृतदर्शनाः. ३ क. छ.—ट. शार्दूलदंष्ट्राश्च. ४ छ. झ. विवृतदर्शनाः. ५ ङ.च. ज. झ. ञ. स्तुल्यवर्चसः. ६ इदंश्लोकत्रयं ख. घ. ज. पाठेषुदृश्यते. ७ छ. झ. ञ. ट. ततस्तैः कपिभिः. ८ क. सुदुरासदां. ९ क. ख. राविष्कृतास्तदा. क. ख. राविष्कृतायुधाः. १० छ. झ. ञ. ट. पूर्वजस्यार्थमात्मवान्, ख. ङ. च. ज. पूर्वजस्यैकमात्मवान्, ११ ङ.—ट. दृष्ट्वाकोपवशं. १२ ग. जगामह. १३ क. ग. महाश्वासः. १४ इदं श्लोकद्वयं क. पाठेदृश्यते. १५ ज.—ट. संभृतः. १६ ङ.—ट. अगमत्परं. १७ घ. सुग्रीवेकथ्यतां. १८ क. ग. घ. झ. वाक्यंयदि. १९ क. ङ. छ. ज. ञ. ट. वाक्यमिदंमम.

अथाङ्गदस्तस्य वचो निशम्य संभ्रान्तभावः परिदीनवक्त्रः ॥
निपत्य तूर्णं नृपतेस्तरस्वी ततः कुमारश्चरणौ ववन्दे ॥ ४१ ॥
संगृह्य पादौ पितुरग्र्यतेजा जग्राह मातुः पुनरेव पादौ ॥
पादौ रुमायाश्च निपीडयित्वा निवेदयामास ततस्तमर्थम् ॥ ४२ ॥
स निद्रामदसंवीतो वानरो न विबुद्धवान् ॥ बभूव मदमत्तश्च मदनेन च मोहितः ॥ ४३ ॥
ततः किलकिलां चक्रुर्लक्ष्मणं प्रेक्ष्य वानराः ॥ प्रसादयन्तस्तं क्रुद्धं भयमोहितचेतसः ॥ ४४ ॥
ते महौघनिभं दृष्ट्वा वज्राशनिसमस्वनम् ॥ सिंहनादं समं चक्रुर्लक्ष्मणस्य समीपतः ॥ ४५ ॥
तेन शब्देन महता प्रत्यबुध्यत वानरः ॥ मदविह्वलताम्राक्षो व्याकुलस्रग्विभूषणः ॥ ४६ ॥
अथाङ्गदवचः श्रुत्वा तेनैव च समागतौ ॥ मन्त्रिणौ वानरेन्द्रस्य संमतौ दारदर्शिनौ ॥ ४७ ॥
प्लक्षश्चैव प्रभावश्च मन्त्रिणावर्थधर्मयोः ॥ वक्तुमुच्चावचं प्राप्तं लक्ष्मणं तौ शशंसतुः ॥ ४८ ॥
प्रसादयित्वा सुग्रीवं वचनैः सामनिश्चितैः ॥ आसीनं पर्युपासीनौ यथा शक्रं मरुत्पतिम् ॥ ४९ ॥
सत्यसन्धौ महाभागौ भ्रातरौ रामलक्ष्मणौ ॥ वयस्यभावं संप्राप्तौ राज्यार्हौ राज्यदायिनौ ॥ ५० ॥
तयोरेको धनुष्पाणिर्द्वारि तिष्ठति लक्ष्मणः ॥ यस्य भीताः प्रवेपन्तो नादान्मुञ्चन्ति वानराः ॥ ५१ ॥
स एष राघवभ्राता लक्ष्मणो वाक्यसारथिः ॥ व्यवसायरथः प्राप्तस्तस्य रामस्य शासनात् ॥ ५२ ॥

उक्तं विस्तृणाति—अथेति ॥ ४१ ॥ मातुः पुनरेवेत्यनेन मातुः पृथग्वन्दनमुच्यते ॥ ४२ ॥ मदमत्तः पानकृतमदमत्तः ॥ ४३ ॥ किलकिलेति वानराणां शब्द उच्यते ॥ ४४ ॥ महौघनिभं महाप्रवाहतुल्यं लक्ष्मणं । समं युगपत् ॥ ४५—४६ ॥ तेनैव समागतौ तदाह्वानेन समागतौ । मन्त्रिणौ प्रशस्तमन्त्रौ । अर्थधर्मयोर्विषये उच्चावचं वक्तुं प्राप्तं लक्ष्मणं शशंसतुः ॥४७—४८॥ सामनिश्चितैः सान्त्वविषये निश्चितैः । ऊचतुरिति शेषः ॥ ४९ ॥ यस्य भीतः यस्मात् भीताः ॥ ५०—५१ ॥ वाक्यसारथिः रामवाक्यप्रेरित इत्यर्थः । कथमिदं दुर्गमेकः प्रविष्टवानित्यत्राह—व्यवसायरथ इति । प्रतिपक्षनिरासाध्यवसायरथः

तस्यवाक्यश्रुत्वा शीघ्रमागच्छ ॥ ३९ ॥ ति० लक्ष्मणस्येतिश्लोकेनसंक्षिप्योक्तस्यार्थस्यविस्तरः—अथेति । संभ्रान्तभावः संभ्रान्तचित्तः । परदीनवक्त्रः परंअतिशयेनदीनंवक्त्रंयस्यसः । परिदीनेतिपाठान्तरं । निर्गत्य लक्ष्मणसंनिहितदेशात्परावृत्येत्यर्थः । पूर्वंनृपतेः ततोरुमायाः । इदमुपलक्षणं । तारायाश्चरणावित्यन्वयः ॥ ४१ ॥ रामानु० जग्राहमातुःपुनरेवपादावित्यत्रपुनश्शब्दः पितृनमस्कारापेक्षयाप्रयुक्तः ॥ स० कार्यस्यात्यावश्यकताद्योतनाय पुनःप्रणमति—संगृह्येति । मातुः तारायाः । तदर्थं लक्ष्मणागमनरूपं ॥ ४२ ॥ शि० किलकिलां दीनतासूचकस्वजातीयशब्दं ॥ ४४ ॥ स० महौघनिभं महाप्रवाहवदागच्छन्तं लक्ष्मणं दृष्ट्वा समं युगपत् । चक्रुः । सुग्रीवबोधनार्थमितिशेषः ॥ ४५ ॥ ती० दारदर्शिनौ अन्तःपुरप्रवेशयोग्यौ ॥ ति० संमतौचतावुदारदर्शिनौच संमतोदारदर्शिनौ । संमतं उदारं उत्कृष्टंदर्शनंययोस्तौ । तेनाङ्गदेन सहागतौमन्त्रिणौचदृष्ट्वा प्लक्षप्रभावसंज्ञकौमन्त्रिणौ अर्थधर्मयोर्विषये उच्चावचं उत्कृष्टापकृष्टं धर्मं वक्तुंप्राप्तंलक्ष्मणंशशंसतुः ॥ ४७ ॥ रामानु० । भवसत्यप्रतिश्रवइत्यन्तमेकंवाक्यं । अत्रशशंसतुरित्यनुषज्यते । ति० सार्थनिश्चितैः अर्थनिश्चयसहितैः वचनैः प्रसादयित्वाशशंसतुरित्यन्वयः ॥४९॥ ति० राज्यार्हौ त्रिलोकीराज्यार्हौ । राज्यदायिनौ तवेतिशेषः । मनुष्यभावंप्राप्तावित्यनेन वस्तुतोनमनुष्याविति सूचितं ॥ ५० ॥ रामानु० यस्यभीताः यस्माद्भीताः ॥ ५१ ॥ इत्येकत्रिंशःसर्गः ॥ ३१ ॥

[पा०] १ छ. झ. ट. तस्यसुतीव्रवाचा. २ क. छ. झ. ञ. ट. निर्गत्यपूर्वं. घ. च. ज. निपत्यपूर्वं. क. निर्गत्यतूर्णं. ३ ब.—ट. ततोरुमायाश्चरणौ. ४ क. ज. ञ. पुनरग्र्यतेजाः. ५ ज. झ. ततस्तदर्थं. ६ ख. घ. झ. ट. निद्राक्लान्तसंवीतो. ग. निद्राग्लानिसंवीतो. च. ज. निद्रयासमुसंवीतो. ञ. निद्रायाससंवीतो. ७ क. च. ज. ञ. नावबुद्धवान्. ८ ग.—ञ. किलिकिलां. ९ क. लक्ष्मणंसमुपस्थितं. १० ब. मत्तेभनिभं. क. महेन्द्रनिभं. ११ झ. संमतोदारदर्शिनौ. ख. ग. घ. ज. संमतौदूरदर्शिनौ. १२ छ. झ. वक्षश्चैव. १३ क. ग. ङ. च. ज. झ. ञ. प्रभासश्च. १४ क. च. ज.—ट. सार्थनिश्चितैः. १५ आसीनमित्यर्धात्पूर्वं क. पाठे. सुग्रीवसचिवाःसर्वेमन्त्रार्थेसमुपाविशन् । विनदश्चसुषेणश्चनीलोथनलएवच । अङ्गदोवालिसूनुश्चहनुमांश्चैवबुद्धिमान् । एतेसर्वेमहात्मानःसुग्रीवंवानरोत्तमाः । इतिश्लोकद्वयंदृश्यते. १६ क. पर्युपासीनाः. १७ छ. झ. ट. मनुष्यभावं.

अयं च दयितो राजंस्तारायास्तनयोऽङ्गदः ॥ लक्ष्मणेन सकाशं ते प्रेषितस्त्वरयाऽनघ ॥ ५३ ॥
सोयं रोषपरीताक्षो द्वारि तिष्ठति वीर्यवान् ॥ वानरान्वानरपते चक्षुषा निर्दहन्निव ॥ ५४ ॥
तस्य मूर्ध्ना प्रणम्य त्वं सपुत्रः सह बन्धुभिः ॥ गच्छ शीघ्रं महाराज रोषो ह्यस्य निवर्त्यताम् ॥ ५५ ॥
यदाह रामो धर्मात्मा तत्कुरुष्व समाहितः ॥ राजंस्तिष्ठ स्वसमये भव सत्यप्रतिश्रवः ॥ ५६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे एकत्रिंशः सर्गः ॥ ३१ ॥

द्वात्रिंशः सर्गः ॥ ३२ ॥

अङ्गदादिमुखतोलक्ष्मणकोपश्रवणेनत्रस्ततरंसुग्रीवंप्रतिहनुमता तत्कोपस्यसांकेतिककालातिक्रमहेतुकरामप्रणयकोपाधीनत्वकथनेन सप्रणामंलक्ष्मणप्रसादनचोदना ॥ १ ॥

अङ्गदस्य वचः श्रुत्वा सुग्रीवः सचिवैः सह ॥ लक्ष्मणं कुपितं श्रुत्वा मुमोचासनमात्मवान् ॥ १ ॥
सचिवानब्रवीद्वाक्यं निश्चित्य गुरुलाघवम् ॥ मन्त्रज्ञान्मन्त्रकुशलो मन्त्रेषु परिनिष्ठितान् ॥ २ ॥
न मे दुर्व्याहृतं किंचिन्नापि मे दुरनुष्ठितम् ॥ लक्ष्मणो राघवभ्राता क्रुद्धः किमिति चिन्तये ॥ ३ ॥
असुहृद्भिर्ममामित्रैर्नित्यमन्तरदर्शिभिः ॥ मम दोषानसंभूताञ्श्रावितो राघवानुजः ॥ ४ ॥
अत्र तावद्यथाबुद्धि सर्वैरेव यथाविधि ॥ भावस्य निश्चयस्तावद्विज्ञेयो निपुणं शनैः ॥ ५ ॥
न खल्वस्ति मम त्रासो लक्ष्मणान्नापि राघवात् ॥ मित्रं त्वस्थानकुपितं जनयत्येव संभ्रमम् ॥ ६ ॥

॥ ५२—५४ ॥ तस्य तस्मै ॥ ५५ ॥ स्वसमये स्वमर्यादायां । सत्यप्रतिश्रवः सत्यप्रतिज्ञो भव ॥ ५६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्यान एकत्रिंशः सर्गः ॥ ३१ ॥

अथ हनुमता हितोपदेशो द्वात्रिंशे—अङ्गदस्येत्यादि ॥ अङ्गदस्य प्राधान्यादङ्गदस्य वचः श्रुत्वेत्युक्तं । आसनं मुमोच । भयेनासनादुदतिष्ठदित्यर्थः ॥१॥ मन्त्रकुशलः मन्त्रप्रयोगकुशलः ॥ २ ॥ दुर्व्याहृतं परुषभाषणं । दुरनुष्ठितं अपकारः । किं किमर्थं ॥३॥ असुहृद्भिः अशोभनहृदयैः ॥ ४ ॥ तावत् प्रथमं । यथाविधि यथाक्रमं । भावस्य चेष्टायाः । निश्चयः अध्यवसायः ॥ ५ ॥ निजभयकृतमासनचलनमपह्नुते—न खल्वि-

---

शि० गुरुलाघवं गुरुत्वलघुत्वे रामेगुरुत्वंस्वस्मिंल्लघुत्वंचेत्यर्थः । निश्चित्य मन्त्रेषुपरिनिष्ठितः तद्विषयकातिज्ञानवान् ॥ २ ॥ ति० दुर्व्याहृतं अनुचितवचनं उक्तं । दुरनुष्ठितं अनुचितंकृत्यं । कृतमितिशेषः ॥ ३ ॥ ति० कोपकारणमुन्नयति—असुहृद्भिरिति । असुहृदः शत्रवः । अमित्राः अपकारिणः । अन्तरं छिद्रं । असंभूतान् अनुत्पन्नान् । श्रावितः नूनमितिशेषः ॥ स० असुहृद्भिः प्राणहरैः । अमित्रैः अरिभिः ॥ ४ ॥ ति० अत्र लक्ष्मणकोपविषये । यथा तत्तात्मिकाबुद्धिः ज्ञानंयस्मिन्निश्चयेसः । भावस्य कोपस्य । निश्चयः तात्त्विककोपनिमित्तस्यनिश्चयः । विज्ञेयः कर्तव्यः । शि० लक्ष्मणस्यनिश्चयोऽभिप्रायः यथाबुद्धि स्वस्वबुद्ध्यनुरूपं निपुणंयथाभवतितथा सर्वैर्भवद्भिः तावत् मत्संगमात्पूर्वमेव । शनैर्विज्ञेयः ॥ ५ ॥ ति० त्रासः मदपराधमूलइतिशेषः । कुतस्तर्हित्रासोतआह—मित्रमिति । अस्थाने अकाण्डे । वास्तवापराधाभावेपिरिपुकृतमिथ्योपजापेनकुपितं संजातकोपंमित्रं । संभ्रमं भयं । जनयत्येव ॥ शि० राघवात् रामात् । न ममत्रासः । अतएव लक्ष्मणादपिनत्रासः । अस्थानकुपितं अपराधाभावेन अनवसरकोपविशिष्टंमित्रंतु । संभ्रमं भयंजनयत्येव । एतेनायंमित्रद्रोहीतिलोकोक्तेर्बिभेमीतिसूचितं । नत्रासइत्यनेन अपराधेपि राघवःशरणागतं नत्यजतीतिसुग्रीवनिश्चयस्सूचितः । " कथंचिदुपकारेणकृतेनैकेनतुष्यति । नस्मरत्यपकाराणांशतमप्यात्मवत्तया"

[पा०] १ क. ख. ग. ङ.—ट. तनयोराजंस्तारायादयितो. २ क. रोषपरीतात्मा. ३ क. ङ.—ट. प्रणामंत्वं. ४ च.—ट. सहबान्धवः. ५ घ. महाभाग. ६ ङ—ट. रोषोह्यद्योपशाम्यतां. क. रोषश्चाप्युपशाम्यतां. ७ ङ. छ.—ट. यथाहि. ८ ज. शान्तात्मा. ९ ख. घ.—ट. सचतानब्रवीत् १० ग. ज. मन्त्रज्ञोमन्त्रकुशलो. ११ छ.—ट. परिनिष्ठितः. १२ ज. गुणदोषान्. १३ झ. तावद्यथाबुद्धिः. १४ घ. निश्चयस्तस्यविज्ञेयो.

सर्वथा सुकरं मित्रं दुष्करं परिपालनम् ॥ अनित्यत्वाच्च चित्तानां प्रीतिरल्पेऽपि भिद्यते ॥ ७ ॥
अतोनिमित्तं त्रस्तोऽहं रामेण तु महात्मना ॥ यन्ममोपकृतं शक्यं प्रतिकर्तुं न तन्मया ॥ ८ ॥
सुग्रीवेणैवमुक्तस्तु हनुमान्हरिपुङ्गवः ॥ उवाच स्वेन तर्केण मध्ये वानरमन्त्रिणाम् ॥ ९ ॥
सर्वथा नैतदाश्चर्यं यस्त्वं हरिगणेश्वर ॥ न विस्मरसि सुस्निग्धमुपकारकृतं शुभम् ॥ १० ॥
राघवेण तु वीरेण भयमुत्सृज्य दूरतः ॥ त्वत्प्रियार्थं हतो वाली शक्रतुल्यपराक्रमः ॥ ११ ॥
सर्वथा प्रणयात्क्रुद्धो राघवो नात्र संशयः ॥ भ्रातरं संप्रहितवाँल्लक्ष्मणं लक्ष्मिवर्धनम् ॥ १२ ॥
त्वं प्रमत्तो न जानीषे कालं कालविदां वर ॥ फुल्लसप्तच्छदश्यामा प्रवृत्ता तु शरच्छिवा ॥ १३ ॥
निर्मलग्रहनक्षत्रा द्यौः प्रनष्टबलाहका ॥ प्रसन्नाश्च दिशः सर्वाः सरितश्च सरांसि च ॥ १४ ॥
प्राप्तमुद्योगकालं तु नावैषि हरिपुङ्गव ॥ त्वं प्रमत्त इति व्यक्तं लक्ष्मणोऽयमिहागतः ॥ १५ ॥
आर्तस्य हृतदारस्य परुषं पुरुषान्तरात् ॥ वचनं मर्षणीयं ते राघवस्य महात्मनः ॥ १६ ॥
कृतापराधस्य हि ते नान्यत्पश्याम्यहं क्षमम् ॥ अन्तरेणाञ्जलिं बद्ध्वा लक्ष्मणस्य प्रसादनात् ॥१७॥
नियुक्तैर्मन्त्रिभिर्वाच्यो ह्यवश्यं पार्थिवो हितम् ॥ अत एव भयं त्यक्त्वा ब्रवीम्यवधृतं वचः ॥१८॥

ति ॥ ६ ॥ मित्रस्यास्थानकोपसंभावनायां लोकन्यायमाह—सर्वथेति ॥ अल्पे वैषम्य इतिशेषः ॥ ७ ॥ महात्मना रामेण मम यदुपकृतं तन्मया प्रतिकर्तुं न शक्यं । अतोनिमित्तं अस्मान्निमित्तात् । त्रस्तोहमिति संबन्धः ॥ ८ ॥ तर्केण ऊहेन ॥ ९ ॥ उपकारकृतं उपकारकारिणं ॥ १०—१५ ॥ पुरुषान्तरात् लक्ष्मणात् । आगतमितिशेषः । अत्र मर्षणीयत्वे बहवो हेतव उपन्यस्यन्ते । हृतदारस्य परुषवचनं मर्षणीयं । एवमार्तस्येत्यादौ । राघवस्य महात्मनः परमात्मनः सर्वस्वामिन इत्यर्थः ॥ १६ ॥ अथापराधप्रायश्चित्तं विदधाति—कृतेति ॥ कृतापराधस्य न त्वारब्धापराधस्य । अपराधारम्भकाले सानुतापो यदि लघुप्रायश्चित्तेन तदा तस्य परिहारः स्यात् । न तथाभूः किंतु निश्चयेन कृतापराधोसि । तेन अञ्जलिं बद्ध्वा लक्ष्मणस्य प्रसादनादन्तरेण प्रसादनंविना । अन्यत् क्षमं अपराधपरिहारक्षमं साधनं । न पश्यामि । "अञ्जलिः परमा मुद्रा क्षिप्रं देवप्रसादिनी" इतिशास्त्रात् । लक्ष्मणस्येत्यनेन तदीयंप्रत्यञ्जलिरेव भगवदपचारपरिहारक इत्युक्तं । त्वदङ्घ्रिमुद्दिश्येतिवत् । ते इत्यनेनात्राधिकारिनियमो नास्तीत्युच्यते । अञ्जलिमित्येकवचनेन सकृत्करणमेवालमित्युक्तं । बद्ध्वेत्यनेन देशकालनियमाभावः सूचितः । बद्ध्वा लक्ष्मणस्य प्रसादनादित्यनेन क्षिप्रं देवप्रसादिनीत्यस्यार्थ उक्तः ॥ १७ ॥ किमेवं मां प्रति हीनवृत्तमुपदिष्टवानसीत्य-

इत्यादिवचनमत्रानुसन्धेयं ॥ ६ ॥ ति० रिपुजोपजापपरिहारेणसख्यपालनंदुष्करमित्याह—सर्वथेति । अल्पेपि उपजापेइतिशेषः ॥ ७ ॥ ति० अतोनिमित्तं अस्मान्निमित्तात् । अथस्वदोषशङ्कानिवृत्तयेकृतज्ञतांमन्त्रिभ्योदर्शयति—रामेणेति ॥ ८ ॥ —ति० अथमुख्यमन्त्रीहनुमान्कोपनिमित्तंनिश्चित्याह—सुग्रीवेणेति ॥ स० तर्केण ऊहेन । हनुमतोऽद्यापि लक्ष्मणदर्शनाभावादितिभावः ॥ ९ ॥ ति० अथनिश्चयंविवक्षुःस्वस्यगुणग्राहित्वरूपंमन्त्रिलक्षणंप्रकटयति—सर्वथेति ॥ १० ॥ ति० उपकारमेवाह—राघवेणेति । भयं वालिपराक्रमजं । वालिनश्छलेनवधकृतं लोकापवादजंवा ॥ ११ ॥ ति० प्रणयात्क्रुद्धः नतुत्वद्रिपूपजापतइत्यर्थः ॥ १२ ॥ ति० प्रणयकोपस्यापिनिमित्ताभासंदर्शयति—त्वमिति । कालं प्रतिज्ञातंसीतान्वेषणकालं । प्रवृत्ता प्रकर्षेणवृत्ता । गतप्रायेतियावत् ॥ १३ ॥ ति० व्यक्तं ज्ञात्वेतिशेषः ॥ १५ ॥ तनि० लक्ष्मणज्याघोषंश्रुत्वाकृतकापेयचेष्टेनसुग्रीवेणतादृशावस्थायांकर्तव्यंकिमितिप्रश्नेकृतेसुग्रीवंप्रतिहनुमानाह—कृतापराधस्येति । अपराधारंभएवानुतापोयदिलघुप्रायश्चित्तेनपरिहारस्स्यात् । इदानींनतावन्मात्रेणपरिहर्तुंशक्यते । किंतु सान्त्वनंकार्यं । ततश्चाञ्जलिःकर्तव्यः । अनेनभगवदपचारेतदीयप्रसादनंप्रायश्चित्तमितिव्यञ्जितं । "अनुतप्तस्तुतापेनक्षामयेन्नान्यथाशमः । भगवत्यपचारेपिनैषाशक्तिरनुत्तमा" इतिस्मरणात् ॥१७॥ ति० नियुक्तैः हितोपदेशइतिशेषः । भयंत्यक्त्वाब्रवीमि राजानमपिकार्यवशात्परस्माअञ्जलिंकुर्वितिवचोऽवधृतं निश्चितंवदामि ॥

[पा०] १ घ. छ. झ. ट. अनित्यत्वात्तु. ङ. च. ज. ञ. अनित्यत्वाद्धि. २ क. ख. घ.—ट. मुक्तेतु. ३ च. ज. ञ. हनूमान्मारुतात्मजः. ग. हनूमान्हरियूथपः. ४ ङ. ज.—ट. नविस्मरस्यविस्रब्धं. क. नविस्मरस्यसुस्निग्धं. ५ क. ग. ङ.—झ. ट. मुपकारंकृतं. ६ ख. घ. शूरेण. ७ ङ.—ट. शरच्छुभा. ८ ग. च. सुप्रसन्नाश्चसरितःप्रसन्नानिसरांसिच. ९ ङ. ज.—ट. इतएव

अभिक्रुद्धः समर्थो हि चापमुद्यम्य राघवः ॥ सदेवासुरगन्धर्वं वशे स्थापयितुं जगत् ॥ १९ ॥
न स क्षमः कोपयितुं यः प्रसाद्यः पुनर्भवेत् ॥ पूर्वोपकारं स्मरता कृतज्ञेन विशेषतः ॥ २० ॥
तस्य मूर्ध्नि प्रणम्य त्वं सपुत्रः ससुहृज्जनः ॥ राजंस्तिष्ठ स्वसमये भर्तुर्भार्येव तद्वशे ॥ २१ ॥
न रामरामानुजशासनं त्वया कपीन्द्र युक्तं मनसाप्यपोहितुम् ॥
मनो हि ते ज्ञास्यति मानुषं बलं सराघवस्यास्य सुरेन्द्रवर्चसः ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे द्वात्रिंशः सर्गः ॥ ३२ ॥

त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

अङ्गदादिभिःकिष्किन्धांप्रवेशितेन राजमार्गेऽङ्गुलतमनानाभवनादिकमवलोकयतास्ता सुग्रीवगृहंप्रविष्टेनलक्ष्मणेनान्तःपुरस्त्रीणांमञ्जीरादिशिञ्जितश्रवणजलजयाज्यास्वनेनसकलदिग्बलक्षयपूरणपूर्वकं कुत्रचिदेकान्तदेशेऽवस्थानम् ॥१॥ ज्याघोषश्रवणचकितेनसुग्रीवेण लक्ष्मणसंनिधिप्रेषितयातारया सकलवानरसेनासमानयनायसुग्रीवकृतनीलनियोजननिवेदनादिना क्षमापणपूर्वकंलक्ष्मणप्रसादनम् ॥ २ ॥ तारासान्त्वनेन किंचिच्छान्तरुषालक्ष्मणेन तदनुमत्याऽन्तःपुरप्रवेशेन सुग्रीवदर्शनम् ॥ ३ ॥

अथ प्रतिसमादिष्टो लक्ष्मणः परवीरहा ॥ प्रविवेश गुहां घोरां किष्किन्धां रामशासनात् ॥ १ ॥
द्वारस्था हरयस्तत्र महाकायाः मदाबलाः ॥ बभूवुर्लक्ष्मणं दृष्ट्वा सर्वे प्राञ्जलयः स्थिताः ॥ २ ॥
निःश्वसन्तं तु तं दृष्ट्वा क्रुद्धं दशरथात्मजम् ॥ बभूवुर्हरयस्त्रस्ता न चैनं पर्यवारयन् ॥ ३ ॥
स तां रत्नमयीं श्रीमान्दिव्यां पुष्पितकाननाम् ॥ रम्यां रत्नसमाकीर्णां ददर्श महतीं गुहाम् ॥ ४ ॥

ब्राह्—नियुक्तैरिति ॥ १८ ॥ कथमिदं हितं तत्राह—अभिक्रुद्ध इति ॥ १९ ॥ हेत्वन्तरमाह—न स इति ॥ २० ॥ अञ्जलिं बद्ध्वेत्युक्तं विवृणोति—तस्येति ॥ स्वसमये तिष्ठ तद्वशे च तिष्ठ ॥ २१ ॥ सुरेन्द्रवर्चसः सराघवस्य सलक्ष्मणस्य । अस्य रामस्य । मानुषंबलं दिव्यास्त्रादिबलमन्तरेण केवलं स्वाभाविकं बलं । ते मनो ज्ञास्यतिहि जानात्येव । सालगिरिभेदनादौ दृष्टचरत्वादितिभावः ॥ २२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने द्वात्रिंशः सर्गः ॥ ३२ ॥

अथान्तःपुरं प्रविष्टस्य लक्ष्मणस्य तारया प्रसादनं त्रयस्त्रिंशे—अथेत्यादि ॥ प्रतिसमादिष्टः प्रत्याहूतः । अङ्गदेनेतिशेषः ॥ १—२ ॥ न चैनं पर्यवारयन् भयेन लक्ष्मणमुपगन्तुं नाशक्नुवन्नित्यर्थः ॥ ३ ॥ रत्नमयीं रत्ननिर्मितां । रत्नसमाकीर्णां आपणस्थरत्नैः समाकीर्णां । हर्म्याः धनिनां वासाः । प्रासादाः देव-

---

शि० नियुक्तैः युक्तार्थबोधनेनियोजितैः । पार्थिवोऽवश्यंहितंवाच्यः । इतएवभयंत्यक्त्वाऽवधृतं हितत्वेननिश्चितं । वचोब्रवीमि ॥ १८ ॥ स० यः पुमान्पुनःप्रसाद्योभवेत्सकोपयितुंनक्षमः । विशेषतस्तु पूर्वोपकारंस्मरता कृतज्ञेन कार्यज्ञेन । अकृतज्ञेनतुकोपयितुंक्षमइत्यपिबोधयितुंस्मरताकृतज्ञेनेत्युक्तिः ॥ २० ॥ ती० तद्वशइतिप्रथमान्तपाठःसाधुः । सप्तम्यन्तपाठे स्वसमयइत्यत्रवर्तमानइतिशेषः॥२१॥ ति० अपोहितुं उपेक्षितुं । सराघवस्य सलक्ष्मणस्य । अस्य रामस्य । मानुषंमनुष्यमतिक्रान्तंबलं । तेमनोज्ञास्यति जानात्येव । वालिवधादिनेतिभावः ॥ शि० सराघवस्य रामसहितस्य । अस्य लक्ष्मणस्य । मानुषं मः इयत्तायाः अनु यः निर्ध्वंसःयस्मिंस्तद्बलंतेमनोज्ञास्यति ॥ २१ ॥ इतिद्वात्रिंशःसर्गः ॥ ३२ ॥

शि० रत्नसमाकीर्णां रत्नैः अनेकविधोत्तमपदार्थैर्व्याप्तां ॥ ४ ॥

[पा०] १ ग. सहबन्धुभिः. २ ग. शक्यं. ३ क. सलक्ष्मणस्यास्य. ४ घ. द्रुमां. ५ क. घ.—ट. रम्यां. ६ ग. क. छ.—ट. दिव्यांश्रीमान्.

हर्म्यप्रासादसंबाधां नानापण्योपशोभिताम् ॥ सर्वकामफलैर्वृक्षैः पुष्पितैरुपशोभिताम् ॥ ५ ॥
देवगन्धर्वपुत्रैश्च वानरैः कामरूपिभिः ॥ दिव्यमाल्याम्बरधरैः शोभितां प्रियदर्शनैः ॥ ६ ॥
चन्दनागरुपद्मानां गन्धैः सुरभिगन्धिनाम् ॥ मैरेयाणां मधूनां च संमोदितमहापथाम् ॥
[विन्ध्यमेरुगिरिप्रख्यैः प्रासादैर्नैकभूमिभिः ॥ ७ ॥]
ददर्श गिरिनद्यश्च विमलास्तत्र राघवः ॥ ८ ॥
अङ्गदस्य गृहं रम्यं मैन्दस्य द्विविदस्य च ॥ गवयस्य गवाक्षस्य गजस्य शरभस्य च ॥ ९ ॥
विद्युन्मालेश्च संपातेः सूर्याक्षस्य हनूमतः ॥ वीरबाहोः सुबाहोश्च नलस्य च महात्मनः ॥ १० ॥
कुमुदस्य सुषेणस्य तारजाम्बवतोस्तथा ॥ दधिवक्त्रस्य नीलस्य सुपाटलसुनेत्रयोः ॥ ११ ॥
एतेषां कपिमुख्यानां राजमार्गे महात्मनाम् ॥ ददर्श गृहमुख्यानि महासाराणि लक्ष्मणः ॥ १२ ॥
पाण्डुराभ्रप्रकाशानि दिव्यमाल्ययुतानि च ॥ प्रभूतधनधान्यानि स्त्रीरत्नैः शोभितानि च ॥ १३ ॥
पाण्डुरेण तु सालेन परिक्षिप्तं दुरासदम् ॥ वानरेन्द्रगृहं रम्यं महेन्द्रसदनोपमम् ॥ १४ ॥
शुक्लैः प्रासादशिखरैः कैलासशिखरोपमैः ॥ सर्वकामफलैर्वृक्षैः पुष्पितैरुपशोभितम् ॥ १५ ॥
महेन्द्रदत्तैः श्रीमद्भिर्नीलजीमूतसन्निभैः ॥ दिव्यपुष्पफलैर्वृक्षैः शीतच्छायैर्मनोरमैः ॥ १६ ॥
हरिभिः संवृतद्वारं बलिभिः शस्त्रपाणिभिः ॥ दिव्यमाल्यावृतं शुभ्रं तप्तकाञ्चनतोरणम् ॥ १७ ॥
सुग्रीवस्य गृहं रम्यं प्रविवेश महाबलः ॥ अवार्यमाणः सौमित्रिर्महाभ्रमिव भास्करः ॥ १८ ॥
स सप्त कक्ष्या धर्मात्मा नानाजनसमाकुलाः ॥ प्रविश्य सुमहद्गुप्तं ददर्शान्तःपुरं महत् ॥ १९ ॥
हैमराजतपर्यङ्कैर्बहुभिश्च वरासनैः ॥ महार्हास्तरणोपेतैस्तत्रतत्रोपशोभितम् ॥ २० ॥
प्रविशन्नेव स ततं शुश्राव मधुरस्वरम् ॥ तन्त्रीगीतसमाकीर्णं समगीतपदाक्षरम् ॥ २१ ॥

गृहाः । पद्मानां आलेपविशेषाणां । गिरिनद्यः गिरिनदीः । व्यत्ययेन द्वितीया ॥४—११॥ महासाराणि अतिदृढानि ॥ १२—१३ ॥ पाण्डुरेण सालेन सुधाधवलितप्राकारेण । दिव्यपुष्पफलैर्वृक्षैरित्यनेन इन्द्रदत्ताःस्वर्गीयावृक्षा उच्यन्ते । पूर्वमुक्तावृक्षा भौमा इत्यवगन्तव्यं। पूर्वं वानरेन्द्रगृहं रम्यमित्युक्तस्यानेकविशेषणव्यवधानेन सुग्रीवस्यगृहंरम्यमिति पुनर्निर्गमनं । स्वरूपतोरम्यं उक्तविशेषणैश्च रम्यमितिरम्यपदद्वयनिर्वाहः । यद्वा वानरेन्द्रगृहं वानरेन्द्रयोः ऋक्षरजोवालिनोः गृहभूतं । इदानीं सुग्रीवस्य गृहं प्रविवेशेतिसंबन्धः ॥ १४—२० ॥ सः लक्ष्मणः । ततं वीणादिवाद्यजातं । मधुरस्वरं मधुरश्रुतियुक्तं । तन्त्रीशब्देन तन्त्रीध्वनिर्लक्ष्यते । तद्रूपैर्गीतैः समाकीर्णं । समगीतपदाक्षरं समतया तन्त्रीगीतसमतया गीतानि कण्ठैर्गीतानि पदान्यक्षराणि

स० सुरभिश्चासौगन्धश्चसयेषांतेषां । मधूनां पुष्परसानां । "मधुःपुष्परसः" इतिविश्वः ॥ ७ ॥ ति० पाण्डुरेणशैलेनपरिक्षिप्तं स्फटिकशिलामयवप्रेणवेष्टितं ॥१४॥ शि० सर्वेकामाः मनोरथायेभ्यस्तानिफलानियेषांतैः । किंच सर्वान्कामान्फलन्ति निष्पादयन्ति तैर्वृक्षैश्च ॥ १५ ॥ शि० यानासनसमावृताः यानैः विमानादिभिः । आसनैः चित्रकंबलाद्यास्तरणविशिष्टपर्यङ्कादिभिः । किंच यानानांविमानादीनांआसनानि चित्रकंबलादीनितैःसमावृताः पूर्णाः । सप्तकक्ष्याः द्वारःप्रविश्य सुमहद्गुप्तं वानरैरत्यन्तंसंरक्षितं । अन्तःपुरं धर्मात्मालक्ष्मणोददर्श ॥ १९ ॥

[पा०] १ ङ.—ञ. नानारत्नोपशोभितां. २ क. रतिशोभितां. ३ छ. ज. झ. ट. गन्धितां. ४ इदमर्धं क. घ. ङ.—ञ. पाठेषुदृश्यते. ५ ङ. शरभस्यगजस्यच. ६ च. ज. बलस्यच. ग. नलस्यपनसस्यच. ७ ग. छ. झ. ट. गन्धमाल्य. ८ क. घ.—ट. शैलेन. ९ ङ. च. ञ. सर्वकालफलैः. १० क. ङ. च. ज.—ट. यानासनसमावृताः. ख. ग. यानासनसमाकुलाः. ११ च. छ. झ. ददर्शसुमहद्गुप्तं. ग. प्रविश्यबलिभिर्गुप्तं. १२ तत्रसमावृतं. १३ क. ग.—ट. मधुरस्वनं. १४ क. ख. ङ.—ट. समतालपदाक्षरं.

बहीश्च विविधाकारा रूपयौवनगर्विताः ॥ स्त्रियः सुग्रीवभवने ददर्श स महाबलः ॥ २२ ॥
दृष्ट्वाभिजनसंपन्नाश्चित्रमाल्यकृतस्रजः ॥ फलमाल्यकृतव्यग्रा भूषणोत्तमभूषिताः ॥ २३ ॥
नानुदात्तपरिच्छदान् ॥ सुग्रीवानुचरांश्चापि लक्षयामास लक्ष्मणः ॥ २४ ॥
कूजितं नूपुराणां च काञ्चीनां निनदं तथा ॥ संनिशम्य ततः श्रीमान्सौमित्रिर्लज्जितोऽभवत् ॥ २५ ॥
रोषवेगप्रकुपितः श्रुत्वा चाभरणस्वनम् ॥ चकार ज्यास्वनं वीरो दिशः शब्देन पूरयन् ॥ २६ ॥
चारित्रेण महाबाहुरपकृष्टः स लक्ष्मणः ॥ तस्यावेकान्तमाश्रित्य रामशोकसमन्वितः ॥ २७ ॥
तेन चापस्वनेनाथ सुग्रीवः प्लवगाधिपः ॥ विज्ञायाऽऽगमनं त्रस्तः संचचाल वरासनात् ॥ २८ ॥
अङ्गदेन यथा मह्यं पुरस्तात्प्रतिवेदितम् ॥ सुव्यक्तमेष संप्राप्तः सौमित्रिर्भ्रातृवत्सलः ॥ २९ ॥
अङ्गदेन समाख्यातं ज्यास्वनेन च वानरः ॥ बुबुधे लक्ष्मणं प्राप्तं मुखं चास्य व्यशुष्यत ॥ ३० ॥
ततस्तारां हरिश्रेष्ठः सुग्रीवः प्रियदर्शनाम् ॥ उवाच हितमव्यग्रस्त्रासविभ्रान्तमानसः ॥ ३१ ॥
किंनु तत्कारणं सुभ्रु प्रकृत्या मृदुमानसः ॥ सरोष इव संप्राप्तो येनायं राघवानुजः ॥ ३२ ॥
किं पश्यसि कुमारस्य रोषस्थानमनिन्दिते ॥ न ह्यल्पकारणे कोपमाहरेन्नरसत्तमः ॥ ३३ ॥
यदस्य कृतमस्माभिर्बुध्यसे किंचिदप्रियम् ॥ तद्रुक्ष्या संप्रधार्याशु क्षिप्रमर्हसि भाषितुम् ॥ ३४ ॥
अथवा स्वयमेवैनं द्रष्टुमर्हसि भाषितुम् ॥ वचनैः सान्त्वयुक्तैश्च प्रसादयितुमर्हसि ॥ ३५ ॥
त्वद्दर्शनविशुद्धात्मा नं स कोपं करिष्यति ॥ न हि स्त्रीषु महात्मानः कचित्कुर्वन्ति दारुणम् ॥ ३६ ॥
स्वया सान्त्वैरुपक्रान्तं प्रसन्नेन्द्रियमानसम् ॥ ततः कमलपत्राक्षं द्रक्ष्याम्यहमरिन्दमम् ॥ ३७ ॥

च यस्य । यद्वा समानि अन्यूनातिरिक्तानि गीतसंबन्धीनि पदान्यक्षराणि च यस्य ॥२१—२२॥ फलमाल्यकृतव्यग्राः फलमाल्यार्थं व्यग्रा इत्यर्थः ॥ २३ ॥ नानुदात्तपरिच्छदान् उत्कृष्टवस्त्राभरणादिकान् ॥ २४ ॥ लज्जितोऽभवत् उपरिसुरतद्योतकत्वादिति भावः ॥ २५ ॥ रोषवेगप्रकुपितः रोषप्रवृद्धः । प्रकोपशब्दो ह्यभिवृद्धवाची ॥ २६ ॥ रामशोकसमन्वितः रामविषयशोकसमन्वितः । एकान्तं स्त्रीप्रसङ्गरहितप्रदेशं ॥ २७ ॥ सौमित्रिःसंप्राप्त इत्यागमनं विज्ञायेति संबन्धः । संचचाल वरासनात् लाङ्गूलचलनमाल्यच्छेदनादिकापेक्षव्यापारानकरोदित्यर्थः ॥ २८—३० ॥ अव्यग्रः कार्याश इति शेषः ॥ ३१—३६ ॥ स्वया सान्त्वैः प्रसन्नेन्द्रियमानसमिति संबन्धः । उपक्रान्तं उपागतं ॥ ३७ ॥

ति० अभिजनसंपन्नाः आभिजात्ययुक्ताः । वरमाल्यकृतव्यग्राः वरमाल्यानांउत्तमस्रजांकृतंकरणंतत्रव्यग्राः ॥२३॥ ति० लज्जितोऽभवत् अयोध्यातोऽप्यधिकसौभाग्यदर्शनाद्भवा । परस्त्रीदर्शनकृतालज्जेत्यन्ये ॥२५॥ ति० आभरणस्वनंश्रुत्वा क्षीणांततोनिवृत्तयेज्यास्वनंचकार ॥ शि० आभरणस्वनंश्रुत्वा रोषवेगप्रचलितः रोषवेगःप्रचलितोनिवृत्तोयस्यसः तिरोहितकोपइत्यर्थः । ज्यास्वनं चकार सुग्रीवानवधानतानिवृत्तयेइतिशेषः ॥२६॥ ति० तदेवाह—चारित्रेणेति । चारित्रेण स्त्रीगोष्ठ्यांप्रवेष्टुंनोचितमित्याचारपर्यालोचनया । अपकृष्टोनिवर्तितान्तःपुरप्रवेशःसन् । एकान्तमाश्रित्य रामकोपसमन्वितः रामकार्याप्रवृत्तिदर्शनजकोपेनसमन्वितस्तस्थौ ॥ ती० रामकोपसमन्वितः बुद्धिस्थरामकोपइत्यर्थः । चारित्रेणापकृष्टः सचरित्रयुक्तयापरस्त्रीदर्शनेनस्त्रीनूपुरशब्दश्रवणेनचलज्जयोदासीनस्सन् । एकान्तेस्थितवानितिभावः ॥२७॥ ति० उपशुष्यत उपाशुष्यत ॥३०॥ ति० निर्निमित्तकोपासंभवान्निमित्तंचानिर्णीयस्वस्यसमीपगमनमनुचितमितिपक्षान्तरंगृह्णाति—अथवेति । स्वयमेव मांविहायेत्यर्थः ॥३५॥ ति० विशुद्धात्मा

[पा०] १ क. ङ. ञ. सुमहाबलः. २ छ. झ. ट. संपन्नास्तत्र. ३ क. च. छ. झ. ञ. ट. वरमाल्य. ४ घ. छ. झ. ट. आपिचाल्यप्रान्, च. आपिवाल्यप्रान्, ५ छ. झ. ट. निस्वनं. ६ ख. ग. ङ. संनिशम्य. ७ च. ज. ञ. ट. प्रचलितः. क. प्रकटितं. ८ क. ग. ङ.—ट. रामकोपसमन्वितः. ९ क. मांप्राप्तः. १० क. ग. ङ.—ट. समाख्यातो. ११ क. छ. झ. चास्योपशुष्यत. ख. ङ. च. ज. ञ. ट. चास्योपशुष्यते. १२ घ.—ट. किंनुस्तारणं. ङ किंतारेकारणं. १३ ङ. छ.—ट. नरपुङ्गवः. १४ ङ.—ट. क्षिप्रमेवाभिधीयतां. १५ क. ग.—ट. भामिनि. १६ छ. झ. लक्ष्मणे. १७ क. ख. घ.—ट. तस्यकोपं.

सा प्रस्खलन्ती मदविह्वलाक्षी प्रलम्बकाञ्चीगुणहेमसूत्रा ॥
सलक्षणा लक्ष्मणसन्निधानं जगाम तारा नमिताङ्गयष्टिः ॥ ३८ ॥
स तां समीक्ष्यैव हरीशपत्नीं तस्यावुदासीनतया महात्मा ॥
अवाङ्मुखोऽभून्मनुजेन्द्रपुत्रः स्त्रीसन्निकर्षाद्विनिवृत्तकोपः ॥ ३९ ॥
सा पानयोगाद्विनिवृत्तलज्जा दृष्टिप्रसादाच्च नरेन्द्रसूनोः ॥
उवाच तारा प्रणयप्रगल्भं वाक्यं महार्थं परिसान्त्वपूर्वम् ॥ ४० ॥
किं कोपमूलं मनुजेन्द्रपुत्र कस्ते न तिष्ठति वाङ्निदेशे ॥
कः शुष्कवृक्षं वनमापतन्तं दैवाग्निमासादयति निर्विशङ्कः ॥ ४१ ॥
स तस्या वचनं श्रुत्वा सान्त्वपूर्वमसंशयम् ॥ भूयः प्रणयदृष्टार्थं लक्ष्मणो वाक्यमब्रवीत् ॥ ४२ ॥
किमयं कामवृत्तस्ते लुप्तधर्मार्थसंग्रहः ॥ भर्ता भर्तृहिते युक्ते न चैनमवबुध्यसे ॥ ४३ ॥
न चिन्तयति राज्यार्थं नोंसाञ्शोकपरायणान् ॥ सामात्यपरिषत्तारे पानमेवोपसेवते ॥ ४४ ॥
स मासांश्चतुरः कृत्वा प्रमाणं प्लवगेश्वरः ॥ व्यतीतांस्तान्मदेन्यग्रो विहरन्नावबुध्यते ॥ ४५ ॥
न हि धर्मार्थसिद्ध्यर्थं पानमेवं प्रशस्यते ॥ पानाद्यर्थश्च धर्मश्च कामश्च परिहीयते ॥ ४६ ॥

सा कान्तसंश्लेषं विनापि रमणीयगमनसौन्दर्या । प्रस्खलन्ती संश्लेषकृतायासेन पदे पदं कृत्वागच्छन्ती । मदविह्वलाक्षी भोगसंवर्धकमधुपानमदेनविह्वलनेत्रा । प्रलम्बे काञ्चीगुणहेमसूत्रे यस्याः सा प्रलम्बकाञ्ची-गुणहेमसूत्रा । ईषच्छिथिलदुकूलतया शयने यथा स्थिता तयैव समागतेत्यर्थः । सलक्षणा व्यक्तैः संभो-गलक्षणैः समागता । लक्ष्मणसन्निधानं जगाम । किं मातुरपि गोप्यमस्तीत्यागता । नमिताङ्गयष्टिः ह्रीभावावस्थायां नमितं नार्जवमर्हति । अतः नम्र-तैव यथा निरूपकंभवति तथा स्थितेत्यर्थः ॥ ३८ ॥ उदासीनतया तत्कान्तिनिर्वर्णनानादरतया ॥ ३९ ॥ नरेन्द्रसूनोः धार्मिकस्य लक्ष्मणस्य । दृष्टिप्रसादाद्धेतोः । प्रणयप्रगल्भं स्नेहदृष्टं ॥ ४० ॥ चतुरोमासान् राज-पुत्रौ विद्युत्तनितसात्कृत्य स्वयं भोगप्रवणा स्थिता तज्ज्ञानन्त्यपि किं कोपमूलमित्याह । तत्कृपारसविशे-षज्ञतया दृष्टिप्रसादादिति ह्युक्तं । मनुजेन्द्रपुत्र । षष्टिव-र्षसहस्राणि राज्यं परिपाल्य प्रजापराधं क्षान्तवतो दशरथस्य पुत्रस्त्वं अपराधिजनानां शिरश्छेदनं करि-ष्यामीति संप्रति समागतोसि सम्यक्ची भवतो गतिः । कस्ते न संतिष्ठति वाङ्निदेशे यस्ते वाङ्निदेशे न तिष्ठति सकः । अशाश्वतस्य दृष्टेवस्तुनि सपदिचापलं कृत्वा निवर्तितुमक्षमस्य तिर्यग्जनस्य च्युतान्भोगान्स्वयमेव दत्त्वा स्वाक्षां कुर्वन्तं हिंसितुमिच्छसि । क इत्यादि । दवाग्नौ पतन् चपलः शलभः किलेतिभावः । तद्वच-पलोयमित्येवं दृष्टान्तः । संतिष्ठतीत्यार्षपरस्मैपदं ॥ ४१ ॥ असंशयं निःसंशयं । अकुटिलमितियावत् । प्रणयदृष्टार्थं स्नेहसंदर्शितप्रयोजनं ॥ ४२ ॥ अती-वायुक्तं तव भर्तुर्विषयप्रावण्यमित्याह—किमयमि-त्यादिना ॥ युक्ते सक्ते इति संबुद्धिः । अयं कामवृत्त इति एनं नावबुध्यसेकिमिति संबन्धः ॥ ४३ ॥ राज्यार्थं राज्यरूपप्रयोजनं ॥ ४४ ॥ प्रमाणं मर्यादां ॥ ४५ ॥ धर्मार्थसिद्ध्यर्थं यत्नमानस्येतिशेषः

गतक्रोधचित्तः ॥ ३९ ॥ रामानु० "येनैवबाणेनगतःप्रियोमेतेनैवमांत्वंजहिसायकेन । इतागमिष्यामिसमीपमस्यनमा-मृतेरामरमेतबाली" इतियारामंप्रत्युक्तवतीसेत्यर्थः । यद्वा "स्वयमेवैनद्रक्षुमर्हसिमामिनि" इतिसुग्रीवेणोक्तासतारा ॥ स० हेमात्मकानिसूत्राणि तन्तवोयस्मिन्वस्त्रे तद्धेमसूत्रं । प्रलंबेकाञ्चीगुणहेमसूत्रेयस्यास्सा । नमिताङ्गयष्टिः विनयेनेतिवा स्वनादिभा-वेनेतिवाभावोदोष्यः ॥ ३८ ॥ ति० परिसान्त्वरूपं परितःसान्त्वरूपं । परिसान्त्वेतिपाठस्सुगमः ॥ ४० ॥ ति० राज्यार्थं

[पा०] १ क. सुलक्षणा. २ क. ग. सन्निकर्षाच्चनिवृत्त. ३ घ. रोषः. ४ क. ख. घ.—ट. पानयोगाच्चनिवृत्त. ५ ख. ग. प्रसादाच्च. ६ ख. ग. ट. सान्त्वरूपं. ७ ख.—ट. दावाग्निं. ८ क. ख. ग.—ट. मशङ्कितः. ९ क. घ. ज. ञ. कामवृत्तश्च. १० ग. ट. शोसान्. ११ ग. ट. सामान्यपरिषत्. १२ ख. ग. ट. त्यदोदग्रो. १३ ग. ङ.—ट. पानमेव. १४ ग. ङ.—ट. कामश्चधर्मश्च.

धर्मलोपो महांस्तावत्कृते ह्यप्रतिकुर्वतः ॥ अर्थलोपश्च मित्रस्य नाशे गुणवतो महान् ॥ ४७ ॥
मित्रं ह्यर्थगुणश्रेष्ठं सत्यधर्मपरायणम् ॥ तद्द्वयं तु परित्यक्तं न तु धर्मे व्यवस्थितम् ॥ ४८ ॥
तदेवं प्रस्तुते कार्ये कार्यमस्माभिरुत्तरम् ॥ यत्कार्यं कार्यतत्त्वज्ञे तदुदाहर्तुमर्हसि ॥ ४९ ॥

सा तस्य धर्मार्थसमाधियुक्तं निशम्य वाक्यं मधुरस्वभावम् ॥
तारा गतार्थे मनुजेन्द्रकार्ये विश्वासयुक्तं तमुवाच भूयः ॥ ५० ॥

न कोपकालः क्षितिपालपुत्र नै चातिकोपः स्वजने विधेयः ॥
स्वदर्थकामस्य जनस्य तस्य प्रमादमप्यर्हसि वीर सोढुम् ॥ ५१ ॥

कोपं कथं नाम गुणप्रकृष्टः कुमार कुर्यादपकृष्टसत्त्वे ॥
कस्त्वद्विधः कोपवशं हि गच्छेत्सत्त्वावरुद्धस्तपसः प्रसूतिः ॥ ५२ ॥

जानामि [2]रोषं हरिवीरबन्धोर्जानामि कार्यस्य च कालसङ्गम् ॥
जानामि कार्यं त्वयि यत्कृतं नस्तच्चापि जानामि यदत्र कार्यम् ॥ ५३ ॥

तच्चापि जानामि यथाऽविषह्यं बलं नरश्रेष्ठ शरीरजस्य ॥
जानामि यस्मिंश्च जनेऽवबद्धं कामेन सुग्रीवमसक्तमद्य ॥ ५४ ॥

॥ ४६ ॥ कृते उपकारविषये । अप्रतिकुर्वतः महान् धर्मलोपो भवेत् । प्रत्युपकाराकरणाद्गुणवतो मित्रस्य नाशे सति महानर्थलोपोभवेत् । चकारात्कामलोपश्च ॥४७॥ उक्तमर्थमुपपादयति—मित्रं हीति । सत्यधर्मपरायणं मित्रं अर्थगुणश्रेष्ठं हि । अत्र गुणशब्दः कामवाची । अर्थकामयोर्मूलत्वान्मित्रं ताभ्यां श्रेष्ठं हि । तादृशं मित्रं त्यजता सुग्रीवेण तद्वयं अर्थकामद्वयं । परित्यक्तं तु परित्यक्तमेव । धर्मेतुनव्यवस्थितं । धर्मोपि परित्यक्तइत्यर्थः ॥ ४८ ॥ तत् तस्मात् । कार्यतत्त्वज्ञे कार्ये धर्मार्थकामविलोपहेतुभूते मित्रपरित्यागलक्षणे कार्ये । एवं प्रस्तुते सति यदुत्तरं कार्यमस्माभिः कार्यं कर्तव्यं । तत् उदाहर्तुं वक्तुं अर्हसि ॥ ४९ ॥ धर्मार्थयोः समाधिना संबन्धेन युक्तं । गतार्थे प्रयोजनयुक्ते । नरेन्द्रकार्ये विषये विश्वासयुक्तं ॥ ५० ॥ न कोपकालः सुग्रीवस्य कामार्तत्वादितिभावः । स्वदर्थकामस्य । स्वत्प्रयोजनपरस्य । जनस्य सुग्रीवस्य ॥ ५१ ॥ गुणप्रकृष्टः उत्कृष्टवीर्यगुणः । अपकृष्टसत्त्वे हीनबले । सत्त्वावरुद्धः व्यवसाययुक्तः । " ध्रुव्यासुव्यवसायेषु सत्त्वमस्त्री तु जन्तुषु " इत्यमरः । तपसः शान्तिरूपस्य । प्रसूतिः उत्पत्तिस्थानं ॥ ५२ ॥ मद्रोषमेव जानासि नतु तद्धेतूनित्यत्राह—जानामीति ॥ हरिवीरबन्धोः रामस्य । रोषं जानामि रोषममोघस्वरूपं जानामीत्यर्थः । कार्यस्य च कालसङ्गं उद्योगरूपकार्यस्य कालविलम्बनं च जानामि । जानामि कार्यं त्वयि यत्कृतं नः । यत् वालिवधरूपं कार्यं । नः अस्माकं कृतं त्वयि विद्यमानं तदपि जानामि । यदत्र कार्यं अस्मिन्नुपकारे अस्माभिर्यत्सीतान्वेषणादिकं कर्तव्यं तच्चापि जानामि ॥ ५३ ॥ हे नरश्रेष्ठ शरीरजस्य कामस्य बलं यथा अविषह्यं तच्चापिजानामि । अद्य

राज्यस्थैर्यार्थं । सामान्यापरिपठ्यस्यतादृशः । भूत्वेतिशेषः ॥ ४४ ॥ शि० अर्थगुणैः अर्थसाधनीभूतवात्सल्यादिभिःश्रेष्ठं सर्वोत्कृष्टं । सत्यधर्मपरायणं सत्यसाध्यधर्मार्थवेदविहितकर्मणांच परायणं परमाश्रयः । तत्तत्फलादिदातेत्यर्थः । तत् मित्रं उद्वर्त्यापरित्यक्तं । अतएवधर्मे नैवव्यवस्थितं । सनातनोधर्मस्त्यक्तइत्यर्थः । तत् तस्माद्धेतोः । द्वयं उभयलोकसुखंपरित्यक्तं । परित्यक्तमित्युभयान्वयि ॥ ४८ ॥ ति० धर्मार्थसमाधियुक्तं तत्संबन्धयुक्तं । अगतार्थे अष्टप्रयोजने । मनुजेन्द्रकार्ये तद्विषये । विश्वासयुक्तंमयातथा भूयः पुनः । उवाच ॥ ५० ॥ ति० अपकृष्टसत्वे हीने । सत्त्वावरुद्धः सहजसत्त्वगुणावरुद्धविपरीतव्यापारः । सत्त्वाविरुद्धइतिपाठे सहजगुणाविरुद्धव्यापारः । अतएव तपसःप्रसूतिः ॥ ती० सत्त्वावरुद्धः रजस्तमसोरनुप्रवेशावसत्त्वगुणेन निरुद्धः ॥ शि० सत्त्वावरुद्धः विशुद्धसत्त्वमयः । अतएवतपसोविचारस्यप्रसूतिः ॥ ५२ ॥ ती० कामेन असक्तं सुग्रीवं । अद्य

[पा०] १ क. कृत्येष्वप्रति. २ क. ङ. ट. तत्कार्ये. ३ क. ग. मधुरस्वभावा. ४ क. कृतार्था. ङ.—ज. ञ. ट. गतार्था. ५ क. घ.—ङ. ट. तच्चापि. ६ ख. ग. ङ. च. छ. ज. ञ. ट. कोपं. ७ ङ. छ. ज. जनेऽवरुद्धं.

न कामतन्त्रे तव बुद्धिरस्ति त्वं वै यथा मन्युवशं प्रपन्नः ॥
न देशकालौ हि न चार्थधर्मावपेक्षते कामरतिर्मनुष्यः ॥ ५५ ॥
तं कामवृत्तं मम सन्निकृष्टं कामाभियोगाच्च निवृत्तलज्जम् ॥
क्षमस्व तावत्परवीरहन्तस्त्वद्भ्रातरं वानरवंशनाथम् ॥ ५६ ॥
महर्षयो धर्मतपोभिकामाः कामानुकामाः प्रतिबद्धमोहाः ॥
अयं प्रकृत्या चपलः कपिस्तु कथं न सज्जेत सुखेषु राजा ॥ ५७ ॥
इत्येवमुक्त्वा वचनं महार्थं सा वानरी लक्ष्मणमप्रमेयम् ॥
पुनः सलीलं मदविह्वलं च भर्तुर्हितं वाक्यमिदं बभाषे ॥ ५८ ॥
उद्योगस्तु चिराज्ञप्तः सुग्रीवेण नरोत्तम ॥ कामस्यापि विधेयेन तवार्थप्रतिसाधने ॥ ५९ ॥
आगता हि महावीर्या हरयः कामरूपिणः ॥ कोटीशतसहस्राणि नानानगनिवासिनः ॥ ६० ॥
तदागच्छ महाबाहो चारित्रं रक्षितं त्वया ॥ अच्छलं मित्रभावेन सतां दारावलोकनम् ॥ ६१ ॥
तारया चाभ्यनुज्ञातस्त्वरया चापि चोदितः ॥ प्रविवेश महाबाहुरभ्यन्तरमरिन्दमः ॥ ६२ ॥
ततः सुग्रीवमासीनं काञ्चने परमासने ॥ महार्हास्तरणोपेते ददर्शादित्यसन्निभम् ॥ ६३ ॥
दिव्याभरणचित्राङ्गं दिव्यरूपं यशस्विनम् ॥ दिव्यमाल्याम्बरधरं मैहेन्द्रमिव दुर्जयम् ॥ ६४ ॥
दिव्याभरणमाल्याभिः प्रमदाभिः समावृतम् ॥ संरब्धतररक्ताक्षो बभूवान्तकसन्निभः ॥ ६५ ॥

सुग्रीवं यस्मिन् जने कामेन असक्तं अनवरतं अवबद्धं जानामि । तं च स्त्रीजनं जानामीतियोजना ॥ ५४ ॥ लक्ष्मणसंरम्भोपशमनाय स्वप्रागल्भ्येन लोकस्थितिं दर्शयति—न कामतन्त्रे इत्यादिना ॥ त्वं यथा येन कारणेन । मन्युवशं प्रपन्नः तेन कारणेन । कामतन्त्रे रतिक्रीडादौ । तव बुद्धिर्नास्ति । कामतन्त्राभिज्ञश्चेत्तादृशं न ब्रूष्या इति भावः । किं कामतन्त्रप्रवणः किमपि न जानातीत्यत्राह—न देशकालाविति ॥ ५५ ॥ मम सन्निकृष्टं समीपस्थं । अतएव कामवृत्तं काम-व्यापारमिति क्रमेण योजना ॥ ५६ ॥ महर्षयोपि कामवशाः किमुत पृथग्जन इत्याह—महर्षय इति ॥ धर्मतपसी अभिकामयन्त इति धर्मतपोभिकामाः । कामस्याभिलाषस्य अनु पश्चात् कामो येषां ते कामानुकामाः । प्रतिबद्धमोहाः नियतस्त्रीव्यामोहाः ॥ ५७ ॥ सलीलं सलीलं ॥ ५८—६० ॥ चारित्रं रक्षितं त्वया अन्तःपुरस्त्रयवलोकनमनुचितमिति बहिरेव तिष्ठता त्वया सदाचारः सम्यगनुष्ठित इत्यर्थः । शरणागतरक्षणाचारस्त्वया सम्यगनुष्ठित इति वा । अच्छलं अदोषावहं ॥ ६१ ॥ तारयेत्यादिश्लोकचतुष्टयमेकं वाक्यं । समावृतं परिवृतं । संरब्धतरः कुपिततरः । अतएव

यस्मिञ्जने अवबद्धं जानामीति स्त्रीजनं जानामीतियोजना ॥ ५४ ॥ ति० मम सन्निकृष्टं स्वभार्यायाममसमीपे कामवशाद्वर्तमानं । कामाभियोगः कामावेशः । क्षमस्वेति । परवशप्रवृत्तापराधत्वात्स्वभ्रातृलाभस्यैवात्रयोग्यानतुकोपहत्वाशयः ॥ स० कामवृत्तं स्वेच्छाचारिणं । अतएवममसंनिकृष्टं मच्छय्यासक्तं । भ्रातरं सख्युत्वात् । एतादृशंसुग्रीवमुद्दिश्यक्षमस्व ॥ ५६ ॥ ति० कामवशत्वंनास्यैवेत्याह—महर्षयइति । कामे कामभोगे अनुकामोऽभिलाषोयेषांते । अतएवस्त्रीपुप्रतिबद्धमोहाः । कपिः तत्रापिराजा ॥ ५७ ॥ ति० चारित्रंरक्षितंसप्तटिसन्तःपुरगमनेन । अच्छलं छलमधर्मः । सलीलमर्थः । मित्रभावेननतुविकारेण ॥ शि० यतः चारित्रं सखाप्रबोधनीयइतिमर्यादा । त्वयारक्षितं । तत् तस्मात् । आगच्छ अन्तःप्रविश । ननुतत्प्रवेशेऽनुचितपरस्त्रीदर्शनंभविष्यतीत्यतआह— मित्रभावेनदारावलोकनं सतां अच्छलं नाघमं ॥ ६१ ॥ सी० प्रमदाभिः समं इतिच्छेदः । प्रमदाभिस्समंसुग्रीवंददर्श । ततः संरब्धतररक्ताक्षोबभूवेतिसंबन्धः ॥ ६५ ॥ इतित्रयस्त्रिंशःसर्गः ॥ ३३ ॥

[पा०] १ क. च. छ. झ. ञ. ट. यथार्थधर्मावनेक्षते. २ क. ख. ङ.—ट. विमुक्तलज्जं. ३ छ. झ. ठ. तपोभिरामाः. ४ छ. झ. ट. सखेदंमदविह्वलाक्षी. ञ. सखेलंमदविह्वलाक्षी. ५ घ. महावीर्याःकपयः. ६ ध. अथागच्छ. ७ ख. महेन्द्रवरुणोपमं. ग. महेन्द्रसदृशद्युतिं. ८ ग. झ. ट. मालाभिः. ९ क. घ. ङ. छ.—ट. समंततः. १० ग. तंदृष्ट्वाक्रोधताम्राक्षः.

रुमां तु वीरः परिरभ्य गाढं वरासनस्थो वरहेमवर्णः ॥
ददर्श सौमित्रिमदीनसत्त्वं विशालनेत्रः सुविशालनेत्रम् ॥ ६६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

चतुस्त्रिंशः सर्गः ॥ ३४ ॥

लक्ष्मणेनसुग्रीवंप्रति रामप्रत्युपकारानुद्यमहेतुमाकृतज्ञतांप्रतिपादनपूर्वकं तदकरणेरामबाणेन तस्यवालिमार्गानुसरणोक्तिः ॥ १ ॥

तमप्रतिहतं क्रुद्धं प्रविष्टं पुरुषर्षभम् ॥ सुग्रीवो लक्ष्मणं दृष्ट्वा बभूव व्यथितेन्द्रियः ॥ १ ॥
क्रुद्धं निःश्वसमानं तं प्रदीप्तमिव तेजसा ॥ भ्रातुर्व्यसनसंतप्तं दृष्ट्वा दशरथात्मजम् ॥ २ ॥
उत्पपात हरिश्रेष्ठो हित्वा सौवर्णमासनम् ॥ महान्महेन्द्रस्य यथा स्खलंकृत इव ध्वजः ॥ ३ ॥
उत्पतन्तमनूत्पेतू रुमाप्रभृतयः स्त्रियः ॥ सुग्रीवं गगने पूर्णचन्द्रं तारागणा इव ॥ ४ ॥
संरक्तनयनः श्रीमान्विचचाल कृताञ्जलिः ॥ बभूवावस्थितस्तत्र कल्पवृक्षो महानिव ॥ ५ ॥
रुमाद्वितीयं सुग्रीवं नारीमध्यगतं स्थितम् ॥ अब्रवील्लक्ष्मणः क्रुद्धः सतारं वह्निनं यथा ॥ ६ ॥
सत्त्वाभिजनसंपन्नः सानुक्रोशो जितेन्द्रियः ॥ कृतज्ञः सत्यवादी च राजा लोके महीयते ॥ ७ ॥
यस्तु राजा स्थितोऽधर्मे मित्राणामुपकारिणाम् ॥ मिथ्या प्रतिज्ञां कुरुते को नृशंसतरस्ततः ॥ ८ ॥
शतमश्वानृते हन्ति सहस्रं तु गवानृते ॥ आत्मानं स्वजनं हन्ति पुरुषः पुरुषानृते ॥ ९ ॥
पूर्वं कृतार्थो मित्राणां न तत्प्रतिकरोति यः ॥ कृतघ्नः सर्वभूतानां स वध्यः प्लवगेश्वर ॥ १० ॥
गीतोऽयं ब्रह्मणा श्लोकः सर्वलोकनमस्कृतः ॥ दृष्ट्वा कृतघ्नं क्रुद्धेन तं निबोध प्लवङ्गम ॥ ११ ॥
ब्रह्मघ्ने च सुरापे च चौरे भग्नव्रते तथा ॥ निष्कृतिर्विहिता सद्भिः कृतघ्ने नास्ति निष्कृतिः ॥ १२ ॥
अनार्यस्त्वं कृतघ्नश्च मिथ्यावादी च वानर ॥ पूर्वं कृतार्थो रामस्य न तत्प्रतिकरोषि यत् ॥ १३ ॥

रक्ताक्षश्च ॥ ६२—६६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

अथ सुग्रीवं प्रति रामसंदेशकथनं चतुस्त्रिंशे—तमप्रतिहतमित्यादि ॥ १ ॥ महेन्द्रस्य ध्वज इव उत्पपात । स्खलंकृत इत्युभयविशेषणं ॥ २—३ ॥ अनूत्पेतुः पश्चादुत्पेतुः ॥ ४ ॥ संरक्तनयनः मदेनेतिशेषः ॥ ५—७ ॥ अधर्म इति च्छेदः ॥ ८ ॥ पुरुषः अश्वानृते अश्वविषयानृते । शतं हन्ति शताश्वहननदोषभाग्भवेदित्यर्थः । एवं गवानृते गोविषयानृते । सहस्रं हन्ति सहस्रगोहननदोषभाग्भवेत् । पुरुषानृते आत्मानं स्वजनं हन्ति । आत्मस्वजनहननदोषभाग्भवेदित्यर्थः । महापुरुषरामविषयानृते तु सर्वहननदोषभाग्भवेदिति भावः ॥ ९ ॥ तत् मित्रकार्यं न प्रतिकरोति पुनर्न करोति ॥ १० ॥ ब्रह्मणा स्वायंभुवमनुना ॥ ११ ॥ निष्कृतिः प्रायश्चित्तं

रामानु० महेन्द्रस्यध्वजोयथास्वलंकृतः तथास्वलंकृतःहरिश्रेष्ठः सौवर्णमासनंहित्वा महाध्वजइवोत्पपातेतिसंबन्धः ॥ ३ ॥ ति० सचचार संमुखमाजगाम । अवस्थितोबभूवेत्यस्य लक्ष्मणइतिशेषः । कल्पवृक्षोपमयासर्वहितत्वंव्यङ्ग्यं ॥ ५ ॥ ति० प्रथममात्मानंहन्ति आत्मघातदोषभाक् । निजपुण्यलोकंनाशयतिवा । तथास्वजनस्यपित्रादेःपुण्यलोकंचनाशयति ॥ ९ ॥ ति० ब्रह्मणा हिरण्यगर्भेण । अयंश्लोकः पूर्वोक्तः । सर्वलोकनमस्कृतः ब्रह्मवदेवसर्वैस्तूयमानइत्यर्थः ॥ ११ ॥

[पा०] १ क. ङ. च.—ट. सविशाल. २ ङ. ञ. उत्पतन्तंसमुत्पेतुः. ३ क. घ.—ट. पूर्णं. ख. तूर्णं. ४ ङ.—ट. श्रीमान्संचचार. ख. श्रीमान्महलोकः. ५ ग. घ. सहस्रंच. ६ क. ग.—ट. गोघ्नेचैवसुरापे. ७ ङ. ञ. ग. चौरे.

ननु नाम कृतार्थेन त्वया रामस्य वानर ॥ सीताया मार्गणे यत्नः कर्तव्यः कृतमिच्छता ॥ १४ ॥
स त्वं ग्राम्येषु भोगेषु सक्तो मिथ्याप्रतिश्रवः ॥ न त्वां रामो विजानीते सर्पं मण्डूकराविणम् ॥१५॥
महाभागेन रामेण पापः करुणवेदिना ॥ हरीणां प्रापितो राज्यं त्वं दुरात्मा महात्मना ॥ १६ ॥
कृतं चेन्नाभिजानीषे रामस्याक्लिष्टकर्मणः ॥ सद्यस्त्वं निशितैर्बाणैर्हतो द्रक्ष्यसि वालिनम् ॥ १७ ॥
न च संकुचितः पन्था येन वाली हतो गतः ॥ समये तिष्ठ सुग्रीव मा वालिपथमन्वगाः ॥ १८ ॥
न नूनमिक्ष्वाकुवरस्य कार्मुकच्युताञ्शरान्पश्यसि वज्रसन्निभान् ॥
ततः सुखं नाम निषेवसे सुखी न रामकार्यं मनसाऽप्यवेक्षसे ॥ १९ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे चतुस्त्रिंशः सर्गः ॥ ३४ ॥

पञ्चत्रिंशः सर्गः ॥ ३५ ॥

तारया सुग्रीवायक्रुध्यतो लक्ष्मणस्य हेतूक्त्वापुनःसान्त्वनम् ॥ १ ॥

तथा ब्रुवाणं सौमित्रिं प्रदीप्तमिव तेजसा ॥ अब्रवील्लक्ष्मणं तारा ताराधिपनिभानना ॥ १ ॥
नैवं लक्ष्मण वक्तव्यो नायं परुषमर्हति ॥ हरीणामीश्वरः श्रोतुं तव वक्त्राद्विशेषतः ॥ २ ॥
नैवाकृतज्ञः सुग्रीवो न शठो नापि दारुणः ॥ नैवानृतकथो वीर न जिह्मश्च कपीश्वरः ॥ ३ ॥
उपकारं कृतं वीरो नाप्ययं विस्मृतः कपिः ॥ रामेण वीर सुग्रीवो यदन्यैर्दुष्करं रणे ॥ ४ ॥
रामप्रसादात्कीर्तिं च कपिराज्यं च शाश्वतम् ॥ प्राप्तवानिह सुग्रीवो रुमां मां च परन्तप ॥ ५ ॥
सुदुःखं शयितः पूर्वं प्राप्येदं सुखमुत्तमम् ॥ प्राप्तकालं न जानीते विश्वामित्रो यथा मुनिः ॥ ६ ॥
घृताच्यां किल संसक्तो दश वर्षाणि लक्ष्मण ॥ अहोऽमन्यत धर्मात्मा विश्वामित्रो महामुनिः ॥७॥

॥ १२—१३ ॥ कृतमिच्छता उपकारंस्मरता ॥१४॥ मण्डूकराविणं मण्डूकग्रहणार्थं मण्डूकवद्रौति तमिव वञ्चकं त्वां न जानातीत्यर्थः ॥ १५—१८ ॥ रामसन्दिष्टं वाक्यमभिधाय प्रकृतकार्योचितं स्ववाक्यमाह—न नूनमिति ॥ इक्ष्वाकुवरस्य कार्मुकच्युतान् बाणान् वज्रसन्निभान् न पश्यसि नाद्राक्षीः । नूनं ततो नाम तस्मात्खलु । सुखं निषेवसे सुखी सन् रामकार्यं मनसापि नावेक्षस इति योजना ॥१९॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने चतुस्त्रिंशःसर्गः ॥३४॥

अथ पुनस्तारया लक्ष्मणसान्त्वनं पञ्चत्रिंशे—तथा ब्रुवाणमित्यादि ॥ १ ॥ वक्तव्यः परुषमितिशेषः ॥ २ ॥ जिह्मः कुटिलः ॥ ३ ॥ विस्मृत इति कर्तरि निष्ठा । अन्यैर्दुष्करं तं उपकारं न विस्मृत इति योजना ॥ ४—६ ॥ विश्वामित्रो घृताच्यामासक्तो

ति० मण्डूकराविणं स्वगृहीतस्वमुखस्थमण्डूकशब्देनशब्दवन्तंसर्पं यथाजनोऽनवलोकनान्मण्डूकमेवजानीतेनतुसर्पं तथातव स्वरूपं रामोनाज्ञासीदितिभावः । कश्चित्तु मण्डूकग्रहणार्थंसर्पोमण्डूकवद्रौति । तेनस्वरेणस्वगणइतिविस्रब्धः स्वसमीपमागतो मण्डूकस्तेनगृह्यते । एवंवञ्चकंत्वांनाज्ञासीदित्यर्थइत्याह । तत्तुतथालोकाप्रसिद्ध्योपेक्ष्यं ॥ १५ ॥ शि० किंच समये सम्यक्शुभावहकार्येतिष्ठ कुर्वित्यर्थः ॥ १८ ॥ इतिचतुस्त्रिंशः सर्गः ॥ ३४ ॥

स० कृतमुपकारंजानातीतिकृतज्ञः सनभवतीत्यकृतज्ञः । तादृशोनैव । शठः गूढद्वेषी । अनृतकथः मृषावादी । जिह्मः कुटिलः ॥ ३ ॥ स० यत् यस्मात् । अन्यैर्दुष्करंरामेणकृतं उपकारमुद्दिश्य यंवीरःसुग्रीवः । विस्मृतः भावेक्तः । विगतंस्मृतं यस्यसतथा । विस्मरणवानितियावत् । नापि नैवभवतीत्यर्थः । अतोपिनकृतघ्नइत्यर्थः ॥ ४ ॥ ति० यद्यपि पूर्वंबालकाण्डेमेनका-

[पा०] १ ज. वस्त्वं. २ ङ. च. ज. कृतंत्वंनाभि. झ. कृतंचेन्नाति. ३ क—ट. राघवस्यमहात्मनः. ४ घ. ङ. च. ज. ञ. कार्मुकाच्युतान्. क. ग. ट. कार्मुकाच्छरांश्च्युतान्. झ. कार्मुकाच्छरांश्चतान्. ५ क. काकुत्स्थं. ६ ज. मैवं. ७ क. हरीश्वरः. ८ क. कृतंपूर्वं. ९ ख. प्रसादात्सौमित्रे. १० ङ. छ.—ञ. सुदुःखशयितः. ११ क. ङ. च. ज. ञ. मुनिर्यथा.

स हि प्राप्तं न जानीते कालं कालविदांवरः ॥ विश्वामित्रो महातेजाः किं पुनर्यः पृथग्जनः ॥ ८ ॥
देहधर्मं गतस्यास्य परिश्रान्तस्य लक्ष्मण ॥ अवितृप्तस्य कामेषु कामं क्षन्तुमिहार्हसि ॥ ९ ॥
न च रोषवशं तात गन्तुमर्हसि लक्ष्मण ॥ निश्चयार्थमविज्ञाय सहसा प्राकृतो यथा ॥ १० ॥
सत्त्वयुक्ता हि पुरुषास्त्वद्विधाः पुरुषर्षभ ॥ अविमृश्य न रोषस्य सहसा यान्ति वश्यताम् ॥ ११ ॥
प्रसादये त्वां धर्मज्ञ सुग्रीवार्थे समाहिता ॥ महान्रोषसमुत्पन्नः संरम्भस्त्यज्यतामयम् ॥ १२ ॥
रुमां मां कपिराज्यं च धनधान्यवसूनि च ॥ रामप्रियार्थं सुग्रीवस्त्यजेदिति मतिर्मम ॥ १३ ॥
समानेष्यति सुग्रीवः सीतया सह राघवम् ॥ शशाङ्कमिव रोहिण्या निहत्वा रावणं रणे ॥ १४ ॥
शतकोटिसहस्राणि लङ्कायां किल राक्षसाः ॥ अयुतानि च षट्त्रिंशत्सहस्राणि शतानि च ॥ १५ ॥
अहत्वा तांश्च दुर्धर्षान्राक्षसान्कामरूपिणः ॥ न शक्यो रावणो हन्तुं येन सा मैथिली हृता ॥ १६ ॥
ते न शक्या रणे हन्तुमसहायेन लक्ष्मण ॥ रावणः क्रूरकर्मा च सुग्रीवेण विशेषतः ॥ १७ ॥
एवमाख्यातवान्वाली स ह्यभिज्ञो हरीश्वरः ॥ आगमस्तु न मे व्यक्तः श्रवात्तस्माद्ब्रवीम्यहम् ॥ १८ ॥
त्वत्सहायनिमित्तं वै प्रेषिता हरिपुङ्गवाः ॥ आनेतुं वानरान्युद्धे सुबहून्हरियूथपान् ॥ १९ ॥
तांश्च प्रतीक्षमाणोऽयं विक्रान्तान्सुमहाबलान् ॥ राघवस्यार्थसिद्ध्यर्थं न निर्याति हरीश्वरः ॥ २० ॥

दश वर्षाणि अहोऽमन्यत दिनममन्यत । घृताचीशब्देनात्र मेनकैवोच्यते । मेनकासङ्गस्य बालकाण्डेभिधानात् ॥ ७—८ ॥ देहधर्मं गतस्य शरीरस्वभावं प्राप्तस्य । कामं कामवर्तनं ॥ ९ ॥ अपराधमङ्गीकृत्य सान्त्वयित्वा इदानीं विचार्यमाणे अपराधएव नास्तीत्याह—नचेति ॥ निश्चयार्थं निश्चयरूपमर्थं सुग्रीवाभिप्रायमिति यावत् ॥ १०—११ ॥ संरम्भः अभिनिवेशः ॥ १२ ॥ धनधान्येत्यत्र धनशब्दो हस्तिरथाश्वादिपरः । वसुशब्दो रत्नपरः ॥ १३ ॥ समानेष्यति घटयिष्यति । निहत्वेत्यत्रल्यबभाव आर्षः ॥ १४—१६ ॥ ते न शक्या इति च्छेदः । ते राक्षसाः । हन्तुं न शक्याः । रावणो विशेषेणासहायेन सुग्रीवेण हन्तुं न शक्यः ॥ १७ ॥ तर्हि रावणवृत्तान्तः सर्वोप्याख्यायतामित्यत्राह—एवमिति ॥ आगमः स्वयमवगमः । श्रवात् श्रवणात् । अत्र सुग्रीवेण युद्धाय निर्गमकाले तारयाङ्गदोक्तरामसुग्रीवसख्यकरणेमिहिते एतादृशो रावणः सुग्रीवो दुर्बलः तं कथं रामो बलम्बत इति वालिनोक्तमिति ज्ञेयं ॥ १८—२० ॥

संबन्धउक्तः । तथाप्येतद्वचनात् घृताचीसंबन्धोपितस्यज्ञेयइत्याहुः ॥ ७ ॥ ति० देहधर्माः आहारनिद्रामैथुनानि । पशुधर्मइति पाठेप्ययमेवार्थः ॥ ९ ॥ ति० कथमयंरावणंहनिष्यतीत्यत्रतत्साहाय्यकसाध्यत्वात्तद्वधस्येत्याह—शतेति । एषासंख्याविवक्षितैव दशकोटिःसमुद्रः शतकोटिर्मध्यं । मध्यानांसहस्रं तथाषष्टिसहस्राधिकत्रिलक्षाणि । तदुपरिषट्त्रिंशत्सहस्राणि । तदुपरितावन्ति शतानीत्यर्थः ॥ १५ ॥ शि० कामरूपिणइत्यनेन लङ्कायामुक्तसंख्याकराक्षसस्थित्यसंभवाभावःसूचितः ॥ तेनकार्यवशादेवतच्छरीराणांमहत्त्वमितिव्यक्तं ॥ १६ ॥ ति० तावतांवधेपरमशूरस्यापिसहायापेक्षास्तीत्याह—तेइति । यस्मादसहायेनरामेण ते हन्तुमशक्याः यस्माद्रावणश्चक्रूरकर्मा क्रूरपराक्रमः । तस्माद्विशेषतः सुग्रीवेणसहायेनप्रयोजनमस्ति । तत्समप्रतिसेनाघटनस्यसुग्रीवाधीनत्वात्सर्वेषांमनुष्याबध्यत्वाच्चेतिभावः । यत्तुतीर्थः सुग्रीवेणसहायेनतेराक्षसाहन्तुमशक्याः रावणश्चहन्तुमशक्यइत्यन्वयंकृत्वा वालीकिलोक्तवाम्रावणवधाय सुग्रीवंवृथाप्रार्थयतेरामः तस्यासावशक्यइतिकथांचकल्पयति तदपार्थकं । रामस्यसहायापेक्षासमर्थनस्यैवप्रस्तुतत्वात् ॥ १७ ॥ ति० नन्वेषारक्षस्संख्यात्वयाकथंज्ञातातत्राह—एवमिति । आगमस्तुनमेव्यक्तः रावणस्यैवंबलप्राप्तिप्रकारस्तु नमयाज्ञातः । संख्यामात्रं प्रसंगात्पूर्वंश्रुतं । तस्यश्रवणात्तन्मुखतोवाक्यश्रवणात् ॥ १८ ॥

[पा०] १ ख. ग. ङ. झ. ट. देहधर्मगतस्य. क. पशुधर्मगतस्य. २ क. ख. ङ.—ञ. रामःक्षन्तुमिहार्हति. ३ ख. रोषवशात्तात. ४ क. लोकयात्रामविज्ञाय. ५ क. सत्वयुक्ताश्च. ङ. च. ज. ञ. सत्वमन्तोहि. ६ ङ—ट. सुग्रीवार्थं. ७ झ. झ. ट. मांचाङ्गदंराज्यं. ८ छ. झ. ट. हत्वातंराक्षसाधमं. क. ङ. च. ज. ञ. हत्वातंरावणं. ग. हत्वारावणमाहवे. ९ ख.—ट. रक्षसां. १० क.—च. नशक्यंरावणं. च—ट. अशक्यंरावणं. ङ. अशक्योरावणो. ११ ङ. च. ज. नशक्यो. १२ ङ. सत्वभिज्ञः. १३ क. ख. श्रवणात्तद्ब्रवीम्यहं. ङ. च. ज. ञ. श्रवणात्तुब्रवीम्यहं. ग. छ. झ. ट. श्रवात्तस्यब्रवीम्यहं. १४ च.—ट. निमित्तंहि. १५ क. ङ.—ट. हरिपुङ्गवान्. १६ ग. तांस्तु. १७ क. सिद्ध्यर्थंनौदासीन्यंगतोहरिः.

कृताऽत्र संस्था सौमित्रे सुग्रीवेण यथा पुरा ॥ अद्य तैर्वानरैः सर्वैरागन्तव्यं महाबलैः ॥ २१ ॥
ऋक्षकोटिसहस्राणि गोलाङ्गूलशतानि च ॥ अद्य त्वामुपयास्यन्ति जहि कोपमरिन्दम ॥
कोट्योनेकास्तु काकुत्स्थ कैपीनां दीप्ततेजसाम् ॥ २२ ॥
तव हि मुखमिदं निरीक्ष्य कोपात्क्षतजनिभे नयने निरीक्षमाणाः ॥
हरिवरवनिता न यान्ति शान्तिं प्रथमभयस्य हि शङ्किताः स्म सर्वाः ॥ २३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे पञ्चत्रिंशः सर्गः ॥ ३५ ॥

षट्त्रिंशः सर्गः ॥ ३६ ॥

तारापरिसान्त्वनेन प्रसक्तमनसंलक्ष्मणंप्रतिसुग्रीवेण राममहिमप्रशंसनपूर्वकं स्वापराधक्षमापणम् ॥ १ ॥ लक्ष्मणेनापि सुग्रीवंप्रति स्वपरुषभाषणक्षमापणपूर्वकं सत्वरंरामसमीपमेत्य सान्त्वनचोदना ॥ २ ॥

इत्युक्तस्तारया वाक्यं प्रश्रितं धर्मसंहितम् ॥ मृदुस्वभावः सौमित्रिः प्रतिजग्राह तद्वचः ॥ १ ॥
तस्मिन्प्रतिगृहीते तु वाक्ये हरिगणेश्वरः ॥ लक्ष्मणात्सुमहत्त्रासं वस्त्रं क्लिन्नमिवात्यजत् ॥ २ ॥
ततः कण्ठगतं माल्यं चित्रं बहुगुणं महत् ॥ चिच्छेद विमदश्चासीत्सुग्रीवो वानरेश्वरः ॥ ३ ॥
स लक्ष्मणं भीमबलं सर्ववानरसत्तमः ॥ अब्रवीत्प्रश्रितं वाक्यं सुग्रीवः संप्रहर्षयन् ॥ ४ ॥
प्रनष्टा श्रीश्च कीर्तिश्च कपिराज्यं च शाश्वतम् ॥ रामप्रसादात्सौमित्रे पुनः प्राप्तमिदं मया ॥ ५ ॥
कः शक्तस्तस्य देवस्य ख्यातस्य स्वेन कर्मणा ॥ तादृशं विक्रमं वीर प्रतिकर्तुमरिन्दम ॥ ६ ॥
सीतां प्राप्स्यति धर्मात्मा वधिष्यति च रावणम् ॥ सहायमात्रेण मया राघवः स्वेन तेजसा ॥ ७ ॥

अत्र सीतान्वेषणकार्यविषये । सुग्रीवेण पुरा स्वदागमनात्पूर्वमेव । संस्था व्यवस्था त्रिपञ्चरात्रादूर्ध्वं नागन्तव्यमित्येवंरूपा । यथा येन प्रकारेण कृता तथा । अद्य अस्मिन्दिने । तैरागन्तव्यं ॥ २१—२२ ॥ हिशब्दः पादपूरणे । सर्वाः हरिवरवनिताः तवेदं मुखं निरीक्ष्य प्रथमभयस्य शङ्किताः वालिवधजनितभयशङ्किताः सत्यः । रोषाद्धेतोः क्षतजसमे नयने निरीक्षमाणाः शान्तिं न यान्तिहि न यान्त्येव । प्रथमभयस्य शङ्किता इति कर्मणि षष्ठी । " न लोकाव्यय—" इत्यादिना षष्ठीप्रतिषेधेपि तत्प्रयोग आर्षः ॥ २३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने पञ्चत्रिंशः सर्गः ॥ ३५ ॥

अथ लक्ष्मणसुग्रीवसौहृदभाषणं षट्त्रिंशे—इत्युक्त इत्यादि ॥ १ ॥ सुमहत्त्रासमिति " आन्महत—" इत्याकाराभाव आर्षः । क्लिन्नं आर्द्रं ॥ २ ॥ बहुगुणं बहुविधभोगप्रदं । महत् दिव्यं ॥ ३—४ ॥ इदं पूर्वोक्तं सर्वं ॥ ५ ॥ तादृशंविक्रमं प्रतिकर्तुं तादृशस्य विक्रमस्य प्रतिकर्तुमित्यर्थः ॥ ६ ॥ सहायमात्रेणमयेत्युप-

---

शि० गोलाङ्गूलशतानि अनन्तसंख्याकगोलाङ्गूलदैर्घ्यसदृशदैर्घ्यविशिष्टलाङ्गूलविशिष्टवानरविशेषाश्चेत्यर्थः ॥ २२ ॥ इति पञ्चत्रिंशः सर्गः ॥ ३५ ॥

स० धर्मसंहितंप्रश्रितंवचः अवाक्यंयथाभवतितथाप्रतिजग्राह । प्रत्युत्तरंनोक्तवानितियावत् । इतिवाक्यं उक्तः श्रावित इतिवा ॥ १ ॥ सुमहत्त्रासं अतिमहाभयं । सुमहत्त्रासमितिपाठे सुमहदितिव्यत्ययसंसदृक्षपदेनान्वेति ॥ रामानु० सुमहत् सुमहन्तं ॥ २ ॥ शि० देवस्य नित्यप्रमोदवतः ॥ ति० स्वेनकर्मणा धनुर्भङ्गवालिवधादिना । तादृशं तज्जनितोपकारसदृशं ॥ ६ ॥

[पा०] १ ङ. ञ. ट. कृतात्रसंस्था. क. ख. ग. ङ. च. ज. ञ. कृतात्रसंस्था. २ ट. वयंतैर्वानरैः. ३ ग. हरीणां. ४ ङ. च. ञ.—ट. रक्तजसमे. ५ ञ. लक्ष्मणोत्यमहत्. ६ छ. झ. ट. तादृशंप्रतिकुर्वतेऽहोनापिनृपात्मज.

सहायकृत्यं किं तस्य येन सप्त महाद्रुमाः ॥ शैलश्च वसुधा चैव बाणेनैकेन दारिताः ॥ ८ ॥
धनुर्विस्फारयाणस्य यस्य शब्देन लक्ष्मण ॥ सशैला कम्पिता भूमिः सहायैस्तस्य किंनु वै ॥ ९ ॥
अनुयात्रां नरेन्द्रस्य करिष्येऽहं नरर्षभ ॥ गच्छतो रावणं हन्तुं वैरिणं सपुरस्सरम् ॥ १० ॥
यदि किंचिदतिक्रान्तं विश्वासात्प्रणयेन वा ॥ प्रेष्यस्य क्षमितव्यं मे न कश्चिन्नापराध्यति ॥ ११ ॥
इति तस्य ब्रुवाणस्य सुग्रीवस्य महात्मनः ॥ अभवल्लक्ष्मणः प्रीतः प्रेम्णा चैवमुवाच ह ॥ १२ ॥
सर्वथा हि मम भ्राता सनाथो वानरेश्वर ॥ त्वया नाथेन सुग्रीव प्रश्रितेन विशेषतः ॥ १३ ॥
यस्ते प्रभावः सुग्रीव यच्च ते शौचमार्जवम् ॥ अर्हस्त्वं कपिराज्यस्य श्रियं भोक्तुमनुत्तमाम् ॥ १४ ॥
सहायेन च सुग्रीव त्वया रामः प्रतापवान् ॥ वधिष्यति रणे शत्रूनचिरान्नात्र संशयः ॥ १५ ॥
धर्मज्ञस्य कृतज्ञस्य संग्रामेष्वनिवर्तिनः ॥ उपपन्नं च युक्तं च सुग्रीव तव भाषितम् ॥ १६ ॥
दोषज्ञः सति सामर्थ्ये कोऽन्यो भाषितुमर्हति ॥ वर्जयित्वा मम ज्येष्ठं त्वां च वानरसत्तम ॥ १७ ॥
सदृशश्चासि रामस्य विक्रमेण बलेन च ॥ सहायो दैवतैर्दत्तश्चिराय हरिपुङ्गव ॥ १८ ॥
किं तु शीघ्रमितो वीर निष्क्राम त्वं मया सह ॥ सान्त्वय स्ववयस्यं त्वं भार्याहरणकर्शितम् ॥ १९ ॥
यच्च शोकाभिभूतस्य श्रुत्वा रामस्य भाषितम् ॥ मया त्वं परुषाण्युक्तस्तच्च त्वं क्षन्तुमर्हसि ॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे षट्त्रिंशः सर्गः ॥ ३६ ॥

लक्षणे तृतीया । स्ववमेवार्थसाधकः । अहंतु तस्यपरिकरमात्रमितिभावः ॥ ७–१० ॥ अतिक्रान्तं अतिक्रमणं । क्षमितव्यं क्षन्तव्यं ॥ ११—१५ ॥ उपपन्नं अर्हं । युक्तं युक्तियुक्तं ॥ १६ ॥ दोषज्ञः स्वदोषज्ञः । लोके हि समर्थः पुरुषः स्वदोषमपह्नुते नतुप्रकाशयति । न तथात्वमिति भावः ॥ १७—१९ ॥ स्वोक्तपरुषवा-

ति० सहायकृत्यं सहायसाध्यंकृत्यं । चेन पातालानितत्स्थदैत्याश्च ॥ ८ ॥ तनि० इदंकृतापराधस्येतिपूर्वोपदिष्टार्थस्यानुष्ठानं । किंचिदिति । अधिकातिक्रमणस्यप्रसादनेनानिवर्त्यत्वं । यदीति स्वल्पस्याप्यसंभावनाचद्योत्यते । विश्वासादिति बुद्धिपूर्वापराधव्यावृत्तिः । प्रणयेनेति अतिक्रमस्याभासत्वात् । प्रेष्यस्येति बुद्धिपूर्वकवास्तवापराधेपिक्षन्तव्यमितिव्यञ्जितं । क्षमितव्यमित्युक्त्या अक्षमणेप्रत्यवायोपिव्यञ्जितः । नकश्चिन्नापराध्यतीति विश्वासप्रणयपात्रभूतस्य स्वल्पापराधत्वेअयमपराधः सर्वत्रवर्जनीयइतिभावः । शि० प्रणयेन भृत्यविषयकस्वाभाविकस्नेहेन । क्षमितव्यं । कश्चिन्नापराध्यतीतिन । सर्वोपियत्किंचिदपराध्यतीत्यर्थः । तेनापराधंदृष्ट्वा तवक्षमायाअभावेतवभृत्यस्नेहोनिर्विषयोभविष्यतीतिव्यञ्जितं ॥ ११ ॥ शि० प्रश्रितेन स्नेहयुक्तेन । अतएवनाथेन अभिलाषप्रापकेणत्वयाममभ्राता सर्वथासनाथः अभिलाषप्रापकसहितोऽभवदितिशेषः ॥ १३ ॥ ति० शौचं इन्द्रियनिग्रहः । स० शौचं शुद्धान्तःकरणता ॥ १४ ॥ ती० दोषज्ञः विद्वान् । " विद्वान्विपश्चिद्दोषज्ञः " इत्यमरः ॥ १७ ॥ तनि० शोकाभिभूतस्येत्यनेन रामःस्वभावतःपरुषभाषणंनवक्तीतिव्यज्यते । " उच्यमानोपिपरुषंनोत्तरंप्रतिपद्यते " इतिप्रसिद्धेरितिभावः । तादृशस्यरामस्यभाषणंश्रुत्वा मयात्वमुक्तइत्यनेन उक्तानुवादस्यादोषत्वंव्यञ्जितं । तच्चेति । सूचनस्यापि यद्भवेदित्यनुवादिताप्रयुक्तमित्यर्थः ॥ अत्रेदंवेदितव्यं । कार्याभिसन्धिसद्भावेजाग्रतिस्वामिनः श्रीरामस्यसंनिधिंप्रतिगन्तव्यत्वरांविस्मृत्यभोगप्रसंगसंगेनान्यपरत्वात्समयातिलङ्घनापराधंकृतवतिमहाराजे लक्ष्मणक्रोधवेगंनिरीक्ष्य मित्रश्रेष्ठेनहनुमता " कृतापराधस्यहितेनान्यंपश्याम्यहंक्षमम् । अन्तरेणाञ्जलिंबद्ध्वालक्ष्मणस्यप्रसादनात् " इतिमहाराजायहितोपदेशेकृतेसति महाराजोपिबुध्वा " यदिकिंचिदतिक्रान्तंविश्वासात्प्रणयेनवा । प्रेष्यस्यक्षमितव्यंमेनकश्चिन्नापराध्यति " इतिकथनेनभगवद्विषयेकृतापराधेनापि भागवतक्षमापणेकृतेसतितन्मुखेन भगवानपराधान्क्षमयते ततोभगवदपचाररहितस्सन् तत्कैंकर्ययोग्योभवतीत्येनमर्थंविशदीचकार । तदनन्तरं " यच्चशोकाभिभूतस्यक्रोधाद्रामस्यभाषितम् । मयात्वंपरुषाण्युक्तस्तच्चत्वंक्षन्तुमर्हसि " इतिलक्ष्मणस्तावदात्मीयपरुषवाक्यानांशोकविवशराम-

[पा०] १ ङ.—ट. गिरिश्च. २ ङ.—ट. सहायैःकिंनुतस्य. ३ क. यात्रांतुरामस्य. ४ क. ङ. छ. झ. ट. चेदमुवाचह. च. ज. ञ. चैनमुवाचह. ५ ङ. छ. झ. ट. शौचमीदृशं. क. ग. घ. ज. ञ. शौचमुत्तमं. च. शौर्यमुत्तमं. ६ ङ. छ.—ट. सहायेन. ७ घ. सदृशश्चापि. ८ छ. झ. ट. रामेण. ९ ख. निष्क्रमस्व. १० क. ख. ग. च.—ट. स्ववयस्यंच. ११ क. ग. ङ.—ट. हरणदुःखितं. १२ ङ.—ट. स्तत्क्षमस्वसखेमम.

सप्तत्रिंशः सर्गः ॥ ३७ ॥

सुग्रीवेण हनुमन्तंप्रति सकलदिगन्तपर्यन्तावस्थितसर्ववानरनिकरसमानयनाय दूतप्रेषणचोदना ॥ १ ॥ तैस्तैर्वानरैः सुग्रीवसंदेशश्रवणमात्रेणसत्वरंस्वस्वस्थानेभ्यः सुग्रीवसमीपंप्रत्यागमनम् ॥ २ ॥ पूर्वमेवनीलप्रेषितदूतैः सुग्रीवंप्रति नानाफलमूलाद्युपायनसमर्पणपूर्वकं सर्ववानरागमननिवेदनम् ॥ ३ ॥

एवमुक्तस्तु सुग्रीवो लक्ष्मणेन महात्मना ॥ हनुमन्तं स्थितं पार्श्वे सचिवं त्विदमब्रवीत् ॥ १ ॥
महेन्द्रहिमवद्विन्ध्यकैलासशिखरेषु च ॥ मन्दरे पाण्डुशिखरे पञ्चशैलेषु ये स्थिताः ॥ २ ॥
तरुणादित्यवर्णेषु भ्राजमानेषु सर्वतः ॥ पर्वतेषु समुद्रान्ते पश्चिमायां तु ये दिशि ॥ ३ ॥
आदित्यभवने चैव गिरौ सन्ध्याभ्रसन्निभे ॥ पद्मतालवनं भीमं संश्रिता हरिपुङ्गवाः ॥ ४ ॥
अञ्जनाम्बुदसंकाशाः कुञ्जरप्रतिमौजसः ॥ अञ्जने पर्वते चैव ये वसन्ति प्लवङ्गमाः ॥ ५ ॥
मनःशिलागुहावासा वानराः कनकप्रभाः ॥ मेरुपार्श्वगताश्चैव ये धूम्रगिरिसंश्रिताः ॥ ६ ॥
तरुणादित्यवर्णाश्च पर्वते च महारुणे ॥ पिबन्तो मधु मैरेयं भीमवेगाः प्लवङ्गमाः ॥ ७ ॥
वनेषु च सुरम्येषु सुगन्धिषु महत्सु च ॥ तापसानां च रम्येषु वनान्तेषु समन्ततः ॥ ८ ॥
तांस्तान्समानय क्षिप्रं पृथिव्यां सर्ववानरान् ॥ सामदानादिभिः कल्पैराशु प्रेषय वानरान् ॥ ९ ॥
प्रेषिताः प्रथमं ये च मया दूता महाजवाः ॥ त्वरणार्थं तु भूयस्त्वं हरीन्संप्रेषयापरान् ॥ १० ॥
ये प्रसक्ताश्च कामेषु दीर्घसूत्राश्च वानराः ॥ इहानयस्व तान्सर्वाञ्शीघ्रं तु मम शासनात् ॥ ११ ॥

क्यानां रामोक्तत्वशङ्का मा भूदिति स्वेनैवोक्तत्वमुपपादयन् स्वापराधं शमयति—यच्चेति ॥ भाषितं सीतोद्देशेन श्रवणासह्यं विलापं ॥ २० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने षट्त्रिंशः सर्गः ॥ ३६ ॥

अथ सर्ववानरसमानयनं सप्तत्रिंशे—एवमित्यादि ॥ १ ॥ महेन्द्रादय एव पञ्चशैलाः । पश्चिमायां दिशि ये स्थिताः तेषु ये वानराः स्थिताइतियोजना । अस्तगिरिपर्यन्तपर्वतेष्वित्यर्थः । आदित्यभवने उदयगिरौ । पद्माः चन्दनविशेषाः मनःशिलागुहावासाः मनःशिलामयगुहावासाः । महारुणे महारुणाख्ये । यत्र यच्छब्दो नास्ति तत्राध्याहर्तव्यः । कल्पैः उपायैः । समानय तदर्थं प्रेषय ॥ २—९ ॥ प्रेषितदूतत्वरणार्थोक्तिः स्वस्य प्रकृतकार्ये पूर्वमेव सावधानतां लक्ष्मणाय द्योतयितुं ॥ १० ॥ दीर्घसूत्राः चिरक्रियाः उद्योगं कुर्वाणा इव कालयापका इत्यर्थः ॥ ११ ॥

क्रोधमवेक्ष्यतदनुरूपाणिवाक्यान्युक्तानीतिसोपाधिकत्वमुपपाद्यसोपाधिकस्वापराधनिवृत्तयेसुमित्रात्मजस्सुग्रीवंप्रसादयन्सापराधेषु श्रीवैष्णवेषुपश्चात्तापेनकृतप्रायश्चित्तेष्वपराधान्निवृत्तेषुचसत्सु सापराधत्वदशायांस्वाचरितानामपचाराणांव्युदासार्थंतेप्रसादनीया इतिशास्त्रार्थप्रकटनंकृतवानितिभावः ॥ २० ॥ इतिषट्त्रिंशः सर्गः ॥ ३६ ॥

स० पाण्डुशिखरेमन्दरे । इतिपञ्चशैलेषु ॥ २ ॥ ति० पश्चिमस्यामित्यार्षं ॥ ३ ॥ ती० आदित्योस्मिन्भवतिप्रादुर्भवतीत्यादित्यभवनमुदयाद्रिः ॥ ति० आदित्यभवनेगिरौ उदयाचलास्ताचलयोरित्यर्थः ॥ पद्माचलोगिरिविशेषः ॥ ४ ॥ ति० तापसाश्रमरम्येषु रम्यतापसाश्रमेषु । यद्वा तैरम्येष्वितिवनविशेषणं ॥ ८ ॥ ति० क्षिप्रमानयेत्युक्तेकिंमयैवगन्तव्यमित्याशङ्क्याह—सामदानादिभिरिति । आदिना दुष्टेदण्डः । कल्पैः उपायैः ॥ कतक० आनय आनाययेत्यर्थः ॥ ९ ॥ शि० दीर्घसूत्राः

[पा०] १ ङ.—ट. वचनंचेदमब्रवीत्. क. ख. सचिवंवाक्यमब्रवीत्. २ ङ.—ट. नित्यशः. क. ग. घ. सर्वशः. ३ ग. घ. पश्चिमस्यांच. क. ङ.—ट. पश्चिमस्यांतु. ४ क. च. छ. झ. ञ. ट. पद्माचलवनं. ५ घ. येश्रिताः. ६ छ. झ. ट. कुञ्जरेन्द्रमहौजसः. ७ ग. येचसन्ति. ८ क. ङ.—ट. महाशैलगुहा. ९ घ. काञ्चनप्रभाः. १० क. गतायेच ११ क. ग. ङ. च. ज.—ट. येचधूम्रगिरिंश्रिताः. छ. येचधूम्रगिरिस्थिताः. १२ क. ङ.—ट. येमहारुणे. १३ ङ.—ट. तापसाश्रमरम्येषु. १४ क. ग. छ. झ. ट. तांस्तांस्त्वमानय. १५ ङ. छ. ञ. ट. कल्पैर्वानरैर्वेगवत्तरैः. ग. कल्पैराशुप्रेरय. १६ ङ. छ. झ. ट. ज्ञाताः. १७ छ. झ. ट. संप्रेषयहरीश्वरान्. ख. ङ. च. ज. ञ. हरीन्प्रेषयचापरान्. १८ छ. झ. ट. ताञ्शीघ्रंसर्वानेवकपीश्वरान्. १९ ग. खंमम.

अहोभिर्दशभिर्ये[1] हि नागच्छन्ति ममाज्ञया ॥ हन्तव्यास्ते दुरात्मानो राजशासनदूषकाः ॥ १२ ॥
शतान्यथ सहस्राणां[2] कोट्यश्च मम शासनात् ॥ प्रयान्तु कपिसिंहानां दिशो मम[3] मते स्थिताः ॥१३॥
मेघपर्वतसंकाशाश्छादयन्त इवाम्बरम् ॥ घोररूपाः कपिश्रेष्ठा यान्तु मच्छासनादितः ॥ १४ ॥
ते गतिज्ञा गतिं गत्वा[4] पृथिव्यां सर्ववानराः ॥ आनयन्तु हरीन्सर्वांस्त्वरिताः शासनान्मम ॥ १५ ॥
तस्य वानरराजस्य श्रुत्वा वायुसुतो वचः ॥ दिक्षु सर्वासु विक्रान्तान्प्रेषयामास वानरान् ॥ १६ ॥
ते पदं विष्णुविक्रान्तं पतत्रिज्योतिरध्वगाः ॥ प्रयाताः प्रहिता राज्ञा हरयस्तत्क्षणेन[5] वै ॥ १७ ॥
ते समुद्रेषु गिरिषु वनेषु च सरस्सु च ॥ वानरा वानरान्सर्वान्रामहेतोरचोदयन् ॥ १८ ॥
मृत्युकालोपमस्याज्ञां राजराजस्य[6] वानराः ॥ सुग्रीवस्याययुः[7] श्रुत्वा सुग्रीवभयदर्शिनः[8] ॥ १९ ॥
ततस्तेऽञ्जनसंकाशा गिरेस्तस्मान्महाजवाः[9] ॥ तिस्रः कोट्यः प्लवङ्गानां निर्ययुर्यत्र राघवः ॥ २० ॥
अस्तं गच्छति यत्रार्कस्तस्मिन्गिरिवरे स्थिताः[10] ॥ तप्तहेममहाभासस्तस्मात्कोट्यो[11] दश च्युताः ॥ २१ ॥
कैलासशिखरेभ्यश्च सिंहकेसरवर्चसाम् ॥ ततः कोटिसहस्राणि वानराणामुपागमन्[12] ॥ २२ ॥
फलमूलेन जीवन्तो हिमवन्तमुपाश्रिताः ॥ तेषां कोटिसहस्राणां सहस्रं समवर्तत ॥ २३ ॥
अङ्गारकसमानानां[13] भीमानां भीमकर्मणाम् ॥ विन्ध्याद्वानरकोटीनां सहस्राण्यपतन्द्रुतम्[14] ॥ २४ ॥
क्षीरोदवेलानिलयास्तमालवनवासिनः ॥ नारिकेलाशनाश्चैव तेषां संख्या न विद्यते[15] ॥ २५ ॥
वनेभ्यो गह्वरेभ्यश्च सरिद्भ्यश्च[16] महाजवाः ॥ आगच्छद्वानरी सेना पिबन्तीव दिवाकरम् ॥ २६ ॥
ये तु त्वरयितुं याता वानराः सर्ववानरान् ॥ ते वीरा हिमवच्छैलं[17] ददृशुस्तं महाद्रुमम् ॥ २७ ॥
तस्मिन्गिरिवरे रम्ये[18] यज्ञो माहेश्वरः पुरा ॥ सर्वदेवमनस्तोषो[19] बभौ[20] दिव्यो मनोहरः ॥ २८ ॥
अन्ननिष्यन्दजातानि मूलानि च फलानि च ॥ अमृतास्वादकल्पानि[21] ददृशुस्तत्र वानराः ॥ २९ ॥
तदन्नसंभवं दिव्यं फलं[22] मूलं मनोहरम् ॥ यः कश्चित्सकृदश्नाति मासं भवति तर्पितः ॥ ३० ॥

शतानीति बहुसंख्याभिधानं लक्ष्मणाय वानरासंख्येयत्वद्योतनार्थं ॥१२—१४॥ गम्यत इति गतिः वासस्थानं । पृथिव्यां सर्वान्हरीन् आनयन्तु इति संबन्धः ॥ १५—१६ ॥ पतत्रिज्योतिरध्वगाः पक्षिनक्षत्रमार्गगाः सन्तः । विष्णुविक्रान्तं पदं आकाशं । प्रयाताः ॥ १७—१९ ॥ यत्र येन हेतुनाराघवो वर्तते ततः तस्माद्धेतोः । तस्माद्गिरेः अञ्जनगिरेः । निर्ययुः ॥ २०—२४ ॥ अत्रापतन् द्रुतमित्यनुषज्यते । संख्या न विद्यतइति उत्तरत्र संख्याकीर्तनं प्रधानाभिप्रायेण ॥२५—२६॥ तुशब्दो हनुमत्प्रेरितवानरव्यावर्तकः । नीलेन पूर्वं प्रेरिता इत्यर्थः । तेषामेव लक्ष्मणसन्निधाने समागमनं । सद्यो हनुमत्प्रेरितानां तदसंभवात् । तं

स्वभावतोविलंबेनकार्यकारिणः । तान्शीघ्रमिहानय ॥ ११ ॥ रामानु० आनेतृबहुसंख्याभिधानमानेतव्यानामसंख्यातत्वंलक्ष्मणायद्योतयितुं ॥ १३ ॥ शि० गतिज्ञाः तत्तत्स्थानाभिज्ञाः । गतिं तत्तन्निवासं । गत्वा । गतिशब्दः कर्मसाधनः ॥ १५ ॥ ति० मृत्युकालोपमस्य निग्रहविषयेइतिशेषः ॥ १९ ॥ कतक० माहेश्वरोयज्ञः महेश्वरदेवत्यः । दिव्योश्वमेधः । सर्वदेवानांमनस्तोषोयत्रसः ॥ २८ ॥ ती० अन्ननिष्यन्दजातानि होमद्रव्याज्यादिस्रवणाज्जातानि । तत्र यज्ञायतने ॥ २९ ॥ इतिसप्तत्रिंशः सर्गः ॥ ३७ ॥

[पा०] १ क. ख. ग. ङ.—ट. येंच. २ छ. ज. झ. ट. सहस्राणि. ३ छ. झ. ट. निदेशेममयेस्थिताः. ४ ग. ङ. च. ज. ञ. ज्ञात्वा. ५ छ. झ. ट. हरयस्तुक्षणेनवै. ६ घ. कपिराजस्य. ७ घ. सुग्रीवस्यवचःश्रुत्वा. ८ ङ—ट. भयशंकिताः. ९ ङ.—ट. न्महाबलाः. १० क. ग. छ. ट. रताः. ११ ङ.—ट. संतप्तहेमवर्णाभाः. १२ ङ.—ट. वानराणांसमागमन्. १३ ङ. च. ज. ञ. अङ्गारसमवर्णानां. ख. अङ्गारनिकराभाणां. १४ क. ग. ङ. च. ज. सहस्राण्यापतन्. १५ घ. शक्यते. १६ क. ग. वानराश्चमहौजस . ङ.—ट. सरिद्भ्यश्चमहाबलाः. १७ छ. ज. झ. ट. हिमवच्छैले. १८ क. ङ. च. छ. झ. ञ. ट. पुण्ये. १९ क. सर्वदेवप्रियकरो. २० ङ.—ट. बभूवसुमनोरमः. २१ क. ग. ङ—ट. अमृतस्वादुकल्पानि. २२ क. छ. झ. ट. फलमूलं.

तानि मूलानि दिव्यानि फलानि च फलाशनाः ॥ औषधानि च दिव्यानि जगृहुर्हरियूथपाः ॥३१॥
तस्माच्च यज्ञायतनात्पुष्पाणि सुरभीणि च ॥ आनिन्युर्वानरा गत्वा सुग्रीवप्रियकारणात् ॥ ३२ ॥
ते तु सर्वे हरिवराः पृथिव्यां सर्ववानरान् ॥ संचोदयित्वा त्वरिता यूथानां जग्मुरग्रतः ॥ ३३ ॥
ते तु तेन मुहूर्तेन यूथपाः शीघ्रगामिनः ॥ किष्किन्धां त्वरया प्राप्ताः सुग्रीवो यत्र वानरः ॥ ३४॥
ते गृहीत्वौषधीः सर्वाः फलं मूलं च वानराः ॥ तं प्रतिग्राहयामासुर्वचनं चेदमब्रुवन् ॥ ३५ ॥
सर्वे परिगताः शैलाः समुद्राश्च वनानि च ॥ पृथिव्यां वानराः सर्वे शासनादुपयान्ति ते ॥ ३६ ॥
एवं श्रुत्वा ततो हृष्टः सुग्रीवः प्लवगाधिपः ॥ प्रतिजग्राह तत्प्रीतस्तेषां सर्वमुपायनम् ॥ ३७ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे सप्तत्रिंशः सर्गः ॥ ३८ ॥

अष्टत्रिंशः सर्गः ॥ ३८ ॥

सुग्रीवेण सौमित्रिणासहशिबिकारोहणेन रामसमीपमेत्यतत्पादयोःप्रणामः ॥ १ ॥ रामेणपरिष्वङ्गपूर्वकंस्वाज्ञयासमुपविष्टंसुग्रीवंप्रति संग्रहेणराजनीतिप्रदर्शनपूर्वकमुद्योगसमयसंप्राप्तिनिवेदनेन स्वकार्योद्यमनचोदना ॥ २ ॥ सुग्रीवेणश्रीरामंप्रति स्वविषयकतत्प्रसादप्रशंसनपूर्वकं स्वोद्यमसूचकनानादेशसमागतासंख्येयकपिसेनासमागमननिवेदनेन तत्परितोषणम् ॥ ३ ॥

प्रतिगृह्य च तत्सर्वमुपायनमुपाहृतम् ॥ वानरान्सान्त्वयित्वा च सर्वानेव व्यसर्जयत् ॥ १ ॥
विसर्जयित्वा स हरीञ्शूरांस्तान्कृतकर्मणः ॥ मेने कृतार्थमात्मानं राघवं च महाबलम् ॥ २ ॥
स लक्ष्मणो भीमबलं सर्ववानरसत्तमम् ॥ अब्रवीत्प्रश्रितं वाक्यं सुग्रीवं संप्रहर्षयन् ॥
किष्किन्धाया विनिष्क्राम यदि ते सौम्य रोचते ॥ ३ ॥
तस्य तद्वचनं श्रुत्वा लक्ष्मणस्य सुभाषितम् ॥ सुग्रीवः परमप्रीतो वाक्यमेतदुवाच ह ॥ ४ ॥
एवं भवतु गच्छावः स्थेयं त्वच्छासने मया ॥ ५ ॥
तमेवमुक्त्वा सुग्रीवो लक्ष्मणं शुभलक्षणम् ॥ विसर्जयामास तदा तारामन्याश्च योषितः ॥ ६ ॥
एतेत्युच्चैर्हरिवरान्सुग्रीवः समुदाहरत् ॥ ७ ॥
तस्य तद्वचनं श्रुत्वा हरयः शीघ्रमाययुः ॥ बद्धाञ्जलिपुटाः सर्वे ये स्युः स्त्रीदर्शनक्षमाः ॥ ८ ॥
तानुवाच ततः प्राप्तान्राजार्कसदृशप्रभः ॥ उपस्थापयत क्षिप्रं शिबिकां मम वानराः ॥ ९ ॥
श्रुत्वा तु वचनं तस्य हरयः शीघ्रविक्रमाः ॥ समुपस्थापयामासुः शिबिकां प्रियदर्शनाम् ॥ १० ॥
तामुपस्थापितां दृष्ट्वा शिबिकां वानराधिपः ॥ लक्ष्मणारुह्यतां शीघ्रमिति सौमित्रिमब्रवीत् ॥ ११ ॥

प्रसिद्धं ॥ २७—३७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने सप्तत्रिंशः सर्गः ॥ ३७ ॥

अथ रामेण सुग्रीवसमागमोष्टत्रिंशे—प्रतिगृह्येत्यादि ॥ उपायनं उपदां ॥ १—६ ॥ एत आगच्छत ॥ ७—११ ॥—

ति० विनिष्क्रामेति । प्रार्थनेलोट् ॥ ३ ॥

[पा०] १ ग. ददृशुः. २ झ. हरिपुङ्गवाः. ३ ग. तस्मात्सु. ४ ग. र्वानरश्रेष्ठाः. ५ क.—ट. त्वरितं. क. ङ. च. ज. ञ. त्वरितंयूथपाः. ग. त्वरितमागच्छन्नप्रतस्तदा. ६ च. तेनतेनमुहूर्तेन. ७ ङ. च. झ. ञ. ट. कपयःशीघ्रचारिणः. ८ घ. ङ. छ.—ट. फलमूलंच. ग. फलमूलानि. ९ ङ.—ट. परिहृताः. १० ज. परितश्चवनानिच. ङ. च. छ. झ. ञ. ट. सरितश्चवनानिच. ११ क. तच्छ्रुत्वातुततो. ख. एतच्छ्रुत्वावचोहृष्टः. ञ. पूर्वंश्रुत्वा. १२ ग. घ. छ. झ. ट. जग्राहचप्रीतः. क. च. ज. ञ. जग्राहसुप्रीतः. १३ घ. किष्किन्धातोऽभि. १४ ग. ङ—ज. ट. विनिष्क्रामो. १५ ङ.—ट. गच्छामः. १६ ङ. छ. झ. ञ. ठ. ताराद्याश्चैव. १७ छ. झ. ट. एहीत्युच्चैः. १८ ग. घ. हरिवरःसुग्रीवः. १९ घ. येच. २० घ. शीघ्रंसौमित्रिमिदमब्रवीत्.

इत्युक्त्वा काञ्चनं यानं सुग्रीवः सूर्यसन्निभम् ॥ हरिभिर्हरिपर्युक्तमारुरोह सलक्ष्मणः ॥ १२ ॥
पाण्डुरेणातपत्रेण ध्रियमाणेन मूर्धनि ॥ शुक्लैश्च वालव्यजनैर्धूयमानैः समन्ततः ॥ १३ ॥
शङ्खभेरीनिनादैश्च हरिभिश्चाभिनन्दितः ॥ निर्ययौ प्राप्य सुग्रीवो राज्यश्रियमनुत्तमाम् ॥ १४ ॥
स वानरशतैस्तीक्ष्णैर्बहुभिः शस्त्रपाणिभिः ॥ परिकीर्णो ययौ तत्र यत्र रामो व्यवस्थितः ॥ १५ ॥
स तं देशमनुप्राप्य श्रेष्ठं रामनिषेवितम् ॥ अवातरन्महातेजाः शिबिकायाः सलक्ष्मणः ॥ १६ ॥
आसाद्य च ततो रामं कृताञ्जलिपुटोऽभवत् ॥ कृताञ्जलौ स्थिते तस्मिन्वानराश्चाभवंस्तथा ॥ १७ ॥
तटाकमिव तेदृष्ट्वा रामः कुड्मलपङ्कजम् ॥ वानराणां महत्सैन्यं सुग्रीवे प्रीतिमानभूत् ॥ १८ ॥
पादयोः पतितं मूर्ध्ना समुत्थाप्य हरीश्वरम् ॥ प्रेम्णा च बहुमानाच्च राघवः परिषस्वजे ॥ १९ ॥
परिष्वज्य च धर्मात्मा निषीदेति ततोऽब्रवीत् ॥ तं निषण्णं ततो दृष्ट्वा क्षितौ रामोऽब्रवीद्वचः ॥ २० ॥
धर्ममर्थं च कामं च यस्तु काले निषेवते ॥ विभज्य सततं वीर स राजा हरिसत्तम ॥ २१ ॥
हित्वा धर्मं तथार्थं च कामं यस्तु निषेवते ॥ स वृक्षाग्रे यथा सुप्तः पतितः प्रतिबुध्यते ॥ २२ ॥
अमित्राणां वधे युक्तो मित्राणां संग्रहे रतः ॥ त्रिवर्गफलभोक्ता तु राजा धर्मेण युज्यते ॥ २३ ॥
उद्योगसमयस्त्वेष प्राप्तः शत्रुविनाशन ॥ संचिन्त्यतां हि पिङ्गेश हरिभिः सह मन्त्रिभिः ॥ २४ ॥
एवमुक्तस्तु सुग्रीवो रामं वचनमब्रवीत् ॥ २५ ॥
प्रनष्टा श्रीश्च कीर्तिश्च कपिराज्यं च शाश्वतम् ॥ त्वत्प्रसादान्महाबाहो पुनः प्राप्तमिदं मया ॥
तव देव प्रसादाच्च भ्रातुश्च जयतां वर ॥ २६ ॥
कृतं न प्रतिकुर्याद्यः पुरुषाणां स दूषकः ॥ २७ ॥
एते वानरमुख्याश्च शतशः शत्रुसूदन ॥ प्राप्ताश्चादाय बलिनः पृथिव्यां सर्ववानरान् ॥ २८ ॥
ऋक्षाश्चावहिताः शूरा गोलाङ्गूलाश्च राघव ॥ कान्तारवनदुर्गाणामभिज्ञा घोरदर्शनाः ॥ २९ ॥
देवगन्धर्वपुत्राश्च वानराः कामरूपिणः ॥ स्वैः स्वैः परिवृताः सैन्यैर्वर्तन्ते पथि राघव ॥ ३० ॥

हरिभिः वाहकहरिभिः ॥ १२—१६ ॥ तथाऽभवन् कृताञ्जलिपुटा अभवन् ॥ १७—१८ ॥ पूर्वं दूराद्-ञ्जलिः कृतः संप्रति समीपे पादयोः पतनं ॥ १९—२२ ॥ त्रिवर्गफलभोक्ता यथाकालं धर्मार्थकामरूप-फलभोक्ता । अयथाकालानुष्ठानवैषम्यं द्योतयति तुशब्दः । धर्मेण राजधर्मेण ॥ २३—२५ ॥ प्रनष्टे-त्यादिसार्धश्लोकमेकं वाक्यं । देव त्वत्प्रसादात्तवभ्रातुः प्रसादाच्च कपिराज्यादिकं पुनश्च प्राप्तं ॥ २६—२७ ॥ आदाय आहूय ॥ २८—३० ॥—

स० एत आगच्छत । इत्युक्तेःसमुदाहरत् । लक्ष्मणसंवादकालेदूरस्थत्वादितिभावः ॥ ति० इहि एतेत्यर्थः ॥ ति० क्षीदर्श-नक्षमाः क्षीसमूहेपिराजदर्शनक्षमाः । अत्यासाद्इतियावत् ॥ स० क्षीदर्शनक्षमाइत्यनेन तारादिविसर्जननैतदर्थनाभावार्थं किंतुरामं प्रतिमननार्थमेवेतिसूचयति ॥ स० राज्यश्रियंप्राप्यनिर्ययौ । अनेन नपूर्वमनुर्मिर्जगामेतिसूचयति ॥ १४ ॥ ति० वानरा-श्चतथाभवन् कृताञ्जलिपुटाअभवन्नित्यर्थः ॥ १७ ॥ ति० आद्यादृक्कलात्तटाकोपमा । तदुपमेयं वानराणांमहत्सैन्यं ॥ स० कुड्मलपङ्कजं कुड्मलात्मकानिपङ्कजानियस्मिंस्तादृशतटाकमिवस्थितंतत्सैन्यंदृष्ट्वासुग्रीवेप्रीतिमानभूत् । निश्शब्दत्वात्तटाकसाम्यो-क्तिः । संपुटाकारत्वात्कुड्मलपङ्कजमित्युक्तिः ॥ १८ ॥ ति० वृक्षाग्रेसुप्तःपतितःसन्यथाप्रतिबुध्यते तथाकामपरोराज्यभ्रष्टः सन्प्रतिबुध्यतइत्यर्थः ॥ २२ ॥ शि० कृतमुपकारंयोनप्रतिकुर्यात् सपुरुषाणांमहात्मनांदूषकः महात्मविघातदोषंलभतइत्यर्थः ॥ ति० पुरुषाणांमध्येसएवदूषकः धर्मनाशकइत्यर्थः ॥ २७ ॥

[पा०] १ ङ.—ट. बहुभिः. ग. महद्भिः. २ घ. ङ.—ट. बन्दिभिश्चाभि. ३ घ. शतैर्भीमैः. ४ ग. आसाद्यतु. ५ ग. घ. ङ. छ.—ट. तंदृष्ट्वा. च. संदृष्ट्वा. ६ ङ. ज.—ट. निषण्णंतं. ७ ङ. घ. ज.—ट. रामोऽब्रवीत्तत .ग. रामस्ततोऽब्रवीत्. ८ क. ग. ङ. च. ज.—ट. कालेयस्तु. ९ ख. ततोर्थंच. १० क. पतत्रप्रतिबुध्यते. ११ ग. झ. ट. मोक्षाच. १२ ङ.—ट. शत्रुनिषूदन. ख. शत्रुनिबर्हण. १३ छ. झ ट. पुरुषाणांहि. १४ ग. छ. झ. ट. ऋक्षाश्चवानराः. ख. ऋक्षाश्चवानराघोराः. ङ. घ. ज. ञ. ऋक्षाश्चसहिताः. क. घ. ऋक्षाश्चावाहिताः.

शतैः शतसहस्रैश्च कोटिभिश्च प्लवङ्गमाः ॥ अयुतैश्चावृता वीराः शङ्कुभिश्च परन्तप ॥ ३१ ॥
अर्बुदैरर्बुदशतैर्मध्यैश्चान्तैश्च वानराः ॥ समुद्रैश्च परार्धैश्च हरयो हरियूथपाः ॥ ३२ ॥
आगमिष्यन्ति ते राजन्महेन्द्रसमविक्रमाः ॥ मेरुमन्दरसंकाशा विन्ध्यमेरुकृतालयाः ॥ ३३ ॥
ते त्वामभिगमिष्यन्ति राक्षसं ये सबान्धवम् ॥ निहत्य रावणं संख्ये ह्यानयिष्यन्ति मैथिलीम् ॥३४॥
ततस्समुद्योगमवेक्ष्य बुद्धिमान्हरिप्रवीरस्य निदेशवर्तिनः ॥
बभूव हर्षाद्वसुधाधिपात्मजः प्रबुद्धनीलोत्पलतुल्यदर्शनः ॥ ३५ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे अष्टत्रिंशः सर्गः ॥ ३८ ॥

एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

रामसुग्रीवयोर्मिथः सहर्षसंभाषमाणयोःसतोः शतसहस्रमयुतैरनेकैर्वानरसेनापतिभिः नानादेशलिपिवासिभिर्नानाजातिसंस्थाबलवर्णविशिष्टैरणीतलचालकलिजचरणाभिघातसमुत्थितरेणुभिः सूर्यच्छायामाच्छादयद्भिः स्वसैन्यैःसह रामसुग्रीवसमीपमेत्यचरणप्रणामः ॥ १ ॥

इति ब्रुवाणं सुग्रीवं रामो धर्मभृतां वरः ॥ बाहुभ्यां संपरिष्वज्य प्रत्युवाच कृताञ्जलिम् ॥ १ ॥
यदिन्द्रो वर्षते वर्षं न तच्चित्रं भवेत्क्वचित् ॥ आदित्यो वा सहस्रांशुः कुर्याद्विततिमिरं नभः ॥ २ ॥
चन्द्रमा रश्मिभिः कुर्यात्पृथिवीं सौम्य निर्मलाम् ॥ त्वद्विधो वाऽपि मित्राणां प्रतिकुर्यात्परंतप ॥३॥
एवं त्वयि न तच्चित्रं भवेद्यत्सौम्य शोभनम् ॥ जानाम्यहं त्वां सुग्रीव सततं प्रियवादिनम् ॥ ४ ॥
त्वत्सनाथः सखे संख्ये जेतास्मि सकलानरीन् ॥ त्वमेव मे सुहृन्मित्रं साहाय्यं कर्तुमर्हसि ॥ ५ ॥

शतैरित्यादि । अत्र केचित्पदमध्याहर्तव्यं । केचित् प्लवङ्गमाः शतैः कपिशतैः । आवृता आगमिष्यन्ति । केचिच्छतसहस्रैरावृता आगमिष्यन्ति । केचित्कोटिभिरावृता आगमिष्यन्ति केचिदयुतैरावृता आगमिष्यन्ति । केचिच्छङ्कुभिः । केचिदर्बुदैः । केचिन्मध्यैः । केचिदन्तैरावृता आगमिष्यन्ति । केचिद्धरयः समुद्रैरावृता आगमिष्यन्ति । केचित्परार्धैरावृता आगमिष्यन्तीति योजना । संख्यालक्षणमुक्तं ज्योतिःशास्त्रे—" एकं दशशतमस्मात्सहस्रमयुतं ततः परं लक्षम् । प्रयुतं कोटिमथार्बुदमब्दे खर्वं निखर्वं च ॥ तस्मान्महासरोजं शङ्कुं सरितांपतिं खन्तम् । मध्यं परार्धमाहुर्यथोत्तरं दशगुणं तथा ज्ञेयं ॥ हरियूथपा इत्येतत्प्रथमान्तविशेषणत्वेन सर्वत्र संबध्यते ॥ ३१—३४ ॥ प्रबुद्धनीलोत्पलतुल्यदर्शनः विकसितनीलोत्पलदर्शनीयवर्णः ॥ ३५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने अष्टत्रिंशः सर्गः ॥ ३८ ॥

अथ सर्ववानरसेनासमागम एकोनचत्वारिंशे—इति ब्रुवाणमित्यादि ॥ १ ॥ त्वद्विधः त्वादृशः सत्पुरुषः । मित्राणां प्रतिकुर्यात् प्रत्युपकारं कुर्यात् । न तच्चित्रमिति संबन्धः । शोभनं प्रत्युपकाररूपं । सुहृत्

सी० शतसहस्रलक्षं । शतलक्षंकोटिः । अयुतं दशसहस्रं । कोटिलक्षं शङ्कुः । शङ्कुसहस्रमर्बुदं । अर्बुदादशगुणंमध्यं । अस्मादशगुणोन्तः । अस्मादष्टादशगुणःसमुद्रः । अस्मात्त्रिंशद्गुणःपरार्धः ॥ ३१ ॥ ३२ ॥ इत्यष्टत्रिंशःसर्गः ॥ ३८ ॥

[पा०] १ छ. झ. ट. वर्तन्तेकोटिभिस्तथा. २ क. अर्बुदैर्न्यर्बुदशतैः. ३ छ. झ. समुद्राश्चपरार्धाश्च. ४ ग. हरिभिर्हरि. क. येचान्येहरि. ५ क.—ट. मेघपर्वतसंकाशामेहविन्ध्यकृतालयाः. ६ ग. ज. त्वामनु. ७ छ. झ. राक्षसंयोद्धुमाहवे. ८ छ. झ. ट. युद्धे. ९ क.—ट. ततस्समुद्योगं. १० च.—ट. वीर्यवान्. ११ क. च. ज. नीलोत्पलदर्शनस्तदा. १२ क.—ट. भविष्यति. क. ग. भवेद्भुवि. १३ क. छ. झ. ट. रजनीकुर्यात्प्रभयासौम्य. १४ क. ग. छ. झ. ट. प्रीतिंकुर्यात्. १५ क. एतत्त्वयि. १६ ग. निर्मलं. १७ त्वमेवमेइत्यर्धस्थाने क. पाठे. त्वंमेभ्रातासखाचत्वंप्रियःसौम्यसुहृत्वमे । त्वंमेसुग्रीववैदेह्या साहाय्यंकर्तुमर्हसि । इत्येकःश्लोकोदृश्यते.

जहारात्मविनाशाय [1]वैदेहीं [2]राक्षसाधमः ॥ वञ्चयित्वा तु पौलोमीमनुह्लादो यथा [3]शचीम् ॥ ६ ॥
[4]नचिरात्तं [5]हनिष्यामि रावणं निशितैः शरैः ॥ पौलोम्याः पितरं दृप्तं शतक्रतुरिवाहवे ॥ ७ ॥
एतस्मिन्नन्तरे [6]चैव रजः समभिवर्तत ॥ [7]उष्णां तीव्रां सहस्रांशोश्छादयद्गगने प्रभाम् ॥ ८ ॥
दिशः पर्याकुलाश्चासन्रजसा तेन [8]मूर्छता ॥ चचाल च मही सर्वा सशैलवनकानना ॥ ९ ॥
ततो नगेन्द्रसंकाशैस्तीक्ष्णदंष्ट्रैर्महाबलैः ॥ कृत्स्ना [9]संछादिता भूमिरसंख्येयैः प्लवङ्गमैः ॥ १० ॥
निमेषान्तरमात्रेण ततस्तैर्हरियूथपैः ॥ कोटी[10]शतपरीवारैः [11]कामरूपिभिरावृता ॥ ११ ॥
नादेयैः [12]पार्वतीयैश्च सामुद्रैश्च महाबलैः ॥ हरिभिर्मेघ[13]निर्ह्रादैरन्यैश्च [14]वनचारिभिः ॥ १२ ॥
तरुणादित्यवर्णैश्च शशिगौरैश्च वानरैः ॥ पद्मकेसरवर्णैश्च श्वेतैर्मेरु[15]कृतालयैः ॥ १३ ॥
कोटी[16]सहस्रैर्दशभिः श्रीमान्परिवृतस्तदा ॥ वीरः शतबलिर्नाम वानरः प्रत्यदृश्यत ॥ १४ ॥
ततः काञ्चनशैलाभस्ताराया वीर्यवान्पिता ॥ [17]अनेकैर्दशसाहस्रैः कोटिभिः प्रत्यदृश्यत ॥ १५ ॥
[18]तथापरेण कोटीनां सहस्रेण समन्वितः ॥ पिता रुमायाः संप्राप्तः सुग्रीवश्वशुरो विभुः ॥ १६ ॥
पद्मकेसरसंकाशस्तरुणार्कनिभाननः ॥ बुद्धिमान्वानरश्रेष्ठः सर्ववानरसत्तमः ॥ १७ ॥
अनीकैर्बहुसाहस्रैर्वानराणां समन्वितः ॥ पिता हनुमतः श्रीमान्केसरी प्रत्यदृश्यत ॥ १८ ॥
[19]गोलाङ्गूलमहाराजो गवाक्षो भीमविक्रमः ॥ वृतः कोटि[20]सहस्रेण वानराणामदृश्यत ॥ १९ ॥
ऋक्षाणां भीमवेगानां धूम्रः शत्रुनिबर्हणः ॥ वृतः कोटिसहस्राभ्यां द्वाभ्यां समभिवर्तत ॥ २० ॥
[21]महाचलनिभैर्घोरैः पनसो नाम यूथपः ॥ आजगाम [22]महावीर्यस्तिसृभिः कोटिभिर्वृतः ॥ २१ ॥
नीलाञ्जनचयाकारो नीलो [23]नामाथ यूथपः ॥ अदृश्यत महाकायः कोटिभिर्दशभिर्वृतः ॥ २२ ॥
ततः काञ्चनशैलाभो गवयो नाम यूथपः ॥ आजगाम महावीर्यः [24]कोटिभिः पञ्चभिर्वृतः ॥ २३ ॥

शोभनहृदयः ॥ २—५ ॥ जहारेति इन्द्रेण ईप्सितां पौलोमीं तत्पितुः पुलोमस्यानुमत्यानुह्लादो जहार । इन्द्रस्त्वनुमन्तारं पुलोमं हत्वा तां पुनरानीयोदवहदिति पौराणिकी कथा ज्ञेया ॥ ६—७ ॥ समभिवर्तत समभ्यवर्तत । मूर्छता व्याप्नुवता ॥ ८—९ ॥ अथ सेनासमुदायव्याप्तिमाह—तत इति ॥ ततः रजोव्याप्त्यनन्तरं ॥ १० ॥ ततः सेनासमुदायव्याप्त्यनन्तरं । नादेयैः नदीतीरवनभवैः । पार्वतीयैः पर्वतोत्पन्नैः । वनचारिभिः आवृतेति पूर्वेणान्वयः ॥ ११—१४ ॥ तारायाः पिता सुषेणः ॥१५॥ रुमायाः पिता तारः ॥ १६—२० ॥ कोटिभिः कोटिसंख्याकैः ॥ २१—

ति० य आत्मविनाशायमैथिलींजहार मारीचेनमांवञ्चयित्वा तंनचिरात् शीघ्रं । अरिहा इन्द्रइववधिष्यामि । पौलोम्याःपितरमिवेत्यनेन रावणकृतोजानक्यतिक्रमाभावःसूचितः ॥ ६ ॥ स० शशिगौरैः चन्द्रवद्धवलैः । तस्यापिकलङ्कित्वात्तदपेक्षयाधावल्यंवक्तुंश्वेतैरित्युक्तं ॥ ति० हेमा हेमाचलः ॥ १३ ॥ शि० महाबलनिभैः महाबलेनप्रकाशमानैः ॥ २१ ॥ रामानु० सुग्रीवंसमुपस्थितमितिपाठः ॥ शि० दरीमुखोयूथपः सुग्रीवसमुपस्थितःसन् अभ्याययौ ॥ २३ ॥

[पा०] १ ग. छ. झ. ट. मैथिलीं. २ च. ज. ञ. दिवि. ३ ख. अचिरात्तं. ४ क. ख. ग. ङ.—ट. वधिष्यामि. ५ क. ग.—ज. ञ. ट. रिवारिहा. ६ ग. भीमंरजः. ७ घ.—ञ. उष्णंतीव्रं. झ. उष्णतीव्रां. ८ छ. झ. ट. श्वासंस्तमसातेन. ९ ग. घ.—झ. मूर्च्छिताः. १० घ. वसुमती. ११ ङ. च. ज. ञ. शतवृतैश्चान्यैः. ख. शतवृतैश्चैवप्रच्छन्नाकामरूपिभिः. १२ छ. झ. ट. वानरैर्हरियूथपैः. १३ क. ग. च.—ट. पार्वतेयैश्च. १४ ग. मेघसंकाशैर्ऋक्षैश्च. घ. मेघसंकाशैरन्यैश्च. १५ क. ख. ग. ङ.—ठ. वनवासिभिः. १६ छ. झ. ट. हेमकृतालयैः. १७ ग. सहस्रैर्बहुभिः. १८ ङ.—ट. अनेकैर्बहुसाहस्रैः. १९ ग. तथाशतेन. २० घ. श्वशुरःप्रभुः. ख. श्वशुरोमहान्. २१ ङ. च. ज. ञ. गोलाङ्गूलाधिपःश्रीमान्. ग. गोलाङ्गूलोमहावीर्यः. २२ ग. कोटिसहस्राणांशतेनसमदृश्यत. २३ ङ. छ.—ट. महाबलनिभैः. २४ ग. महावीर्यःपञ्चभिः. २५ ङ.—ट. नामैषयूथपः. ख. नामाथवीर्यवान्. २६ क. घ. पञ्चभिःकोटिभिः.

दरीमुखश्च बलवान्यूथपोभ्याययौ तदा ॥ वृतः कोटिसहस्रेण सुग्रीवं समुपस्थितः ॥ २४ ॥
मैन्दश्च द्विविदश्चोभावश्विपुत्रौ महाबलौ ॥ कोटिकोटिसहस्रेण वानराणामदृश्यताम् ॥ २५ ॥
गजश्च बलवान्वीरः कोटिभिस्तिसृभिर्वृतः ॥ आजगाम महातेजाः सुग्रीवस्य समीपतः ॥ २६ ॥
ऋक्षराजो महातेजा जाम्बवान्नाम नामतः ॥ कोटिभिर्दशभिः प्राप्तः सुग्रीवस्य वशे स्थितः ॥ २७ ॥
रुमण्वान्नाम विक्रान्तो वानरो वानरेश्वरम् ॥ आययौ बलवांस्तूर्णं कोटीशतसमावृतः ॥ २८ ॥
ततः कोटिसहस्राणां सहस्रेण शतेन च ॥ पृष्ठतोऽनुगतः प्राप्तो हरिभिर्गन्धमादनः ॥ २९ ॥
ततः पद्मसहस्रेण वृतः शङ्कुशतेन च ॥ युवराजोङ्गदः प्राप्तः पितृतुल्यपराक्रमः ॥ ३० ॥
ततस्ताराद्युतिस्तारो हरिर्भीमपराक्रमः ॥ पञ्चभिर्हरिकोटीभिर्दूरतः प्रत्यदृश्यत ॥ ३१ ॥
इन्द्रजानुः कपिर्वीरो यूथपः प्रत्यदृश्यत ॥ एकादशानां कोटीनामीश्वरस्तैश्च संवृतः ॥ ३२ ॥
ततो रम्भस्त्वनुप्राप्तस्तरुणादित्यसन्निभः ॥ अयुतेनावृतश्चैव सहस्रेण शतेन च ॥ ३३ ॥
ततो यूथपतिर्वीरो दुर्मुखो नाम वानरः ॥ प्रत्यदृश्यत कोटिभ्यां द्वाभ्यां परिवृतो बली ॥ ३४ ॥
कैलासशिखराकारैर्वानरैर्भीमविक्रमैः ॥ वृतः कोटिसहस्रेण हनुमान्प्रत्यदृश्यत ॥ ३५ ॥
नलश्चापि महावीर्यः संवृतो द्रुमवासिभिः ॥ कोटीशतेन संप्राप्तः सहस्रेण शतेन च ॥ ३६ ॥
ततो दधिमुखः श्रीमान्कोटिभिर्दशभिर्वृतः ॥ संप्राप्तोभिमतस्तस्य सुग्रीवस्य महात्मनः ॥ ३७ ॥
शरभः कुमुदो वह्निर्वानरो रंह एव च ॥ एते चान्ये च बहवो वानराः कामरूपिणः ॥ ३८ ॥
आवृत्य पृथिवीं सर्वां पर्वतांश्च वनानि च ॥ यूथपाः समनुप्राप्तास्तेषां संख्या न विद्यते ॥ ३९ ॥
आगताश्च विशिष्टाश्च पृथिव्यां सर्ववानराः ॥ ४० ॥
आप्लवन्तः प्लवन्तश्च गर्जन्तश्च प्लवङ्गमाः ॥ अभ्यवर्तन्त सुग्रीवं सूर्यमभ्रगणा इव ॥ ४१ ॥
कुर्वाणा बहुशब्दांश्च प्रहृष्टा बाहुशालिनः ॥ शिरोभिर्वानरेन्द्राय सुग्रीवाय न्यवेदयन् ॥ ४२ ॥

२३ ॥ सुग्रीवं समुपस्थितः प्राप्तः ॥ २४ ॥ अदृश्यतां अदृश्येतां ॥ २५—२७ ॥ रुमण्वान्नाम विक्रान्तो वानरो वानरेश्वरमाययौ ॥ २८—३० ॥ ताराद्युतिः नक्षत्रतुल्यप्रभः । तारः रुमायाः पितुरन्योयं ॥ ३१—३४ ॥ कोटिसहस्रेणोपलक्षितैर्वानरैर्वृत इति संबन्धः ॥ ३५ ॥ कोटिशतेनेत्याद्युपलक्षणे तृतीया ॥ ३६—३९ ॥ पृथिव्यां विशिष्टाश्च अप्राकृताः । देवयोनय इत्यर्थः । सर्ववानराश्च प्राकृतवानराश्च । आगता एव ॥ ४० ॥ आप्लवन्तः लङ्घयन्तः । अभ्रगणाः मेघगणाः ॥ ४१ ॥ न्यवेदयन् आत्मानमिति

शि० कोटिसहस्राणांवानराणां शतेनसहस्रेण लक्षेणेत्यर्थः । वृतः । पृष्ठतोनुगतः पश्चाच्चलितः । किंच पृष्ठतोनुगताअनुचरा यस्यसगन्धमादनः प्राप्तः ॥ २९ ॥ शि० आप्लवन्तः वृक्षादीन्समुल्लङ्घयन्तः । प्लवन्तः शाखादीनुल्लङ्घयन्तः ॥ ३१ ॥ ति० शिरोभिर्न्यवेदयन् बहुसंमर्दाद्दूरेस्थित्वानमस्कारेणैवात्मानंन्यवेदयन्नित्यर्थः । स० न्यवेदयन् स्वनामोत्कीर्तनपूर्वकंस्वरूपंनिवेदितवन्तः ॥ ३२ ॥ ति० धर्मज्ञः राजधर्मज्ञः ॥ ३३ ॥ ति० योबलज्ञः बलतत्त्वज्ञः । प्रतिपत्तुं कआगतः कोनागत इतिज्ञातुं । ईष्टे ईशोभवेत् । लिङर्थेलट् ॥ ३५ ॥ इत्येकोनचत्वारिंशः सर्गः ॥ ३९ ॥

[पा०] १ घ. दधीमुखश्च. २ ङ.—ट. समवस्थितः. ३ क. ग. ङ.—ट. वीरस्तिसृभिःकोटिभिः. ४ ङ.—ट. दशभिर्व्याप्तः. ५ छ. झ. ञ. रुमणोनामतेजस्वीविक्रान्तैर्वानरैर्वृतः. ङ. च. ज. रुमण्वान्नामतेजस्वीविक्रान्तैर्वानरैर्वृतः. ट. रुमण्वान्नामतेजस्वीविक्रान्तोवानरेश्वरं. ६ घ. वानरेश्वरः. ७ च.—ट. आगतोबलवान्. ८ ख. घ. समन्वितः. ९ क. ङ.—ट. पितुस्तुल्य. १० क. ङ.—ट. हरिभिर्भीमविक्रमैः. ११ ङ. झ. ञ. ट. पर्यदृश्यत. १२ ङ.—ज. ट. इन्द्रभानुः. १३ ज. मीश्वरैस्तैः. ख. घ. मीश्वरस्तैःसमावृतः. १४ ग. रंभश्चसंप्राप्तः. १५ ङ. च. ज. ञ. संवृतःशैलवासिभिः. १६ ग. घ. तथा. १७ छ. झ. दरीमुखः. १८ ग. संप्राप्तोमातुलस्तस्य. छ. झ. ट. संप्राप्तोऽभिनदंस्तस्य. क. ङ. च. ज. संप्राप्तोऽभिरतस्तस्य. म संप्राप्तोहरिभिस्तस्य. १९ ग. ङ.—ट. प्राप्तायेषां. २० क. ङ.—ट. आगताश्चनिविष्टाश्च. घ. आगताश्चावशिष्टाये. ग. आगताविनिविष्टाश्च. २१ क. बहुशःशब्दान्. २२ छ. झ. प्रकृष्टाबाहुशालिनः. ट. प्रकृष्टबलशालिनः. ख. प्रहृष्टाबलशालिनः.

अपरे वानरश्रेष्ठाः संयम्य च यथोचितम् ॥ सुग्रीवेण समागम्य स्थिताः प्राञ्जलयस्तदा ॥ ४३ ॥
सुग्रीवस्त्वरितो रामे सर्वांस्तान्वानरर्षभान् ॥ निवेदयित्वा धर्मज्ञः स्थितः प्राञ्जलिरब्रवीत् ॥ ४४ ॥
यथासुखं पर्वतनिर्झरेषु वनेषु सर्वेषु च वानरेन्द्राः ॥
निवेशयित्वा विधिवद्बलानि बलं बलज्ञः प्रतिपत्तुमीष्टे ॥ ४५ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

चत्वारिंशः सर्गः ॥ ४० ॥

सुग्रीवेण रामाज्ञयाविनतनामकसेनापतिंप्रति प्राच्यांदिशिसूर्यसंचारार्हदेशावधि तत्तत्स्थलीयविशेषनिवेदनपूर्वकं तत्र-तत्रस्वसैन्यैःसहसीतान्वेषणचोदनेनसह मासातिक्रमेदण्ड्यत्वोक्तिः ॥ १ ॥

अथ राजा समृद्धार्थः सुग्रीवः प्लवगेश्वरः ॥ उवाच नरशार्दूलं रामं परबलार्दनम् ॥ १ ॥
आगता विनिविष्टाश्च बलिनः कामरूपिणः ॥ वानरा वारणेन्द्राभा ये मद्विषयवासिनः ॥ २ ॥
त इमे बहुविक्रान्तैर्हरिभिर्भीमविक्रमैः ॥ आगता वानरा घोरा दैत्यदानवसन्निभाः ॥ ३ ॥
ख्यातकर्मापदानाश्च बलवन्तो जितक्लमाः ॥ पराक्रमेषु विख्याता व्यवसायेषु चोत्तमाः ॥ ४ ॥
पृथिव्यम्बुचरा राम नानानगनिवासिनः ॥ कोट्यग्रश इमे प्राप्ता वानरास्तव किङ्कराः ॥ ५ ॥
निदेशवर्तिनः सर्वे सर्वे गुरुहिते रताः ॥ अभिप्रेतमनुष्ठातुं तव शक्ष्यन्त्यरिन्दम ॥ ६ ॥
त इमे बहुसाहस्रैरनीकैर्भीमविक्रमैः ॥ यन्मन्यसे नरव्याघ्र प्राप्तकालं तदुच्यताम् ॥
त्वत्सैन्यं त्वद्वशे युक्तमाज्ञापयितुमर्हसि ॥ ७ ॥

शेषः ॥ ४२ ॥ संयम्य वस्त्रादिकं संकुचितं कृत्वा सन्नम्येति च पाठः ॥ ४३ ॥ सुग्रीवः प्राञ्जलिस्त्वरितः सन् सर्वान् रामे निवेदयित्वा स्थितः तानब्रवीच्च । तदेवाह—यथेति । भो वानरेन्द्राः पर्वतादिषु स्वानि बलानि यथासुखं निवेशयित्वा । बलज्ञो यूथपः । स्वं बलं प्रतिपत्तुं ज्ञातुं । ईष्टे ईशो भवेत् । लिङर्थे लट् । यद्वा रामे निवेदयित्वा तदधीनं कृत्वा । अब्रवीत् तत्तत्स्वरूपमब्रवीत् । यथेति वानरेन्द्र इति च पाठः । सुग्रीवः बलं प्रतिपत्तुमीष्टे स्म ॥ ४४—४५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

अथ सीतान्वेषणाय पूर्वस्यां दिशि सुग्रीवेण विनतप्रेषणं चत्वारिंशे—अथ राजेत्यादि ॥ १ ॥ मद्विषयवासिनः मदवगतदेशवासिनः । "विषयो यस्य यो ज्ञातस्तत्र शब्दादिकेष्वपि" इत्यमरः । यद्वा मद्राज्यवासिनः ॥ २—३ ॥ ख्यातकर्मापदानाः कर्म दूरलङ्घनाधिक्रिया अपदानं पूर्ववृत्तं विस्मयनीयशत्रुनिरसनं ख्याते कर्मापदाने येषां ते तथा ॥ ४ ॥ कोट्यग्रश इति बहुसंख्योपलक्षणं ॥ ५ ॥ गुरुहिते स्वामिहिते ॥ ६ ॥ बहुसाहस्रैर्भीमविक्रमैरनीकैः सहिताः । त इम इत्यङ्गुल्या निर्देशः । प्राप्तकालं

स० ख्यातोधर्मोयेषांते । पदाताः यानंविनापादेनैवगमनशीलाः । व्यवसायोनिश्चयबुद्धिः । मत्वर्थीयप्रत्ययान्तत्वात्तद्वत्सूत्तमाः ॥ ४ ॥ ति० अंबुचराः समुद्रमध्यद्वीपचराः ॥ ५ ॥

[पा०] १ ख. धर्मज्ञस्ततः. २ ग. पर्वतकन्दरेषु. ख. घ. छ. पर्वतनिर्दरेषु. ३ क. ग. प्लवगाधिपः. ४ ख. आगताश्चविशिष्टाश्च. ५ छ. झ. ट. कामचारिणः. ६ च.—ट. वानरेन्द्रामहेन्द्राभाः. क. ङ. वानरेन्द्रामहाभागाः. ७ मेविषय. ८ क.—ट. विक्रान्तैर्बलिभिः. ख. विक्रान्तैरनेकैर्भीमदर्शनैः. ९ ग. वानरश्रेष्ठाः. १० ठ. ख्यातकर्मपदाताश्च. ११ ख. पराक्रमेच. १२ ख. व्यवसायेपि. १३ ग. पृथिव्यंबरसंचाराः. १४ ग. कोट्योघैस्तइमे. ख. कोट्यग्रतइमे. क. कोट्यग्रगाइमे. छ. झ. ट. कोट्योघाश्चइमे. १५ च. छ. ज. ञ. ट. स्थिताः. १६ ग. छ. झ. ट. रनेकैर्बहुविक्रमैः. ङ. ज. ञ. रनेकैर्भीमविक्रमैः.

काममेषामिदं कार्यं विदितं मम तत्वतः ॥ तथापि तु यथातत्त्वमाज्ञापयितुमर्हसि ॥ ८ ॥
इति ब्रुवाणं सुग्रीवं रामो दशरथात्मजः ॥ बाहुभ्यां संपरिष्वज्य इदं वचनमब्रवीत् ॥ ९ ॥
ज्ञायतां मम वैदेही यदि जीवति वा न वा ॥ स च देशो महाप्राज्ञ यस्मिन्वसति रावणः ॥ १० ॥
अधिगम्य तु वैदेहीं निलयं रावणस्य च ॥ प्राप्तकालं विधास्यामि तस्मिन्काले सह त्वया ॥ ११ ॥
नाहमस्मिन्प्रभुः कार्ये वानरेश न लक्ष्मणः ॥ त्वमस्य हेतुः कार्यस्य प्रभुश्च प्लवगेश्वर ॥ १२ ॥
त्वमेवाज्ञापय विभो मम कार्यविनिश्चयम् ॥ त्वं हि जानासि यत्कार्यं मम वीर न संशयः ॥ १३ ॥
सुहृद्द्वितीयो विक्रान्तः प्राज्ञः कालविशेषवित् ॥ भवानस्मद्धिते युक्तः सुकृतार्थोर्थवित्तमः ॥ १४ ॥
एवमुक्तस्तु सुग्रीवो विनतं नाम यूथपम् ॥ अब्रवीद्रामसान्निध्ये लक्ष्मणस्य च धीमतः ॥
शैलाभं मेघनिर्घोषमूर्जितं प्लवगेश्वरः ॥ १५ ॥
सोमसूर्यात्मजैः सार्धं वानरैर्वानरोत्तम ॥ देशकालनयैर्युक्तः कार्याकार्यविनिश्चये ॥ १६ ॥
वृतः शतसहस्रेण वानराणां तरस्विनाम् ॥ अधिगच्छ दिशं पूर्वां सशैलवनकाननाम् ॥ १७ ॥
तत्र सीतां च वैदेहीं निलयं रावणस्य च ॥ मार्गध्वं गिरिशृङ्गेषु वनेषु च नदीषु च ॥ १८ ॥
नदीं भागीरथीं रम्यां सरयूं कौशिकीं तथा ॥ कालिन्दीं यमुनां रम्यां यामुनं च महागिरिम् १९
सरस्वतीं च सिन्धुं च शोणं मणिनिभोदकम् ॥ महीं कालमहीं चैवं शैलकाननशोभिताम् ॥२०॥
ब्रह्ममालान्विदेहांश्च मालवान्काशिकोसलान् ॥ मागधांश्च महाग्रामान्पुण्ड्रान्वङ्गांस्तथैव च ॥
पत्तनं कोशकाराणां भूमिं च रजताकराम् ॥ २१ ॥

कालोचितं ॥ ७ ॥ एषां कार्यं एभिः कर्तव्यं । मम विदितं मया विदितं ॥ ८—१३ ॥ सुहृद्विनीत इति च पाठः ॥ १४—१५ ॥ कार्याकार्यविषये विनिश्चये देशकालनयैः देशोचितनीतिभिः कालोचितनीतिभिश्चेत्यर्थः । देशकालानुगुणनयप्रवर्तनं कर्तव्यमित्यर्थः ॥ १६—१८ ॥ नदीमित्यादि रजताकरामित्यन्तमेकंवाक्यं । प्राप्येति शेषः । ततस्ततः सीतां मृगयद्भिर्भवद्भिः भागीरथ्यादिकं प्राप्य एतत् पूर्वोक्तं सर्वं । विचेतव्यमिति संबन्धः । अत्रेदमवधेयं । शरावती नाम काचिन्नदी हिमवद्विन्ध्यमध्यदेशे वलयाकारेण प्रवहति । तदपेक्षया प्राचीदिगिदानीं विचेयत्वेनोच्यते नतु किष्किन्धापेक्षया नापि मेर्वपेक्षयेति । यामुनं महागिरिं यमुनासंबन्धिनंपर्वतं । मह्यादयो देशविशेषाः । मागधान् मगधदेशान् । महाग्रामान्

स० रावणनिवासउपलब्धश्चेत्तत्र किंकार्यं किंरावणोहन्तव्यउतेहानेतव्यइत्यतआह—अधिगम्येति । अधिगम्य विज्ञाय । अनन्तरंतत्कालोचितंविधास्यामि ॥ ११ ॥ शि० यस्मिन्देशेरावणोवसतिसदेशः वैदेहीजीवतिनवाइतिचयदियस्मिन्कालेज्ञायतांतस्मिन्कालेवैदेहीमभिगम्यरावणस्यनिलयंप्राप्तकालंविध्वंसाश्रयमित्यर्थः । श्लोकद्वयमेकान्वयि ॥ १०—११ ॥ ती० सुहृद्द्वितीयः सुहृल्लक्ष्मणापेक्षयाद्वितीयत्वं ॥ ननुमेरोःपूर्वदिगवस्थितोदयाचलपर्यन्तमन्वेष्टुंप्रेषितान्वानरान्प्रतिमेरोर्दक्षिणदिगवस्थितभागीरथ्यादिनदीपर्वताद्यन्वेषणविधानंकथमुपपद्यतइतिचेत् हेमाचलविन्ध्यमध्यदेशवर्त्यार्यावर्तापेक्षयाप्राच्यादिविभागोविवक्षितः । नतुमेर्वपेक्षया । स्वावस्थितमाल्यवदपेक्षयावेतिनदोषः ॥ १४ ॥ ति० विज्ञः त्वमितिशेषः ॥ १६ ॥ ति० निलयंरावणस्यनिलयंस्थानं । यद्वा चतुर्दिक्षुरावणवासस्थानमनेनसूचितं ॥ १८ ॥ ति० मार्गध्वमितिसामान्यतोनियोगः । विशेषेणाह—नदीमित्यादि द्वितीयान्तानांप्राप्येतिशेषः ॥ यामुनो गिरिःयमुनोत्पत्तिस्थानभूतःकालिन्दगिरिः ॥ १९ ॥ ति० महीकालमहीनद्यौ ॥ २० ॥ ति० कोशकाराणांभूमिं कौशेयकतन्तूत्पादकजन्तूत्पत्तिस्थानभूतांभूमिं । रजताकरां रजतखनिं ॥ २१ ॥

[पा०] १ घ. झ. ञ. काममेवमिदं. २ क. ख. घ. वीर. ३ क. ङ.—ट. यथायुक्तं. ४ क. ख. ङ.—ट. तथा. ५ ग. बुद्धिमतांवरः. ६ क. ग.—ट. सौम्य. ७ ख. वीर. ८ ग. ङ.—ट. वानरेन्द्र. ९ ख. त्वमेव. १० छ. झ. मेकार्यं. ११ ख. छ. प्राप्तकाल. १२ ग. सकृतार्थो. छ. झ सुहृदाप्तो. १३ क. ङ. च. ज. मेघनिर्घोषंजीमूतं. १४ ख. छ. झ. ञ. ट. प्लवगेश्वरं. १५ छ. झ. ञ. ट. सूर्यनिभैः. १६ छ. झ. ट. विज्ञःकार्यं. १७ ङ. च. ज. ञ. ततः. १८ ख. च.—ट. दुर्गेषु. १९ ङ. नदेषुच. २० क. घ.—छ. झ. ञ. ट. चापि. २१ ङ. छ. झ. ञ. ट. न्पुण्ड्रांस्त्वङ्गांस्तथैवच. ख. न्पुण्ड्रान्वङ्गाश्चसर्वशः. २२ छ. झ. ट. भूमिंच.

सर्वमेतद्विचेतव्यं मार्गयद्भिस्ततस्ततः ॥ रामस्य दयितां भार्यां सीतां दशरथस्नुषाम् ॥ २२ ॥
समुद्रमवगाढांश्च पर्वतान्पत्तनानि च ॥ मन्दरस्य च ये कोटिं संश्रिताः केचिदायताम् ॥ २३ ॥
कर्णप्रावरणाश्चैव तथा चाप्योष्ठकर्णकौः ॥ घोरलोहमुखाश्चैव जवनाश्चैकपादकाः ॥ २४ ॥
अक्षया बलवन्तश्च पुरुषाः पुरुषादकाः ॥ किराताः कर्णचूडाश्च हेमाङ्गाः प्रियदर्शनाः ॥ २५ ॥
आममीनाशनास्तत्र किराता द्वीपवासिनः ॥ अन्तर्जलचरा घोरा नरव्याघ्रा इति श्रुताः ॥
एतेषामालयाः सर्वे विचेयाः काननौकसः ॥ २६ ॥
गिरिभिर्ये च गम्यन्ते प्लवनेन प्लवेन च ॥ रत्नवन्तं यवद्वीपं सप्तराज्योपशोभितम् ॥
सुवर्णरूप्यकं चैव सुवर्णाकरमण्डितम् ॥ २७ ॥
यवद्वीपमतिक्रम्य शिशिरो नाम पर्वतः ॥ दिवं स्पृशति शृङ्गेण देवदानवसेवितः ॥ २८ ॥
एतेषां गिरिदुर्गेषु प्रपातेषु वनेषु च ॥ मार्गध्वं सहिताः सर्वे रामपत्नीं यशस्विनीम् ॥ २९ ॥
ततो रक्तजलं शोणमगाधं शीघ्रगामिनम् ॥ गत्वा पारं समुद्रस्य सिद्धचारणसेवितम् ॥ ३० ॥

महाग्रामयुक्तान् । कोशकाराणां राजविशेषाणां ॥१९—२२ ॥ समुद्रं अवगाढान् प्रविष्टान् । पर्वतान् । मन्दरस्य आयतां कोटिं च संश्रितायेकर्णप्रावरणादयः एतेषामालयाः सर्वे विचेयाइतिसंबन्धः । काननौकस इति संबोधनं । कर्णप्रावरणाः आच्छादितकर्णाः । निष्कर्णाइत्यर्थः । ओष्ठे कर्णौ येषां ते ओष्ठकर्णकाः । लोहमुखाः लोहतुल्यमुखाः । कर्णेषु चूडा येषां ते कर्णचूडाः । आममीनाशना इति पूर्वोक्तकिराता व्यावर्त्यन्ते । द्वीपवासिनः द्वीपान्तरेवसन्तो मन्दरेपि वसन्तीत्यर्थः । नरव्याघ्राः अर्धनररूपा व्याघ्ररूपाश्चेत्यर्थः ॥ २३—२६ ॥ एवं जम्बूद्वीपान्वेषणं विधाय द्वीपान्तरान्वेषणं विधत्ते—गिरिभिरित्यादि । रामपत्नीं यशस्विनीमित्यन्तमेकं वाक्यं ॥ ये द्वीपाः गिरिभिर्गम्यन्ते । प्लवनेन लङ्घनेन च ये गम्यन्ते । प्लवेन उडुपेन ये गम्यन्ते । तान्द्वीपान् । सप्तराज्योपशोभितं सप्तखण्डोपशोभितं । यवद्वीपं च गच्छत । तं यवद्वीपमतिक्रम्य यः शिशिरोनाम पर्वतःशृङ्गेण दिवं स्पृशति तं गच्छत । एतेषां द्वीपादीनां गिरिदुर्गेषु वनेषु च । प्रपातेषु निर्झरेषु च । रामपत्नीं मार्गध्वमिति संबन्धः । यवद्वीपसुवर्णरूप्यकावपि लङ्काद्वीपवत् समुद्रान्तर्वर्तिनौ द्वीपविशेषौ ॥ २७—२९ ॥ एवं जम्बूद्वीपं लवणसमुद्रं चोक्त्वा प्लक्षद्वीपप्रदेशानाह—तत इत्यादिना ॥ समुद्रस्य पारं लवणसमुद्रापरपारस्थं । रक्तजलं अगाधं शीघ्रगामिनं सिद्धचारणसेवितं शोणं शोणाख्यं नदं । गत्वा । तस्य तीर्थेषु अवतारेषु । वनेषु च वैदेह्यासह रावणोमार्गितव्यः । केवलं रावणं केवलं सीतां च दृष्ट्वा नागन्तव्यं । रावणहननाय सीतानयनाय च उभावपि दृष्ट्वा आगन्तव्यमितिभावः

सकर्णप्रावरणाः कर्णपुटस्यैवप्रावरणवस्त्रवद्विस्तृतत्वेनतथोक्तिः । तथा ओष्ठकर्णिकाः ओष्ठपर्यन्तंलंबमानकर्णाः । लोहमुखाः ताम्रमुखाः । चर्मपादुकाः जानुपर्यन्तंविद्यमानचर्ममयपादत्राणाः । एकपादकाइत्यपिक्वचित्पाठः ॥ २४ ॥ शि० अक्षयाः नाशरहिताः गृहरहितावा ॥ ति० अक्षयाः अक्षयसन्तानाः । एतेउक्ताःपुरुषाः । तथैवपुरुषादकाः रक्षोभेदाः । तीक्ष्णसूच्यग्रसदृशतैक्ष्ण्यवतीचूडाकेशपाशोयेषां ॥ २५ ॥ ति० आममीनाशनाः अपक्वमत्स्यभुजः ॥२६॥ ती० यवद्वीपं यवकोटिपर्युपलक्षितद्वीपं । अस्तीतिशेषः । ति० ततःपरंयत्नवन्तोभूत्वा । सप्तराज्योपशोभितंयवद्वीपं तथासुवर्णद्वीपंरूप्यकद्वीपंविचेतव्यमितिशेषः । सुवर्णकरमण्डितं सुवर्णकुर्वन्तियेतैःशोभितं ॥ २७ ॥ ति० ततोनित्यजलमितिपाठे नित्यजलमितितस्यसंज्ञा ॥ ३० ॥

[पा०] १ च. झ. ट. सर्वंचतद्विचेतव्यं. ग. सर्वमेतद्विचिन्वध्वं. २ क. ख. घ.—ट. मृगयद्भिः. ग. मृगयन्तः. ३ छ. ज. भार्यादयितां. ङ. दक्षिणांभार्यां. ४ क. स्नुषांदशरथस्यच. ५ ख. मन्दरस्यचकोटीश्चयेकिंचित्संश्रिताजनाः. ६ क. ङ.—ट. केचिदालयाः. ७ ख. ट. यवनाश्चैक. ठ. जवनाश्चर्मपादुकाः. ८ ङ. छ. झ. ट. तथैव. ९ ख. ङ. छ. झ. ञ. ट. किरातास्तीक्ष्णचूडाश्च. १० छ. झ. ट. हेमाभाः. ११ ग. ङ. च. ज. श्चात्र. छ. झ. ञ. ठ. श्चापि. क. श्चैव. १२ छ. झ. ट. माश्रयाः. ङ. मालयाःकामं. १३ क. कामरूपिणः. १४ च. ज. लङ्घनेन. ङ. च. लङ्घनैःसुप्लवेनच. १५ झ. यत्नवन्तोयवद्वीपं. १६ ङ. सुवर्णद्वीपकंचैव. ख. सुवर्णकुड्यकंचैव. छ. झ. ट. सुवर्णरूप्यकद्वीपं. १७ छ. झ. ञ. ट. सुवर्णकरमण्डितं. १८ क. ग. प्रभूतेषु. १९ छ. झ. ट. रक्तजलंप्राप्यशोणाख्यंशीघ्रवाहिनं. २० क. ग. ज. शीघ्रवाहिनं. २१ क. समुद्रपारस्थं.

तस्य तीर्थेषु रम्येषु विचित्रेषु वनेषु च ॥ रावणः सह वैदेह्या मार्गितव्यस्ततस्ततः ॥ ३१ ॥
पर्वतप्रभवा नद्यः सुरम्याः बहुनिष्कुटाः ॥ मार्गितव्या दरीमन्तः पर्वताश्च वनानि च ॥ ३२ ॥
ततः समुद्रद्वीपांश्च सुभीमान्द्रष्टुमर्हथ ॥ ३३ ॥
ऊर्मिमन्तं च समुद्रं क्रोशन्तमनिलोद्धतम् ॥ ३४ ॥
तत्रासुरा महाकायाश्छायां गृह्णन्ति नित्यशः ॥ ब्रह्मणा समनुज्ञाता दीर्घकालं बुभुक्षिताः ॥ ३५ ॥
तं कालमेघप्रतिमं महोरगनिषेवितम् ॥ अभिगम्य महानादं तीर्थेनैव महोदधिम् ॥ ३६ ॥
ततो रक्तजलं भीमं लोहितं नाम सागरम् ॥ गत्वा द्रक्ष्यथ तां चैव बृहतीं कूटशाल्मलीम् ॥ ३७ ॥
गृहं च वैनतेयस्य नानारत्नविभूषितम् ॥ तत्र कैलाससंकाशं विहितं विश्वकर्मणा ॥ ३८ ॥
तत्र शैलनिभा भीमा मन्देहानाम राक्षसाः ॥ शैलशृङ्गेषु लम्बन्ते नानारूपा भयावहाः ॥ ३९ ॥
ते पतन्ति जले नित्यं सूर्यस्योदयनं प्रति ॥ निहता ब्रह्मतेजोभिरहन्यहनि राक्षसाः ॥
अभितप्ताश्च सूर्येण लम्बन्ते स्म पुनः पुनः ॥ ४० ॥
ततः पाण्डुरमेघाभं क्षीरोदं नाम सागरम् ॥ गत्वा द्रक्ष्यथ दुर्धर्षा शुक्लाहारमिवोर्मिभिः ॥ ४१ ॥
तस्य मध्ये महाञ्श्वेत ऋषभो नाम पर्वतः ॥ दिव्यगन्धैः कुसुमितै राजतैश्च नगैर्वृतः ॥ ४२ ॥

॥ ३०—३१ ॥ प्लक्षद्वीपपर्वतादीनाह—पर्वतेति ॥ निष्कुटाः व्यानविशेषाः ॥ ३२ ॥ अथेक्षुसमुद्रद्वीपानाह—तत इति ॥ ३३ ॥ इक्षुसमुद्रविशेषं वक्तुमाह—ऊर्मिमन्तमित्यर्धं ॥ ऊर्मिमन्तं समुद्रं इक्षुसमुद्रमित्यर्थः । अभिगच्छतेति शेषः । " लवणेक्षुसुरासर्पिर्दधिदुग्धजलैः समं " इति समुद्रक्रमः ॥ ३४ ॥ इक्षुसमुद्रस्य दुर्गमत्वंदर्शयति—तत्रेति ॥ तत्र इक्षुसमुद्रे ॥ ३५ ॥ तीर्थेनाभिगम्य उपायेनाभिगम्य । " तीर्थं मन्त्रानुपाध्यायशास्त्रोष्वम्भसि पावने । पात्रोपायावतरणेषु " इति वैजयन्ती ॥ छायाग्राहिपरिहारेण गन्तव्यमित्यर्थः । यद्वा तीर्थेनावतरणेन गन्तव्यं नान्येन । येन छायाग्राहिपरिहारो भविष्यतीति भावः ॥३६॥ ततो गताः इक्षुसमुद्रान्निर्गताः । तां कूटशाल्मलीं लोहितं नाम सागरं मधुसमुद्रं च । द्रक्ष्यथ ॥ ३७ ॥ तत्र शाल्मलिद्वीपे ॥ ३८ ॥ तत्र मधुसमुद्रे ॥ सूर्यस्योदयनं प्रतीत्यतः परं निहता इत्यर्थः । ततः परं अभितप्ताश्चेत्यर्थः । लम्बन्ते वर्तन्त इत्यर्थः । ब्रह्मतेजोभिः गायत्रीप्रभावैः ॥३९–४०॥ ततः पाण्डुरेति । अत्र मधुसमुद्रानन्तरं सर्पिर्दधिसमुद्रयोः कुशक्रौञ्चद्वीपयोश्च वक्तव्यत्वेपि तान्विहाय क्षीरोदप्राप्त्यभिधानं तदुभयप्राप्तिमन्तरेण क्षीरोदप्राप्तेरसंभवात् । अतः अनुक्तावपि तावुक्तावेव समुद्रौ द्वीपौ चेति बोध्यं । यद्वा लवणसमुद्रं तन्मध्यद्वीपांश्चोक्त्वा प्लक्षद्वीपशाल्मलिद्वीपकुशद्वीपक्रौञ्चद्वीपान् इक्षुसुरासर्पिर्दधिसमुद्रांश्च तत्रैव दर्शयति—ततः समुद्रद्वीपांश्च सुभीमान्द्रष्टुमर्हथेति ॥ ततः ऊर्मिमन्तमित्यादिना इक्षुसमुद्रस्य विशेषणमुक्त्वा ततो रक्तजलमित्यादिना सुरासमुद्रस्य स्वरूपमुक्त्वा ततः शाल्मलिद्वीपवृत्तान्तं प्रदर्श्य अन्यत्र विशेषाभावात् क्षीरसमुद्रगमनं निर्दिशति—ततः पाण्डुरमेघाभमित्यादिना ॥ ऊर्मिभिर्मु-

शि० सुभीमबहुनिष्कुटाः भयङ्करानेकावनप्रदेशयुक्ताः ॥३२॥ ति० समनुज्ञाताः समनुज्ञातच्छायाद्वारकग्रहणसामर्थ्यादिमन्तः । छायागृहीतप्राणिभक्षणानुमतिकाश्च ॥ ३५ ॥ ति० सूर्यस्योदयनंप्रति । सूर्योदयंप्राप्योर्ध्वमुखाःसूर्येणयुध्यमानाः । सूर्येणाभितप्ताः । तन्मण्डलब्रह्मतेजोभितप्ताः । ब्रह्मतेजोभिरहन्यहनित्रैवर्णिकप्रवर्तितैर्ब्रह्मविद्यातेजोभिर्निहताःसन्तः क्षीरोदजलेपतन्ति । ततः पुनरुत्थितालंबन्तेस्म । शैलशृङ्गेष्वितिशेषः ॥ कतक० शैलशृङ्गेषुलंबन्तइत्यादिश्लोकद्वयंप्रक्षिप्तं । "तानिरक्षांसिमन्देहारुणद्वीपेप्रक्षिपन्ति " इतिश्रुताववणद्वीपेतत्प्रक्षेपोक्तेरत्रारुणद्वीपप्रसक्त्यभावात्प्राचीनपुस्तकेष्वदर्शनाच्च ॥ ४० ॥ कतक० ततःपाण्डुरेति ।

[पा०] १ ख. घ. ट. सुभीमबहु. २ ग.—ट. महारौद्रं. ३ ग. कालमेघप्रतिनिभं. ४ ग. अतिक्रम्य. क. अभियम्य. ५ क. ख.—ट. गत्वा. ६ घ. ङ. प्रेक्ष्यथ. ७ ग. महतीं. ८ ख. रत्नोपशोभितं. ९ क. घोराः. १० क. तेषुशृङ्गेषु. ११ निहता ब्रह्मतेजोभिः. अभितप्ताश्चसूर्येण. इखनयोरर्धयो-पौर्वापर्ये ग. क.—ट. पाठेपुदृश्यते. ग. रहिताः. १२ क.—ट. अभितप्ताःस्म. १३ क. पाण्डरसंघातं. १४ क.—ट. त्वा. क. ततो.

सरश्च राजतैः पद्मैर्ज्वलितैर्हेमकेसरैः ॥ नाम्ना सुदर्शनं नाम राजहंसैः समाकुलम् ॥ ४३ ॥
विबुधाश्चारणा यक्षाः किन्नराः साप्सरोगणाः ॥ हृष्टाः समभिगच्छन्ति नलिनीं तां रिरंसवः ॥४४॥
क्षीरोदं समतिक्रम्य ततो द्रक्ष्यथ वानराः ॥ जलोदं सागरश्रेष्ठं सर्वभूतभयावहम् ॥ ४५ ॥
तत्र तत्कोपजं तेजः कृतं हयमुखं महत् ॥ अस्याहुस्तन्महावेगमोदनं सचराचरम् ॥ ४६ ॥
तत्र विक्रोशतां नादो भूतानां सागरौकसाम् ॥ श्रूयते च समर्थानां दृष्ट्वा तद्वडवामुखम् ॥ ४७ ॥
स्वादूदस्योत्तरे देशे योजनानि त्रयोदश ॥ जातरूपशिलो नाम महान्कनकपर्वतः ॥ ४८ ॥
तत्र चन्द्रप्रतीकाशं पन्नगं धरणीधरम् ॥ पद्मपत्रविशालाक्षं ततो द्रक्ष्यथ वानराः ॥ ४९ ॥
आसीनं पर्वतस्याग्रे सर्वभूतनमस्कृतम् ॥ सहस्रशिरसं देवमनन्तं नीलवाससम् ॥ ५० ॥
त्रिशिराः काञ्चनः केतुस्तालस्तस्य महात्मनः ॥ स्थापितः पर्वस्याग्रे विराजति सवेदिकः ॥ ५१ ॥
पूर्वस्यां दिशि निर्माणं कृतं तत्त्रिदशेश्वरैः ॥ ५२ ॥
ततः परं हेममयः श्रीमानुदयपर्वतः ॥ तस्य कोटिर्दिवं स्पृष्ट्वा शतयोजनमायता ॥ ५३ ॥
जातरूपमयी दिव्या विराजति सवेदिका ॥ सालैस्तालैस्तमालैश्च कर्णिकारैश्च पुष्पितैः ॥
जातरूपमयैर्दिव्यैः शोभते सूर्यसन्निभैः ॥ ५४ ॥
तत्र योजनविस्तारमुच्छ्रितं दशयोजनम् ॥ शृङ्गं सौमनसं नाम जातरूपमयं ध्रुवम् ॥ ५५ ॥
तत्र पूर्वं पदं कृत्वा पुरा विष्णुस्त्रिविक्रमे ॥ द्वितीयं शिखरे मेरोश्चकार पुरुषोत्तमः ॥ ५६ ॥

क्ताहारं मुक्ताहारयुक्तमिव स्थितं ॥ ४१—४२ ॥ नाम्ना सुदर्शनं सर इत्यन्वयः ॥ ४३—४४ ॥ जलोदं शुद्धजलसमुद्रं ॥ ४५ ॥ तत्र शुद्धोदके । कृतं निक्षिप्तं । कोपजलं और्वकोपजं । हयमुखं तत् प्रसिद्धं । महत्तेजः वर्तत इति शेषः । अस्य तेजसः । सचराचरं महावेगं तत् जलमितिशेषः । ओदनमाहुः संहारवेलायामिन्धनमाहुरित्यर्थः ॥ ४६ ॥ समर्थानामपि वडवामुखं तत्तेजो दृष्ट्वा विक्रोशतां नादः श्रूयते ॥ ४७ ॥ स्वादूदस्य शुद्धजलसमुद्रस्य । उत्तरे देशे अपरे पारे ॥ ४८—५१ ॥ पूर्वस्यां दिशि तन्निर्माणं कृतं । पूर्वदिगवधित्वेन तालरूपः केतुः कल्पित इत्यर्थः ॥ ५२—५४ ॥ तत्र उदयपर्वतकोटौ ॥ ५५ ॥ विष्णुः त्रिविक्रमे त्रिविक्रमप्रस्तावे । तत्र सौमनसशृङ्गे । पूर्वं पदं कृत्वा द्वितीयं पदं मेरोः पश्चिमदिगवधिभूतस्य सावर्णिमेरोः शिखरे चकार । पूर्वपश्चिमदिगवधिभूतयोरुदयाचलसावर्णिमेर्वोर्विष्णोः पदविन्यासः बलेः कृत्स्नराज्यग्रहणार्थः । भूमध्यस्थमेरौ पदविन्यासे कृत्स्नाक्रमणं न लभ्येत । वस्तुवस्तु

अत्रसुराक्षीरोदयोर्मध्येसर्पिर्दधिसमुद्रयोर्विचयनानुक्तिस्तत्रविचेतव्यदुर्गस्थलाभावात् ॥ ४१ ॥ स० क्षीरोदमित्यादौक्षीरादीनामुदकत्वेनव्यवहारदर्शनादत्रापिजलान्यस्यैवजलत्वेनोत्प्रेक्षानभवतीतिद्योतयितुंजलोदमित्युक्तं ॥ ४५ ॥ स० तत्कोपजं । तच्छब्देनबुद्धिस्थऔर्वःपरामृश्यते । उक्तंचभारतेआदिपर्वणिऔर्वे—"ततस्तंक्रोधजंतातऔर्वाग्निवरुणालये । उत्ससर्जसचैवापउपभुङ्क्तेमहोदधौ । महद्धयशिरोभूत्वायत्तंवेदविदोविदुः । तमग्निमुद्वमन्वक्त्रात्पिबत्यापोमहोदधौ ।" इति । स० अस्यतेजसः । सचराचरं जगत् । ओदनंवदन्ति । ज्ञानिनइतिशेषः । चराचरमोदनमितिचराचरात्तृत्वकथनेनास्यतेजसोभगवद्रूपत्वंप्रतीयते । "अत्ताचराचरग्रहणात्" इतिसूत्रात् । तथाआचार्यैरपि "अश्वंनत्वावारवन्तंवन्दध्या" इतिऋचि "वारवान्वडवामुखः" इत्यादिनास्पष्टमुक्तेश्च ॥ ४६ ॥ स० तद्वडवामुखं दृष्ट्वास्थितानांअसमर्थानां तत्प्राप्यजीवितुंसामर्थ्यरहितानां । सागरौकसांनादः आर्तस्वरः । श्रूयतेच । ति० असमर्थानां । चात्समर्थानामपि ॥ ४७ ॥ ति० त्रिशिराः शिरःप्रदेशवर्तित्रिस्कन्धवान् । सवेदिकः आधा-

[पा०] १ ग. ज्वलद्भिर्हेम. २ ङ. च. ज. ञ. हंसैर्निषेवितं. ३ ख. छ. झ. ट. किन्नराश्चाप्सरोगणाः. ४ ङ.—ट. समधिगच्छन्ति. ५ ङ.—ज. ञ. रिरंसया. ६ छ. झ. ट. तदा. ङ. च. गत्वा. ज. ञ. गताद्रक्ष्यथ. ७ छ. झ. ट. सागरंशीघ्रं. ख.—च. ज. सागरंश्रेष्ठं. ८ ङ. च. ज. अत्यद्भुतंमहा. ख. ग. घ. छ. झ. ञ. ट. अस्याद्भुतंमहा. ९ ख. सलिलौकसां. १० घ. छ. झ. ञ. ट. चासमर्थानां. ११ ख. ङ. च. ज. ञ. जलदस्योत्तरे. १२ ग. घ. छ. झ. ट. तीरे. १३ ख. योजनानां. १४ छ. झ. ट. सुमहान्कनकप्रभः. ङ. ञ. महाकनकपर्वतः. १५ ख. ङ.—ट. देवनमस्कृतं.

उत्तरेण परिक्रम्य जम्बूद्वीपं दिवाकरः ॥ दृश्यो भवति भूयिष्ठं शिखरं तन्महोच्छ्रयम् ॥ ५७ ॥
तत्र वैखानसा नाम बालखिल्या महर्षयः ॥ प्रकाशमाना दृश्यन्ते सूर्यवर्णास्तपस्विनः ॥ ५८ ॥
अयं सुदर्शनो द्वीपः पुरो यस्य प्रकाशते ॥ यस्मिंस्तेजश्च चक्षुश्च सर्वप्राणभृतामपि ॥ ५९ ॥
शैलस्य तस्य शृङ्गेषु कन्दरेषु वनेषु च ॥ रावणः सह वैदेह्या मार्गितव्यस्ततस्ततः ॥ ६० ॥
काञ्चनस्य च शैलस्य सूर्यस्य च महात्मनः ॥ आविष्टा तेजसा सन्ध्या पूर्वा रक्ता प्रकाशते ॥६१॥
पूर्वमेतत्कृतं द्वारं पृथिव्या भुवनस्य च ॥ सूर्योदयनं चैव पूर्वा ह्येषा दिगुच्यते ॥ ६२ ॥
तस्य शैलस्य पृष्ठेषु निर्झरेषु गुहासु च ॥ रावणः सह वैदेह्या मार्गितव्यस्ततस्ततः ॥ ६३ ॥
ततः परमगम्या सैरादिक्पूर्वा त्रिदशावृता ॥ रहिता चन्द्रसूर्याभ्यामदृश्या तिमिरावृता ॥ ६४ ॥
शैलेषु तेषु सर्वेषु कन्दरेषु वनेषु च ॥ ये चैव नोक्ता मया देशा विचेया तेषु जानकी ॥ ६५ ॥
एतावद्वानरैः शक्यं गन्तुं वानरपुङ्गवाः ॥ अभास्करममर्यादं न जानीमस्ततः परम् ॥ ६६ ॥
अधिगम्य तु वैदेहीं निलयं रावणस्य च ॥ मासे पूर्णे निवर्तध्वमुदयं प्राप्य पर्वतम् ॥ ६७ ॥
ऊर्ध्वं मासान्न वस्तव्यं वसन्नवध्यो भवेन्मम ॥ सिद्धार्थाः सन्निवर्तध्वमधिगम्य च मैथिलीम् ॥६८॥

मेरोरेव शिखरे द्वितीयं पदं न्यस्तं । मेरुशिखरस्य स्वर्गत्वात् । भूमावेकं स्वर्गे द्वितीयं तृतीयं ब्रह्मलोक इति पौराणिकीगाथा ॥ ५६ ॥ दिवाकरःजम्बूद्वीपमुत्तरेण जम्बूद्वीपोत्तरभागे । " एनपा द्वितीया " इति द्वितीया । परिक्रम्य महोच्छ्रयं तत् सौमनसं शिखरं प्राप्येति शेषः । दृश्यो भवति मेरोर्दक्षिणपार्श्ववर्तिनां दृश्यो भवतीत्यर्थः ॥ ५७ ॥ वैखानसाः ब्रह्मनखोत्पन्नाः । बालखिल्याः ब्रह्मरोमोत्पन्नाः " ये नखास्ते वैखानसाः । येबालास्ते बालखिल्याः " इति श्रुतेः ॥ ५८ ॥ अयं उदयपर्वतपार्श्वस्थो द्वीपः सुदर्शनो नाम । सुदर्शनसंज्ञान्वर्थेत्याह—यस्येति । यस्य तेजसः । पुरः सन्निधौ । सर्वप्राणभृतामपि चक्षुः प्रकाशते विषयग्रहणशक्तं भवति । तत्तेजः सूर्याख्यं यस्मिन् द्वीपे प्रकाशते । अयं द्वीपः सुदर्शनो नामेति योजना ॥ ५९ ॥ शैलस्य उदयशैलस्येत्यर्थः ॥ ६० —६१ ॥ हि यस्मादेतदुदयपर्वतः । द्वारशब्दापेक्षया नपुंसकत्वं । पृथिव्याः भुवनस्य च पूर्वं द्वारं कृतं प्रथमद्वारत्वेन ब्रह्मणः सृष्टयादौ कल्पितं । सूर्यस्य परितो भ्रमणाय प्रथमं एतदुदयनं च कृतमुदयस्थानं कल्पितं । तस्मादेषा पूर्वा दिगुच्यते ॥ ६२ ॥ तस्येत्यादि ॥ सम्यगन्वेषणाय पुनरुक्तिः ॥ ६३ ॥ त्रिदशावृता त्रिदशाधिष्ठिता । दिक् उदयाच्चलप्रदेशरूपा । ततः परं उदयाद्रेः परं । अगम्या ॥ ६४ ॥ उपसंहरति—शैलेष्विति ॥ ये मया नोक्तास्तेषु शैलादिषु विचेया ॥ ६५ ॥ अमर्यादं ग्रामनगरादिमर्यादारहितं । केवलान्धकारभूतमित्यर्थः ॥६६—६८ ॥

रवेर्दिवन्धसहितः ॥ ५१ ॥ ति० अस्मानन्तरमुत्तरेणजंबूद्वीपंपरिक्रम्य तन्महोच्छ्रयं शिखरंसौमनसाख्यंप्राप्यस्थितोदिवाकरोजंबूद्वीपवर्तिनांभूयिष्ठंदृश्योभवति । सौमनसेशिखरेइत्यर्थः ॥ इदंसत्ययुगाभिप्रायं । त्रेतायांक्षीरसागरमध्यगस्यद्वापरेसुरोदमध्यगस्य कलौलङ्कामध्यगस्यजंबूद्वीपस्थमनुष्यदृश्यतायाअन्यत्रोक्तत्वात् ॥ ५७ ॥ ती० अयंसुदर्शनोद्वीपः शोभनदर्शनोऽयंद्वीपःप्रकाशते । अयमितिश्लक्ष्णाह्निकयानिर्देशाज्जंबूद्वीपउच्यते । यद्वासुदर्शनाकारत्वात्सुदर्शनशब्देनजंबूद्वीपउच्यते ॥ स० सुदर्शनः तन्नामकसरोवरचिह्नितोद्वीपःप्रकाशते ॥ ५९ ॥ ति० चोद्देतौ । यतोभुवनस्यप्रकाशनहेतोःसूर्योदयनमवेक्ष्यपूर्वं प्रथमं । पृथिव्याएतद्वारे ऊर्ध्वस्थानांपृथिवीप्रवेशस्यद्वारं । पृथ्वीस्थानांभुवनस्य ब्रह्मभुवनस्यप्रवेशद्वारं । एतद् उदयगिरिरूपंकृतं । अतएवापूर्वादिगुच्यते ॥ ६२ ॥ इतिचत्वारिंशःसर्गः ॥ ४० ॥

[पा] १ ख. घ. न्महोच्छ्रितं. २ ख. घ. ज. तस्यशैलस्य. ३ क. ख. घ. क. च. ज. ञ. कुक्षेषु. छ. झ. ट. पृष्ठेषु. ४ क. ज. तस्यपूर्वासन्ध्या. ५ क. ख. सापूर्वादिक्. च. छ. ज. ट. सादिक्पूर्वा. ग. दिक्पूर्वाहि. ६ ख. क.—ट. तमसावृता. ७ क. च. ज.—ट. नदीषुच. ८ ज. येयेचोक्ता. ट. येचनोक्तामयोद्देशाः. ९ क. एतावद्वानरैः. १० ज. सिद्धार्थाश्चनिवर्तध्वं.

महेन्द्रकान्तां वनषण्डमण्डितां दिशं चरित्वा निपुणेन वानराः ॥
अवाप्य सीतां रघुवंशजप्रियां ततो निवृत्ताः सुखिनो भविष्यथ ॥ ६९ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे चत्वारिंशः सर्गः ॥ ४० ॥

एकचत्वारिंशः सर्गः ॥ ४१ ॥

सुग्रीवेण दक्षिणदिशितत्तद्देशीयविशेषाभिधानपूर्वकंसीतान्वेषणाय हनुमदङ्गदादिप्रेषणम् ॥ १ ॥

ततः प्रस्थाप्य सुग्रीवस्तन्महद्वानरं बलम् ॥ दक्षिणां प्रेषयामास वानरानभिलक्षितान् ॥ १ ॥
नीलमग्निसुतं चैव हनुमन्तं च वानरम् ॥ पितामहसुतं चैव जाम्बवन्तं महाबलम् ॥ २ ॥
सुहोत्रं च शरारिं च शरगुल्मं तथैव च ॥ गजं गवाक्षं गवयं सुषेणमृषभं तथा ॥ ३ ॥
मैन्दं च द्विविदं चैव विजयं गन्धमादनम् ॥ उल्कामुखमसङ्गं च हुताशनसुतावुभौ ॥ ४ ॥
अङ्गदप्रमुखान्वीरान्वीरः कपिगणेश्वरः ॥ वेगविक्रमसंपन्नान्संदिदेश विशेषवित् ॥ ५ ॥
तेषामग्रेसरं चैव महेन्द्रबलमसङ्गमम् ॥ विधाय हरिवीराणामादिशद्दक्षिणां दिशम् ॥ ६ ॥
ये केचन समुद्देशास्तस्यां दिशि सुदुर्गमाः ॥ कपीशः कपिमुख्यानां स तेषां तानुदाहरत् ॥ ७ ॥
सहस्रशिरसं विन्ध्यं नानाद्रुमलतायुतम् ॥ नर्मदां च नदीं दुर्गां महोरगनिषेविताम् ॥ ८ ॥
ततो गोदावरीं रम्यां कृष्णवेणीं महानदीम् ॥ वरदां च महाभागां महोरगनिषेविताम् ॥ ९ ॥
मेखलामुत्कलां चैव दशार्णनगराण्यपि ॥ अवन्तीमवन्तीं च सर्वमेवानुपश्यत ॥ १० ॥

महेन्द्रकान्तां इन्द्रप्रियां । निपुणेन नैपुण्येन ॥ ६९ ॥
इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने चत्वारिंशः सर्गः ॥ ४० ॥

अथ दक्षिणदिशि वानरप्रेषणमेकचत्वारिंशे—ततः प्रस्थाप्येत्यादि ॥ अभिलक्षितान् दृष्टापदानान् ॥ १ ॥ नीलमित्यादि । अत्रोक्तः सुषेणस्तारापितुरन्यः । वेगविक्रमसंपन्नप्रेषणे हेतुमाह—विशेषविदिति ॥२—५ ॥ असङ्गं अविलम्बगामि । वेगवदितियावत् । बलं सैन्यं । अग्रेसरं अग्रचरं । विधाय ॥ ६ ॥ तान् समुद्देशान् ॥ ७ ॥ सहस्रशिरसमित्यादि । पूर्ववन्मध्यदेशापेक्षया विन्ध्यस्य दक्षिणत्वव्यपदेशः ॥८—१०॥

ति० अभिलक्षितान् कार्यसमर्थत्वेननिर्णीतान् ॥ १ ॥ ति० हुताशनसुतावितिः । अग्निस्वव्याप्यहुताशनत्वमित्यग्निहुताशनबोधेवः ॥ स० हुताशनसुतौ अग्निपुत्रौ । नीलस्यसेनानीत्वेनपृथगुक्तिः ॥ ४ ॥ ति० विशेषवित् अन्वेष्टव्यदेशविशेषवित् ॥ स० विशेषवित् कपिगतपराक्रमविशेषाभिज्ञः ॥ ५ ॥ ति० अग्रेसरं मुख्यं । असंग्रहंइतिपाठे असंकोचप्रभुमित्यर्थः ॥ ६ ॥ रामानु० सहस्रशिरसमित्यादिनापूर्वभागस्यान्देशानुपदिशति ॥ स० अत्रदिक्कल्पनायांजंबूद्वीपमध्यदेशमारभ्येतिज्ञेयं । तेनकथंकिष्किन्धादक्षिणदेशस्थत्वंविन्ध्यादीनामितिशङ्कापरास्ता ॥ तस्यानागकन्यालालनत्रतेषांसंचारोयुक्तः ॥ ति० अत्राप्यार्यावर्तापेक्षयादक्षिणत्वं तदाह सहस्रशिरसं सहस्रशिखरं ॥ ८ ॥ ति० गोदावरीं विन्ध्यपूर्वप्रदेशवर्तिगोदावरीं ॥ ९ ॥ मेखलादयोदेशभेदाः ॥ १० ॥

[पा०] १ क. सुरेन्द्रकान्तां. २ क.—ट. महौजसं. ३ ख. ग. शरभं. क.—ट. सुषेणं. ४ छ. झ. ट. मनङ्गंच. ५ क. ग. महाबलमथाङ्गदं. क.—ट. बृहद्बलमथाङ्गदं. ६ क. कपिवीराणां. ७ ङ. च. ज. ञ. मादिदेशाथदक्षिणां. ८ ङ. ज. ञ. सुदारुणाः. ९ क.—ट. रम्यां. १० ग. भोगावतीं. ११ क. ञ. वरारोहां. ज. महारोहां. १२ क. च. अम्बुवन्तींम्बुवन्तींच. ङ. ञ. ट. अम्बुवन्तीमवन्तींच. ख. ग. अवन्तीमम्बुवन्तींच. छ. झ. आम्रवन्तीमवन्तींच.

विदर्भानृषिकांश्चैव रम्यान्माहिषकानपि ॥ तथा वङ्गान्कलिङ्गांश्च कौशिकांश्च समन्ततः ॥ ११ ॥
अन्वीक्ष्य दण्डकारण्यं सपर्वतनदीगुहम् ॥ नदीं गोदावरीं चैव सर्वमेवानुपश्यत ॥
तथैवान्ध्रांश्च पुण्ड्रांश्च चोलान्पाण्ड्यान्सकेरलान् ॥ १२ ॥
अयोमुखश्च गन्तव्यः पर्वतो धातुमण्डितः ॥ विचित्रशिखरः श्रीमांश्चित्रपुष्पितकाननः ॥ १३ ॥
सचन्दनवनोद्देशो मार्गितव्यो महागिरिः ॥ १४ ॥
ततस्तामापगां दिव्यां प्रसन्नसलिलां शिवाम् ॥ तत्र द्रक्ष्यथ कावेरीं विहितामप्सरोगणैः ॥ १५ ॥
तस्यासीनं नगस्याग्रे मलयस्य महौजसम् ॥ द्रक्ष्यथादित्यसंकाशमगस्त्यमृषिसत्तमम् ॥ १६ ॥
ततस्तेनाभ्यनुज्ञाताः प्रसन्नेन महात्मना ॥ ताम्रपर्णीं ग्राहजुष्टां तरिष्यथ महानदीम् ॥ १७ ॥
सा चन्दनवनैर्दिव्यैः प्रच्छन्ना द्वीपशालिनी ॥ कान्तेव युवतिः कान्तं समुद्रमवगाहते ॥ १८ ॥
ततो हेममयं दिव्यं मुक्तामणिविभूषितम् ॥ युक्तं कवाटं पाण्ड्यानां गता द्रक्ष्यथ वानराः ॥ १९ ॥
ततः समुद्रमासाद्य संप्रधार्यार्थनिश्चयम् ॥ अगस्त्येनान्तरे तत्र सागरे विनिवेशितः ॥ २० ॥
चित्रनानानगः श्रीमान्महेन्द्रः पर्वतोत्तमः ॥ जातरूपमयः श्रीमानवगाढो महार्णवम् ॥ २१ ॥
नानाविधैर्नगैः सर्वैर्लताभिश्चोपशोभितम् ॥ देवर्षियक्षप्रवरैरप्सरोभिश्च सेवितम् ॥ २२ ॥
सिद्धचारणसङ्घैश्च प्रकीर्णं सुमनोहरम् ॥ तमुपैति सहस्राक्षः सदा पर्वसु पर्वसु ॥ २३ ॥

तत्र सर्वमेवानुपश्यतेत्यन्तेन विन्ध्यस्य पश्चिमभागस्थांस्तद्दक्षिणपार्श्वस्थांश्च नदीनगरदेशानुपदिशति—विदर्भानित्यादिना । पूर्वभागस्थान्देशानुपदिशति—नदीं गोदावरीमिति । दण्डकारण्यवर्तिगोदावरीखण्डमित्यर्थः ॥११—१२॥ अयोमुखः सह्यः ॥ १३—१४ ॥ अप्सरोगणैः विहितां पूजितामित्यर्थः ॥ १५ ॥ तस्य प्रसिद्धस्य ॥१६—१८॥ पाण्ड्यानां पाण्ड्यराजानां । युक्तं योग्यं । कवाटं । अनेन नगरं लक्ष्यते । मुक्तारूपैर्मणिभिः रत्नैः भूषितं । तदुत्पत्तिदेशत्वादितिभावः ॥ १९ ॥ अथ महेन्द्रं वर्णयति—तत इत्यादिना ॥ मार्गितव्या विशेषत इत्यन्तमेकान्वयं । ततः पाण्ड्यनगरात् । समुद्रमासाद्य अर्थनिश्चयं कर्तव्यसमुद्रलङ्घनाद्यर्थनिश्चयं । संप्रधार्य कृत्वा । अगस्त्येन तत्र सागरे अन्तरे अवकाशे निवेशितः । श्रीमान् पुष्पफलादिसमृद्धिमान् । श्रीमान् कान्तिमान् । महेन्द्रोऽस्ति । तं पर्वतं । पर्वसु पर्वसु समुद्रस्नानायागच्छति । तस्यापरे पारे अन्तरालिकतीरे द्वीपोऽस्ति तं मार्गध्वं । तत्र सर्वात्मना सर्वप्रयत्नेन विशेषतः सीता मार्गित-

ति० मत्स्याश्चकलिङ्गाश्चतान् ॥ ११ ॥ स० अत्रनदींगोदावरीमिति दण्डकारण्यस्थितगोदावरीप्रदेशग्रहणं । एतच्च तत्रैवसीतायागमनाद्विशेषतस्तत्रान्वेषणार्थं ॥ १२ ॥ स० अयोमुखइति मलयस्यनामान्तरं । सुचन्दनवनोद्देशइतितच्चिह्नदर्शनात् " तस्यासीनंनगस्याग्रेमलयस्य" इतिवक्ष्यमाणत्वाच्च ॥ १३ ॥ स० अप्सरोगणैर्विहृतां विहृतंविहरणंअस्याअस्तीतिमत्वर्थीयप्रत्ययान्तोयं । ततश्चअप्सरोगणकर्तृकंयद्विहरणं तद्वतीमित्येकदेशेनान्वयोबोध्यः ॥ १५ ॥ ति० अगस्त्यमिति । यद्यपिपञ्चवटीतउदग्भागेअगस्त्याश्रमःपूर्वमुक्तः तथाप्यत्रापिबोध्यः वाल्मीकेरनेकदेशेष्वाश्रमवत् । समाननामाऽन्यएवायमित्यन्ये ॥ १६ ॥ ति० चन्दनैःप्रच्छन्नानिद्वीपानिवारिवयस्यास्साप्रच्छन्नद्वीपवारिणी । प्रच्छन्नशरीरेतियावत् ॥ स० युवती कान्ता लज्जयायथादिव्यदुकूलैःप्रच्छन्नसर्वस्वावयवासतीस्वकान्तंगच्छति तद्वदियमपिदिव्यदुकूलस्थानीयैश्चन्दनैश्चित्रैःप्रच्छन्नद्वीपजलादिसर्वावयवासती स्वकान्तंसमुद्रमवगाहते ॥ १८ ॥ ति० सहस्राक्षउपैतीत्यनेन महेन्द्राधिष्ठितत्वादन्वर्थनामकत्वंमहेन्द्रस्यसूचितं ॥ २३ ॥

[पा०] १ ङ. छ. झ. ट. वृष्टिकांश्चैव. २ क. ख. वङ्गकलिङ्गांश्च. ङ. छ. झ. ञ. ट. मत्स्यकलिङ्गांश्च. घ. च. ज. वत्सकलिङ्गांश्च. ३ क.—ग. काशिकांश्च. ४ ख. तथैवच. ५ ख. अन्विष्य. ६ ख. चेति. ७ ग. ङ. च. ज. ञ. पश्यथ. ८ ग. घ—ट. पाण्ड्यांश्चकेरलान्. ९ क. अयोमुखश्च. १० ख. पुष्पितपादपः. ११ घ.—ट. सुचन्दन. १२ झ. ट. सलिलाशयां. घ. सलिलांशुभां. १३ ख.—ट. विहृतामप्सरो. १४ क.—ट. महौजसः. १५ ख. ग. महाग्राहां. १६ ङ.—ट. वनैश्चित्रैः. १७ छ. झ. प्रच्छन्नद्वीपवारिणी. ट. प्रच्छन्नद्वीपमालिनी. १८ ख. ग. ङ.—ट. युवतीकान्तं. १९ क. मणिनिषेवितं. २० ङ.—ज. ञ. ततो. २१ ङ. च. ज. ञ. ट. चित्रसानुगतः. झ. चित्रसानुनगः. ग. चित्रनानावनः. २२ घ. श्रीमान्नगेन्द्रः. २३ क.—ट. फुल्लैः. २४ ख. ग. गन्धर्वयक्ष. २५ घ.—ट. शोभितं. २६ क. चारणगन्धर्वैः. २७ ङ. ञ.—ट. सुमनोरमं. २८ ख. समुपैति.

द्वीपस्तस्यापरे पारे शतयोजनमायतः ॥ अगम्यो मानुषैर्दीप्तस्तं मार्गध्वं समन्ततः ॥
तत्र सर्वात्मना सीता मार्गितव्या विशेषतः ॥ २४ ॥
स हि देशस्तु वध्यस्य रावणस्य दुरात्मनः ॥ राक्षसाधिपतेर्वासः सहस्राक्षसमद्युतेः ॥ २५ ॥
दक्षिणस्य समुद्रस्य मध्ये तस्य तु राक्षसी ॥ अङ्गारकेति विख्याता छायामाकृष्य भोजनी ॥ २६ ॥
एवं निःसंशयान्कृत्वा संशयान्नष्टसंशयाः ॥ मृगयध्वं नरेन्द्रस्य पत्नीममिततेजसः ॥ २७ ॥
तमतिक्रम्य लक्ष्मीवान्समुद्रे शतयोजने ॥ गिरिः पुष्पितको नाम सिद्धचारणसेवितः ॥ २८ ॥
चन्द्रसूर्यांशुसंकाशः सागराम्बुसमावृतः ॥ भ्राजते विपुलैः शृङ्गैरम्बरं विलिखन्निव ॥ २९ ॥
तस्यैकं काञ्चनं शृङ्गं सेवते यं दिवाकरः ॥ श्वेतं रौजतमेकं च सेवते यं निशाकरः ॥ ३० ॥
न तं कृतघ्नाः पश्यन्ति न नृशंसा न नास्तिकाः ॥ प्रणम्य शिरसा शैलं तं विमार्गत वानराः ॥ ३१ ॥
तमतिक्रम्य दुर्धर्षाः सूर्यवान्नाम पर्वतः ॥ अध्वना दुर्विगाहेन योजनानि चतुर्दश ॥ ३२ ॥
ततस्तमप्यतिक्रम्य वैद्युतो नाम पर्वतः ॥ सर्वकामफलैर्वृक्षैः सर्वकालमनोहरैः ॥ ३३ ॥
तत्र भुक्त्वा वरार्हाणि मूलानि च फलानि च ॥ मधूनि पीत्वा मुख्यानि परं गच्छत वानराः ॥ ३४ ॥
तत्र नेत्रमनःकान्तः कुञ्जरो नाम पर्वतः ॥ अगस्त्यभवनं यत्र निर्मितं विश्वकर्मणा ॥ ३५ ॥
तत्र योजनविस्तारमुच्छ्रितं दशयोजनम् ॥ शरणं काञ्चनं दिव्यं नानारत्नविभूषितम् ॥ ३६ ॥
तत्र भोगवती नाम सर्पाणामालयः पुरी ॥ विशालकक्ष्या दुर्धर्षा सर्वतः परिरक्षिता ॥

व्येत्यर्थः ॥ २०—२४ ॥ एवं रावणालयावगमेऽपि इतरदिक्षु वानरप्रेषणं स्थानान्तरे सीतामादाय किं गच्छेदिति शङ्कयेति बोध्यम् ॥ २५—२६ ॥ ननु पूर्वं " न जाने निलयं तस्य सर्वथा पापरक्षसः " इत्युक्तं । संप्रति " स हि देशस्तु वध्यस्य रावणस्य दुरात्मनः " इत्युच्यते । अतो विरुद्धमिदमित्याशङ्क्य परिहरति—एवमिति ॥ एवं मदुक्तरीत्या । संशयान् संशयविषयभूतान्देशान् । निःसंशयान् संशयाविषयीभूतान् । निश्चितसदसद्भावान्कृत्वा नष्टसंशयाः सन्तः अमिततेजसो नरेन्द्रस्य पत्नीं मृगयध्वं । यद्यच्छादर्शनापरिस्फुटज्ञातमर्थं कथं निश्चयेन कथयामीति न जान इति पूर्वमुक्तं । इदानीं तथाविधमप्यर्थमन्वेषणगौरवाय निश्चयेन ब्रवीमीतिभावः ॥ २७ ॥ तमतिक्रम्येति "परावरयोगे चे"ति क्त्वाप्रत्ययः । एवं पूर्वत्रापरत्र च बोध्यं ॥ २८—२९ ॥ तस्यैकमिति दक्षिणायन इति शेषः ॥ ३०—३१ ॥ हे दुर्धर्षाः सूर्यवान्नाम पर्वतः वर्तत इति शेषः । दुर्विगाहेनाध्वना उपलक्षितः । योजनानि चतुर्दश पुष्पितकसूर्यवतोरन्तराल इति शेषः ॥ ३२—३३ ॥ वराणां श्रेष्ठानामर्हाणीति वरार्हाणि । परं ततः परं देशं ॥ ३४—३५ ॥ अगस्त्यभवनं विशेषयति—तत्र

अपरेपारे अपरेपरतीरे । अपरशब्दोविशेषवाची परतीरविशेषेप्रतिष्ठितइतिशेषः । द्वीपइति । उत्तरभागेदक्षिणेलवणसमुद्रइति तस्यद्वीपत्वं । सगरखातोप्येकदेशेनोदग्भागेनसमुद्रसंबद्धः ॥ २४ ॥ ति० समुद्रसंबद्धलात्सागरोपिसमुद्रत्वेनसमुद्रश्चसागरत्वेनव्यवहियतइत्यविरोधः ॥ २६ ॥ स० एवं पूर्वोक्तप्रकारेण । संशयान् संशयविषयान् समुद्रतरणच्छायाग्रहनिवारणादीन्प्रति । निस्संशयान् निर्गतः संशयोयेषांतान्मयापरंतीरंप्राप्यतेवानवा । छायाग्रहोनिवार्यतेवानवेत्यादिसंशयरहितानितियावत् । कृत्वानियोज्य तत्कार्यकरणायतादृशानेवनियोज्येत्यर्थः । नष्टसंशयास्सन्तोमृगयध्वमित्यर्थः । एवमर्थाकरणेपूर्वोक्तच्छायाग्रहनिस्तरणोपायाकथनेनासांगत्यापत्तिः ॥ २७ ॥ ति० तत्र कुञ्जरपर्वते । अगस्त्यभवनवर्णनं । योजनेत्यादि । इदंतृतीयमगस्त्यस्थानं ॥ शरणं गृहं । अगस्त्यस्येतिशेषः ॥ ३६ ॥ तत्र कुञ्जरपर्वतएव । आलयशब्दोनिलयपुंलिङ्गः । यद्यपिभोगवतीरसातलेप्रसिद्धातथापि

[पा०] १ क. ख. ग. ङ.—ङ. विस्तृतः. २ ज. मानुषैर्वापि. ३ ग. महाहनः. ४ क. मध्येवसति. ५ क. ख. ग. ङ.—ट. छायामाक्षिप्य. ६ ज. सागरान्तसमाश्रयः, ङ. च. छ. झ. ञ. ट. सागरांबुसमाश्रयः. ७ क. रजतशृंगं च. ८ ख. ङ.—ज. ञ. दुर्धर्षः. ९ क. मनोरमैः. १० क.—ध. महार्हाणि. ११ च.—झ. ट. जुष्टानि. १२ क. विस्तीर्णं. १३ क. ग. घ.—ट. विशालरम्या.

रक्षिता पन्नगैर्घोरैस्तीक्ष्णदंष्ट्रैर्महाविषैः ॥ ३७ ॥
सर्पराजो महाप्राज्ञो यस्यां वसति वासुकिः ॥ निर्याय मार्गितव्या च सा च भोगवती पुरी ॥३८॥
तत्र चानन्तरा देशा ये केचन सुसंवृताः ॥ ३९ ॥
तं च देशमतिक्रम्य महानृषभसंस्थितः ॥ सर्वरत्नमयः श्रीमानृषभो नाम पर्वतः ॥ ४० ॥
गोशीर्षकं पद्मकं च हरिश्यामं च चन्दनम् ॥ दिव्यमुत्पद्यते यत्र तच्चैवाग्निसमप्रभम् ॥ ४१ ॥
न तु तच्चन्दनं दृष्ट्वा स्प्रष्टव्यं च कदाचन ॥ रोहिता नाम गन्धर्वा घोरा रक्षन्ति तद्वनम् ॥ ४२ ॥
तत्र गन्धर्वपतयः पञ्च सूर्यसमप्रभाः ॥ शैलूषो ग्रामणीः शिग्रुः शुभ्रो बभ्रुस्तथैव च ॥ ४३ ॥
रविसोमाग्निवपुषां निवासः पुण्यकर्मणाम् ॥ अन्ते पृथिव्या दुर्धर्षास्तत्र स्वर्गजितः स्थिताः ॥ ४४ ॥
ततः परं न वः सेव्यः पितृलोकः सुदारुणः ॥ राजधानी यमस्यैषा कष्टेन तमसा वृता ॥ ४५ ॥
एतावदेव युष्माभिर्वीरा वानरपुङ्गवाः ॥ शक्यं विचेतुं गन्तुं वा नातो गतिमतां गतिः ॥ ४६ ॥
सर्वमेतत्समालोक्य यच्चान्यदपि दृश्यते ॥ गतिं विदित्वा वैदेह्याः सन्निवर्तितुमर्हथ ॥ ४७ ॥
यस्तु मासान्निवृत्तोऽग्रे दृष्ट्वा सीतेति वक्ष्यति ॥ मत्तुल्यविभवो भोगैः सुखं स विहरिष्यति ॥ ४८ ॥
ततः प्रियतरो नास्ति मम प्राणाद्विशेषतः ॥ कृतापराधो बहुशो मम बन्धुर्भविष्यति ॥ ४९ ॥

अमितबलपराक्रमा भवन्तो विपुलगुणेषु कुलेषु च प्रसूताः ॥
मनुजपतिसुतां यथा लभध्वं तदधिगुणं पुरुषार्थमारभध्वम् ॥ ५० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे एकचत्वारिंशः सर्गः ॥ ४१ ॥

योजनेति ॥ शरणं गृहं । ३६—३७ ॥ निर्याय अगस्त्यभवनान्निर्गत्य ॥ ३८ ॥ ये अनन्तराः अव्यवहिता देशाः । तेमार्गितव्या इति शेषः ॥ ३९ ॥ तं च देशमतिक्रम्य तस्माद्देशात्परत इत्यर्थः । ऋषभसंस्थितः ऋषभतुल्यसंस्थानः ॥ ४० ॥ गोशीर्षकं गोरोचनासदृशवर्णं । पद्मकं पद्मदलसवर्णं । हरिश्यामं तमालदलवर्णं । अग्निसमप्रभं अग्निसदृशवर्णं । एवंविधं दिव्यं चन्दनं यत्रोत्पद्यते स ऋषभः पर्वतो वर्तत इतिपूर्वेणान्वयः ॥ ४१—४८ ॥ ततः तस्मात्पुरुषात् । प्रियतरो नास्ति । मम प्राणाद्विशेषतः सः प्रियतर इतिशेषः ॥ ४९ ॥ तदधिगुणं तदनुगुणं । पुरुषार्थं पुरुषव्यापारं । अत्र संयमिनीपर्यन्तमभिधानात् सप्तद्वीपसागरगमनमर्थसिद्धं । एवमुत्तरसर्गयोरपिबोध्यं ॥ ५० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने एकचत्वारिंशः सर्गः ॥ ४१ ॥

रावणस्यजनस्थानवत्सर्पाणामपिभोगवत्याख्यपुरंभूमावप्यस्तीतिवासुकेर्भुवउपर्यपियोगवैभवात्स्थितिरितिचेतएवावगन्तव्यं । यथागस्त्यस्यकुञ्जरपर्वतावच्छिन्नेविश्वकर्मनिर्मितभवनेनक्षत्रपदेमलये पञ्चवटीदक्षिणभागेचवासस्तथेतिध्येयं ॥ ३७ ॥ स० गोशीर्षकं गोमेदमणिः । पद्मकं पद्मरागमणिः । हरिश्यामं इन्द्रनीलमणिः । चन्दनं चेत्येतावत्पदार्थजातंतथा अग्निसमप्रभंमाणिक्यंच यत्रोत्पद्यतेतच्चैवेतिपूर्वोक्तरत्नापेक्षयाऽस्यविशेषंसूचयति ॥ यद्वा गोशीर्षादयस्सर्वेचन्दनप्रभेदाः ॥ ४१ ॥ स० मत्तुल्यविभवस्सन् सुखंयथाभवतितथाविहरिष्यति । तस्मैमदर्धराज्याधिपत्यंदास्यामीत्यभिप्रायः ॥ ४८ ॥ इत्येकचत्वारिंशः सर्गः ॥ ४१ ॥

[पा०] १ क. ग.—ट. महाघोरो. २ क. घ. ततश्चानन्तरं. ग. छ. झ. ततश्चानन्तरोद्देशाः. ३ छ. झ. ट. समावृताः. ४ ग. तांश्चदेशानतिक्रम्य. ५ च. ज. नृषभपर्वतः. ग. नृषभसंहकः. छ. झ. ट. नृषभसंस्थितिः. ६ ख. घ. गोशीर्षकंचपद्मंच. ७ क. च. ज. झ. ञ. नृच. ८ च.—ट. स्प्रष्टव्यंतु. ९ ख. कथंचन. १० छ. झ. ट. घोरं. ११ क. ख. झ. ट. शिक्षः. क. च. ज. ञ. भिक्षुः. १२ क.—ट. शुको. ग. घ. शुभो. १३ क. ख. ङ.—ट. स्ततः. १४ क. च. ज. ञ. नातःपरंनरैः सेव्यः. घ. ततःपरंनगन्तव्य. १५ क. ग. ङ. च. ज. ञ. सेव्याःपितृलोकाःसुदारुणाः. १६ क. ख. ङ.—ट. यश्च. १७ ख. घ. प्रियतमो. १८ च. ज. यथोपलभ्य. १९ ख. ङ. च. ज. ञ. ट. तदनुगुणं.

द्विचत्वारिंशः सर्गः ॥ ४२ ॥

सुग्रीवेणपश्चिमदिशिसीतान्वेषणायसुषेणादिप्रेषणम् ॥ १ ॥

अथ प्रस्थाप्य सुग्रीवस्तान्हरीन्दक्षिणां दिशम् ॥ अब्रवीन्मेघसंकाशं सुषेणं नाम यूथपम् ॥ १ ॥
तारायाः पितरं राजा श्वशुरं भीमविक्रमम् ॥ अब्रवीत्प्राञ्जलिर्वाक्यमभिगम्य प्रणम्य च ॥ २ ॥
मरीचिपुत्रं मारीचमर्चिष्मन्तं महाकपिम् ॥ वृतं कपिवरैः शूरैर्महेन्द्रसदृशद्युतिम् ॥ ३ ॥
बुद्धिविक्रमसंपन्नं वैनतेयसमद्युतिम् ॥ मरीचिपुत्रान्मारीचानर्चिर्मालान्महाबलान् ॥
ऋषिपुत्रांश्च तान्सर्वान्प्रतीचीमादिशद्दिशम् ॥ ४ ॥
द्वाभ्यां शतसहस्राभ्यां कपीनां कपिसत्तमाः ॥ सुषेणप्रमुखा यूयं वैदेहीं परिमार्गत ॥ ५ ॥
सुराष्ट्रान्सहबाह्लीकाञ्शूरान्भीमांस्तथैव च ॥ स्फीताञ्जनपदान्रम्यान्विपुलानि पुराणि च ॥ ६ ॥
पुन्नागगहनं कुक्षिं बकुलोद्दालकाकुलम् ॥ तथा केतकषण्डांश्च मार्गध्वं हरियूथपाः ॥ ७ ॥
प्रत्यक्स्रोतोगमाश्चैव नद्यः शीतजलाः शिवाः ॥ तापसानामरण्यानि कान्तारा गिरयश्च ये ॥ ८ ॥
ततः स्थलीं मरुप्रायामत्युच्चशिरसः शिलाः ॥ गिरिजालावृतां दुर्गां मार्गित्वा पश्चिमां दिशम् ॥९॥
ततः पश्चिममासाद्य समुद्रं द्रष्टुमर्हथ ॥ तिमिनक्रायुतजलमक्षोभ्यमथ वानराः ॥ १० ॥
ततः केतकषण्डेषु तमालगहनेषु च ॥ कपयो विहरिष्यन्ति नारिकेलवनेषु च ॥ ११ ॥
तत्र सीतां च मार्गध्वं निलयं रावणस्य च ॥ वेलातटनिविष्टेषु पर्वतेषु वनेषु च ॥ १२ ॥

अथ पश्चिमदिशिवानरयोजनं द्विचत्वारिंशे— अथेत्यादि ॥ १ ॥ प्राञ्जलित्वादिकथनार्थमब्रवीदिति। अतो न पौनरुक्त्यं ॥ २ ॥ मारीचपदमन्वर्थसंज्ञेति द्योतयितुं मरीचिपुत्रमित्युक्तिः। मरीचिपुत्रान्मारीचानित्यत्रापि तथा । मारीचमिति ज्येष्ठ उक्तः। मारीचा इति तदनुजा उच्यन्ते । अर्चिर्मालान् अर्चिष्मतः ॥ ३—६ ॥ पुन्नागगहनं पुन्नागवनं। कुक्षिः मध्यदेशविशेषः । उद्दालकाः वृक्षविशेषाः। केतकषण्डान् केतकवनानि। प्रत्यक् स्रोतो गच्छन्तीति प्रत्यक्स्रोतोगमाः । शिवाः पावनाः । कान्ताराः दुर्गममार्गाः । तान्मार्गध्वमिति पूर्वेण संबन्धः ॥ ७—८ ॥ ततः स्थलीमित्यादिश्लोकद्वयमेकान्वयं । स्थल्यादिकं मार्गित्वा ततः तस्माद्देशात् । पश्चिमं समुद्रमागम्य तिमिनक्रायुतमक्षोभ्यंतं द्रष्टुमर्हथ ॥ ९—१० ॥ कपयो भवदीयाः ॥ ११ ॥ वेलातटनिविष्टेषु वेलायां अम्बुविकृतौ तटे च स्थितेषु । " अब्ध्यम्बुविकृतौ वेला कालमर्यादयोरपि " इत्यमरः ॥१२॥

स० अब्रवीदितिपुनर्वचनमादरसूचनार्थं ॥ २ ॥ स० महर्षिपुत्रंमारीचमित्यत्र महर्षिरूपोयोमरीचिस्तत्पुत्रमितिबुद्ध्याविवेकेनान्वयः ॥ महेन्द्रसदृशद्युतिं महेन्द्रद्युतिसदृशद्युतिं । यद्वा महेन्द्रस्यसदृशीयोग्याद्युतिर्यस्येति ॥ ती० अर्चिष्मन्तं तदाख्यं । अयंतेषुप्रधानः । अर्चिर्माल्याख्याअन्येपिमरीचिपुत्राः ॥ ३ ॥ ति० मारीचशब्दस्यव्युत्पत्त्यन्तरसंभवान्मरीचिपुत्रानित्युक्तं ॥ ४ ॥ ती० कुक्षिमित्यादिनाकेतुमालप्रदेशानुपदिशति ॥ ७ ॥ ति० कान्तारगिरयः कान्तारयुक्तागिरयः ॥ ८ ॥ स्थली

[पा०] १ ख. ततः. २ च.—ट. सहरीन्सुग्रीवोदक्षिणां. ३ ङ.—ट. वानरं. ४ ख.—ट. महर्षिपुत्रं. ५ क. समंजये. ६ छ. झ. ट. नर्चिर्माल्यान्. ख. नर्चिर्ज्वालान्. ७ ख. ग. प्रतीचींदिशमादिशत्. ८ च. ज. सुग्रीवःकपिसत्तमः. क. ङ. कपीनांकपिसत्तमः. ९ क. ग.—ट. मार्गथ. १० ङ.—ट. सौराष्ट्रान्. ख. सौराष्ट्रान्बाह्लिकांश्चैव. ग. सुराष्ट्रानथ. ११ ङ.—ट. बाह्लीकांश्चन्द्रचित्रांस्तथैवच. १२ ग. ङ.—ट. हरिपुङ्गवाः. १३ च.—ट. वस्रोतोवहाश्च. १४ क. ग. ङ.—ट. कान्तारगिरयः. १५ छ. झ. ञ. ट. तत्रस्थलीर्मरुप्राया । अत्युच्चशिशिराः. क. ग. तत्र. १६ क. मत्युप्रशिखराः. १७ ख. ग. मार्गध्वं. १८ क. तत्र. १९ क. ग. ङ.—ट. मागम्य. २० क. ख. ग. मीननक्रायुत. ङ. च. छ. ञ. ट. तिमिनक्राकुलजलं. ज. झ. तिमिनक्राकुलजलंगत्वाद्रक्ष्यथ. २१ क. विमार्गध्वं. २२ च.—ञ. वेलातल.

मुरचीपत्तनं चैव रम्यं चैव जटीपुरम् ॥ अवन्तीमङ्गलोपां च तथा चालक्षितं वनम् ॥
राष्ट्राणि च विशालानि पत्तनानि ततस्ततः ॥ १३ ॥
सिन्धुसागरयोश्चैव संगमे तत्र पर्वतः ॥ महान्हेमगिरिर्नाम शतशृङ्गो महाद्रुमः ॥ १४ ॥
तस्य प्रस्थेषु रम्येषु सिंहाः पक्षगमाः स्थिताः ॥ तिमिमत्स्यगजांश्चैव नीडान्यारोपयन्ति ते ॥ १५ ॥
तानि नीडानि सिंहानां गिरिशृङ्गेगताश्च ये ॥ दृप्तास्तृप्ताश्च मातङ्गास्तोयदस्वननिःस्वनाः ॥
विचरन्ति विशालेऽस्मिंस्तोयपूर्णे समन्ततः ॥ १६ ॥
तस्य शृङ्गं दिवस्पर्शं काञ्चनं चित्रपादपम् ॥ सर्वमाशु विचेतव्यं कपिभिः कामरूपिभिः ॥ १७ ॥
कोटिं तत्र समुद्रे तु काञ्चनीं शतयोजनाम् ॥ दुर्दर्शां पारियात्रस्य गंता द्रक्ष्यथ वानराः ॥ १८ ॥
कोट्यस्तत्र चतुर्विंशद्गन्धर्वाणां तरस्विनाम् ॥ वसन्त्यग्निनिकाशानां घोराणां कामरूपिणाम् ॥ १९ ॥
पावकार्चिःप्रतीकाशाः समवेताः सहस्रशः ॥ नात्यासादयितव्यास्ते वानरैर्भीमविक्रमैः ॥ २० ॥
नादेयं च फलं तेभ्यादेशात्किंचित्प्लवंगमैः ॥ दुरासदा हि ते वीराः सत्त्ववन्तो महाबलाः ॥ २१ ॥
फलमूलानि ते तत्र रक्षन्ते भीमविक्रमाः ॥ तत्र यत्नश्च कर्तव्यो मार्गितव्या च जानकी ॥
न हि तेभ्यो भयं किंचित्कपित्वमनुवर्तताम् ॥ २२ ॥
तत्र वैडूर्यवर्णाभो वज्रसंस्थानसंस्थितः ॥ नानाद्रुमलताकीर्णो वज्रो नाम महागिरिः ॥
श्रीमान्समुदितस्तत्र योजनानां शतं समम् ॥ २३ ॥

पूर्वस्यां दिश्यवस्थान्या । इयं चान्या । यत्र प्रविष्टा वननैरन्तर्येण न लक्ष्यन्ते तदलक्षितं नाम । मार्गध्वमित्यनुषङ्गः ॥ १३ ॥ सिन्धुर्नदविशेषः । तत्र पश्चिमदिशि । पक्षैर्गच्छन्तीति पक्षगमाः । सपक्षा इति विशेषणं । नीडानि वृक्षाग्रस्थवासस्थानानि । अतएव महाद्रुम इति पूर्वमुक्तं ॥ १४—१५ ॥ तानीत्यार्धत्रयं ॥ समन्ततस्तोयपूर्णेऽस्मिन् स्थले ये गजाः सन्ति गिरिशृङ्गगताश्च ये ते गजास्तानि नीडानि विचरन्ति । सिंहनीडाश्रयसानुषु विचरन्तीत्यर्थः । बाधकस्थानगमने हेतुमाह—दृप्ता इति ॥ १६ ॥ कपिभिः भवद्भिरिति शेषः ॥ १७ ॥ तत्र समुद्रे । गत्तां पारियात्रस्य कोटिं शृङ्गं ॥ १८—१९ ॥ नात्यासादयितव्याः नातिसमीपं प्राप्तव्याः ॥ २० ॥ नादेयं न स्वीकार्यं । तर्हि ते गन्धर्वा अस्मान्हनिष्यन्तीत्यत्राह—तत्रेति । यत्नः फलचापलनिवृत्तौ यत्नः कर्तव्यः । विशालत्वादन्वेषणे यत्नो वा । न किंचिद्भयं कपिसंचारस्य वनमात्रधर्मत्वादितिभावः । अनुवर्ततां अनुवर्तमानानां ॥ २१—२२ ॥ तत्र वैडूर्ये-

---

अकृत्रिमाम् ॥ ९ ॥ ति० सिंहाः तदाख्याः । पक्षगमाः पक्षिणःस्थिताः । तेषक्षिणः तिमिमत्स्यगजान् नीडानि स्वावासस्थानानि । आरोपयन्ति प्रापयन्ति ॥ १५ ॥ स० सिंहानांयानितानिनीडानि । तेषुविचरन्तियेगजाः । दृप्तत्वादेवसिंहनीडसंचारिलं । ति० बाधकबाहुल्येपिसंचारात्पर्वतस्यातिरमणीयत्वमवगम्यते ॥ १६ ॥ ति० घोराणां अतएवपापकर्मणांसंहर्तृणां ॥ १९ ॥ गो० नात्यासादयितव्याः नद्रष्टव्याः नापराद्धव्यावा ॥ २० ॥ ति० ननुपापकारित्वात्तदनासादनेकथंतत्रमार्गणसंभवः अतआह—नहितेभ्यइति । तदेशेमृगपक्षादिवत्प्राकृतमृगसत्त्वभावेतिष्ठतामिलर्थः । अतएवनापराद्धव्याइतिपूर्वव्याख्यातं ॥ शि० ननुगन्धर्वाणामतिप्राबल्यात्कथमन्वेषणसिद्धिरित्यतआह । कपित्वं स्वाभाविकचापल्यं । अनुवर्ततां युष्माकंतेभ्यः गन्धर्वेभ्यः । किंचिद्भयंन । एतेन स्वाभाविकगमनव्याजेनैवान्वेषणंकर्तव्यमितिव्यञ्जितं ॥ स० कपित्वमनुवर्ततां विजातीयानांभवतांतेभ्योभयंकिंचिदपिनभव-

---

[पा०] १ ड.—ज. ट. मुरचीपत्तनं. २ ग. नदीपुरं. घ.—झ. चलापुरं. ३ ग. झ. ञ. मङ्गलेपांच. ४ घ. तथैवालक्षितं. क. तथाचारुक्षितं. ५ छ. झ. ट. महान्सोमगिरिः. ६ ङ.—ट. तत्र. ७ ङ. पक्षिमृगाः. ८ ख. ग. मत्स्यान्गजांश्चैव. ९ ख. गतास्यते. १० क. विहरन्ति. ११ छ. झ. ञ. ट. समुद्रस्य. ख.—ञ. ज. समुद्रेण. क. समुद्रेच. १२ ङ.—ट. गत्वा. १३ क. चतुस्त्रिंशत्. १४ क. महतां. १५ छ. झ. पापकर्मणां. १६ क. पाकशासनसंकाशाः. १७ ङ. च. ज. ञ. समेताश्च. १८ छ. झ. ट. समन्ततः. १९ च. ज. नान्यैस्तेदर्शितव्यास्तैर्वानरैः. २० क. सर्वतस्तादेशात्तवत्रमैः. २१ ख. रक्षन्ते.

त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

सुग्रीवेणोत्तरदिशि शतबलिप्रेषणम् ॥ १ ॥

ततः संदिश्य सुग्रीवः श्वशुरं पश्चिमां दिशम् ॥ वीरं शतबलिं नाम वानरं वानरर्षभः ॥ १ ॥
उवाच राजा धर्मज्ञः सर्ववानरसैन्यमम् ॥ वाक्यमात्महितं चैव रामस्य च हितं तथा ॥ २ ॥
वृतः शतसहस्रेण त्वद्विधानां वनौकसाम् ॥ वैवस्वतसुतैः सार्धं प्रेतिष्ठस्व खमन्त्रिभिः ॥ ३ ॥
दिशं सुदीचीं विक्रान्तां हिमशैलावतंसकाम् ॥ सर्वतः परिमार्गध्वं रामपत्नीमनिन्दिताम् ॥ ४ ॥
अस्मिन्कार्ये विनिर्वृत्ते कृते दाशरथेः प्रिये ॥ ऋणान्मुक्ता भविष्यामः कृतार्थार्थविदो वराः ॥ ५ ॥
कृतं हि प्रियमस्माकं राघवेण महात्मना ॥ तस्य चेतत्प्रतिकारोऽस्ति सफलं जीवितं भवेत् ॥ ६ ॥
अर्थिनः कार्यनिर्वृत्तिमकर्तुरपि यश्चरेत् ॥ तस्य स्यात्सफलं जन्म किं पुनः पूर्वकारिणः ॥ ७ ॥
एतां बुद्धिमवस्थाय दृश्यते जानकी यथा ॥ तथा भवद्भिः कर्तव्यमसक्तप्रियहैतैषिभिः ॥ ८ ॥
अयं हि सर्वभूतानां मान्यस्तु नरसत्तमः ॥ असासु चागतप्रीती रामः परपुरंजयः ॥ ९ ॥
इमानि वनदुर्गाणि नद्यः शैलान्तराणि च ॥ सवन्तः परिमार्गन्तु बुद्धिविक्रमसंपदा ॥ १० ॥
तत्र म्लेच्छान्पुलिन्दांश्च शूरसेनांस्तथैव च ॥ प्रस्थलान्भरतांश्चैव कुरूंश्च सह मद्रकैः ॥ ११ ॥
काम्बोजान्यवनांश्चैव शकानारट्टकानपि ॥ बाह्लीकानृषिकांश्चैव पारवानथ टङ्कणान् ॥ १२ ॥
चीनान्परमचीनांश्च निहारांश्च पुनःपुनः ॥ अन्वीक्ष्य दरदांश्चैव हिमवन्तं तथैव च ॥ १३ ॥
लोध्रपद्मकखण्डेषु देवदारुवनेषु च ॥ रावणः सह वैदेह्या मार्गितव्यस्ततस्ततः ॥ १४ ॥
ततः सोमाश्रमं गत्वा देवगन्धर्वसेवितम् ॥ कालं नाम महासानुं पर्वतं तु गमिष्यथ ॥ १५ ॥
महत्सु तस्य शैलस्य निर्देशेषु गुहासु च ॥ विचिनुध्वं महाभागां रामपत्नीं ततस्ततः ॥ १६ ॥
तमतिक्रम्य शैलेन्द्रं हेमगर्भं महागिरिम् ॥ ततः सुदर्शनं नाम गन्तुमर्हथ पर्वतम् ॥ १७ ॥

अथोत्तरदिशि शतबलिप्रेषणं त्रिचत्वारिंशे—ततः संदिश्येत्यादि ॥ १—३ ॥ हिमशैलावतंसकां हिमशैलालङ्कारां ॥ ४ ॥ कृतार्थार्थविदश्च कृतार्थार्थविदः तेषां वराः ॥ ५—९ ॥ इमानि वक्ष्यमाणानि । नद्यः नदीः ॥ १० ॥ भरतान् इन्द्रद्युम्नादिप्रदेशान् । कुरून् दक्षिणकुरून् । हिमवदन्तान् पुनः पुनरन्विष्य परिमार्गन्त्विति पूर्वेण संबन्धः ॥ ११—१३ ॥ पद्मकाश्चन्दनविशेषाः । साहचर्यात् ॥ १४—१६ ॥ तमतिक्रम्येति ॥ तं कालंनाममहागिरिं अतिक्रम्य । ततः तस्मात् । सुदर्शनं पर्वतं

ति० सर्वैः देशवृत्तामिज्ञैः ॥ २ ॥ शि० प्रतिष्ठस्व समानकार्यकारित्वेनैकीभव ॥ ३ ॥ ति० विक्रान्तेतिशतबलेरसंबुद्धिः ॥ ४ ॥ गो० कृतार्थार्थविदांवराइत्यत्रसवर्णदीर्घआर्षः ॥ ५ ॥ रामानु० लोध्रपद्मकखण्डेष्वित्यत्र पद्मकशब्दश्चन्दनव्यतिरि-

[पा०] १ घ. वानराधिपः. क. ग. ङ. च. वानरर्षभं. छ. झ. ट. वानरेश्वरः, २ ख. ग. छ. झ. ञ. ट. सर्वैः. घ. ज. मन्त्रिभिः. ३ क. ख. ग. ङ.—ट. सप्तमः. ४ च. मद्विधानां. ५ छ. झ. ट. प्रविष्टःसर्वमन्त्रिभिः. क. ग. च. ज. ञ. प्रतीक्षस्वसमन्त्रिभिः. ६ झ. विक्रान्त. ७ छ. झ. ट. पत्नीयशस्विनीं. ८ क. ख. ग. कार्यहिनिर्वृते. ९ ख. बुद्धिंपुरस्कृत्ययथादृश्येतजानकी. क. घ. च.—ट. बुद्धिंसमास्थाय. १० छ. झ. कांबोजयवनांश्चैव. क. कांबोजान्पर्वतांश्चैव. ११ छ. झ. ञ. ट. शकानांपत्तनानिच. १२ घ. बाह्लीकानिषधांश्चैव. १३ क. ग. घ. टङ्कणान्. ङ. च. ज. ञ. कोङ्कणान्. १४ क. ग. नगरांश्च. १५ घ. अन्विष्यवर्षरांश्चैव. ङ.—ट. अन्वीक्ष्यवरदांश्चैव. क. अन्विष्य. १६ ख. छ. झ. ट. विचिन्वध्व. १७ क.—ट. पर्वतंतं. १८ ङ.—ट. शैलेषुपर्वतेषु. १९ क. ख. ग. ङ. छ. ज. झ. ट. विचिन्वत. २० ङ.—ट. रामपत्नीमनिन्दितां. २१ क. ख. ग. ङ.—ट. पर्वतंगन्तुमर्हथ.

ततो देवसखो नाम पर्वतः पतगालयः ॥ नानापक्षिगणाकीर्णो विविधद्रुमभूषितः ॥ १८ ॥
तस्य काननषण्डेषु निर्झरेषु गुहासु च ॥ रावणः सह वैदेह्या मार्गितव्यस्ततस्ततः ॥ १९ ॥
तमतिक्रम्य चाकाशं सर्वतः शतयोजनम् ॥ अपर्वतनदीवृक्षं सर्वसत्त्वविवर्जितम् ॥ २० ॥
तं तु शीघ्रमतिक्रम्य कान्तारं रोमहर्षणम् ॥ कैलासं पाण्डुरं शैलं प्राप्य हृष्टा भविष्यथ ॥ २१ ॥
तत्र पाण्डुरमेघाभं जाम्बूनदपरिष्कृतम् ॥ कुबेरभवनं दिव्यं निर्मितं विश्वकर्मणा ॥ २२ ॥
विशाला नलिनी यत्र प्रभूतकमलोत्पला ॥ हंसकारण्डवाकीर्णा ह्यप्सरोगणसेविता ॥ २३ ॥
तत्र वैश्रवणो राजा सर्वभूतनमस्कृतः ॥ धनदो रमते श्रीमान्गुह्यकैः सह यक्षराट् ॥ २४ ॥
तस्य चन्द्रनिकाशेषु पर्वतेषु गुहासु च ॥ रावणः सह वैदेह्या मार्गितव्यस्ततस्ततः ॥ २५ ॥
क्रौञ्चं तु गिरिमासाद्य बिलं तस्य सुदुर्गमम् ॥ अप्रमत्तैः प्रवेष्टव्यं दुष्प्रवेशं हि तत्स्मृतम् ॥ २६ ॥
वसन्ति हि महात्मानस्तत्र सूर्यसमप्रभाः ॥ देवैरप्यर्चिताः सम्यग्देवरूपा महर्षयः ॥ २७ ॥
क्रौञ्चस्य तु गुहाश्चान्याः सानूनि शिखराणि च ॥ निर्दरांश्च नितम्बाश्च विचेतव्यास्ततस्ततः ॥२८॥
क्रौञ्चस्य शिखरं चापि निरीक्ष्य च ततस्ततः ॥ अवृक्षं कामशैलं च मानसं विहगालयम् ॥२९॥
न गतिस्तत्र भूतानां देवदानवरक्षसाम् ॥ स च सर्वैर्विचेतव्यः ससानुप्रस्थभूधरः ॥ ३० ॥
क्रौञ्चं गिरिमतिक्रम्य मैनाको नाम पर्वतः ॥ मयस्य भवनं यत्र दानवस्य स्वयं कृतम् ॥ ३१ ॥
मैनाकस्तु विचेतव्यः ससानुप्रस्थकन्दरः ॥ स्त्रीणामश्वमुखीनां च निकेतास्तत्र तत्र तु ॥ ३२ ॥
तं देशं समतिक्रम्य आश्रमं सिद्धसेवितम् ॥ सिद्धा वैखानसास्तत्र वालखिल्याश्च तापसाः ॥ ३३ ॥

गन्तुमर्हथ ॥ १७ ॥ पतगालयः पक्षिणामावासभूतः । पक्षिणां वैविध्यमाह—नानापक्षिसमाकीर्ण इति ॥ १८—१९ ॥ तमतिक्रम्य तस्माद्देवसखाख्यपर्वतात्परं । अपर्वतनदीवृक्षं शून्यारण्यस्थलं । वर्तत इति शेषः ॥ २० ॥ कैलासमिति यद्यपि कैलासो हिमवदेकदेश इति पुराणान्तरोक्तं तथापि तदविरुद्धं ज्ञेयं । मध्ये शून्यप्रदेशेपि तावत्पर्यन्तं हिमवानिति ॥ २१ ॥ तत्र कैलासे । नलिनी मानसाख्यसरसी ॥ २२—२३ ॥ तत्र कैलासे ॥ २४ ॥ तस्यकैलासस्य । पर्वतेषु पर्यन्तपर्वतेषु ॥ २५ ॥ बिलं स्कन्दशक्तिकृतं ॥ २६—२८ ॥ शिखरं च प्रधानभूतं शिखरं च । अवृक्षं अवृक्षाख्यं प्रत्यन्तपर्वतं । विहगालयं मानसं मानसाख्यं गिरिं च निरीक्ष्य ते विचेतव्या इति पूर्वेण संबन्धः ॥ २९ ॥ तत्र मानसाख्ये पर्वते । ससानुप्रस्थभूधरः सानवः उपत्यकाः । प्रस्था मध्यतटाः । भूधरा अधित्यकाः ॥ ३० ॥ क्रौञ्चं गिरिमतिक्रम्य क्रौञ्चगिरेः परतः । मैनाको नाम पर्वतः । वर्तत इति शेषः ॥ ३१ ॥ अश्वमुखीनां किंपुरुषस्त्रीणां ॥ ३२ ॥ आश्रमं सिद्धसेवितं । अस्तीति शेषः

ऋवृक्षविशेषवाची । अकालेवनद्रव्यभूतलोध्रादिसहपाठात् ॥ १४ ॥ रामानु० ' ततोदेवसखोनामपर्वतःपर्वतालयाः ' इतिपाठः । पर्वतालयाइतिवानराणांसंबोधनं ॥ १८ ॥ ति० कामशैलं कामतपस्स्थानशैलं ॥ शि० अवृक्षं वृक्षरहितं । कामशैलं दर्शनमात्रेणकामनापूरककौञ्चशैलशिखरं । विहगालयं विहगानांपक्षिगतीनांआसमन्ताद्भावेनलय-अभावोयस्मिंस्तत् । मानसंचशिखरमस्तीतिशेषः ॥ २९ ॥ ति० तत्र मानसे । भूतादीनांगतिर्नै शून्यत्वेनप्रयोजनाभावाद्भूतादयस्तत्रनगच्छन्तीत्यर्थः ॥ ती० सानुपर्वतपार्श्वसमतलः प्रस्थस्तु विषमतलः ॥ स० तत्र मानसे । अयमानसोमानसोत्तरभित्तः ॥ ३० ॥ ति० मैनाकोऽयं समु-

[पा०] १ ङ. च. छ. ज. ञ. ट. समाकीर्णो. २ क. ङ.—ङ. काञ्चनखण्डेषु. ३ क. ग. ङ—ट. निर्दरेषु. ४ च.—ज. ट. पाण्डुरंप्राप्यहृष्टायूयंभविष्यथ. ५ ख. परिच्छदं. ६ ग. च.—ज. ट. रम्यं. ७ ङ.—ट. सर्वलोक. ८ घ. तत्र. ९ ज. क्रौञ्चाख्यं. १० क. वसन्तिच. ११ ङ.—ट. रम्यर्षिताः. १२ क. सम्यग्दिव्यरूपाः. १३ क. घ. क्रौञ्चस्यास्य. १४ ग. निर्झराश्च. क. ज. दर्दराश्च. च. दर्यश्चैव. ट. दर्दुराश्च. १५ क. संनिरीक्ष्य. १६ ख. पर्वतोबहुकन्दरः. क. ग. ञ. ससानुप्रस्थकंदरः. १७ ख.—ट. तत्र. १८ ख. प्रस्थभूतलः. १९ क.—घ. च. छ. ज. ट. मश्वमुखीनांतु. २० ङ.—ट. वैखानसायत्र.

वैन्द्यास्ते तु तपःसिद्धास्तपसा वीतकल्मषाः ॥ प्रष्टव्या चापि सीतायाः प्रवृत्तिर्विनयान्वितैः ॥३४॥
हेमपुष्करसंछन्नं तस्मिन्वैखानसं सरः ॥ तरुणादित्यसंकाशैर्हंसैर्विचरितं शुभैः ॥ ३५ ॥
औपवाह्य कुबेरस्य सार्वभौम इति स्मृतः ॥ गजः पर्येति तं देशं सदा सेह करेणुभिः ॥ ३६ ॥
तत्सरः समतिक्रम्य नष्टचन्द्रदिवाकरम् ॥ अनक्षत्रगणं व्योम निष्पयोदमनादितम् ॥ ३७ ॥
गमस्तिभिरिवार्कस्य स तु देशः प्रकाशते ॥ विश्राम्यद्भिस्तपःसिद्धैर्देवकल्पैः स्वयंप्रभैः ॥ ३८ ॥
तं तु देशमतिक्रम्य शैलोदा नाम निम्नगा ॥ ३९ ॥
उभयोस्तीरयोस्तस्याः कीचका नाम वेणवः ॥ ते नयन्ति परं तीरं सिद्धान्प्रत्यानयन्ति च ॥४०॥
उत्तराः कुरवस्तत्र कृतपुण्यप्रतिश्रयाः ॥ ४१ ॥
ततः काञ्चनपद्माभिः पद्मिनीभिः कृतोदकाः ॥ नीलवैदूर्यपत्राभिर्नद्यस्तत्र सहस्रशः ॥ ४२ ॥
रक्तोत्पलवनैश्चात्र मण्डिताश्च हिरण्मयैः ॥ तरुणादित्यसंदृश्यैर्भान्ति तत्र जलाशयाः ॥ ४३ ॥
महार्हमणिपत्रैश्च काञ्चनप्रभकेसरैः ॥ नीलोत्पलवनैश्चित्रैः स देशः सर्वतो वृतः ॥ ४४ ॥
निस्तुलाभिश्च मुक्ताभिर्मणिभिश्च महाधनैः ॥ उद्भूतपुलिनास्तत्र जातरूपैश्च निम्नगाः ॥ ४५ ॥

॥ ३३ ॥ तपःसिद्धाः अणिमाद्यष्टैश्वर्यसिद्धियुक्ताः ॥ ३४—३५ ॥ औपवाह्यः राजार्हं वाहनं । " राजार्हस्त्वौपवाह्यः " इत्यमरः ॥ ३६ ॥ अथ महामेरुपर्यन्तेलावृतप्रदेशानुपदिशति—तत्सर इति ॥ उत्तरत्र " हिमवन्तं च मेरुं च समुद्रं च तथोत्तरं " इति वक्ष्यमाणत्वादत्र मेरुकीर्तनप्रसक्तिरेव नास्तीति न भ्रमितव्यं । व्योम वर्तत इति शेषः । व्योम्नो नष्टचन्द्रदिवाकरादित्वं नियतमार्गवर्तिनां चन्द्रसूर्यादीनां मेरुनिकटे किरणसंचाराभावात् । तदुक्तं विष्णुपुराणे " यावत्पुरस्तात्तपति तावत्पृष्ठे च पार्श्वयोः । ऋते हेमगिरिर्मेरोरुपरि ब्रह्मणः सभां " इति ॥ ३७ ॥ स देशः अर्कस्य गभस्तिभिरिव स्थितैः स्वयंप्रभैः स्वतःसिद्धज्ञानैः तपःसिद्धैः प्रकाशते ॥ ३८ ॥ निम्नगा वर्तत इति शेषः ॥ ३९ ॥ तस्याः शैलोदायाः । उभयोस्तीरयोः कीचका नाम वेणवः सन्ति । ते उभयतीरजाः कीचकाः । अन्योन्यसंमथिततया गमनसाधनभूताः सन्तः सिद्धान् परं तीरं नयन्ति प्रत्यानयन्ति च ॥ ४० ॥ उत्तराः कुरवः उत्तरकुरुसंज्ञिकाः देशाः । वर्तन्त इति शेषः । कृतपुण्यानां प्रतिश्रयाः आश्रयभूताः आवासभूताः ॥ ४१ ॥ ततः कृतपुण्यप्रतिश्रयत्वाद्धेतोः । कृतपुण्यभोग्यभूमित्वान् उक्तविशेषा नद्यः सन्तीति भावः । पद्मिनीभिः पद्मलताभिः । कृतोदकाः पर्याप्तोदकाः । " युगपर्याप्तयोः कृतं " इत्यमरः ॥ ४२ ॥ रक्तेत्यविभक्तिकनिर्देशः । रक्तैरुत्पलवनैर्हिरण्मयैरुत्पलवनैः । तरुणादित्यसदृशैरुत्पलवनैश्चेत्यर्थः । तत्रात्र तेष्वेतेषु कुरुष्वित्यन्वयः ॥ ४३ ॥ महार्हमणयो नीलरत्नानि तत्तुल्यपत्रैः ॥ ४४ ॥ निस्तुलाभिः वर्तुलाभिः । " वर्तुलं निस्तुलं वृत्तं " इत्यमरः । महाधनैः बहुमूल्यैः । उद्भूतपुलिनाः उन्नतपुलिनाः । निम्नगाः

द्रमादन्यः ॥ ३१ ॥ ति० वैखानसं वैखानसानामिदं ॥ ३५ ॥ ति० तत्सरोतिक्रम्यवर्तमानं व्योम । क्रियानवकाशः चन्द्रादिसर्वज्योतिर्गणप्रकाशरहितः । शि० अनादिमत् आदिरहितं । निलमित्यर्थः ॥ ३७ ॥ ति० नापिसान्धकारमित्याह—गभस्तिभिरिवेति । चन्द्रादिज्योतींष्यभिभूयार्कगभस्तिसदृशैः स्वीयैर्गभस्तिभिःप्रकाशते । केते यैर्गभस्तिभि प्रकाश्यतेतत्राह—"विश्राम्यद्भिरिति । सुखोपविष्टैः स्वतपस्सिद्धैः । अतएवदेवकल्पैः सूर्यादिदेवतुल्यैः स्वयंप्रभैश्चसूर्यादिवत्सदेशःप्रकाश्यते । यतु तत्रचन्द्रादीनांसंचाराभावएवेतितत्र । अमेरुप्रसिद्धचन्द्रादिसंचारवदुत्तरकुरूणांतदूर्ध्वमुपदेशानुपपत्तेः ॥ ३८ ॥ ती० कृतपुण्यप्रतिश्रयाः पुण्यानांप्रतिश्रयाः आश्रयभूताःज्योतिष्टोमादयः तेकृतायैस्तेकृतपुण्यप्रतिश्रयाः ॥ ४१ ॥ ति० कृतोदकाः कृतोदककार्याः ॥ ४२ ॥

[पा०] १ क. च. ञ. ञ. ट. वन्दितव्यास्ततःसिद्धाः. क. ग. वन्द्यास्तुते. २ ञ. संप्रभं. ३ क. ग. ङ.—ट. तत्रवैखानसं. ४ ख. घ. श्रुताः. ५ ख. हस्तिकरेणुभिः. ६ ख. अनक्षत्रगतं. ७ ख. घ.—ज. ञ. ट. अनादिमत्. ८ ख. ग. घ. तैश्चयान्तिपर्यंतीरसिद्धाःप्रत्यानयन्तिच. ९ ख. क. छ. झ. ट. पद्माढ्याः. ग. पद्माभाः. च. ज. ञ. पद्माढ्याः. १० ख. ध्रु. घ. व्यापि. ११ घ. झ. ट. संकाशाभान्ति. ख. घ. ज. संकाशैः. १२ छ. झ. ट. मणिरत्नैश्च. १३ ख. नीलनीरजषण्डैश्च. १४ क. ख. घ. छ. ज. उद्भूतपुलिनाः. १५ ग. जातरूपमयाःशुभाः.

सर्वरत्नमयैश्चित्रैरवगाढा नगोत्तमैः ॥ जातरूपमयैश्चापि हुताशनसमप्रभैः ॥ ४६ ॥
नित्यपुष्पफलास्तत्र नगाः पत्ररथाकुलाः ॥ दिव्यगन्धरसस्पर्शाः सर्वकामान्स्रवन्ति च ॥ ४७ ॥
नानाकाराणि वासांसि फलन्त्यन्ये नगोत्तमाः ॥ ४८ ॥
मुक्तावैडूर्यचित्राणि भूषणानि तथैव च ॥ स्त्रीणां चाप्यनुरूपाणि पुरुषाणां तथैव च ॥
सर्वर्तुसुखसेव्यानि फलन्त्यन्ये नगोत्तमाः ॥ ४९ ॥
महार्हाणि च चित्राणि हैमान्यन्ये नगोत्तमाः ॥ शयनानि प्रसूयन्ते चित्रास्तरणवन्ति च ॥ ५० ॥
मनःकान्तानि माल्यानि फलन्त्यत्रापरे द्रुमाः ॥ पानानि च महार्हाणि भक्ष्याणि विविधानि च ॥ ५१ ॥
स्त्रियश्च गुणसंपन्ना रूपयौवनलक्षिताः ॥ गन्धर्वाः किन्नराः सिद्धा नागा विद्याधरास्तथा ॥
रमन्ते संहितास्तत्र नारीभिर्भास्करप्रभाः ॥ ५२ ॥
सर्वे सुकृतकर्माणः सर्वे रतिपरायणाः ॥ सर्वे कामार्थसहिता वसन्ति सहयोषितः ॥ ५३ ॥
गीतवादित्रनिर्घोषः सोत्कृष्टहसितस्वनः ॥ श्रूयते सततं तत्र सर्वभूतमनोहरः ॥ ५४ ॥
तत्र नासुदितः कश्चिन्नास्तिकश्चिदसत्प्रियः ॥ अहन्यहनि वर्धन्ते गुणास्तत्र मनोरमाः ॥ ५५ ॥
समतिक्रम्य तं देशमुत्तरः पयसां निधिः ॥ ५६ ॥
तत्र सोमगिरिर्नाम मध्ये हेममयो महान् ॥ इन्द्रलोकगता ये च ब्रह्मलोकगताश्च ये ॥
देवास्तं समवेक्षन्ते गिरिराजं दिवं गताः ॥ ५७ ॥
स तु देशो विसूर्योपि तस्य भासा प्रकाशते ॥ सूर्यलक्ष्म्याभिविज्ञेयस्तपतेव विवस्वता ॥ ५८ ॥
भगवानपि विश्वात्मा शंभुरेकादशात्मकः ॥ ब्रह्मा वसति देवेशो ब्रह्मर्षिपरिवारितः ॥ ५९ ॥

भान्तीति शेषः ॥ ४५ ॥ नगोत्तमैः पर्वतश्रेष्ठैः । अवगाढाः प्रविष्टा इति निम्नगाविशेषणं ॥ ४६ ॥ पत्ररथाकुलाः पक्षिभिराकुलाः । सर्वकामान् सर्वाभीष्टान् ॥ ४७—४८ ॥ सर्वर्तुसुखसेव्यानि हेमन्ताद्यृतुष्वपि सुखेन सेवितुं योग्यानि ॥ ४९—५२ ॥ सहयोषितः योषित्सहिताः ॥५३॥ सोत्कृष्टहसितस्वनः उत्कृष्टहासशब्दसहितः ॥ ५४ ॥ असत्प्रियः अविद्यमानाऽनृतः । गुणाः सुखादयः ॥ ५५ ॥ पयसां निधिः लवणसमुद्रः । अस्तीति शेषः ॥ ५६ ॥ तत्र लवणसमुद्रे । मध्ये मध्ये देशे । ये दिवं गता इत्यनुषज्यते ॥ ५७ ॥ स देशः विसूर्योपि रात्रौ विगतसूर्योपि । तस्य सोमगिरेर्भासा प्रकाशते । कथमिव । सूर्यलक्ष्म्या अभिविज्ञेयः ज्ञातव्यपदार्थको देशः । तपता विवस्वतेव ॥ ५८ ॥ विश्वात्मा विश्वशरीरकः । भगवान् षाड्गुण्यपरिपूर्णो वासुदेवः । " एवमेव महाऽऽशब्दो मैत्रेय भगवानिति । परमब्रह्मभूतस्य वासुदेवस्य

कतक० दिव्यगन्धेति ॥ इतउत्तरंकेचिच्छ्लोकाः " रमन्तेसततंतत्रनारीभिर्भास्करप्रभाः " इत्यन्ताःप्रक्षिप्ताः । प्राचीनपुस्तकेष्वनुपलंभात् ॥ ४७ ॥ रामानु० नगोत्तमाः वृक्षश्रेष्ठाः ॥ ४८ ॥ दि० कामार्थसहिता इच्छाविषयीभूतार्थैर्विद्यमानास्सन्तः रतिपरायणाः भवन्तीतिशेषः ॥ ५३ ॥ स० तत्रेत्यनेन बुद्धिसन्निहितत्वादत्रेत्युक्तिः । अत्ययानामनेकार्थत्वादत्रेत्यस्यतत्रेत्यर्थकत्वंद्रष्टव्यं । अत्रेवेतिलुप्तोपमानंवा अत्र किञ्चिन्न्यायात् , असत्प्रियोयथानास्ति तथेत्यर्थः । ति० असत् अविद्यमानं प्रियंयस्यतादृशः ॥ दि० असत्प्रियः असत्कर्मविषयकप्रीतिविशिष्टः । अत्र उत्तरकुरुषु ॥ ५५ ॥ ति० अत्रसुमेर्वन्वेषणंनोक्तं । तत्ररक्षसां वासासंभवादित्याहुः । मध्ये उत्तरसमुद्रमध्ये ॥ ५७ ॥ रामानु० ब्रह्मर्षिपरिवारितइत्येतच्चभगवाञ्शंभुरित्यत्रापिसंबध्यते ।

[पा०] १ क. रत्नमयैर्दिव्यै , २ ग. फलाश्चात्र, ३ च. छ. ज. ञ. सर्वान्कामान्, ४ क. ख ग. नानारूपाणि, ५ क. ङ.—ट. वान्यनुरूपाणि, ६ क. च —ट. महार्हमणिचित्राणि. ७ ङ. छ. झ. ट. फलन्त्यन्ये. ८ ख. फलन्त्यन्येनगोत्तमाः. क. फलन्त्यत्रवनेद्रुमाः. ९ ग. फलानिच. १० झ. ट. संततंतत्र. ११ च.—झ. ट. भास्करप्रभाः. १२ ग. सर्वेचकृत. १३ ग. च. ज. निर्घुष्टाःसोद्धुष्टहसितस्वराः । श्रूयन्तेसततंतत्रसर्वभूतमनोरमाः. १४ ख. घ. सोद्धुष्ट. १५ झ. स्वरैः. ञ. स्वरः. १६ झ. ञ. ट. मनोरमः. १७ क.—झ. ट. शात्र. १८ क.—ट. समतिक्रम्यशैलेन्द्रमुत्तरः. १९ ख. हेमगिरिर्नाम. २० क.—च. ज. ञ. ट. गतं. २१ ग. खगालक्ष्म्याहि. ख. सूर्यलक्ष्म्याहि. २२ क. ग. च.—ट. भगवांस्तत्र.

न कथंचन गन्तव्यं कुरूणामुत्तरेण वः ॥ अन्येषामपि भूतानां नातिक्रामति वै गतिः ॥ ६० ॥
स हि सोमगिरिर्नाम देवानामपि दुर्गमः ॥ तमालोक्य ततः क्षिप्रमुपावर्तितुमर्हथ ॥ ६१ ॥
एतावद्वानरैः शक्यं गन्तुं वानरपुङ्गवाः ॥ अभास्करममर्यादं न जानीमस्ततः परम् ॥ ६२ ॥
सर्वमेतद्विचेतव्यं यन्मया परिकीर्तितम् ॥ यदन्यदपि नोक्तं च तत्रापि क्रियतां मतिः ॥ ६३ ॥

ततः कृतं दाशरथेर्महत्प्रियं महत्तरं चापि ततो मम प्रियम् ॥
कृतं भविष्यत्यनिलानलोपमा विदेहजादर्शनजेन कर्मणा ॥ ६४ ॥
ततः कृतार्थाः सहिताः सबान्धवा मयार्चिताः सर्वगुणैर्मनोरमैः ॥
चरिष्यथोर्वीं प्रतिशान्तशत्रवः सहप्रिया भूतधराः प्लवङ्गमाः ॥ ६५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

नान्यगः " इत्युक्तेः । नचेदमपि शंभुविशेषणं । एकादशात्मकत्वविरोधात् । नहि विश्वात्मकत्वमेकादशात्मकत्वं चैकत्र संभवति । एकादशात्मकः एकादशमूर्तिः । शंभुः रुद्रः । देवेशो ब्रह्मा । ब्रह्मर्षिपरिवारितः तत्र वसति । इयं च क्रिया सर्वत्रापि संबध्यते । यद्यत्र कश्चित् प्रकरणाभावाद्विष्णुरत्र नोच्यत इति कथयेत् तर्हि रुद्रोपि नोच्यते । कथमिति चेत् शं भावयतीति शम्भुरिति व्युत्पत्त्या " शम्भू ब्रह्मत्रिलोचनौ " इति कोशकारवचनाच्च सर्वाण्यपि विशेषणानि ब्रह्मपराणि भवेयुरिति ॥ ५९ ॥ कुरूणामुत्तरेण " षष्ठ्यपीष्यते " इत्यनेनैनपा योगे षष्ठी । अन्येषामपि शक्तिविशेषविशिष्टदैत्यादीनामपि । वः युष्माभिः । न गन्तव्यं ॥ ६०—६१ ॥ एतावत् उत्तरकुरुदेशपर्यन्तं । ततः परं उत्तरकुरुदेशात्परं समुद्रद्वीपादिकं । अभास्करममर्यादं च प्रदेशं न जानीमः । ततः परस्य देशस्य सर्वैर्गन्तुमशक्यत्वेन मयापि अनवगतत्वादिति भावः ॥ ६२ ॥ यदन्यदपि नोक्तं च तत्रापि क्रियतां मतिः । गम्यत्वेनोक्तप्रदेशानां यत्पार्श्वादिकमनुक्तं तत्रापि अन्वेषणे मतिः कर्तव्येत्यर्थः ॥ ६३ ॥ ततः अन्वेषणानन्तरं । विदेहजादर्शनजेन कर्मणा दाशरथेर्महत्प्रियं कृतं भविष्यति । मम चापि ततः दाशरथिप्रियात् । महत्तरं प्रियं कृतं भविष्यतीति योजना ॥ ६४ ॥ भूतधराः प्राणिभृतः प्राणिभिरुपजीव्या इति यावत् ॥ ६५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

अन्यथा तस्यसंनिहितब्रह्ममात्रसंबन्धेआद्ययोरेकैकविशेषणत्वंतृतीयस्यद्विविशेषणत्वमितिवैरूप्यंस्यात् ॥ ती० भगवान्नारायणः । रूढनामेदं । सहिभगवच्छब्देनझटितिप्रतीयते ॥ ति० विश्वमततिव्याप्नोतीतिविश्वात्मा व्यापकः । तेनविष्णुरूपः । विष्लृव्याप्तौइत्यनुसारात् । सएवशंभुः शंभवत्यस्मात्सः । सएवैकादशात्मकः एकादशानुवाकार्थैकादशरुद्रात्मकः । सएवब्रह्मा बृंहणत्वात्जगत्स्रष्टृत्वात् एवंरूपत्रयात्माभगवान् तत्रसोमगिरौ । कार्यब्रह्मलोकत्वाद्वसतीत्यर्थः ॥ स० भगवान् स्वोचितैश्वर्यादिगुणः । विश्वात्मा समस्तमनोनियामकः । एकादशात्मकः तद्गणस्वामी । शंभुः तत्रवसति । अनेनात्रभगवच्छब्दस्यश्रवणात्तस्यनारायणेरूढत्वात्सएवात्रतेनग्राह्यइतिनिरस्तं । " एतस्यांसाध्विसन्ध्यायांभगवान्भूतभावनः । परीतोभूतपार्षद्भिः " इत्यादौभागवतादौभवेपि भगवच्छब्दप्रयोगात् । " अन्यतमोमुकुन्दात्कोनामलोकेभगवत्पदार्थः " इतितुनिरवधिकैश्वर्यादिमद्बोधकभगवच्छब्दविवक्षया प्रवृत्तमितिनतद्विरोधः । ब्रह्माचवसति ॥ ५९ ॥ ति० नानुक्रामतिवैगतिः । तस्यकार्यब्रह्मलोकत्वेनब्रह्मर्षिव्यतिरिक्तस्यतत्रागतेः । ब्रह्मर्षिपदेनदहरादिमार्गेणब्रह्मोपासकाऋषयउच्यन्ते ॥ ६० ॥ स० भूतधराः धरन्तीतिधराः भूतस्यधराः सीतालाभेनयथार्थवचनधराः न्यायमार्गधरावा । " भूतंक्ष्मादौपिशाचादौन्याय्येसत्योपमानयोः " इतिविश्वः ॥ शि० सहिताः हितसहिताः ॥ ६५ ॥ इतित्रिचत्वारिंशःसर्गः ॥ ४३ ॥

[पा०] १ ख. घ. कथंचनन. २ ङ. ज. म. मुत्तरेणच. ३ ग. च. ज.—ट. नानुक्रामति. ४ ख. हेमगिरिर्नाम. ५ ग. वानरसत्तमाः. ६ छ. झ. ट. महत्प्रियं. ७ ङ. छ. ज. ट. शात्रवाः.

चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

हनूमतिकार्यसाधकतांनिश्चितवतासुग्रीवेणतंप्रतितत्पराक्रमप्रशंसनपूर्वकंविशेषतःसीतान्वेषणचोदनं ॥ १ ॥ तेन हनूमति कार्यसाधकतामनुमिमानेनरामेणसीताप्रत्ययायतस्मिन्नभिज्ञानत्वेननिजनामाङ्किताङ्गुलीयकदानम् ॥ २ ॥ हनूमता रामचरणप्रणामपूर्वकंवानरसेनयासहसीतान्वेषणायप्रस्थानम् ॥ ३ ॥

विशेषेण तु सुग्रीवो हनुमत्यर्थमुक्तवान् ॥ सहि तस्मिन्हरिश्रेष्ठे निश्चितार्थोऽर्थसाधने ॥ १ ॥
अब्रवीच्च हनूमन्तं विक्रान्तमनिलात्मजम् ॥ सुग्रीवः परमप्रीतः प्रभुः सर्ववनौकसाम् ॥ २ ॥
न भूमौ नान्तरिक्षे वा नाम्बरे नामरालये ॥ नाप्सु वा गतिसङ्गं ते पश्यामि हरिपुङ्गव ॥ ३ ॥
सासुराः सहगन्धर्वाः सनागनरदेवताः ॥ विदिताः सर्वलोकास्ते ससागरधराधराः ॥ ४ ॥
गतिर्वेगश्च तेजश्च लाघवं च महाकपे ॥ पितुस्ते सदृशं वीर मारुतस्य महौजसः ॥ ५ ॥
तेजसा वापि ते भूतं समं भुवि न विद्यते ॥ तद्यथा लभ्यते सीता तत्त्वमेवोपपादय ॥ ६ ॥
त्वय्येव हनुमन्स्वस्ति बलं बुद्धिः पराक्रमः ॥ देशकालानुवृत्तिश्च नयश्च नयपण्डित ॥ ७ ॥
ततः कार्यसमासङ्गमवगम्य हनूमति ॥ विदित्वा हनुमन्तं च चिन्तयामास राघवः ॥ ८ ॥
सर्वथा निश्चितार्थोयं हनूमति हरीश्वरः ॥ निश्चितार्थकरश्चापि हनुमान्कार्यसाधने ॥ ९ ॥

अथ निश्चितकार्यसाधनसामर्थ्याय हनुमते अङ्गुलीयकदानं चतुश्चत्वारिंशे—विशेषेणत्वित्यादि ॥ हनुमति विषये । अर्थं वक्ष्यमाणार्थं । उक्तवान् । विशेषार्थकथनेहेतुमाह—स हीति । अर्थसाधने विषये निश्चितार्थः ॥ १ ॥ संग्रहेणोक्तमर्थं विस्तरेण दर्शयति—अब्रवीच्चेत्यादिना ॥ २ ॥ भूमौ सजातीयप्रतिपक्षबहुलायां । अन्तरिक्षे निरालम्बे मेघादिसंचारमार्गे । अम्बरे वातचक्राक्रान्तप्रदेशे । अमरालये प्रबलाधिष्ठिते स्वर्गे । अप्सु तिर्यक्संचारानर्हासु वा । गतिसङ्गं गतिविलम्बं । नपश्यामि ॥ ३—४ ॥ गतिः अप्रतिहतगतिः ॥ ५ ॥ भूतं जन्तुः । तत् तस्मात्कारणात् । तत् सीतान्वेषणं । उपपादय संपादय ॥ ६ ॥ नयपण्डितेत्यनन्तरमितिकरणंबोध्यं । इत्यब्रवीदिति पूर्वेणान्वयः ॥ ७ ॥ ततः सुग्रीववचनात् । हनूमति कार्यसमासङ्गं कार्यविषयासक्तिं । अवगम्य अस्मिन् सुग्रीवेण स्वकार्यभारो निक्षिप्त इति ज्ञात्वेत्यर्थः । स्वयमपि हनुमन्तं कार्यसाधकं विदित्वाचिन्तयामास ॥ ८ ॥ चिन्ताप्रकारमाह—सर्वथेत्यादिना श्लोकद्व-

रामानु० हनुमत्यर्थमुक्तवान् निक्षिप्तवान् । धातूनामनेकार्थत्वात्कर्माधिकरणवाचिपदसमभिव्याहृतोवचिर्निक्षेपेवर्तते ॥ ती० अर्थं प्रयोजनं । उक्तवान् निक्षिप्तवानित्यर्थः । "वायुपुत्रसमीपंतुगत्वातंवाक्यमब्रवीत् । शृणुमद्वचनंवीरहनुमन्मारुतात्मज । अयमिक्ष्वाकुदायादोराजारामःप्रतापवान् । सर्वात्मासर्वलोकेशोविष्णुर्मानुषरूपधृत्" इति । अत्रहेतुमाह—सहीति । यस्मात्कारणात् सुग्रीवः अर्थसाधनेविषये तस्मिन्हरिश्रेष्ठेनिश्चितार्थः । अयंभावः । सीतान्वेषणायसर्वास्वपिदिक्षुवानरान्नियुज्य हनुमतस्सर्वोत्तमत्वादनेनैवकार्यसिद्धिर्भविष्यतीतिनिश्चित्यतत्प्रशंसापूर्वकंतंप्रत्यर्थमुक्तवानिति ॥ १ ॥ ती० अन्तरिक्षे पतत्रिमेघसंचारप्रदेशे । अंबरे तदुपरिसिद्धविद्याधरादिसंचरणप्रदेशे ॥ स० गतिसङ्गंगमनव्यवधानकरं । अन्तरिक्षं पक्षिमार्गः । अंबरं व्योम । अमरालयः स्वर्गः । यद्वा अंबरे अमरालयेइतिसामानाधिकरण्येनान्वयः । अथवा अप्सुआलये सर्वप्रलये । हेअमर अविनाशिन् । गतिसङ्गं ज्ञानप्रतिबन्धं । "प्रलयकालेपिप्रतिभातपरावरः" इत्युक्तेः । ना पुमान् अहं नपश्यामीतिभावः ॥ ३ ॥ स० पितुः वायोः । गत्या गति सदृशी । वेगेनवेगः । तेजसातेजः । लाघवेनलाघवंचेत्यन्वयोद्रष्टव्यः ॥ ५ ॥ ति० ततः एवंसुग्रीववचनात् । कार्यसमासङ्गं कार्यसिद्धिसंबन्धं । अवगम्य स्वयंचतत्सामर्थ्याद्यनुभवेनतस्मिन्कार्यसाधकत्वंविदित्वा । चात्तद्गम्यदेशएवसीतांविदित्वा चिन्तयामास । अस्मिन्स्वकर्तव्यसमर्पणंयुक्तमितिविचारयामास ॥ शि० अवगम्यहनूमति अवगम्यः सर्वकार्यसाधकत्वेनसर्वैर्ज्ञातव्यः । सचासौहनुमानितिकर्मधारयः । तस्मिन् । हनुमन्तंचिन्तयामास तद्गुणान्सस्मारेत्यर्थः ॥ ८ ॥ स० हनुमान् निश्चितार्थतरः । इदंच "अत्यन्तमन्तरङ्गत्वात्प्रधानाङ्गंहिमारुतिः" इत्युक्तेःप्रधानाङ्गत्वाद्युक्तमितिभावः ।

[पा०] १ ङ. च. ज. ञ. सविशेषेण. २ ङ. छ. ज. ञ. न्हरिश्रेष्ठो ३ ज. गतिभङ्गं. ४ घ. सामराः. च. ज. ससुराः. ५ क. सनागहरिदेवताः. छ. सनागोरगदेवताः. ६ ङ. च. झ. ञ. ट. नसमंभुवि. ७ ग. ङ. च. छ. ञ. ट. तत्त्वमेवानुचिन्तय. ८ क. ग. छ. झ. ट. हनुमन्नस्ति. ङ. च. ज. ञ. हनुमन्सन्ति. ९ ङ. च. ज. ञ. विदित्वाचहनूमन्तं. १० ग. छ. झ. ट. निश्चितार्थतरश्चापि. क. निश्चितार्थतरश्चायं.

तदेवं मयितस्यास्य परिज्ञातस्य कर्मभिः ॥ भर्त्रा परिगृहीतस्य ध्रुवः कार्यफलोदयः ॥ १० ॥
तं समीक्ष्य महातेजा व्यवसायोत्तरं हरिम् ॥ कृतार्थ इव संवृत्तः प्रहृष्टेन्द्रियमानसः ॥ ११ ॥
ददौ तस्य ततः प्रीतः स्वनामाङ्कोपशोभितम् ॥ अङ्गुलीयमभिज्ञानं राजपुत्र्याः परंतपः ॥ १२ ॥
अनेन त्वां हरिश्रेष्ठ चिह्नेन जनकात्मजा ॥ मत्सकाशादनुप्राप्तमनुद्विग्नानुपश्यति ॥ १३ ॥
व्यवसायश्च ते वीर सत्त्वयुक्तश्च विक्रमः ॥ सुग्रीवस्य च संदेशः सिद्धिं कथयतीव मे ॥ १४ ॥
सं ते शृणु हरीश्रेष्ठः स्थाप्य मूर्ध्नि कृताञ्जलिः ॥ वन्दित्वा चरणौ चैव प्रस्थितः प्लवगोत्तमः ॥१५॥
स तत्प्रकर्षन्हरिणां बलं महद्बभूव वीरः पवनात्मजः कपिः ॥
गताम्बुदे व्योम्नि विशुद्धमण्डलः शशीव नक्षत्रगणोपशोभितः ॥ १६ ॥
अतिबल बलमाश्रितस्तवाहं हरिवरविक्रम विक्रमैरनल्पैः ॥
पवनसुत यथाभिगम्यते सा जनकसुता हनुमंस्तथा कुरुष्व ॥ १७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

येन ॥ अन्ते इतिकरणं बोध्यं । कार्यसाधने विषये निश्चितार्थः निश्चितकार्यसाधकः । हनुमानपि निश्चितार्थकरः ॥ ९ ॥ अस्य कार्यफलोदयः अस्य संबन्धिनी कार्यसिद्धिः । ध्रुवः निश्चितः ॥ १० ॥ व्यवसायोत्तरं व्यवसायेन उत्तरं श्रेष्ठं । कृतार्थः संवृत्त इव । अमन्यतेतिशेषः ॥ ११ ॥ राजपुत्र्याः अभिज्ञानं अभिज्ञायतेनेनेत्यभिज्ञानं । ननु त्यक्तसकलधनस्य वन्यवृत्त्या वर्तमानस्य कुतोऽङ्गुलीयकमिति चेत् इदमेकमेतत्कार्यार्थं रक्षितवान् । अतएवाङ्गुलीयमुन्मुच्यैवि नोक्तं । यद्वा रामनामाङ्कितमङ्गुलीयकं सीतायाः कदाचिद्रावणागमनात्पूर्वं प्रणयपरत्वेन रामेण स्वीकृतमिति बोध्यम् । यद्वा भार्यालेहेन कनिष्ठिकायां सदा मुद्रिका धार्यत इति देशाचारः । यद्वा विवाहकाले जनकेन दत्तमिदं वरालङ्कारत्वेन । " गृहीत्वा प्रेक्षमाणा सा भर्तुः करविभूषणं " इत्युक्तेः ॥ १२ ॥ भवद्धनमेवालं किमर्थमेतदीयते तत्राह—अनेनेति ॥ पश्यति द्रक्ष्यति ॥ १३ ॥ हनुमन्तं प्रशंसति—व्यवसाय इति ॥ सत्त्वयुक्तो विक्रमः बलं च विक्रमश्चेत्यर्थः ॥ १४—१५ ॥ प्रकर्षन् नयन् । हरिणामित्यत्र दीर्घाभावआर्षः ॥ १६ ॥ पुनरपि गच्छन्तंप्रति रामवचनं—अतिबलेति ॥ अतिबलेति संबुद्धिः । हरिवरविक्रम सिंहश्रेष्ठविक्रम सुग्रीवतुल्यविक्रमेति वा । श्लोकान्ते इति रामोऽब्रवीदित्यध्याहार्यं ॥ १७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

शि० कार्यसाधने निश्चितः अर्थतरः अत्युपायोयेनसः । योहनूमान् तस्मिन्हनूमति सर्वथा सर्वप्रकारेण । निश्चितः अर्थोज्ञानकीदर्शनं येनसः हरीश्वरः सुग्रीवः । अस्तीतिशेषः । एतेनसुग्रीवस्ययाथार्थ्यवेदितृत्वंव्यञ्जितं ॥ किंच हरीश्वरोहनुमति निश्चितार्थोस्ति । हनूमान्तुनिश्चितार्थतरः । एतेनहनुमतोज्ञानाधिक्यंसूचितं । पूर्वकल्पे त्वरार्थस्यात्रविवक्षयानेवंव्यञ्जनेतिबोध्यं ॥ ९ ॥ ति० प्रस्थितस्य भर्त्राप्रस्थापितस्य । परिज्ञातस्य परीक्षितस्य । परिगृहीतस्य श्रेष्ठत्वेतिशेषः । कार्यस्यफलोदयः सीतादर्शनप्राप्तिरूपः । स ध्रुवः निश्चितार्थः ॥ १० ॥ ति० ततः निश्चितकार्यसाधकत्वादेवहेतोः ॥ स० अभिज्ञानं प्रत्यभिज्ञानद्वाराविश्वासजनकं ॥ १२ ॥ ति० तत् अभिज्ञानपदार्थं ॥ १५ ॥ स० हरिणां हरीणां ॥ यद्वा हरः मनःश्येषामस्तितेहरिणः मनस्विनः सेषां । अन्यजनकयोरभिमन्यमानाभिमानिनोः " ब्रह्मादिकंमुखं " " महत्तत्त्वतुर्मुखात् " इत्यादिवदैक्यव्यपदेशात् हरिणांमनस्विनामित्यर्थस्संभवतीतिशेषं ॥ १६ ॥ ति० कृतकेनतुचतुश्चित्वारिंशत्संख्यश्लोकःसर्गोऽयमुक्तः ॥ १७ ॥ इतिचतुश्चत्वारिंशःसर्गः ॥ ४४ ॥

[पा०] १ ग. छ. झ. ट. तदेव. २ छ. झ. ट. संहृष्टः. ३ क. ग. छ. झ. ट. सतद्बल. ४ क. च. छ. झ. ग. ट. कृत्वा. ५ क. चरणावेव. ६ क. ग. ङ. छ.—ट. प्लवगर्षभः. ७ च.—झ. ट. महद्बलंबभूव.

पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

विनतादिभिश्चतुर्भिस्सेनाधिपैर्हर्षोत्कर्षात्सवीरत्वादगर्जद्भिः स्वस्वसैन्यैःसह सुग्रीवोद्दिष्टस्वस्वदिगभिप्रस्थानम् ॥ १ ॥

सर्वांश्चाहूय सुग्रीवः प्लवगान्प्लवगर्षभः ॥ समस्तानब्रवीद्भूयो रामकार्यार्थसिद्धये ॥
एवमेतद्विचेतव्यं यन्मया परिकीर्तितम् ॥ १ ॥
तदुग्रशासनं भर्तुर्विज्ञाय हरिपुङ्गवाः ॥ शलभा इव संछाद्य मेदिनीं संप्रतस्थिरे ॥ २ ॥
रामः प्रस्रवणे तस्मिन्न्यवसत्सहलक्ष्मणः ॥ प्रतीक्षमाणस्तं मासं यः सीताधिगमे कृतः ॥ ३ ॥
उत्तरां तु दिशं रम्यां गिरिराजसमावृताम् ॥ प्रतस्थे सहसा वीरो हरिः शतबलिस्तदा ॥
पूर्वां दिशं प्रति ययौ विनतो हरियूथपः ॥ ४ ॥
ताराङ्गदादिसहितः प्लवगो मारुतात्मजः ॥ अगस्त्यचरितामाशां दक्षिणां हरियूथपः ॥ ५ ॥
पश्चिमां तु भृशं घोरां सुषेणः प्लवगेश्वरः ॥ प्रतस्थे हरिशार्दूलो दिशं वरुणपालिताम् ॥ ६ ॥
ततः सर्वा दिशो राजा चोदयित्वा यथातथम् ॥ कपिसेनापतीन्मुख्यान्मुमोद सुखितः सुखम् ॥ ७ ॥
एवं संबोधिताः सर्वे राज्ञा वानरयूथपाः ॥ स्वां स्वां दिशमभिप्रेत्य त्वरिताः संप्रतस्थिरे ॥ ८ ॥
आनयिष्यामहे सीतां हनिष्यामश्च रावणम् ॥ नदन्तश्चोन्नदन्तश्च गर्जन्तश्च प्लवङ्गमाः ॥
क्ष्वेलन्तो धावमानाश्च विनदन्तो महाबलाः ॥ ९ ॥

अथ प्रेषितानां वानराणां सन्नाह उच्यते पञ्चचत्वारिंशे—सर्वांश्चेत्यादि ॥ सर्वानाहूय ततः समस्तान् संघीभूतान् प्लवगान् अब्रवीत् । यद्वा सम इति च्छेदः । समः सर्वत्र पक्षपातरहितः । एतत् पूर्वोक्तं । एवं अस्मदुक्तप्रकारेण । इत्यब्रवीदिति संबन्धः ॥१॥ शलभा इति बहुत्वमात्रेदृष्टान्तः ॥ २ ॥ सीताधिगमे सीताधिगमनिमित्तं । कृतः कृतसंकेतः ॥ ३ ॥ प्रतस्थे प्रस्थातुमुद्युक्तः । सर्गान्ते सुग्रीवसन्निधौ सन्नाहकथनात् ॥ ४—६ ॥ मुमोद सुखितः सुखमिति । पूर्वं राज्यलाभेन सुखितो राजा सुखं यथा भवति तथा मुमोद । उत्तरोत्तरं सुखं प्रापेत्यर्थः ॥ ७ ॥ स्वांस्वांदिशं स्वांशभूमण्डलं ॥ ८ ॥ आनयिष्यामह इत्यत्र इतिकरणं द्रष्टव्यं । आनयिष्यामह इति नदन्त इत्यन्वयः । नदन्तः शब्दं कुर्वन्तः । उन्नदन्तः पुनः संतोषातिशयेन उच्चैर्नदन्तः । गर्जन्तः आत्मश्लाघां कुर्वन्तः । क्ष्वेलन्तः सिंहनादं कुर्वन्तः । विनदन्तः विविधान्विकृतान्वा नादान्कुर्वन्तः । संप्रतस्थिर इति

स० सर्वान् वैरिहिंसकान् । सर्व हिंसायमितिधातोः । यद्वा समस्तान् मासमध्येनायाताश्चेन्मच्छिक्षाविषयाइतिपूर्वसम्यङ्निरस्तान् । रामकार्यार्थसिद्धये कार्यसीतालाभश्चअर्थोमोक्षश्चतयोःसिद्ध्यर्थं । एवंच नार्थानर्थतेतिज्ञेयं ॥ १ ॥ स० अगस्त्यचरितां अगस्त्यस्य चरितंभावेक्तः । चरितंचरणंसंचारोयस्यास्सा । तां । अगस्त्यस्यचरितंचरित्रंयस्यामितिवा ॥ ६ ॥ शि० वानराणामनुकूलत्वेनसुखितोराजासुग्रीवः कपिसेनापतीन् यथातथं यथायोग्यं । सर्वादिशश्चोदयित्वा मुमोद दानसत्कारादिनाप्रमोदयामास ॥ स० सुखितः आज्ञानुसारिभिर्हरिभिःसुखप्रापितः । सुखं सु शोभनानि खानि इन्द्रियाणियस्मिन्कर्मणितद्यथाभवतितथा मुमोद स्वयंतुतोष ॥ ७ ॥

[पा०] १ ङ.—ट. समस्तांश्चाब्रवीद्राजा. २ ङ.—ट. भवद्भिर्वानरोत्तमैः. ३ ग. तस्मिन्नुवाससह. ४ ङ. झ. ट. सीताधिगमनेकृतः. ङ. च. ज. ञ. सीताभ्यधिगमेकृतः. ५ ख. सउत्तरां. क. उत्तरांच. ६ क. गम्यां. ७ ख. घ. नामयूथपः. ८ ग. ताराङ्गदाभ्यांसहितः. ९ क. ख. हनूमान्मारुतात्मजः. च.—ट. प्लवगःपवनात्मजः. ग. हनूमान्पवनात्मजः. १० झ. ट. अगस्त्याचरितां. ११ ग. ङ.—ट. पश्चिमांच. क. पश्चिमांतांदिशंवीरः. १२ क. ग. राजाप्रस्थाप्यविजयायतान्. १३ ख. यथाबलं. ङ. ज. यथायथं. १४ ङ.—ट. कपिसेनापतिर्वीरोमुमोद. १५ क.—ट. संचोदिताः. ग. संबोधितास्तेन. १६ क. ख. वानरपुङ्गवाः. १७ क. तांतां. १८ च. ज. ञ. मनुप्रेत्य. १९ आनयिष्यामहेइत्यर्थं ङ.—ट. पाठेषुक्ष्वेलन्तोधावमानाश्चेत्यर्धोत्परतोदृश्यते. २० ङ.—ट. क्ष्वेडन्तो. २१ क. ख. ययुःप्लवगसत्तमाः.

अहमेको हनिष्यामि प्राणं रावणमाहवे ॥ ततश्चोन्मथ्य सहसा हरिष्ये जनकात्मजाम् ॥ १० ॥
वेपमानां श्रमेणाद्य मवद्भिः स्थीयतामिह ॥ एक एवाहरिष्यामि पातालादपि जानकीम् ॥ ११ ॥
विमथिष्याम्यहं शैलान्पातयिष्याम्यहं गिरीन् ॥ धरणीं दारयिष्यामि क्षोभयिष्यामि सागरान् ॥१२॥
अहं योजनसंख्यायाः प्लुविता नात्र संशयः ॥ शतं योजनसंख्यायाः शतं समधिकं प्लवम् ॥१३॥
भूतले सागरे वापि शैलेषु च वनेषु च ॥ पातालस्यापि वा मध्ये न ममाच्छिद्यते गतिः ॥ १४ ॥
इत्येकैकं तदा तत्र वानरा बलदर्पिताः ॥ ऊचुश्च वचनं तत्र हरिराजस्य सन्निधौ ॥ १५ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

षट्चत्वारिंशः सर्गः ॥ ४६ ॥

रामेणात्मनः सर्वभूमण्डलविज्ञानकारणं पृष्टेनसुग्रीवेण तंप्रति वालिदुन्दुभिवृत्तादिकथनेन तन्मूलकस्वविषयकवालिविद्वेषादिनिवेदनादिपूर्वकं स्वस्य सर्वभूमण्डलपरिवर्तनस्य तत्कारणत्वोक्तिः ॥ १ ॥

गतेषु वानरेन्द्रेषु रामः सुग्रीवमब्रवीत् ॥ कथं भवान्विजानीते सर्वं वै मण्डलं भुवः ॥ १ ॥
सुग्रीवस्तु ततो राममुवाच प्रणतात्मवान् ॥ श्रूयतां सर्वमाख्यास्ये विस्तरेण नरर्षभ ॥ २ ॥
यदा तु दुन्दुभिं नाम दानवं महिषाकृतिम् ॥ परिकालयते वाली मलयं प्रति पर्वतम् ॥ ३ ॥
तदा विवेश महिषो मलयस्य गुहां प्रति ॥ विवेश वाली तत्रापि मलयं तर्जिघांसया ॥ ४ ॥

पूर्वेणान्वयः ॥ ९ ॥ अहमित्यादि सागरानित्यन्तमेकान्वयं ॥ १०—१२ ॥ अहं योजनसंख्यायाः शतं प्लुवितेत्येकस्य वचनं । योजनसंख्यायाः शतं समधिकमित्यन्यस्य । हिः प्रसिद्धौ ॥ १३—१५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहारास्याने किष्किन्धाकाण्डव्याख्याने पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

अथ रामाय सुग्रीवेण स्वस्य सर्वभूमण्डलज्ञानमूलकथनं षट्चत्वारिंशे—गतेष्वित्यादि ॥ १ ॥ प्रणतात्मवान् प्रणतदेहवान् ॥ २ ॥ केचिदत्र दुन्दुभिशब्देन उपचारान्मायाख्येवोच्यते । मायाविनो वृत्तान्तस्यानुवादादित्याहुः । तन्न । महिषाकृतिमित्यस्य विरोधात् । "तदा विवेशमहिषः, महिषो विनशेदिति" इति पुनःपुनरुक्तेश्च रामेण विदितवृत्तान्तस्य न वचनमर्हति । तर्हि कथमुपपत्तिरितिचेत् उच्यते । पूर्वं मायाविवृत्तान्ताभिधानादत्र महिषवृत्तान्ताभिधानाच्च तदानीमुभावप्यागताविति वेदितव्यं । तत्र महिषः कथंचित्स्वात्मानं गोपयित्वा वालिनि विनिर्गते पुनर्मत्तः कदाचिदागत्य वालिना हत इत्यविरोधः । वक्ष्यत्येवमन्यत्रापि विषये । रावणेन सीतोपप्लवे उद्युक्ते मन्दोदरीधान्यमालिन्यौ निवारिण्यौ । तत्रैका पूर्वमुक्ता अन्याः वानरसन्निधावनुवादे । तस्माद्यमृषेः स्वभाव इति बोध्यम् । परिकालयते पलाययति । कलतेर्गमितो वृद्धिरार्षी । तत्रापि गुहायामपि । तर्जि-

ति० एकैकः एकशइत्यर्थः ॥ १५ ॥ इतिपञ्चचत्वारिंशःसर्गः ॥ ४५ ॥

स० अव्ययानामनेकार्थत्वाद्वै इत्यर्थे । ततश्चइत्यत्रवीदित्यन्वयः ॥ १ ॥ स० प्रणतात्मवान् प्रणतश्चासावात्मादेहश्चसोस्यास्तीतिसतथा । एकदेशिनेत्यादिनिर्देशात्रकर्मधारयादितिनआनिर्देशाच्चमलयंप्रतिनिषेधोऽनिष्टइतिप्रणतात्मवानितिसाधुः । आत्मानोस्यास्तीत्यात्मवान् । प्रणतश्चासावात्मवांश्चेतिवा ॥ २ ॥ स० दुन्दुभिरितिजनकइत्यादिषत्कुलनाम । मायावीतितन्मात्रनामेति दुन्दुभेःपितृत्वात्कथंमायाविनिपुत्रेतन्नामेतिनिरस्तं । अथवा पितृनाम्नालक्षणयापुत्रोगृह्यते ॥ ति० अत्रदुन्दुभिशब्देनमहिषशब्दे-

[पा०] १ क. ग.—ट. वधिष्यामि. २ क. च. ज. ञ. निर्मथिष्याम्यहं. क.—घ. छ. झ. ट. विधमिष्याम्यहं. ३ क.—क. छ. ञ. झ. ट. भूतान्दारयिष्याम्यहं. ४ क. च. ज. ञ. गिरिं. ५ ख. शोषयिष्यामि. ६ क.—ट. प्लवेयं. ७ क. ख. घ.—ट. शतयोजनं. ८ क. तथा. ९ ज. चापि. १० क. ङ.—ट. इत्येकैकः. ११ क.—ट. तस्य. क. ग. घ. तस्मिन्हरि. १२ च.—ट. सुग्रीवश्च. १३ छ.—ट. चवोमम. १४ घ. यदाहि. १५ क.—ट. प्रतिकालयते. १६ क. ख. पर्वतंप्रति. १७ क. यदा.

ततोऽहं तत्र निक्षिप्तो गुहाद्वारि विनीतवत् ॥ न च निष्क्रमते वाली तदा संवत्सरे गते ॥ ५ ॥
ततः क्षतजवेगेन आपूपूरे तदा बिलम् ॥ तदहं बिलितो दृष्ट्वा भ्रातृशोकविषार्दितः ॥
अथाहं कृतबुद्धिस्तु सुव्यक्तं निहतो गुरुः ॥ ६ ॥
शिला पर्वतसंकाशा बिलद्वारि मयाऽऽहृता ॥ अशक्नुवन्निष्क्रमितुं महिषो विनशेदिति ॥ ७ ॥
ततोऽहमागां किष्किन्धां निराशस्तस्य जीविते ॥ राज्यं च सुमहत्प्राप्तं तारया रुमया सह ॥ ८ ॥
मित्रैश्च सहितस्तत्र वसामि विगतज्वरः ॥ ९ ॥
आजगाम ततो वाली हत्वा तं दानवर्षभम् ॥ ततोऽहमददां राज्यं गौरवाद्भयसंवृतः ॥ १० ॥
स मां जिघांसुर्दुष्टात्मा वाली प्रव्यथितेन्द्रियः ॥ परिकालयते क्रोधाद्धावन्तं सचिवैः सह ॥११॥
ततोऽहं वालिना तेन सानुबन्धः प्रधावितः ॥ नदीश्च विविधाः पश्यन्वनानि विविधानि च ॥ १२ ॥
आदर्शतलसंकाशा ततो वै पृथिवी मया ॥ अलातचक्रप्रतिमा दृष्टा गोष्पदवत्तदा ॥ १३ ॥
पूर्वां दिशं ततो गत्वा पश्यामि विविधान्द्रुमान् ॥ पर्वतांश्च नदी रम्याः सरांसि विविधानि च ॥१४॥
उदयं तत्र पश्यामि पर्वतं धातुमण्डितम् ॥ क्षीरोदं सागरं चैव नित्यमप्सरसालयम् ॥
परिकालयमानस्तु वालिनाभिद्रुतस्तदा ॥ १५ ॥
पुनरावृत्य सहसा प्रस्थितोऽहं तदा विभो ॥ पुनरावर्तमानस्तु वालिनाऽभिद्रुतो द्रुतम् ॥ १६ ॥
दिशस्त्वस्मात्ततो भूयः प्रस्थितोऽदक्षिणां दिशम् ॥ विन्ध्यपादपसंकीर्णां चन्दनद्रुमभूषिताम् ॥१७॥

धांसया मलयं विवेश ॥ ३—४ ॥ विनीतवत् विनययुक्तमिति क्रियाविशेषणं ॥ ५ ॥ भ्रातृशोक एव विषं तेन अर्दितः । अभवमिति शेषः । अहं गुरुर्निहत इति कृतबुद्धिः अभवमिति शेषः ॥ ६ ॥ विनशेत् विनश्येदित्यर्थः ॥ ७—८ ॥ वसामि अवसं ॥ ९ ॥ दानवर्षभं मायाविनं । भयसंवृतः भयपरवशः ॥१०॥ परिकालयते निरकासयत् ॥ ११ ॥ सानुबन्धः सामात्यः । नदीः पश्यन्नहं प्रधावित इत्यन्वयः ॥ १२—१३ ॥ पश्यामि अपश्यं ॥ १४ ॥ अप्सरसा अप्सरसां । पूर्वसवर्णदीर्घः । वालिनाभिद्रुतः परिकालयमानोऽहं द्रुमादिकमपश्यमिति पूर्वेणान्वयः ॥ १५ ॥ पुनरित्यादि श्लोकद्वयमेकान्वयं । अस्याः पूर्वस्या दिशः पुनरावृत्य प्रस्थितोस्मि । आवर्तमानोऽहं पुनर्वालिनाभिद्रुतोस्मि । विन्ध्यपादपेत्यनेन किष्कि-

नचतत्पुत्रोमायाविनामादानवउच्यते । पितुर्महिषाकारत्वात्तत्पुत्रस्यचतदाकारत्वमितिचबोध्यं ॥ ३ ॥ स० "वाक्येतुसाविवक्षामपेक्षते" इत्युक्तेः वेगेनआपूपूरेत्यत्रविवक्षाभावादसंधिः । ति० गतबुद्धिः प्राप्तबुद्धिः आतइतिशेषः ॥ ६ ॥ ति० परिकालयते सचिवैस्सहधावन्तमनुधावतिस्म ॥ स० वालीसचिवैस्सहधावन्तंमां अवालीति अवाली नविद्यतेवालीयस्येत्यवाली । अहंमतदतिमत्वा एवंकृतवानित्यवालीद्रुमीवइतिमत्वा प्रतिकालयतइत्यन्वये नपुनरुक्तिः ॥ ११ ॥ ति० सोहं अनुधावः अनुद्रुतः ॥ १२ ॥ ति० ततोवै तदनुधावनहेतोः । मयागोष्पदवत्परिभ्राम्यमाणा इयंपृथिवी अलातचक्रप्रतिमा आदर्शतलसंकाशवदृष्टा । गोष्पदवदित्यनेनलङ्घनेऽप्रयासउक्तः । अलातचक्रेत्यनेनस्वीयोभ्रमणवेगः । आदर्शतलेत्यनेनभूचक्रवर्तिपदार्थस्यस्पष्टमनुभवउक्तः ॥ १३ ॥ ति० परिकाल्यमानः परिकालयमानः । पलायमानइत्यर्थः । अकारलोपआर्षः । पुनरावृत्य उदयगिरिंप्रति । स० अहमित्यहंकारवाच्यव्ययमेकं । तेन अहं गर्वितेनवालिनेत्यन्वये नपुनरुक्तिः ॥ १५–१६ ॥

[पा०] १ क. विनीतवान्. २ क.—ट. भ्रातृशोक. ३ क. ग.—ट. गतबुद्धिस्तु. ४ क. ख. घ. कृतमया. ज. समाहृता. ग. छ. झ. ञ. ट. मयाकृता. ५ क.—ट. विनशिष्यति. ६ क. द्रुमाणां. ७ ग. छ. झ. ट. सुमहत्प्राप्त. ८ क.—ङ. चं. छ. ज. ञ. ट. तारेण च. ९ छ. झ. ञ. ट. सख. १० घ. गतविज्वरः. ११ ग. तदा. १२ क.—ट. वानरर्षभं. १३ क.—ट. वालीधावन्तं. क. क्रोधाद्धावन्तं. १४ छ. झ. सोनुद्रुतः. १५ क. च. ज. ञ. प्रधर्षितः. १६ घ. विविधानिच. १७ क. छ.—ट. गोष्पदवत्कृता. १८ क. ख. चापि. १९ छ. झ. ट. परिकाल्यमानस्तुतदावालिनाऽभिद्रुतोऽहं. २० च. ज. ञ. द्रुतोऽहं. २१ क. च. ज. ञ. द्रुमसेवितां. क.—ङ. छ. झ. ट. द्रुमशोभितां.

द्रुमशैलांस्ततः पश्यन्भूयो दक्षिणतोऽपरान् ॥ पश्चिमां तु दिशं प्राप्तो वालिना समभिद्रुतः ॥
संपश्यन्विविधान्देशान्सर्वं च गिरिसत्तमम् ॥ १८ ॥
प्राप्य चास्तं गिरिश्रेष्ठमुत्तरां संप्रधावितः ॥ हिमवन्तं च मेरुं च समुद्रं च तथोत्तरम् ॥ १९ ॥
यदा न विन्दे शरणं वालिना समभिद्रुतः ॥ तदा मां बुद्धिसंपन्नो हनुमान्वाक्यमब्रवीत् ॥ २० ॥
इदानीं मे स्मृतं राजन्यथा वाली हरीश्वरः ॥ मतङ्गेन तदा शप्तो ह्यसिन्नाश्रममण्डले ॥ २१ ॥
प्रविशेद्यदि वै वाली मूर्धाऽस्य शतधा भवेत् ॥ तत्र वासः सुखोत्सार्कं निरुद्विग्नो भविष्यति ॥२२॥
ततः पर्वतमासाद्य ऋश्यमूकं नृपात्मज ॥ न विवेश तदा वाली मतङ्गस्य भयात्तदा ॥ २३ ॥
एवं मया तदा राजन्नत्यक्षमुपलक्षितम् ॥ पृथिवीमण्डलं कृत्स्नं गुहामस्यागतस्ततः ॥ २४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे षट्चत्वारिंशः सर्गः ॥ ४६ ॥

सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

तत्रतत्रगवेषणेपि सीतामदृष्ट्वद्भिर्विनतादिभिर्मासादर्वागेवसरामंसुग्रीवमेत्यसाभिवादनंसीतायाअदर्शननिवेदनपूर्वकमनेकहेतूक्त्वा सीतादर्शनस्य हनुमदेकसाध्यत्वोक्तिः ॥ १ ॥

दर्शनार्थं तु वैदेह्याः सर्वतः कपियूथपाः ॥ व्यादिष्टाः कपिराजेन यथोक्तं जग्मुरञ्जसा ॥ १ ॥
सरांसि सरितः कक्षानाकाशं नगराणि च ॥ नदीदुर्गास्तथा शैलान्विचिन्वन्ति समन्ततः ॥ २ ॥

न्ध्याद्रा दक्षिणतोपि विन्ध्यपर्वतशेषोस्तीति गम्यते ॥ १६—१८ ॥ हिमवन्तमिति ॥ अपश्यमिति शेषः ॥ १९ ॥ शरणं रक्षणं । न विन्दं नाविन्दं ॥ २० ॥ राजन् अस्मिन्नाश्रममण्डले वाली प्रविशेद्यदि तदास्य मूर्धा शतधा भवेदिति मतङ्गेन पुरा हरीश्वरो यथाभिशप्तः तथा इदानीं मे स्मृतमिति योजना । निरुद्विग्नः निर्भयः । भावे निष्ठा । इति हनुमान् वाक्यमब्रवीदिति संबन्धः ॥ २१—२२ ॥ आसाद्य स्थितोहमिति शेषः॥२३—२४॥ अस्य ऋश्यमूकस्य । गुहां सीताभरणस्थानभूतां ॥ २५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने षट्चत्वारिंशः सर्गः॥४६॥

अथ दक्षिणेतरदिग्गतवानरसंगमनं सप्तचत्वारिंशे—दर्शनार्थं त्वित्यादि ॥ यथोक्तं देशं ॥ १ ॥ तदेव विवृणोति—सरांसीत्यादिना ॥ कक्षान् गुल्मान् । लतागृहानित्यर्थः । आकाशं वृक्षगुल्मादिरहितप्रदेशं ।

ति० द्रुमान्तरे शैलान्तरेच तत्रवर्हितंवालिनंपश्यन् अपरां पश्चिमांदिशं । समभिद्रुतइतिशेषः ॥ १८ ॥ ती० संपश्यन्नित्यनुषज्यते । हिमवन्तंचमेरुंचउत्तरसमुद्रंचसंपश्यन् उत्तरांदिशंसंप्रधावितइतिसंबन्धः । हिमवन्तंसंपश्यन्नित्यभिधानात्तस्मिन्देशोपिहिमवत्पर्यन्तंपुनरावृत्योत्तरांदिशंप्रधावितइत्यवगम्यते ॥ १९ ॥ ति० नविन्दे नलभे ॥ २० ॥ स० सुखमस्मात्सीतिसुखः " त्रिषुद्रव्येषापापुण्यसुखादिच " इत्यमरस्थाप्ययमेवभावोविभावनीयः ॥ २२ ॥ स० मतङ्गस्यभयात् । षष्ठीअपादानत्वाविवक्षणात् । ततः पृथिवीभ्रमणात् ॥ २३ ॥ स० तदा गुहां ऋश्यमूकस्यगुहां । अतश्चतदेतिपुनरुक्तं ॥ २४ ॥ इतिषट्चत्वारिंशःसर्गः ॥ ४६ ॥

[पा०] १ क.—ट. द्रुमशैलान्तरेपश्यन्, २ क.—ट. दक्षिणतोपरां. ३ छ. झ. ञ. ट. अपरांच. क.—घ. च. ज. पश्चिमांच. ४ ख. वालिनाऽभिद्रुतोऽर्शः. ५ ग. छ. झ. ट. सपश्यन्, ६ घ. ज. ञ. प्राप्यास्तं. ७ ख. छ. झ. ञ. ट. विन्दे. ८ क. ख. घ.—ट. ततो. ९ च. ज. यतो. १० ख. अत्र. ११ क.—ज. ञ. ट. सर्वं. ग. कृत्स्नंयथाह्यदर्शमण्डलं. १२ ख. सदा. १३ क.—ट. कपिकुञ्जराः. १४ क. ङ.—ट. सेसरांसिसरित्कक्षान्, ख. ग. सरांसिसरितोवृक्षान्, १५ घ. कक्षान्ग्रामांश्च. १६ छ. झ. ट. देशान्. १७ ख. घ. ततस्ततः.

सुग्रीवेण समाख्याताः सर्वे वानरयूथपाः ॥ प्रदेशान्प्रविचिन्वन्ति सशैलवनकाननान् ॥ ३ ॥
विचित्य दिवसं सर्वे सीताधिगमने धृताः ॥ समायान्ति स्म मेदिन्यां निशाकालेषु वानराः ॥ ४ ॥
सर्वर्तुकामान्देशेषु वानराः सफलान्द्रुमान् ॥ आसाद्य रजनीं शय्यां चक्रुः सर्वेष्वहस्सु ते ॥ ५ ॥
तदहः प्रथमं कृत्वा मासे प्रस्रवणं गताः ॥ कपिराजेन संगम्य निराशाः कपियूथपाः ॥ ६ ॥
[a]विचित्य तु दिशं पूर्वां यथोक्तां सचिवैः सह ॥ अदृष्ट्वा विनतः सीतामाजगाम महाबलः ॥ ७ ॥
उत्तरां च दिशं सर्वां विचित्य स महाकपिः ॥ आगतः सह सैन्येन वीरः शतबलिस्तदा ॥ ८ ॥
सुषेणः पश्चिमामाशां विचित्य सह वानरैः ॥ समेत्य मासे संपूर्णे सुग्रीवमुपचक्रमे ॥ ९ ॥
तं प्रस्रवणपृष्ठस्थं समासाद्याभिवाद्य च ॥ आसीनं सह रामेण सुग्रीवमिदमब्रुवन् ॥ १० ॥
विचिताः पर्वताः सर्वे वनानि गहनानि च ॥ निम्नगाः सागरान्ताश्च सर्वे जनपदाश्च ये ॥ ११ ॥
गुहाश्च विचिताः सर्वास्त्वया याः परिकीर्तिताः ॥ विचिताश्च महागुल्मा लतावितततसंततताः ॥ १२ ॥
गहनेषु च देशेषु दुर्गेषु विषमेषु च ॥ सत्त्वान्यतिप्रमाणानि विचितानि हतानि च ॥ १३ ॥
[b]ये चैव गहना देशा विचितास्ते पुनःपुनः ॥]
. उदारसत्त्वाभिजनो महात्मा स मैथिलीं द्रक्ष्यति वानरेन्द्रः ॥

नदीदुर्गान् नदीमिर्दुर्गमान् ॥ २—३ ॥ धृताः तत्पराः ॥ ४ ॥ विचित्येतिश्लोकोक्तं विवृणोति—सर्वेति ॥ सर्वर्तुकामान् काम्यन्त इति कामाः पुष्पफलादयः । सर्वर्तुसंभवफलपुष्पादियुक्तानित्यर्थः । सफलान् वानरैरुपभुज्यमानत्वेन सफलान् । द्रुमानासाद्य । सर्वेष्वहस्सु एकमासान्तर्गतसर्वदिनेषु । रजनीं रजन्यामेव । शय्यां चक्रुः । अनेनाहरविशमादिकमहस्सु नास्तीत्यवगम्यते ॥ ५ ॥ तदहः प्रस्थानदिनं । प्रथमं कृत्वा तदारभ्य मासे पूर्णे सति । निराशाः सीतान्वेषणे निरुत्साहाः सन्तः । कपिराजेन संगम्य सख्यै स्वागमनं निवेदयेत्यर्थः । प्रस्रवणं माल्यवन्तं । गताः ॥ ६ ॥ एवं सामान्येन वानरागमनमुक्त्वा प्रत्येकं च दर्शयति—विचित्येत्यादिना । सचिवैः सहायभूतैः ॥७—८॥ उपचक्रमे उपागतः ॥ ९ ॥ प्रस्रवणपृष्ठस्थं प्रस्रवणाग्रस्थं । रामेण सहासीनं । रामेण सहितमित्यर्थः ॥ १० ॥ वनानि क्षुद्रवनानि । गहनानि महावनानि । सागरान्ताः समुद्रतीरवर्तिनः ॥ ११ ॥ लतावितततसंततताः लतामिर्वितताः व्याप्ताः संततताः निरन्तरा इति महागुल्मविशेषणं ॥१२॥ गहनेषु दुष्प्रवेशेषु । नानाद्वीपेष्वित्यर्थः । दुर्गेषु दुःखेनगन्तव्येषु । निम्नोन्नतेष्वित्यर्थः । अतिप्रमाणानि अतिमात्रशरीराणि । विचितानि । किमयं रावणः हत नेतीति भावः ॥ १३ ॥ उदारसत्त्वः श्रेष्ठसत्त्वोऽभिजनो वंशो यस्य स उदारसत्त्वाभिजनः । महाबलवतः पुत्र इति सीतादर्शने

शि० सर्वेवानराः दिवसंविचित्य पृथक्पृथगगत्वाऽन्वीक्ष्य । निशाकालेषुमेदिन्यां सर्वेसंमतिविषयीभूतभूमौ । समायान्ति सङ्घीभूयप्राप्नुवन्ति ॥ ४ ॥ ती० तेवानराःसर्वेष्वहस्सु दिवसेषु । सीतांविचित्य सर्वर्तुकान् सार्वकालिकपुष्पफलयुक्तान् । सफलान् तत्तत्कालीनफलयुक्तांश्चद्रुमानासाद्य फलादिभक्षणार्थं ॥ ति० सर्वर्तुकान् नित्यसंनिहितसर्वर्तुयुक्तान् । तादृशवृक्षवत्त्वंच देशस्यरामप्रसादात् ॥ ५ ॥ स० महाबलइत्यनेन विनतगतदिशिनसीतास्तीतिसूचयति ॥ ७ ॥ शि० विचित्य विचित्य ॥ ८ ॥ ति० सागरान्ताः सागरमध्यवर्तिद्वीपाः ॥ ११ ॥ ति० लताविततैः लताग्रतानैः । संततताः समन्ताव्याप्ताः । तादृशामहागुल्मा लतागृहविशेषाः ॥ १२ ॥ शि० सत्त्वानि अन्वेषणप्रतिबन्धकीभूतप्राणिजातानि । हतानिविचितानिच ॥ १३ ॥ स० यदिदं

[पा०] १ क. ख. घ. समाख्यातान्. २ क. ख. घ. वानरपुङ्गवाः. ३ क. च. छ. ज. ञ. ट. तत्रदेशान्विचिन्वन्ति. ४ ख.—ट. सर्वर्तुकांश्चदेशेषु. ५ ख. ग. छ.—ट. सफलद्रुमान्. ६ छ. प्रस्रवणाचले. ७ क. च. ञ. ण. ट. कपिकुञ्जराः. ८ घ. विचित्यच. ९ घ. महाकपिः. १० क.—ट. दिशमप्युत्तरां. ख. उत्तरांतु. ११ क. ग. सीतां. १२ च.—ञ. ट. विचित्य च. १३ क. घ. ज.—ट. पूर्णेतु. १४ ग. नगराणिच. १५ क. ग. सागरांश्चैव. १६ ख. ग. जनपदास्तथा. १७ घ. विविधाः सर्वाःसशैलवनकाननाः. ग. छ.—ट. विचितास्सर्वायाश्चतेपरिकीर्तिताः, क. विचितास्सर्वाःसशैलवनकाननाः. १८ इदमर्धं क.—ट. पाठेपुनरस्यते. १९ च.—ट. हनूमान्समैथिलींज्ञास्यति.

दिशं तु यामेव गंता तु सीता तामास्थितो वायुसुतो हनूमान् ॥ १४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

अष्टचत्वारिंशः सर्गः ॥ ४८ ॥

हनुमता ताराङ्गदादिभिस्सह विन्ध्यगुहागहनादिषुतत्रतत्रसीतान्वेषणम् ॥ १ ॥ पुत्रनिधनपरिक्षिप्तकण्डुमुनिशापेन निर्जले निष्फलपुष्पादिवृक्षकेचकचन विजनदेशे पर्वतपरिक्षिप्तैर्वानरैस्तत्र कस्मिन्महाराक्षसस्यावलोकनम् ॥ २ ॥ सङ्केतेन मुष्टपुष्टमनपूर्वकं वानरान्प्रति लाटोपमभ्यापततस्तस्य रावणभ्रमा तलघातेन हननम् ॥ ३ ॥ ततोगिरिगुहादिषुगवेषणेन परिश्रान्तैस्सर्ववानरैः किंचिद्वृक्षमूलसमाश्रयणम् ॥ ४ ॥

सह ताराङ्गदाभ्यां तु गत्वा स हनुमान्कपिः ॥ सुग्रीवेण यथोद्दिष्टं तं देशमुपचक्रमे ॥ १ ॥
स तु दृष्ट्वोपागम्य सर्वैस्तैः कपिसत्तमैः ॥ विचिनोति स्म विन्ध्यस्य गुहाश्च गहनानि च ॥ २ ॥
पर्वताग्रान्नदीदुर्गान्सरांसि विपुलान्द्रुमान् ॥ वृक्षखण्डांश्च विविधान्पर्वतान्वनपादपान् ॥ ३ ॥
अन्वेषमाणास्ते सर्वे वानराः सर्वतोदिशम् ॥ न सीतां ददृशुर्वीरा मैथिलीं जनकात्मजाम् ॥ ४ ॥
ते भक्षयन्तो मूलानि फलानि विविधानि च ॥ अन्वेषमाणा दुर्धर्षा न्यवसंस्तत्रतत्र ह ॥
स तु देशो दुरन्वेषो गुहागहनवान्महान् ॥ ५ ॥
निर्जलं निर्जनं शून्यं गहनं रोमहर्षणम् ॥ त्यक्त्वा तु तं तदा देशं सर्वे वै हरियूथपाः ॥ ६ ॥
तादृशान्यप्यरण्यानि विचित्य भृशपीडिताः ॥ देशमन्यं दुराधर्षं विविशुश्चाकुतोभयाः ॥ ७ ॥
यत्र वन्यफला वृक्षा विपुष्पाः पर्णवर्जिताः ॥ निस्तोयाः सरितो यत्र मूलं यत्र सुदुर्लभम् ॥ ८ ॥

प्रथमो हेतुः । महात्मा महाधैर्य इति द्वितीयः । दिशंत्वित्यादिना तृतीयो हेतुः । इत्यनुबन्धानरा इति पूर्वेणान्वयः ॥१४॥ अस्मिन्सर्गे चतुर्दश श्लोकाः ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे भुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने सप्तचत्वारिंशः सर्गः ॥४७॥

अथ सीतान्वेषणाय दक्षिणां दिशं गतानामसुरनिःरसनपर्यन्तोवृत्तान्तोष्टचत्वारिंशे—सह ताराङ्गदाभ्यामित्यादि ॥ १—२ ॥ पर्वताग्रान् विन्ध्याग्रप्रदेशान् । पर्वतान् पर्वन्तपर्वतान् ॥ ३—७ ॥ वन्यफलाः

गतासीतेत्यनेन मनःपूर्वरक्षःक्रियायैवगता नतुरक्षाग्न्यभ्यर्थनेनानीतेतिध्वनयति । अन्यथा नीतेत्यवक्ष्यत् ॥ १४ ॥ इतिसप्तचत्वारिंशः सर्गः ॥ ४७ ॥

ती० पर्वतान् विन्ध्यस्याग्रान्तपर्वतान् गोमन्तर्श्यमूकादीन् । घनपादपानितिसर्वत्रविशेषणं । स० पर्वताग्रनदीदुर्गान् पर्वतामस्थिताश्चतानद्यश्च तासिदुर्गान् दुस्साध्यगमनान्स्थलविशेषान् । विपुलद्रुमान् । दुर्गविशेषणमेतत् । वृक्षखण्डानिति सङ्कीचकैर्न्यायेनोक्तं । घनाः मेघाः पादपेषुवृक्षेषुयेषु । एतेन मेघमण्डलपर्यन्तमौन्नत्यंपर्वतानांद्योत्यते ॥ १ ॥ ति० भृशपीडिताः निर्जलारण्यान्वेषणेनक्षुत्पिपासाभ्यांपीडिताः । सदेश. निर्जलादिदेशः यद्यपिदुरन्वेष्यः अथापितंविचित्यततस्तंदेशंत्यक्त्वाऽन्यदेशंविविशुरित्यग्रिमेणान्वयः ॥ ६—७ ॥ स० वन्यानि पुरोडुरप्ररोहाहेतवः फलानियेषांते । वन्यानि नीरसानिफलानियेषामितिवा ।

[पा०] १ क. घ. गताहि. २ ख. घ. तांप्रस्थितो. ३ ख. घ. सगत्वा. क. सँगम्य. ङ.—ट. सहसा. ४ क. ख. ग. तंप्रदेशंप्रचक्रमे. ङ.—ट. गन्तुंदेशंप्रचक्रमे. घ. तंतंदेशंप्रचक्रमे. ५ ङ.—ट. ततोविचित्यविन्ध्यस्य. ६ ग. विपिनानिच. ७ क. घ. ङ. झ. ञ. ट. पर्वताग्रनदी. ८ क. ङ.—ट. विपुलद्रुमान्. ग. विपुलानिच. ९ क. ग. ङ. झ. ञ. ट. स्थानपादपान्. १० ख. अवेक्षमाणास्ते. ११ ख. ददृशुस्सर्वे. १२ ङ.—झ. ट. विविधान्यपि. १३ इदमर्धं क. ग. ङ.—ञ. पाठेषुनदृश्यते. १४ क. निवसन्तस्ततस्तत. १५ ङ. च. ज. तत्रतु. ट. तत्रहि. १६ सतुदेशोदुरन्वेषो. निर्जलंनिर्जनं. त्यक्त्वातुतंतदा. तादृशान्यप्यरण्यानि. इत्यर्धंचतुष्टयं क. ग. ङ.—ञ. पाठेषु. निर्जलंनिर्जनं. तादृशान्यप्यरण्यानि. सदेशंचदुरन्वेषो. त्यक्त्वातुतंततो. इतिक्रमभेदेनदृश्यते. ङ. झ. ञ. सदेशंचदुरन्वेष्यो. १७ ग. ङ.—ञ. घोरदर्शनं. १८ ग. झ. ञ. ट. ततो. क. तथा.

न सन्ति महिषा यत्र न मृगा न च हस्तिनः ॥ शार्दूलाः पक्षिणो वापि ये चान्ये वनगोचराः ॥
न यत्र वृक्षा नौषध्यो न लता नापि वीरुधः ॥ ९ ॥
स्निग्धपत्राः स्थले यत्र पद्मिन्यः फुल्लपङ्कजाः ॥ प्रेक्षणीयाः सुगन्धाश्च भ्रमरैश्चापि वर्जिताः ॥१०॥
कण्डुर्नाममहाभागः सत्यवादी तपोधनः ॥ महर्षिः परमामर्षी नियमैर्दुष्प्रधर्षणः ॥ ११ ॥
तस्य तस्मिन्वने पुत्रो बालः षोडशवार्षिकः ॥ प्रनष्टो जीवितान्ताय क्रुद्धस्तत्र महामुनिः ॥ १२ ॥
तेन धर्मात्मना शप्तं कृत्स्नं तत्र महद्वनम् ॥ अशरण्यं दुराधर्षं मृगपक्षिविवर्जितम् ॥ १३ ॥
तस्य ते काननान्तांश्च गिरीणां कन्दराणि च ॥ प्रभवानि नदीनां च विचिन्वन्ति समाहिताः ॥१४॥
तत्र चापि महात्मानो नापश्यञ्जनकात्मजाम् ॥ हर्तारं रावणं वापि सुग्रीवप्रियकारिणः ॥ १५ ॥
ते प्रविश्याशु तं भीमं लतागुल्मसमावृतम् ॥ ददृशुः क्रूरकर्माणमसुरं सुरनिर्भयम् ॥ १६ ॥
तं दृष्ट्वा वानरा घोरं स्थितं शैलमिवापरम् ॥ गाढं परिहिताः सर्वे दृष्ट्वा तं पर्वतोपमम् ॥ १७ ॥
सोपि तान्वानरान्सर्वान्नष्टाः स्थेत्यब्रवीद्बली ॥ अभ्यधावत संक्रुद्धो मुष्टिमुद्यम्य संहितम् ॥ १८ ॥
तमापतन्तं सहसा वालिपुत्रोऽङ्गदस्तदा ॥ रावणोयमिति ज्ञात्वा तलेनाभिजघान ह ॥ १९ ॥
स वालिपुत्राभिहतो वक्त्राच्छोणितमुद्वमन् ॥ असुरोऽभ्यपतद्भूमौ पर्यस्त इव पर्वतः ॥ २० ॥
तेपि तस्मिन्निरुच्छ्वासे वानरा जितकाशिनः ॥ व्यचिन्वन्प्रायशस्तत्र सर्वं तद्गिरिगह्वरम् ॥२१॥

फलैर्वन्ध्याः । निष्फला इत्यर्थः ॥ ८—९ ॥ स्निग्धपत्रा इत्यादि । अत्रापि न सन्तीत्यनुषज्यत इति केचित् । तन्न । भ्रमरैश्चापि वर्जिता इत्यस्यानन्वयात् । किंतु भ्रमरैरप्यनुपभुक्तं स्थलपद्मिनीमात्रमित्यर्थः । सर्वेपि महातटाकाः स्थलपद्मिनीत्वंगता इतिभावः । अन्यं देशं विविशुरिति पूर्वेणान्वयः ॥ १० ॥ देशस्य तादृशत्वे निमित्तमृषिरित्याह—कण्डुरित्यादिना ॥११॥ तत्र वने विषये । जीवितान्ताय तस्य नाशाय कुपितः ॥ १२ ॥ अशरण्यं अनाश्रयं । अभवदिति शेषः ॥ १३ ॥ नदीनां प्रभवानि गिरिगणमध्यप्रदेशाः ॥ १४—१५ ॥ सुरनिर्भयं सुरेभ्यो निर्भयं ॥ १६ ॥ गाढं परिहिताः दृढं परिहितवसनाः । अभवन् ॥ १७ ॥ संहितं दृढमित्यर्थः ॥ १८—१९ ॥ पर्यस्तः पातितः ॥ २० ॥ तस्मिन् असुरे । निरुच्छ्वासे मृत इत्यर्थः । तस्मिन्नसुरे रावणभ्रान्त्या तत्समीपवने

अथवा वन्ध्यानांफलमिवफलंयेषांते । अनुत्पन्नफलाइतियावत् ॥८॥ स० वनगोचराः वनविषयाः । यद्वा वनगौः वनभूमिः तत्रचरन्तीतितथा । स० बल्यः वृक्षालिङ्गिताः । वीरुधः स्थललताः ॥९॥ स० शापानन्तरमित्यत्र शापात्पूर्वमित्युत्तरत्र स्निग्धपत्राइत्यादौ चशेषोज्ञेयः । नेत्यनुकर्षकृत्वाव्याख्यानं पद्मिनीमहत्त्वकथनाननुगुणमित्यनादरणीयं । भ्रमरैश्च विवर्जिताः वर्जितविरुद्धाः विवर्जिताः अत्यक्ताइत्यर्थः । अथवागतैः एकप्रसूनरसपानतुन्दिलैरिन्दिन्दिरैर्विवर्जिताः सुगन्धाः सुगन्धयःसुगन्धाः सुगन्धद्रव्याणि । पृथग्विशेष्यं । अतो "गन्धस्येत्—" इतीत्वंकथंनेतिशङ्कानवकाशः ॥ १० ॥ ति० यत्रस्थले नेत्यनुकर्षः । भ्रमरैश्चविवर्जिताः विगतंवर्जितंयासुताः संयुक्ताइत्यर्थः । तादृशाःफुल्लपङ्कजाश्चयत्रनसन्ति । यत्रवनेकण्डुर्नाममहर्षिरासीत् ॥ ११ ॥ शि० जीवितान्ताय वनप्रध्वंसाय ॥ १२ ॥ ती० नदीशब्देननिस्तोयनदीप्रदेशाउच्यन्ते । "निस्तोयाःसरितोयत्र" इतिपूर्वमभिधानात् ॥ विषम० प्रभूतानि उत्पत्तिस्थानानि ॥ १४ ॥ स० सुरनिर्भयं निर्गताभीर्यस्यसतथा । सुरेभ्योनिर्भयःसुरनिर्भयस्तं । सुनिर्भयमितिपाठः स्फुटार्थः । नकेवलंकर्मणासुरप्रायत्वादसुरोऽयं । अपितुपितुरपितज्जातित्वमित्याह—आसुरमिति । असुरस्यायमासुरः "तस्येदं"

[पा०] १ क.—ट. बल्यो. २ क. ख. ग. ङ.—ट. भ्रमरैश्चविवर्जिताः. ३ क.—ट. बालकोदशवार्षिकः. ४ छ. झ. ट. क्रुद्धस्तेन. ५ ग. महावनं. ६ ग. कृत्स्नंपक्षि. ७ ज. काननेतांतु. ख. काननंतत्तु. छ. झ. ञ. ठ. काननान्तांस्तु. ८ च. ज. ञ. प्रभूतानि. ९ क. च. ज. ञ. ट. चापि. १० ख. ङ.—ट. प्रविश्यतु. ११ ङ.—ट. ददृशुर्भीमकर्माणं. १२ ठ. मासुरं. १३ क. ख. सुरमर्दनं. १४ क. घोराः. १५ ङ.—ट. मिवासुरं. १६ क. ख. मारीचतनयोनष्टाः. ग. तान्वानरान्दृष्ट्वातिष्ठतेत्यब्रवीत्. १७ ख. संस्थितान्. क. दक्षिणं. छ. झ. ट. संगतं. १८ क. ग.—झ. ट. असुरोन्यपतत्. १९ क. ख. ग. ङ.—ट. तेतु. २० ख. व्यचिन्वन्बहुशः. ग. विचित्यप्रायशः. २१ ज.—ट. तेगिरिगह्वरं.

विचितं तु ततः कृत्वा सर्वे ते काननं पुनः ॥ अन्यदेवापरं घोरं विविशुर्गिरिगह्वरम् ॥ २२ ॥
ते विचित्य पुनः खिन्ना विनिष्पत्य समागताः ॥ एकान्ते वृक्षमूले तु निषेदुर्दीनमानसाः ॥ २३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे अष्टचत्वारिंशः सर्गः ॥ ४८ ॥

एकोनपञ्चाशः सर्गः ॥ ४९ ॥

अङ्गदेन परिश्रान्तान्वानरान्प्रति सुग्रीवस्य चण्डशासनताया अन्वेषणकालातिपातस्य च निवेदनेन निद्रातन्द्रादिवर्जं यथाशक्ति पुनरन्वेषणयत्नस्य साफल्यसंभावनोक्तिः ॥ १ ॥ गन्धमादनेन तदनुमोदनपूर्वकं तद्वचनस्य हितत्वोक्तौ सर्वैः पुनरुत्थानेन रजतगिरिगुहादिषु गवेषणम् ॥ २ ॥ पुनः सीताया अदर्शनेन पिपासादिना च परिश्रान्तैः सर्वैर्वृक्षमूले किंचिद्विश्रमपूर्वकं पुनरन्वेषणाय प्रस्थानम् ॥ ३ ॥

अथाङ्गदस्तदा सर्वान्वानरानिदमब्रवीत् ॥ परिश्रान्तो महाप्राज्ञः समाश्वस्य शनैर्वचः ॥ १ ॥
वनानि गिरयो नद्यो दुर्गाणि गहनानि च ॥ दर्यो गिरिगुहाश्चैव विचितानि समन्ततः ॥ २ ॥
तत्रतत्र सहास्माभिर्जानकी न च दृश्यते ॥ तद्वा रक्षो हृता येन सीता सुरसुतोपमा ॥ ३ ॥
कालश्च वो महान्यातः सुग्रीवश्चोग्रशासनः ॥ तस्माद्भवन्तः संहिता विचिन्वन्तु समन्ततः ॥ ४ ॥
विहाय तन्द्रीं शोकं च निद्रां चैव समुत्थिताम् ॥ विचिनुध्वं यथा सीतां पश्यामो जनकात्मजाम् ॥५॥
अनिर्वेदं च दाक्ष्यं च मनसश्चापराजयः ॥ कार्यसिद्धिकराण्याहुस्तस्मादेतद्ब्रवीम्यहम् ॥ ६ ॥
अद्यापि तद्वनं दुर्गं विचिन्वन्तु वनौकसः ॥ खेदं त्यक्त्वा पुनः सर्वैर्वनमेतद्विचीयताम् ॥ ७ ॥
अवश्यं क्रियमाणस्य दृश्यते कर्मणः फलम् ॥ अलं निर्वेदमागम्य नहि नो मीलनं क्षमम् ॥ ८ ॥
सुग्रीवः कोपनो राजा तीक्ष्णदण्डश्च वानरः ॥ भेतव्यं तस्य सततं रामस्य च महात्मनः ॥ ९ ॥

चिरमन्वेषितवन्त इति बोध्यं ॥ २१ ॥ अपरं अदूरं । "परं दूरान्यमुख्येषु" इति वैजयन्ती । गिरिगह्वरं गिरिमध्यप्रदेशं ॥ २२ ॥ विनिष्पत्य विनिर्गत्य । समागताः संघीभूताः ॥२३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने अष्टचत्वारिंशः सर्गः ॥४८॥

अथ पुनः प्रदेशान्तरान्वेषणमेकोनपञ्चाशे—अथाङ्गद इत्यादि ॥ १—२ ॥ सह युगपत् ॥३—५॥ दाक्ष्यं उत्साहः । "दक्ष उत्साहे" इत्युक्तेः । मनसश्चापराजयः धैर्यमित्यर्थः ॥ ६ ॥ वनमेतत् । विचीयतां अन्विष्यतां ॥७ ॥ मीलनं नेत्रमीलनं । कर्तव्यमकृत्वा

इत्यण् ॥ १६ ॥ स० अपरं अनुत्तमं समीपवर्तिवा ॥ २२ ॥ इत्यष्टचत्वारिंशः सर्गः ॥ ४८ ॥

ति० रक्षः तद्रूपोपहर्तेत्याद्यर्थः ॥ स० रक्षस्सुराक्षसेषुतन्मध्यइतियावत् । अपहर्ता कश्चिद्राक्षसः । यद्वा रक्षः राक्षसः । अपहर्ता अन्यःकोपि । अत्रच अपहर्त्रितिविपरिणतमन्वेति । तथैवदुष्कृतिचेति ॥ ३ ॥ ति० अनिर्वेदं अखेदं ॥ दाक्ष्यं सामर्थ्यं । अपराजयं कार्यापराङ्मुखत्वं ॥ स० अनिर्वेदं अभिसंधित्सितकार्यसाधनानौदासीन्यं ॥ ६ ॥ रामानु० विचयप्रकारमेवाह—खेदमिति । विचिन्वतामिति चिनोतेर्लोटिप्रथमपुरुषबहुवचनेरूपं । विचीयतामितिपाठे युष्माभिरितिशेषः ॥ स० पार्श्वद्वयस्थितान्कपीन्पृथक्पृथगन्वशासदित्याह—अद्यापीति । हेवनौकसोभवन्तः वनंसर्वमेवविचिन्वन्तु । पुनः । तदितरेभवन्तोपिसर्वमेववनंविचिन्वतां। "पुनरप्रथमेव्यावृत्तौ" इत्यभिधानात् ॥ शि० विचिन्वतां अन्वेषणसाधकानांकरचरणादीनां । खेदं श्रमं । त्यक्त्वाविस्मृत्य । अद्यापीदंवनंविचिन्वन्तु ॥७॥ ति० नोन्मीलनं अनुन्मीलनं अनुद्योगइतियावत् ॥८॥ इत्येकोनपञ्चाशः सर्गः ॥४९॥

[पा०] १ क. च.—ट. सर्वे. २ ङ.—ट. काननौकसः. ३ ख. घ. समाहिताः. ४ ख. ग. ङ.—ञ. ञ. वृक्षमूलेषु. ५ ङ. च. ञ. ञ. परिश्रान्तान्महाप्राज्ञान्. ६ क. ख. घ.—ट. समाश्वास्य. ग. समाश्वास्यचसर्वशः. ७ क. ख. ग. ङ.—ट. दरीगिरिगुहाः. ८ छ. झ. ट. ठ. तथारक्षोपहर्ताचसीतायाश्चैवदुष्कृती. ङ. ञ. तत्ररक्षो. ९ क. ख. ग. ङ.—ट. कालश्चनो. १० क. सहसा. ११ क. निद्रांचसमुपस्थितां. १२ च.—ट. तथा. १३ ग.—ट. मनसश्चापराजयं. क. मानसंचापराजितं. १४ क. ख. घ. च.—ट. अद्यापीदंवनं. ग. अद्यान्यद्वनं. १५ ख. घ.—ट. सर्वंवनमेवविचिन्वतां. क. ग. सर्वंवनमेतद्विचिन्वतां. १६ छ. झ. ट. परंनिर्वेदं. १७ ख. घ. च.—ट. नोन्मीलनं. १८ क. ङ.—ट. कोपनो. १९ क. ख. घ. छ. ञ. झ. वानराः.

हितार्थमेतदुक्तं वः क्रियतां यदि रोचते ॥ उच्यतां वा क्षमं यत्नः सर्वेषामेव वानराः ॥ १० ॥
अङ्गदस्य वचः श्रुत्वा वचनं गन्धमादनः ॥ उवाचाव्यक्तया वाचा पिपासाश्रमखिन्नया ॥ ११ ॥
सदृशं खलु वो वाक्यमङ्गदो यदुवाच ह ॥ हितं चैवानुकूलं च क्रियतामस्य भाषितम् ॥ १२ ॥
पुनर्मार्गामहे शैलान्कन्दरांश्च दरीस्तथा ॥ काननानि च शून्यानि गिरिप्रस्रवणानि च ॥ १३ ॥
यथोद्दिष्टानि सर्वाणि सुग्रीवेण महात्मना ॥ विचिन्वन्तु वनं सर्वे गिरिदुर्गाणि सर्वशः ॥ १४ ॥
ततः समुत्थाय पुनर्वानरास्ते महाबलाः ॥ विन्ध्यकाननसंकीर्णां विचेरुर्दक्षिणां दिशम् ॥ १५ ॥
ते शारदाभ्रप्रतिमं श्रीमद्रजतपर्वतम् ॥ शृङ्गवन्तं दरीमन्तमधिरुह्य च वानराः ॥ १६ ॥
तत्र कोद्रवनं रम्यं सप्तपर्णवनानि च ॥ ऊर्ध्वचिन्वंस्ते हरिवराः सीतादर्शनकाङ्क्षिणः ॥ १७ ॥
तस्याश्रमधिरूढास्ते श्रान्ता विपुलविक्रमाः ॥ न पश्यन्ति स्म वैदेहीं रामस्य महिषीं प्रियाम् ॥१८॥
ते तु दृष्टिगतं कृत्वा तं शैलं बहुकन्दरम् ॥ अवारोहन्त हरयो वीक्षमाणाः समन्ततः ॥ १९ ॥
अवरुह्य ततो भूमिं श्रान्ता विगतचेतसः ॥ स्थित्वा मुहूर्तं तत्राथ वृक्षमूलमुपाश्रिताः ॥ २० ॥
ते मुहूर्तं समाश्वस्ताः किंचिद्गतपरिश्रमाः ॥ पुनरेवोद्यताः कर्तुं मार्गितुं दक्षिणां दिशम् ॥२१॥
हनुमत्प्रमुखास्ते तु प्रस्थिताः प्लवगर्षभाः ॥ विन्ध्यमेवादितस्तावद्विचेरुस्ते ततस्ततः ॥ २२ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे एकोनपञ्चाशः सर्गः ॥ ४९ ॥

पञ्चाशः सर्गः ॥ ५० ॥

विन्ध्यगुहादीनांदुरन्वेषतया तत्रान्वेषणेऽप्यलेन सुग्रीवसंकेततसमयातिपाते क्षुत्पिपासार्दितैर्हनुमदादिभिः ऋक्षबिलाख्यस्वकस्यचिन्महाबिलस्यावलोकनम् ॥ १ ॥ बिलद्वारे आर्द्रपक्षनानापक्षिदर्शनाज्जलानुमानेन तद्बिलस्यगाढान्धकाराबृतत्वेनदुष्प्रवेशतयाऽन्योन्यहस्तावलंबनेन तत्प्रवेशः ॥ २ ॥ तथा योजनपरिमितदेशातिक्रमे काञ्चनमयवृक्षादिमासाविद्योतमानेऽद्भुतदेशे कस्याश्चिन्महातपस्विन्या अवलोकनम् ॥ ३ ॥ हनुमता साभिवादनं तांप्रति तादृशदेशस्यतस्याश्चयाथातथ्यविवित्सयाप्रश्नः ॥ ४ ॥

सह ताराङ्गदाभ्यां तु संगम्य हनुमान्कपिः ॥ विचिनोति स्म विन्ध्यस्य गुहाश्च गहनानि च ॥ १ ॥
सिंहशार्दूलजुष्टेषु शिलाश्च सरितस्तथा ॥ विषमेषु नगेन्द्रस्य महाप्रस्रवणेषु च ॥ २ ॥
आसेदुस्तस्य शैलस्य कोटिं दक्षिणपश्चिमाम् ॥ तेषां तत्रैव वसतां स कालो व्यत्यवर्तत ॥ ३ ॥

तूष्णींभाव इत्यर्थः ॥ ८—१२ ॥ कन्दरान् भेदान् ॥ १३ ॥ विचिन्वन्तु वनं सर्वं इति । भवन्त इति शेषः ॥ १४—२२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने एकोनपञ्चाशः सर्गः ॥ ४९ ॥

अथ ऋक्षबिले स्वयंप्रभादर्शनं पञ्चाशे—सहेत्यादि ॥ १ ॥ नगेन्द्रस्य शार्दूलजुष्टेषु । विषमेषु विषमप्रदेशेषु । शिलाः । महाप्रस्रवणेषु सरितश्च विचिनोति स्मेति पूर्वेणान्वयः ॥ २ ॥ कलः सुग्रीवोक्तमासः । " मासः पूर्णो बिलस्यानां " इत्युत्तरत्राङ्गदवचनस्य

स० कोटिं अग्रभागं । " कोटिःस्यादग्रमात्रेपि " इतिकेशवः ॥ शि० दक्षिणपश्चिमां नैर्ऋत्यकोणस्थां । कोटिं शृङ्गं आसेदुः

[पा०] १ ग. यथार्थं. २ ग. च.—ट. उच्यतांहितमंयत्नत. ३ ख. ग. घ. छ. ज. झ. उवाचव्यक्तया. ४ ख. चैवानुरूपं. ५ छ. झ. ट. शिलास्तथा. ६ ट. वनं. ७ छ. ज. ञ. ट. संगताः. ८ घ. संपूर्णा. ९ क.—ट. लोध्रवनं. १० ङ. छ.—ट. विचिन्वन्तो. क. ख. ग. विचिन्वन्तिसहरयः. ११ ङ.—ज. ञ. ट. दृष्ट्वा. ग. गत्वा. १२ छ. झ. ट. अध्यारोहन्त. १३ ख. घ. वीक्षमाणास्ततस्ततः. १४ ङ—ञ. श्रान्ताः. १५ ङ.—ज. ञ. ट. स्थितामुहूर्तं. १६ क. समायस्ताः. १७ क. किंचिद्गतपरिश्रमाः. १८ छ. झ. ञ. ट. त्यमुखास्तावत्. ख. त्यमुखास्तत्र. १९ ग. ङ.—ट. मेवादितःकृला. २० ङ—ट. द्विचेरुश्चसमन्ततः. २१ ङ.—ट. जुष्टाश्च. २२ क. छ.—ट. गुहाश्चपरितस्तथा. च. गुहाश्चसरितस्तदा. २३ ग.—ञ. ज. कालोप्यत्यवर्तत.

स हि देशो दुरन्वेषो गुहागहनवान्महान् ॥ ४ ॥
तत्र वायुसुतः सर्वे विचिनोति स्म पर्वतम् ॥ परस्परेण हनुमानन्योन्यस्याविदूरतः ॥ ५ ॥
गजो गवाक्षो गवयः शरभो गन्धमादनः ॥ मैन्दश्च द्विविदश्चैव सुषेणो जांबवानलः ॥ ६ ॥
अङ्गदो युवराजश्च तारश्च वनगोचरः ॥ गिरिजालावृतान्देशान्मार्गित्वा दक्षिणां दिशम् ॥
विचिन्वन्तस्ततस्तत्र ददृशुर्विवृतं बिलम् ॥ ७ ॥
दुर्गमृक्षबिलं नाम दानवेनाभिरक्षितम् ॥ क्षुत्पिपासापरीताश्च श्रान्ताश्च सलिलार्थिनः ॥
अवकीर्णं लतावृक्षैर्ददृशुस्ते महाबिलम् ॥ ८ ॥
ततः क्रौञ्चाश्च हंसाश्च सारसाश्चापि निष्क्रमन् ॥ जलार्द्राश्चक्रवाकाश्च रक्ताङ्गाः पद्मरेणुभिः ॥ ९ ॥
ततस्तद्बिलमासाद्य सुगन्धि दुरतिक्रमम् ॥ विस्मयव्यग्रमनसो बभूवुर्वानरर्षभाः ॥ १० ॥
संजातपरिशङ्कास्ते तद्बिलं प्लवगोत्तमाः ॥ अभ्यपद्यन्तसंहृष्टास्तेजोवन्तो महाबलाः ॥ ११ ॥
नानासत्त्वसमाकीर्णं दैत्येन्द्रनिलयोपमम् ॥ दुर्दर्शमतिघोरं च दुर्विगाहं च सर्वशः ॥ १२ ॥
ततः पर्वतकूटाभो हनुमान्पवनात्मजः ॥ अब्रवीद्वानरान्सर्वान्कान्तारवनकोविदः ॥ १३ ॥
गिरिजालावृतान्देशान्मार्गित्वा दक्षिणां दिशम् ॥ वयं सर्वे परिश्रान्ता न च पश्याम मैथिलीम् ॥१४॥
अस्माच्चापि बिलाद्धंसाः क्रौञ्चाश्च सह सारसैः ॥ जलार्द्राश्चक्रवाकाश्च निष्पतन्ति सृ सर्वतः ॥१५॥
नूनं सलिलवानत्र कूपो वा यदि वा ह्रदः ॥ तथा चेमे बिलद्वारे स्निग्धास्तिष्ठन्ति पादपाः ॥१६॥
इत्युक्त्वा तद्बिलं सर्वे विविशुस्तिमिरावृतम् ॥ अचन्द्रसूर्यं हरयो ददृशू रोमहर्षणम् ॥ १७ ॥

बिल एवान्यो मासो मत इत्यर्थो वक्ष्यते ॥ ३ ॥ ननु विचेतव्यप्रदेशेषु बहुषु विद्यमानेषु कथमत्रैव मासं क्षपितवन्त इत्याशङ्क्याह—स हीति ॥ ४ ॥ तत्रेति ॥ सङ्गम्येत्यध्याहार्यं । वायुसुतः हनुमान् । अन्योन्यस्याविदूरतः परस्परेण संगमध्य सर्वं पर्वतं विचिनोति स्मेति संबन्धः ॥ ५ ॥ गज इत्यादि ॥ चकारसङ्गृहीतमाह । गजादयः गिरिजालावृतान् देशान्मार्गित्वा ततो दक्षिणां दिशं विचिन्वन्तः तत्र विवृतं विस्तृतं । बिलं ददृशुरिति संबन्धः ॥ ६—७ ॥ दानवेन मयेन । ऋक्षबिलं नाम ऋक्षबिलमिति प्रसिद्धं । महाबिलं ददृशुरिति पुनरुक्तिर्गुणान्तरविधानाय ॥ ८ ॥ निष्क्रमन् निरक्रमन् ॥ ९ ॥ दुरतिक्रमं दुष्प्रवेशं ॥ १० ॥ संजातपरिशङ्काः किमिदं पातालं वतान्यन्मायामयमिति संदिहानाः । असंहृष्टाः सन्तः । अभ्यपद्यन् अभ्यपद्यन्त ॥ ११ ॥ नानेति श्लोको बिलविशेषणं ॥ १२ ॥ कान्तारे दुर्गमार्गे वने कोविदः समर्थः ॥ १३ ॥ गिरिजालावृतान् देशान् दक्षिणां दिशं । तादृशदेशरूपां दक्षिणां दिशमित्यर्थः ॥ १४—१५ ॥ नूनमिति । अस्तीति शेषः ॥ १६ ॥ इत्युक्त्वेति ॥ हनुमदुक्तप्रकारेण सर्वेप्युक्त्वा विविशुः । तिमिरावृतं ददृशुश्च । अचन्द्रसूर्यं चन्द्रसूर्यकिर-

---

तत्रैवस्थेवसतांतेषां सः अमार्गणीयः कालः रात्रिसमयः । अत्यवर्तत व्यतीतोऽभवत् ॥ ३ ॥ ती० दुर्गं दुर्गमं । दानवेन मयेनबिलस्यविशिष्टांशोतयितुंददृशुरितिपुनरभिधानं ॥ स० बिलंसामान्यंददृशुः । महाबिलं तदन्तरमुल्लाघगमनंचददृशुः । अतोनपुनरुक्तिः ॥ ८ ॥ ति० संजातपरिशङ्काः संजातजलसंभावनाः । अतएवसंहृष्टाः । स० तेजोवन्तः तेजस्विनः । " अस्मायां—" इतिविन्यभावश्चार्षः । यद्वा तेज खसामर्थ्यं अवन्तीतितेतथा । खशक्तिसंरक्षकाइत्यर्थः । बिलरक्षणागतयशोवतेतिटिप्पणीतोऽवसेयः ॥ ११ ॥ स० दैत्येन्द्रनिलयोपमं बलिनिलयतुल्यं ॥ १२ ॥

[पा०] १ ङ. छ. झ. ञ. ट. रहितान्योन्यस्या. २ ख.—च. ज. म. हनूमाञ्जांबवानलः. छ. झ. ट. हनूमाञ्जांबवानपि. क. हनूमान्पवनात्मजः. ३ ख. ग. ङ.—ट. परीतास्तु. ४ घ. ङ.—ट. श्रान्तास्तु. ५ ख. महद्बिलं. ६ ख. ग. ङ—ट. तत्र. ७ क. ख. ग. ङ.—ट. अभ्यपद्यन्तसंहृष्टाः. ८ ङ. च. ज. ञ. महासर्पसमाकीर्णं. ९ छ. झ. ट. दुर्दर्शमिद. १० क. ग. ङ.—ट. दुर्विगाह्यंच. ११ क. ग. ङ.—ट. म्मारुतात्मजः. १२ छ. ज. झ. ट. द्वानरान्घोरान्. १३ च. कोविदान्. १४ ख. ग. ङ. च. ज. ञ. ट. चसर्वशः. क. छ. झ. सर्ववेशः. १५ च. ञ. ट. बिलद्वारि.

निशाम्य तस्मात्सिंहांश्च वांस्तांश्च मृगपक्षिणः ॥ प्रविष्टा हरिशार्दूला बिलं तिमिरसंवृतम् ॥ १८ ॥
न तेषां सज्जते चक्षुर्न तेजो न पराक्रमः ॥ वायोरिव गतिस्तेषां दृष्टिस्तमसि वर्तते ॥ १९ ॥
ते प्रविष्टास्तु वेगेन तद्बिलं कपिकुञ्जराः ॥ ददृशुर्देशमुत्तमम् ॥ २० ॥
ततस्तस्मिन्बिले दुर्गे नानापादपसंकुले ॥ अन्योन्यं संपरिष्वज्य जग्मुर्योजनमन्तरम् ॥ २१ ॥
ते नष्टसंज्ञास्तृषिताः संभ्रान्ताः सलिलार्थिनः ॥ परिपेतुर्बिले तस्मिन्कंचित्कालमतन्द्रिताः ॥ २२ ॥
ते कृशा दीनवदनाः परिश्रान्ताः प्लवङ्गमाः ॥ आलोकं ददृशुर्वीरा निराशा जीविते तदा ॥ २३ ॥
ततस्ते देशमागम्य सौम्यं वितिमिरं वनम् ॥ ददृशुः काञ्चनान्वृक्षान्दीप्तवैश्वानरप्रभान् ॥ २४ ॥
सालांस्तालांश्च पुन्नागान्ककुभान्वेणुलान्धवान् ॥ चंपकानागवृक्षांश्च कर्णिकारांश्च पुष्पितान् ॥२५॥
स्तबकैः काञ्चनैश्चित्रै रक्तैः किसलयैस्तथा ॥ आपीडैश्च लताभिश्च हेमाभरणभूषितान् ॥ २६ ॥
तरुणादित्यसंकाशान्वैडूर्यकृतवेदिकान् ॥ विभ्राजमानान्पुष्पाढ्यान्पादपांश्च हिरण्मयान् ॥ २७ ॥
नीलवैडूर्यवर्णांश्च पद्मिनीः पतगावृताः ॥ महद्भिः काञ्चनैः पद्मैर्वृता बालार्कसन्निभैः ॥ २८ ॥
जातरूपमयैर्मत्स्यैर्मण्डूकैश्च सकच्छपैः ॥ नलिनीस्तत्र ददृशुः प्रसन्नसलिलावृताः ॥ २९ ॥
काञ्चनानि विमानानि राजतानि तथैव च ॥ तपनीयगवाक्षाणि मुक्ताजालावृतानि च ॥ ३० ॥
हैमराजतभौमानि वैडूर्यमणिमन्ति च ॥ ददृशुस्तत्र हरयो गृहमुख्यानि सर्वशः ॥ ३१ ॥
पुष्पितान्फलिनो वृक्षान्प्रवालमणिसन्निभान् ॥ काञ्चनभ्रमरांश्चैव वधूनि च समन्ततः ॥ ३२ ॥
मणिकाञ्चनचित्राणि शयनान्यासनानि च ॥ महार्हाणि च यानानि ददृशुस्ते समन्ततः ॥ ३३ ॥
हैमराजतकांस्यानां भाजनानां च संचयान् ॥ अगरूणां च दिव्यानां चन्दनानां च संचयान् ॥३४॥

णरहितं ॥ १७ ॥ तस्मात्सिंहान् वांस्तान् नानाप्रकारान् मृगपक्षिणश्च ॥ १८ ॥ वर्तते अयत्नपूर्वं प्रवर्तत इत्यर्थः ॥ १९ ॥ प्रकाशं निस्तमस्कं ॥ २० ॥ संप्रहेणोक्तं प्रपञ्चयति—ततस्तस्मिन्नित्यादिना ॥ अन्योन्यं संपरिष्वज्य अन्योन्यं हस्तावलंबनं कृत्वा ॥ २१ ॥ परिपेतुः जग्मुः । कंचित्कालमित्यत्यन्तसंयोगेद्वितीया ॥ २२ ॥ आलोकं प्रकाशं ॥ २३—२५ ॥ आपीडैः शेखरैः लताभिश्च । उपशोभितानिति शेषः । हेमाभरणभूषितान् फलितहेमाभरणान् ॥ २६ ॥ पादपांश्च हिरण्मयान् रजतमयांश्च वृक्षान् ॥ २७ ॥ नीलवैडूर्येत्यादि श्लोकद्वयमेकान्वयं । उक्तविशेषणविशिष्टाः पद्मिनीः उक्तविशेषणयुक्ता नलिनीश्च ददृशुरित्यन्वयः । अतो न पुनरुक्तिः ॥ २८—२९ ॥ काञ्चनानीत्यादि ॥ हैमराजतभौमानीति

रामानु० तेजः प्रभावः । " तेजः प्रभावेदीप्तौच " इतिविश्वः ॥ ति० नसज्जते नप्रतिबध्यते । अन्येतु तेषांदृष्टिर्नसज्जते तत्रत्यपदार्थेष्वितिशेषः । तिमिरावृतत्वात् । अतएवतेजःपराक्रमयोरपिकुण्ठितगमनं । यद्यपिवायोरिवगतिः तथापियतोदृष्टिस्तमस्यप्रतिबद्धावर्तते अतोवेगेनपरस्परहस्तग्रहणपूर्वकंप्रविष्टाइत्यर्थः । अतएव "गृह्यहस्तैःपरस्परं" इत्यग्रेवक्ष्यतीत्याहुः ॥ १९ ॥ ति० अन्योन्यंसंपरिष्वज्य तिमिरदेशविनिर्गमजसन्तोषवशादितिशेषः । यद्वा अन्योन्यंहस्तावलंबनंकृत्वा हस्तेनपरस्परस्योरआदिसम्यग्भूत्वेतियावत् ॥ २१ ॥ शि० ते वानराः तस्मिन्बिलेपरिपेतुः । अतएवकंचित्कालं अतन्द्रिताः अभवन्नितिशेषः ॥ २२ ॥ ति० आलोकमेवददृशुर्नतुजलं । जीवितेनिराशायदाभूवुस्तदोच्यमानलक्षणंदेशमागम्य काञ्चनान्वृक्षांश्चददृशुः । यद्वाजीविते निराशाबभूवुः तदाभगवत्कृपयालोकंददृशुः उच्यमानविशेषणंदेशेकाञ्चनान्वृक्षान्ददृशुः ॥ २३ ॥

[पा०] १ ब. व्याघ्रांश्चमृग. २ ख. विशते. ३ छ. झ. ट. दृष्टिः. ४ ख. प्रविष्टास्ते. ५ छ. झ. ट. प्रकाशंचाभिरामंच. ६ छ. झ. ट. मीमे. ७ ग, छ. झ. ट. यदा. ८ क. च. ज. ततस्ते. ९ क. घ. ज. ञ. सर्वे. घ. छ. झ. ट. सौम्याः. १० ग. समं. क. च. ज. ञ. पुनः. ११ ग. काञ्चनान्दिव्यान्. १२ घ. दीप्तान्वैश्वानर. १३ क.—ट. साळांस्तमालांश्चपुन्नागान्. क. सालांश्चपुन्नागान्बकुलान्. १४ घ. छ. न्बकुलान्धवान्. १५ क. च. ज. ञ. हेमभारविभूषितान्. १६ क.—ट. वैडूर्यमय. १७ छ. झ. ट. पतगैर्वृताः. ख. प्लवगैर्युताः. १८ ट. वृक्षैर्वृताः. १९ झ. ट. महद्भिश्चापपद्मैः. २० क. ग. घ. झ. ट. सलिलायुताः. २१ ग. क. ञ.—ट. विविधानिविशालानिददृशुः. २२ क. छ.—ट. रायः.

शुचीन्येभ्यवहार्याणि मूलानि च फलानि च ॥ महार्हाणि च पानानि मधूनि रसवन्ति च ॥३५॥
दिव्यानामम्बराणां च महार्हाणां च संचयान् ॥ कम्बलानां च चित्राणामजिनानां च संचयान् ॥३६॥
तत्र तत्र च विन्यस्तान्दीप्तान्वैश्वानरप्रभान् ॥ ददृशुर्वानराः शुभ्राञ्जातरूपस्य संचयान् ॥ ३७ ॥
तत्र तत्र विचिन्वन्तो विले तस्मिन्महाबलाः ॥ ददृशुर्वानराः शूराः स्त्रियं काञ्चिददूरतः ॥ ३८ ॥
तां दृष्ट्वा भृशसंत्रस्ताश्चीरकृष्णाजिनाम्बराम् ॥ तापसीं नियताहारां ज्वलन्तीमिव तेजसा ॥ ३९ ॥
विस्मिता हरयस्तत्र व्यवातिष्ठन्त सर्वशः ॥ पप्रच्छ हनुमांस्तत्र काऽसि त्वं कस्य वा विलम् ॥ ४० ॥

ततो हनूमान्गिरिसन्निकाशः कृताञ्जलिस्तामभिवाद्य वृद्धाम् ॥
पप्रच्छ का त्वं भवनं विलं च रत्नानि हेमानि वदस्व कस्य ॥ ४१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे पञ्चाशः सर्गः ॥ ५० ॥

एकपञ्चाशः सर्गः ॥ ५१ ॥

स्वयंप्रभानाम्न्यातापस्या हनुमन्तंप्रति तद्विलनिर्मणादिवृत्तान्तकथनेनसह फलादिभक्षणादिनाश्रमापनोदनचोदनपूर्वकं वानराणांवनागमनादिकारणप्रश्नः ॥ १ ॥

इत्युक्त्वा हनुमांस्तत्र पुनः कृष्णाजिनाम्बराम् ॥ अब्रवीत्तां महाभागां तापसीं धर्मचारिणीम् ॥ १ ॥
इदं प्रविष्टाः सहसा विलं तिमिरसंवृतम् ॥ क्षुत्पिपासापरिश्रान्ताः परिखिन्नाश्च सर्वशः ॥
महद्वरण्या विवरं प्रविष्टाः स्म पिपासिताः ॥ २ ॥
इमास्त्वेवंविधान्भावान्विविधानद्भुतोपमान् ॥ दृष्ट्वा वयं प्रव्यथिताः संभ्रान्ता नष्टचेतसः ॥ ३ ॥
कस्यैते काञ्चना वृक्षास्तरुणादित्यसन्निभाः ॥ शुचीन्येभ्यवहार्याणि मूलानि च फलानि च ॥ ४ ॥
काञ्चनानि विमानानि राजतानि गृहाणि च ॥ तपनीयगवाक्षाणि मणिजालावृतानि च ॥ ५ ॥
पुष्पिताः फलवन्तश्च पुण्याः सुरभिगन्धिनः ॥ इमे जाम्बूनदमयाः पादपाः कस्य तेजसा ॥ ६ ॥
काञ्चनानि च पद्मानि जातानि विमले जले ॥ कथं मत्स्याश्च सौवर्णाश्चरन्ति सह कच्छपैः ॥ ७ ॥

शेषः । गृहमुख्यविशेषणं वा ॥ ३०—३६ ॥ शुभ्रान् निर्मलान् ॥ ३७—३८ ॥ व्यवातिष्ठन्त दूरे स्थिता इत्यर्थः ॥ ३९—४० ॥ पप्रच्छेत्यर्धस्य विवरणं—ततोहनुमानिति ॥ अस्मिन्सर्गे सार्धैकचत्वारिंशच्छ्लोकाः ॥ ४१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने पञ्चाशः सर्गः ॥ ५० ॥

अथ स्वयंप्रभया ऋक्षबिलवृत्तान्तोक्तिरेकपञ्चाशे —इत्युक्त्वेत्यादि ॥ १ ॥ परिखिन्नाः अध्वश्रमखिन्नाः । क्षुत्पिपासापरिश्रान्तत्वेपि पिपासैव प्रवेशहेतुरित्याशयेनोक्तं—पिपासिता इति ॥ २ ॥ भावान् पदार्थान् । प्रव्यथिताः किमिदमसुरादिमायेति संजातव्यथाः । नष्टचेतसः कर्तव्यबुद्धिरहिताः ॥ ३—४ ॥ मणिजालावृतानि रत्नमयजालकानि । जालकगवाक्षयोर्भेद

ति० यानानि शिबिकादीनि ॥३५॥ स० वदस्व वद " भासनोपसंभाषाज्ञानयत्नविमत्युपमन्त्रणेष्वदः " इत्युक्तेरात्मनेपदता । प्रकाशमानासतीवदेत्यर्थः ॥ ४१ ॥ इतिपञ्चाशःसर्गः ॥ ५० ॥

[पा०] १ झ. ञ. ट. न्यभ्यवहाराणि. २ च. माल्यानि, ङ. ज. झ. ट. यानानि. ३ ख. त्वैश्वानरोपमान्. ४ ख. वानरास्तत्रजातरूपस्य. ५ ङ. च. ज. ञ. तेपितत्र. ६ क. वने. ७ छ. झ. ठ. तत्रमहाप्रभाः. ङ. च. ज. ञ. तत्रमहाप्रभां. ८ छ. झ. तांचतेदद्भुतत्रचीर. ख. तांदृष्ट्वाहरयस्तत्रचीर. क. ग. तांदृष्ट्वावानरास्तत्रचीर. ९ ख.—ञ. ट. व्यवतिष्ठन्त. १० ग. कस्यचया. ११ क. घ.—ट. चेमानि. ख. चैतानि. १२ छ. झ. ट चीरकृष्णाजिनांबरां. १३ नष्टचेतनाः. १४ क. ख. ग. ङ. ज. ञ. ट. कस्येमे. १५ ग. ङ. च. ज.—ट. न्यभ्यवहाराणि. १६ ङ.—ट. सुरभिगन्धयः. १७ क. ख. घ. विमलोदके. १८ छ. झ. ट. सौवर्णाद्दश्यन्ते. क. ग. घ. सौवर्णैश्चरन्ति. ङ. च. ज. ञ. सौवर्णैःसहतिष्ठन्ति.

आत्मानमनुभावं च कस्य चैतत्तपोबलम् ॥ अजानतां नः सर्वेषां सर्वमाख्यातुमर्हसि ॥ ८ ॥
एवमुक्ता हनुमता तापसी धर्मचारिणी ॥ प्रत्युवाच हनूमन्तं सर्वभूतहिते रता ॥ ९ ॥
मयो नाम महातेजा मायावी दानवर्षभः ॥ तेनेदं निर्मितं सर्वं मायया काञ्चनं वनम् ॥ १० ॥
पुरा दानवमुख्यानां विश्वकर्मा बभूव ह ॥ येनेदं काञ्चनं दिव्यं निर्मितं भवनोत्तमम् ॥ ११ ॥
स तु वर्षसहस्राणि तपस्तप्त्वा महावने ॥ पितामहाद्वरं लेभे सर्वमौशनसं धनम् ॥ १२ ॥
वनं विधाय बलवान्सर्वकामेश्वरस्तदा ॥ उवास सुखितः कालं कंचिदस्मिन्महावने ॥ १३ ॥
तमप्सरसि हेमायां सक्तं दानवपुङ्गवम् ॥ विक्रम्यैवाशनिं गृह्य जघानेशः पुरन्दरः ॥ १४ ॥
इदं च ब्रह्मणा दत्तं हेमायै वनमुत्तमम् ॥ शाश्वताः कामभोगाश्च गृहं चेदं हिरण्मयम् ॥ १५ ॥
दुहिता मेरुसावर्णेरहं तस्याः स्वयंप्रभा ॥ इदं रक्षामि भवनं हेमाया वानरोत्तम ॥ १६ ॥
मम प्रियसखी हेमा नृत्तगीतविशारदा ॥ तया दत्तवरा चास्मि रक्षामि भवनोत्तमम् ॥ १७ ॥
किं कार्यं कस्य वा हेतोः कान्ताराणि प्रपश्यथ ॥ कथं चेदं वनं दुर्गं युष्माभिरुपलक्षितम् ॥ १८ ॥
इमान्यभ्यवहार्याणि मूलानि च फलानि च ॥ भुक्त्वा पीत्वा च पानीयं सर्वं मे वक्तुमर्हथ ॥ १९ ॥
[एवमुक्ते शुभे वाक्ये तापस्या धर्मसंहिते ॥ हनुमान्हरिशार्दूलः प्रत्युवाच स्वयंप्रभाम् ॥ २० ॥
अर्थिनः स्म तदर्थे च चर धर्ममनुत्तमम् ॥ मृगमाणान्निराहारान्संजीवय तपोधने ॥ २१ ॥
तच्छ्रुत्वा वचनं तस्य तापसी धर्मचारिणी ॥ आदाय फलमूलानि विधिनोपजहार सा ॥ २२ ॥

उक्तः ॥ ५—७ ॥ आत्मानं त्वां । अनुभावं प्रभावं । कस्य चैतत्तपोबलं तच्चेत्यर्थः ॥ ८–९ ॥ मयो नाम त्रिपुराधिपतिः त्रिपुरे नष्टे स्वरक्षणार्थमिदं बिलं कृतवानिति मात्स्यपुराणे त्रिपुरदहनप्रस्तावेभिहितं । मायया विचित्रशक्त्या । मायावी मायायुक्तः । दानवर्षभ इत्यनेन नायमसुरतक्षा मय इति सूचितं ॥१०–१३॥ तं स्वपुत्रीं मन्दोदरीं रावणाय दत्तवन्तं । एकान्ते हेमायां सक्तं विदित्वा ईशः त्रैलोक्याधिपतिः । अशनिं वज्रं गृहीत्वा जघान ॥ १४॥ मयनाशानन्तरं इदं वनं ब्रह्मणा हेमायै दत्तं ॥ १५–१६ ॥ ममेति ॥ सेदानीं ब्रह्मसदनं गतेत्याशयेनाह—नृत्तेति ॥ १७ ॥ किं कार्यं किं प्रयोजनं । कस्य हेतोः कस्मात्प्रयोजनात्

ति० कोमयइत्याशङ्क्यतत्प्रसिद्धिमाह—पुरेति । विश्वकर्मा शिल्पी । ह प्रसिद्धं ॥ ११ ॥ ती० औशनसंधनं विचित्रनिर्माणप्रतिपादकशिल्पशास्त्रज्ञानं । शिल्पस्योशनसाप्रणीतत्वात्तद्धनत्वव्यपदेशः ॥ ति० वरं विचित्रसृष्टिसामर्थ्यरूपं ॥ स० महत् वने इतिच्छेदः । महावनइतिपाठे वनविशेषणं । महतोवनमितिवा । अथवा आदित्यादितएवनिर्देशादनित्यताऽऽत्त्वस्यज्ञापितेति । " तस्यैवमहत्सुखत्वात्तेषां " इत्यादिवदात्त्वाभावे ऐकपद्यंज्ञेयं ॥ १२ ॥ शि० तदा वरलाभसमये । सर्वकामेश्वरः सर्वविषयनिर्माणेस्वतन्त्रः ॥ १३ ॥ ति० दानवपुङ्गवं अशनिंगृह्य गृहीत्वा । विक्रम्यैव युद्धंकृत्वैव । पुरन्दरोजघान । यद्यप्यसुरशिल्पीमयोनित्यइतिकथंहननंतस्य । तथापि यएवासुरशिल्पीपदस्थःसर्वोपिमयाख्यइतिप्रवाहनित्यतैवतस्येन्द्रवदितिनदोषः ॥ १४ ॥ ती० विचित्रनिर्माणसामर्थ्यगुणयोगादत्रब्रह्मशब्दोदानवविश्वकर्ममयवाची ॥ ति० तस्मिंश्चहतेइदंवनं शाश्वतःकामभोगः इदंगृहंच मयभुक्तायैहेमायैन्यायप्राप्तत्वाद्भगवताब्रह्मणादत्तमित्यर्थः । एतेनात्रब्रह्मशब्दोमयदानवपरइत्यपास्तं । हतेनदानासंभवात् ॥ १५ ॥ शि० मेरुसावर्णेर्दुहिताऽहं । तस्याः हेमायाः । स्वयंप्रभा तदभिधंइदंभवनं । रक्षामि वाक्यार्थस्यकर्मतयान्वयान्नद्वितीया । स्वयंप्रभाशब्दस्यमेरुसावर्णिदुहितुर्नामत्वेतु भवनमितिद्वितीयान्तमेव ॥ १६ ॥ ति० अभ्यवहाराणि अभ्यवहार्याणि ॥ १९ ॥ इत्येकपञ्चाशःसर्गः ॥ ५१ ॥

[पा०] १ ग.—ट. आत्मनस्त्वनुभावाद्वाकस्यवैतत्. २ घ. रतं. ३ छ. झ. ट. वानरर्षभ. ४ झ. ठ. महद्वने. ५ ग. ङ. च. छ. झ. ञ. ट. विधायसर्वबलवान्. ६ क.—च. ञ. ञ. दानवसत्तमं. ७ ङ. च. ज. ञ. ट. जघानसपुरन्दरः. ८ ङ. च. ज. ञ. भवनोत्तमं. ९ क. ग. नाम्नास्वयंप्रभा. १० घ. गीतनृत्त. ११ ङ.—ट. भवनंमहत्. १२ क.—घ. च. ञ.—ट. प्रपद्यत. १३ घ. रभिलक्षितं. १४ छ. ञ. झ. ट. शुचीन्यभ्यवहाराणि. क. ख. ग. ङ. च. ञ. इमान्यभ्यवहाराणि. १५ ग. च. ज. ञ. पीत्वातु. १६ क. ख. ग. सत्यं. १७ झ. मर्हसि. १८ इमेषट्श्लोकाः क. ग. पाठयोरधिकादृश्यन्ते.

प्रतिगृह्य तु ते तस्यास्तथाऽऽतिथ्यं वनेचराः ॥ क्षुधार्ता भक्षयामासुः प्रशंसन्तस्तपोधनाम् ॥ २३ ॥
ते भक्षयित्वा तत्सर्वं पीत्वा सुरभि वारि च ॥ सर्वे ददृशुरालोकान्सर्वतो वानरा गुहाम् ॥ २४ ॥
प्रसन्नवदनाश्चासन्सर्वे संहृष्टमानसाः ॥ संजातं बलवीर्यं च तत्र तेषां वनौकसाम् ॥
तर्पिता विविधैर्मूलैः फलैः शीतेन वारिणा ॥ २५ ॥]
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे एकपञ्चाशः सर्गः ॥ ५१ ॥

द्विपञ्चाशः सर्गः ॥ ५२ ॥

हनुमता स्वयंप्रभांप्रति रामवनप्रवेशप्रभृतिस्वस्वामीयगुहाप्रवेशावधिनिखिलवृत्तान्तनिवेदनपूर्वकं सत्कृतोपकारप्रशंसनं ॥ १ ॥

अथ तानब्रवीत्सर्वान्विक्रान्तान्हरिपुङ्गवान् ॥ इदं वचनमेकाग्रा तापसी धर्मचारिणी ॥ १ ॥
वानरा यदि वः खेदः प्रनष्टः फलभक्षणात् ॥ यदि चैतन्मया श्राव्यं श्रोतुमिच्छामि कथ्यताम् ॥२॥
तस्यास्तद्वचनं श्रुत्वा हनुमान्मारुतात्मजः ॥ आर्जवेन यथातत्त्वमाख्यातुमुपचक्रमे ॥ ३ ॥
राजा सर्वस्य लोकस्य महेन्द्रवरुणोपमः ॥ रामो दाशरथिः श्रीमान्प्रविष्टो दण्डकावनम् ॥
लक्ष्मणेन सह भ्रात्रा वैदेह्या चापि भार्यया ॥ ४ ॥
तस्य भार्या जनस्थानाद्रावणेन हृता बलात् ॥ ५ ॥
वीरस्तस्य सखा राज्ञः सुग्रीवो नाम वानरः ॥ राजा वानरमुख्यानां येन प्रस्थापिता वयम् ॥ ६ ॥
अगस्त्यचरितामाशां दक्षिणां यमरक्षिताम् ॥ सहैभिर्वानरैर्घोरैरङ्गदप्रमुखैर्वयम् ॥ ७ ॥
रावणं सहिताः सर्वे राक्षसं कामरूपिणम् ॥ सीतया सह वैदेह्या मार्गध्वमिति चोदिताः ॥ ८ ॥
विचित्य तु वयं सर्वे समग्रां दक्षिणां दिशम् ॥ बुभुक्षिताः परिश्रान्ता वृक्षमूलमुपाश्रिताः ॥ ९ ॥
विवर्णवदनाः सर्वे सर्वे ध्यानपरायणाः ॥ नाधिगच्छामहे पारं भग्नाश्चिन्तामहार्णवे ॥ १० ॥
चारयन्तस्ततश्चक्षुर्दृष्टवन्तो वयं बिलम् ॥ लतापादपसंछन्नं तिमिरेण समावृतम् ॥ ११ ॥
अस्मादूर्ध्वा जलक्लिन्नाः पक्षैः सलिलविस्रवैः ॥ क्रुराः सारसाश्चैव निष्पतन्ति पतत्रिणः ॥
साध्वत्र प्रविशामेति मया तूक्ताः प्लवङ्गमाः ॥ १२ ॥

॥ १८—२५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने एकपञ्चाशः सर्गः ॥ ५१ ॥

अथ हनुमता स्वागमनहेतुरुच्यते द्विपञ्चाशे—अथेत्यादि ॥१—२॥ आर्जवेन अकपटेन ॥३—५॥ दक्षिणामाशां येन प्रस्थापिताः स राजास्तीति पूर्वेणा-

---

स० महेन्द्रवरुणोपमः महेन्द्रवरुणाभ्यांउपमा साम्यं शौर्यगांभीर्यादौ यस्यसतथा ॥ ४ ॥ शि० अङ्गदप्रमुखैःसहितावयं वयं यः रामसख्यरक्षणस्य अयः प्राप्तिर्यस्मिंस्तथाभवतितथा दक्षिणांदिशंप्रस्थापिताः ॥ ६—७ ॥ ति० नाधिगच्छाम । हेइति स्वयंप्रभासंबोधनं । पारं चिन्तामहार्णवस्येतिशेषः ॥ १० ॥ ति० सलिलरेणुभिः सलिलपद्मरेणुयुक्तपक्षैरुपलक्षिताइत्यर्थः । निष्पतन्ति निष्पतिताः ॥ १२ ॥

[पा०] १ क.—ट. त्विश्रान्तान्हरियूथपान्. २ ग. यदिचैवंमया. ३ छ, झ. तांकथां. ४ ख. सीतयाचापि. क. ङ.—ट. वैदेह्यासह. ग. घ. वैदेह्याचैव. ५ घ. अगस्त्याचरितां. ६ क.—ट. वीनरैर्मुख्यैरङ्गद. ७ झ. ट. वनंसर्वेसमुद्रं. छ. वनंसर्वेसमुद्रं. क. ञ. ण. वनंसर्वेसमग्रां. च. वनंसर्वेसमग्रं. ८ ग, छ, झ. ट. वयंबुभुक्षिताःसर्वेवृक्ष. ९ ख. सदाध्यान. १० ङ. —ट. महद्विलं. ११ ङ.—ट. संपन्नं. १२ क. ख. ग. तस्मात्. १३ घ. जलैःक्लिन्नाः. ख. ग. ङ. च. ज. ञ. जलक्लिन्नानिर्यान्तिविपुलाद्बिलात्. १४ क. छ. झ. ट. सलिलरेणुभिः. १५ ग. चोक्ताः.

तेषामपि हि सर्वेषामनुमानमुपागतम् ॥ गच्छाम प्रविशामेति भर्तृकार्यत्वरान्विताः ॥ १३ ॥
ततो गाढं निपतिता गृह्य हस्तौ परस्परम् ॥ इदं प्रविष्टाः सहसा बिलं तिमिरसंवृतम् ॥ १४ ॥
एतन्नः कार्यमेतेन कृत्येन वयमागताः ॥ त्वां चैवोपगताः सर्वे परिद्यूना बुभुक्षिताः ॥ १५ ॥
आतिथ्यधर्मदत्तानि मूलानि च फलानि च ॥ अस्माभिरुपभुक्तानि बुभुक्षापरिपीडितैः ॥ १६ ॥
यैश्चया रक्षिताः सर्वे म्रियमाणा बुभुक्षया ॥ ब्रूहि प्रत्युपकारार्थं किं ते कुर्वन्तु वानराः ॥ १७ ॥
एवमुक्ता तु सर्वज्ञा वानरैस्तैः स्वयंप्रभा ॥ प्रत्युवाच ततः सर्वानिदं वानरयूथपान् ॥ १८ ॥
सर्वेषां परितुष्टास्मि वानराणां तरस्विनाम् ॥ चरन्त्या मम धर्मेण न कार्यमिह केनचित् ॥ १९ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे द्विपञ्चाशः सर्गः ॥ ५२ ॥

त्रिपञ्चाशः सर्गः ॥ ५३ ॥

हनुमत्प्रार्थनया स्वयंप्रभया स्वाश्रमनिमीलितलोचनानांकपीनां क्षणमात्रेणगुहोद्धारणं ॥ १ ॥ बिलाद्बहिर्गतेषुकपिषु वृक्षे-षुपुष्पोद्गमदर्शनाच्छिरिरागमानुमानेनविषीदत्सु तान्प्रत्यङ्गदेन सुग्रीवस्य षण्डशासनत्वादकृतकार्याणां कालातिक्रमेण तत्समीपगमनेमरणनिर्धारणेन प्रायोपवेशस्यौचित्योक्तिः ॥ २ ॥ अङ्गदमातुलेनतारेण तद्वचनेनविषीदतोवानरान्प्रति स्वयंप्रभागुहायामेवनित्यवासे रामसुग्रीवभयाभावोपपादने सर्वैस्तदनुमोदनेन तथैवनिर्धारणम् ॥ ३ ॥

एवमुक्तः शुभं वाक्यं तापस्या धर्मसंहितम् ॥ उवाच हनुमान्वाक्यं तामेनिन्दितचेष्टिताम् ॥ १ ॥
शरणं त्वां प्रपन्नाः स्मः सर्वे वै धर्मचारिणि ॥ यः कृतः समयोऽस्माकं सुग्रीवेण महात्मना ॥ २ ॥
स च कालो ह्यतिक्रान्तो बिले च परिवर्तताम् ॥ सा त्वमस्माद्बिलाद्घोरादुत्तारयितुमर्हसि ॥ ३ ॥
तस्मात्सुग्रीववचनादतिक्रान्तान्गतायुषः ॥ त्रातुमर्हसि नः सर्वान्सुग्रीवभयशङ्कितान् ॥ ४ ॥
महच्च कार्यमस्माभिः कर्तव्यं धर्मचारिणि ॥ तच्चापि न कृतं कार्यमस्माभिरिहवासिभिः ॥ ५ ॥

न्वयः ॥ ६—१२ ॥ अनुमानमुपागतं । जलचरस-स्वदर्शनेन जलबुद्धिर्जातेत्यर्थः । यद्वा भर्तृकार्यत्वरा-न्विताः सन्तोगच्छामः । बिलद्वारमिति शेषः । बिलं प्रविशाम इति अनुमानं अङ्गीकरणं ॥ १३—१४ ॥ परिद्यूनाः परिक्षीणाः ॥ १५—१८ ॥ सर्वेषामिति । संबन्धसामान्ये षष्ठी ॥ १९ ॥ इति श्रीगोविन्दराज-विरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने द्विपञ्चाशः सर्गः ॥ ५२ ॥

अथ बिलादुत्तीर्णानां वानराणां निर्वेदः त्रिपञ्चाशे —एवमुक्त इत्यादि ॥ १—२ ॥ बिलेचपरिवर्तता-मित्यनेन बहुकालं वानरैर्बिले स्थितमिति गम्यते

स० आतिथ्यधर्मदत्तानि अतिथयइमानि आतिथ्यानिचतानि धर्मदत्तानिच । "अतिथेर्ष्यः ।" "कमाद्यातिथ्यातिथेये अतिथ्यर्येऽत्रसाधुनि" इत्यमरः ॥ १६ ॥ स० "किंतेकुर्वन्तुवानराः" इतिपरोक्षनिर्देशोदेवत्वात्स्वस्य स्वापिदेवीलाशुकः । "परोक्षप्रियाइवहिदेवाः" इतिश्रुतेः ॥ १७ ॥ ति० परितुष्टास्मि प्रत्युपचिकीर्षावचनेनैवेतिभावः । अत्र कतकस्तु द्विपञ्चाशसर्ग-समाप्तिमाह ॥ १९ ॥ इतिद्विपञ्चाशःसर्गः ॥ ५२ ॥

[पा०]-१ छ. झ. ट. असिन्निपतितास्सर्वेऽप्यथकार्यं. २ क. गन्तुं. ३ झ. ञ. ट. हस्तौः. क. ग. हस्तान्परस्परं. ख. घ. हस्ते. ४ क.—ट. उपयुक्तानि. ५ घ. वेलया. ६ क. ग. घ. धर्मज्ञैर्वानरैः. ख. धर्मज्ञावानरैस्तु. ७ ख. घ. वानरपुङ्गवान्. ८ सर्वेषांपरितुष्टास्मीतिश्लोकात्परतः ङ. छ—ट. पाठेषुद्विपञ्चाशसर्गसमाप्तिर्नेदृश्यते किंतुएतत्कोशरीत्यादृश्यमानत्रिपञ्चाशसर्गे इत्युक्त्वातद्विलंश्रीमत्प्रविवेशस्वयंप्रभेत्येतदन्तरंदृश्यते. ९ छ. झ. समिन्दितलोचनां. १० ट. सर्वेच. छ. सर्वेते. ११ क. झ. धर्मचारिणी. १२ क.—ट. समयोऽस्मासु. १३ क. ख. ग. ङ.—ज. ञ. ट. सतु. १४ क ख. ङ.—ट. व्यतिक्रान्तो. १५ क. बिलेऽस्मिन्. १६ छ. झ. ट. द्विलादस्मानुत्तारयितुं. १७ ङ. अस्मान्सुग्रीव. १८ क.—ट. भयशंकितान्.

एवमुक्ता हनुमता तापसी वाक्यमब्रवीत् ॥ ६ ॥
[इदं दैवतराजेन पुरा शक्रेण संयुगे ॥ असुरार्थं विमुक्तेन तदा वज्रेण पातितम् ॥ ७ ॥
दुर्धर्षं तु दुरासादं नानारत्नसमन्वितम् ॥ महाप्राज्ञेन रत्नार्थं निर्मितं विश्वकर्मणा ॥ ८ ॥
एवं दैवविसृष्टे तु बिलेऽस्मिन्वज्रदारिते ॥] जीवता दुष्करं मन्ये प्रविष्टेन निवर्तितुम् ॥ ९ ॥
तपसस्तु प्रभावेन नियमोपार्जितेन च ॥ सर्वानेव बिलादस्मादुद्धरिष्यामि वानरान् ॥ १० ॥
निर्मीलयत चक्षूंषि सर्वे वानरपुङ्गवाः ॥ नहि निष्क्रमितुं शक्यमनिमीलितलोचनैः ॥ ११ ॥
ततः संमीलिताः सर्वे सुकुमाराकुलैः करैः ॥ सहसापिदधुर्दृष्टिं दृष्ट्वा गमनकाङ्क्षया ॥ १२ ॥
वानरास्तु महात्मानो हस्तरुद्धमुखास्तदा ॥ निमेषान्तरमात्रेण बिलादुत्तारितास्तया ॥ १३ ॥
ततस्तान्वानरान्सर्वांस्तापसी धर्मचारिणी ॥ निस्सृतान्विषमात्तस्मात्समाश्वास्येदमब्रवीत् ॥ १४ ॥
एष विन्ध्यो गिरिः श्रीमान्नानाद्रुमलताकुलः ॥ एष प्रस्रवणः शैलः सागरोऽयं महोदधिः ॥ १५ ॥
स्वस्ति वोऽस्तु गमिष्यामि भवनं वानरर्षभाः ॥ इत्युक्त्वा तद्बिलं श्रीमत्प्रविवेश स्वयंप्रभा ॥१६॥
ततस्ते ददृशुर्घोरं सागरं वरुणालयम् ॥ अपारमभिगर्जन्तं घोरैरूर्मिभिरावृतम् ॥ १७ ॥
मयस्य मायाविहितं गिरिदुर्गं विचिन्वताम् ॥ तेषां मासो व्यतिक्रान्तो यो राज्ञा समयः कृतः ॥१८॥
विन्ध्यस्य तु गिरेः पादे संप्रपुष्पितपादपे ॥ उपविश्य महात्मानश्चिन्तामापेदिरे तदा ॥ १९ ॥
ततः पुष्पातिभाराग्रैर्लताशतसमावृतान् ॥ द्रुमान्वासन्तिकान्दृष्ट्वा बभूवुर्भयशङ्किताः ॥ २० ॥
ते वसन्तमनुप्राप्तं प्रतिबुद्धा परस्परम् ॥ नष्टसंदेशकालार्था निपेतुर्धरणीतले ॥ २१ ॥
ततस्तान्कपिवृद्धांस्तु शिष्टांश्चैव वनौकसः ॥ वाचा मधुरयाऽऽभाष्य यथावदनुमान्य च ॥ २२ ॥
स तु सिंहहृषस्कन्धः पीनायतभुजः कपिः ॥ युवराजो महाप्राज्ञ अङ्गदो वाक्यमब्रवीत् ॥ २३ ॥
शासनात्कपिराजस्य वयं सर्वे विनिर्गताः ॥ मासः पूर्णो बिलस्थानां हरयः किं न बुध्यते ॥ २४ ॥

॥ २—१३ ॥ विषमात् संकटप्रदेशात् ॥१४—१८॥ पादे दक्षिणपार्श्वे । दक्षिणपश्चिमकोटाविति यावत् । "हिमवद्विन्ध्यशैलाभ्यां प्रायो व्याप्ता वसुंधरा" इति भेषजकल्पोक्तिः ॥ १९ ॥ पुष्पातिभाराग्रान् पुष्पैरतिभाराणि अग्राणि येषां तान् । वासन्तिकान् वसन्तफलिनश्चूतादीन् । ये वसन्ते फलन्ति ते शिशिरे पुष्यन्ति । भयशङ्किताः सुग्रीवाद्भयविषयशङ्कावन्तः ॥ २० ॥ वसन्तं अनुप्राप्तं प्रत्यासन्नं । तदानीं हि शिशिरः । तथाहि । शरत्कालान्ते मार्गशीर्षे मासि सेनां सन्निधाप्य पौषमासमवधिं कृत्वा प्रस्थापितवान् । स पौषो माघश्चातीतः । फाल्गुन एव प्रवृत्त इति । तेन वसन्तः प्रत्यासन्न एव न प्राप्तः

स० अङ्गुलीनांसमूहाआङ्गुलानि । सुकुमाराणि आङ्गुलानियेषांतैः । एतेनादरलाभसंख्याव्ययादिलाभकर्तृत्वजन्यविप्तिनिरस्तं ॥ १२ ॥ रामानु० धर्मचारिणी यान् बिलादुत्तारयामास तान् समाश्वास्य इदमब्रवीदितिसंबन्धः ॥ शि० तया स्वयंप्रभयैव । बिलादुत्तारिताः । तथाएवार्थौ । च अनन्तरं । धर्मचारिणी निस्सृतान्वानरान्समाश्वास्येदमब्रवीत् । श्लोकद्वयमेकान्वयि ॥१३-१४॥ ति० प्रस्रवणः किष्किन्धासमीपप्रस्रवणादन्योऽयमित्याहुः । अत्युच्चलाभतोपितस्यदर्शनमित्यन्ये ॥ यत्रेच्छा तत्रगन्तव्यमितितात्पर्यं ॥ १५ ॥ शि० वासन्तिकान् वसन्तकालिकानिवद्रुमान् । वासन्तिकशब्द आचारक्विबन्तप्रकृतिककर्तृक्विबन्तः । एतेन तद्देशस्य प्रभावातिशयःसूचितः ॥ २० ॥ ति० नष्टः संदेशकाले राजसंदिष्टमासरूपेकाले अनुष्ठेयोऽर्थोयेषांते ॥ २१ ॥ ति० शिष्टान्

[पा०] १ इदमर्धपक्षकं ग. पाठे. दृश्यते. २ क.—ट. बिलात्तस्मात्तारयिष्यति. ३ क. च. छ. ञ. निर्मीलयन्तु. ४ क. ख. ग. ततस्तुमीलिताः. छ. झ. ञ ट. ततोनिमीलिताः. ग. ततःसुमीलिताः. क. ततस्तेवानराःसर्वे. ५ क.—घ. गमनकाङ्क्षिणः. ६ ग. तदा. ७ ख. ज. सर्वांस्तुतान्वानरांश्चतापसी. क. छ. झ. ट. उवाचसर्वांस्तास्तत्रतापसी. ग. बिलादुत्तारयामाससर्वान्वैधर्मचारिणी. ञ. उत्तार्यसर्वांस्तांस्तत्रतापसी. ८ घ. निर्गतान्. ९ क. ख. ङ.—ट. स्तापयुतः. १० ख. वानरोत्तमाः. ११ क. ङ.—ट. एकले. १२ क.—ङ. ज. ञ. महाभागाः. १३ ख. घ. प्रतिबुद्धाः. ग. छ. झ. ञ. ट. प्रतिवेद्य. च. ज. प्रतिपद्य. क. प्रतिबुध्य. १४ क. कार्यार्थाः. १५ क.—ट. वृद्धांश्च.

वयमाश्वयुजे मासि कालसंख्याव्यवस्थिताः ॥ प्रस्थिताः सोऽपि चातीतः किमतः कार्यमुत्तरम् ॥२५॥
भवन्तः प्रत्ययं प्राप्ता नीतिमार्गविशारदाः ॥ हितेष्वभिरता भर्तुर्निसृष्टाः सर्वकर्मसु ॥ २६ ॥
कर्मस्वप्रतिमाः सर्वे दिक्षु विश्रुतपौरुषाः ॥ मां पुरस्कृत्य निर्याताः पिङ्गाक्षप्रतिचोदिताः ॥ २७ ॥
इदानीमकृतार्थानां मर्तव्यं नात्र संशयः ॥ हरिराजस्य संदेशमकृत्वा कः सुखी भवेत् ॥ २८ ॥
तस्मिन्नतीते काले तु सुग्रीवेण कृते स्वयम् ॥ प्रायोपवेशनं युक्तं सर्वेषां च वनौकसाम् ॥ २९ ॥
तीक्ष्णः प्रकृत्या सुग्रीवः स्वामिभावे व्यवस्थितः ॥ न क्षमिष्यति नः सर्वानपराधकृतो गतान् ॥३०॥
अप्रवृत्तौ च सीतायाः पापमेव करिष्यति ॥ तस्मात्क्षममिहाद्यैव प्रायोपविशनं हि नः ॥
त्यक्त्वा पुत्रांश्च दारांश्च धनानि च गृहाणि च ॥ ३१ ॥
ध्रुवं नो हिंसिता राजा सर्वान्प्रतिगतानितः ॥ वधेनाप्रतिरूपेण श्रेयान्मृत्युरिहैव नः ॥ ३२ ॥
न चाहं यौवराज्येन सुग्रीवेणाभिषेचितः ॥ नरेन्द्रेणाभिषिक्तोस्मि रामेणाक्लिष्टकर्मणा ॥ ३३ ॥

॥ २१—२४ ॥ वयमाश्वयुजे मासीति कालसंख्याव्यवस्थिताः कालसंख्यया नियमिताः । वयं आश्वयुजे मासि हनुमच्चोदितेन सुग्रीवेण पञ्चदशरात्रसंख्यया नियम्य समाहूताः । ततो मार्गशीर्षे लक्ष्मणचोदितेन तेन दशरात्रसंख्यया समाहूताः । ततः सीतान्वेषणे पौषमासमवधिं कृत्वा तेन प्रेषिताः । एवमाश्वयुजमासमारभ्य कालसंख्याव्यवस्थितानामस्माकं कालविस्मरणं न युक्तमित्यर्थः । अन्ये त्वाहुः—आश्वयुजे मासि दशम्यामुत्थितायामितिवत्सामीपिकाधिकरणविवक्षया सप्तमी । तेन "कार्तिके समनुप्राप्ते त्वं रावणवधे यत" इत्युक्तकालातिक्रमणप्रयुक्तरामकोपदर्शनात् कार्तिकान्तो विवक्षितः । सोपि चातीतः समार्गणावधिभूतमार्गशीर्षमासः । अपिचेत्याभ्यां पदाभ्यां तदनन्तरभूतौ पौषमाघौ समुच्चीयेते । अतश्च फाल्गुन एव प्राप्त इति भाव इत्याहुः । अत उत्तरं किं कार्यं ॥२५॥ प्रत्ययं विश्वासं । नीतिमार्गे विशारदाः प्रगल्भाः । निसृष्टाः दक्षा इति यावत् ॥ २६—२८ ॥ प्रायाय अन्तगमनाय उपवेशनं शयनं प्रायोपवेशनं ॥ २९ ॥ अप्रवृत्तौ अवार्तायां । प्रायोपविशनमिति गुणाभाव आर्षः ॥ ३०—३१ ॥ त्वां यौवराज्ये कृतवान्सुग्रीवः

वृद्धेभ्योऽन्यान् ॥ २२ ॥ ति० कालात्ययमेवाह—वयमिति । आश्वयुजे अतीतप्रायेइतिशेषः । "कार्तिकेसमनुप्राप्ते त्वंरावणवधे यत" इत्युक्तेः । ततःपञ्चदशरात्रकालसंख्यया प्रवर्तितदूतैः व्यवस्थिताः मिलिताः । एवंचामान्तमानेनाश्विनस्योत्तरे दीपोत्सवामायुतेपक्षे सर्वसेनागमनंकिष्किन्धायां । रामस्यक्रोधस्तु तत्रैवपक्षे कार्तिकसंनिधावपि तदुद्यमाभावकृतः । ततः कार्तिकेऽवधिरन्वेषणस्य । ततोमार्गशुक्लेइदंवचनं । प्रायस्तद्वर्षे पौषः क्षयमासः । "कार्तिकादित्रयेनान्यतः" इत्युक्तेः । अतो मार्गशुक्लएव आम्रादीनांपुष्पोद्गमः उत्पाततोवा । तादृशरीत्या पुष्पोद्गमंदृष्ट्वापि वसन्तासन्नतानुमानेन भयोपपत्तिः । कतकादयस्तु अन्वेषणेऽवधित्वेनदत्तःपौषोमासः । आश्वयुजइत्यस्य तत्प्रत्यासन्नकार्तिकान्तेइत्यर्थः । कालसंख्येति । कार्तिकोत्तरं पञ्चदशरात्रसंख्याकालेनावधिना वानरानयनायदूतप्रेषणं । ततःपूर्णिमान्तमानेन मार्गशुक्लेन सर्ववानरागमनं । ततःपौषाद्यदिने दिक्ष्वन्वेषणाय वानरप्रस्थानं । तत्रपौषे माघकृष्णीयकिंचिद्दिनसहितेऽतीते इदंवाक्यमित्याहुः । तेषां सीतानयनोत्तरं सीतांप्रति द्वादशमासाः रावणावधिरितिस्पष्टमेव । पंपायाचैत्रमासे आगमनमित्यस्योक्तत्वात् । ततःपूर्वंफाल्गुनेसीतापहारइतिच स्पष्टमेव । एवंच माघकृष्णे तच्छुक्लादौवा हनूमतःसीतासमीपगमने हनूमन्तंप्रति "वर्ततेदशमोमासोद्वौतुशेषौप्लवङ्गम" इतिसीतोक्तिविरोधः । किंच हनूमतोलङ्काप्रवेशदिने प्रदोषसमयएव पूर्णकल्पचन्द्रोदयवर्णनंच विरोधइत्याहुः ॥ २५ ॥ स० सर्वकर्मसु कर्तव्यत्वेनोपस्थितेषु प्रत्ययं प्रभुविश्वासं । यस्मैहितेषु अभिरताः तस्माद्भर्तुर्निसृष्टाइति यत्तच्छब्दाध्याहारेणयोजनायां "चतुर्थीतदर्थार्थबलिहितसुखरक्षितैः" इत्यनुकूलितं भवति । यद्वा हनुमदितरेषां हिताभिरतेरभावमावेदयति भर्तुरितिषष्ठी ॥ २६ ॥ ती० प्रायोपविशनं । "प्रायश्चानशनेमृत्यौ" इतिकोशः ॥ ति० पुत्रादित्यक्त्वाप्रायोपवेशनं गन्तुंकर्तुंक्षमंयुक्तमित्यन्वयः ॥ ३१ ॥ शि० ननु "विषवृक्षोपिसंवर्ध्य स्वयंछेत्तुमसांप्रतं" इतिन्यायेन युवराजत्वेनाभिषेचितंत्वां सुग्रीवःकथंहनिष्यतीत्यतआह—नेति

[पा०] १ ग. किमेतत्कार्यं. २ च. ञ. निर्विष्टाः. घ. निर्दिष्टाः. ३ ग. कर्मस्वप्रतिघाताश्च. क. ख. कर्मस्वप्रतिमाःशूराः. ४ क. ख. विश्रान्तपौरुषाः. ५ क. ख. पिङ्गाक्षेशप्रचोदिताः. ६ झ. ट. अस्मिन्नतीते. ७ क. च. ज. ञ. स्वयंकृते. ८ छ. झ. ट. गन्तुंप्रायोपवेशनं. ख. ग. ङ. च. ज. ञ. हितंप्रायोपवेशनं. क. प्रायोपविशनंहितम्. ९ क. ध्रुवंवो. ख. ग. यावन्नोपातयेद्राजा. १० घ.—ट. हिंसते.

स पूर्वं बद्धवैरो मां राजा दृष्ट्वा व्यतिक्रमम् ॥ घातयिष्यति दण्डेन तीक्ष्णेन कृतनिश्चयः ॥ ३४ ॥
किं मे सुहृद्भिर्व्यसनं पश्यद्भिर्जीवितान्तरे ॥ इहैव ग्रावमासिष्ये पुण्ये सागररोधसि ॥ ३५ ॥
एतच्छ्रुत्वा कुमारेण युवराजेन भाषितम् ॥ सर्वे ते वानरश्रेष्ठाः करुणं वाक्यमब्रुवन् ॥ ३६ ॥
तीक्ष्णः प्रकृत्या सुग्रीवः प्रियासक्तश्च राघवः ॥ [समीक्ष्याकृतकार्यास्तु तस्मिंश्च समये गते] ॥
अदृष्टायां तु वैदेह्यां दृष्ट्वा चैव समागतान् ॥ ३७ ॥
राघवप्रियकामार्थं घातयिष्यत्यसंशयम् ॥ न क्षमं चापराद्धानां गमनं स्वामिपार्श्वतः ॥ ३८ ॥
[प्रधानभूताश्च वयं सुग्रीवस्य समागताः] ॥ इहैव सीतामन्विष्य प्रवृत्तिमुपलभ्य वा ॥
नो चेद्गच्छाम तं वीरं गमिष्यामो यमक्षयम् ॥ ३९ ॥

प्लवङ्गमानां तु भयार्दितानां श्रुत्वा वचस्तार इदं बभाषे ॥
अलं विषादेन विलं प्रविश्य वसाम सर्वे यदि रोचते वः ॥ ४० ॥
इदं हि मायाविहितं सुदुर्गमं प्रभूतवृक्षोदकभोज्यपेयकम् ॥
इहास्ति नो नैव भयं पुरन्दरान्न राघवाद्वानरराजतोऽपि वा ॥ ४१ ॥
श्रुत्वाङ्गदस्यापि वचोनुकूलमूचुश्च सर्वे हरयः प्रतीताः ॥
यथा न हिंस्येम तथा विधानमसक्तमद्यैव विधीयतां नः ॥ ४२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे त्रिपञ्चाशः सर्गः ॥ ५३ ॥

चतुःपञ्चाशः सर्गः ॥ ५४ ॥

अङ्गदादिभिस्तारमतानुमोदने हनुमता इतरवानरभेदनपूर्वकमङ्गदंप्रतिसुकुशलपृच्छासेनभीषणम् ॥ १ ॥ तथा सुग्रीवस्य शुभगुणत्वादिहेतूक्त्या ततोभयाभावाद्युपपादनपूर्वकं सुग्रीवसमीपंप्रति गमनचोदना ॥ २ ॥

तथा ब्रुवति तारे तु ताराधिपतिवर्चसि ॥ अथ मेने हृतं राज्यं हनुमानङ्गदेन तत् ॥ १ ॥

कथं हिंस्यादित्यत्राह—न चाहमिति ॥ ३२—३४ ॥ मे जीवितान्तरे जीवितावधौ । व्यसनं पश्यद्भिः सुहृद्भिः किं सुहृदो मद्व्यसनप्रदर्शनेन क्लेशयित्वा मम किं प्रयोजनमित्यर्थः ॥ ३५—३८ ॥ सीतामन्विष्य तस्याः प्रवृत्तिं वृत्तान्तमुपलभ्य वीरं तं गच्छाम । नोचेदिहैव यमक्षयं यमगृहं गमिष्यामः ॥ ३९—४१ ॥ अङ्गदस्याप्यनुकूलं तारस्य वचनं श्रुत्वेत्यन्वयः । विधानं कार्यं । कर्मणि स्युट् । असक्तं अविलम्बं ॥ ४२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने त्रिपञ्चाशः सर्गः ॥ ५३ ॥

अथ हनुमता अङ्गदमतभेदनपूर्वकमङ्गदस्य सुग्रीवसमीपगमनाय नियोजनं चतुःपञ्चाशे—तथेत्यादि ॥

॥ ३१ ॥ शि० जीवितान्तरे जीवनावधिमध्ये । मेऽव्यसनं राज्यहरणान्मरणं । पश्यद्भिः सुहृद्भिः किं कर्तव्यमितिशेषः । नकिमर्थीत्यर्थः । एतेन मत्सुहृदामप्यधिकःखेदोमविष्यतीति सूचितं ॥ ३५ ॥ स० पुरन्दरादित्युक्त्याकैमुत्यंसूच्यते ॥ ४१ ॥ इतित्रिपञ्चाशःसर्गः ॥ ५३ ॥

ति० ताराधिपतिवर्चसि तारे तथाब्रुवति । तुशब्दादङ्गदे प्रतिषेधाकरणात्तदनुमन्यमानेसति । अथ अनन्तरं । अङ्गदेन राज्यं

[पा०] १ क. ग. घ. छ. ञ. ट. प्रियारक्तश्च. २ इदमर्धं. ङ.—ट. पाठेषुदृश्यते. ३ क. ख. ङ.—ट. अदृष्टयाचं. ४ क. ख. ग. दृष्ट्वास्मांश्चसमागतान्. घ. दृष्ट्वाचास्मान्समागतान्. ५ ख. घ. ङ.—ट. कामाय. ६ ग. सापराधानां. ख. ग. घ. ज्ञपराद्धानां. ७ इदमर्धं. ङ.—ट. पाठेषुदृश्यते. ८ क. छ. ञ. मन्वीक्ष्य. ९ ट. सुपलभ्यच. १० ङ. ज. रोचतेवचः. ११ ङ.—ट. पुष्पोदक. १२ क.—ट. पेयं. १३ ङ. च. ज. पुरंदराद्वयं. १४ क.—ट. हन्येम.

बुद्ध्या[1] ह्यष्टाङ्गया युक्तं चतुर्बलसमन्वितम् ॥ चतुर्दशगुणं मेने हनुमान्वालिनः सुतम् ॥ २ ॥
आपूर्यमाणं शश्वच्च तेजोबलपराक्रमैः ॥ शशिनं शुक्लपक्षादौ वर्धमानमिव श्रिया ॥ ३ ॥
बृहस्पतिसमं बुद्ध्या विक्रमे सदृशं पितुः ॥ शुश्रूषमाणं तारस्य शुक्रस्येव[2] पुरन्दरम् ॥ ४ ॥
भर्तुरर्थे[3] परिश्रान्तं सर्वशास्त्रविदां[4] वरम् ॥ अभिसंधातुमारेभे हनुमानङ्गदं ततः ॥ ५ ॥
स चतुर्णामुपायानां तृतीयमुपवर्णयन् ॥ भेदयामास तान्सर्वान्वानरान्वाक्यसंपदा ॥ ६ ॥
तेषु सर्वेषु[5] भिन्नेषु ततोऽभीषयदङ्गदम् ॥ भीषणैर्बहुभिर्वाक्यैः[6] कोपोपायसमन्वितैः ॥ ७ ॥
त्वं समर्थतरः पित्रा युद्धे तारेय वै धुरम्[7] ॥ दृढं धारयितुं शक्तः कपिराज्यं यथा पिता ॥ ८ ॥
नित्यमस्थिरचित्ता हि कपयो[8] हरिपुङ्गव ॥ नाज्ञाप्यं विसहिष्यन्ति पुत्रदारान्विना[9] त्वया ॥ ९ ॥
त्वां नैते ह्यनुयुञ्जेयुः[10] प्रत्यक्षं प्रवदामि ते ॥ यथायं[11] जाम्बवान्नीलः सुहोत्रश्च महाकपिः[12] ॥ १० ॥

राज्यं हृतं मेने राज्यं कर्तुं सामर्थ्यमस्तीति मेन इत्यर्थः ॥ १ ॥ अष्टाङ्गया "ग्रहणं धारणं चैव स्मरणं प्रतिपादनम् । ऊहोपोहोर्थविज्ञानं तत्त्वज्ञानं च धीगुणाः" इत्युक्ताष्टाङ्गयुक्तया । चतुर्बलसमन्वितं बाहुबलमनोबलोपायबलबन्धुबलयुक्तं । चतुर्दशगुणं "देशकालज्ञता दार्ढ्यं सर्वक्लेशसहिष्णुता । सर्वविज्ञानिता दाक्ष्यमूर्जः संवृतमन्त्रता ॥ अविसंवादिता शौर्यं शक्तिज्ञत्वं कृतज्ञता । शरणागतवात्सल्यममर्षत्वमचापलम्" ॥ इत्युक्तचतुर्दशगुणयुक्तं ॥ २—३ ॥ तारस्य शुश्रूषमाणं । नटस्य शृणोतीतिवत्कारकशेषत्वात्षष्ठी । शुक्रस्येव पुरंदरमिति पुरंदरशब्दसन्निधानादत्र शुक्रशब्दो बृहस्पतिपरः । यद्वा कस्यांचिदवस्थायां हितमुपदिशतः शुक्रस्य वचनं पुरंदरः श्रुतवानित्यवगम्यते । गुरोरिव पुरंदरमिति क्वचित्पाठः ॥ ४ ॥ अभिसंधातुं अनुकूलयितुं ॥ ५ ॥ चतुर्णां सामादीनां । तृतीयं भेदं । "साम दानं च भेदश्च दण्डश्चेति यथाक्रमम्" इति क्रमनियमात् ॥ ६ ॥ कोपरूप उपायः कोपोपायः दण्डः तत्समन्वितैः ॥ ७ ॥ पित्रा पितुः ॥ ८ ॥ आज्ञाप्यं आज्ञापनं । भावे कृत्यप्रत्ययः । पुत्रदारान् पुत्रदारैर्विरहिताः । त्वयेति कर्तरि तृतीया । अस्य आज्ञाप्यमित्यनेन संबन्धः ॥ ९ ॥ अयं जाम्बवान्नीलः सुहोत्रश्च एते त्वां यथा नानुयुञ्जेयुः नानुवर्तेरन् । तथाहमपि नानुवर्ते हि । त इमे सर्वे सामादिभिः सुग्रीवादपक-

सुग्रीवीयंकपिराज्यं हृतमितिमेने । तद्राज्यं स्वयंप्रभाराज्यमित्यर्थइत्यन्ये ॥ १ ॥ स० शुक्लपक्षत्वेनादिः कृष्णपक्षस्य । समग्रशुक्लपक्षइत्यर्थः । तस्मिन् ॥ ३ ॥ ति० शुक्रस्येवपुरन्दरं विपरीतोपदेशग्रहे उपमैषा ॥ स० शुश्रूषमाणं आकर्णयन्तं । तारस्यवचइतिशेषः । कदापि नैतद्घटतइति सूचयितुमभूतोपमितिमाह—शुक्रस्येवपुरन्दरमिति ॥ शुक्रस्यवाक्यंशुश्रूषमाणं पुरन्दरमिवेत्यन्वयः ॥ ४ ॥ ति० अभिसंधातुं तारादिभ्योभेदयितुं ॥ शि० अङ्गदंअभिसन्धातुं भर्तुरर्थेसंयोजयितुं ॥ ५ ॥ ति० वाक्यसंपदा भेदजननक्षमन्यायोपेतेन "हीनाश्रयोनकर्तव्यः कर्तव्योमहदाश्रयः" इत्यादिवाक्यसमूहेन ॥ स० चतुर्णां सामदानभेददण्डानां द्वितीयउपायो दानं । तमुपवर्णयन् हेतौशतृप्रत्ययः । रामकार्येसाधिते राज्यादिप्राप्तिर्भवतीतिवर्णयित्वा तान्अङ्गदानुवर्तिनोभेदयामास स्वानुकूलांश्चकारेतियावत् ॥ द्वितीयोभेदइति नागोजिभट्टीयव्याख्यानतु "सामदानेभेददण्डावित्युपायचतुष्टयं" इति क्वचित्पुस्तकसंपुट्यां "भेददण्डौसामदाने" इत्युभयथाप्यमरपाठे भेदस्य द्वितीयत्वानुक्तिविरोधात् इहभेदयामासेति द्वितीयस्यभेदस्य भेदनहेतुत्वासंभवाच्चोपेक्ष्यं ॥६॥ ति० भीषणमेवस्तुतिपूर्वंकरोति—त्वमिति । त्वंपित्रासुग्रीवेणयुद्धेसमर्थतरः । यद्वा त्व पित्रासदृशइतिशेषः । अतएव युद्धेसमर्थतरइत्यर्थः । दृढधारयितुंशक्तः । अस्य यदिसर्वेकपयस्त्वामनुवर्त्स्यन्तीतिशेषः ॥ ८ ॥ ति० कपिराज्यं किष्किन्धायांवा ऋक्षबिलेवा । नचतदस्तीत्याह—नित्यमिति । स्वभावादितिभावः । अस्थैर्यकारणान्तरमप्याह—पुत्रदारंविनेति । पुत्रदाराणां किष्किन्धावर्तिनां सुग्रीवायत्तत्वात्त्वयासहबिलेऽवस्थाने तद्वियोगस्यस्पष्टत्वात् । निगृह्यस्थापनमप्यशक्यमित्याह—त्वयाज्ञाप्यं त्वत्कर्तृकमाज्ञापनं नसहिष्यन्ति । त्वत्तोप्यधिकबलत्वादिति-

[पा०] १ ग. बुद्ध्याप्यष्टाङ्गया. २ क. ख. गुरोरिव. ३ क. भर्तुरर्थपरिश्रान्तं. ४ क. ग. घ. च. ञ. विशारदं ङ. छ. झ. ञ. ट. विशारदः. ५ ख. ङ.—झ. द्वितीयं. ६ क. ग. घ. भिन्नेषुसर्वेषु. ७ ङ.—ट. विविधैर्वाक्यैः ८ क. ङ—ट. ध्रुवं. ९ घ. हरयो. १० क.—झ. ट. पुत्रदारंविना. ञ. पुत्रदारैर्विना. ११ ङ. छ. झ. ञ. ट. ह्यनुरञ्जेयुः. ग. ह्यनुजीवेयुः. १२ ख. यथाच. १३ ङ. च. ज. ञ. महाबलः.

न ह्यहं त इमे सर्वे सामदानादिभिर्गुणैः ॥ दण्डेन वा त्वया शक्याः सुग्रीवादपकर्षितुम् ॥ ११ ॥
विगृह्यासनमप्याहुर्दुर्बलेन बलीयसः ॥ आत्मरक्षाकरस्तस्मान्न विगृह्णीत दुर्बलः ॥ १२ ॥
यां चेमां मन्यसे धात्रीमेतद्बिलमिति श्रुतम् ॥ एतल्लक्ष्मणबाणानामीषत्कार्यं विदारणे ॥ १३ ॥
स्वल्पं हि कृतमिन्द्रेण क्षिपता ह्यशनिं पुरा ॥ लक्ष्मणो निशितैर्बाणैर्भिन्द्यात्पत्रपुटं यथा ॥ १४ ॥
लक्ष्मणस्य तु नाराचा बहवः सन्ति तद्विधाः ॥ वज्राशनिसमस्पर्शा गिरीणामपि दारणाः ॥१५॥
अवस्थाने यदैव त्वमासिष्यसि परंतप ॥ तदैव हरयः सर्वे त्यक्ष्यन्ति कृतनिश्चयाः ॥ १६ ॥
स्मरन्तः पुत्रदाराणां नित्योद्विग्ना बुभुक्षिताः ॥ खेदिता दुःखशय्याभिस्त्वां करिष्यन्ति पृष्ठतः॥१७॥
स त्वं हीनः सुहृद्भिश्च हितकामैश्च बन्धुभिः ॥ तृणादपि भृशोद्विग्नः स्पन्दमानाद्भविष्यसि ॥१८॥
न च जातु न हिंस्युस्त्वां घोरा लक्ष्मणसायकाः ॥ अपवृत्तं जिघांसन्तो महावेगा दुरासदाः ॥१९॥
अस्माभिस्तु गतं सार्धं विनीतवदुपस्थितम् ॥ आनुपूर्व्यात्तु सुग्रीवो राज्ये त्वां स्थापयिष्यति ॥२०॥
धर्मकामः पितृव्यस्ते प्रीतिकामो दृढव्रतः ॥ शुचिः सत्यप्रतिज्ञश्च न त्वां जातु जिघांसति ॥ २१ ॥
प्रियकामश्च ते मातुस्तदर्थं चास्य जीवितम् ॥ तस्यापत्यं च नास्त्यन्यत्तस्मादङ्गद गम्यताम् ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे चतुःपञ्चाशः सर्गः ॥ ५४ ॥

र्षितुं न शक्याः ॥ १०—११ ॥ बलीयसः प्रबलस्य । दुर्बलेन समं विगृह्य आसनमप्यवस्थानमपि कर्तव्यमाहुः । नतु दुर्बलस्य बलीयसा । तस्मात् आत्मरक्षाकरः स्वक्षेमकाम इति यावत् । दुर्बलः बलीयसा न विगृह्णीत विगृह्य नासीत ॥ १२ ॥ स्वतो बलाभावेपि दुर्गबलमस्तीत्याशङ्क्याह—यां चेति ॥ यामिमां गुहां धात्रीं रक्षकां मन्यसे । एतद्बिलमिति ताराच्छ्रुतं । एतत् ऋक्षबिलं । विदारणे विषये लक्ष्मणबाणानामीषत्कार्यं अयत्नसाध्यमित्यर्थः ॥ १३ ॥ पुरा बिलवासिनं मयमुद्दिश्याशनिं वज्रं क्षिपतेन्द्रेण स्वल्पं कृतं द्वारमात्रं कृतं । लक्ष्मणस्तु निशितैर्बाणैः पत्रपुटमिव भिन्द्याद्धि ॥ १४ ॥ तद्विधाः तादृशाः । अपरिच्छिन्नवैभवा इति यावत् । गिरीणामपि दारणाः बिलस्य किमुतेति भावः ॥ १५ ॥ अवस्थाने बिले । यद्वा विगृह्यावस्थाने आसिष्यसि स्थास्यसि । विगृह्यावस्थानं यदाध्यवसिष्यसीत्यर्थः ॥ १६—१८ ॥ लक्ष्मणसायकाः अपवृत्तं वृत्तहीनं स्वकार्याकरमित्यर्थः । त्वां न हिंस्युरिति न हिंस्युरेवेत्यर्थः ॥ १९ ॥ आनुपूर्व्यात् क्रमप्राप्तेः ॥ २०—२२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने चतुःपञ्चाशः सर्गः ॥ ५४ ॥

भावः ॥ ९ ॥ स० इमां गुहां । इमां स्वयंप्रभां वा । धात्रीं एकत्र रक्षयित्रीं । अपरत्र धारयित्रीं । एतत् परिदृश्यमानबिलं । मन्यसे इतराशक्यस्थानमन्यसे । एतत् विदारणं बुद्धिस्थंबिलविदारणं । लक्ष्मणबाणानां लक्ष्मणबाणैः । ईषत् कार्यमितिद्वेपदे । अल्पकार्यमित्यर्थः । तेननखल्पप्रसक्तिः । " स्वल्पंहिकृतं " इत्युत्तरग्रन्थानुकूलमिदंव्याख्यानं । खलभावआर्षइतिव्याख्यानमेकपक्षाश्रयेणतस्यप्रतिकूलमितिमन्तव्यं ॥ १३ ॥ ति० पुरा पूर्वं । माययाभूतलान्तर्निर्मितैतत्पुरवर्तिमयवधार्थमशनिं तत्प्रदेशभुवि क्षिपतेन्द्रेण स्वल्पमेवकृत मयवधमात्रंकृतं नतुपुरंभग्नं । लक्ष्मणस्तु निशितैर्बाणैरेतत्पुरमपिपत्रपुटमिवभिन्द्यात् ॥ स० स्वल्पं द्वारमात्रं । पत्रपुटं पुटति शब्दंकरोतीतितथा । पत्रंचतत्पुटंच । शुष्कपर्णमितियावत् । पुटपत्रमितिभाव्यमितितुदत्तोत्तरं । " बिलंव शुष्कवर्णवत् " इतिसंग्रहरामायणोक्तेः ॥ १४ ॥ ति० तद्विधाइत्यस्यविवरणं वज्राशनीत्यादि । वज्रं इन्द्रकरस्थं । अशनिर्मेघस्थः । यद्वातद्विधाः वालिहन्तृबाणसदृशाः ॥ १५ ॥ ति० सर्वत्रात्रलक्ष्मणनामग्रहणंतस्यक्रूरस्वभावत्वात् । ईदृशानां रामालक्ष्यत्वाच्च ॥ १९ ॥ ति० धर्मराजःधर्ममार्गवर्तीराजा तथाप्रीतिकामएवत्वयि नतुत्वद्वधकामः ॥ शि० धर्मराजः सद्धर्मैः शोभमानः ॥ २१ ॥ इतिचतुःपञ्चाशःसर्गः ॥ ५४ ॥

[पा०] १ क. ग. नचतेसर्वे. २ क. ग. ङ.—ट. दण्डेनन. ख. घ. नदण्डेन. ३ च. छ. झ. ञ ट. बलीयसा. ४ छ. झ. ञ. ट. विदारणं. ५ क. ङ.—ट. लक्ष्मणस्यच. ६ छ. झ. ट. दारकाः. ७ ङ. छ. झ. ट. अवस्थानं. ८ च. ञ. दुःखाद्दुःखतरंगत्वाकिंकरिष्यन्तिदुर्गताः. ९ क. ग. ज. झ. अत्युग्रवेगानिशिताघोराः. १० क. रामलक्ष्मण. ११ च.—ञ. अपावृत्तं. १२ छ. झ. ट. धर्मराजः. १३ च.—झ. ट. सत्वांजातुननाशयेत्. १४ ट. तस्यापत्यंतु.

पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

हनुमदुक्तसुग्रीवस्वगुणवत्त्वमसहमानेनाङ्गदेन सुग्रीवदोषोद्भावनेन तद्गर्हणपूर्वकं स्वानरान्प्रति स्वस्यप्रायोपवेशनाभ्यनुज्ञानेन प्रायोपवेशनम् ॥ १ ॥ तथाभूतेऽङ्गदे स्वयाच्ञामोचनं सुग्रीवगर्हणपूर्वकं स्वयमपि प्रायोपविष्टैः सकलकपिवरैः रामवनप्रवेशादिस्वप्रायोपवेशावधिकसर्ववृत्तान्तोद्घोषणेन गिरिदरीपरिपूरणम् ॥ २ ॥

श्रुत्वा हनुमतो वाक्यं श्रिश्रितं धर्मसंहितम् ॥ स्वामिसत्कारसंयुक्तमङ्गदो वाक्यमब्रवीत् ॥ १ ॥
स्थैर्यमात्ममनःशौचमानृशंस्यमथार्जवम् ॥ विक्रमश्चैव धैर्यं च सुग्रीवे नोपपद्यते ॥ २ ॥
भ्रातुर्ज्येष्ठस्य यो भार्यां जीवतो महिषीं प्रियाम् ॥ धर्मेण मातरं वस्तु स्वीकरोति जुगुप्सितः ॥३॥
कथं स धर्मं जानीते येन भ्रात्रा महात्मना ॥ युद्धायाभिनियुक्तेन विलस्य पिहितं मुखम् ॥ ४ ॥
सत्यात्पाणिगृहीतश्च कृतकर्मा महायशाः ॥ विस्मृतो राघवो येन स कस्य तु कृतं स्मरेत् ॥ ५ ॥
लक्ष्मणस्य भयाद्येन नाधर्मभयभीरुणा ॥ आदिष्टा मार्गितुं सीतां धर्मसस्मिन्कथं भवेत् ॥ ६ ॥
तस्मिन्पापे कृतघ्ने तु स्मृतिहीने चलात्मनि ॥ आर्यः को विश्वसेज्जातु तत्कुलीनो जिजीविषुः ॥७॥
राज्ये पुत्रः प्रतिष्ठाप्यः सगुणो निर्गुणोऽपि वा ॥ कथं शत्रुकुलीनं मां सुग्रीवो जीवयिष्यति ॥८॥
भिन्नमन्त्रोपराद्धश्च हीनशक्तिः कथं ह्यहम् ॥ किष्किन्धां प्राप्य जीवेयमनाथ इव दुर्बलः ॥ ९ ॥
उपांशुदण्डेन हि मां बन्धनेनोपपादयेत् ॥ शठः क्रूरो नृशंसश्च सुग्रीवो राज्यकारणात् ॥ १० ॥

अथ हरीणां प्रायोपवेशः पञ्चपञ्चाशे—श्रुत्वेत्यादि ॥ १ ॥ स्थैर्यं स्थिरबुद्धिता । आत्ममनःशौचं आत्मशुद्धिः मनसः शौचं अन्तःकरणशुद्धिश्चेत्यर्थः । धैर्यं गाम्भीर्यम् ॥ २ ॥ मनःशौचाभावमुपपादयति—भ्रातुरिति ॥ स कथं धर्मं जानीत इति वक्ष्यमाणमाकृष्यते । जीवत इत्यनेन भ्रातुर्मरणानन्तरं तद्भार्योपरिग्रहः कुलधर्म इत्यवगम्यते ॥ ३ ॥ आनृशंस्याभावमुपपादयति—युद्धायेति ॥ युद्धाय बालिना नियुक्तेनेत्यर्थः ॥ ४ ॥ आर्जवाभावमुपपादयति—सत्यादिति ॥ पाणिगृहीतः पाणौ गृहीतः ॥ ५ ॥ कथं तर्हि सेनानीतवान्सुमीव इत्याशङ्क्याह—लक्ष्मणस्येति ॥ नाधर्मभयभीरुणा भयशब्दोत्र भयहेतुपरः । अधर्मरूपभयहेतोर्भीरुणा न च । किंतु लक्ष्मणस्य भयात् । लक्ष्मणदण्डनिमित्तभयादित्यर्थः ॥ ६—७ ॥ तव यौवराज्यस्थापनं किं विस्मृतोसीत्यत्राह—राज्य इति ॥ पुत्रः जनिष्यमाणः स्वपुत्रः ॥ ८ ॥ भिन्नमन्त्रः प्रकाशितविगृह्यावस्थानमन्त्रः । अपराद्धः कृतापराधः। यद्वा पितृहिंसनेन संजातापराधः ॥ ९ ॥ उपांशुदण्डेन रहस्यदण्डरूपेण । उपपादयेत् प्रापयेत् ॥ १० ॥

ति० ज्येष्ठस्यभ्रातुर्भार्यां धर्मेणमातरं धर्मेणधर्मेणवर्तमानांज्येष्ठभ्रातृपत्नीतांमातृतुल्यां । जीवतोममसमक्षं । अनेन "देवराच्चसुतोत्पत्तिं " इत्यतोपिधर्मलंबारितं । यद्वा जीवतोमहिषीमिति महिषयुद्धकालिकस्वीकारपरं । य स्वीकरोति कथं स धर्मंजानीते इत्यन्वयः । एतेन हनूमदुक्तंधर्मराजलंप्रख्याख्यातं । एतद्वचोऽङ्गदस्यकेवलरोषमूलं त्रैवर्णिकातिरिक्तधर्मास्मरणपूर्वकं ॥ स० धर्मेणमातरं ज्येष्ठभ्रातृपत्नीलक्षणधर्मप्रयोज्यमातृतुल्यवतीं ॥ ३ ॥ ति० ' धर्मसस्मिन् ' इतिपाठे धर्मं धर्मधीमूलंप्रवर्तनमित्यर्थः ॥ ६ ॥ ति० स्मृतिभिन्ने स्मृतिमन्त्रादीनां भिन्ना लक्षा येन । तत्कुलीनः तज्जातिकोटिप्रविष्टः ॥ ७ ॥ ति० सुग्रीवःसगुणो निर्गुणोवास्तु नमे तद्विचारेणकिंचित् । अपितु शत्रुकुलीनं मांपुत्रंराज्येप्रतिष्ठाप्य कथंसुग्रीवो जीवयिष्यति नकथमपीत्यर्थः ॥ स० शत्रुकुलीनं शत्रोर्बालिनःकुलंदेहः तत्रभवस्तस्मादुत्पन्नः । " कुलात्त्रः " । " कुलगोत्रेदेहेपि " इतिविश्वः ॥ ८ ॥ ति० भिन्नोविलग्नप्रवेशरूपोमन्त्रोयस्यसः । एवंमन्त्रस्यस्वकस्यापिमुखाच्छ्रवणेऽवश्यंभाविनिस्पष्टमपराद्धश्चभवामि । हीनशक्तिः सुग्रीवापेक्षयाहीनबलः । हनुमदुक्तरीत्यासहायबलहीनश्च ॥ ९ ॥ स० उपांशुदण्डेन लोकाविदितशिक्षया । बन्धनेन कारागारस्थापनादिना । शठोगूढद्वेषी । क्रूरः असह्यव्यापारः । नृशंसोघातकः । यद्यप्येतएकताऽमीषां । तथापि त्रिकारंवदिष्यामीति हनूमतो

[पा०] १ क.—ट. दुरात्मना. २ ग. घ. ङ. च. ज. विलस्यापिहितं. ३ च. श. कस्यसुकृतं. ४ ग. च.—ट. भयेनेह. ५ झ. धर्मेसस्मिन्. ञ. ट. धर्मेस्तस्मिन्. ६ छ. झ. स्मृतिभिन्ने. ७ क.—ट विशेषतः. ८ ग. ङ.—ट. पुत्रंप्रतिष्ठाप्य. ९ ग. ङ. च, ज. ञ. शत्रुणो. १० ङ—ट. विगुणोपिवा. ११ ङ. च ज. ग. भिन्नमन्त्रोविरुद्धश्च. १२ क. बाधनेन.

बन्धनाद्वाऽवसादान्मे श्रेयः प्रायोपवेशनम् ॥ अनुजानीत मां सर्वे गृहं गच्छन्तु वानराः ॥११॥
अहं वः प्रतिजानामि नागमिष्याम्यहं पुरीम् ॥ इहैव प्रायमासिष्ये श्रेयो मरणमेव मे ॥ १२ ॥
अभिवादनपूर्वं तु राघवौ बलशालिनौ ॥ अभिवादनपूर्वं तु राजा कुशलमेव च ॥
वाच्यस्तातो यवीयान्मे सुग्रीवो वानरेश्वरः ॥ १३ ॥
आरोग्यपूर्वं कुशलं वाच्या माता रुमा च मे ॥ मातरं चैव मे तारामाश्वासयितुमर्हथ ॥ १४ ॥
प्रकृत्या प्रियपुत्रा सा सानुक्रोशा तपस्विनी ॥ विनष्टमिह मां श्रुत्वा व्यक्तं हास्यति जीवितम् ॥१५॥
एतावदुक्त्वा वचनं वृद्धांस्तानभिवाद्य च ॥ विवेश चाङ्गदो भूमौ रुदन्दर्भेषु दुर्मनाः ॥ १६ ॥
तस्य संविशतस्तत्र रुदन्तो वानरर्षभाः ॥ नयनेभ्यः प्रमुमुचुरुष्णं वै वारि दुःखिताः ॥ १७ ॥
सुग्रीवं चैव निन्दन्तः प्रशंसन्तश्च वालिनम् ॥ परिवार्याङ्गदं सर्वे व्यवसन्प्रायमासितुम् ॥ १८ ॥
मतं तद्वालिपुत्रस्य विज्ञाय प्लवगर्षभाः ॥ उपस्पृश्योदकं तत्र प्राङ्मुखाः समुपाविशन् ॥ १९ ॥
दक्षिणाग्रेषु दर्भेषु उदक्तीरं समाश्रिताः ॥ मुमूर्षवो हरिश्रेष्ठा एतत्क्षममिति स्म ह ॥ २० ॥
रामस्य वनवासं च क्षयं दशरथस्य च ॥ जनस्थानवधं चैव वधं चैव जटायुषः ॥ २१ ॥
हरणं चैव वैदेह्या वालिनश्च वधं रणे ॥ रामकोपं च वदतां हरीणां भयमागतम् ॥ २२ ॥
स संविशद्भिर्बहुभिर्महीधरो महाद्रिकूटप्रतिमैः प्लवङ्गमैः ॥
बभूव सन्नादितनिर्दरान्तरो भृशं नदद्भिर्जलदैरिवोल्बणैः ॥ २३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

बन्धनाद्वावसादान्म इति वेति प्रसिद्धौ । बन्धनरूपावसादात् ॥ ११—१२ ॥ राघवौ कुशलं वाच्यावित्यनुषङ्गः ॥ १३—१४ ॥ तपस्विनी शोचनीया ॥ १५—१६ ॥ तस्य संविशतः तस्मिन् संविशति । संवेशः शयनं ॥ १७—१८ ॥ तत्र विन्ध्ये । उदक्तीरं समुद्रस्योत्तरतीरं । एतत् प्रायोपवेशनं क्षममिति मत्वेति शेषः ॥ १९—२० ॥ जनस्थानवधं जनस्थानस्थरक्षोवधं ॥ २१ ॥ आगतं भयं प्रायोपवेशनरूपभयनिमित्तं च । वदतां वदत्सु च । स महीधरो भृशं सन्नादितनिर्दरान्तरो बभूवेत्युत्तरेणान्वयः ॥ २२—२३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

निश्चयजननाय शठाद्युक्तिर्युक्ता ॥ १० ॥ स० अहमहमितिद्विरुक्तिः प्रतिजानामि गमिष्यामीत्याख्यातद्वययोगादुपपन्ना । यद्वा अहमिति मान्तमहङ्कारवद्वाच्यव्ययं । अहं अहन्तावान् अभिमानीतियावत् ॥ १२ ॥ ति० राजा सुग्रीवः । कुशलमेववाच्य इत्यनुकर्षः । नत्विदानीं दुःखवशादुक्तमित्यर्थः ॥ ति० अथमातुः कुशलविज्ञापनाशेषतयाऽऽरोग्यपूर्वकत्वविशेषाभिधित्सयाच पुनःसुग्रीवेकुशलविज्ञापनमाह—वाच्यस्तातइति ॥ १३ ॥ ति० निन्दन्तः । अङ्गदपक्ष्याइतिशेषः । व्यवसन् व्यवास्यन् ॥ शि० वालिनंप्रशंसन्तः वाली अतीवभाग्यवान् युद्धेरामसंमुखेमृतइतिवदन्तः ॥ १८ ॥ ती० उत्तरीयंसमाहिताइतिकर्तरिनिष्ठा । उत्तरीयंसंवसितवन्तइत्यर्थः । उदक्तीरंसमाश्रिताइतिचपाठः ॥ ति० हरिश्रेष्ठाअपि एतत्प्रायोपवेशनमेवास्माकमद्यक्षमं युक्तंइति मन्यन्ते स्मेतिशेषः । स्वामिनिम्रियमाणे तंपरित्यज्यास्माकंगमनमयुक्तमिति तत्क्षमत्वव्यवसायः ॥ २० ॥ ती० हरीणांभयमागतं संपातिरूपंभयनिमित्तंप्राप्तं । एतच्चानन्तरसर्गादौस्पष्टीभविष्यति ॥ स० रामकोपं सुग्रीवोपरि । हरीणांतेषांसुग्रीवादागतंभयं वदतामित्यन्वयः ॥ २२ ॥ ती० भयनिमित्तागमनेहेतुमाह—ससंविशद्भिरिति ॥ संनादितनिर्दरान्तरत्वस्य भयनिमित्तसंपात्यागमनहेतुत्वात् ॥ २३ ॥ इतिपञ्चपञ्चाशःसर्गः ॥ ५५ ॥

[पा] १ क. ख. ग. ङ—ट. बन्धनाद्वा. २ ङ.—ट. अनुजानन्तु ३ क.—घ. गृहान्. ४ ङ.—ट. नगमिष्याम्यहं. ५ क. घ. पूर्वंहि. ६ च—ट. राजाकुशलमेवच । अभिवादनपूर्वंतुराघवौबलशालिनौ. ७ ङ. च. ज. म. वाच्य पिता. ८ क.—घ. ङ. ण. विनष्टमामिहश्रुत्वा. ९ क. ख. घ. एतावद्वचनंचोक्त्वावृद्धानप्यभिवाद्यच. १० क.—घ. संविवेशाङ्गदो. ११ ङ.—ट. दुर्मुखः. १२ क. सुग्रीवचापि. १३ क. ख. घ. छ. म. व्यवास्यन् ग. व्यतिष्ठन्. १४ ख. झ. ट. तद्वाक्यं वालिपुत्रस्य. १५ ख. घ—ट सर्वेप्राङ्मुखाः. क. विन्ध्येप्राङ्मुखाः. १६ ङ.—ट. तथा. १७ क. ख. एवंवदद्भिर्बहुभिः. १८ ख. झ. निर्झरान्तरो. १९ ङ.—ट. रिवांबरं.

षट्पञ्चाशः सर्गः ॥ ५६ ॥

कपिकुलकोलाहलाद्विन्ध्यकन्दरादिनिर्गतेनसंपातिना कपिकुलावलोकनेन चिरतराहारपरिकल्पनहर्षादिभिःप्रशंसनपूर्वकं क्रमेण सर्ववानरमक्षणप्रतिज्ञानम् ॥ १ ॥ तदाकर्णनखिन्नेनाङ्गदेन हनूमन्तंप्रति रामकार्यकरणेन प्राणविमोक्षणाद्रामोपकाराय रावणान्मारणाधिगमाच्च क्रमेणारमणाईणजटायुःप्रशंसनपूर्वकमेतावद्विपत्तिनिमित्तत्वोत्कीर्तनेन कैकेयीगर्हणम् ॥ २ ॥ तदाकर्णनखिर्दिण्णेनसंपातिनाऽङ्गदंप्रति स्वस्य जटायुरग्रजत्वनिवेदनेन तन्मरणप्रकारप्रभृतिपूर्वकं स्वस्यसूर्यकिरणनिर्दग्धपक्षत्वोक्त्या पर्वतादवतारणप्रार्थना ॥ ३ ॥

[1]उपविष्टास्तु ते सर्वे यस्मिन्नार्यं गिरिस्थले ॥ हरयो गृध्रराजश्च तं देशमुपचक्रमे ॥ १ ॥
संपातिर्नाम नाम्ना तु [2]चिरंजीवी विहङ्गमः ॥ भ्राता जटायुषः श्रीमान्प्रख्यातबलपौरुषः ॥ २ ॥
कन्दरादभिनिष्क्रम्य स विन्ध्यस्य महागिरेः ॥ उपविष्टान्हरीन्दृष्ट्वा हृष्टात्मा गिरमब्रवीत् ॥ ३ ॥
विधिः किल नरं लोके विधानेनानुवर्तते ॥ यथाऽयं विहितो भक्ष्यश्चिरान्मह्यमुपागतः ॥ ४ ॥
परं पराणां भक्षिष्ये वानराणां मृतं मृतम् ॥ [3]उवाचेदं वचः पक्षी तान्हरीक्ष्य प्लवङ्गमान् ॥ ५ ॥
तस्य तद्वचनं श्रुत्वा भक्ष्यलुब्धस्य पक्षिणः ॥ अङ्गदः परमायस्तो हनुमन्तमथाब्रवीत् ॥ ६ ॥
पश्य [4]सीतापदेशेन साक्षाद्वैवस्वतो यमः ॥ इमं देशमनुप्राप्तो वानराणां विपत्तये ॥ ७ ॥
रामस्य [5]नैकृतं कार्यं [6]राज्ञो न च वचः कृतम् ॥ हरीणामियमज्ञाता विपत्तिः सहसाऽऽगता ॥ ८ ॥
वैदेह्याः प्रियकामेन कृतं कर्म जटायुषा ॥ गृध्रराजेन यच्चत्र श्रुतं वस्तदशेषतः ॥ ९ ॥
तथा [7]सर्वाणि भूतानि तीर्यग्योनिगतान्यपि ॥ प्रियं कुर्वन्ति रामस्य त्यक्त्वा प्राणान्यथा वयम् ॥
अन्योन्यमुपकुर्वन्ति स्नेहकारुण्यसंश्रिताः ॥ १० ॥
[8][9]तेन तस्योपकारार्थं त्यजतात्मानमात्मना ॥ प्रियं कृतं हि रामस्य धर्मज्ञेन जटायुषा ॥ ११ ॥

अथ संपातिसंवादः षट्पञ्चाशे—उपविष्टा इत्यादि ॥ उपचक्रमे प्रायमुपक्रान्तः ॥ १ ॥ संपातिरित्यादि श्लोकद्वयमेकान्वयं ॥ २—३ ॥ विधिः दैवं । विधानेन योगक्षेमसंपादनेन । यथा यस्मात्कारणात् ॥ ४ ॥ परानां वानराणां मध्ये परं वानरं मृतंमृतं भक्षिष्य इत्येवं वच उवाचेत्यन्वयः ॥ ५ ॥ परमायस्तः परमोद्विग्न इत्यर्थः ॥ ६—७ ॥ अज्ञाता अचिन्तिता ॥ ८—९ ॥ स्नेहकारुण्ययश्रिताः स्नेहकारुण्याभ्यां

स० विधिः दैवं कर्मफलंवा । विधानेनापूर्वकर्मानुरोधेन । नरमनुवर्तते । सामान्येनोक्तस्यसिंहिगमनयत्नवगमयति—यथेति । चिरादुपोषितायेतिशेषः । विहितोमह्यं मयोग्यः । भक्ष्यः कपिपिशितरूपः । यद्वा भक्ष्यमितिचतुर्थीद्वितीयार्थे । विहितोयोग्योभक्ष्योमामुपागतइत्यन्वयः ॥ ४ ॥ रामानु० परानां श्रेष्ठानां । वानराणांमध्ये परं वानरं मृतंमृतं मारयित्वामारयित्वा भक्षिष्येइत्येवंवचउवाचेतिसंबन्धः ॥ पूर्वत्र " हरीणांमयमागतं " इतिवचनस्य परत्र " पश्यसीतापदेशेन " इत्याद्यङ्गदनिर्वेदवचनस्य च स्वयंमृतभक्षणेऽनुपपन्नत्वान्मारयित्वामारयित्वेति व्याख्यातं ॥ ति० यतः परेषांपराणां पङ्क्तितउपविष्टानांवानराणांमध्ये मृतंमृतंक्रमाद्भक्षिष्ये । तस्मादितिपूर्वेणसंबन्धः ॥ ५ ॥ स० सीतापदेशेन सीताव्याजेनप्राप्तप्रायोपवेशानामित्यर्थः । वानराणांविपत्तये साक्षाद्वैवस्वतोयमः अयंगृध्ररूपी इमंदेशमनुप्राप्तः । गृध्रापदेशेनेतिपाठे सुगमोर्थः । शनैश्चरव्यावृत्तयेयमुक्तं । यमंलक्ष्मणंरक्षाय वैवस्वतइति ॥ ७ ॥ स० पूर्वंपश्येति हनुमन्मात्रंसंबोध्योक्तमिति तदितिवक्तव्येवहत्युक्तिः अङ्गदस्याङ्गसरणाभावेनेतिज्ञेयं ॥ यद्वा पूर्वंपश्येत्युक्तिर्मुख्यत्वाच्छ्रोतृपुङ्गवहनुमतःसंभवति । अत्रमुख्यामुख्ययोभयत्रिवक्षयावहत्युक्तिः ॥ ९ ॥ ति० रामस्यप्रियंकुर्वन्तीत्यनेन तस्मिन्सर्वप्रेमास्पदत्वंसूचयतासर्वात्मत्वमेवदर्शयति—अन्योन्यमिति । स्नेहकारुण्ययश्रिताः । रामेहितिशेषः । सर्वसरामवात्सल्यादीनस्नेहेनैव परस्परोपकारकरणमित्यर्थः ॥ १० ॥ शि० तिर्यग्योनिगतानि जटायुःप्रभृतीनि । प्राणां-

---

[पा०] १ ङ. उपविष्टास्तुतान्सर्वांस्तस्मिन्नार्यगिरेस्तटे । गृध्रराजोहरीन्प्रेक्ष्यप्रख्यातबलपौरुषः. २ घ. गिरेस्तटे. ३ ग.— ध. चिरजीवी. ४ ङ.—ट. न्विख्यातबल. ५ क. ख. ग. मिहागतः. ६ ख. च. ज. झ. ञ. उवाचैतद्वचः. ग. घ. उवाचैवंवचः. ङ. छ. ट. उवाचतद्वचः. ७ ङ.—ज. ञ. ट. गृध्रापदेशेन. ८ ख. द्वैवस्वतंधर्मं. ९ ख. मनुप्राप्तं. १० छ. झ. ट. कार्यंनकृतंनकृतंराजशासनं. ११ क. घ. छ. ञ. राज्ञश्चवचः. १२ क. ग. च.—ट. ततस्तस्योप. १३ क. कारार्थं.

राघवार्थे परिश्रान्ता वयं संत्यक्तजीविताः ॥ कान्तारापि प्रपन्नाः स्म न च पश्याम मैथिलीम्॥१२॥
स सुखी गृध्रराजस्तु रावणेन हतो रणे ॥ मुक्तश्च सुग्रीवभयाद्गतश्च परमां गतिम् ॥ १३ ॥
जटायुषो विनाशेन राज्ञो दशरथस्य च ॥ हरणेन च वैदेह्याः संशयं हरयो गताः ॥ १४ ॥
रामलक्ष्मणयोर्वासे अरण्ये सह सीतया ॥ राघवस्य च बाणेन वालिनश्च तथा वधः ॥ १५ ॥
रामकोपाद्दग्धानां राक्षसानां तथा वधः ॥ कैकेय्या वरदानेन इदं हि विकृतं कृतम् ॥ १६ ॥

तदद्भुतमनुकीर्तितं वचो भुवि पतितांश्च समीक्ष्य वानरान् ॥
गृध्रवचलितमतिर्महामतिः कृपणमुदाहृतवान्स क्षेत्रराट् ॥ १७ ॥

तेंतु श्रुत्वा तदा वाक्यमङ्गदस्य मुखोद्गतम् ॥ अब्रवीद्वचनं गृध्रस्तीक्ष्णतुण्डो महास्वनः ॥ १८ ॥
क्रोऽयं गिरा घोषयति प्राणैः प्रियतमस्य मे ॥ जटायुषो वधं भ्रातुः कम्पयन्निव मे मनः ॥ १९ ॥
कृपमासीज्जनस्थाने युद्धं राक्षसगृध्रयोः ॥ नामधेयमिदं भ्रातुश्चिरस्याद्य मया श्रुतम् ॥
इच्छेयं गिरिदुर्गाच्च वज्रिरवतारितुम् ॥ २० ॥
वयीयसो गुणज्ञस्य श्लाघनीयस्य विक्रमैः ॥ अतिदीर्घस्य कालस्य तुंष्टोऽस्मि परिकीर्तनात् ॥ २१ ॥
तदिच्छेयमहं श्रोतुं विनाशं वानरर्षभाः ॥ भ्रातुर्जटायुषस्तस्य जनस्थाननिवासिनः ॥ २२ ॥

वद्धाः । अन्योन्यं प्रत्येकं प्रत्येकं ॥ १०—१२ ॥ परमां गतिं मुक्तिमित्यर्थः ॥ १३—१४ ॥ रामलक्ष्मणयोरित्यादि ॥ रामवनवासमारभ्य प्रायोपवेशपर्यन्तं यद्यस्ति तत्सर्वमिदं विकृतं कैकेय्या वरदानेन कृतं हीति संबन्धः । इत्यङ्गदोऽब्रवीदितिसंबन्धः ॥ १५—१६ ॥ समीक्ष्य ज्ञात्वेत्यर्थः । ज्ञानं च वचनश्रवणं वानराणां दर्शनं च । अस्य श्लोकस्यानन्तरं सर्गसमाप्तिर्भवितुमर्हति ॥ १७ ॥ तीक्ष्णतुण्डः तीक्ष्णमुखः ।

स्वास्वापि वचारामस्यप्रियंकुर्वन्ति तथावयं करिष्यामइतिशेषः ॥ अन्योन्यमुपकुर्वन्ति शिष्टाः । तत्तस्यरामस्योपकारार्थं आत्मना स्वप्रयत्नेन आत्मानंदेहंत्यजत ॥ स० स्नेहश्चिताः उत्तमेपुस्नेहो भक्तिः । मध्यमेपुस्नेहः प्रीतिः । अधमेषु कारुण्यं कृपा । स्वयंतिनृवीवान्तं जटायुषोविशेषणं ॥ आत्मानं शरीरं । आत्मना मनसा ॥ १०—११ ॥ ति० ननु प्राक्तनेन कथंरामस्यतोषोक्तआह—प्रियमिति । द्विजन जटायुषा प्राणैस्त्यजता प्रियकृतमिति रामस्य मतमितिशेषः । तथाऽस्मन्नरमेधापि रामस्यया संस्तौतीत्याशयः ॥ ११ ॥ स० सामान्यतस्तिर्यक्स्वाभिलंसुग्रीवस्येति सुग्रीवभयान्मुक्तइति जटायुंप्रति वचनमुक्तमितिभावः । यद्वा लोकेसुग्रीवाद्भयंयस्या तया सर्वेषामपि भयंतस्मादिति भ्रान्तिपरवशतयाऽऽत्मदेवेनमुक्तमितिमंतव्यं ॥ सुग्रीवभयात् सुग्रीवस्य भयं स्वस्मात्कर्तृकंयस्मात्तस्मात् रामः तस्मात् । मुक्तः शरीरात् । परमांगतिंगतइत्यन्वयः । अनेन सुग्रीवोपि परतन्त्रइति श्रीनोस्मान्भीषयतीतिसूच्यते ॥ १२ ॥ ति० जटायुषोविनाशेन इत्यादिशेषः । यदिपुनर्मुहूर्तमपि युद्धेरावणेनिरुन्धात्तदा रामरक्षोवरोरावणः सीतां नहरेदितिभावः । राज्ञोदशरथस्यच इत्यादिनाशेन । यदि पक्षमात्रमपि राज्यंजीवं स्यात्तदा रामंप्रत्यानयेदेवेतिभावः । वैदेह्याहरणंतु स्पष्टमेव वानरार्थाप्रार्थनसंशयकारणं ॥ १४ ॥ रामानु० तदद्भुतमिति । मुक्तेतिशेषः । तदुदाहृतवान्सइत्यन्वयः । अन्यथा वृत्तभङ्गः स्यात् । केषुचित्कोशेष्वस्मश्लोकस्यानन्तरं सर्गकरणंदृश्यते केषुचित्सूर्यांशुदग्धपक्षत्वादित्यस्यानन्तरंदृश्यते । प्रायेण सर्गसमाप्तियोतकवृत्तभेदसद्भावात्तदनुरोधेनात्रैव सर्गकरणमुपपन्नमितिप्रतीयते ॥१७॥ स० गृध्रस्य जातुक्रमरणश्रवणोद्भवंस्मरणं मास्तीतिमूचयितुं कविः पुनः तीक्ष्णतुण्डोवचनमब्रवीदितिवदति—तत्रेति । यद्वा पूर्वंवानरान्प्रत्युक्तवानिति अत्रतु अङ्गदमुखोद्गतंश्रुत्वा वचनमब्रवीदित्युक्तया राजपुत्रत्वेनाङ्गदमात्रंप्रत्युक्तिरिति नपुनरुक्तिः ॥ १८ ॥ ति० घोषयति समर्थयतइत्यर्थः ॥ १९ ॥ स० रावणस्य ऋक्षिकुलस्यैनाभ्यर्हितत्वाद्राक्षसगृध्रयोरित्युक्तं ॥ ति० अवतारयितुमिच्छेयं । आत्मानमितिशेषः ॥ २० ॥ ति० अवतारणकर्मसमाह—वयीयसइति कनिष्ठस्येत्यर्थः ॥ २१ ॥ ति० श्रोतुमिच्छेयं । युष्मत्समीपमागत्येतिशेषः ॥ २२ ॥ ति० तस्येति । अन्वयस्तुयस्यरामःप्रियं पुत्रः स दशरथो

[पा०] १ च. सर्वेगताः. २ क. ख. च.—ट. वांसमरण्ये. ३ क. वधस्तथा. ४ क. रामकोपात्सवैर्यो. ५ ङ.—ट. रक्षसांच. ६ क. ङ. ज. ट. इदंच. ७ ङ. च. ङ. ज. ञ. ट. गिरीश्च. ८ ङ. ज. ञ. ट. चकितमतिः. ९ ग. ङ.—ट. गृध्रराजं. १० च. ञ. ततः. ञ. इतिश्रुत्वा. ११ ङ. ज. ट. तथा. १२ ङ. ञ. महास्वनः. १३ क. ग. ङ.—ट. प्रियतरस्यमे. १४ ङ.—ञ. ञ. विनाशाद्य. १५ क.—ट. परिकीर्तनात्,

तस्यैव च मम भ्रातुः सखा दशरथः कथम् ॥ यस्य रामः प्रियः पुत्रो ज्येष्ठो गुरुजनप्रियः ॥२३॥
सूर्यांशुदग्धपक्षत्वान्न शक्नोम्युपसर्पितुम् ॥ इच्छेयं पर्वतादस्मादवतर्तुमरिन्दमाः ॥ २४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकिये आदिकाव्ये किष्किन्धाकाण्डे षट्पञ्चाशः सर्गः ॥ ५६ ॥

सप्तपञ्चाशः सर्गः ॥ ५७ ॥

अङ्गदेन संपातेःपर्वतादवतारणपूर्वकं तंप्रति रामवनप्रवेशादिस्वप्रायोपवेशान्तनिखिलवृत्तान्तनिवेदनम् ॥ १ ॥

शोकाद्भ्रष्टस्वरमपि श्रुत्वा ते हरियूथपाः ॥ श्रद्दधुर्नैव तद्वाक्यं कर्मणा तस्य शङ्किताः ॥ १ ॥
ते प्रायमुपविष्टास्तु दृष्ट्वा गृध्रं प्लवङ्गमाः ॥ चक्रुर्बुद्धिं तदा रौद्रां सर्वान्नो भक्षयिष्यति ॥ २ ॥
सर्वथा प्रायमासीनान्यदि नो भक्षयिष्यति ॥ कृतकृत्या भविष्यामः क्षिप्रं सिद्धिमितो गताः ॥३॥
एतां बुद्धिं ततश्चक्रुः सर्वे ते वानरर्षभाः ॥ अवतार्य गिरेः शृङ्गाद्गृध्रमाहाङ्गदस्तदा ॥ ४ ॥
बभूवर्क्षरजा नाम वानरेन्द्रः प्रतापवान् ॥ ममार्यः पार्थिवः पक्षिन्धार्मिकस्तस्य चात्मजौ ॥ ५ ॥
सुग्रीवश्चैव वाली च पुत्रावोघबलावुभौ ॥ लोके विश्रुतकर्माभूद्राजा वाली पिता मम ॥ ६ ॥
राजा कृत्स्नस्य जगत इक्ष्वाकूणां महारथः ॥ रामो दाशरथिः श्रीमान्प्रविष्टो दण्डकावनम् ॥ ७ ॥
लक्ष्मणेन सह भ्रात्रा वैदेह्या चापि भार्यया ॥ पितुर्निदेशनिरतो धर्म्यं पन्थानमाश्रितः ॥
तस्य भार्या जनस्थानाद्रावणेन हृता बलात् ॥ ८ ॥
रामस्य तु पितुर्मित्रं जटायुर्नाम गृध्रराट् ॥ ददर्श सीतां वैदेहीं ह्रियमाणां विहायसा ॥ ९ ॥

" वक्त्रास्ये वदनं तुण्डं " इत्यमरः ॥ १८—२४ ॥ अत्र "कथमासीज्जनस्थाने युद्धं राक्षसगृध्रयोः" "सखा दशरथः कथं " इत्येवमनुवादात्पूर्वमिदमप्यङ्गदेनोक्तमिति ध्येयम् ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने षट्पञ्चाशः सर्गः ॥ ५६ ॥

अथ संपातिप्रश्नोत्तरं सप्तपञ्चाशे—शोकादित्यादि॥ कर्मणा हिंसाकर्मणा ॥१॥ रौद्रां आत्मत्यागाध्यवसायरूपत्वेन क्रूरां ॥ २—४ ॥ आर्यः पितामहः । आत्मजौ औरसौ ॥ ५ ॥ ओघबलौ ओघसङ्ख्याकपुरुषबलौ । ओघसङ्ख्या च पूर्वोक्ता ॥६—८॥ रामस्य तु पितुर्मित्रमिति कथनात् मैत्रीप्रकारं तु न जानामीत्युक्तं भवति

ममभ्रातुस्तस्यैवजटायुषःसखा । अतस्तत्स्नेहात्प्रयतमानस्य तस्यजनस्थानवासिनः तस्य प्रसिद्धविक्रमस्य । जटायुषोविनाशः कथमभवदिति तस्यविनाशं श्रोतुमिच्छेयमिति । कथंसखा इत्यन्वयस्तुनोचितः । तदुत्तरस्याग्रेऽभावात् ॥ शि० यस्यरामःपुत्रः स ममभ्रातुःसखा दशरथः कथंलोकान्तरंगतइतिशेषः ॥ २२–२३ ॥ ति० अवतर्तुं अवतारयितुं ॥ स० अवतर्तुं अवतरितुं । आगमशासनमनित्यमितिवा तृ इतिह्रस्वान्तधातोरनिट्त्वाद्वा तद्रूपं । विस्तृतंचैतत्तत्रतारायेत्यनुव्याख्यानव्याख्यासुधापरिमले । ततोनुसन्धेयमिति ॥ २४ ॥ इतिषट्पञ्चाशःसर्गः ॥ ५६ ॥

ति० भ्रष्टस्वरं भक्षणवचनस्वरापेक्षया भ्रष्टस्वरमित्यर्थः । तेनस्वरेण यद्यपि सनिश्चितशोकः परितुष्टोस्मीतिश्रद्धेयवचनोभवति । तथापि नश्रद्दधुः यतस्तस्यकर्मणाशङ्किताः । भक्षणार्थं वचनमेवकरोतीति बुद्ध्येतिभावः ॥ स० कर्मणा मृतान्भक्षयिष्यामीतिव्याहरणेन ॥ १ ॥ ति० सिद्धिं मरणरूपां ॥ ३ ॥ ति० एतांबुद्धिं भक्षणाभीष्टत्वबुद्धिं ॥ ४ ॥ ति० पार्थिवः वानराणामितिशेषः ॥ ५ ॥ ति० घनबलौ बहुबलौ ॥ ६ ॥

[पा०] १ ख. तस्यचैव. २ क. ग. ङ. छ. झ. ञ. ट. शक्नोमिविसर्पितुं. ख. शक्नोम्यपसर्पितुं. घ. शक्नोस्मिविसर्पितुं. ३ घ. दवतर्तुंप्लवंगमाः. ४ क. ग. ङ.—ट. श्रुत्वावानरयूथपाः. ५ ग. क्रूरां. ६ घ. सर्वांश्च. ७ ग. तदाचक्रुः. ८ ङ.—ट. हरियूथपाः. ९ क. ग. घ. च.—झ. ट. बभूवर्क्षरजोनाम. १० ग. पूर्वकः. ११ क. ख. ङ.—ट. पक्षिन्धार्मिकौतस्य. ग. ख्यातोधार्मिकः. १२ क पुत्रौदेवबलौमतौ. ख. पुत्रौदेवबलान्वितौ. ग. पुत्रौतुल्यबलावुभौ. छ. झ. ट. पुत्रौघनबलावुभौ. १३ घ. महाबलः. १४ ग. ङ.—ट. सह.

रावणं विरथं कृत्वा स्थापयित्वा च मैथिलीम् ॥ परिश्रान्तश्च वृद्धश्च रावणेन हतो रणे ॥ १० ॥
एवं गृध्रो हतस्तेन रावणेन बलीयसा ॥ संस्कृतश्चापि रामेण गतश्च गतिमुत्तमाम् ॥ ११ ॥
ततो मम पितृव्येण सुग्रीवेण महात्मना ॥ चकार राघवः सख्यं सोऽवधीत्पितरं मम ॥ १२ ॥
मम पित्रा विरुद्धो हि सुग्रीवः सचिवैः सह ॥ निहत्य वालिनं रामस्ततस्तमभिषेचयत् ॥ १३ ॥
स राज्ये स्थापितस्तेन सुग्रीवो वानराधिपः ॥ राजा वानरमुख्यानां येनेयं प्रस्थापिता वयम् ॥ १४ ॥
एवं रामप्रयुक्तास्तु मार्गमाणास्ततस्ततः ॥ वैदेहीं नाधिगच्छामो रात्रौ सूर्यप्रभामिव ॥ १५ ॥
ते वयं दण्डकारण्यं विचित्य सुसमाहिताः ॥ अज्ञानात्तु प्रविष्टाः स्म धर्मिण्या विवृतं बिलम् ॥ १६ ॥
मयस्य मायाविहितं तद्बिलं च विचिन्वताम् ॥ व्यतीतस्तत्र नो मासो यो राज्ञा समयः कृतः ॥ १७ ॥
ते वयं कपिराजस्य सर्वे वचनकारिणः ॥ कृतां संस्थामतिक्रान्ता भयात्प्रायमुपास्महे ॥ १८ ॥
क्रुद्धे तस्मिंस्तु काकुत्स्थे सुग्रीवे च सलक्ष्मणे ॥ गतानामपि सर्वेषां तत्र नो नास्ति जीवितम् ॥ १९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे सप्तपञ्चाशः सर्गः ॥ ५७ ॥

अष्टपञ्चाशः सर्गः ॥ ५८ ॥

अङ्गदंप्रतिसंपातिना परस्परबलपरीक्षणाय जटायुषासह सूर्यमण्डलसमीपगमने सौरातपसंतप्तस्यजटायुषःपरिरक्षणाय स्वेन तदुपरिस्थपक्षप्रसारणे स्वस्यसौरातपमिदंग्धपक्षतया विन्ध्यगिरौ पतननिवेदनम् ॥ १ ॥ अङ्गदेन सीतावृत्तान्तपरिज्ञानंपूर्वतेन कदाचन रावणेनहीयमानायाःकस्याश्चित्स्त्रियाः स्वस्यपरिज्ञाननिवेदनेनसह तयारामनामोत्कीर्तनेन तस्याः सीतात्वनिर्धारणोक्तिः ॥ २ ॥ तथा संप्रति स्वस्य दूरदक्षिणोपपादनपूर्वकं कङ्कायाः शतयोजनोत्तरस्थत्वकथनेनसह तत्र तदानीं सीतायारावणस्यावस्थाननिवेदनम् ॥ ३ ॥ संपातिना जटायुषेजलदानाय स्वस्य समुद्रप्रापणप्रार्थितैर्वानरैस्तस्य समुद्रप्रापणेन पुनःपूर्वतनदेशे प्रस्थापनम् ॥ ४ ॥

इत्युक्तः करुणं वाक्यं वानरैस्त्यक्तजीवितैः ॥ संबाष्पो वानरान्गृध्रः प्रत्युवाच महास्वनः ॥ १ ॥
यवीयान्मम स भ्राता जटायुर्नाम वानराः ॥ यमाख्यात हतं युद्धे रावणेन बलीयसा ॥ २ ॥
वृद्धभावादपक्षत्वाच्छृण्वंस्तदपि मर्षये ॥ न हि मे शक्तिरस्त्यद्य भ्रातुर्वैरविमोक्षणे ॥ ३ ॥
पुरा वृत्रवधे वृत्ते परस्परजयैषिणौ ॥ आदित्यमुपयातौ स्वो ज्वलन्तं रश्मिमालिनम् ॥ ४ ॥

॥ ९–१३ ॥ अभिषेचयत् अभ्यषेचयत् ॥ १४–१७ ॥ संस्थां व्यवस्थां ॥ १८—१९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने सप्तपञ्चाशः सर्गः ॥ ५७ ॥

अथ संपातिना सीतास्थानकथनमष्टपञ्चाशे—इत्युक्त इत्यादि ॥ १ ॥ आख्यात भूते लोट् ॥ २—३ ॥ पुरेति परस्परवेगातिशयख्यापनपरावित्यर्थः । आदित्यमुपयातौ सूर्यसमीपंगतौ स्वः ॥ ४ ॥

ति० स्थापयित्वा भूमाविति शेषः ॥ १० ॥ ति० निरुद्धः निरुद्धराज्यः ॥ ११ ॥ इतिसप्तपञ्चाशः सर्गः ॥ ५७ ॥

ती० सबाष्पंवारयन्क्रुद्धइतिपाठे क्रोधोरावणविषयः । ति० त्यक्तजीवितैःत्यक्तजीवितनाशभयैः ॥ १ ॥ ति० आख्यात आख्यास्यन्तः ॥ २ ॥ स० पूर्वशक्तियुक्तसतवेदानीमशक्तिःकृतइत्यतोनिमित्तमाह—पुरेति । पुरावृत्रवधे इतिकालविशेषकथनार्थमेव नतुवृत्रवधस्यप्रकृतोपयोगकथनमिति मानसमायसनीयं । स्वइत्युत्तमपुरुषद्विवचनमेकत्र । अपरत्र स्वेतिपाठः । तस्यचायमीदृशीत्यनेनान्वयः । ततोलङर्थकता । यदि बहुपुस्तकसंपुटेषु स्वरितिदृश्येत तदा स्वरन्तरिक्षंगृह्यते । अन्तरिक्षादिपदमपरिक्षिपन्परिक्षि-

[पा०] १ क.—ट. जगाम. २ छ. झ. ञ. ट. निरुद्वोहि. ३ ख. घ.—ट. वानरेश्वरः. क. ग. प्लवगेश्वरः. ४ छ. झ. ट. सेन. ५ ख. प्रयुक्ताश्च. ६ घ. दण्डकारण्ये. ७ क. ख. घ.—ट. धरण्यावितृतं. ग. धरण्यांविवृतं. ८ क. कृतसंस्थां. ९ ङ.—ञ. न. सुपाश्रिताः. झ. ट. सुपासिताः. १० ख. घ. च. सबाष्पान् क. सबाष्पनयनान्गृध्रः. ११ ग. महाबलः. १२ ख. घ. शक्तिरस्यद्य. १३ क.—ट. सचाहंचजयैषिणौ. १४ ख. सुपयातौस्म.

आवृत्याऽऽकाशमार्गं तु जवेन स्म गतौ भृशम् ॥ मध्यं प्राप्ते दिनकरे जटायुरवसीदति ॥ ५ ॥
तमहं भ्रातरं दृष्ट्वा सूर्यरश्मिभिरर्दितम् ॥ पक्षाभ्यां छादयामास स्नेहात्परमविह्वलः ॥ ६ ॥
निर्दग्धपक्षः पतितो विन्ध्येहं वानरर्षभाः ॥ अहमस्मिन्वसन्भ्रातुः प्रवृत्तिं नोपलक्षये ॥ ७ ॥
जटायुषस्त्वेवमुक्तो भ्राता संपातिना तदा ॥ युवराजो महाप्राज्ञः प्रत्युवाचाङ्गदस्तदा ॥ ८ ॥
जटायुषो यदि भ्राता श्रुतं ते गदितं मया ॥ आख्याहि यदि जानासि निलयं तस्य रक्षसः ॥ ९ ॥
अदीर्घदर्शनं तं वै रावणं राक्षसाधिपम् ॥ अन्तिके यदि वा दूरे यदि जानासि शंस नः ॥ १० ॥
ततोऽब्रवीन्महातेजा ज्येष्ठो भ्राता जटायुषः ॥ आत्मानुरूपं वचनं वानरान्संप्रहर्षयन् ॥ ११ ॥
निर्दग्धपक्षो गृध्रोऽहं हीनवीर्यः प्लवङ्गमाः ॥ बाह्वोर्बलेन तु रामस्य करिष्ये सौम्यमुत्तमम् ॥ १२ ॥
जानामि वारुणाँल्लोकान्विष्णोस्त्रैविक्रमानपि ॥ महासुरविमर्दान्वाऽप्यमृतस्य च मन्थनम् ॥ १३ ॥
रामस्य चैदिदं कार्यं कर्तव्यं प्रथमं मया ॥ जरया च हृतं तेजः प्राणाश्च शिथिला मम ॥ १४ ॥

आवृत्य मण्डलगत्या । स्मशब्दस्य अवसीदतीत्यनेन अदीर्घदर्शनं आगाम्यनर्थानवेक्षकं ॥ १०—१२ ॥ संबन्धः ॥५॥ छादयामास आच्छादयं ॥ ६—९ ॥ . वारुणान् लोकान् । अतलवितलादिलोकान् । त्रैवि-

---

पंच स्वःपदं कविरवगमयाञ्चकार भूम्यांमङ्गलं गगनगमनान्तरायापनुत्यै कृतमिति । स्वशब्दस्यमङ्गलार्थकत्वेतु स्वश्चन्दस्यमङ्गलार्थत्वादौ स्वरव्ययमिति प्रयोगस्यमरभानुदीक्षितव्याख्यातोऽवसेयं ॥ तत्पक्षे वसन्तदर्शेत्यादिक्रियाप्रबन्धे सहिते सत्येव कर्त्यहेतिबोध्यं । जयैषिणौ परस्परस्पर्धयाराज्यंपणंकृत्वा वेगेनजयाभिलाषौ उपयातौ । प्रातरितिशेषः । भ्रातरंस्वकीयांसं परमविह्वलः मरिष्यतीतिचञ्चलचेताः । स्नेहात्पक्षाभ्यामाच्छादयामास । आच्छादयां आसं इतिपदद्वयं । नित्ययोगादामन्तेनास्तेराच्छादितवानिति तदर्थः ॥ यतु नागोजिभट्टेन पुरा पूर्वं इन्द्रवधेवृत्तेसति जटायुरहंच जयैषिणौ इन्द्रवधेनेन्द्रस्यातिप्रबलत्वंनिर्णीय तज्जयैषिणौभूत्वा प्रथममाकाशमार्गेण स्वर्गंगतौ ततोगरुडवद्भृशं जवेन तंविधित्सु प्रत्यावर्त्याऽऽदित्यंदर्षादुपयातौस्वः । अथ समुपपातयोरावयोर्मध्ये जटायुस्त्वितरिमध्यंप्राप्तेऽवसीदतिस्मेतिकृतकः ॥ अन्येतु—जयेषिणौ परस्परजयेषिणौ येनोत्पत्त आदित्यःप्रथमं प्राप्यते सआवयोःप्रबलइति प्रतिज्ञापूर्वमितिशेषइत्याहुः । तेषामतदृत्तेपिपदस्य इन्द्रप्रसङ्गस्यासगतिरित्युक्तं । तदिदमागमकंनातिवर्तते " गुणादोषायन्ते " "आत्मदोषंनपश्यति" इति । कतकमतमेवतन्मतमितिभाति पुनःस्वमतानुपन्यासादनुचितत्वाच्च । तथसौवासोदर्शमतप्रामाण्यकमारतविरुद्धं । तथाहि वनपर्वणिसंपातिवाक्ये— "संपातिर्नामतस्याहं ज्येष्ठोभ्राताजटायुषः । अन्योन्यस्पर्धयाऽऽकाशमावामादित्यसंसदम् । ततोदग्धौविमौपक्षौ सदग्धौतुजटायुषः " इति । भारतानुयायिवाल्मीकिरामायणसंग्रहरूपसंग्रहरामायणेच—" अरुणस्यसुतावावां तरुणत्वे (ति)नगर्नितौ । निजराज्यंपणंकृत्वा पर्यंक्षावहिवेगिताम् । आवामनुसौसूर्यमुदयन्तमथोदये । आमथ्याऽगतेः सौर्यात्ततो मोहोमहानभूत् । " इत्युक्ते । प्रत्यावर्तनंपतविधर्मः । इन्द्रकथायाश्च कालविशेषप्रतिपत्तिजनकतामात्रेणौचित्यसंभवाद्वयवस्थालाभाच्चादन्यपक्षएव श्रेयानितिदिक् । दि० छादयामास अतिशोकेनविक्षिप्तचित्तत्वात्परोक्षक्रियानिर्देशः ॥ ४—६ ॥ स० यदि जटायुषोभ्रातेतिगदितं तर्हि मयश्रुतं । रामसेवानुबन्धिनस्तत्संभाष्यत्वेन तद्वचनस्यप्रामाण्यमितिभावः । यदि तस्य तवयवीयसोभ्रातुर्घातकस्य रक्षसोनिलयंजानासि तर्ह्याख्याहीत्यन्वयः । तसेत्युक्त्या नहतवापि तत्स्थानंतद्वधश्च ह्रीप्सितमीप्सितश्चेतिसूचयति ॥ ९ ॥ स० यदिद्वयस्य दूरेऽन्तिकेइति पदद्वयेनान्वयः ॥ १० ॥ रामानु० त्रैविक्रमान् त्रिविक्रममितान् । गोबलीवर्दन्यायेन त्रिविक्रमशब्द उपरितनलोकमात्रवाची ॥ ति० वारुणाँल्लोकान् जलप्रधानाँल्लोकान् । अमृतस्यमन्थनंच अनेनच ब्रह्माहरादिक्षणमारभ्यैतत्क्षणपर्यन्तंसर्वंवृत्तान्तजातं स्वप्नवदिवेदितं ॥ स० प्रथमते विक्रमाश्च त्रिविक्रमाः त्रयः पादक्षेपाः तदाक्रान्ताः भूरादिलोकास्त्रैविक्रमाः । विष्णोर्वामनस्य । यद्वा

[पा०] १ घ. क. ङ. झ. ट. मार्गेण. च. मार्गेतु. ञ. मार्गेच. २ ङ.—ट. खगौतौ. ३ ग. प्राप्तेसवितरि. ञ. प्राप्तेतुसूर्येच. क.—ट. प्राप्तेतुसूर्येतु. ४ च. ज. छादयाम्येवं. क. ग. छादयाम्येनं. ५ क. ख. ग. क.—ट. विह्वलं. ६ झ. निर्दग्धपक्षः. ७ ख. विन्ध्येस्मिन्. ८ क.—च. वानरोत्तमा . ९ च.—ट. अदीर्घदर्शिनं. १० क. ख. च. क. संज्ञा. ग. तत्र. ११ क.—च. ज. ञ. राक्षसेश्वरं. छ. झ. ट. राक्षसाधमं. १२ क. ग. क. च. छ. झ. ञ. ट. भ्रातर्ज्येष्ठो. १३ ग. क.—ट. मतवीर्यं . १४ क.—ट. बाह्वात्रेणापि. १५ ग. क. च. ज. ञ. प्रियमुत्तमं. १६ छ. झ. ट. देवासुरविमर्दोत्थमृतस्य विमन्थनं. ख. देवासुरविमर्दोत्थाप्यमृतस्य. क. च. ज. ञ. देवासुरविमर्दान्वाऽप्यमृतस्यापिमन्थनं. १७ ग. दयितं. १८ ग. जरयातु. क. ख. च. जरयाऽपहृतं.

तरुणी रूपसंपन्ना सर्वाभरणभूषिता ॥ ह्रियमाणा मया दृष्टा रावणेन दुरात्मना ॥ १५ ॥
क्रोशन्ती रामरामेति लक्ष्मणेति च भामिनी ॥ भूषणान्यपविध्यन्ती गात्राणि च विधून्वती ॥१६॥
सूर्यप्रभेव शैलाग्रे तस्याः कौशेयमुत्तमम् ॥ असिते राक्षसे भाति यथा वा तडिदम्बुदे ॥ १७ ॥
तां तु सीतामहं मन्ये रामस्य परिकीर्तनात् ॥ श्रूयतां मे कथयतो निलयं तस्य रक्षसः ॥ १८ ॥
पुत्रो विश्रवसः साक्षाद्भ्राता वैश्रवणस्य च ॥ अध्यास्ते नगरीं लङ्कां रावणो नाम राक्षसः ॥ १९ ॥
इतो द्वीपः समुद्रस्य संपूर्णे शतयोजने ॥ तस्मिँल्लङ्कापुरी रम्या निर्मिता विश्वकर्मणा ॥ २० ॥
जाम्बूनदमयैर्द्वारैश्चित्रैः काञ्चनवेदिकैः ॥ [प्रासादैर्हेमवर्णैश्च महद्भिः सुसमा कृता] ॥
प्राकारेणार्कवर्णेन महता सुसमावृता ॥ २१ ॥
तस्यां वसति वैदेही दीना कौशेयवासिनी ॥ रावणान्तःपुरे रुद्धा राक्षसीभिः सुरक्षिता ॥ २२ ॥
जनकस्यात्मजां राज्ञस्तत्र द्रक्ष्यथ मैथिलीम् ॥ लङ्कायामथ गुप्तायां सागरेण समन्ततः ॥ २३ ॥
संप्राप्य सागरस्यान्तं संपूर्णं शतयोजनम् ॥ आसाद्य दक्षिणं तीरं ततो द्रक्ष्यथ रावणम् ॥ २४ ॥
तत्रैव त्वरिताः क्षिप्रं विक्रमध्वं प्लवङ्गमाः ॥ ज्ञानेन खलु पश्यामि दृष्ट्वा प्रत्यागमिष्यथ ॥ २५ ॥
आद्यः पन्थाः कुलिङ्गानां ये चान्ये धान्यजीविनः ॥ द्वितीयो बलिभोजानां ये च वृक्षफलाशिनः ॥२६॥
भासास्तृतीयं गच्छन्ति क्रौञ्चाश्च कुररैः सह ॥ श्येनाश्चतुर्थं गच्छन्ति गृध्रा गच्छन्ति पञ्चमम् ॥२७॥
बलवीर्योपपन्नानां रूपयौवनशालिनाम् ॥ षष्ठस्तु पन्था हंसानां वैनतेयगतिः परा ॥
वैनतेयाच्च नो जन्म सर्वेषां वानरर्षभाः ॥ २८ ॥

क्रमान् त्रिविक्रममितानुपरितनलोकानित्यर्थः । महासुरविमर्दान् देवासुरसंग्रामान् ॥ १३—१५ ॥ अपविध्यन्ती छेदयन्ती ॥ १६—१८ ॥ अध्यास्ते । "अधिशीङ्स्थासां कर्म" इति नगर्याः कर्मत्वं ॥ १९—२४ ॥ विक्रमध्वं । वेः पादविहरणे" इत्यात्मनेपदं । ज्ञानेन दिव्यज्ञानेन ॥ २५ ॥ दूरस्थदर्शनं भवतः कुतो जातं तत्राह—आद्य इत्यादिना ॥ कुलिङ्गानां भूमिप्रत्यासन्नगगनचारिणां । धान्यजीविनः पक्षिविशेषाः कुलिङ्गाः । ये चान्ये धान्यजीविन इति वचनात् । बलिभोजानां काकानां ॥ २६ ॥ भासाः जलवायसाः । "भासस्तु जलवायसः" इति निघण्टुः । श्येनविशेषा इत्यप्याहुः ॥ २७ ॥ वैनतेयात् गरुडात् । नः अस्माकं । जन्मउत्पत्तिः । तेन तस्य या सप्तमी गतिः सैवास्माकमपीत्यर्थः । नन्वारण्यकाण्डे—"द्वौ पुत्रौ विनतायास्तु गरुडोऽरुण एव च । तस्मात्त्रातोहमरुणात्संपातिस्तु ममाग्रजः" इति

विष्णोर्लोकान् श्रीभागातिरिक्तान् श्वेतद्वीपादीन् । त्रैविक्रमान् त्रिविक्रमाक्रान्तान् । अतोनैकदेशान्वयक्लेशः ॥ १३ ॥ रामानु० तस्यात्तमंकौशेयं असितेराक्षसे शैलाग्रेसूर्यप्रभेवभाति । अंबुदइवासिते राक्षसे विद्युद्यथा तथाभातीतियोजना ॥ १७ ॥ स० रामस्य रामेतिनाम्नः । परिकीर्तनात् उच्चारात् । क्लेशसमये पतिनामग्रहणस्यादोषत्वात् । 'भार्या पतेरपि' इत्यस्य स्वस्थचेतस्कभार्यापरत्वात् । नित्यापरोक्षीकृताध्यक्षत्वेन 'दूराद्धूतेच' इति प्रकृतिभावाभावाद्रामरामेतिसंभवति । अनेन प्रकृतिभावाभावेन सीताप्रकृतिभावाभावोपि ध्वन्यते । स्मृतिमात्रत्वेनानाह्वानरूपत्वाद्वा तच्छास्त्रागोचरत्वात्प्रकृतिभावाभावः । "तद्दूरे तद्वन्तिके" इत्येकतरनिष्कर्षस्यदुष्करत्वाद्वा नप्रकृतिभावःप्रगृह्यसंज्ञायां "प्लुतप्रगृह्याः—" इत्यादिना ॥ १८ ॥ स० कुबेरनगरीत्वाद्विश्वकर्मनिर्माणं युक्तम् ॥ २० ॥ स० राक्षसीभिरिति । अनेनाधुनापि नमर्यादाविपर्यासइतिद्योत्यते ॥ २२ ॥ कतक० लङ्कायामभिगुप्तायामित्यादिश्लोकद्वयं प्रक्षिप्तं ॥ २३—२४ ॥ स० ज्ञानेन ज्ञायतेऽनेनेतिज्ञानं दिव्यंचक्षुः । पश्यामि जानामि । ति० देवयोनित्वेन दिव्यज्ञानेन यूयंतांदृष्ट्वा प्रत्यागमिष्यथेत्यपि पश्यामि । अतोनिस्संशयंगच्छतेतिशेषः ॥ २५ ॥ ति० अथ स्वस्यदेवयोनित्वप्रदर्शनशेषतया पक्षिमार्गानाह—आद्यइति ॥ पन्थाः आकाशमार्गः ॥ २६ ॥

[पा०] १ ङ. च. छ. झ. ञ. ट. यथाविद्युदिवांबरे. २ क. ख. ङ.—ट. द्वीपे. ३ ख. काञ्चनवेदिभिः. ४ ङ.—ट. पुस्तकेष्विदमर्धंदृश्यते. ५ ङ. च. ञ.—ट. चसमन्विता. ग. सुसमाहिता. ६ ङ.—ट. राज्ञस्तस्यां. ७ ग. छ. ञ. ट. सागरस्यान्ते. ८ ग. ङ. च. छ. ञ. ट. संपूर्णेशतयोजने. ९ क. ङ.—ञ. ञ. ट. कूलं. १० ग. बलिपुष्टानां. ङ. च. ट. बलिभोज्यानां. ११ ङ.—ट. फलाशनाः.

इहस्थोऽहं प्रपश्यामि रावणं जानकीं तथा ॥ अस्माकमपि सौवर्णं दिव्यं चक्षुर्बलं तथा ॥ २९ ॥
तस्मादाहारवीर्येण निसर्गेण च वानराः ॥ आयोजनशतात्साग्राद्वयं पश्याम नित्यशः ॥ ३० ॥
अस्माकं विहिता वृत्तिर्निसर्गेण च दूरतः ॥ विहिता पादमूले तु वृत्तिश्चरणयोधिनाम् ॥ ३१ ॥
गर्हितं तु कृतं कर्म येन स पिशिताशिना ॥ प्रतीकार्यं च मे तस्य वैरं भ्रातुः कृतं भवेत् ॥ ३२ ॥
उपायो दृश्यतां कश्चिल्लङ्घने लवणाम्भसः ॥ अभिगम्य तु वैदेहीं समृद्धार्था गमिष्यथ ॥ ३३ ॥
समुद्रं नेतुमिच्छामि भवद्भिर्वरुणालयम् ॥ प्रदास्याम्युदकं भ्रातुः स्वर्गतस्य महात्मनः ॥ ३४ ॥
ततो नीत्वा तु तं देशं तीरं नदनदीपतेः ॥ निर्दग्धपक्षं संपातिं वानराः सुमहौजसः ॥ ३५ ॥
पुनः प्रत्यानयित्वा च तं देशं पतगेश्वरम् ॥ बभूवुर्वानरा हृष्टाः प्रवृत्तिमुपलभ्य ते ॥ ३६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे अष्टपञ्चाशः सर्गः ॥ ५८ ॥

एकोनषष्टितमः सर्गः ॥ ५९ ॥

जांबवता संपातिंप्रति रावणेन सीताहरणावगमप्रकारप्रश्नः ॥ १ ॥ स्वस्याहारानयनाय समुद्रंगतवता तत्रकेनचिद्रक्षसानीयमानां कांचन काञ्चनप्रभांतरुणीं दृष्टवता पश्चान्महर्षिवचसा तयोःसीतारावणभावंज्ञातवता सुपार्श्वनाम्नास्वपुत्रेण स्वस्मै एतद्वृत्तान्तनिवेदननिवेदनम् ॥ २ ॥

ततस्तदमृतास्वादं गृध्रराजेन भाषितम् ॥ निशम्य मुदिता हृष्टास्ते वचः प्लवगर्षभाः ॥ १ ॥

वचनेन जटायुषोक्तेनेदं विरुद्धमिति चेन्न वैनतेयादित्यस्य विनतापुत्रादरुणादित्यर्थ इत्यदोषात् । वैनतेयगतिरित्यत्र वैनतेययोररुणगरुडयोर्गतिरित्यर्थः । अनेन दिव्यज्ञानहेतुर्जन्मोत्कर्ष उक्तः ॥ २८ ॥ न केवलं दिव्यज्ञानं दिव्यचक्षुरप्यस्तीत्याह—इहस्थ इति ॥ अपिशब्दो भिन्नक्रमः चक्षुरित्यनेन संबध्यते । सौवर्णमित्यनेन विशेषणेनातिदूरदर्शित्वमुक्तं ॥ २९ ॥ आहारवीर्येण चक्षुष्याहारबलेनेत्यर्थः । निसर्गेण सौवर्णत्वनिबन्धनस्वभावेन ॥ ३० ॥ वृत्तिः भक्ष्यग्रहणं । चरणयोधिनां कुक्कुटानां । पादमूले पादविकीर्णप्रदेशे । वृत्तिः जीवनं ॥ ३१ ॥ येन पिशिताशिना गर्हितं कर्म सीतापहरणरूपं कृतं । मे भ्रातुर्हेतोः प्रतीकार्यं तस्य वैरं कृतं प्रतिकृतं भवेत् । भवद्भिरिति शेषः । अयं श्लोकः चरणयोधिनामित्यनन्तरं निवेशनीयइत्याहुः ॥ ३२ ॥ एवं प्रासङ्गिकं परिसमाप्य प्रकृतमाह—उपाय इति ॥ गमिष्यथेत्यत्र किष्किन्धामितिशेषः ॥ ३३ ॥ नेतुमिच्छामि मामिति शेषः । भवद्भिरिति करणे तृतीया ॥ ३४ ॥ तीरं देशं तीरप्रदेशमित्यर्थः । तं देशं संपात्यावासभूतं देशं । पुनः प्रत्यानयित्वा प्रवृत्तिं वृत्तान्तं । उपलभ्य ते वानराः हृष्टा बभूवुः ॥ ३५—३६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने अष्टपञ्चाशः सर्गः ॥५८॥

अथ ततस्तदमृतास्वादमित्यारभ्य पञ्च सर्गाः प्रक्षिप्ताः । सर्वकोशेष्वदर्शनात् तान्विनापि कथासं-

ति० ननु कथंलङ्कास्थासीतेति त्वयाज्ञातं तत्राह—इहस्थइति । सौपर्णं सुपर्णलिङ्गकचक्षुष्मतीविद्यासिद्धिजं । साचविद्या बह्वृचब्राह्मणे तृतीयपञ्चिकायामुक्ता ॥ शि० इहस्थोऽहंरावणंजानकींच प्रपश्यामि । तत्रहेतुः यथासौपर्णंचक्षुर्बलंचदिव्यंतथाऽस्माकमपिदिव्यं ॥ २९ ॥ ति० साग्रात् किञ्चिदधिकात् योजनशतात् ॥ ३० ॥ ति० अस्माकंतु निसर्गेण जातिस्वभावेन । दूरतःदूरवर्तिदर्शनबलसंपादकेनभक्ष्यविशेषेण वृत्तिर्विहिता । धात्रेतिशेषः ॥ कुक्कुटादीनांतु स्वावासवृक्षमूलएव तावद्दूरदृष्टिमात्रसंपादिकाच वृत्तिर्विहिता ॥ ३१ ॥ इत्यष्टपञ्चाशःसर्गः ॥ ५८ ॥

ति० तत् वदतः अनुवदन्तः । हृष्टाबभूवुरित्यर्थः ॥ वदतइत्यत्र नुमभावआर्षः ॥ स० अमृतस्वादं अमृतवन्मधुरं ।

[पा०] १ ख. ग. ङ.—ट. सौपर्णं. २ ङ. च. छ. झ. ञ. ट. वृक्षमूलेतु. ३ गर्हितंतुकृतंकर्मेतिश्लोकः क.—ट. पाठेषु. इहस्थोहंप्रपश्यामीति २९ तमश्लोकात्पूर्वंदृश्यते. ४ झ. पिशिताशिनः. ५ घ. ङ. च. झ. ञ. ट. भ्रातृकृतं. ६ ट. महत्. ७ ख. अधिगम्यतु. ८ ख. च. छ. भविष्यथ. ९ क. ख. ग. ङ.—ट. तीरे. १० ज. वानरास्ते. ११ ङ.—ठ. तंपुनःप्रापयित्वाचतंदेशं. १२ ङ. च. ज. ञ. तत्रसंहृष्टास्ते. घ. चाभवन्हृष्टास्ते. ग. छ. झ. ट. वदतोहृष्टास्ते.

जाम्बवान्वानरश्रेष्ठः सह सर्वैः प्लवङ्गमैः ॥ भूतलात्सहसोत्थाय गृध्रराजमथाब्रवीत् ॥ २ ॥
क्व सीता केन वा दृष्टा को वा हरति मैथिलीम् ॥ तदाख्यातु भवान्सर्वं गतिर्भव वनौकसाम् ॥३॥
को दाशरथिबाणानां वज्रवेगनिपातिनाम् ॥ स्वयं लक्ष्मणमुक्तानां न चिन्तयति विक्रमम् ॥ ४ ॥
स हरीन्प्रीतिसंयुक्तान्सीताश्रुतिसमाहितान् ॥ पुनराश्वासयन्प्रीत इदं वचनमब्रवीत् ॥ ५ ॥
श्रूयतामिह वैदेह्या यथा मे हरणं श्रुतम् ॥ येन चापि ममाख्यातं यत्र वाऽऽयतलोचना ॥ ६ ॥
अहमस्मिन्गिरौ दुर्गे बहुयोजनमायते ॥ चिरान्निपतितो वृद्धः क्षीणप्राणपराक्रमः ॥ ७ ॥
तं मामेवं गतं पुत्रः सुपार्श्वो नाम नामतः ॥ आहारेण यथाकालं बिभर्ति पततां वरः ॥ ८ ॥
तीक्ष्णकामास्तु गन्धर्वास्तीक्ष्णकोपा भुजङ्गमाः ॥ मृगाणां तु भयं तीक्ष्णं ततस्तीक्ष्णक्षुधा वयम् ॥९॥
स कदाचित्क्षुधार्तस्य ममाहाराभिकाङ्क्षिणः ॥ गतसूर्येऽहनि प्राप्तो मम पुत्रो ह्यनामिषः ॥ १० ॥
स मया वृद्धभावाच्च कोपाच्च परिभर्त्सितः ॥ क्षुत्पिपासापरीतेन कुमारः पततां वरः ॥ ११ ॥
स मामाहारसंरोधात्पीडितं प्रीतिवर्धनः ॥ अनुमान्य यथातत्त्वमिदं वचनमब्रवीत् ॥ १२ ॥
अहं तात यथाकालमामिषार्थी खमाप्लुतः ॥ महेन्द्रस्य गिरेर्द्वारमावृत्य च समास्थितः ॥ १३ ॥
ततः सत्त्वसहस्राणां सागरान्तरचारिणाम् ॥ पन्थानमेकोऽध्यवसं सन्निरोद्धुमवाङ्मुखः ॥ १४ ॥
तत्र कश्चिन्मया दृष्टः सूर्योदयसमप्रभाम् ॥ स्त्रियमादाय गच्छन्वै भिन्नाञ्जनचयप्रभः ॥ १५ ॥

घट्टनात् पूर्वोक्तार्थविरोधस्फोरकत्वाच्च । तथापि ते, व्याख्यास्यन्ते—तत इत्यादि ॥ हृष्टाः रोमाञ्चाञ्चि-

---

वदता उ इतिपदं । यस्य गृध्रराजस्य वदता वाग्मिता । ततः तेन गृध्रराजेन भाषितं वचः निशम्य तेऽप्लवगर्षभाः हृष्टाः । उ विस्मयइत्यर्थः । प्रायः प्रायोपवेशिनां हर्षोत्कर्षं क्वापि नावलोकितइति दैवगतिर्विचित्रेति विसिस्मिरे इतिभावः । यद्वा वदतेतितृतीयैकवचनं गृध्रराजपदेनान्वेति । निशम्य तत्र संहृष्टाइतिपाठे नायासः । वदतइतिपदेवा वदशब्दात्तृतीयान्तात्तसिः । तस्य गृध्रराजेनेत्यनेनान्वयः । वदतइति षष्ठीशेषेसती तृतीयार्थेवा ॥ १ ॥ ति० अब्रवीत् लङ्कायांसीतादर्शनं त्वदेकसाक्षिकमन्यसाक्षिकमपिवेतिदार्ढ्यायापृच्छदित्यर्थः । भूतलादुत्थाय प्रायोपवेशंत्यक्त्वेत्यर्थः ॥ शि० वानरश्रेष्ठः वानरेभ्योऽधिकवयस्कः । गृध्रराजानं समासान्तविधेरनित्यत्वादृजभावः ॥२॥ रामानु० अथजांबवान् लूनपक्षः कन्दरान्तर्गतःसन्संपातिर्दूरवृत्तं सीतापहरणादिकं केनप्रकारेणावगतवानिति मत्वा विशेषतोऽवगन्तुंपृच्छति—क्वसीतेत्यादिना ॥ वि० सीतांकोहरतिस्म । ह्रियमाणाच केनदृष्टा त्वयाऽन्येनापिवा । हृताच क्वावर्ततेइतिसर्वं भवानाख्यातु । सामान्यतःश्रुत्वा प्रायोपवेशादुत्थितानां विशिष्यवदत्वित्यर्थः ॥ ३ ॥ स० सीताप्रतिकृतिनेताऽनङ्गस्मरणइत्याह—कइति । स्वयमिति दाशरथिबाणपदेनेव लक्ष्मणमुक्तपदेनाप्यन्वेति ॥ स्वयंदाशरथिः स्वेच्छयैवदाशरथिर्दशरथापत्यंरामः । तस्य बाणानामित्यत्रैवान्वयोवा । यद्वा दाशरथिपदेन रामरामानुजयोर्ग्रहणं । स्वयंलक्ष्मणमुक्तानांस्वयंलक्ष्मणं स्वस्वनाम रामेतिलक्ष्मणेतिच मुक्तंशिल्पिभिर्येषु तेतथा । " लक्ष्मणंलाञ्छनेनाम्नि " इतिविश्वः ॥ ४ ॥ रामानु० सीताश्रुतिसमाहितान् सीतावृत्तान्तश्रवणेनसमाहितान् ॥ ति० प्रतिसंमुक्तान् त्यक्तप्रायोपवेशान् । सीताश्रुतिसमाहितान् सीताविषयवृत्तान्तश्रवणेसावधानान् पुनराश्वासयन् अन्यसाक्षिकताप्रदर्शनेनभूयःस्वोक्तार्थंप्रत्यापयन् ॥ ५ ॥ ति० वैदेह्याहरणंयथामेमयाश्रुतं येनचममाख्यातं यत्रसाऽऽयतलोचनावर्ततेइतिश्रुत तदपि इह इदानीं । श्रूयतां ॥ ६ ॥ ति० क्षीणःप्राणोबलंपराक्रमश्चयस्यसः ॥ ७ ॥ स० गन्धर्वाः चित्ररथाद्याः । तीक्ष्णकामाः तीक्ष्णः समयासमयपरीक्षांविनाऽऽयास्यन्काम स्त्रीवाञ्छायेषांतेतथा । " स्त्रीकामावैगन्धर्वाः " इतिब्राह्मणात् । ततः ततोप्याधिक्येन । तीक्ष्णा बहुवाराहारहेतु क्षुधा क्षुत्येषांतेतथा ॥ टाबन्तःक्षुधाशब्दः ॥ ९ ॥ रामानु० क्षुधार्तस्यमम । समीपमितिशेषः ॥ शि० अहनि अहोनिमित्तेसूर्ये आगतेसतीतिशेषः । सूर्योदयकालइत्यर्थः । गतः पुत्रः सायमनामिषः प्राप्तः आगतः ॥ १० ॥ ति० यतएवं अतः स मम प्रीतिवर्धनः मया आहारसंरोधात्पीडितः दुर्वचनेनखेदप्रापितःसन् । मामनुमान्य क्षमापयित्वा । यथातत्त्वं

[पा०] १ ख. घ. सहसोत्पत्य. २ क. ख. घ. ङ. छ. झ. ट. गृध्रराजानमब्रवीत्. ग. च. ज. ञ. गृध्रराजंतमब्रवीत्. ३ ग. जानाति. ४ क. जानकीं. ५ छ. झ. ट. म्प्रतिसंमुक्तान्. ६ क. ख. ग. ङ. च. झ. ञ. ट. चायतलोचना. ७ ख. च. छ. ज. ञ. ट. गतःपुत्र. ८ क.—च. ज. ञ. ममचाहारकाङ्क्षिणः. ९ क. ख. ङ.—ट. गतःसूर्ये. १० क. ग. ङ.—ट. समयाहारसंरोधात्पीडितः. ११ ख. ग. प्रीतिवर्धनं. १२ ङ. मामिषार्थे. १३ ङ.—ट. सुसमाश्रितः. ग. चसमाश्रितः. १४ क. ख. घ.—ट. तत्रसत्त्व. १५ ग. नारीमादाय. १६ क.—ट. चयोपमः.

सोहमभ्यवहारार्थी तौ दृष्ट्वा कृतनिश्चयः ॥ तेन साम्ना विनीतेन पन्थानमभियाचितः ॥ १६ ॥
न हि सामोपपन्नानां प्रहर्ता विद्यते क्वचित् ॥ नीचेष्वपि जनः कश्चित्किमङ्ग बत मद्विधः ॥ १७ ॥
स यातस्तेजसा व्योम संक्षिपन्निव वेगतः ॥ अथाहं खचरैर्भूतैरभिगम्य सभाजितः ॥ १८ ॥
दिष्ट्या जीवसि तातेति ह्यब्रुवन्मां महर्षयः ॥ कथंचित्सकलत्रोसौ गतस्ते स्वस्त्यसंशयम् ॥
एवमुक्तस्ततोऽहं तैः सिद्धैः परमशोभनैः ॥ १९ ॥
स च मे रावणो राजा रक्षसां प्रतिवेदितः ॥ हरन्दाशरथेर्भार्यां रामस्य जनकात्मजाम् ॥ २० ॥
भ्रष्टाभरणकौशेयां शोकवेगपराजिताम् ॥ रामलक्ष्मणयोर्नाम क्रोशन्तीं मुक्तमूर्धजाम् ॥ २१ ॥
एष कालात्ययस्तावदिति कालविदां वरः ॥ एतमर्थं समग्रं मे सुपार्श्वः प्रत्यवेदयत् ॥ २२ ॥
तच्छ्रुत्वाऽपि हि मे बुद्धिर्नासीत्काचित्पराक्रमे ॥ अपक्षो हि कथं पक्षी कर्म किंचिदुपक्रमे ॥ २३ ॥
यत्तु शक्यं मया कर्तुं वाग्बुद्धिगुणवर्तिना ॥ श्रूयतां तत्प्रवक्ष्यामि भवतां पौरुषाश्रयम् ॥ २४ ॥
वाङ्मतिभ्यां तु सर्वेषां करिष्यामि प्रियं हि वः ॥ यद्धि दाशरथेः कार्यं मम तन्नात्र संशयः ॥ २५ ॥

ताः । बभूवुरिति शेषः ॥ १—१७ ॥ सभाजितः पूजितः ॥ १८ ॥ असौ सकलत्रः सरक्ष्यवर्गः । अतः कथंचित् गतः । अतस्ते स्वस्त्यासीत् असंशयं । इति मां महर्षयोऽब्रुवन्नितियोजना ॥ १९ ॥ मेमया । प्रतिवेदितः ज्ञातः । सुपार्श्ववचनमिदं ॥ २०—२१ ॥ कालात्ययः कालातिक्रमहेतुः । रावणदर्शनमितिभावः ॥ २२—२४ ॥ सर्वेषां वः युष्माकं । वाङ्मतिभ्यां प्रियं करिष्यामि हि । दाशरथेर्यत्कार्यं तन्ममैव

इदं वक्ष्यमाणं । वचनमब्रवीत् ॥ १२ ॥ ति० तौस्त्रीपुरुषौ । कृतनिश्चयः इमावेव हत्वा पितुरभ्यवहारार्थेनेष्यामीति कृतनिश्चयइत्यर्थः । ततस्तेनविनीतेनसता साम्नैव पन्थानमभियाचितोस्मि । अतएवासौत्यक्तइतिशेषः ॥ १६ ॥ ति० दिष्ट्याजीवति सीतेतिपाठः । दिष्ट्यासीता त्वद्दृष्टिपथप्राप्ता जीवतिस्म । त्वया तद्धननस्येषत्करत्वात् । एवं पूजयित्वा मांमहर्षयोऽब्रुवन् । असौत्वयादृष्टःपुरुषः सकलत्रःकथंचित्कुशलीगतः । अतोसंशयंतेस्वस्त्यस्तु इतिकतकः । अन्येतु दिष्ट्याजीवसितातेतिपाठः । हेतात त्वंदिष्ट्या रावणंप्राप्यापि जीवसीत्यब्रुवन् । यतोसौ सकलत्रः अतोसंशयं त्वां संशयमप्राप्य गतः अतस्ते स्वस्तिजातमित्यर्थमाहुः ॥ स० हेतात वत्स असौ स्वस्ति क्षेमेण । कथंचित्रामोपेक्षितः गतः अधुनाऽध्वनिवर्ततइत्याहुः । सकलत्रइति । कलत्रेण दुर्गस्थानेनलङ्कयासहितः सकलत्रः । अभूदितिशेषः । कथंचित्रावणेनायुध्यतेतिवा । त्वंजीवसीतिमांप्रतिमहर्षयोऽब्रुवन् । इतिअब्रुवन्नित्येतत्सदृशाद्यसंहितनिर्देशाः विवक्षाभावात्साधवोज्ञेयाः । यद्वा कथंचित्सकलत्रः तेनस्वेनैवकलत्रत्वेसंमततत्कइत्यर्थोलभ्यते । 'उभयथापि महर्षयः' 'सिद्धैः परमशोभनैः' इत्यत्रोत्तरत्रचोक्तेर्वक्ष्यमाणत्वान्महत्त्वादिमतांकथमेतेषांसीतायांरावणकलत्रत्वबुद्धिः परबोधनंचकथमितिनिरस्तं ॥ "कलत्रंश्रोणिभार्ययोः । दुर्गस्थानेनृपादीनां" इतिविश्वः ॥ १९ ॥ ति० अतोऽहं भ्रष्टाभरणत्वादिगुणांरामभार्यांपश्यन् स्थितइत्येषतावन्मेकालात्ययः कालातिपातहेतुरितिसमग्रंएतदर्थंवाक्यविदांवरःसुपार्श्वः मेप्रत्यवेदयत् ॥ २१—२२ ॥ स० पराक्रमंश्रुतवतोपिते कुतोनपराक्रमे मतिरुदितेत्यतआह—अपक्षइति । पूर्वंपक्षी इदानीमपक्षो हि यतः कथंचित्कर्मसमारभे प्रारंभंकुर्यां । आरभेदितिपाठे पारोक्षिकयुक्तिरितिमन्तव्यं । परस्मैपदितातु चान्द्री ॥ २३ ॥ स० वाग्बुद्धिगुणवर्तिना वाक्बुद्धिश्चतयोर्गुणायेषांतेआर्याः ताननुवर्तितुंशीलमस्यास्तीति सतथा । तेनमयाकर्तुंयच्छक्यं तत्रतत् श्रूयतां । पौरुषाश्रयं पौरुषस्यपराक्रमस्यआश्रयोयस्मिंस्तत् । यद्वा वाग्बुद्धिगुणवर्तिना वाग्बुद्धिहेतुकोगुणउपकारः तन्मात्रानुवर्तिना । शि० वाग्बुद्धिगुणवर्तिना वचसाबुद्धिगुणेन समीचीनोपदेशादिनावर्तनशीलेनमया ॥ २४ ॥

[पा०] १ ग. ङ. छ. झ. ञ. ट. मभ्यवहारार्थं. २ ङ.—ट. मनुयाचितः. ३ ङ. च. ज. ञ. नच. ४ ङ.—ट. भुवि. ५ क.—ट. वेगितः. ६ क. ग. झ.—ट. खेचरैः. ७ क. ङ. छ. ट. जीवतिसीतेति. ८ क. ङ. च. छ. झ. ञ. ट. अब्रुवन्. ९ छ. झ. ञ. ट. पश्यन्दाशरथेः. १० च. सीतांशोकपरायणां. ञ. सीतांशोकपराजितां. ११ ख. विक्रोशन्तींमुहुर्मुहुः. १२ छ. झ. ट. स्तातइति. च. ज. स्तावद्विद्धि. १३ क. ग. झ. ञ. ट. वाक्यविदांवरः. छ. वाक्यविशारदः. १४ क.—ट. एतदर्थं. १५ क. पुत्रेणोक्तंवनौकसः. १६ ख. ध. अपक्षोहं. १७ ङ. छ. झ. ञ. ट. किंचित्समारभेत्. च. ज. किंचित्समारभे. १८ ग. कामंमयाशक्यं. १९ ख. वशवर्तिना. २० क. ङ.—ट. हिसर्वेषां.

[1]ते भवन्तो मतिश्रेष्ठा बलवन्तो [2]मनस्विनः ॥ प्रेषि[3]ताः कपिराजेन देवैरपि दुरासदाः ॥ २६ ॥
रामलक्ष्मण[4]बाणाश्च निशि[5]ताः कङ्कपत्रिणः ॥ त्रयाणामपि लोकानां [6]पर्याप्तास्त्राणनिग्रहे ॥ २७ ॥
कामं खलु दशग्रीवस्तेजोबलसमन्वितः ॥ भवतां तु समर्थानां न किंचिदपि दुष्करम् ॥ २८ ॥
तदलं कालसङ्गेन क्रियतां बुद्धिनिश्चयः ॥ न हि कर्मसु सज्जन्ते बुद्धिमन्तो भवद्विधाः ॥ २९ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे एकोनषष्टितमः सर्गः ॥ ५९ ॥

षष्टितमः सर्गः ॥ ६० ॥

अङ्गदादीन्प्रतिसंपातिना स्वस्वसीतावृत्तान्तपरिज्ञानकारणनिवेदनारंभः ॥ १ ॥ सूर्यकिरणनिर्दग्धपक्षतया मोहाद्विन्ध्यशिखरेपतितेन षड्रात्रानन्तरं मोहादुत्तीर्णेनसंपातिना तस्यदेशस्य विन्ध्यगिरित्वप्रत्यभिज्ञानम् ॥ २ ॥ ततो गिरिशिखरात्कथंचिच्चिरपरिचितस्य निशाकरनाम्नोमहर्षेराश्रममवतीर्य तच्चरणप्रणामिनं संपातिंप्रति महर्षिणा दग्धपक्षतया कथंचित्संपातित्वप्रत्यभिज्ञानेन तत्पक्षदाहहेतुप्रश्नः ॥ ३ ॥

ततः कृतोदकं स्नातं [7]तं गृध्रं [8]हरियूथपाः ॥ उपविष्टा गिरौ [9]दुर्गे परिवार्य समन्ततः ॥ १ ॥
तमङ्गदमुपासीनं तैः सर्वैर्हरिभिर्वृतम् ॥ जनितप्रत्ययो हर्षात्संपातिः पुनरब्रवीत् ॥ २ ॥
कृत्वा निःशब्दमेकाग्राः शृण्वन्तु हरयो मम ॥ [10]तत्त्वं संकीर्तयिष्यामि यथा जानामि [11]मैथिलीम् ॥३॥
[12]अस्य विन्ध्यस्य शिखरे पतितोस्मि [13]पुरा वने ॥ [14]सूर्यातपपरीताङ्गो निर्दग्धः सूर्यरश्मिभिः ॥ ४ ॥
लब्धसंज्ञस्तु षड्रात्राद्विवशो विह्वलन्निव ॥ वीक्षमाणो दिशः सर्वा नाभिजानामि किंचन ॥ ५ ॥
ततस्तु सागरान्शैलान्नदीः सर्वाः सरांसि च ॥ [15]वनान्युदधिवेलां च [16]समीक्ष्य मतिरागमत् ॥ ६ ॥

॥ २५—२८ ॥ कालसङ्गेन कालविलम्बेन ॥ २९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने एकोनषष्टितमः सर्गः ॥ ५९ ॥

ततः कृतोदकमित्यादि ॥ १ ॥ जनितप्रत्ययः जनितविश्वासो यथा भवति तथाऽब्रवीदितियोजना । वानरदर्शनरूपस्वकार्यतो जनितविश्वास इत्यर्थः ॥ २—४ ॥ विह्वलन्निव मूर्च्छन्निव ॥ ५—६ ॥

स० कपिराजेन सुग्रीवेण । प्रहिताः प्रेषिताः । देवैरपिदुरासदाः । अतोमनस्विनः सीतान्वेषणमानसाः । भवतेतिशेषः ॥२६॥ स० निशिताः शाणोल्लीढाः । विहिताइतिपाठेदधातेर्हिरितिहौ विहिता-कृताइत्यर्थः । विहिताः विशिष्टहितकराः विगतहिताश्च । साध्वसाधूनामितिवा । त्राणेनसहितोनिग्रहः त्राणनिग्रहः तस्मिन् । यद्वा त्रयाणांलोकानांमध्येविहिताः द्वेषिणः लोकानामित्यावर्तते । तेषांत्राणनिग्रहेपर्याप्ताः त्राणनिरोधेसमर्थाइतिवा ॥२७॥ स० भवतांतुसमर्थानामित्यत्र तुशब्देन स्वयंसमर्थानां तत्रापिरामानुगृहीतानांदुष्करंनेतिविशेषंद्योतयति ॥२८॥ ति० सज्जन्ते अलसाभवन्ति ॥ शि० बुद्धिनिश्चयः । बुद्धिजनितनिश्चयविशिष्टः सीतादर्शनोद्योगइत्यर्थः ॥ क्रियतां । कालसङ्गेन कालविलंबेन । अलंनक्रियतामित्यर्थः ॥ २९ ॥ इत्येकोनषष्टितमःसर्गः ॥ ५९ ॥

शि० कृतंउदकं उदकक्रिया येनतं ॥ १ ॥ ती० जनितप्रत्ययः निशाकरमुनिनोक्तप्रकारेण रामदूतवानरागमनदर्शनात्पक्षप्ररोहाच्च निशाकरोक्तार्थेजनितविश्वासः ॥ २ ॥ स० निश्शब्दंकृत्वा नविद्यतेशब्दोयस्मिंस्तन्निश्शब्दंकरणं । तदुत्तरकालः क्त्वाप्रत्ययार्थः । ततश्चाशब्दाभिन्नकरणानन्तरकरणाश्रया भवन्तोभवन्त्विति ॥ ती० स्ववृत्तान्तकथनं सीतावृत्तान्तकथनोपयुक्तमितिद्योतयितुं यथाजानामिमैथिलीमित्युक्तं ॥ ३ ॥ स० कपिप्रवरत्वेनानघेत्यङ्गदमात्रसंबोधनं युक्तं ॥ ४ ॥ ति० विह्वलन्निव परमार्तएवसन् ॥ ५ ॥ रामानु० सागरानित्यत्र सागरमित्यर्थः । विन्ध्यप्रदेशपतितस्य सकलसागरदर्शनस्यानुपपन्नत्वात् । मतिः प्रत्यभिज्ञा ॥ ६ ॥

[पा०] १ क. ग. ङ.—ट. तद्भवन्तो. २ ट. यशस्विनः. ३ क.—घ. सहिताः. ङ.—ठ. प्रहिताः. ४ च. ञ. बाणाहि. ५ ङ.—ज. झ. ट. विहिताः. ६ ग. पर्याप्ताःशत्रुनिग्रहे. ७ ङ. च. ज. ञ. गृध्रंच. ग. गृध्रंतं. ८ ग. हरिपुङ्गवाः. ९ ङ.—ट. रम्ये. १० ङ.—ट. तथ्यं. ११ ख. जानकीं. १२ ख. अहं. १३ छ. झ. ट. पुराऽनघ. क. महावने. १४ ग. ङ.—ठ. सूर्यतापपरीताङ्गः. १५ ङ. च. ज. ञ. वनान्यपिचदेशांश्च. छ. झ. ट. वनानिचप्रदेशांश्च. १६ ङ.—ट. निरीक्ष्यमतिरागता.

हृष्टपक्षिगणाकीर्णः कन्दरान्तरकूटवान् ॥ दक्षिणस्योदधेस्तीरे विन्ध्योऽयमिति निश्चयः ॥ ७ ॥
आसीच्चात्राश्रमं पुण्यं सुरैरपि सुपूजितम् ॥ ऋषिर्निशाकरो नाम यस्मिन्नुग्रतपा भवत् ॥ ८ ॥
अष्टौ वर्षसहस्राणि तेनास्मिन्नृषिणा विना ॥ वसतो मम धर्मज्ञाः स्वर्गते तु निशाकरे ॥ ९ ॥
अवतीर्य च विन्ध्याग्रात्कृच्छ्रेण विषमाच्छनैः ॥ तीक्ष्णदर्भां वसुमतीं दुःखेन पुनरागतः ॥ १० ॥
तमृषिं द्रष्टुकामोस्मि दुःखेनाभ्यागतो भृशम् ॥ जटायुषा मया चैवं बहुशोधिगतो हि सः ॥११॥
तस्याश्रमपदाभ्याशे ववुर्वाताः सुगन्धिनः ॥ वृक्षो वाऽपुष्पितः कश्चिदफलो वा न विद्यते ॥१२॥
उपेत्य चाश्रमं पुण्यं वृक्षमूलमुपाश्रितः ॥ द्रष्टुकामः प्रतीक्षेहं भगवन्तं निशाकरम् ॥ १३ ॥
अथापश्यमदूरस्थमृषिं ज्वलिततेजसम् ॥ कृताभिषेकं दुर्धर्षमुपावृत्तमुदङ्मुखम् ॥ १४ ॥
तमृक्षाः सृमरा व्याघ्राः सिंहा नागाः सरीसृपाः ॥ परिवार्योपगच्छन्ति धातारं प्राणिनो यथा ॥१५॥
ततः प्राप्तमृषिं ज्ञात्वा तानि सत्वानि वै ययुः ॥ प्रविष्टे राजनि यथा सर्वं सामात्यकं बलम् ॥१६॥
ऋषिस्तु दृष्ट्वा मां प्रीतः प्रविष्टश्चाश्रमं पुनः ॥ मुहूर्तमात्रान्निष्क्रम्य ततः कार्यमपृच्छत ॥ १७ ॥
सौम्य वैकल्यतां दृष्ट्वा रोम्णां ते नावगम्यते ॥ अग्निदग्धाविमौ पक्षौ त्वक्चैव व्रणिता तव ॥१८॥
गृध्रौ द्वौ दृष्टपूर्वौ मे मातरिश्वसमौ जवे ॥ गृध्राणां चैव राजानौ भ्रातारौ कामरूपिणौ ॥ १९ ॥
ज्येष्ठो हि त्वं तु संपाते जटायुरनुजस्तव ॥ मानुषं रूपमास्थाय गृह्णीतां चरणौ मम ॥ २० ॥
किं ते व्याधिसमुत्थानं पक्षयोः पतनं कथम् ॥ दण्डो वायं कृतः केन सर्वमाख्याहि पृच्छतः ॥२१॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे षष्टितमः सर्गः ॥ ६० ॥

निश्चयः अभूदिति शेषः ॥७॥ भवन् अभवत् ॥ ८ ॥ वर्षसहस्राणि गतानीति शेषः ॥९—१७॥ विकल एव वैकल्यं । चातुर्वर्ण्यादित्वात् स्वार्थे ष्यञ् । तस्य भावो वैकल्यता । व्रणिता संजातव्रणा । ते नावगम्यत इत्यत्र त इति भिन्नं पदं । हे सौम्य ते रोम्णां वैकल्यतां दृष्ट्वा नावगम्यते । स्वरूपमिति शेषः । रोमविकलत्वहेतुः—अग्निदग्धाविति । दृश्येते इति शेषः । व्रणितेत्यत्र दृश्यत इति शेषः ॥१८—२१॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने षष्टितमः सर्गः ॥ ६० ॥

ति० कन्दराण्युदरेयस्य सचासौकूटवान् शृङ्गवान् ॥ ७ ॥ स० आश्रमं आश्रमः । "आश्रमोस्त्री" इत्यमरः । उग्रतपेतिलुप्तप्रथमाकप्रातिपदिकनिर्देशः । आगमशासनस्यानित्यत्वादडभावोवा संधिरार्षइतिवा । अथवा सुरैरपिपूजितं भवत्सत् आश्रममासीदित्यन्वयः । उग्रतपाऋषिर्यस्मिन्नासीदित्यावृत्त्यान्वयः ॥ ८ ॥ ति० तमृषिंद्रष्टुकामोस्मि द्रष्टुकामोऽभूवमित्यर्थः । अतएवदुःखेन तदभ्याशमभ्यागतः । ननुतद्वासोत्रेतित्वयाकथंज्ञातमतआह—जटायुषेति । अधिगतः प्राप्तः सेवितइत्यर्थः ॥ ११ ॥ स० सुगन्धिनः गन्धएवामस्तितेगन्धिनः । शोभनाश्चतेगन्धिनश्चेतिविग्रहः । योग्यतयाशोभनत्वंगन्धेज्ञेयं । एतेन कथमनित्यत्वंकर्मधारयाद्वे निरितिशङ्काद्वयंपरास्तं ॥ १२ ॥ ति० उदङ्मुखमुपावृत्तं समुद्रेत्वात्वोदङ्मुखतयाप्रत्यावृत्तं ॥ १४ ॥ ति० तस्यस्वसेवायोग्यत्वप्रदर्शनायतिर्यग्योनिसेव्यत्वं तपोमहिमजंदर्शयति—तमृक्षाइति ॥ ती० धातारं पोषकं ययुः प्रापुः ॥ १५ ॥ ति० शरीरके अल्पेशरीरे ॥ प्राणाः चाद्विक्रमबलेअपि । तेदग्धकल्पाः ॥ १८ ॥ ति० अवितः ज्ञातः ॥ २० ॥ ती० किं कीदृशं । व्याधिसमुत्थानं षष्ठीतत्पुरुषः । अयंदण्डोव्रणकरःप्रहारः खेनधृतः केनकृतः । स० अथवा व्याधेःसमुत्थानंयस्मात्तत् रोगकारणं । अयं दण्डः पक्षक्षतिरूपः ॥ २१ ॥ इतिषष्टितमःसर्गः ॥ ६० ॥

[पा०] १ ङ. च. छ. झ. ञ. ट. कन्दरोदरकूटवान्. २ क. ख. ग. ङ.—ट. निश्चितः. ३ ङ. च. छ. झ. ञ. ट. गिरौ. ग. वने. ४ च.—ट. धर्मज्ञे. ५ ग. अवतीर्यतु. ६ ख. चापि. ७ क.—घ. च. छ. झ. ञ. ट. नापुष्पितः. ८ ग. वफलोत्र. ९ क.—ट. दृश्यते. १० क.—ट. प्रतीक्षेच. ११ ग. छ. ज. झ. ट. अथपश्यामिदूरस्थं. ङ. अथापश्यमहंरम्यं. १२ क. ङ. छ. झ. ञ. ट. नानासरीसृपाः. १३ ख. ग. ङ. छ.—ट. दातारं. १४ क. ग. ङ. च. छ. झ. ञ. ट. मांतुष्टः. ख. मांतत्र. १५ ङ. च. छ. झ. ञ. ट. निर्गम्य. १६ ङ.—ट. पक्षौप्राणाश्चापिशरीरके. १७ क. ङ. द्वौगृध्रौ. १८ छ. झ. ट. ज्येष्ठोऽवितस्त्वं. ङ. ञ. ज्येष्ठस्त्वंतुस. १९ क. ख. वपुरास्थाय. २० क. दण्डोयंवा. घ. दग्धोवायं. २१ ख. छ. झ. ट. धृतः. च. हृतः.

एकषष्टितमः सर्गः ॥ ६१ ॥

संपातिना निशाकरमुनिप्रति विस्तरेण स्वपक्षदाहकारणाभिधानपूर्वकं गिरिशिखरात्पतनेन बलपक्षविहीनजटायुरलि-जकलेवरविमोक्षणप्रतिज्ञानम् ॥ १ ॥

ततस्तद्दारुणं कर्म दुष्करं साहसात्कृतम् ॥ आचचक्षे मुनेः सर्वं सूर्यानुगमनं तदा ॥ १ ॥
भगवन्व्रणयुक्तत्वाल्लज्जया व्याकुलेन्द्रियः ॥ परिश्रान्तो न शक्नोमि वचनं प्रतिभाषितुम् ॥ २ ॥
अहं चैव जटायुश्च संघर्षाद्दर्पमोहितौ ॥ आकाशं पतितौ वीरौ जिज्ञासन्तौ पराक्रमम् ॥ ३ ॥
कैलासशिखरे बद्धा मुनीनामग्रतः पणम् ॥ रविः स्यादनुयातव्यो यावदस्तं महागिरिम् ॥ ४ ॥
अथावां युगपत्प्राप्तावपश्याव महीतले ॥ रथचक्रप्रमाणानि नगराणि पृथक्पृथक् ॥ ५ ॥
क्वचिद्वादित्रघोषांश्च ब्रह्मघोषांश्च शुश्रुवः ॥ गायन्तीश्चाङ्गना गृहीः पश्यावो रक्तवाससः ॥ ६ ॥
तूर्णमुत्पत्य चाकाशमादित्यपथमाश्रितौ ॥ आवामालोकयावस्तद्वनं शाद्वलसन्निभम् ॥ ७ ॥
उपलैरिव संछन्ना दृश्यते भूः शिलोच्चयैः ॥ आपगाभिश्च संवीता सूत्रैरिव वसुन्धरा ॥ ८ ॥
हिमवांश्चैव विन्ध्यश्च मेरुश्च सुमहाद्रुमः ॥ भूतले संप्रकाशन्ते नागा इव जलाशये ॥ ९ ॥
तीव्रः खेदश्च खेदश्च भयं चासीत्तदावयोः ॥ समाविशति मोहश्च तमो मूर्च्छा च दारुणा ॥१०॥
न दिग्विज्ञायते याम्या नैर्ऋती न च वारुणी ॥ युगान्ते नियतो लोको हतो दग्ध इवाग्निना ॥११॥
मनश्च मे हतं भूयः सन्निवर्त्य तु संश्रयम् ॥ यत्नेन महता ह्यस्मिन्पुनः संधाय चक्षुषी ॥
यत्नेन महता भूयो रविः समवलोकितः ॥ १२ ॥

ततस्तदित्यादि ॥ १—२ ॥ पतितौ प्राप्तौ ॥ ३—९ ॥ मोहः चित्तविभ्रमः । मूर्च्छा इन्द्रियैः सह मनस उपप्लवः । तमः अज्ञानं ॥ १० ॥ याम्येत्या- दिकं दिगन्तराणामुपलक्षणं । नियतो लोकः नियत-सन्निवेशो लोकः । युगान्ते अग्निना दग्धो हत इव । अदृश्यतेति शेषः ॥ ११ ॥ संश्रयं आश्रयभूतं

ति० तद्दारुणंकर्म इन्द्रेणयुद्धरूपं । अनेनदुष्करं सहसा दर्पात्कृत प्रथममाचचक्षे । तथा तदनन्तरकृतंसूर्यानुगमनसर्वं प्रकृतविन्ध्यपतनप्रयोजनलेनाचचक्षे ॥ स० दारुणंपणंनिधाय दर्पादुत्सर्पणरूपंकूरंकर्म । दुष्करं अनन्यसाध्यं ॥ १ ॥ ति० व्रणयुक्तत्वात् इन्द्रयुद्धेवज्रप्रहारजव्रणयुक्तत्वात् परिश्रान्तः । तथापक्षनाशफलकानुचितकर्मकरणजलज्जयाआकुलेन्द्रियश्चाह प्रतिभाषितुंनशक्नोमि । तथापि कथंचिद्वदीमीतिशेषः ॥ स० व्रणयुक्तत्वात् । तपनतापनजनितव्रणयुक्तत्वात् । लज्जया अन्योन्यस्पर्धयेदंकार्यकृतमितिलज्जया । वचनं सामान्यवचनमुद्दिश्यनशक्नोमि । परिभाषितुंव्यक्तंकुंनशक्नोमीति किम्बिलज्यव्याहृतेनान्वयः ॥ परिभाषितुं सम्यग्वक्तुंनशक्नोमि । वचनंमन्दवचनं श्रृण्वन्वेतिशेषोवा । उच्यतइतिवचनमभिप्रायस्तं परिभाषितुंनशक्नोमीतिवा ॥ २ ॥ ति० संघर्षात् पतनविषयस्पर्धातः । गर्वमोहितौ इन्द्रजयगर्वमोहितौ ॥ स० गर्वमोहितौ अहमहमनवेगाल्पहन्ताविष्टचित्तौ ॥३॥ शि० अस्तंमहागिरिंरविः यावत्स्यात् यावात् । तावदेव अनुयातव्यः आवाभ्यांप्राप्यः ॥ ४ ॥ शि० शाद्वलैः शाखतृणैः । संवृतं आच्छादितमिववनमालोकयावः ॥ महातरवोदूर्वादलवद्दृश्यन्तेइत्यर्थः ॥७॥ स० उपलैः अल्पशिलाभिः । पर्वताअपिस्वर्वैतयादृश्यन्तइतिभावः । सूत्रैः कटिसूत्रप्रायाभिः । आपगाभिः नदीभिः ॥ ८ ॥ स० नागाः गजाः । वक्रतया प्रायःस्थितेःसर्पाश्च ॥ ९ ॥ स० मोहोवैचित्त्यं । समाविशति आविशत् मां । ततः तंजटायुषं दारुणामूर्छाच आविशति आविशदित्यन्वयः । ५५च नपुनरुक्तिः तद्भयात्सामान्यविशेषभावाश्रयणंचनेतिद्रेयं ॥ नकेवलंमां अपितु तंचेति चःसमुच्चये ॥ १० ॥

[पा०] १ क. घ. च.—ट. सहसाकृतं. २ ख. ग. घ. छ. झ. ञ. ट. तथा. ३ ग. झ. ञ. ट. व्याकुलेन्द्रियः. क. ख. ङ. च. ज. व्याकुलेन्द्रियः. ४ ख. ग. ङ.—ट. परिभाषितुं. ५ ङ.—ट. संघर्षाद्दर्वं. ६ ख. आकाशपतनात्. ७ छ. झ. ट. दूरात्. ८ घ. कृत्वा. ९ छ. झ. ञ. अप्यावां. १० ङ. च. छ. झ. ञ. ट. द्वादित्रघोषश्चक्रचिद्भूषणनिस्वनः । गायन्तीः स्वाङ्गनाः. ११ क. च.—ट. पदमास्थितौ. ख —ङ. पथमास्थितौ. १२ क. ङ. घ. ञ. शाद्वलसंस्थितं. च. छ. ज. ट. शाद्वलसंवृतं. १३ ङ. च. ज.—ट. सुमहागिरिः. छ. सुमहान्गिरिः. १४ ख. घ. शोकश्चमोहोमूर्च्छाच. क. ङ. च. ज. ञ शोकश्चमोहान्मूर्च्छाच. ग. शोकश्चमोहान्मूर्च्छाति. छ. झ. ट. मोहश्चततो. १५ छ. ट. नचदिग्ज्ञायते. १६ ङ—ट. नचानेयी- नवारुणी. १७ ख हतदग्धइवा. १८ क. ग. च. ञ, महताप्यस्मिन्. ख. महताक्षणम्. १९ ङ.—ट. न्यनरसंधाय. २० ङ. च. ज. ट. भास्करः प्रति लोकितः.

तुल्यः पृथ्वीप्रमाणेन भास्करः प्रतिभाति नौ ॥ १३ ॥
जटायुर्मामनापृच्छ्य निपपात महीं ततः ॥ तं दृष्ट्वा तूर्णमाकाशादात्मानं मुक्तवानहम् ॥ १४ ॥
पक्षाभ्यां च मया गुप्तो जटायुर्न प्रदह्यते ॥ प्रमादात्तत्र निर्दग्धः पतन्वायुपथादहम् ॥ १५ ॥
आशङ्के तं निपतितं जनस्थाने जटायुषम् ॥ अहं तु पतितो विन्ध्ये दग्धपक्षो जडीकृतः ॥ १६ ॥
राज्येन हीनो भ्राता च पक्षाभ्यां विक्रमेण च ॥ सर्वथा मर्तुमेवेच्छन्पतिष्ये शिखराद्गिरेः ॥ १७ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे एकषष्टितमः सर्गः ॥ ६१ ॥

द्विषष्टितमः सर्गः ॥ ६२ ॥

संपातिना वानरान्प्रति निशाकरेण ध्यानादेव्यत्सीताहरणादिवृत्तान्तपरिज्ञानेन स्वंप्रति पुनःपक्षप्ररोहस्य भविष्यत्त्वाभिधानपूर्वकं वानरेभ्यः सीतावृत्तान्तनिवेदनाय स्वस्य देहत्यागप्रतिषेधतनिवेदनम् ॥ १ ॥

एवमुक्त्वा मुनीश्रेष्ठमरुदं दुःखितो भृशम् ॥ अथ ध्यात्वा मुहूर्तं तु भगवानिदमब्रवीत् ॥ १ ॥
पक्षौ च ते प्रपक्षौ च पुनरन्यौ भविष्यतः ॥ श्रोणाश्च चक्षुषी चैव विक्रमश्च बलं च ते ॥ २ ॥
पुराणे सुमहत्कार्यं भविष्यति मया श्रुतम् ॥ दृष्टं मे तपसा चैव श्रुत्वा च विदितं मम ॥ ३ ॥
राजा दशरथो नाम कश्चिदिक्ष्वाकुनन्दनः ॥ तस्य पुत्रो महातेजा रामो नाम भविष्यति ॥ ४ ॥
अरण्यं च सह भ्रात्रा लक्ष्मणेन गमिष्यति ॥ अस्मिन्नर्थे नियुक्तः सन्पित्रा सत्यपराक्रमः ॥ ५ ॥
नैर्ऋतो रावणो नाम तस्य भार्यां हरिष्यति ॥ राक्षसेन्द्रो जनस्थानादवध्यः सुरदानवैः ॥ ६ ॥
सा च कामैः प्रलोभ्यन्ती भक्ष्यैर्भोज्यैश्च मैथिली ॥ न भोक्ष्यति महाभागा दुःखे मग्ना यशस्विनी ॥ ७ ॥

चक्षुरिन्द्रियं सन्निवर्त्य स्वेन विप्रयुज्य । भूयो भृशं हृतं मे मनः महतायत्नेन अस्मिन् चक्षुषि पुनः संधाय महता यत्नेन भूयो रविः सभवलोकित इति संबन्धः ॥१२—१३॥ निपपात महीं महीं प्रति निपपातेत्यर्थः । पतन्तं दृष्ट्वा अहमाकाशात् पूर्वाधिष्ठिताकाशप्रदेशात् । आत्मानं तूर्णं मुक्तवान् । जटायुषो रक्षणार्थं तदुपरि सत्वरमागच्छमित्यर्थः ॥ १४ ॥ प्रमादात् सूर्यो धक्ष्यतीति बुद्ध्यवधानाभावात् ॥ १५—१७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने एकषष्टितमः सर्गः ॥ ६१ ॥

अस्मिन्नर्थे अरण्यगमने ॥ १—६ ॥ काम्यन्त इति कामैः अपेक्षणीयैः । प्रलोभ्यन्ती प्रलोभ्यमाना ॥७॥

ति० पृथ्व्यत्र जंबूद्वीपावच्छिन्नाबोध्या ॥ १३ ॥ इत्येकषष्टितमःसर्गः ॥ ६१ ॥

ति० पक्षप्रपक्षौ सूक्ष्मपक्षमहापक्षौ ॥ श्रोणाः पुष्टप्राणाः । चक्षुषी उद्भूतशक्तिके ॥२॥ ति० पुराणे नारदादिभिरुच्यमानेभविष्यद्रामचरितरूपेपुराणे ॥ श्रुत्वाविदितं तपसादृष्टं च ॥३॥ स० ॥ सुरदानवैः सुरैस्सहितादानवाच्चौः । एतेन "यैषां च विरोधः शाश्वतिकः" इत्येकवद्भावाभावःकथमितिनिरस्तं ॥ ६ ॥ स० प्रलोभ्यन्ती प्रलोभ्यमाना । प्रलोभयितुंयोग्याःप्रलोभ्याः तद्वदाचरन्ती । वस्तुतस्तु नप्रलोभनीयेत्यर्थः । अदुःखमग्ना भोज्याभावप्रयोज्यदुःखरहिता । नित्यतृप्तलाभस्यदुरन्तलाद्भाऽभोजनमितिमन्तव्यं । भोक्ष्यति भोक्ष्यते ॥ ७ ॥

[पा०] १ ध. मनाहत्य. २ च. ज. प्रति. ३ ख. घ. पक्षाभ्यांतु. ४ क. ङ.—ट. प्रदह्यत. ५ क. अहंनिपतितो. ६ क. ग. ङ.—ट. राज्याच. ७ छ. झ. ट. भृशंदुःखितः. ८ ङ. च. छ. ज. ट. मुहूर्तंच. ९ ख. घ. छ. झ. ट. चक्षुषी चैवप्राणाश्च. क. चक्षुषीचैवतेप्राणाः. १० क. विदितंमया. ११ छ. झ. ट. वर्धनः. १२ ख.—ट. तस्मिन्नर्थे. १३ ख. छ. झ. ट. जनस्थानेऽवध्यः. १४ क. साचप्रलोभितातेन. १५ छ. झ. दुःखभग्ना. क.—च. ज. ञ. ट. दुःखमग्ना.

परमान्नं तु वैदेह्या ज्ञात्वा दास्यति वासवः ॥ यदन्नममृतप्रख्यं सुराणामपि दुर्लभम् ॥ ८ ॥
तदन्नं मैथिली प्राप्य विज्ञायेन्द्रादिदं त्विति ॥ अग्रमुद्धृत्य रामाय भूतले निर्वपिष्यति ॥ ९ ॥
यदि जीवति मे भर्ता लक्ष्मणेन सह प्रभुः ॥ देवत्वं गच्छतोर्वापि तयोरन्नमिदं त्विति ॥ १० ॥
एष्यन्त्यन्वेषकास्तस्या रामदूताः ध्रुवङ्गमाः ॥ आख्येया रामपत्नी त्वया तेभ्यो विहङ्गम ॥ ११ ॥
सर्वथा हि न गन्तव्यमीदृशः क गमिष्यसि ॥ देशकालौ प्रतीक्षस्व पक्षौ त्वं प्रतिपत्स्यसे ॥ १२ ॥
नोत्सहेयमहं कर्तुमद्यैव त्वां सपक्षकम् ॥ इहस्थस्त्वं तु लोकानां हितं कार्यं करिष्यसि ॥ १३ ॥
त्वयापि खलु तत्कार्यं तयोश्च नृपपुत्रयोः ॥ ब्राह्मणानां सुराणां च मुनीनां वासवस्य च ॥ १४ ॥
इच्छाम्यहमपि द्रष्टुं भ्रातरौ रामलक्ष्मणौ ॥ नेच्छे चिरं धारयितुं प्राणांस्त्यक्ष्ये कलेवरम् ॥
महर्षिस्त्वब्रवीदेवं दृष्टतत्त्वार्थदर्शनः ॥ १५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे द्विषष्टितमः सर्गः ॥ ६२ ॥

ज्ञात्वा अन्नग्रहणमित्यादिशेषः ॥ ८-१३ ॥ नृपपुत्रयोः तत्प्रयोजनं त्वयापि कार्यं कर्तव्यं । ब्राह्मणादीनां च कार्यमिति संबन्धः ॥ १४-१५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने द्विषष्टितमः सर्गः ॥ ६२ ॥

ति० परमान्नं पायसं ॥ वासवोदास्यति । स्वपुरुषद्वारेतिशेषः ॥ इन्द्रात् इन्द्रपुरुषात् नतु रावणपुरुषादिति विज्ञाय अभूतलस्पर्शिलादिरूपैर्देवचिह्नैः । रामश्चागत्यैनंहत्वात्वांनयिष्यति । संवत्सरतृप्तिकरमिदमन्नभुक्त्वा देवकार्यसिद्धये मनुष्यभावंभूतवत्या प्राणधर्तव्याः । देवैरपि मनुष्यभावे आहारंविनाजीवितुंनशक्यतेइत्यादिवचनैश्चनिश्चितेत्यर्थः । निर्वपिष्यति दास्यति । नन्वेतत्यामस्मिन्प्राणवासस्योक्तत्वाज्जीवितुंशक्यतएवेतिचेन्न । तथासत्यपि क्षीणतायांदेहवैरूप्ये रावणस्यानुरागभङ्गेन तत्पुण्याक्षये तस्यवधोनस्यादिति रूपलावण्यवद्दानाय तद्दानेनादोषात् । रावणस्तु तथैवरूपादिदर्शनेन महत्तराहाराग्रहणेपि वन्यफलाद्याहारे करोतीतिबुद्ध्या तस्यां नामनुष्यत्वनिश्चयः । एतेनाहारंविनापि पूर्वरूपादिसत्त्वज्ञानेन तस्य तस्यामनुष्यत्वबुद्धौ तत्संबन्धाद्यामेपि तत्त्वबुद्धौ रामतोरावणवधोनस्यादित्यपास्तं ॥ स० नित्यतृप्तापि वासवसेवांनलङ्घयाज्ञाकारेत्याह—परमान्नमिति । ज्ञात्वा सेवामवसितिज्ञात्वेतिशेषः । सर्वान्सुपर्वणोविहाय व्यवहारसिद्ध्यै इन्द्रस्यप्रतिकृतिप्रविष्टत्वात्पायसप्रदोवासवइति बोधयितुं किमतीति वासवग्रहणेनद्योतयतिकविरित्यवधेयं । सीताप्रतिकृतित्वमाश्रितएव सेवेत्यप्यवसेयं । तदन्नंप्राप्य । इन्द्रादितिपञ्चमी हेतौ । इन्द्रहेतुकमिदंदास्यतीतिप्रकृतंदानंविज्ञाय ज्ञात्वा निर्वपिष्यति ॥ ८-९ ॥ ति० उत्सहेयं यदित्यथादेवकार्यायेहस्थातव्यंस्यादिति शेषः । पक्षवत्त्वेहिचापल्याद्गन्तव्यमेवेतोन्यत्रलयेतिभावः ॥ शि० इहस्थस्त्वं लोकानांहितं सीतावृत्तान्तबोधनरूपं । कार्यकरिष्यसि । एतेन पक्षप्राप्तौ तवनिश्चलास्थितिर्नभवितेति सूचितं ॥ १३ ॥ ति० दृष्टतत्त्वार्थदर्शनः दृष्टंसिद्धं तत्त्वार्थदर्शनं यस्य समहर्षिरेवं भाव्यर्थमब्रवीत् । अतोहेतोरहमपि भ्रातरौरामलक्ष्मणौद्रष्टुमिच्छामि । यदि महर्षिरेवंमांप्रति नावक्ष्यत्तदा प्राणांश्चिरंधारयितुं नेच्छे नैच्छं । अपितुकलेवरंत्यक्ष्ये इत्येवेच्छामित्यर्थइतिकतकः । अन्येतु निशाकरवाक्यमेवेदं अहंपदार्थोपिसएवेत्याहुः ॥ १५ ॥ इतिद्विषष्टितमःसर्गः ॥ ६२ ॥

[पा०] १ ङ. च. ज.—ट. परमान्नंच. २ ग. सुराणामति. ३ छ. झ. ट. लक्ष्मणोवापिदेवरः. क. ख. भ्रात्रासौमित्रिणासह. ४ ङ.—ट. एष्यन्तिप्रेषितास्तत्र. ५ ग. ङ. च. ज. ञ. रामभार्याहि. ६ क ख. ग. घ.—ट. सर्वथातु. ७ क. ग.—छ. झ. ञ. ट. उत्सहेयमहं. ८ ट. स्त्वंच. झ. स्त्वंहि. ९ क. ग. ङ. च. ज. ञ. लोकानामिदं. १० ङ. च. ज. ञ. कर्तव्यं. ११ छ. झ. ट. गुरूणांच.

त्रिषष्टितमः सर्गः ॥ ६३ ॥

वानरैःसह संभाषणसमयएव यथामुनिवचनं प्ररूढाभिनवपक्षेणसंपातिना वानरान्प्रति हर्षात्स्वपक्षप्ररोहप्रदर्शनपूर्वकं तस्यदृष्टान्तीकरणात्तत्कार्यसिद्धिनिवेदनेन गतिपरीक्षणाय नभसि समुड्डीनम् ॥ १ ॥ वानरैर्हर्षाद्दक्षिणसमुद्राभिमुख्येन प्रस्थानम् ॥ २ ॥

एतैरन्यैश्च बहुभिर्वाक्यैर्वाक्यविदां वरः ॥ मां प्रशस्याभ्यनुज्ञाप्य प्रविष्टः स स्वमाश्रमम् ॥ १ ॥
कन्दरात्तु विसर्पित्वा पर्वतस्य शनैः शनैः ॥ अहं विन्ध्यं समारुह्य भवतः प्रतिपालये ॥ २ ॥
अद्य त्वेतस्य कालस्य साग्रं वर्षशतं गतम् ॥ देशकालप्रतीक्षोस्मि हृदि कृत्वा मुनेर्वचः ॥ ३ ॥
महाप्रस्थानमासाद्य स्वर्गते तु निशाकरे ॥ मां निर्दहति संतापो वितर्कैर्बहुभिर्वृतम् ॥ ४ ॥
उत्थितां मरणे बुद्धिं मुनिवाक्यैर्निवर्तये ॥ बुद्धिर्या तेन मे दत्ता प्राणानां रक्षणाय तु ॥
सा मेऽपनयते दुःखं दीप्तेवाग्निशिखा तमः ॥ ५ ॥
बुध्यता च मया वीर्यं रावणस्य दुरात्मनः ॥ पुत्रः संतर्जितो वाग्भिर्न त्राता मैथिली कथम् ॥ ६ ॥
तस्या विलपितं श्रुत्वा तौ च सीताविनाकृतौ ॥ न मे दशरथस्नेहात्पुत्रेणोत्पादितं प्रियम् ॥ ७ ॥
तस्य त्वेवं ब्रुवाणस्य संपातेर्वानरैः सह ॥ उत्पेततुस्तदा पक्षौ समक्षं वनचारिणाम् ॥ ८ ॥
स दृष्ट्वा स्वां तनुं पक्षैरुद्गतैररुणच्छदैः ॥ प्रहर्षमतुलं लेभे वानरांश्चेदमब्रवीत् ॥ ९ ॥
ऋषेर्निशाकरस्यैव प्रभावादमितात्मनः ॥ आदित्यरश्मिनिर्दग्धौ पक्षौ मे पुनरुत्थितौ ॥ १० ॥
यौवने वर्तमानस्य ममासीद्यः पराक्रमः ॥ तमेवाद्यानुगच्छामि बलं पौरुषमेव च ॥ ११ ॥
सर्वथा क्रियतां यत्नः सीतामधिगमिष्यथ ॥ पक्षलाभो ममायं वः सिद्धिप्रत्ययकारकः ॥ १२ ॥
इत्युक्त्वा स हरीन्सर्वान्संपातिः पतगोत्तमः ॥ उत्पपात गिरेः शृङ्गाज्जिज्ञासुः खगमो गतिम् ॥ १३ ॥
तस्य तद्वचनं श्रुत्वा प्रीतिसंहृष्टमानसाः ॥ बभूवुर्हरिशार्दूला विक्रमाभ्युदयोन्मुखाः ॥ १४ ॥

एतैरित्यादि ॥ १–२ ॥ पूर्वं निशाकरमुनिप्रयाणा- अतः साग्रं वर्षशतं गतमित्येतदष्टवर्षसहस्रोपलक्षणं नन्तरं अष्टौ वर्षसहस्राणि व्यतीतानीत्युक्तवान् ॥ ३ ॥ वितर्कैः विविधविचारैः ॥ ४–८ ॥ अरुण-

---

ति० मांप्रशस्य नाविदेवकार्यसाधकत्वेनस्तुत्वा । अभ्यनुज्ञाप्य आमन्त्र्य ॥ शि० अनुज्ञाप्य वृत्तान्तंबोधयितुं नियुज्य ॥ १ ॥ स० देशकालौप्रतीक्षतइति देशकालप्रतीक्षः । कर्मण्यण् । देशकालयोःप्रतीक्षायस्यसइतिवा ॥ ३ ॥ स० महाप्रस्थानं अनिवर्त्यमार्गं ॥ ति० संतापः पक्षादिहीनजीवनजः ॥ शि० संतापः मुनिवियोगजनितखेदः ॥ ४ ॥ स० निवर्तये क्रियासंबन्धेलट्सार्वकालिकइतिसंभवत्यतीतार्थता । न्यवर्तयमितितदर्थः ॥ ५ ॥ ति० रावणस्यवीर्यंबुध्यता मत्पुत्रवीर्यादल्पमितिजानता ॥ ६ ॥ स० यद्वा अरुणाश्चतेछदाश्च । तैः । पक्षैः विहायोगमनसहायैः । "पक्षःसहायेपि" इत्यमरः ॥ ९ ॥ स० निशाकरस्य तन्नामकस्य । राजर्षेः राजासन्नपिऋषिधर्मोपेतइतिसतथा । तस्य । यद्वा निशाकरस्यमुनेः राजर्षेः रामस्यच एतत्पक्षेअमितौजसइतिसमुचितार्थं पूर्वार्धेगौणंराजर्षेरित्यपीतिमन्तव्यं । राजभिःपूजितऋषिः राजर्षिस्तस्य । प्रसादात् उपदेशकथाकर्णनजनितात् ॥ १० ॥ ति० गतिंजिज्ञासुः उत्थितपक्षैःप्राग्वत्खगतिंविज्ञातुमिच्छुः । विक्रमसाध्येऽभ्युदये सीताधिगमनरूपे । उन्मुखाः ॥ १४ ॥

[पा०] १ क. एतैश्चान्यैश्च. २ ख—ट. वाक्यविशारदः. ३ छ. झ. ट. स्वमालयं. ४ क. ख. प्रतिलक्षये. ५ ग. छ. विविधैः. ६ क.—ञ. उदितां. ७ क.—ट. प्राणसंरक्षणेमम. क. ग. घ. प्राणसंरक्षणायतु. ८ झ. संहतैः. ९ क. ग. पत्रैः. १० क. ररुणप्रभैः. ११ ख. घ.—ट. निशाकरस्यराजर्षेः. ग. निशाकरस्यचमुनेः. क. निशाकरस्यमहर्षेः. १२ ग. क.—ट. प्रसादादमितौजसः. क. प्रभावादमितौजसः. १३ क.—ट. पक्षौपुनरुपस्थितौ. १४ ग. घ. च.—ट. वाद्यावगच्छामि. ख. वाद्यतुगच्छामि. क. वाद्याधिगच्छामि. १५ क.—घ. च. झं. ञ. ट. तान्हरीन्. १६ क. ख. घ. पततांवरः. १७ क. शृङ्गात्संपातिःखगतिस्तदा. १८ ग. प्रियसंहृष्ट.

अथ पवनसमानविक्रमाः प्लवगवराः प्रतिलब्धपौरुषाः ॥
अभिजिदभिमुखा दिशं ययुर्जनकसुतापरिमार्गणोन्मुखाः ॥ १५ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे त्रिषष्टितमः सर्गः ॥ ६३ ॥

चतुःषष्टितमः सर्गः ॥ ६४ ॥

दुस्तरसमुद्रदर्शनेन विषीदत्सुकपिषु अङ्गदेन कपिवीरसमुदायंप्रति योजनशतोल्लङ्घने सामर्थ्यप्रश्ने केनाप्युत्तराप्रदाने पुनस्तद्बलपराक्रमप्रशंसनपूर्वकं तान्प्रति प्लवने स्वस्वशक्तिनिवेदनचोदना ॥ १ ॥

आख्याता गृध्रराजेन समुत्पत्य प्लवङ्गमाः ॥ संगम्य[2] प्रीतिसंयुक्ता[3] विनेदुः[4] सिंहविक्रमाः[5] ॥ १ ॥
संपातेर्वचनं श्रुत्वा हरयो रावणक्षयम्[6] ॥ हृष्टाः[7] सागरमाजग्मुः सीतादर्शनकाङ्क्षिणः ॥ २ ॥
अभिक्रम्य[8] तु तं देशं ददृशुर्भीमविक्रमाः ॥ कृत्स्नं लोकस्य महतः प्रतिबिम्बमिव स्थितम् ॥ ३ ॥
दक्षिणस्य समुद्रस्य समासाद्योत्तरां दिशम् ॥ सन्निवेशं ततश्चक्रुर्हरिवीरा[9] महाबलाः ॥ ४ ॥
सत्त्वैर्महद्भिर्विकृतैः[11] क्रीडद्भिर्विविधैर्जले[12] ॥ व्यत्यस्तैः[13] सुमहाकायैरूर्मिभिश्च समाकुलम् ॥ ५ ॥
प्रसुप्तमिव चान्यत्र क्रीडन्तमिव चान्यतः ॥ क्वचित्पर्वतमात्रैश्च[14] जलराशिभिरावृतम् ॥ ६ ॥
संकुलं दानवेन्द्रैश्च पातालतलवासिभिः ॥ रोमहर्षकरं दृष्ट्वा विषेदुः कपिकुञ्जराः ॥ ७ ॥
आकाशमिव दुष्पारं सागरं प्रेक्ष्य वानराः ॥ विषेदुः सहसा सर्वे[15] कथं कार्यमिति ब्रुवन् ॥ ८ ॥
विषण्णां[16] वाहिनीं दृष्ट्वा सागरस्य[17] निरीक्षणात् ॥ आश्वासयामास हरीन्भयार्तान्हरिसत्तमः ॥ ९ ॥
तान्विषादेन महता विषण्णान्वानरर्षभान् ॥ उवाच मतिमान्[18] काले वालिसूनुर्महाबलः ॥ १० ॥

च्छदैः अरुणबहिष्पत्रैः ॥ ९–१४ ॥ अभिजिदभिमुखाः अभिजिन्मुहूर्तप्रतीक्षकाः ॥ १५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने त्रिषष्टितमः सर्गः ॥ ६३ ॥

एवं प्रक्षिप्ताः पञ्च सर्गा गताः । एवं कृतोदकं संपातिं स्वस्थानमानीय प्रकृतकार्याय वानरा गता इत्याह—आख्याता इति ॥ समुत्पत्य हर्षेण तत्र लङ्घनं कृत्वा । संगम्य पुनरन्योन्यं समेत्य विनेदुः ॥ १ ॥ हरयः संपातेर्वचनं श्रुत्वा सीतादर्शनकाङ्क्षिणः सन्तः रावणक्षयं रावणनिलयभूतं लङ्काद्वीपमुद्दिश्य सागरं तन्मार्गभूतं सागरं । आजग्मुरिति संबन्धः ॥ २ ॥ प्रतिबिम्बमिव प्रतिनिधिमिव । इदं तटविशेषणं । सर्वलोकस्थसमस्तवस्तुसंपूर्णमित्यर्थः । "प्रतिमानं प्रतिबिम्बं प्रतिमा प्रतियातना प्रतिच्छाया । प्रतिकृतिरर्चा पुंसि प्रतिनिधिरुपमोपमानं स्यात्" इत्यमरः ॥ ३ ॥ सन्निवेशं स्थानं ॥ ४–९ ॥ विषादेन विषादकारणेन

ति० प्रतिलब्धंप्राप्तंपौरुषंपौरुषप्रवृत्तिकालोयैस्ते । अभिजिदभिमुखां अभिजिन्नक्षत्रसंमुखां । दिश दक्षिणां । यद्वा अभिजित् बाहुलकात्कर्मणिक्विप् । अभिजेतव्योरावणः संमुखोयस्यांतांदिशं ॥ १५ ॥ इतित्रिषष्टितमःसर्गः ॥ ६३ ॥

ति० आख्याताः आख्यातसीतावृत्तान्ताः ॥ १ ॥ ति० रावणक्षयं रावणनाशंरावणगृहंचोद्दिश्योक्तंवचनंश्रुत्वा ॥ २ ॥ ति० यत्रमहतोलोकस्यसचन्द्रार्कग्रहस्य कृत्स्नंप्रतिबिंबंस्थितंतंसमुद्रंददृशुः । प्रतिबिंबमवस्थितंइतिप्राचीनःपाठः । प्रतिबिंबमिवस्थितमित्याधुनिकपाठोनयुक्तः । कृत्स्नलोकप्रतिबिंबभावाप्रसिद्धेः ॥ ३ ॥ ति० प्रसुप्तमिवचान्यत्र निस्तरङ्गप्रदेशे । अन्यतः अन्यत्र । पर्वतमात्रैः तत्सदृशैः । जलराशिभिः ऊर्मिभिः ॥ ६ ॥

[पा०] १ ग. छ.—ट. दभिमुखां. २ ङ.—म. संगताः. ३ ख. प्रीतिसंघुष्टाः. ४ ङ. ज. निनेदुः. ५ क. ख. ग. भीमविक्रमाः. ६ घ. रावणालयं. ७ ख. प्रहृष्टाःसागरंजग्मुः. ८ क. ख. ग. अतिक्रम्यतु. ङ.—झ. ट. अभिगम्यतु. ञ. अभिसंगम्य. ९ क. ग. घ. चक्रुःसहितावानरोत्तमाः. १० ङ. म. सर्पैः. ११ ख. घ. विविधैः. १२ ख. घ. विकृतैर्जले. १३ क. घ.—ञ. व्यात्तास्यैः. १४ क. त्पर्वतसंकाशैः. १५ ङ. छ.—ट. सहिताःसर्वे. क. सर्वेदुद्रुवुश्चततस्ततः. १६ क. विद्रुतां. १७ क. सागरस्यचवीक्षणात्. १८ क. वचनंकाले.

न विषादे मनः कार्यं विषादो दोषवत्तमः ॥ विषादो हन्ति पुरुषं बालं क्रुद्ध इवोरगः ॥ ११ ॥
विषादो यं प्रसहते विक्रमे पर्युपस्थिते ॥ तेजसा तस्य हीनस्य पुरुषार्थो न सिध्यति ॥ १२ ॥
तस्यां रात्र्यां व्यतीतायामङ्गदो वानरैः सह ॥ हरिवृद्धैः समागम्य पुनर्मन्त्रममन्त्रयत् ॥ १३ ॥
सा वानराणां ध्वजिनी परिवार्याङ्गदं बभौ ॥ वासवं परिवार्येव मरुतां वाहिनी स्थिता ॥ १४ ॥
कोऽन्यस्तां वानरीं सेनां शक्तः स्तम्भयितुं भवेत् ॥ अन्यत्र वालितनयादन्यत्र च हनूमतः ॥ १५ ॥
ततस्तान्हरिवृद्धांश्च तच्च सैन्यमरिंदमः ॥ अनुमान्याङ्गदः श्रीमान्वाक्यमर्थवदब्रवीत् ॥ १६ ॥
क इदानीं महातेजा लङ्घयिष्यति सागरम् ॥ कः करिष्यति सुग्रीवं सत्यसंधमरिंदमम् ॥ १७ ॥
को वीरो योजनशतं लङ्घयेच्च प्लवङ्गमाः ॥ इमांश्च यूथपान्सर्वान्मोक्षयेत्को महाभयात् ॥ १८ ॥
कस्य प्रभावाद्दारांश्च पुत्रांश्चैव गृहाणि च ॥ इतो निवृत्ताः पश्येम सिद्धार्थाः सुखिनो वयम् ॥१९॥
कस्य प्रसादाद्रामं च लक्ष्मणं च महाबलम् ॥ अभिगच्छेम संहृष्टाः सुग्रीवं च महाबलम् ॥ २० ॥
यदि कश्चित्समर्थो वः सागरप्लवने हरिः ॥ स ददात्विह नः शीघ्रं पुण्यामभयदक्षिणाम् ॥ २१ ॥
अङ्गदस्य वचः श्रुत्वा न कश्चित्किंचिदब्रवीत् ॥ स्तिमितेवाभवत्सर्वा तत्र सा हरिवाहिनी ॥ २२ ॥
पुनरेवाङ्गदः प्राह तान्हरीन्हरिसत्तमः ॥ सर्वे बलवतां श्रेष्ठा भवन्तो दृढविक्रमाः ॥ २३ ॥
व्यपदेश्यकुले जाताः पूजिताश्चाप्यभीक्ष्णशः ॥ न हि वो गमने सङ्गः कदाचित्कस्यचित्क्वचित् ॥
प्लुवध्वं यस्य या शक्तिः प्लवने प्लवगर्षभाः ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे चतुःषष्टितमः सर्गः ॥ ६४ ॥

॥ १०—११ ॥ विषादो यं प्रसहते अभिभवति । न सिद्ध्यतीत्यनन्तरं इतिकरणंबोध्यं ॥ १२—२३ ॥ सङ्गः प्रतिहतिः । प्लुवध्वमित्यार्षो निर्देशः ॥ २४ ॥

इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने चतुःषष्टितमः सर्गः ॥ ६४ ॥

ति० विषादंप्रसहते प्रसह्यविषादेप्रवर्तते । तेजसाहीनस्य विषादवशादितिभावः ॥ १२ ॥ ति० व्यपदेशकुले विगतोपदेशः कलहोयस्मात्तादृशेकुलेपूजिताः राज्ञामहाबलत्वेनसत्कृताः ॥ २४ ॥ इतिचतुष्षष्टितमःसर्गः ॥ ६४ ॥

[पा०] १ क.—घ. विषादेनसः. २ क. छ. झ. ञ. ट. दोषवत्तरः. ३ क. पुरुषान्भीमरूपइवोरगः. ४ क. ख. घ. ङ. झ. ट. योविषादंप्रसहते. क. ज. योविषादेनसहते. ञ. यंविषादोनसहते. ५ क.—ट. समुपस्थिते. ६ क. ग. हरिभिःसह. ख. वानरर्षभः. ७ क. यथा. ८ क. शक्तोभर्त्सयितुं. ९ क.—ञ. ञ. ट. लङ्घयेत. १० च.—ट. मोचयेत. ११ क. ख. ग. क. च. झ. ञ. ट. प्रसादाद्दारांश्च. १२ क. च. क. पश्यामः. १३ क. अभिगच्छाम. १४ क.—ट. वनौकसं. १५ क. घ. समर्थोयः. १६ च.—ट. सातत्र. १७ झ. व्यपदेशकुले. १८ क. शक्तिः. १९ ख. ध. कदाचिदपिकस्यचित्. ङ. च. ज.—ट. कदाचित्कस्यचिद्भवेत्. ग. सर्वेषांचकदाक्वचित्. २० क. गमनेचप्लवङ्गमाः. ख. ग. घ. गमनेप्लवगर्षभाः.

पञ्चषष्टितमः सर्गः ॥ ६५ ॥

अङ्गदचोदनया गजादिजांबवदन्तयूथपेषु एकैकेनोत्तरोत्तरं दशयोजनाधिक्यक्रमेण दशयोजनादिनवतियोजनपर्यन्तं प्लवने स्वस्वशक्तिनिवेदनम् ॥ १ ॥ अङ्गदेन जांबवन्तंप्रति स्वस्य शतयोजनप्लवनेपि शक्तिनिवेदनपूर्वकं प्रतिनिवर्तनेशक्तिसंदेहकथनम् ॥ २ ॥ अङ्गदंप्रति जांबवता लौकिकरीत्यनुसारेण प्रतिनिवर्तनादिषु शक्तिकथनेन प्रशंसनपूर्वकं तस्य स्वामित्वोक्त्या भृत्यकार्येप्रयतनस्यानौचित्योक्तिः ॥ ३ ॥ अङ्गदेन जांबवन्तंप्रति गत्यन्तराभावेनपुनःप्रायोपवेशनस्यैव शरणीकरणीयत्वोक्तिपूर्वकं प्रकृतकार्यसिद्ध्युपायचिन्तनप्रार्थने तेन तंप्रति तदङ्गीकारेण हनुमतश्चोदना ॥ ४ ॥

ततोङ्गदवचः श्रुत्वा सर्वे ते वानरोत्तमाः ॥ स्वं स्वं गतौ समुत्साहमाहुस्तत्र यथाक्रमम् ॥ १ ॥
गजो गवाक्षो गवयः शरभो गन्धमादनः ॥ मैन्दश्च द्विविदश्चैव सुषेणो जांबवांस्तथा ॥ २ ॥
आबभाषे गजस्तत्र प्लवेयं दशयोजनम् ॥ गवाक्षो योजनान्याह गमिष्यामीति विंशतिम् ॥ ३ ॥
गवयो वानरस्तत्र वानरांस्तानुवाच ह ॥ त्रिंशतं तु गमिष्यामि योजनानां प्लवङ्गमाः ॥ ४ ॥
शरभस्तानुवाचाथ वानरान्वानरर्षभः ॥ चत्वारिंशद्गमिष्यामि योजनानां प्लवङ्गमाः ॥ ५ ॥
वानरस्तु महातेजा अब्रवीद्गन्धमादनः ॥ योजनानां गमिष्यामि पञ्चाशत्तु न संशयः ॥ ६ ॥
मैन्दस्तु वानरस्तत्र वानरांस्तानुवाच ह ॥ योजनानां परं षष्टिमहं प्लवितुमुत्सहे ॥ ७ ॥
ततस्तत्र महातेजा द्विविदः प्रत्यभाषत ॥ गमिष्यामि न संदेहः सप्ततिं योजनान्यहम् ॥ ८ ॥
सुषेणस्तु हरिश्रेष्ठः प्रोक्तवान्कपिसत्तमान् ॥ अशीतिं योजनानां तु प्लवेयं प्लवगेश्वराः ॥ ९ ॥
तेषां कथयतां तत्र सर्वांस्ताननुमान्य च ॥ ततो वृद्धतमस्तेषां जांबवान्प्रत्यभाषत ॥ १० ॥
पूर्वमस्माकमप्यासीत्कश्चिद्गतिपराक्रमः ॥ ते वयं वयसः पारमनुप्राप्ताः स्म सांप्रतम् ॥ ११ ॥
किंतु नैवं गते शक्यमिदं कार्यमुपेक्षितुम् ॥ यदर्थं कपिराजश्च रामश्च कृतनिश्चयौ ॥ १२ ॥
सांप्रतं कालभेदेन या गतिस्तां निबोधत ॥ नवतिं योजनानां तु गमिष्यामि न संशयः ॥ १३ ॥
तांस्तु सर्वान्हरिश्रेष्ठाञ्जाम्बवान्पुनरब्रवीत् ॥ न खल्वेतावदेवासीद्गमने मे पराक्रमः ॥ १४ ॥

गतौ गमनविषये । यद्यपि गजादयोपि शतयोजनलङ्घने शक्ताः । "भूतले सागरे वापि शैलेषु च वनेषु च । पातालस्यापिमध्ये वा न ममाच्छिद्यते गतिः" इति सुग्रीवसंनिधौ वानरयूथपैः स्वस्वशक्तेः ख्यापितत्वात् । "नहिवो गमने सङ्गः कदाचित्कस्यचित्कचित्" इति पूर्वमङ्गदोक्तेश्च । तथापि रावणाधिष्ठितलङ्काप्रवेशसीतान्वेषणादिकं दुष्करमन्येनेति तत्साधकहनुमत्प्रोत्साहनाय तथोक्तवन्त इति ध्येयम् ॥ १—९ ॥ तेषां कथयतां तेषु कथयत्सु सत्सु ॥ १०—१४ ॥

स० विंशतिंयोजनानि । "विंशत्याद्याः सदैकत्वे" इत्यमरादेकवचनोपपत्तिः । एवमुत्तरत्रापिज्ञेयं ॥ ३ ॥ स० तेषांकथयतांसतां । तेषामितिनिर्धारणेषष्ठी । तेषांवृद्धतमइति तेषांद्वयस्यान्वयः ॥ १ ॥ स० वयमिति । यद्यपि "अस्मदोद्वयोश्च" इत्यत्रसविशेषणत्वेतुप्रतिषेधइति बहुवचनप्रतिषेधोस्ति । तथापि विधेयविशेषणतावरणेन "शैवावयं—पञ्चाक्षरीजपपराः" इत्या-

[पा०] १ छ. झ. ट. अथाङ्गदवचः. ख. तदाङ्गदवचः. क. अङ्गदस्यवचः. २ ङ.—ट. तेसर्वेवानरर्षभाः. ३ ङ—ट. मूचुस्तत्र. ४ ङ.—ज. ञ. त्रिंशत्तुच. ५ क.—घ. छ. झ. ट. शरभोवानरस्तत्रवानरांस्तानुवाचह. ६ ङ.—ट. नसंशयः. ७ छ. झ. झ. वानरांस्तु. क. वानरांस्तान्महा. ८ छ. झ. ट. महातेजाःसत्वान्कपिसत्तमः. ङ. च. ज. ञ. महातेजाःप्रोक्तवान्कपिसत्तमः क. ग. हरिश्रेष्ठःप्रोक्तवान्हरिसत्तमः. ९ ख. छ. झ. ट. प्रतिजानेहंयोजनानांपराक्रमे. १० ग. ङ. च. ज. ञ. वानर्षभाः. क. घ. प्लवगोत्तमाः. ११ ङ.—ज. ञ. वृद्धतरस्तेषां. ग. घ. वृद्धतमस्तत्र. १२ छ. झ. ट. सांप्रतंकालमस्माकं. ज. संप्राप्ता कालभेदेन. १३ क.—ट. तांश्च. १४ ख. घ. न्कपिश्रेष्ठान्. १५ क. छ. झ. ट. जांबवानिदमब्रवीत्.

मया महाबलेश्चैव यज्ञे विष्णुः सनातनः ॥ प्रदक्षिणीकृतः पूर्वं क्रममाणस्त्रिविक्रमम् ॥ १५ ॥
स इदानीमहं वृद्धः प्लवने मन्दविक्रमः ॥ यौवने च तदासीन्मे बलमप्रतिमं परैः ॥ १६ ॥
संप्रत्येतावतीं शक्तिं गमने तर्कयाम्यहम् ॥ नैतावता च संसिद्धिः कार्यस्यास्य भविष्यति ॥ १७ ॥
अथोचरमुदारार्थमब्रवीदङ्गदस्तदा ॥ अनुमान्य महाप्राज्ञं जांबवन्तं महाकपिः ॥ १८ ॥
अहमेतद्गमिष्यामि योजनानां शतं महत् ॥ निवर्तने तु मे शंक्तिः स्यान्न वेति न निश्चिता ॥ १९ ॥
तमुवाच हरिश्रेष्ठं जांबवान्वाक्यकोविदः ॥ ज्ञायते गमने शक्तिस्तव हर्यृक्षसत्तम ॥ २० ॥
कामं शतं सहस्रं वा नह्येष विधिरुच्यते ॥ योजनानां भवाञ्शक्तो गन्तुं प्रतिनिवर्तितुम् ॥ २१ ॥
न हि प्रेषयिता तात स्वामी प्रेष्यः कथंचन ॥ भवताऽयं जनः सर्वः प्रेष्यः प्लवगसत्तम ॥ २२ ॥
भवान्कलत्रमस्माकं स्वामिभावे व्यवस्थितः ॥ स्वामी कलत्रं सैन्यस्य गतिरेषा परंतप ॥
तस्मात्कलत्रवत्तात प्रतिपाल्यः सदा भवान् ॥ २३ ॥
अपिचैतस्य कार्यस्य भवान्मूलमरिंदम ॥ मूलमर्थस्य संरक्ष्यमेषं कार्यविदां नयः ॥
मूले हि सति सिध्यन्ति गुणाः पुष्पफलोदयाः ॥ २४ ॥
तद्भवानस्य कार्यस्य साधने सत्यविक्रम ॥ बुद्धिविक्रमसंपन्नो हेतुरत्र परंतप ॥ २५ ॥
गुरुश्च गुरुपुत्रश्च त्वं हि नः कपिसत्तम ॥ भवन्तमाश्रित्य वयं समर्था ह्यर्थसाधने ॥ २६ ॥
उक्तवाक्यं महाप्राज्ञं जांबवन्तं महाकपिः ॥ प्रत्युवाचोत्तरं वाक्यं वालिसूनुरथाङ्गदः ॥ २७ ॥
यदि नाहं गमिष्यामि नान्ये वानरपुङ्गवाः ॥ पुनः खल्विदमस्माभिः कार्यं प्रायोपवेशनम् ॥ २८ ॥

त्रयाणां विक्रमाणां समाहारः त्रिविक्रमं ॥ १५–१९ ॥ हर्यृक्षसत्तमेति । ऋक्षत्वं वानरावान्तरजातिः । अतः सुग्रीवादेः ऋक्षराजत्वमिति ॥ २० ॥ भवान् योजनानां शतं सहस्रं वा गन्तुं प्रतिनिवर्तितुंच कामं शक्तः । एष विधिः भृत्यैः स्वामिप्रस्थापनं । नोच्यते न विधीयते ॥ २१ ॥ तदेव विवृणोति—नहीति ॥ ॥ २२ ॥ कलत्रं रक्षणीयं वस्तु ॥ २३–३३ ॥

दिवत्समाधिरषभेयः ॥ ११ ॥ स० जांबवतोबलस्खलनहेतुस्त्रिविक्रमक्रमणमिव तद्भ्रमणकालेमेरुसंताडनंजान्वोः पुराणान्तरोक्तमनुसंधेयमितिमन्दविक्रमइतिवदन्कविः सूचयामासेतिबोध्यं ॥ १५ ॥ स० महाकपिं महान्कपिर्यस्यसतथा नियामकत्वेनमहाकपिसुग्रीवइतिजांबवान्महाकपिरित्यर्थः ॥ १८ ॥ ती० हरिश्रेष्ठइतिजांबवतोव्यपदेशोहरिसाधर्म्यात् । अल्पमन्तरमृक्षाणांहरीणांच । अतएवासौहर्यृक्षसत्तमेत्यङ्गदसंबोधयति । सजातीयस्यहिनिर्धारणंभवति । " ननिर्धारणे " इतिषष्ठीसमासस्यनिषेधेपि मुनिप्रयोगात्साधुत्वं । सप्तमीसमासोवा । स० हर्यृक्षसत्तम हरिणीपिङ्गेअक्षिणीयेषांकपीनां तेषुसत्तमः । यद्वा हर्यृक्षः सिंहइवसत्तमः श्रेष्ठः ॥ २० ॥ ति० भवान्कलत्रं कलत्रवद्दृढस्वीयबलबुद्ध्यायावत्स्वप्राणबलंपरिपाल्यदलयर्थः । स्वामिभावे स्वामित्वे । एतेन लोकेकलत्रस्यभर्तासंसारव्यवहारविषयेआहार्यस्तत्प्रभुत्वंचकलत्रस्येतिदर्शितं । तस्मात्स्वामी सैन्यस्यकलत्रवत्परिपाल्यः । स्वामिनाच कलत्रेणभर्तेवसैन्यमाहार्यं । एषागतिः लोकस्येतिशेषः ॥ शि० कलत्रं जीवरक्ष्यः । किंच कंसुखंलातिददातितदेवत्रं रक्षाकर्तृ । सुखदाता त्राताचेत्यर्थः । सामान्येनपुंसकं ॥ २३ ॥ ति० गुणाः गुणभूताः अप्रधानभूताइतिवावत् ॥ २४ ॥

[पा०] १ छ. झ. ट. मयावैरोचनेयश्चेप्रभविष्णुः. २ क. छ झ. ञ. त्रिविक्रमः. ३ क. घ. ज. इदानींमहावृद्धः. ४ ट. यौवनंच. ५ क. ग. यदासीन्मे. घ. यथासीन्मे. ६ छ. झ. ट. परं. ७ छ. झ. ट. खेतावदेवायशक्यंमेगमनेखतः. ग. क. च. खेतावतीशक्तिर्गमने. ८ क. ग. ङ.—ट. महाप्राज्ञो. ९ ङ.—ट. महाकपिं. १० क. शक्तिर्नस्यादितिमतिर्मम. ११ ख. ग. घ. छ. झ. ट. निश्चितं. १२ च. छ. हरिश्रेष्ठो. १३ ठ. हर्यृक्षसत्तम. १४ क. ङ.—ट. शतसहस्रंवा. १५ च. ज. स्वामीप्रेष्यान्प्रेष्यःकथंचन. १६ घ. यस्मात्कलत्रवत्तत्र. क. ख. तस्मात्कलत्रवत्तत्र. ग. भवान्कलत्रवत्तत्र. ट. यस्मात्कलत्रवत्तात. तस्मात्कलत्रवत्तात. अपिचैतत्कार्यस्य. इत्यनयोरर्धयोःपौर्वापर्यं क. ङ.—ट. पाठेषुदृश्यते. १७ छ. झ. ट. वैतत्स. १८ च. छ. ज. मेवं. १९ ङ.—ट. गुणाःसर्वे. क.—घ. गुणाःपुष्पफलादयः. २० क. ङ.—ट. साधनं. २१ ख. ग. क. च. ज. झ. ट. महाकपिं. २२ क. ख. ध.—ट. नान्योवानरपुङ्गवः.

न ह्यकृत्वा हरिपतेः संदेशं तस्य धीमतः ॥ तत्रापि गत्वा प्राणानां पश्यामि परिरक्षणम् ॥ २९ ॥
स हि प्रसादे चात्यर्थं कोपे च हरिरीश्वरः ॥ अतीत्य तस्य संदेशं विनाशो गमने भवेत् ॥ ३० ॥
तद्यथा ह्यस्य कार्यस्य न भवत्यन्यथा गतिः ॥ तद्भवानेव दृष्टार्थः संचिन्तयितुमर्हति ॥ ३१ ॥
सोऽङ्गदेन तदा वीरः प्रत्युक्तः प्लवगर्षभः ॥ जांबवानुत्तरं वाक्यं प्रोवाचेदं ततोऽङ्गदम् ॥ ३२ ॥
अस्य ते वीर कार्यस्य न किंचित्परिहीयते ॥ एष संचोदयाम्येनं यः कार्यं साधयिष्यति ॥ ३३ ॥
ततः प्रतीतं प्लवतां वरिष्ठमेकान्तमाश्रित्य सुखोपविष्टम् ॥
संचोदयामास हरिप्रवीरो हरिप्रवीरं हनुमन्तमेव ॥ ३४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे पञ्चषष्टितमः सर्गः ॥ ६५ ॥

षट्षष्टितमः सर्गः ॥ ६६ ॥

जांबवता हनुमन्तंप्रति तस्यवायोरञ्जनायांसंभवप्रकारनिरूपणेनसह हनुमन्नामलाभस्य ब्रह्मादिभ्योवरलाभस्यचनिरूपणेन तत्प्रभावप्रशंसनपूर्वकं कपिकुलविपदपनोदनाय जलधितरणचोदना ॥ १ ॥

अनेकशतसाहस्रीं विषण्णां हरिवाहिनीम् ॥ जांबवान्समुदीक्ष्यैवं हनुमन्तमथाब्रवीत् ॥ १ ॥
वीर वानरलोकस्य सर्वशास्त्रविशारद ॥ तूष्णीमेकान्तमाश्रित्य हनुमन्किं न जल्पसि ॥ २ ॥
हनुमन्हरिराजस्य सुग्रीवस्य समो ह्यसि ॥ रामलक्ष्मणयोश्चापि तेजसा च बलेन च ॥ ३ ॥
अरिष्टनेमिनः पुत्रो वैनतेयो महाबलः ॥ गरुत्मानिति विख्यात उत्तमः सर्वपक्षिणाम् ॥ ४ ॥
बहुशो हि मया दृष्टः सागरे स महाबलः ॥ भुजगानुद्धरन्पक्षी महावेगो महायशाः ॥ ५ ॥

प्रतीतं प्रख्यातं ॥ ३४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने पञ्चषष्टितमः सर्गः ॥ ६५ ॥

अनेकेत्यादि ॥ १–३ ॥ अरिष्टनेमिनः काश्यपस्य । नकारान्तत्वमार्षं ॥ ४–५ ॥

ति० यतोभवान्दृष्टार्थः बुद्धिमत्त्वाच्चिरवृद्धत्वाच्च अपरोक्षीकृतसमस्तकृत्याकृत्यतत्त्वार्थइत्यर्थः ॥ ३१ ॥ ति० एकान्तमाश्रित्येति । यूथाद्बहिःक्वचिदितिशेषः ॥ ३४ ॥ इतिपञ्चषष्टितमःसर्गः ॥ ६५ ॥

ति० वीरवानरेति । वानरलोकस्यवीरेत्यन्वयः । निर्धारणेषष्ठी । यद्वा हेवीरवानर लोकस्यकृत्यमुद्दिश्य किंनजल्पसीत्यन्वयः ॥ २ ॥ स० सुग्रीवस्यसमोसि । इतिसंमतमितिशेषः । नकेवलंममतत्समइतिसंमतं । किंतु रामलक्ष्मणयोश्चापीतिसमुच्चयः । रामस्योत्तमत्वेन लक्ष्मणस्याधमत्वेनात्युक्तिनैच्योक्तिप्रसक्तिर्नैवंव्याख्यान इतिमन्तव्यं । सुग्रीवस्यसमइति राजत्वेनबहुमानार्थमुक्तिः । स्तुतिसमयत्वाद्रामलक्ष्मणयोश्चापि समइत्युक्तिर्युक्तेतिवा ॥३॥ स० अरिष्टनेमिनः अरिष्टनेमेः कश्यपस्य । यद्यप्यरिष्टनेमिशब्दः प्रथमाष्टकषष्ठाध्यायषोडशवर्गीयप्रथमर्चद्वितीयार्धे " स्वस्तिनस्तार्क्ष्योऽरिष्टनेमिः " इति तथाऽष्टमाष्टकाष्टमाध्यायषट्त्रिंशत्प्रथमर्चतृतीयपादे "अरिष्टनेमिंपृतनाजमाशुं" इतिगरुडएवायंशब्दःश्रुतः । व्याख्यातंचैतद्द्वयं तथापरैः तथापि गरुडेतार्क्ष्यतार्क्ष्यपुत्रशब्दवदयं पितापुत्रयोरुभयोरपि वाचकइति कश्यपस्येत्युक्तिःसंभवति ॥ यद्वा अरिष्टोऽहिंसितश्चासौनेमःप्रकाशश्च सोस्यास्तीत्यरिष्टनेमी कश्यपस्तस्य । अतइन् । नकर्मधारयादितिसमाहितंप्राक् । " नेमःकीलेऽवधौगर्तेप्रकाशे " इतिविश्वः ॥ ४ ॥ ति० महाबलइति । एकत्र बलंशारीरं परत्राऽऽन्तरमितिभेदः ॥ स० महाबलः महद्बलं उड्डीनमितियावत् । यस्यसतथेत्यन्यतरस्यार्थः । तेन पुनरुक्तिरिव शारीरान्तरत्वाश्रयणंचनेतिज्ञेयं । महाबलः महारूपवान्महास्थौल्यवान्वा । " बलंचन्द्रेरसेरूपेस्थेमनिस्थौल्यसै-

[पा०] १ छ. झ. ञ. ट. नपश्ये. २ च. ज. कोपेपिचहरीश्वरः. ३ ङ. च. ज. ञ. तत्तदा. झ. ट. तत्तथा. ४ क. ग.—च. ज. ञ. तथा. ५ घ. ङ. च. ज. झ. ञ. सुत्तमं. ६ ङ.—ट. तस्य. ७ ङ. छ. झ. ञ. ट. त्परिहास्यते. ८ क. प्रवीरं. ९ ख. झ. ट. ञविदांवर. १० ख. तूर्णमेकान्त. ११ क. ग.—च. ज. ञ. भुजङ्गान्. १२ ङ.—ट. महाबाहुर्महाबलः.

पक्षयोर्यद्बलं तस्य [1]तावद्भुजबलं तव ॥ विक्रमश्चापि [2]वेगश्च [3]न ते तेनावहीयते ॥ ६ ॥
बलं बुद्धिश्च तेजश्च सत्त्वं च [4]हरिपुङ्गव ॥ [5]विशिष्टं सर्वभूतेषु किमात्मानं न [6]बुध्यसे ॥ ७ ॥
[7]अप्सराऽप्सरसां श्रेष्ठा विख्याता पुञ्जिकस्थला ॥ अञ्जनेति परिख्याता पत्नी केसरिणो हरेः ॥ ८ ॥
विख्याता त्रिषु लोकेषु रूपेणाप्रतिमा भुवि ॥ [8]अभिशापादभूत्तात वानरी कामरूपिणी ॥ ९ ॥
दुहिता वानरेन्द्रस्य कुञ्जरस्य महात्मनः ॥ कपित्वे चारुसर्वाङ्गी कदाचित्कामरूपिणी ॥ १० ॥
मानुषं विग्रहं कृत्वा [10]रूपयौवनशालिनी ॥ [11]विचित्रमाल्याभरणा [12]महार्हक्षौमवासिनी ॥
अचरत्पर्वतस्याग्रे प्रावृडम्बुदसन्निभे ॥ ११ ॥
तस्या वस्त्रं विशालाक्ष्याः [13]पीतं रक्तदशं शुभम् ॥ स्थितायाः पर्वतस्याग्रे [14]मारुतोपहरच्छनैः ॥ १२ ॥
स ददर्श [15]ततस्तस्या वृत्तावूरू [16]सुसंहतौ ॥ स्तनौ च पीनौ सहितौ [17]सुजातं चारु चाननम् ॥ १३ ॥
तां [18]विशालायतश्रोणीं तनुमध्यां [19]यशस्विनीम् ॥ दृष्ट्वैव शुभसर्वाङ्गीं पवनः काममोहितः ॥ १४ ॥
स तां भुजाभ्यां [20]दीर्घाभ्यां पर्यष्वजत मारुतः ॥ मन्मथाविष्टसर्वाङ्गो गतात्मा तामनिन्दिताम् ॥ १५ ॥
सा तु तत्रैव संभ्रान्ता [21]सुवृत्ता वाक्यमब्रवीत् ॥ एकपत्नीव्रतमिदं को नाशयितुमिच्छति ॥ १६ ॥
अञ्जनाया वचः श्रुत्वा मारुतः प्रत्यभाषत ॥ न त्वां हिंसामि सुश्रोणि माऽभूत्ते [22]सुभगे भयम् ॥ १७ ॥
[23]मनसाऽस्मि गतो यत्त्वां परिष्वज्य [24]यशस्विनीम् ॥ वीर्यवान्बुद्धिसंपन्न[25]स्तव पुत्रो भविष्यति ॥ १८ ॥

पक्षयोरिति ॥ अत्र समानपदमध्याहार्यं । विक्रमादिकं तेन गरुत्मता समानं । नावहीयते न न्यूनं भवति । तेनेति पञ्चम्यर्थे तृतीया ॥ ६ ॥ विशिष्टं श्रेष्ठं ॥ ७ ॥ अप्सरेति निर्देश आर्षः ॥ ८—११ ॥ रक्तदशं रक्ताग्रं ॥ १२–१४ ॥ तां गतात्मा तद्गतचित्तः । तां पर्यष्वजतेति संबन्धः ॥ १५–१६ ॥ न हिंसामि पातिव्रत्यान्न प्रच्यावयामि ॥ १७ ॥ न केवलं पातिव्रत्यभङ्गाभावः श्रेयोपि भविष्यतीत्याह—वीर्यवानिति

न्ययोः " इतिविश्वः ॥ ५ ॥ ति० भुजवीर्यबलंतवेतिप्राचीनपाठे तस्यपक्षयोर्यद्बलं तवचयद्भुजवीर्यबलं उभयंतुल्यमितिशेषः ॥ ६ ॥ ति० विशिष्टमात्मानं अभिजनबलपराक्रमवैभवविशिष्टमात्मानं । किंनसज्जसेसमुद्रलङ्घनायकिंनसज्जीकरोषीत्यर्थः ॥ ७ ॥ ति० सुसंहतौ सुसंश्लिष्टौ । सहितौपरस्परसंसक्तौ ॥ १३ ॥ स० काममोहितत्वादिप्रदर्शनं देवकार्यार्थमेववायोरितिज्ञातव्यं ॥ १४ ॥ स० पर्यष्वजत आलिलिङ्ग । गतात्मा गर्भरूपेणतद्गतस्वांशः । सतां सद्भिःअनिन्दितां तामित्यन्वयः । कृद्योगलक्षणाषष्ठी । एतेन तामितिनपुनरुक्तमिव । तांगतात्मा तांपर्यष्वजतेति नक्लिष्टान्वयीत्यपिबोध्यं । सतीमितिवाक्वचित्पाठः ॥ ति० मन्मथाविष्टसर्वाङ्गः कामाक्रान्तकृत्स्नज्ञानकर्मेन्द्रियः । अतएव तांगतात्मा तद्गर्भप्रविष्टात्मतेजाबभूव । देवत्वाद्विनापियोनिसंबन्धं निजतेजःप्रवेशनमितिबोध्यं ॥ १५ ॥ ति० त्वांनहिंसामि योनिसंबन्धेन तावकमेकपत्नीव्रतं ननाशयामि । अनेन बलात्पर-

[पा०] १ क. भुजयोस्तद्बलं. झ. ट. भुजवीर्यबलं. २ क. ङ.—ट. तेजश्च. ३ ङ. ज. तेनतेनापहीयते. क. छ. झ. ञ. ट. नतेतेनापहीयते. ४ ख. ग. घ. हरिसत्तम. ५ क. ग. विशिष्टः. ६ ङ. च. छ. झ. ञ. ट. सज्जसे. ७ ख. ब. आसीदप्सरसां. ८ ज. अत्रिशापादभूत्. ९ च. छ. झ. ट. तातकपिले. क. ख. ग. ङ. ञ. तावद्वानरी. १० ग. यौवनोत्तमशालिनी. ११ विचित्रमाल्याभरणा. अचरत्पर्वतस्याग्रे. इत्यर्धयोःपौर्वापर्यं क.—घ. पाठेषुदृश्यते. १२ च.—ट. कदाचित्क्षौमधारिणी. ङ. कदाचित्कामचारिणी. १३ छ. ट. पीतरक्तदशं. १४ क.—घ. च. ज. ञ. ट. मारुतोपाहरत्. १५ ग. तदा तस्याः. १६ क. सुसंस्थितौ. १७ ङ. च. ज. ञ. सुजातौ. १८ झ. ट. बलादायतश्रोणीं. १९ च. ज. ञ. मनस्विनीं. २० क.—घ. पीनाभ्यां. २१ छ. ज. झ. सुव्रता. ञ. संवृता. २२ ङ.—ट. मनसोभयं. २३ क. ग. मारुतोस्मिगतोयस्त्वां. २४ ङ. छ. झ. ञ. ट. यशस्विनि. २५ क. ख. ग. संपन्नःपुत्रस्तव.

महासत्त्वो महातेजा महाबलपराक्रमः ॥ लङ्घने प्लवने चैव भविष्यति मया समः ॥ १९ ॥
एवमुक्ता ततस्तुष्टा जननी ते महाकपे ॥ गुहायां त्वां महाबाहो प्रजज्ञे प्लवगर्षभम् ॥ २० ॥
अभ्युत्थितं ततः सूर्यं बालो दृष्ट्वा महावने ॥ फलं चेति जिघृक्षुस्त्वमुत्प्लुत्याभ्युद्गतो दिवम् ॥२१॥
शतानि त्रीणि गत्वाऽथ योजनानां महाकपे ॥ तेजसा तस्य निर्धूतो न विषादं गतस्ततः ॥ २२ ॥
तावदापततस्तूर्णमन्तरिक्षं महाकपे ॥ क्षिप्तमिन्द्रेण ते वज्रं क्रोधाविष्टेन धीमता ॥ २३ ॥
तदा शैलाग्रशिखरे वामो हनुरभज्यत ॥ ततो हि नामधेयं ते हनुमानिति कीर्त्यते ॥ २४ ॥
ततस्त्वां निहतं दृष्ट्वा वायुर्गन्धवहः स्वयम् ॥ त्रैलोक्ये भृशसंक्रुद्धो न ववौ वै प्रभञ्जनः ॥ २५ ॥
संभ्रान्ताश्च सुराः सर्वे त्रैलोक्ये क्षोभिते सति ॥ प्रसादयन्ति संक्रुद्धं मारुतं भुवनेश्वराः ॥ २६ ॥
प्रसादिते च पवने ब्रह्मा तुभ्यं वरं ददौ ॥ अशस्त्रवध्यतां तात समरे सत्यविक्रम ॥ २७ ॥
वज्रस्य च निपातेन विरुजं त्वां समीक्ष्य च ॥ सहस्रनेत्रः प्रीतात्मा ददौ ते वरमुत्तमम् ॥
स्वच्छन्दतश्च मरणं ते भूयादिति वै प्रभो ॥ २८ ॥
स त्वं केसरिणः पुत्रः क्षेत्रजो भीमविक्रमः ॥ मारुतस्यौरसः पुत्रस्तेजसा चापि तत्समः ॥ २९ ॥
[ईदृशैस्य हि ते तात वर्णयामः कथं बलम् ॥ कार्यं च लोकसंमान्यं कर्तुं शक्तस्त्वमेव हि ॥ ३० ॥
भवाञ्जीवातवेऽस्माकमञ्जनागर्भसंभवः] ॥ त्वं हि वायुसुतो वत्स प्लवने चापि तत्समः ॥ ३१ ॥
वयमद्य गतप्राणा भवान्नस्त्रातु सांप्रतम् ॥ दीक्ष्यविक्रमसंपन्नः पक्षिराज इवापरः ॥ ३२ ॥
त्रिर्विक्रमे मया तात सशैलवनकानना ॥ त्रिस्सप्तकृत्वः पृथिवी परिक्रान्ता प्रदक्षिणम् ॥ ३३ ॥

॥ १८-२१ ॥ शतानि त्रीणि एतदनेकशतयोजनानामुपलक्षणं । " बहुयोजनसाहस्रं क्रामत्येषः " इत्युत्तरकाण्डे वक्ष्यमाणत्वात् ॥ २२-३२ ॥ पृथिवीत्यनेनाण्डकटाहमध्य उक्तः । तस्याः त्रिस्सप्तकृत्वः क्रमणं मध्यप्रदेशे । यद्वा यावती महाबलिभूमिः तावती पृथिवी अत्रविवक्षिता । तस्याः प्रदक्षिणं तद्बहिःप्रदेशेन संगच्छते । यद्वा क्रमणानन्तरं जाम्बवान् विजयघोषणार्थं पृथिवीमात्रप्रदक्षिणं कृतवानितिप्रसिद्धिः ।

पुरुषेणालिङ्गनादावपि नपातिमत्त्वभङ्गः किंतु योनिभोगेनैवेतिसूचितं ॥ १७ ॥ स० महासत्त्व महत् शुद्धं सत्त्वंगुणोयस्यसतथा । चतुर्मुखात्मकत्वाद्ब्रह्मकायोःसत्त्वात्मकत्वं । लङ्घने समुद्रोपरिप्लवने । प्लवने समुद्रादुपर्यधिमन्दगमने ॥ १९ ॥ ति० तत्स्तुष्टा मनसामहादेवतेजस्संक्रमकथनात् ॥ २० ॥ ति० उदयकालिकभास्करस्याम्रफलबुद्धिकृतत्वात्फलबुद्धिविषयत्वं । यथा जातमात्राजादिबालानां प्राचीनवासनयास्तनपानादौप्रवृत्तिस्तथैवास्य जातमात्रस्य वानरोचितफलादानप्रवृत्तिरिति बोध्यं ॥ २१ ॥ ति० तस्य रवेः । तेजसा निर्धूतः क्षिप्तोपि । ततः वायुबलवत्त्वान्नविषादंगतः ॥ शि० योजनानांशतानित्रीणि "अङ्कानांवामतोगतिः" इति न्यायेन शताधिकत्रिसहस्राणिगत्वा । शतानित्रीणीत्यस्य त्रिंशतपरत्वेनव्याख्यानंतु " बहुयोजनसाहस्रं " इत्युत्तरकाण्डेवक्ष्यमाणं विरुध्येत । अनेकशतयोजनानामुपलक्षणमिति भूषणोक्तिस्तु न युक्ता । त्रीणीत्यस्यवैयर्थ्यापत्तेः ॥ २२ ॥ स० क्रोपाविष्टेन शरणागतरक्षणकार्यसाधनसंभृतकोपेन ॥ २३ ॥ स० हनुः गण्डाधोभागः । हनुमान् हनुर्हनूर्वोऽस्यास्तीति सतथा । " हनूमान्हनुमानपि " इति द्विरूपकोशः ॥ २४ ॥ स० गन्धवहः पुत्रघातेनस्वहिंसावहः । प्रभञ्जनः प्रकर्षेणभञ्जयति क्रोपेनेदानींजगदिति प्रगतंभञ्जनंयस्मादितिवासतथा । गन्धवहः पुत्रसंबन्धवहः । गन्धनंहिंसेत्युक्तेर्गन्धोहिंसा ॥२५॥ ति० वज्रस्यनिपातेन । वाद्रिरौनिपातेनच ॥ २८ ॥ स० क्षेत्रजःपुत्रः । औरसः आलिङ्गनसमये उरस्संबन्धेनजातः । " जनेर्ढकाणि-

[पा०] १ ख. घ. भविष्यतिहिमत्तमः, २ ज. मुक्तानुसातुष्टा. ३ घ.—ट. प्लवगर्षभ. ४ क. अभ्युद्यन्तं. ५ ट. मुत्प्लुत्याभ्युत्थितोदिवं. ६ क. ख. ग. ङ. च. ज. ञ. ततोगतः, ७ छ. झ. ञ. स्वयमप्युपगतंतूर्णं. ग. घ. ज. ट. तत्राप्युपगतस्तूर्णं. ख. अथाप्युपगतस्तूर्णं. ८ ङ.—ज. ञ. ट. कोपाविष्टेनचेतसा. झ. कोपाविष्टनतेजसा. ९ ङ.—ज. ञ. ट. कीर्तितं. १० घ. ञ. विक्षतं. ११ क. ङ. च. छ. झ. ञ. ट. क्षुभिते. १२ ख. झ. तंकुद्धं. १३ च.—ट. तवस्यादिति. १४ ख. घ. विभो. १५ इदमर्धत्रयं ङ. च. ज. पाठेषुदृश्यते. १६ क. भवान्वीरतमोस्माकं. १७ ख. वापि. १८ ख. घ.—ञ. भवानस्मासु. क. वानराःसाधुसांप्रतं. १९ ङ. च. ज. ञ. दक्षोविक्रम. ख. ग. घ. तार्क्ष्यविक्रम.

तथा चौषधयोऽस्माभिः संचिता देवशासनात् ॥ निष्पन्नममृतं याभिस्तदासीन्नो महद्बलम् ॥ ३४ ॥
स इदानीमहं वृद्धः परिहीनपराक्रमः ॥ साम्प्रतं कालमसाकं भवान्सर्वगुणान्वितः ॥ ३५ ॥
तद्विजृम्भस्व विक्रान्तः प्लवतामुत्तमोह्यसि ॥ त्वद्वीर्यं द्रष्टुकामेयं सर्ववानरवाहिनी ॥ ३६ ॥
उत्तिष्ठ हरिशार्दूल लङ्घयस्व महार्णवम् ॥ परा हि सर्वभूतानां हनुमन्या गतिस्तव ॥ ३७ ॥
विषण्णा हरयः सर्वे हनूमन्किमुपेक्षसे ॥ विक्रमस्व महावेगो विष्णुस्त्रीन्विक्रमानिव ॥ ३८ ॥

ततस्तु वै जांबवता प्रचोदितः प्रतीतवेगः पवनात्मजः कपिः ॥
प्रहर्षयंस्तां हरिवीरवाहिनीं चकार रूपं महदात्मनस्तदा ॥ ३९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे षट्षष्टितमः सर्गः ॥ ६६ ॥

अन्यत्सर्वमतिरोहितार्थं ॥ ३३—३९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने षट्षष्टितमः सर्गः ॥ ६६ ॥

पतन्त्यसत्पथे " इति ब्रह्मणश्चकेर्यायोर्लोकानुकरणमिदमिति मन्तव्यं ॥ २९ ॥ ति० याभिः सागरेप्रक्षिप्यामृतंनिर्मथ्यं निर्मथनेनलभ्यं ॥ ३४ ॥ ति० साम्प्रतंकालमितिसप्तम्यर्थेद्वितीया । असाकमितिनिर्धारणेषष्ठी । अस्मिन्काले३स्माकंमध्ये मदानेवसर्वगुणान्वितइत्यर्थः ॥ ३५ ॥ स० लङ्घयस्वमहार्णवं । स्वार्थेणिच् । णिचा महार्णवंव्यसनसमुद्रं कपीन्लङ्घयस्वेति जांबवदाशयइतिसूचयति । या तवगतिः समुद्रतरणं सा नकेवलंकपिमोदनमात्रफला । अपितु सर्वभूतानां परा पूरयित्री । अभिमतसेति शेषः । हेहनुमन् या तवगतिः रामाख्यादेवता साः सर्वभूतानांपरा हि यतोस्तत्सेवार्थमुत्तिष्ठेतियोजनावा ॥ ३७ ॥ ति० विषण्णाः अर्थस्यसाधयित्वाहीनाः । किमुपेक्षसे तानितिशेषः ॥ ३८ ॥ ति० कपीनामृषभेण । कपिशब्दोत्रच्छत्रिन्यायेन ऋक्षसाधारणः । रूपं समुद्रतरणोचितमहाविग्रहं । प्रकृतेस्तद्रूपत्वादूपमहत्त्वस्वल्पत्वकरणं नानुपपन्नं । एवं जांबवताहनुमदभिजनपराक्रमादिज्ञापनं तस्यसहजबलाविर्भावाय । तथाज्ञापनंहि तस्यतदाविर्भावकारणमितिदैवकृत समयः । यद्यपीतरदिक्त्रयप्रेषितवानराणामपि सप्तसमुद्रपरवर्त्युदयास्ताचलादिपर्यन्तगमनमुपदिष्टं । तथापि तन्मार्गेसमुद्रमध्ये विंशतित्रिंशदादियोजनेषु पर्वतानांसत्त्वात्तदवलंबेनप्लवने नतयाकष्टं । इहतु निरवलंबशतयोजनप्लवनमन्यासाध्यमितिभावः । अत्रत्या मध्यपर्वतास्तु राक्षसैर्भक्षयित्वा मक्षितादुर्गासिद्धये । प्लवाश्चमक्षिताः । अतएवात्र सुग्रीवेण ते नोक्ताः । अतएव चत्वारिंशेसर्गे पूर्वदिक्प्रेषितवानरान्प्रति समुद्रान्तरगतदेशमुपक्रम्य " गिरिमिर्यैश्चगम्यन्ते प्लवनेनच " इत्युक्तं ॥ स० नकेवलंजांबवदुक्तिमात्रेण । किंतु कपीनामृषभेण सुग्रीवेणचोदितः । यद्वा रूपभेण श्रेष्ठेन वृद्धत्वेनमाननीयेनचोदितः । कपीनां कपिःसुग्रीवः इत स्वामी यस्यास्तां कपिवीरवाहिनींप्रहर्षयन्निल्यन्वयः । पूर्वपद्यात् विष्णुः इवेतिचानुवर्तते । तेनच पवनः आत्मजःपुत्रोयस्यसः विष्णुः त्रिविक्रमः । रूपमिव रूपंचकारेति दृष्टान्तदार्ष्टान्तिकभावःकथितः पुनरुक्तिपरिहारोपि जातइलवसेयं ॥ " अवर्धतोच्चैर्हनुमान्महाद्री " इत्याद्युक्तेः रूपंमहच्चकार स्वीकृतवानित्यर्थः ॥ ३९ ॥ इतिषट्षष्टितमःसर्गः ॥ ६६ ॥

[पा०] १ क. ग.—च. ज.—ट. तदा, २ छ. झ. निर्मथ्यममृतं. ३ ङ. छ. झ. ञ. ट. तदानीनो. ४ क. ग. महाबलं, ५ ज. इदानीमस्म्यहंवृद्धः. ६ क. परिक्षीणपराक्रमः. ७ क. गतिरस्माकं. ८ ङ. च. ज. ञ. गुणाधिकः. ९ ङ.—ट. द्रष्टुकामाद्दि. १० क. ग. ङ.—ट. सर्ववानर. ११ छ. झ. ट. महावेग. १२ क. ख. ग. घ. ज. यथाविष्णुस्त्रिविक्रमे. ग. यथाविष्णुस्त्रिविक्रमः. १३ क. छ. झ. ट. ततःकपीनामृषभेणचोदितः. ग. ततस्तुवैजांबवताभिचोदितः. १४ क.—ट. पवनात्मजस्तदा.

सप्तषष्टितमः सर्गः ॥ ६७ ॥

अलब्धिलङ्घनाय पृथुतरशरीरंपरिगृहीतवताहनुमता वानरनिकरभयापसारणाय निजप्रभावप्रशंसनपूर्वकं महेन्द्रगिरिशिखरारोहणेन सागरतरणोद्यमनं ॥ १ ॥

तं दृष्ट्वा जृम्भमाणं ते क्रमितुं शतयोजनम् ॥ वीर्येणापूर्यमाणं च सहसा वानरोत्तमम् ॥ १ ॥
सहसा शोकमुत्सृज्य प्रहर्षेण समन्विताः ॥ विनेदुस्तुष्टुवुश्चापि हनुमन्तं महाबलम् ॥ २ ॥
प्रहृष्टा विस्मिताश्चैव वीक्षन्ते स्म समन्ततः ॥ त्रिविक्रमकृतोत्साहं नारायणमिव प्रजाः ॥ ३ ॥
संस्तूयमानो हनुमान्व्यवर्धत महाबलः ॥ समाविध्य च लाङ्गूलं हर्षाच्च बलमेयिवान् ॥ ४ ॥
तस्य संस्तूयमानस्य वृद्धैर्वानरपुङ्गवैः ॥ तेजसापूर्यमाणस्य रूपमासीदनुत्तमम् ॥ ५ ॥
यथा विजृम्भते सिंहो विवृद्धो गिरिगह्वरे ॥ मारुतस्यौरसः पुत्रस्तथा संप्रति जृम्भते ॥ ६ ॥
अशोभत मुखं तस्य जृम्भमाणस्य धीमतः ॥ अम्बरीषमिवादीप्तं विधूम इव पावकः ॥ ७ ॥
हरीणामुत्थितो मध्यात्संप्रहृष्टतनूरुहः ॥ अभिवाद्य हरीन्वृद्धान्हनुमानिदमब्रवीत् ॥ ८ ॥
अरुजत्पर्वताग्राणि हुताशनसखोऽनिलः ॥ बलवानप्रमेयश्च वायुराकाशगोचरः ॥ ९ ॥
तस्याहं शीघ्रवेगस्य शीघ्रगस्य महात्मनः ॥ मारुतस्यौरसः पुत्रः प्लवने नास्ति मत्समः ॥ १० ॥

जृम्भमाणं वर्धमानं ॥ १—६ ॥ आदीप्तमम्बरीषमिव स्थितं जृम्भमाणस्य तस्य मुखं विधूमः पावक इव अशोभत । अम्बरीषं भ्राष्ट्रं । "क्लीबेम्बरीषं भ्राष्ट्रो ना" इत्यमरः ॥ ७—८ ॥ अनिलः गमनशीलः । "अन प्राणने" इत्यस्मादौणादिक इलप्रत्ययः ॥ ९ ॥ शीघ्रवेगस्य शीघ्राः वैनतेयादयः तेषां वेग इव वेगो यस्य सः तस्य । तत्साम्यमसहमानस्ततोप्याधिक्यमाह—शीघ्रगस्येति । यद्वा शीघ्रवेगस्य अतएव शीघ्रगस्य ॥ १० ॥

ति० अथगृहीतमहाविग्रहस्यहनुमतोवानरबलाश्वासनाय निजबलप्रख्यापनपूर्वं समुद्रलङ्घनाय महेन्द्रपर्वतारोहणमाह—तमिति । स० जृम्भमाणं एधमानकायं शतयोजनंक्रमितुं एकपातेनगन्तुं । वेगेनापूर्यमाणमित्यनेन वेगकर्तृकपूरणकर्मीभूतमित्यर्थउक्तः । तेन वेगस्यस्वाभाविकतयोद्बोधःसूचितोभवति । सहसेत्यनेनालोचनां सूचयति । तेन कपयः सहसाः हसेनहासेनसहिताइतिवा ॥ १ ॥ स० त्रिविक्रमं कृतोत्साहं कृते त्रिविष्टपादिव्यापनव्यापारे उत्साहोयस्यसतथातं ॥ ३ ॥ स० लाङ्गूलं वालं । समाविध्य विलोल्य । कपिजातिस्वभावोऽयं ॥ ४ ॥ ति० अंबरीषं भ्राष्ट्रं । तदुपमं । अतएव दीप्तं प्रज्वलत् । अङ्गारवर्णप्रतप्तभ्राष्ट्रोपममितियावत् ॥ स० अंबरीषोपमं अंबरीषेणसूर्येणोपमा यस्यसतथा । "अंबरीषः" इत्यौणादिकसूत्रेणनिपातितःशब्दः । "अंबरीषंरणेभ्राष्ट्रे क्लीबंपुंसिनृपान्तरे । नरकस्यप्रभेदेच किशोरेभास्करेपिच । आम्रातकेऽनुपातेच" इतिमेदिनी । "अंबरीषोनृपान्तरे। मार्ताण्डेखण्डपरशौ" इतिविश्वः ॥ भ्राष्ट्रमितिव्याख्या भाष्ट्रकालिम्नस्तदनुरूपत्वायोगाद्विशेषाभिधानानालोचनमूलेत्युपेक्ष्या ॥ शि० तस्य हनूमतः विधूमःपावकइव दीप्तंमुखं अंबरीषोपमं सूर्यसदृशंयथाभवतितथा अशोभत । अंबरीषशब्दार्थस्तु अंबरिणां आकाशवतांनक्षत्रगणानां ईषः तेजसापराभूतत्वंयस्मादिति अंबरिणः सर्वलोकानाकाशचारिणोवा ईषति स्वतेजसाप्राप्नोतीतिवा ॥ ७ ॥ ति० आरुजन् अत्यन्तभिन्दमानः हुताशनस्यसखा उच्यमानगुणोयोवायुर्गमनशीलोऽनिलोस्ति ॥ स० आकाशगोचरः आकाशरूपिण्यां गवि चरतीतिसतथा । अनिष्टत्यच् । आकाशोगोचरोविषयोगम्यत्वेनयस्यसतथा ॥ शि० ननिलीयतइत्यनिलः नित्यइत्यर्थः ॥ ९ ॥ ति० प्लवनेनगुणेनतत्समोस्मि ॥ स० शीघ्रवेगस्य शीघ्रहुतंवेगःप्रवाहोयस्यसतथा । तस्य सरिदादेःसकाशात् शीघ्रगः शीघ्रंगच्छतीतिसतथा । "वेगो जवेप्रवाहेच" इतिविश्वः । यद्वा अहंशीघ्रवेगस्येत्येकंपदं । अहमित्यभिमन्यमानवाचिनाऽभिमानीगृह्यते । तथाच अहमा रुद्रेण शीघ्रवेगंमनः । तस्य सकाशाच्छीघ्रगस्तस्य ॥ १० ॥

[पा०] १ ङ.—ट. वेगेनापूर्यमाणं. २ च.—ट. विनेदुर्विस्मिताश्चापि. ३ क. ख. ग.—ज. ञ. ट. तेवीक्षन्ते. ४ च. ज. त्रिविक्रमे. छ. झ. ञ. ट. त्रिविक्रमं ५ ङ. ञ. न्प्रावर्धत. ६ ग. महाकपिः. ७ ङ.—ट. हर्षाद्बलमुपेयिवान्. ८ ख. ग. सर्वैर्वानर. ९ घ. ङ. छ झ ञ. ट. विवृते. च. ज. वितते. १० ग. तथाऽजृंभतवीर्यवान्. क. तथाप्रतिविजृंभते. ११ क. ख. घ. छ. झ. अंबरीषोपमंदीप्तं. १२ क. कपीन्. ख. ततोवृद्धान्. १३ झ. आरुजन्पर्वताग्राणि. १४ ङ. छ. झ. ञ. ट. तत्समः.

उत्सहेयं हि विस्तीर्णमालिखन्तमिवाम्बरम् ॥ मेरुं गिरिमसङ्गेन परिगन्तुं सहस्रशः ॥ ११ ॥
बाहुवेगप्रणुन्नेन सागरेणाहमुत्सहे ॥ समाप्लावयितुं लोकं सपर्वतनदीह्रदम् ॥ १२ ॥
ममोरुजङ्घवेगेन भविष्यति समुत्थितः ॥ संमुच्छ्रितमहाग्राहः समुद्रो वरुणालयः ॥ १३ ॥
पन्नगाशनमाकाशे पतन्तं पक्षिसेविते ॥ वैनतेयमहं शक्तः परिगन्तुं सहस्रशः ॥ १४ ॥
उदयात्प्रस्थितं वापि ज्वलन्तं रश्मिमालिनम् ॥ अनस्तमितमादित्यमभिगन्तुं समुत्सहे ॥ १५ ॥
ततो भूमिमसंस्पृश्य पुनरागन्तुमुत्सहे ॥ प्रवेगेनैव महता भीमेन प्लवगर्षभाः ॥ १६ ॥
उत्सहेयमतिक्रान्तुं सर्वानाकाशगोचरान् ॥ सागरं शोषयिष्यामि दारयिष्यामि मेदिनीम् ॥ १७ ॥
पर्वतांश्चूर्णयिष्यामि प्लवमानः प्लवङ्गमाः ॥ हरिष्येऽम्यूरुवेगेन प्लवमानो महार्णवम् ॥ १८ ॥
लतानां विविधं पुष्पं पादपानां च सर्वशः ॥ अनुयास्यन्ति मामद्य प्लवमानं विहायसा ॥
भविष्यति हि मे पन्थाः खातेः पन्था इवाम्बरे ॥ १९ ॥

विस्तीर्णमिति मेरुविशेषणं । वानरसेनाभयनिवृत्त्यर्थं स्वोत्कर्षमपि सूच्य निवेदयति ॥ ११—१३ ॥ पन्नगाशनं स्वोचिताहारलाभाय निरधिकत्वरासंपन्नं । यद्वा आहारग्रहणत्वरया सर्वेषां भयावहं पतन्तं नतु वर्तमानं । आकाशे स्वोचितक्षेत्रे । पक्षिसेवित इति स्वपरिकरसंपत्तिरुच्यते । वैनतेयं विनतापुत्रं । अनेन कौमारावस्थायां बलवेगोत्कर्षः सूच्यते । अहं तस्यापिप्राणदातुः पुत्रः । परिगन्तुं परितोगन्तुं प्रदक्षिणीकर्तुं । सहस्रशः एकयत्नेन सहस्रशः । परिगन्तुं शक्तः आजानसिद्धसामर्थ्योस्मि ॥ १४ ॥ उदयात् प्रस्थितं उदयगिरेर्निर्गच्छन्तं । आदित्यं स्वस्थानात्प्राप्य तेन सह गन्तुं प्रारभ्य ततःपूर्वमेवास्तगिरिमासाद्यानस्तमितं ज्वलन्तं रश्मिमालिनमादित्यमभिगन्तुं प्रत्युद्गन्तुं । समुत्सहे । ज्वलन्तमित्यनेन मध्याह्न एवाभिगमनं सूच्यते ॥ १५ ॥ ततः सूर्यप्रत्युद्गमनानन्तरं । भूमिमसंस्पृश्य कुत्राप्यविश्रम्य । भीमेन महता प्रवेगेन प्रारब्धवेगेनैव पुनरागन्तुं पुनरप्येकवारं सूर्यमभिगन्तुमुत्सहइत्यर्थः । शतयोजनस्थां लङ्कां गन्तुं किमुतेति भावः ॥ १६ ॥ आकाशगोचरान् ग्रहनक्षत्रादीन् ॥ १७—१८ ॥ पुष्पमिति

ति० मेरुंगिरिमसङ्गेन मध्येविश्रामायकञ्चित्क्षणमपि स्थितिराहित्येनैव सहस्रशः परिगन्तुमुत्सहे एकेनैववेगेनसहस्रवारंप्रदक्षिणंकर्तुं शक्तोमीत्याशयः ॥ ११ ॥ ति० समुत्थितः अतिक्रान्तवेलः ॥ स० वरुणालयः अब्धिः ॥ समुद्रः मुद्रया उत्तरणायकरिष्यमाणसेतुरेखाचिह्नेन सहवर्ततइति सतथा । तथाहिसंग्रहरामायणे—" सेतुंविधातुंहरिवाहिनीनां पुरैवकुर्वन्निव लक्ष्मरेखां " इति । एतेन नान्यतराधिक्यशङ्का वरुणालयइत्यस्य शुद्धयौगिकत्वाश्रयणेनपरिहारश्चास्मान्नयुक्तौ ॥ १२ ॥ सहस्रशःपरिगन्तुं । एतेन गम्यमुद्दिश्य तदेकपातवेगेन बहुवारं तत्प्रदेशंगत्वा पुनरायातुमहंक्षमइतिवैनतेयादाधिक्यंद्योतयति । "वैनतेयगतिःपरे"ति संपात्युक्तिस्तु पक्षिजात्यपेक्षयेति नतद्विरोधइतिज्ञेयं ॥ ति० पक्षिसेविते आकाशे वैनतेयगतिःपरेत्युक्तस्य परेस्थित्वाततोऽधःपतन्तंपन्नगाशनंवैनतेयमुपर्यधोश्रमणेनसहस्रशःपरिगन्तुंशक्तः । पन्नगाशनंपतन्तमितिपदद्वयेन आमिषार्थं पवनवेगातिशयः सूच्यते ॥ ति० पक्षिसेवितं पक्षिराजं । वैनतेयं आकाशेपतन्तमहमपि सहस्रशःपरिगन्तुंशक्तः । तस्यैकपातं यावदहंसहस्रवारंपतितुंशक्तइतियावत् ॥ १४ ॥ स० प्रवेगेन एकपातेन । भीमेन द्विषतां अभीमेनसतामित्यकारप्रश्लेषाप्रश्लेषाभ्यामर्थद्वयंज्ञेयं ॥ १६ ॥ ति० उत्सहेयमिति । आकाशगोचरान् अतिक्रान्तुंउत्सहे । सागरान्शोषयिष्यामि शोषयितुमुत्सहे । शोषणपूर्वकोत्साहोवात्रार्थः । एवमुत्तरत्रापि तत्तद्वात्रर्थपूर्वकउत्साहोर्थः । अतएव नशोषादिप्रतिज्ञावाक्यत्वमेतस्य ॥ १७ ॥ ति० लतानांविविधंपुष्पं पादपानांच पुष्पंहरिष्यामीत्यन्वयः । तत्पुष्पं वायुवेगेनाहृतंमामनुयास्यति ॥ १९ ॥

[पा०] १ ङ. च. ज. ट. उत्सहेयंतु. २ घ. ङ. च. ज. ञ. वायुवेग. ३ क. समंक्षावयितुं. ४ संमूर्च्छित. झ. ञ. ट. समुत्थित. ५ छ. झ. पक्षिसेवितं. ६ क.—च. ट. चापि. ७ ङ.—ट. महंगन्तुं. ८ ङ. छ. झ. ट. मसंस्पृष्ट्वा. ९ ख. उत्सहेयमभि. क. ङ. उत्सहेयमति. १० ङ.—ट. सागराञ्शोषयिष्यामि. क. ग. घ. सागरान्क्षोभयिष्यामि. ११ क. ग. घ. पर्वतान्क्षंपयिष्यामि. १२ क. ग. हरिष्येचोरुवेगेन. १३ क. ख. ग. छ. झ. ञ. ट. अनुयास्यति. १४ ख. ग. वायोः.

चरन्तं घोरमाकाशमुत्पतिष्यन्तमेव वा ॥ द्रक्ष्यन्ति निपतन्तं च सर्वभूतानि वानराः ॥ २० ॥
महामेघप्रतीकाशं मां च द्रक्ष्यथ वानराः ॥ दिवमावृत्य गच्छन्तं ग्रसमानमिवाम्बरम् ॥ २१ ॥
विधमिष्यामि जीमूतान्कम्पयिष्यामि पर्वतान् ॥ सागरं क्षोभयिष्यामि प्लवमानः समाहितः ॥ २२ ॥
वैनतेयस्य सा शक्तिर्मम या मारुतस्य वा ॥ २३ ॥
[महासंनहनोपेतौ महान्तौ पुरुषर्षभौ ॥ ऋश्यमूकं पुनः शैलं प्लवेयं रामलक्ष्मणौ ॥
नूनं नेष्यामि वैदेहीं रामस्य महिषीं प्रियाम् ॥ २४ ॥]
ऋते सुपर्णराजानं मारुतं वा महाजवम् ॥ न तद्भूतं प्रपश्यामि यन्मां प्लुतमनुव्रजेत् ॥ २५ ॥
निमेषान्तरमात्रेण निरालम्बनमम्बरम् ॥ सहसा निपतिष्यामि घनाद्विद्युदिवोत्थिता ॥ २६ ॥
भविष्यति हि मे रूपं प्लवमानस्य सागरे ॥ विष्णोर्विक्रममाणस्य पुरा त्रीन्विक्रमानिव ॥ २७ ॥
बुद्ध्या चाहं प्रपश्यामि मनश्चेष्टा च मे तथा ॥ अहं द्रक्ष्यामि वैदेहीं प्रमोदध्वं प्लवङ्गमाः ॥ २८ ॥
मारुतस्य समो वेगे गरुडस्य समो जवे ॥ अयुतं योजनानां तु गमिष्यामीति मे मतिः ॥ २९ ॥
वासवस्य सवज्रस्य ब्रह्मणो वा स्वयंभुवः ॥ विक्रम्य सहसा हस्तादमृतं तदिहानये ॥
लङ्कां वाऽपि समुत्क्षिप्य गच्छेयमिति मे मतिः ॥ ३० ॥

आत्येकवचनं ॥ १९ ॥ स्वातेःपन्थाः परिपूर्णतारा- च्छायापथः ॥ २०—२२ ॥ मम [illegible] शक्तिः सा

ति० स्वातेःपन्थाइति । स्वातिपथश्छायापथइत्युच्यते । सतु प्रकीर्णबहुनक्षत्रः । ममपन्थाअपि प्रकीर्णबहुपुष्पकः । चरन्तंमार्गमध्येइत्याकाशंप्रत्युत्पतिष्यन्तमेव ॥ २० ॥ ति० निपतन्तं परेपारेइतिशेषः । द्रक्ष्यन्ति । अनेनोत्पतनपतनयोरेककालत्वोक्त्याऽतिवेगःसूचितः ॥ २१ ॥ ति० वैनतेयस्यवेति । त्रयाणामेवैषांसर्वभूतातिशायिनीशक्तिर्नान्यस्येतिभावः ॥ स० वैनतेयस्येति । साम्येन वायोरुक्तिरुचिता । वैनतेयस्यनैच्येपि पामरापेक्षया दृष्टान्तीकरणमितिज्ञेयं ॥ अत्रोत्तरत्रच मम मारुतस्य वायोरपिसकाशात् वैनतेयस्य । वावेति अप्यर्थे । गरुडस्यापि अशक्तिः शक्त्यभावएवेतिवा ॥ २३ ॥ सुपर्णराजानं समासान्तविधिरनित्यः । सुपर्णराजस्य अनाः चेष्टावा यस्मात्सतथा तंमारुतमृतइत्युभयत्र वायुरेकएव निदर्शनमित्यवसेयं ॥ ऋतेशब्दयोगे द्वितीयोपपत्तिस्तु—ज्ञानसूर्यमृतइत्यनुव्याख्यासुधातइव शब्देन्दुशेखरादितइवास्मत्कृततत्वसंख्यानटिप्पणीतोऽवसेया ॥ २५ ॥ ति० विद्युदुपमया शैघ्र्येणबहुदेशव्याप्तिर्ध्वन्यते । स० निरालंबनं निराधारंयथाभवतितथा निपतिष्यामि । यद्वा निरालंबनमंबरमिति गगनस्वरूपनिरूपणं ॥ घनाद्विद्युदिवेत्यनेन गगनस्यनीरदवन्नीलतां स्वस्यप्रकाशमानतांच सूचयामासत्यवधेयं ॥ २६ ॥ ति० " सतांहिसन्देहपदेषुवस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः " इतिन्यायेनाह—बुद्ध्येति । निश्चयात्मकान्तःकरणेनेत्यर्थः । तथामे मनश्चेष्टा मनोव्यापारोऽनुमानरूपः । किंपश्यसि किंविषयाचतेमनश्चेष्टेत्यत्राह—द्रक्ष्यामीति ॥ स० अहंवैदेहींद्रक्ष्यामि । तथामे मम मनश्चेष्टा मनस्संबन्धिव्यापारोस्ति । अतः प्लवङ्गमाः प्रमोदध्वमित्यन्वयः । ननु मनः संशयंसंपादयति ननिश्चयं । अतःकथं प्रमोदध्वमित्युक्तिरित्यतआह—बुद्ध्येति । अहं बुद्ध्या निश्चयहेतुभूतान्तःकरणविशेषेण । प्रपश्यामि विजानामि । यथोक्तं तृतीयस्कन्धगतस्य "मनोबुद्धिरहङ्कारश्चित्तमित्यन्तरात्मनः । चतुर्धादृश्यतेभेदो वृत्त्यालक्षणरूपया" इति श्लोकस्यतात्पर्ये " बुद्धिरध्यवसानाय संशयंकुरुतेमनः । अभिमानेत्वहङ्कारश्चित्तंस्मरणकारणं " इतिस्कान्द इति । अहमहमिति द्विरभिधानं पृथक्पृथगन्वयाद्युक्तं । समाकर्षणान्वयेसुकरे द्विर्वचनेनाहमेवद्रक्ष्यामि नान्यस्तथाविधोस्तीतिसूच्यते ॥ २८ ॥ ति० वेगजवौ पर्यायौ । अयुतमित्यनेनाप्रमेयबलत्वंप्रकाश्यते नतु परिच्छेदः । वस्तुतस्तदभावात् । रावणोपिवक्ष्यति—" नमारुतेरस्तिगतिप्रमाणं " इति ॥ ती० वेगेमारुतस्यसमः । अहमितिशेषः । अमितबलपराक्रमशाली हनूमान्वस्तुतः स्वोक्तविशेषणविशिष्टोपि दुःखसागरमग्नवानरवाहिनीसंतोषार्थमेतादृशान्यौद्धत्यवचनान्युक्तवान् । " प्रहृष्टाहरयस्तत्र समुदैक्षन्तविस्मिताः " इतिवचनात् " ज्ञातीनांविपुलःशोकस्त्वयातात प्रणाशितः " इति जांबवद्वचनाच्चेत्यवगन्तव्यं ॥ २९ ॥ ति० वासवहस्तेस्वर्गिभोग्यममृतं ब्रह्मणोहस्तेच योगिभोग्यममृतं । तदानयनवचोऽत्युक्त्यलङ्कारपरं ॥ समुत्क्षिप्य स्वस्थानादुत्पाटनपूर्व-

[पा०] १ क. ग. च.—ट. मेवच. २ ख. च ट. महामेरु. ३ ख. घ.—ट. मांद्रक्ष्यध्वंप्लवंगमाः. ४ क. प्रसन्तमिवा. ५ च.—ट. क्षोभयिष्यामि. ६ ग.—छ. झ. ञ. वैनतेयस्यवा. ७ इदमर्धत्रयं ख. पाठेदृश्यते. ८ क. ग. जानेसुपर्णमात्मान. ९ क. ग.—ट. महाबलं. ख. महौजसं. १० ग. घ. नतुभूतं. क. ख. नहिभूतं. ११ क. ख. योमां. १२ क.—ट. सागरं. १३ ग. ङ.—झ. ठ. विष्णोःप्रक्रममाणस्य. १४ क. ग. छ. झ. ञ. ट. तदा. १५ क. च. ज. ञ. त्वहं. १६ क. ग. घ. चापि.

तमेवं वानरश्रेष्ठं गर्जन्तममितौजसम् ॥ प्रहृष्टा हरयस्तत्र समुदैक्षन्त विस्मिताः ॥ ३१ ॥
तस्य तद्वचनं श्रुत्वा ज्ञातीनां शोकनाशनम् ॥ उवाच परिसंहृष्टो जाम्बवान्हरिसत्तमम् ॥ ३२ ॥
वीरकेसरिणः पुत्र हनुमन्मारुतात्मज ॥ ज्ञातीनां विपुलः शोकस्त्वया तात विनाशितः ॥ ३३ ॥
तव कल्याणरुचयः कपिमुख्याः समागताः ॥ मङ्गलं कार्यसिद्ध्यर्थं करिष्यन्ति समाहिताः ॥ ३४ ॥
ऋषीणां च प्रसादेन कपिवृद्धमतेन च ॥ गुरूणां च प्रसादेन प्लवस्व त्वं महार्णवम् ॥ ३५ ॥
स्थास्यामश्चैकपादेन यावदागमनं तव ॥ त्वद्गतानि च सर्वेषां जीवितानि वनौकसाम् ॥ ३६ ॥
ततस्तु हरिशार्दूलस्तानुवाच वनौकसः ॥ नेयं मम मही वेगं लङ्घने धारयिष्यति ॥ ३७ ॥
एतानीह नगस्यास्य शिलासंकटशालिनः ॥ शिखराणि महेन्द्रस्य स्थिराणि च महान्ति च ॥ ३८ ॥
एषु वेगं करिष्यामि महेन्द्रशिखरेष्वहम् ॥ नानाद्रुमविकीर्णेषु धातुनिःष्यन्दशोभिषु ॥ ३९ ॥
एतानि मम निष्पेषं पादयोः प्लवतां वराः ॥ प्लवतो धारयिष्यन्ति योजनानामितः शतम् ॥ ४० ॥
ततस्तं मारुतप्रख्यः स हरिर्मारुतात्मजः ॥ आरुरोह नगश्रेष्ठं महेन्द्रमरिमर्दनः ॥ ४१ ॥
[illegible]विधैर्वृक्षैर्मृगसेवितशाद्वलम् ॥ लताकुसुमसंबाधं नित्यपुष्पफलद्रुमम् ॥ ४२ ॥
सिंहशार्दूल[illegible]तं मत्तमातङ्गसेवितम् ॥ मत्तद्विजगणोद्घुष्टं सलिलोत्पीडसंकुलम् ॥ ४३ ॥
महद्भिरुच्छ्रितं शृङ्गैर्महेन्द्रं स महाबलः ॥ विचचार हरिश्रेष्ठो महेन्द्रसमविक्रमः ॥ ४४ ॥

मारुतस्य वैनतेयस्य वेति संबन्धः ॥ २३—३५ ॥ स्थास्यामश्चैकपादेनातथा सत्वराः स्मेत्यर्थः ॥३६–३७॥ शिलासंकटशालिनः शिलातुङ्गप्रदेशभूयिष्ठस्य । "संकटो दन्तुरे तुङ्गे विपद्रोगविशेषयोः" इति विश्वः ॥ ३८—४२ ॥ वृतमित्यादि ॥ सलिलोत्पीडैः सलिलप्रवाहैः संकुलम् ॥ ४३—४६ ॥

कंगृहीत्वा । यद्वाततःपरतोपिगच्छेयं ॥ स० सवज्रस्यवासवस्य इन्द्रस्य स्वयंभुवोब्रह्मणश्च हस्तात्सहसा झटिति । अमृतं देवान्नं । इह मह्यां । आनये आनेष्यामि । सवज्रस्येत्यनेन पूर्वक्षिप्तंमदुपरिनकार्यकारिजातमितिस्मारयति । ब्रह्मणो हस्तात् विक्रम्य पराक्रमं कृत्वा । सहसाअमृतं स्वयं निस्सहायः । भुवः कर्मणिषष्ठी । भूमिमानये । इह एतत्काले भुवः भूप्रदेशानितिवा । बहुवचनमाद्यर्थे । भूम्यादिकंवा ॥ ३० ॥ ति० वेगवन्नितिसंबुद्धिः ॥ ३३ ॥ ति० त्वत्संबन्धिन्यांकल्याणवृद्धौ रुचिरभिलाषोयेषांते । यद्वा तवकल्याणंवाञ्छितारः ॥ स० अर्थसिद्ध्यर्थं रामरामासंदर्शनार्थसिद्ध्यर्थं । मङ्गलानि मङ्गलहेतून् ॥३४॥ स० ऋषीणां रावणोपद्रुततत्संहारकामानामृषीणां । कपिवृद्धाः कपिषुबहुवयस्काः तेषांमतेन तद्बोधितलग्नादिसंमत्या ॥ ३५ ॥ स० एकपादेन । अनेन तीव्रं त्वदागमनेनमाध्यमिति सूचयन्तीतिसूच्यते । त्वद्गतानि प्रेमविशेषादुक्तिर्लोके प्राणरूपत्वाद्धनूमतिवास्तविकीतिज्ञेयं ॥ ति० एकपादेनस्थास्यामः त्वरयाप्रियंश्रोतुमेकपादेनस्थित्वा तपश्चरिष्यामइत्यर्थः ॥ ३६ ॥ स० महेन्द्रस्य तन्नामपर्वतस्याग्रेषु महेन्द्रशिखरेषुवेगंगमिष्यामि तानिमहेन्द्रस्यशृङ्गाणिस्थिराणि महान्तिचेत्यन्वयः । महान्ति परिमाणतः । पूज्यानीतिवा । स्थिराणि मद्वेगसहनशक्तिमन्ति । औत्सुक्यातिशयवशेन महेन्द्रस्यशिखराणीत्युक्तिः पुनरितिज्ञेयं ॥ शिलासंकटशालिनः शिलानांसंकटाः उन्नतप्रदेशाः तै शालन्तेशोभन्तइतितेतथा । "सङ्कटोदन्तुरेतुङ्गे" इतिनिघण्टुः । संकटं समूहोवा ॥ ३८—३९ ॥ ती० सलिलोत्पीडसंकुलं तत्रतत्रनिस्सृतनिर्झरसलिलसंकुलं ॥ ४३ ॥ ती० उच्छ्रितोमहाबलोहनूमान् महेन्द्रस्यमहद्भिश्शृङ्गैर्विचचार शृङ्गाच्छृङ्गान्तरंजगाम ॥ ४४ ॥

[पा०] १ छ. झ. ट. मसितप्रभं. २ क. ख. ग. ङ.—ट. तच्चास्यवचनंश्रुत्वा. घ. तच्छ्रुत्वावचनंतस्य. ३ ङ.—ट. न्प्लवगेश्वरः. क.—घ. न्हरिसत्तमः. ४ ख.—ट. वेगवन्मारुता. ५ क. ग. ङ.—ट. प्रणाशितः. ६ क. समाहिताः. ७ ख. छ. झ. ट. मङ्गलान्यर्थसिद्ध्यर्थं. ८ छ. झ. ट. संप्लवत्वं. ९ छ. झ. ततश्च. क. ततस्स. १० क. घ.—झ. ट. कोपिलोकेनमेवेगं प्लवने. ११ ट. येषु. १२ ङ.—ट. गमिष्यामि. १३ ख. ङ.—ट. ममवेगंहिशिखराणिमहान्तिच. १४ ङ.—ट. ततस्तु. १५ क. गिरिश्रेष्ठं. १६ ख. ग. ङ.—ट. नानाविधैःपुष्पैः. १७ ङ.—ट. शार्दूलसहितं. १८ क. छ. झ. ञ. ट. उच्छ्रितः. १९ घ. ङ. छ.—ट. महेन्द्रस्य.

पादाभ्यां पीडितस्तेन महाशैलो महात्मनः ॥ राज सिंहाभिहतो महान्मत्त इव द्विपः ॥ ४५ ॥
मुमोच सलिलोत्पीडान्निष्प्रकीर्णशिलोच्चयः ॥ वित्रस्तमृगमातङ्गः प्रकम्पितमहाद्रुमः ॥ ४६ ॥
नागगन्धर्वमिथुनैः पानसंसर्गकर्कशैः ॥ उत्पतद्भिश्च विहगैर्विद्याधरगणैरपि ॥ ४७ ॥
त्यज्यमानमहासानुः संनिलीनमहोरगः ॥ चलभ्रुकशिलोद्घातस्तदाभूत्स महागिरिः ॥ ४८ ॥
निःश्वसद्भिस्तदार्तैस्तु भुजङ्गैर्धनिःसृतैः ॥ सपताक इवाभाति स तदा धरणीधरः ॥ ४९ ॥
ऋषिभिस्त्रासंभ्रान्तैस्त्यज्यमानः शिलोच्चयः ॥ सीदन्महति कान्तारे सार्थहीन इवाध्वगः ॥ ५० ॥

स वेगवान्वेगसमाहितात्मा हरिप्रवीरः परवीरहन्ता ॥
मनः समाधाय महानुभावो जगाम लङ्कां मनसा मनस्वी ॥ ५१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये चतुर्विंशत्सहस्रिकायां संहितायां
किष्किन्धाकाण्डे सप्तषष्टितमः सर्गः ॥ ६७ ॥

इति किष्किन्धाकाण्डः समाप्तः ॥ ४ ॥

पानसंसर्गकर्कशैः पानसंसर्गदृढैः । "कर्कशं कठिनं क्रूरं कठोरं निष्ठुरं दृढं" इत्यमरः । पानप्रवृत्तौ दृढाभिनिवेशैरित्यर्थः ॥ ४७ ॥ उद्घातः समूहः ॥४८—४९॥ सार्थहीनः । अभूदिति शेषः ॥ ५० ॥ वेगसमाहितात्मा वेगविषये समर्पितमनाः । मनः समाधाय मनः समाहितं कृत्वा ॥५१॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे सुन्दर-किष्किन्धाकाण्डव्याख्याने सप्तषष्टितमः सर्गः ॥ ६७ ॥

इत्थं शठारिगुरुवर्यपदारविन्दसेवारसाधिगतसर्वरहस्यबोधः । गोविन्दराजविबुधः प्रमुदे बुधानां कैष्किन्धकाण्डविषयां विततान टीकाम् ॥ १ ॥

ति० रराज स्ववर्तिप्राणिशब्देनेतिशेषः ॥ ४५ ॥ स० पानेन संसर्गे परस्पररतौ कर्कशैः आसक्तैः ॥ ति० पानेसंसर्गेचकर्कशैः आसक्तैः । गन्धर्वाणांतथात्वंच स्वभावः ॥ ४७ ॥ श्रि० धरणीधरः समहेन्द्रःनिश्वसद्भिः भीत्यानिश्वासंप्राप्नुवद्भिः । अतएवार्तैरितस्ततः कथमिदंजातमितिदर्शनायनिस्सारितोर्ध्वभागैः । भुजगैः सपताकः पताकाभिस्सहितइवाभाति ॥ ४९ ॥ ती० सार्थहीनः सहायहीनः । अध्वगः पथिकइव । अभूदितिशेषः ॥ ५० ॥ इतिसप्तषष्टितमःसर्गः ॥ ६७ ॥

[पा०] १ ङ.—ट. बाहुभ्यां. २ क. ग. ङ.—ट. महात्मना. ३ क. ङ. ञ. ट. रराज. ४ क. ख. ग. ङ.—ज. ञ. महामतइव. ५ ख. ङ. च. ज. झ. ञ. नानागन्धर्व. ६ क. च.—ठ. उत्पतद्भिर्विहङ्गैश्च. ७ क. ख. स्कन्धलीनमहोरगः. ८ ख. निष्पतद्भिस्तदार्तैस्तु. ग. ङ.—ट. निश्वसद्भिस्तदार्तैस्तु. ९ क. आसीन्महति. १० ख. पवनात्मजःकपिः. ११ क. ततः. १२ ङ.—ज. हनूमान्.

इदं किष्किन्धाकाण्डम् कुंभघोणस्थेन टी. आर्. कृष्णाचार्येण मुंबय्यां निर्णयसागरमुद्रायन्त्रे मुद्रापितम् । शकाब्दाः १८३४ सन १९१२.

CENTRAL ARCHAEOLOGICAL LIBRARY New Delhi

SV I

Cat
N 17/2/76

Central Archaeological Library,
NEW DELHI. 9046
Call No. Sa & Kr / Val / K.V
Author— Krishnacharya, T.R
Title— Srimad Valmiki Rama-ayana.

"A book that is shut is but a block"

CENTRAL ARCHAEOLOGICAL LIBRARY
GOVT. OF INDIA
Department of Archaeology
NEW DELHI.

Please help us to keep the book clean and moving.

S. B., 148, N. DELHI.